# अभिज्ञानशकुन्तलम् ।

महाकवि-श्रीकालिदासप्रणीतम् ।

महामहोपाध्याय-भारताचार्य्य-

श्रीयुक्तहरिदाससिद्धान्तवागीशभट्टाचार्य्येण

प्रणीतया अभिज्ञानकौमुदीसमाख्यया

टीकया वङ्गानुवादेन च

सहितम् ।



द्वितीयसंस्करणम् ।

१८६० शकाब्दीयसौरभाद्रस्य सप्तविंशतितमे दिवसे ।

मूल्यं २) राजतमुद्राद्वयम्

[illegible]rpara
[illegible]krishna Publi[illegible] L[illegible]

४१ संख्यकसूरिवर्त्मस्थसिद्धान्तविद्यालयात्

श्रीहेमचन्द्रव्याकरणतीर्थभट्टाचार्य्येण

प्रकाशितम् ।

कलिकाता-महानगर्य्यां

४१ संख्यकसूरिवर्त्मस्थ-सिद्धान्तयन्त्रे

श्रीहेमचन्द्रभट्टाचार्य्येण मुद्रितम् ।



महामहोपाध्याय-भारताचार्य्य-श्रीहरिदाससिद्धान्तवागीशः ।

# विज्ञापनम् ।

माननीया मनस्विमहोदयाः ! तत्रभवतामवधानमभ्यर्थये । मुनिप्रणीतासु संहितासु तदानीन्तनानामासीत् निर्विवादः परिग्रहः, इदानीन्तनानाञ्चास्ते गरीयानेवादरः। कालिदासकालादौ तु प्राचीनेषु ग्रन्थेषु पूर्ववदेव साग्रहः परिग्रहः, अर्वाचीनेषु तु सविरागः परिहारः सामाजिकानामासीदिति प्रतीयते। अतएवोक्तं तत्रभवता कालिदासेन—

"पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम्।"···

तत् किं प्राचीनतैवोत्कर्षस्य अर्वाचीनता चापकर्षस्य कारणम्? उतवा तयोः वास्तविकं किञ्चिन्निमित्तमस्तीति सन्देहे ध्रुवमेवावगम्यते यत्—उन्नतिसीमानमारोहतां सर्वमेवोत्कृष्टं क्रमेणावनतिसोपानमवरोहतान्तु सर्वमेवापकृष्टम् इति युक्तिहीना धारणैव तयोरुपादानपरिहानयोर्हेतुः, न पुनर्वास्तविकः कश्चित्। साम्प्रतन्तु भगवदनुग्रहेण रीतिरियं विरलं परिवृत्ता परिलक्ष्यते। येन हि नूतनं भवनम्, नवं नारिकेलम्, नवीनाञ्चाङ्गनामाद्रियमाणा वास्तविकमुत्कर्षमनुसन्दधाना पुराणपरिहारेण नूतनमाददाना मदीयामभिज्ञानकौमुदीं पश्यन्तो मोदमाना प्रकाशितां तां गुणपक्षपातिनो निःशेषितवन्त इति द्वितीयवारञ्च सा प्रकाशितेति।

| | |
|---|---|
| १८६० शकाब्दीय-<br>सौरभाद्रस्याष्टाविंश-<br>दिवसीयम्। | विनीत—<br>श्रीहरिदासशर्म्मणः। |

# अथ नाट्योल्लिखितव्यक्तिगणः ।

## पुरुषगणः ।

| | |
|---|---|
| सूत्रधारः | प्रस्तावसूचकः प्रधाननटः । |
| राजा | हस्तिनाधिपतिः पुरुवंशीयो दुष्मन्तनामा । |
| सूतः | अस्य सारथिः । |
| वैखानसः | वनवासी तापसः । |
| विदूषकः | राज्ञः सहचरः । |
| दौवारिकः | राज्ञो द्वाररक्षकः । |
| सेनापतिः | राज्ञः सैन्याध्यक्षः । |
| ऋषिकुमारौ | कण्वशिष्यौ । |
| करभकः | हस्तिनापुरदूतः । |
| शिष्यः | कण्वस्य । |
| हारीतः | कश्चिद् ऋषिकुमारः । |
| कण्वः | काश्यपगोत्रः कश्चिन्महर्षिः । |
| शार्ङ्गरवः, शारद्वतमिश्रः | कण्वशिष्यौ । |
| कञ्चुकी | अन्तःपुरचारी वृद्धो ब्राह्मणः । |
| पुरोधाः | राज्ञः पुरोहितः । |
| नागरकश्यालः | राज्ञः श्यालकः । |
| रक्षिणौ | जानुक सूचकाख्यौ राज्ञो नगररक्षकौ । |
| पुरुषः | कश्चिद् धीवरः । |
| मातलिः | देवराजस्य सारथिः । |
| बालकः | राज्ञः पुत्रः सर्वदमनो नाम । |
| मारीचः | कश्यपप्रजापतिः । |

## स्त्रीगणः ।

| | |
|---|---|
| नटी | सूत्रधारस्य स्त्री । |
| शकुन्तला | विश्वामित्रस्यौरसी मेनकागर्भजा कण्वस्य पालिता कन्या । |
| अनसूया, प्रियंवदा | शकुन्तलायाः सख्यौ । |
| गौतमी | कण्वस्य धर्मभगिनी । |
| प्रतीहारी | राज्ञः पार्श्वचरी । |
| मिश्रकेशी | शकुन्तलायाः सखी काचिदप्सराः । |
| तापस्यः | कण्वाश्रमस्था मुनिपत्न्यः । |
| चेट्यौ | चित्रकरणार्थं नवागतं दासीद्वयम् । |
| चतुरिका | राज्ञः काचित् दासी । |
| तापसीद्वयं | कश्यपाश्रमस्थम् । |
| अदितिः | कश्यपपत्नी । |

# अथ कविसमयनिरूपणम् ।

इह खल्वैहिकनश्वरसुखविमुखानां चरमोन्नति-मुक्तिपथ-पथिकानां प्राचीनानामार्य्याणां केवलदृष्टान्तप्रदर्शनद्वारेण लेशत एवैहिकसुखसमृद्धिमात्रसाधनप्रयोजनेषु किलेतिहासेषु नासीत् कियानपि यत्नः; आसीच्च वेदानुबन्धिषु नानाविधोपाख्यानसरसीकृतेषु क्रियायोगोपयोगिषु पुराणेषु प्रभूततमः प्रयत्नः। तेन हि भारतेऽस्मिन्नार्य्यजातेरितिहासानामभाव एव सामान्यतः, पुराणानाञ्च प्रचुरतरः प्रचारः परिलक्ष्यते। अतएव इदानीमतीतविषयविशेषनिरूपणं सुदुष्करं विविधमतभेदसमाकुलञ्च स्यादित्यवश्यमभ्युपेयम्। अतएव कालिदासकालनिरूपणेऽपि सुदुष्करताऽनुभूयते मतभेदाश्च दृश्यन्ते।

मालवदेशान्तःपातिन्यामुज्जयिनीनामराजधान्यां सर्वगुणाकरो विक्रमादित्यो नरपतिरासीत् (१)। तस्य च धन्वन्तरि-प्रभृतयो नवसंख्यकाः पण्डितरत्नभूताः सभासदो बभूवुः, कालिदासस्तु तेषामन्यतम इत्यत्र नास्ति प्रायेण कस्यचिदपि विप्रतिपत्तिः (२)। तेन तु विक्रमादित्यकालनिर्णयेनैव कालिदासकालो निर्णीतः स्यादिति स एव प्रथमं निर्णयः।

(१) "ममोऽधुना कृतिरियं सति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समासीत् ॥"
"यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेशयोगिनी।" ज्योतिर्विदाभरणम्।

(२) "धन्वन्तरि-क्षपणकामरसिंह-शङ्कु-
वेतालभट्ट-घटकर्पर-कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥" ज्योतिर्विदाभरणम्।

सन्ति च विक्रमादित्यसमयनिरूपणे त्रिविधा मतभेदाः ।
तथा च—

केचित्, विक्रमादित्येति न खलु पितृकृतं नाम, अपि तु उपाधिमात्रमेतत् । तथा च ५३३ खृष्टाब्दे मालवराजो यशोधर्म्मदेवः, मालवदेशस्य पूर्वतः कियन्तमंशं विजितवतस्तोरामणनाम्नो नरपतेर्मरणानन्तरं तदात्मजं मिहिरकुलं विजित्य तमपहृतमंशमासादयन् मिहिरकुलं चिरायैव मालवदेशान्निष्काशयामास ; तथा तस्मिन् समरे सूर्य्यसमानतेजःप्रकाशात् आदितेयतुल्यविक्रमप्रदर्शनाद्वा 'विक्रमादित्य'-मुपाधिञ्च धारयामास ; तथा मालवदेशे खृष्टजन्मनः सप्तपञ्चाश-(५७) द्वत्सरपूर्वतः प्रवर्त्तितं नवत्यधिकपञ्चशतसंख्यातं (५९०) मालवसंवत् (१) विक्रमसंवन्नाम्ना च परिवर्त्तयामास । तथा च सति यदेव ५९० संख्यातं मालवसंवदासीत्, तदेव तदानीं परिवर्त्तितं सत् ५९० संख्यातं विक्रमसंवत् बभूव ।

इदृशानुमाने चायमेव हेतुः, यत्, तत्समरात् पूर्ववर्त्तिनीषु शिलालिपिषु मालवसंवत् दृश्यते, दृश्यते च तत्समरात् परवर्त्तिनीषु शिलालिपिषु विक्रमसंवदिति । (२)

(१) "सम्वत्" इत्यव्ययवर्गेऽमरः ।

2 "With regard to the introduction of the Vikrama era, I challenged the production of any single inscription prior to 543 A.D. dated according to the Vikrama era. No such inscriptions were then known and yet it was supposed that this era had been in use ever since 56 B. C. however."

Max Muller's "India—what can it teach us ?" Preface to the second edition.

अतएव खृष्टीयषष्ठशताब्दीमध्यवर्त्तिनो यशोधर्म्मदेवस्य सभासत् कालिदासोऽपि खृष्टीयषष्ठशताब्दीमध्य एव प्रादुर्बभूव ।

युक्त्यन्तरञ्चात्रावतारयन्ति ; यत्, विक्रमादित्यसभासदामन्यतमो ज्योतिर्वित् वराहमिहिरः सप्ताधिकपञ्चशतशकाब्दे (५०७ शाके) लोकान्तरमवाप, (१) खृष्टीयाष्टसप्ततितमवर्षे च (७८ खृष्टाब्दे) शकाब्दारम्भः ; तथा च ५८५ खृष्टाब्दे वराहमिहिरमरणात् तत्समसामयिकः कालिदासोऽपि खृष्टीयषष्ठशताब्दीय एवासीदिति ।

६०७ खृष्टाब्दे राजत्वमधिगच्छतः कान्यकुब्जेश्वरस्य हर्षवर्द्धनस्य सभासन्महाकविः कादम्बरीप्रणेता तत्रभवान् बाणभट्टः स्वकीयहर्षचरितभूमिकायां कवित्वे कालिदासमतीव प्रशशंस (२)। अतः कालिदासस्य तत्पूर्ववर्त्तित्वाभावे सा प्रशंसैव नोपपद्यते ।

अतः खृष्टीयषष्ठशताब्दीकाल एव कालिदासाविर्भावकाल इति सिद्धमिति इउरोपीया भारतीयाश्च पुरावृत्तविद्विशेषा निरूपयन्ति । अत्राद्भुतमनुमानम्, सन्ति च बहवः प्रतिवादविषयाः ।

कालिदासाविर्भावकालः खृष्टीयपञ्चमशताब्दीकाल इतीतरे । चतुर्थशताब्दीत्यपरे । तृतीयशताब्दीत्यन्ये ।

प्रमातारस्तु, खृष्टजन्मनः सप्तपञ्चाशद्वर्षपूर्वे मालवदेशे

(१) ब्रह्मगुप्तविरचितखण्डखाद्यटीकाऽनुसन्धेया ।

(२) "निर्गतासु नवा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते ॥"
हर्षचरितभूमिकायाम् ।

भारतललामभूतायामुज्जयिनीनामधेयायां नगर्य्यामार्य्याणां गौरवसूर्य्यः सकलगुणाकरो विक्रमादित्यनामा नरपतिरासीत्। तस्य सभासदां नवसंख्यकानां कविपण्डितशिरोमणीनामन्यतमः कालिदासो बभूव। स च खृष्टजन्मनस्त्रयस्त्रिंशद्वत्सरपूर्वं ज्योतिर्विदाभरणं नाम ग्रन्थं निर्म्मातुमारभत। तथा च ज्योतिर्विदाभरणशेषाध्याये—

"वर्षे सिन्धुरदर्शनाम्बरगुणैर्याते कलौ सम्मिते
मासि माधवसंज्ञितेऽत्र विहितो ग्रन्थक्रियोपक्रमः।" (१)

इदानीन्तु (१८२३ खृष्टाब्दे) कलेर्गताब्दाः ५०२४, ततश्च ३०६८ संख्यासु हृतासु १९५६ वर्षसंख्या अवशिष्यन्ते। ततोऽपि च १८२३ खृष्टाब्दसंख्यासु हृतासु ३३ वत्सरास्तिष्ठन्ति। एवञ्च सति खृष्टजन्मनस्त्रयस्त्रिंशद्वत्सरपूर्वं ज्योतिर्विदाभरणरचनारम्भ इति सिद्धम्। ज्योतिर्विदाभरणरचनारम्भाच्चतुर्विंशतिवत्सरपूर्वं च विक्रमादित्यराज्याभिषेकसमये विक्रमसंवत्प्रवर्त्तनमभूदित्यनुमीयते। तेनेदानीं १८८० विक्रमसंवत्, ततश्च १८२३ खृष्टाब्दसंख्यासु हृतासु ५७ संख्या अवशिष्यन्ते।

तत् सिद्धं खृष्टजन्माऽव्यवहितपूर्वशताब्दीकाल एव विक्रमादित्यस्य कालिदासस्य च प्रादुर्भावकाल इति।

(१) सिन्धुरो हस्ती चाष्टौ (८) "सिन्धुरः (पुं) हस्ती"ति शब्दकल्पद्रुमः। दर्शनानि षट् (६), अम्बरं शून्यं (०), गुणास्त्रयः सत्त्वरजस्तमांसि (३), "अङ्कस्य च वामा गति"रिति ज्योतिर्विदां नियमः। तथा च कलियुगारम्भात् अष्टषष्ट्युत्तरत्रिसहस्रवर्षहन्दे (३०६८) अतीते माधवसंज्ञिते वैशाखे मासि ज्योतिर्विदाभरणग्रन्थरचनारम्भः कृत इत्यर्थः।

न चायमपरः कश्चन कालिदास इत्यपि वक्तुं युज्यते,

"काव्यत्रयं सुमतिकृत् रघुवंशपूर्वं
जातं यतो ननु कियच्छ्रुतिकर्म्मवादः।
ज्योतिर्विदाभरणकालविधानशास्त्रं
श्रीकालिदासकवितो हि ततो बभूव ॥"

इत्यनेन ज्योतिर्विदाभरणश्लोकेन रघुवंश-कुमारसम्भव-मेघदूत-कर्त्तुः कालिदासस्यैव ज्योतिर्विदाभरणकर्त्तृतया स्पष्टाभिधानात्। न वा राजान्तराश्रितोऽयं कालिदास इत्यपि शक्यते वक्तुम्,

"मत्तोऽधुना कृतिरियं सति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समासीत् ॥"

"धन्वन्तरि-क्षपणकामरसिंह-शङ्कु-
वेतालभट्ट-घटकर्पर-कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"

इति ज्योतिर्विदाभरणे स्पष्टमभिदधता कालिदासेन स्वयमेवात्मनो विक्रमादित्याश्रिततया परिचायितत्वात्।

अत्र तु बहुपरिकरत्वेन भारतीयसभ्यताया अर्वाचीनतां प्रतिपादयितुमीहमानानां प्रतिवचनमधरस्फुरितं "प्रक्षिप्तमेत"दिति वचनोच्चारणमन्तरेण नास्ति कश्चित् प्रतिवादोपाय इति सुसमञ्जसमिति।

अथ तत्रभवान् सकलकविकुलमुकुटमहामणिरसौ जन्मना कतमं वंशं देशं वा समलञ्चकारेति निरूपणमिदानीमसम्भव-

मेव, तादृशमूलानुपलम्भात्। तत्र ये त्व सन्ति विविधाः परस्परविरुद्धा लोकप्रवादाः, ते तु प्रायेणैव विश्वासपदवीं नावगाहन्ते। अतएव जीवनचरितसङ्कलनमप्यसम्भवमेव।

कालिदास इति वङ्गीयनामदर्शनात् वङ्गदेशीय इति केचित्। मगधदेशीय इतीतरे। मालवदेशीय एवेति चान्ये। अपरे तु, विक्रमादित्यस्य प्रियसखो मातृगुप्तनामा कश्चिन्महाकविः काश्मीर-राजदायादे द्वितीयप्रवरसेने राज्याभिषेकात् पूर्वमेव काश्मीरमपहाय तीर्थपर्य्यटनपरायणे मृते च तदीयपितृव्ये तदानीन्तनकाश्मीर-राजे हिरण्यराजे काश्मीरस्य राजशून्यतया तदीयसिंहासने विक्रमादित्येनैव प्रतिष्ठापितः। अथ गच्छति कियति काले मातृगुप्तः प्रियसुहृदो विक्रमादित्यस्य मरणमाकर्ण्य शोककातरः काश्मीर-राज्यमपहाय काशीवासमङ्गीकुर्वन् तत्र स्थितेन द्वितीयप्रवरसेनेन सह परमां मैत्रीमापद्यमानः प्राकृतभाषया 'सेतुबन्ध'नामकं महाकाव्यं विरचय्य द्वितीयप्रवरसेनकृतमिदमिति प्रख्यापितवान्। कालिदास इति तस्यैव मातृगुप्तस्य नामान्तरमिति वदन्ति।

अस्ति कश्चिदीदृशः सम्प्रदायः, यः खल्वीश्वरेच्छावशादेवोत्कर्षमपकर्षं वा समापन्नानामपि कालिदासकाव्यानामुत्तममध्यमाधमतादर्शनादेव कालिदासत्रयं मन्यते (१)। मन्ये, स पुनः सम्प्रदाय इतः परं तादृशत्रिविधकाव्यदर्शनात् बङ्किमत्रयं मधुसूदनत्रयमपि मन्येत। हन्त! राजशासनभयाभावात् यत् किमप्युच्चारयितुमायासविशेषविरहाच्च यः कश्चिदेव यथेष्टमाचष्टां नाम; तत्र कः प्रतिबन्धुं चेष्टेत इति।

---

(१) "एकोऽपि जीयते हन्त! कालिदासो न केनचित्।
शृङ्गारे मधुरोद्गारे कालिदासत्रयी किमु॥"

## अथ स्वरूपनायकादिनिरूपणम् ।

अभिज्ञानशकुन्तलं नामेदं नाटकम्, एतद्वृत्तान्तस्य महाभारतीयतया पद्मपुराणीयतया च ख्यातवृत्तत्वात् इतरलक्षणयोगाच्च । यथा साहित्यदर्पणे—

"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।" इत्यादि ।

अत्र दुष्मन्तो धीरोदात्तो दक्षिणो नायकः । यथा तत्रैव—

"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥"

"एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः ।"

शकुन्तला तृतीयाङ्कपर्य्यन्तं कन्या मुग्धा च, परन्तु स्वकीया मध्या च नायिका । यथा तत्रैव—

"परकीया द्विधा प्रोक्ता परोढा कन्यका तथा ।"

"प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥"

"विनयार्ज्जवादियुक्ता गृहकर्म्मपरा पतिव्रता स्वीया ।"

"मध्या विचित्रसुरता प्ररूढस्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता ॥"

न च एकस्या एव कन्या-स्वीया मुग्धा-मध्यारूपैः साङ्कर्य्यमिति वाच्यम्, कालभेदेन तस्य दोषानावहत्वात् "क्वचिदन्योन्यसाङ्कर्य्यमासां लक्ष्येषु दृश्यते" इति दर्पणकृतैव तस्याङ्गीकृतत्वाच्च ।

विप्रलम्भशृङ्गारः प्रधानरसः । स च गान्धर्वविवाहात् प्राक् पूर्वरागरूपः, परश्च प्रवासात्मकः । तथा च तत्रैव—

"यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ ।"

"श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः ।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥"

"प्रवासो भिन्नदेशित्वं कार्य्याच्छापाच्च सम्भ्रमात् ।"

"स्त्रीसंस्थानञ्चाप्सरस्तीर्थमारात् उत्क्षिप्याङ्के ज्योतिरेनां तिरोऽभूत्" इति कण्वशिष्य-वाक्यश्रवणेन राज्ञः शकुन्तलाया मरणानवधारणेन "यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये" इति लक्षणायोगात् न षष्ठाङ्कतः प्रभृति करुणविप्रलम्भ इति ध्येयम् ।

**प्राचुर्य्येण प्रसादो गुणः । यथा तत्रैव—**

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ॥"

**बाहुल्येन वैदर्भी रीतिः । तथा च तत्रैव—**

"माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥"

"वैदर्भी ललितक्रमा" इति ग्रन्थान्तरे लक्षणान्तरञ्च ।

तदत्र संग्रहश्लोकः—

**धीरोदात्तः क्षितीन्द्रः पुरुकुलतिलको दक्षिणो नायकोऽस्मिन्
प्राक् कन्यान्ते स्वकीया मुनिवरतनया नायिका मुग्धमध्या ।
शृङ्गारे विप्रलम्भे प्रथमचरमयोः पूर्वरागप्रवासौ
वैदर्भी नाम रीतिः प्रचरति बहुलं स प्रसादो गुणश्च ॥**

———o———

# अभिज्ञानशकुन्तलम् ।

——०:*:०——

## प्रथमोऽङ्कः ।

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥१॥

यस्मिन्भावः स्फुरति सततं तत्त्वतो मुक्तिहीनः
सम्मूर्त्तित्वेऽप्यखिलभुवनं कल्पते यस्य मूर्त्तिः ।
यं तत्रापि प्रकृतकवयो वर्णयन्त्यष्टमूर्त्तिं
वन्दे शम्भुं त्रिगुण-सगुणं तं सदाज्ञेयरूपम् ॥

चन्द्रिकेव ललिता शरदिन्दोः माधवीव मधुरा प्रकृतिश्रीः ।
कामिनीव च मनोहरभावा कालिदासकविता जयतीयम् ॥

अथ महाकविकुलमुकुटमहामणिना तत्रभवता कालिदासेन निर्म्मित्सितकाव्यस्य निर्विघ्नेन परिसमाप्तिं कामयता निबद्धं मङ्गलश्लोकं "रङ्गविघ्नोपशान्त्यर्थं नान्दीमादौ प्रयोजयेत्" इत्यालङ्कारिकवचनमनुसृत्य रङ्गविघ्नोपशान्तये सूत्रधारः पठति—

या सृष्टिरिति । या तनुः, स्रष्टुः जगत्सृष्टिकर्त्तुः परब्रह्मणः, आद्या सृष्टिः प्राथमिकं निर्म्माणम्; जलमयीति भावः । या तनुः विधिना शास्त्रेण होमीयशास्त्रानुसारेण हुतं प्रक्षिप्तं हविर्हवनीयद्रव्यम्, वहति यज्ञभागोद्देश्यदेवान् प्रापयति;

Public

अग्निमयीत्याशयः। या च तनुः, होत्री हवनकर्त्री, यजमानरूपेत्यभिप्रायः। ये द्वे तनू, कालं वार तिथिप्रभृतिरूपं समयम्, विधत्तो निष्पादयतः; सूर्य्य-चन्द्ररूपं तनुद्वयमिति तात्पर्य्यम्। श्रुतेः कर्णस्य विषयः शब्दः स एव गुणो यस्याः सा, या तनुः विश्वं समस्तं जगत्, व्याप्य सम्बध्य, स्थिता विद्यमाना; आकाशमयीत्यर्थः। यां तनुम्, सर्वेषां बीजानां धान्यादिशस्यानां प्रकृतिः अङ्कुराद्युत्पादने हेतुः इति आहुः विद्वांसो ब्रुवन्ति; क्षितिरूपेति भावः। यया च तन्वा प्राणिनः शरीरिणः, प्राणवन्तः प्राणादिवायुपञ्चकशालिनस्तिष्ठन्ति; वायुरूपेत्याशयः। ताभिः पूर्वोक्ताभिः, प्रत्यक्षाभिः सर्वेषामेव इन्द्रियगोचरीभूताभिः, अतएव प्रत्याख्यातुमशक्याभिरिति भावः, तनुभिर्मूर्त्तिभिः करणैः प्रसन्नो लोकेषु कृतप्रसादः सर्वेष्वेव लौकिककार्य्येषु तासां मूर्त्तीनां सर्वथा प्रयोजनीयत्वात् तासाञ्च निष्पादनादित्याशयः, ईशो महेश्वरः वो युष्मान् विक्रमादित्यादिसभ्यजनान्, अवतु रक्षतु।

अत्र प्राणिनः प्राणवन्तः इति शब्दद्वयार्थस्य अभिन्नतया आपाततः पुनरुक्तताप्रतीतेः, परञ्च "प्राणी तु चेतनो जन्मी जन्तु-जन्यु-शरीरिणः." इत्यमरप्रामाण्यात् प्राणिशब्देन शरीरिमात्राभिधानेन भेदात् उद्देश्यविधेयभावेन भेदाच्च भिन्नाकारशब्दगतत्वाच्च पुनरुक्तवदाभासोऽलङ्कारः।

तथा श्रुतिविषयगुणा इत्यनेन आकाशार्थप्रतीतौ विलम्बात् क्लिष्टत्वदोषः। स च 'प्रथितरवगुणा' इति पाठेन समाधेयः।

जलस्य आद्यसृष्टित्वे प्रमाणं यथा मनुः—

"सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु बीजमवासृजत्॥"

अग्नेरेव देवेभ्यो हविर्वहनमाह श्रुतिः—"इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्।"

"मुख्याभावे प्रतिनिधिः शास्त्रार्थः" इत्युक्तेर्यजमानस्यैव मुख्यहोतृत्वमवधेयम्।

"उदयादुदयाद्भानोर्भौमसावनवासराः" इति सूर्य्यसिद्धान्तात् "तन्मन्ते कलिका यत्नात्तत्कलाशशिवर्षयः" इति मलमासतत्त्वधृतश्रुतेश्च सूर्य्याचन्द्रमसोरेव वारतिथिनिष्पादनम्।

নান্দ্যন্তে সূত্রধারঃ (ক)। অলমতিবিস্তরেণ (খ)। নেপথ্যাভিমুখ-

"তথা শব্দোঽপি চ শ্রুতেঃ" ইতি, "আকাশস্য তু বিজ্ঞেয়ঃ শব্দো বৈশেষিকো গুণঃ" ইতি, "কালখাত্মদিশাং সর্বগতত্বং পরমং মহৎ" ইতি চ ভাষাপরিচ্ছেদে।

পৃথিব্যাঃ সর্ববীজকারণত্বন্তু প্রত্যক্ষম্।

"প্রাণোঽপানঃ সমানশ্চোদানব্যানৌ চ বায়বঃ। শরীরস্থা ইমে" ইত্যমরঃ।

শিবস্যাষ্টমূর্ত্তিত্বে প্রমাণং যথা বিষ্ণুপুরাণম্—

"সূর্য্যো জলং মহী বহ্নির্বায়ুরাকাশমেব চ।
দীক্ষিতো ব্রাহ্মণঃ সোম ইত্যেতাস্তনবঃ স্মৃতাঃ॥"

তিথিতত্ত্বধৃতঞ্চ—"মূর্ত্তয়োঽষ্টৌ শিবস্যৈতাঃ প্রাচ্যাদিক্রমযোগতঃ।
আগ্নেয্যন্তাঃ প্রপূজ্যাস্তা বেদ্যাং লিঙ্গে শিবং যজেৎ॥"

যা সৃষ্টিরিতি "ভাববিহিতঃ কৃৎপ্রত্যয়ো দ্রব্যবৎ প্রকাশতে" ইতি ন্যায়াৎ সামানাধিকরণ্যম্। যথা "প্রাণিনঃ প্রাণবন্তঃ" ইতি তু "ধান্যেন ধনবান্" ইত্যাদিবদভেদে তৃতীয়া।

স্রগ্ধরা বৃত্তম্—"ম্রভ্নৈর্যানাং ত্রয়েণ ত্রিমুনিযতিযুতা স্রগ্ধরা কীর্ত্তিতেয়ম্" ইতি লক্ষণাৎ॥১॥

(ক) নান্দ্যন্ত ইতি। নন্দয়তি আনন্দয়তি স্তবেন দেবাদীন্ আশিষা বা সভ্যানিতি ইদন্তনন্দধাতোঃ পচাদিত্বাদচি নন্দেতি রূপম্; ততশ্চ নন্দৈব নান্দীতি প্রজ্ঞাদিত্বাৎ

যে মূর্ত্তি, জগদীশ্বরের প্রথম সৃষ্টি (জল); যে মূর্ত্তি, যথাবিধানে নিক্ষিপ্ত হবি বহন করে (অগ্নি); যে মূর্ত্তি, হোম করে (যজমান); যে দুইটী মূর্ত্তি, বার-তিথিপ্রভৃতি সময় সম্পাদন করে (সূর্য্য ও চন্দ্র); শব্দগুণশালী যে মূর্ত্তি, সমগ্র জগৎ ব্যাপিয়া রহিয়াছে (আকাশ); পণ্ডিতগণ যে মূর্ত্তিকে সমস্ত শস্যের হেতু বলিয়া থাকেন (পৃথিবী) এবং প্রাণিগণ, যে মূর্ত্তিদ্বারা প্রাণবান্ থাকে (বায়ু); মহাদেব প্রসন্ন হইয়া, প্রত্যক্ষ সেই অষ্টমূর্ত্তিদ্বারা আপনাদিগকে রক্ষা করুন॥১॥

स्वार्थे अपि स्त्रियामीप्रत्ययः । सा च "स्तुत्याशीरन्यतरपरा वाक्" इत्यालङ्कारिकसम्प्रदाय-सिद्धा रूढिः । तथा च साहित्यदर्पणे—

"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥"

अत्र तु अष्टमूर्त्तिवर्णनया भगवतो महादेवस्य स्तुतिः सभ्यानामाशीश्चेत्युभयमपि निबद्धम् । ये द्वे कालं विधत्त इत्यनेन च चन्द्रशंसित्वमवधेयम् ।

श्लोकान्तर्गतमेकैकं वाक्यमेव च एकैकं पदम् । तथा च 'या स्रष्टुराद्या सृष्टिः' इत्येकम् ; 'या विधिहुतं हविर्वहति' इति द्वितीयम् ; 'या च होत्री' इति तृतीयम् ; 'ये द्वे कालं विधत्तः' इति चतुर्थम् ; 'श्रुतिविषयगुणा या विश्वं व्याप्य स्थिता' इति पञ्चमम् ; 'यां सर्वबीजप्रकृतिरित्याहुः' इति षष्ठम् ; 'प्राणिनो यया प्राणवन्तः' इति सप्तमम् ; 'प्रसन्न ईशः ताभिः प्रत्यक्षाभिरष्टाभिस्तनुभिः वः अवतु' इति चाष्टमं वाक्यरूपं पदम् । इतीयमष्टपदा नान्दी । तथा च नाट्यप्रदीपे—

"श्लोकपादः पदं केचित् सुप्तिङन्तमथापरे ।
परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे ॥"

भरतनाट्यशास्त्रटीकायामभिनवगुप्ताश्च—"पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा श्लोकतुरीयांशपदानि वा अवान्तररूपाणि वा ।"

एतच्चास्माभिः साहित्यदर्पणटीकायां बहुधा विस्पष्टं द्रष्टव्यमिति नान्दीलक्षणसङ्गतिः ।

तथा 'या स्रष्टुराद्या सृष्टिः' इत्यनेन उपरितनत्वादादिमतया कण्वरूपा व्यक्तिः सूच्यते । 'या विधिहुतं हविर्वहति' इत्यनेन दुष्मन्तनिक्षिप्तवीर्यवहनात् शकुन्तला । 'ये द्वे कालं विधत्तः' इत्यनेन तद्वीर्यनिक्षेपावसरनिष्पादनात् अनसूया-प्रियंवदे सूच्येते । 'या विश्वं व्याप्य स्थिता' इत्यनेन आकाशसम्पर्किणी मिश्रकेशी । 'यां सर्वबीजप्रकृतिरित्याहुः' इत्यनेन प्रजापतिरूपत्वाददितिकश्यपौ 'प्राणिनो यया प्राणवन्तः' इत्यनेन च पूर्वपूर्वा-सूचितानि सुतविदूषकादीनि सर्वाणि पात्राणि सूच्यन्ते, वायुना प्राणिनां प्राणवत्त्वस्येव

मवलोक्य । आर्ये ! यदि नेपथ्यविधानमवसितं तदितः आगम्यताम् । (ग)

तैस्तैः पात्रैरस्य काव्यस्य नाटकत्वनिर्वाहात् । अतएवेयं पत्रावलीसंज्ञा नान्दी । यथा नाट्यदर्पणे—

"यस्यां बीजस्य विन्यासो ह्यभिधेयस्य वस्तुनः ।
श्लेषेण वा समासोक्त्या नान्दी पत्रावलीति सा ॥"

एतादृश्याश्च नान्द्या अन्ते पाठावसाने, सूत्रधारः प्रधाननटः ब्रवीतीति शेषः । इत्थमन्यत्रापि ब्रवीतीत्यध्याहरणीयक्रियायाः कर्त्तरि प्रथमा बोद्धव्या । सूत्रं नाटकीयकथासूचनं धारयति उपस्थापयतीति सूत्रधारः । तथा चोक्तम्—

"नाटकीयकथासूत्रं प्रथमं येन सूच्यते ।
रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥"

(ख) अलमिति । अतिविस्तरेण नान्द्या अत्यन्तबाहुल्येन, अलम् इतोऽप्यतिविस्तृतनान्दीप्रयोगो व्यर्थ इत्यर्थः । तथा च सुप्तिङन्तरूपाष्टपदां नान्दीमपेक्ष्य अवान्तराष्टवाक्यरूपाष्टपदनान्दीप्रयोगादेव किञ्चिद्विस्तरो जातः ; इतोऽपि विस्तृतरूपायाः श्लोकपादात्मकाष्टपदादिनान्द्याः प्रयोगो निरर्थक एव ; एतावत्यैव नान्द्या कर्त्तव्यमङ्गलाचरणनिर्वाहात् एतदधिकत्वे च निष्प्रयोजनसमयक्षेपादिति भावः ।

(ग) नेपथ्येति । शोभारूपस्य मुख्यनेपथ्यस्य अमूर्त्ततया तदाभिमुख्यासम्भवादत्र नेपथ्यपदेन तद्विधानगृहं लक्ष्यते । तथा च नेपथ्यस्य वेशविधानगृहस्य अभिमुखं यथा स्यात्तथा, अवलोक्य सम्बोधनीया नटी विद्यते न वा इति दृष्ट्वा । सम्बोध्यस्य अवस्थितिस्थानाभिमुख्येनैव सम्बोधयन्तीति लोकव्यवहारमनुसृत्यैवेदमभिहितम् । अन्यथा सभादिकमवलोकयता सूत्रधारेण नटीसम्बोधने कृते तस्य लोकव्यवहारानभिज्ञताप्रत्ययात् सभ्यानां विरक्तिः स्यादिति बोध्यम् ।

आर्ये ! साध्वि ! । एतेन अभिनयात्मकस्वजातीयव्यवसायविधायिनी मत्पत्नी वेयम्, न पुनरभिनयाय वेतनभोगिनी वेश्येति सूचितम् । नेपथ्यविधानं वेशरचना, अवसितं परिसमाप्तम्, तत् तदा, इह अस्मिन् स्थाने ।

नटी। प्रविश्य। अज्ज! इअम्हि। आणवेदु अज्जो को णिओओ अणुचिट्ठिअदु त्ति। (घ)

सूत्र। आर्य्ये! इयं हि रसभावदीक्षागुरोर्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषत्। अस्याञ्च कालिदासग्रथितवस्तुना नवेनाभिज्ञानशकुन्तलनामधेयेन नाटकेनोपस्थातव्यमस्माभिः, तत् प्रतिपात्रमाधीयतां यत्नः। (ङ)

(घ) आर्य्य! इयमस्मि। आज्ञापयतु आर्य्यः को नियोगोऽनुष्ठीयतामिति।

"आकल्पवेशौ नेपथ्यम्" इति "महाकुलकुलीनार्य्यसभ्यसज्जनसाधवः" इति च अमरः।

"वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम्" इति साहित्यदर्पणात् 'आर्य्ये' इति नटीसम्बोधनम्। एवं परत्र नटीवाक्यादावपि ज्ञेयम्। तथा सूत्रधारस्य अनीचतया शिक्षिततया च संस्कृतभाषाप्रयोगः। तथा च साहित्यदर्पणे—

"पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।"

(घ) नटीति। प्रविश्य रङ्गालये इति शेषः। इयमहम्, अस्मि आगतेत्यर्थः। को नियोग आदेशः, अनुष्ठीयतां मया क्रियताम्, इति आर्य्यो भवान्, आज्ञापयतु; आदेशप्राप्तिमात्रमेवाहं तदनुष्ठानाय प्रवर्त्तिष्ये इति भावः।

अस्या अपि अनीचतया शिक्षिततया च शौरसेनीभाषाप्रयोगः। यथा दर्पणे—

"शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्।"

(ङ) सूत्रेति। भीमशब्दादिना भीमसेनादिप्रतीतिवदत्रापि "एकदेशेन समुदायो गम्यते" इति न्यायात् सूत्रपदेनैव सूत्रधारः प्रत्येतव्यः। एवमन्यत्रापि। हि तथाहि

(ক—গ) ( নান্দীপাঠের পর ) সূত্রধার। অতিবিস্তৃত নান্দীপাঠে প্রয়োজন নাই। ( বেশরচনাস্থানের প্রতি দৃষ্টিপাত করিয়া ) আর্য্যে যদি বেশবিধান সমাপ্ত হইয়া থাকে, তবে এইস্থানে আইস।

(ঘ) নটী। ( প্রবেশ করিয়া ) আর্য্য! এই আমি আসিয়াছি; তা—আপনি আদেশ করুন, কোন্ আজ্ঞা পালন করিতে হইবে।

त्वत्प्रार्थितनियोगमेव जानीहीत्यर्थः । रसः शृङ्गारादिः भावश्च निर्वेदादिः तयोर्विषये विशेषेण दीक्षागुरुः प्राधान्येनोपदिष्टा तस्य रसभावविषयेष्वतीवाभिज्ञस्येत्यर्थः, विक्रमे तेजःप्रकाशात्मकपराक्रमे आदित्य इव तस्य विक्रमादित्योपाधिकस्य उज्जयिनीपतेर्यशोवर्म्म-देवस्येत्यर्थः, अभिरूपाः पण्डिता एव भूयिष्ठा अतिबहुला यस्यां सा तादृशी, परिषत् सभा सञ्जातेति शेषः । किञ्चेति चार्थः । कालिदासेन तदाख्येन केनचित् कविना ग्रथितं निबद्धं वस्तु सर्वो विषयो यस्मिन् तेन, नवेन नूतनेन, अभिज्ञानशकुन्तलं नामधेयं नाम यस्य तेन, नाटकेन तदाख्यदृश्यकाव्यविशेषेण, अस्यां परिषदि, उप-स्थातव्यम् उपासितव्यं सभ्यानां सन्तोषो विधातव्य इत्यर्थः ; तत् तस्मात्, प्रतिपात्रम् एत-न्नाटकान्तर्गतप्रत्येकव्यक्तिविषये, यत्नः तेषामभिनयसौष्ठवादौ आग्रहः, आधीयतां क्रियताम् । त्वां प्रति एष एव मे नियोग इति भावः ।

"अभिरूपो बुधे रम्ये" इति मेदिनी । "समज्या परिषद्गोष्ठी" इत्यमरोक्तेः परिषच्छब्देनात्र सभामात्रं गृह्यते । न तु—

"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा ॥"

इति मनूक्तः सभाविशेषः, "अभिरूपभूयिष्ठा" इत्यनुपपत्तेः ।

काल्या दासः कालिदासः "याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित्" इति ह्रस्वः । अभि-ज्ञायते शकुन्तला आत्मन एव पत्नीति बुध्यते अनेनेति अभिज्ञानं वक्ष्यमाणमङ्गुरीयकं तेन ज्ञाता शकुन्तला यत्र तत् । शाकपार्थिवादित्वान्मध्यपदलोपी समासः । शकुन्तेभ्यः पक्षिभ्यः ला रक्षा यस्याः सा शकुन्तला । धातूनामनेकार्थत्वात् "रा ला दाने" इत्यस्य क्विपि रूपम् । तथा च महाभारते आदिपर्व्वणि षडशीतितमाध्याये—

"निर्जने तु वने यस्मात् शकुन्तैः परिरक्षिता ।
शकुन्तलेति नामास्या कृतञ्चापि ततो मया ॥"

नामैव नामधेयम्, "भाग-रूपनामभ्यो धेयम्" इति स्वार्थे धेयप्रत्ययः ।

"नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम्" इति दर्पणोक्तेः, अङ्गुरीयकेण शकुन्तलावगमस्यैवात्र प्रधानवृत्तान्तत्वादस्य अभिज्ञानशकुन्तलमिति नाम कृतम् ।

নটী। সুবিদিদপ্পওঅদাএ অজ্জস্স ণ কিম্পি পরিহাইস্সদি। (চ)

সূত্র। সস্মিতম্। আর্য্যে! কথয়ামি তে ভূতার্থম্। (ছ)

(চ) সুবিদিতপ্রয়োগতয়া আর্য্যস্য ন কিমপি পরিহাস্যতে।

---

"নাটকং খ্যাতবৃত্তং স্যাৎ পঞ্চসন্ধিসমন্বিতম্।" ইত্যাদিকং নাটকলক্ষণং সাহিত্য-দর্পণে অনুসন্ধেয়ম্।

(চ) নটীতি। সুবিদিতঃ সম্যক্ শিক্ষিতঃ প্রয়োগঃ অভিনয়ব্যাপারো যেন তস্য ভাবস্তয়া হেতুনা, আর্য্যস্য ভবতঃ, কিমপি কোঽপি বিষয়ঃ, ন পরিহাস্যতে ন পরিহীনং ভবিষ্যতি স্খলিতং ন ভবিষ্যতীত্যর্থঃ। অতএব অভিনয়েন সভ্যসন্তোষোৎপাদনে প্রত্যেক-পাত্রং প্রতি মম যত্নাধানে বিশেষপ্রয়োজনং নাস্তীতি ভাবঃ।

অত্র প্রধানাভিনয়কর্ত্তুঃ সূত্রধারস্য প্রশংসাকরণেন সভ্যানামুন্মুখীকরণাৎ প্ররোচনা নাম ভারতীবৃত্ত্যঙ্গম্। যথা দর্পণে—

"উন্মুখীকারঃ প্রশংসাতঃ প্ররোচনা।"

(ছ) সূত্রেতি। মমাভিনয়শিক্ষাং প্রতি উৎকৃষ্টতয়া নট্যা দৃঢ়বিশ্বাসো নোচিত ইত্যেতৎসূচনার্থং স্মিতম্ ঈষদ্ধাস্যং তেন সহেতি সস্মিতম্। তে তব সমীপে, ভূতার্থং সত্যবিষয়ম্।

"ভূতং সত্যোপমানয়োঃ" ইত্যাদি হেমচন্দ্রঃ।

---

(ঙ) সূত্রধার। আর্য্যে! রস ও ভাবের বিশেষ শিক্ষক মহারাজ বিক্রমাদিত্যের এই সভা, ইহাতে বহুতর পণ্ডিত উপস্থিত আছেন। কালিদাসপ্রণীত নূতন অভিজ্ঞানশকুন্তলনামক নাটকদ্বারা এই সভার সভ্যগণকে আমরা সন্তুষ্ট করিব; অতএব তুমি প্রত্যেক অভিনেতার প্রতি যত্ন কর।

(চ) নটী। আপনি অভিনয়কার্য্যটী সম্যক্‌রূপে শিক্ষা করিয়াছেন বলিয়া, আপনার কোন বিষয়েই ত্রুটি হইবে না।

আপরিতোষাদ্বিদুষাং ন সাধু মন্যে প্রয়োগবিজ্ঞানম্।
বলবদপি শিক্ষিতানামাত্মন্যপ্রত্যয়ং চেতঃ ॥২॥

নটী। সবিনয়ম্। এবম্মেদং। অণন্তরকরণিজ্জং দাণিং অজ্জো আণবেদু। (জ)

(জ) এবমেতৎ। অনন্তরকরণীয়মিদানীম্ আর্য্য আজ্ঞাপয়তু।

আপরিতোষাদিতি। বিদুষাং বিজ্ঞানাম্, আপরিতোষাৎ স্বকীয়ব্যাপারেণ সন্তোষোৎপত্তিপর্য্যন্তম্, প্রয়োগস্য অভিনয়াদিব্যাপারস্য বিজ্ঞানং বিশেষাভিজ্ঞতাম্, সাধু উৎকৃষ্টমেব স্থিতম্, ইতি ন মন্যে। কথমেতদিত্যাহ—বলবদিত্যাদি। বলবৎ অত্যন্তম্, শিক্ষিতানামপি, মাদৃশেষু অল্পশিক্ষিতেষু কা কথা, অতীবকৃতবিদ্যানামপি জনানামিত্যর্থঃ, চেতশ্চিত্তম্, আত্মনি স্ববিষয়ে, অপ্রত্যয়ম্ অবিশ্বস্তম্। তথা চ মহাশিক্ষিতা অপি জনাঃ স্বব্যাপারেণ লোকানাং সন্তোষোৎপত্তেঃ প্রাক্ আত্মশিক্ষা উৎকৃষ্টেতি ন নিশ্চেতুমর্হন্তি, তন্মাদৃশেষু কা কথা। অতএব চ মাং প্রতি সুবিহিতেত্যাদিসূচিতস্তব বিশ্বাসঃ কথমপি নোচিত ইতি ভাবঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ অর্থাপত্ত্যা সঙ্কীর্য্যতে।

"বলবৎ সুষ্ঠু কিমুত স্বত্যতীব চ নির্ভরে" ইত্যমরঃ।

আর্য্যা জাতিঃ—"যস্যাঃ পাদে প্রথমে দ্বাদশমাত্রাস্তথা তৃতীয়েঽপি।
অষ্টাদশ দ্বিতীয়ে চতুর্থকে পঞ্চদশ সার্য্যা॥"

ইতি লক্ষণাৎ ॥২॥

(জ) নটীতি। আর্য্যোক্তেরনৌচিত্যস্য প্রতিপন্নত্বাৎ অপ্রতিভতয়া বিনয়ঃ, তেন

(ছ) সূত্রধার। (ঈষৎ হাস্যের সহিত) আর্য্যে! তোমার নিকট যথার্থ বিষয় বলিতেছি।

পণ্ডিতগণের সন্তোষ হওয়া পর্য্যন্ত, অভিনয়জ্ঞান উৎকৃষ্ট বলিয়া মনে করি না। কারণ, অত্যন্তশিক্ষিত ব্যক্তিদিগেরও, নিজের বিষয়ে চিত্ত অবিশ্বাসী হয় ॥২॥

সূত্র। আর্য্যে! কিমন্যদস্যাঃ পরিষদঃ শ্রুতিপ্রমোদহেতো-র্গীতাৎ করণীয়মস্তি। (ঝ)

নটী। অধ কদমং উণ উদুং অধিকরিঅ গাইস্সং। (ঞ)

সূত্র। আর্য্যে! নন্বিমমেব তাবদচিরপ্রবৃত্তমুপভোগক্ষমং গ্রীষ্মসময়মধিকৃত্য গীয়তাম্। সম্প্রতি হি—(ট)

সুভগসলিলাবগাহাঃ পাটলসংসর্গসুরভিবনবাতাঃ।
প্রচ্ছায়সুলভনিদ্রা দিবসাঃ পরিণামরমণীয়াঃ ॥৩॥

(ঞ) অথ কতমং পুনঃ ঋতুম্ অধিকৃত্য গাস্যামি।

অয্যেতি সবিনয়ম্। এতৎ ত্বয়োক্তম্, এবমিত্যং সত্যমেবেত্যর্থঃ। অনন্তরকরণীয়ম্ ইতঃ পরং কর্ত্তব্যম্।

(ঝ) সূত্রেতি। পরিষদঃ সভায়াঃ, শ্রুতিপ্রমোদহেতোঃ শ্রবণসুখজনকাৎ, গীতাৎ অন্যৎ কিং করণীয়মস্তি?। তদ্গীতমেব ক্রিয়তামিত্যাশয়ঃ।

(ঞ) নটীতি। অথেতি প্রশ্নে। কতমং বহূনাং মধ্যে কম্। অধিকৃত্য আশ্রিত্য, গাস্যামি গানং করিষ্যামি?।

(ট) সূত্রেতি। নন্বিত্যনুনয়ে। অচিরপ্রবৃত্তম্ অবহুপূর্বোপস্থিতম্, উপভোগক্ষমং সম্ভোগযোগ্যম্। হি তথাহি।

(জ) নটী। (বিনয়ের সহিত) ইহা এইরূপই বটে। এখন আপনি পরকর্ত্তব্য আদেশ করুন।

(ঝ) সূত্রধার। আর্য্যে! এই সভার শ্রবণানন্দজনক গান ভিন্ন আর কি কর্ত্তব্য আছে?।

(ঞ) নটী। কোন্ ঋতু অবলম্বন করিয়া গান করিব?।

(ট) সূত্রধার। আর্য্যে! অচিরোপস্থিত এবং সম্ভোগযোগ্য এই গ্রীষ্মকাল অবলম্বন করিয়াই গান কর। কারণ, এখন—

नटी। तह। इति गायति। (ठ)

खणचुम्बिआइं भमरेहिं उह सुउमारकेसरसिहाइं।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं॥४॥

(ठ) तथा।

क्षणचुम्बितानि भ्रमरैः ऊह सुकुमारकेशरशिखानि।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि॥४॥

सुभगेति। सुभगो ग्रीष्मसन्तापनिवर्त्तकत्वात् मनोहरः, सलिलेषु जलेषु अवगाहः अवगाहनं येषु ते; पाटलानां तदाख्यकुसुमानां संसर्गेण स्पर्शेन सुरभिः सुगन्धिः वनवातो वन्यवायुर्येषु ते; प्रकृष्टा छाया यस्मिन् तादृशे स्थाने सुलभा अनायासलभ्या निद्रा येषु ते तथा परिणामे अवसाने रमणीया विचरणादौ मनोहराः, दिवसा वर्त्तन्त इति शेषः। तेनैनमधिकृत्य गानमुचितमेव भवेदिति भावः।

अत्र दिवसानां गानेन वर्णनीयताप्रतिपादनं प्रति सुभगसलिलावगाहत्वादिबहु-कारणानामुपन्यासात् समुच्चयोऽलङ्कारः।

"ऋतुञ्च कञ्चित् प्रायेण भारतीं वृत्तिमाश्रितः।" इत्युक्तेरत्र ग्रीष्मस्य ऋतोः कीर्त्तनम्।

आर्य्या जातिः॥३॥

(ठ) नटीति। तथा तदेव करोमीत्यर्थः।

अर्थेति। दयमानाः कोमलभावेन ग्रहणात् सदयाः, प्रमदास्तरुण्यः, भ्रमरैः क्षणेन तत्सर्वत्र सौरभातिशयादानन्देनेत्यर्थः चुम्बितानि मुखेन स्पृष्टानि; तथा सुकुमाराः कोमलाः केसराणां किञ्जल्कानां शिखा अग्रभागा येषां तानि; शिरीषकुसुमानि शिरीषाख्यपुष्पाणि; अवतंसयन्ति शिरोभूषणीकुर्वन्ति। इति त्वम् ऊह वितर्कय

জলে অবগাহন করা বড়ই মনোহর; পাটলপুষ্পের সংসর্গে বনের বায়ু সুগন্ধি; ভাল ছায়াতে অনায়াসেই নিদ্রা লাভ করা যায় এবং দিনগুলি শেষ বেলায় বড়ই মনোহর হয়॥৩॥

(ঠ) নটী। তাহাই। (এই বলিয়া গাইতে লাগিল।)

সূত্র। আর্য্যে! সাধু গীতম্। অহো! রাগাপহৃত-চিত্তবৃত্তিরালিখিত ইব বিভাতি সর্ব্বতো রঙ্গঃ। তদিদানীং কতমং প্রয়োগমাশ্রিত্যৈনমারাধয়ামঃ?। (ভ)

পর্য্যালোচয়েত্যর্থঃ। শিরীষকুসুমানাং গ্রীষ্মে প্রকাশাদিদং গ্রীষ্মসময়াধিকারেণ গান-মিত্যবধেয়ম্।

"নির্ব্যাপারস্থিতৌ কালবিশেষোৎসবয়োঃ ক্ষণঃ" ইত্যমরঃ। "অবতংসো ন স্ত্রিয়াং স্যাৎ কর্ণপূরে চ শেখরে" ইতি মেদিনী।

উদ্গাথা নাম গীতিরিয়ম্। তথা চ পিঙ্গলে—

"পুব্বদ্ধে উত্তদ্ধে মত্তা তীস ত্তি সুভঅ! সংভণিআ।
সো উগ্গাহো বুত্তো পিঙ্গলকই-দিট্ঠ-সট্ঠি-মত্তঙ্গো॥"

অস্যানুবাদো যথা—

"পূর্ব্বার্দ্ধে উত্তরার্দ্ধে মাত্রাস্ত্রিংশদিতি সুভগ! সংভণিতাঃ।
সা উদ্গাথা উক্তা পিঙ্গলকবিদৃষ্টঃ ষষ্টিমাত্রাঙ্গাঃ॥" ॥৪॥

(ভ) সূত্রেতি। সাধু উৎকৃষ্টম্। তদুৎকর্ষকার্য্যমেব দর্শয়তি অহো ইতি। অহো আশ্চর্য্যে। রঙ্গো রঙ্গস্থলোকগণঃ, রাগেণ গানস্বরেণ অপহৃতা আকৃষ্য নীতা চিত্তবৃত্তির্যস্য স তাদৃশঃ সন্, সর্ব্বতঃ সমন্ততঃ, আলিখিতশ্চিত্রিত ইব বিভাতি। অতএবেদং সাধ্বেব গীতমিতি ভাবঃ। তৎ তস্মাৎ, কতমং বহূনাং মধ্যে কম্, প্রযুজ্যত ইতি প্রয়োগো নাটকাদিরূপম্। এনং রঙ্গম্, আরাধয়ামঃ সন্তোষয়ামঃ।

ভ্রমরগণ আনন্দে যেগুলিকে স্পর্শ করিতেছে এবং সে গুলির উপরিভাগ কোমল, রমণীগণ আদরের সহিত সেই শিরীষপুষ্পগুলিকে মস্তকের ভূষণ করিতেছে ॥৪॥

(ভ) সূত্রধার। আর্য্যে! ভাল গান করিয়াছ। কি আশ্চর্য্য! গানের স্বর হৃদয় অপহরণ করিয়াছে, তাই রঙ্গালয়স্থ লোকসকল, সকল

নটী। ণং পঢ়মং জ্জেব অজ্জেণ আণত্তং অহিণ্ণাণ-সউন্তলং ণাম অউব্বং ণাড়অং অহিণীঅদু ত্তি। (ঢ)

সূত্র। আর্য্যে! সম্যগনুবোধিতোঽস্মি। অস্মিন্ ক্ষণে খলু বিস্মৃতং ময়ৈতৎ। কুতঃ—(ণ)

তবাস্মি গীতরাগেণ হারিণা প্রসভং হৃতঃ।
এষ রাজেব দুষ্মন্তঃ সারঙ্গেণাতিরংহসা ॥৫॥

(ঢ) ননু প্রথমমেব আর্য্যেণ আজ্ঞপ্তম্ অভিজ্ঞানশকুন্তলং নাম অপূর্ব্বং নাটকম্ অভিনীয়তামিতি।

---

(ঢ) নটীতি। নন্বিতি সম্বোধনে। আর্য্যেণ ভবতা, আজ্ঞপ্তং "নবেনাভিজ্ঞান-শকুন্তলনামধেয়েন নাটকেনোপস্থাতব্যমস্মাভিঃ" ইত্যনেন অবধারিতম্। পত্যুর্গৌরব-দ্যোতনার্থমাজ্ঞপ্তমিত্যুক্তম্। অপূর্ব্বং নূতনম্ আশ্চর্য্যমিতি চ ধ্বন্যতে। অভিনীয়তা-মস্মাভিরিতি শেষঃ। ইতি হেতোঃ পুনঃ প্রশ্নো নোপপদ্যতে ইত্যাশয়ঃ।

(ণ) সূত্রেতি। অনুবোধিতঃ ত্বয়া স্মারিতঃ কুতঃ কারণাদ্বিস্মৃতমিত্যর্থঃ।

তৎকারণমাহ তবেতি। অতিরংহসা অত্যন্তবেগশালিনা, সারঙ্গেণ হরিণেন, এষ প্রবিশন্ রাজা দুষ্মন্ত ইব; হারিণা মনোহরেণ, তব গীতরাগেণ গানস্বরেণ, প্রসভং বলাৎ হৃত আকৃষ্টচিত্তঃ দূরং নীতশ্চ অস্মি। অতএব অবধারিতবিষয়বিস্মৃতির্জাতেতি ভাবঃ।

অত্র শ্রৌতী উপমালঙ্কারঃ।

---

দিকেই যেন চিত্রিত হইয়া রহিয়াছেন। তা এখন কোন্ নাটক অবলম্বন করিয়া ইঁহাদিগকে সন্তুষ্ট করি ?।

(ঢ) নটী। আপনি ত প্রথমেই বলিয়াছেন যে, অভিজ্ঞানশকুন্তল-নামক অপূর্ব্ব নাটক অভিনয় করিব।

(ণ) সূত্রধার। আর্য্যে! ঠিক্ স্মরণ করাইয়া দিয়াছ। আমি এইক্ষণে ইহা বিস্মৃত হইয়াছিলাম। কারণ—

ইতি নিষ্ক্রান্তৌ। (ত)

## প্রস্তাবনা। (থ)

ততঃ প্রবিশতি রথারূঢ়ঃ শরচাপহস্তো মৃগমনুসরন্ রাজা সূতশ্চ (১)। (দ)

"সারঙ্গঃ পুংসি হরিণে চাতকে চ মতঙ্গজে। শবলে ত্রিষু" ইতি মেদিনী।
পথ্যাবক্ত্রং বৃত্তম্—"যুজোর্জেন সরিদ্ভর্ত্তুঃ পথ্যাবক্ত্রং প্রকীর্ত্তিতম্" ইতি লক্ষণাৎ ॥৫॥

(ত) ইতীতি। নিষ্ক্রান্তৌ নির্গতৌ রঙ্গভূমিতো নটীনটাবিতি শেষঃ।

(থ) প্রেতি। প্রস্তাবয়তি অভিপ্রেতবিষয়ম্ উদ্ভাবয়তি যা সা প্রস্তাবনা। যথা সাহিত্যদর্পণে—

"নটী বিদূষকো বাপি পারিপার্শ্বিক এব বা।
সূত্রধারেণ সহিতাঃ সংলাপং যত্র কুর্ব্বতে॥
চিত্রৈর্বাক্যৈঃ স্বকার্য্যোত্থৈঃ প্রস্তুতাক্ষেপিভির্মিথঃ।
আমুখং তত্তু বিজ্ঞেয়ং নাম্না প্রস্তাবনাপি সা॥"

অত্র সাদৃশ্যোপন্যাসেন দুষ্মন্তপ্রবেশরূপান্যকার্য্যপ্রসাধনাদিয়ম্ অবলগিতাখ্যা প্রস্তাবনা। যথা তত্রৈব—

"যত্রৈকত্র সমাবেশাৎ কার্য্যমন্যৎ প্রসাধ্যতে।
প্রয়োগে খলু তজ্জ্ঞেয়ং নাম্নাবলগিতং বুধৈঃ॥"

এতল্লক্ষণে ইদমেব চোদাহৃতং দর্পণকারেণ।

অত্যন্ত বেগবান্ হরিণ যেমন, এই রাজা দুষ্মন্তকে আকর্ষণ করিয়া লইয়া যাইতেছে, সেইরূপ তোমার মনোহর গানরাগ আমাকে বলক্রমে আকর্ষণ করিয়াছিল ॥৫॥

(ত) (ইহার পর উভয়ে চলিয়া গেল।)

(থ) প্রস্তাবনা।

(১) ততঃ প্রবিশতি মৃগানুসারী শরচাপহস্তো রাজা রথেন সূতশ্চ

सूतः । राजानं मृगञ्चावलोक्य । आयुष्मन् ! । (ध)

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्म्मुके ।
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् ॥६॥

---

(द) तत इति । शरेण बाणेन सहेति सशरं चापं धनुर्हस्ते यस्य सः, मृगं कञ्चित् हरिणम्, अनुसरन् अनुधावन्, राजा दुष्मन्तः, सूतश्च तस्य सारथिः प्रविशतीत्यन्वयः ।

"सूतः क्षत्ता च सारथिः" इत्यमरः ।

इतः प्रभृति प्रथमाङ्कसमाप्तिपर्य्यन्तो मुखसन्धिः । तथा चात्र "वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती" इत्यादिना शकुन्तलाप्राप्तौ राज्ञ औत्सुक्यात् "कथं इमं जणं पेक्खिअ तवोविरोहिणो विआरस्स गमणीआम्हि संवुत्ता" इत्यादिना च राजप्राप्तौ शकुन्तलाया औत्सुक्यात् आरम्भो नाम प्राथमिकी कार्य्यावस्था निबद्धा । यथा दर्पणे—

"भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ।"

तथा अनसूयाप्रियंवदाभ्यां परिपोषितः शकुन्तलादुष्मन्तयोः परस्परानुरागो बीजं नाम अर्थप्रकृतिः । तथा च तत्रैव—

"अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥"

तथा "यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा ।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम् ॥"

अस्य च उपक्षेपादीनि द्वादशाङ्गानि यथास्थानं निवेश्य लक्षणानि वक्ष्यामः ।

(ध) सूत इति । आयुष्मन् ! प्रशस्तायुःशालिन् ! ।

"आयुष्मन् रथिनं सूतः" इति दर्पणोक्तेः आयुष्मन्निति सम्बोधनम् । "पुरुषाद्या-

---

(দ) ( তদনন্তর শরসমন্বিত-ধনু হস্তে, হরিণের অনুসরণ করিতে করিতে রাজা দুষ্মন্ত ও সারথি, রথে আরোহণ করিয়া প্রবেশ করিলেন। )

(ধ) সারথি। ( রাজা ও হরিণের প্রতি দৃষ্টিপাত করিয়া ) আয়ুষ্মন্ !

রাজা। সূত! দূরমমুনা সারঙ্গেণ বয়মাকৃষ্টাঃ। সোঽয়-মিদানীমপি—(১) (ন)

গ্রীবাভঙ্গাভিরামং মুহুরনুপততি স্যন্দনে দত্তদৃষ্টিঃ
পশ্চার্দ্ধেন প্রবিষ্টঃ শরপতনভয়াদ্ভূয়সা পূর্ব্বকায়ম্।
শষ্পৈরর্দ্ধাবলীঢ়ৈঃ (২) শ্রমবিবৃতমুখভ্রংশিভিঃ কীর্ণবর্ত্মা
পশ্যোদগ্রপ্লুতত্বাদ্বিয়তি বহুতরং স্তোকমুর্ব্ব্যাং প্রয়াতি ॥৭॥

মনীষাণাং সংস্কৃতং স্যাৎ কৃতাত্মনাম্" ইতি তদবত্যনিয়মাৎ সূতস্য মনীষত্বেন শিক্ষিতত্বেন চ সংস্কৃতং ভাষা। এবং রাজ্ঞোঽপি।

কৃষ্ণেতি। কৃষ্ণসারে পলায়মানে হরিণবিশেষে, অধি অধিরোপিতা জ্যা গুণো যস্মিন্ তদধিজ্যং কার্ম্মুকং ধনুর্যস্য তস্মিন্ ত্বয়ি দুষ্মন্তে চ, চক্ষুর্দদৎ অর্পয়ন্, অহম্, মৃগং মৃগরূপধারিণং যজ্ঞম্ অনুসরতি অনুধাবতীতি তম্, সাক্ষাৎ প্রত্যক্ষম্, পিনাকিনং পিনাকধনুর্দ্ধারিণং মহাদেবমিব পশ্যামি।

অত্র পিনাকিনঃ সাক্ষাত্ত্বাভাবেঽপি তৎসম্ভাবনাবশাৎ ভাবাভিমানিনী দ্রব্যোৎপ্রেক্ষা-লঙ্কারঃ।

হন্তুমাগচ্ছন্তং পিনাকিনমবলোক্য দক্ষযজ্ঞো মৃগরূপমবলম্ব্য পলায়াঞ্চক্রে; পিনাকী চ তমনুসৃতবানিতি পৌরাণিকবৃত্তান্তঃ ॥৬॥

(ন) রাজেতি। সারঙ্গেণ হরিণেন। আকৃষ্টা আকৃষ্য আনীতাঃ। সোঽয়ং সারঙ্গঃ, ইদানীমপি অস্মাভিঃ পশ্চাদ্ধাবনেঽপি, প্রয়াতীতি শ্লোকস্থেনান্বয়ঃ।

---

হরিণের প্রতি এবং গুণারোপিত-ধনুর্দ্ধারী আপনার প্রতি দৃষ্টিপাত করতঃ, হরিণরূপী যজ্ঞের অনুসরণকারী পিনাকধনুর্দ্ধারী সাক্ষাৎ মহাদেবকে যেন দেখিতেছি ॥৬॥

(ন) রাজা। সারথি! এই হরিণ আমাদিগকে দূরে আকর্ষণ করিয়া আনিয়াছে। এখনও এই সেই হরিণ—

(১) অয়ং পুনরিদানীমপি। (২) দর্ভৈরর্দ্ধাবলীঢ়ৈঃ।

ग्रीवेति। अनुपतति पश्चात् धावति, स्यन्दने अस्मदीयरथे अस्मदीयं रथं प्रतीत्यर्थः, ग्रीवायाः कन्धराया भङ्गेन पश्चाद्दिशि परिवर्त्तनेन अभिरामं सुन्दरं यथा स्यात्तथा, मुहुर्वारं वारं दत्ता अर्पिता दृष्टिर्येन सः, शरस्य मन्निक्षिप्तबाणस्य पतनभयात् स्वगात्रे पातभीतेर्हेतोः, भूयसा अधिकेन, पश्चार्द्धेन शरीरस्य पश्चाद्भागेन, पूर्वकायं शरीरस्य पूर्वार्द्धं प्रविष्टः, सम्मुखस्थपदद्वयाभ्यन्तरे प्रवेशितदेहपश्चाद्भाग इत्यर्थः, श्रमेण द्रुतगमनायासेन विवृतात् प्रकटितात् मुखात् भ्रंशिभिः स्वयमेव पतनशीलैः, अर्द्धावलीढैः अर्द्धभुक्तैः, शष्पैर्बालतृणैः, कीर्णं व्याप्तं वर्त्म गमनपथो यस्य सः, उदग्रम् ऊर्द्ध्वं प्लुतं लम्फनं यस्य तस्य भावस्तस्मात्, वियति आकाशे, बहुतरं सातिशयम्, उर्व्यां भूमौ च, स्तोकम् अल्पम्, प्रयाति गच्छति, पलायमानः खल्वयं मृगः उल्लम्फनातिशयेन आकाश एव अधिकं तिष्ठति भूमौ चाल्पमिति भावः। इति त्वं पश्य।

अत्र यथावद्वस्तुवर्णनात् स्वभावोक्तिरलङ्कारः। उर्व्यामित्यत्र च परुषवर्णतया श्रुतिदुःखावहत्वात् दुःश्रवत्वदोषः, तथा उर्व्यामित्यतः परं समुच्चयार्थकश्चकारः अवश्यं वक्तव्यः, किन्तु नोक्त इति वाच्यानभिधानदोषश्च। 'याति भूमौ च किञ्चित्' इति पाठे तु तयोः समाधानम्।

"बले रामी नीलवाक्तविते विधु" इति "शताङ्गः स्यन्दनो रथः" इति "शष्पं बालतृणम्" इति च अमरः।

पश्चादर्द्धमिति पश्चार्द्धम्, पृषोदरादित्वात् साधुः।

स्रग्धरा वृत्तम् ॥७॥

---

গ্রীবা পরিবর্তিত করিয়া পশ্চাদ্‌গামী রথের প্রতি, বার বার সুন্দর দৃষ্টিপাত করিতেছে; বাণ পড়িবার ভয়ে, শরীরের পশ্চাদ্ভাগ-দ্বারা সম্মুখভাগের অভ্যন্তরে অধিকভাবে প্রবেশ করিতেছে; পরিশ্রমে মুখমণ্ডল প্রকটিত হইয়া যাইতেছে; তাহাতে সেই মুখ হইতে পতিত অর্দ্ধভুক্ত নূতন তৃণদ্বারা পথ ব্যাপ্ত করিতেছে; এই অবস্থায় অত্যন্ত উল্লম্ফন করায় আকাশেই অধিক গমন করিতেছে, কিন্তু ভূতলে অল্পই যাইতেছে; দেখ—॥৭॥

सविस्मयम् (१)। कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तोऽयं मृगः। (प)

सूतः। उद्घातिनी भूमिरिति रश्मिसंयमनात् रथस्य मन्दीभूतो वेगः; तेनैष मृगो विप्रकृष्टः संवृत्तः। सम्प्रति हि समदेशवर्त्ती न ते दुरासदो भविष्यति (२)। (फ)

राजा। तेन हि मुच्यन्तामभीषवः। (ब)

(प) सविस्मयमिति। अयं मृगः, अनुपतत एव पश्चाद्धावत एव मे मम, कथं प्रयत्नेन दूरगतत्वात् कष्टेन प्रेक्षणीयो द्रष्टव्यः संवृत्तो जातः। एतेन रथस्य सातिशयं वेगं सम्पादयितुमशक्ततया सूतस्य निन्दा आक्षिप्यते।

(फ) अतः सूतः स्वदोषं परिहरति सूत इति। उद्घातयति स्खलनं जनयतीति उद्घातिनी उन्नतावनता। इति हेतोः, रश्मेरश्वरज्ज्वोः संयमनादाकर्षणात्। विप्रकृष्टो दूरवर्त्ती। दुरासदो दुर्लभः, अयं मृग इति शेषः।

(ब) राजेति। तेन हि समदेशवर्त्तित्वेनैव हेतुना, अभीषवः प्रग्रहा अश्वरज्जव इति यावत्, मुच्यन्तां लम्बीकरणाय हस्तात् त्यज्यन्ताम्।

"अभीषुः प्रग्रहे रश्मौ" इत्यमरः।

(প) (বিস্ময়ের সহিত) পিছনে পিছনে যাইতে যাইতেই এই হরিণ, আমার যত্নপূর্ব্বক দর্শনের যোগ্য হইয়া দাঁড়াইল কেন?।

(ফ) সারথি। স্থানগুলি উচু-নীচু ছিল বলিয়া, দড়ি টানিয়া ধরায় রথের বেগ কমিয়া গিয়াছিল; তাহাতেই এই হরিণ দূরবর্ত্তী হইয়া পড়িয়াছিল। এখন সমান জায়গায় রহিয়াছে; সুতরাং আপনার দুষ্প্রাপ্য হইবে না।

(१) तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः।

(२) आयुष्मन्! उद्घातिनी भूमिरिति मया रश्मिसंयमनात् रथस्य मन्दीकृतो वेगः। तेन मृग एष विप्रकृष्टान्तरः। सम्प्रति समदेशवर्त्तिनस्ते न दुरासदो भविष्यति।

सूतः । यथाज्ञापयत्यायुष्मान् । इति भूयो रथवेगं सूचयित्वा । आयुष्मन् ! पश्य पश्य । एते हि—(१) (भ)

मुक्तेषु रश्मिषु निरायतपूर्वकाया:
स्वेषामपि प्रसरतां रजसामलङ्घ्याः ।
निष्कम्पचामरशिखाश्च्युतकर्णभङ्गा:
धावन्ति वर्त्मनि तरन्ति नु वाजिनस्ते (२) ॥८॥

(भ) सूत इति । एत इति श्लोकस्थवाजिन इत्यस्य विशेषणम् । हि तथाहि । मुक्तेष्विति । रश्मिषु अश्वरज्जुषु, मुक्तेषु सत्सु, निर् विद्यन्ते आयता दीर्घा येभ्य इति निरायता अतीवदीर्घा: पूर्वकाया देहपुरोभागा येषां ते ; प्रसरतां पृष्ठागतवायुवेगेन सम्मुखे प्रचलताम्, स्वेषामपि स्वस्वखुरोत्थापितानामपि, रजसां धूलीनाम्, अलङ्घ्या लङ्घयितुमतिक्रमितुमशक्या:, निष्कम्पा निश्चला: चामराणां गलावधिशिरोलोम्नां शिखा अग्रदेशा येषां ते, तथा च्युता नष्टा: कर्णयोर्भङ्गा अवनमनानि येषां ते तथोक्ता:, ते तव वाजिन: अश्वा:, वर्त्मनि गन्तव्यपथे धावन्ति वेगेन गच्छन्ति, तरन्ति नु आकाशे प्लवन्ते किम् ? । अन्यथा ईदृशवेगासम्भव इति भाव: ।

अत्रापि पूर्ववत् स्वभावोक्ति:, धावने तरणसंशयात् शुद्धसन्देहश्च अनयोर्मिथो निरपेक्षतया संसृष्टि: । तथा उक्तविषयमात्राश्रयणात् निरायतपदेन किम् अतिदीर्घ:, उत निर्धनादिवत् आयतत्वाभावविशिष्टो वाङ्गस्य इति सन्देहात् सन्दिग्धतादोष:, स तु 'महायतपूर्वकाया:' इति पाठेन परिहार्य्य: ।

---

(ব) রাজা। তাহা হইলে দড়ি ছাড়িয়া দাও।

(ভ) সারথি। আয়ুষ্মান্ যেমন আদেশ করেন। ( এই বলিয়া সাতিশয় রথের বেগ জন্মাইয়া ) আয়ুষ্মন্ ! দেখুন দেখুন।

---

(१) सूतः ।···( रथवेगं निरूप्य ) आयुष्मन् ! पश्य पश्य ।

(२) मुक्तेषु रश्मिषु निरायतपूर्वकाया: निष्कम्पचामरशिखा निभृतोर्द्ध्वकर्णा: ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयेव रथ्या: ॥

রাজা। সহর্ষম্। নূনমতীত্য হরিণং হয়ো বর্ত্তন্তে।
যতঃ—(১) (ম)

যদালোকে সূক্ষ্মং ব্রজতি সহসা তদ্বিপুলতাং
যদর্দ্ধে বিচ্ছিন্নং ভবতি কৃতসন্ধানমিব তত্।
প্রকৃত্যা যদ্বক্রং তদপি সমরেখং নয়নয়োঃ
ন মে দূরে কিঞ্চিৎ ক্ষণমপি ন পার্শ্বে রথজবাৎ (২) ॥৮॥

বসন্ততিলকা বৃত্তম্—"উক্তা বসন্ততিলকা তভজা জগৌ গঃ" ইতি লক্ষণাৎ ॥৮॥

(ম) রাজেতি। ঈপ্সিতহরিণপ্রাপ্তিসম্ভাবনয়া হর্ষঃ। হয়াঃ মদীয়ঘোটকাঃ, হরিণমতীত্য বেগাতিশয়াদতিক্রম্য, বর্ত্তন্তে বর্ত্তিষ্যন্ত ইতি ভবিষ্যৎসামীপ্যে বর্ত্তমানা ইতি নূনং তর্কয়ামীত্যর্থঃ।

"নূনং তর্কেঽর্থনিশ্চয়ে" ইত্যমরঃ।

যদিতি। রথস্য জবাৎ বেগাৎ যৎ বস্তু, আলোকে দূরতো দর্শনে সূক্ষ্মং ক্ষুদ্রমাসীৎ, সহসা তৎক্ষণাদেব, তৎ বস্তু বিপুলতাং বিশালতাম্, ব্রজতি প্রাপ্নোতি। ইদং সম্মুখদূরস্থ-বিষয়ম্। যৎ বনাদিকং বস্তু, অর্দ্ধে বস্তুন এব, বিচ্ছিন্নং বিভক্তম্, তৎ বস্তু,

দড়ি ছাড়িয়া দিলে পর, যাহাদের দেহের পূর্ব্বার্দ্ধ অত্যন্ত দীর্ঘ হইয়াছে; আপনাদের খুরোত্থাপিত সম্মুখগামী ধূলিও, যাহাদিগকে লঙ্ঘন করিতে পারিতেছে না এবং যাহাদের চামরের অগ্রভাগ নিশ্চল হইয়াছে, আর কর্ণের বক্রতা নিবৃত্তি পাইয়াছে; সেইরূপ আপনার এই অশ্বগণ, পথে ধাবিত হইতেছে, না,—সন্তরণ করিতেছে? ॥৮॥

(ম) রাজা। (আনন্দের সহিত) নিশ্চয় ঘোড়াগুলি, হরিণটাকে অতিক্রম করিয়া যাইবে। কারণ,—

(১) ধ্রুবমতীত্য হরিণী হরীৎ বর্ত্তন্তে বাজিনঃ। তথাহি—

(২) যদন্তর্বিচ্ছিন্নম্, যদর্দ্ধে বিচ্ছিন্নম্। ন মে পার্শ্বে কিঞ্চিৎ ক্ষণমপি দূরে রথজবাৎ।

সূতঃ। পশ্যৈনং ব্যাপাদ্যম্। (য)

রাজা। শরসন্ধানং নাটয়তি (১)। (র)

---

কৃতসন্ধানমিব কৃতসংযোগমিব ভবতি। ইদং পার্শ্বস্থবিষয়ম্। যৎ বনস্পত্যাদিকম্, প্রকৃত্যা স্বভাবেনৈব বক্রং কুটিলম্, তদপি বস্তু, সমা রেখা যস্য তৎ তাদৃশং ভবতি। ইদমপি পার্শ্বস্থবিষয়ম্। তথা কিঞ্চিৎ কিমপি বস্তু, মে মম নয়নয়োশ্চক্ষুষোঃ, ক্ষণমপি ন দূরে বিদ্যতে সহসৈব সন্নিহিতত্বাদিতি ভাবঃ; ন বা পার্শ্বে তিষ্ঠতি হঠাদেব দূরপশ্চাদ্গতত্বাদিত্যাশয়ঃ।

অত্র কৃতসন্ধানমিবেতি ভাবাভিমানিনী ক্রিয়োৎপ্রেক্ষালঙ্কারঃ। তথা চতুর্থপাদে সমুচ্চয়ার্থে চকারো বাকারো বা বক্তব্যঃ, কিন্তু নোক্ত ইতি বাচ্যানভিধানদোষঃ। স তু 'ন দূরে কিঞ্চিদ্বা ক্ষণমপি ন পার্শ্বে রথজবাৎ' ইতি পাঠেন সমাধেয়ঃ।

"তত্ত্বে ত্বঽদ্ধাঞ্জসা দ্বয়ম্" ইত্যমরঃ।

এতদনুরূপোক্তির্যথা ভট্টিকাব্যে—

"অথ পুরুজবযোগান্নেদয়দ্দূরসংস্থং দবয়দতিরয়েণ প্রাপ্তমুর্বীবিভাগম্।"

শিখরিণী বৃত্তম্—"রসৈ রুদ্রৈশ্ছিন্না যমনসভলাগঃ শিখরিণী" ইতি লক্ষণাৎ ॥৯॥

(য) সূত ইতি। ব্যাপাদ্যং হন্তব্যম্, হরিণমিতি শেষঃ।

(র) রাজেতি। নাটয়তি অভিনয়তি। হরিণং হন্তুমিতি ভাবঃ।

---

যাহা দৃষ্টিপথে সূক্ষ্ম ছিল, রথের বেগে সহসাই তাহা বিস্তৃতি লাভ করিতেছে; যাহা বাস্তবিকই বিভক্ত, তাহা যেন সংযুক্ত হইতেছে; যাহা স্বভাবতই বক্র, তাহাও সমরেখ বলিয়া বোধ হইতেছে এবং ক্ষণকালের জন্যও কোন বস্তুই আমার নয়নের দূরে কিংবা পার্শ্বে থাকিতেছে না ॥৯॥

(য) সারথি। এই বধ্য হরিণটাকে দেখুন।

(র) রাজা। ( বাণসন্ধান অভিনয় করিলেন। )

---

(১) সূত। পশ্যৈনং ব্যাপাদ্যমানম্। ( শরসন্ধানং নাটয়তি। )

নেপথ্যে। ভো ভো রাজন্! আশ্রমমৃগোঽয়ং ন হন্তব্যো ন হন্তব্যঃ। (ল)

সূতঃ। আকর্ণ্য অবলোক্য চ। আয়ুষ্মন্! অস্য খলু তে বাণপাতপথবর্ত্তিনঃ কৃষ্ণসারস্যান্তরায়ৌ তপস্বিনৌ সংবৃত্তৌ (১)। (ব)

রাজা। সসম্ভ্রমম্। প্রগৃহ্যন্তামভীষবঃ (২)। (শ)

সূতঃ। যথাজ্ঞাপয়ত্যায়ুষ্মান্। ইতি তথা করোতি (৩)।

ততঃ প্রবিশতি সশিষ্যো বৈখানসঃ। (ষ)

(ল) নেপথ্য ইতি। সম্ভ্রমে দ্বিরুক্তিঃ। অত্র হিংসানিষেধাদিত্যাশয়ঃ।

(ব) সূত ইতি। কৃষ্ণসারস্য কৃষ্ণসারহত্যায়াঃ, অন্তরায়ৌ নিবারকত্বেন বিঘ্নৌ, সংবৃত্তৌ জাতৌ।

(শ) রাজেতি। সসম্ভ্রমং সত্বরং প্রগৃহ্যন্তাম্ আকৃষ্য ধ্রিয়ন্তাম, অভীষবঃ অশ্বরজ্জবঃ।

(ল) নেপথ্যে। হে হে রাজন্! এটা আশ্রমের হরিণ; মারিবেন না মারিবেন না।

(ব) সারথি। (শুনিয়া এবং দেখিয়া) আয়ুষ্মন্! দুইজন তপস্বী, আপনার বাণক্ষেপের পথবর্ত্তী এই হরিণটার বিঘ্নস্বরূপ হইয়াছেন।

(শ) রাজা। (ত্বরার সহিত) অশ্বরজ্জু আকর্ষণ কর।

সারথি। আয়ুষ্মান্ যেমন আদেশ করেন। (এই বলিয়া অশ্বরজ্জু আকর্ষণ করিল।)

(১) সূতঃ।···তে বাণপথবর্ত্তিনঃ কৃষ্ণসারস্যান্তরে তপস্বিন উপস্থিতাঃ।

(২) রাজা। (সসম্ভ্রমম্) তেন হি নিগৃহ্যন্তাং বাজিনঃ।

(৩) সূতঃ। তথা। (রথং স্থাপয়তি)।

वैखा। हस्तमुद्यम्य। राजन् (१)! आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः। (स)

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ॥१०॥

(ष) तत इति। वैखानसः कश्चित्तपस्वी।

"वैखानसो वनवासी बाणप्रस्थश्च तापसः" इति वैजयन्ती।

(स) वैखेति। उद्यम्य उत्तोल्य।

न खल्विति। तूलराशौ अग्निरिव, मृदुनि कोमले, अस्मिन् मृगशरीरे अयं बाणः, न खलु न खलु सन्निपात्यः नैव निक्षेप्यः। तत्र हेतुमाह—क्वेति। बत खेदे। अतिलोलम् अल्पाघातेनैव विनश्वरत्वात् नितान्तचञ्चलम्, हरिणकानां क्षुद्रमृगाणाम्, जीवितं जीवनञ्च क्व कुत्र वर्त्तते, निशिताः पाषाणादौ घर्षणेन तीक्ष्णीकृता निपाता धारा येषां ते, तथा वज्रस्येव सारो बलं येषां ते, ते तव शरा बाणाश्च क्व कुत्र विद्यन्ते। वायसविनाशाय पाशुपतास्त्रप्रयोग इव क्षुद्रहरिणवधाय स्वकीयदारुणबाणप्रहारो नितरामन्याय्यः "सम्भवति लघूपाये गुरूपायस्यान्याय्यत्वम्" इति न्यायादित्याशयः।

अत्र परार्द्धार्थरूपकारणेन पूर्वार्द्धार्थरूपकार्य्यस्य समर्थनादर्थान्तरन्यासः, कोमलकठिनयोर्जीवितशरयोर्विरूपयोः सङ्घटनात् विषमालङ्कारः, वज्रसारा इति लुप्तोपमा च इत्येतेषामङ्गाङ्गिभावेन सङ्करः; स च तूलराशाविवाग्निरिति श्रौतोपमया पुनः संसृज्यते।

(ষ) ( তাহার পর শিষ্যের সহিত একজন তপস্বীর প্রবেশ। )

(স) তপস্বী। ( হস্ত উত্তোলন করিয়া ) রাজন্! এটা আশ্রমের হরিণ; মারিবেন না মারিবেন না।

(१) भो भो राजन्!।

তদাশু কৃতসন্ধানং প্রতিসংহর সায়কম্ ।
আর্ত্তত্রাণায় বঃ শস্ত্রং (১) ন প্রহর্ত্তুমনাগসি ॥১১॥

সংসৃষ্টিসঙ্করয়োরপি পুনঃ সংসৃষ্টিসঙ্করৌ সম্ভবত ইতি প্রদর্শিতমস্মাভিঃ সাহিত্যদর্পণ-টীকায়াম্ ।

"তারী বলে স্থিরাংশে চ ন্যায্যে ক্লীবং বরে ত্রিষু" ইত্যমরঃ ।

হরিণকানামিতি অল্পার্থে কপ্রত্যয়ঃ । নিপাত্যতে বিনাশ্যতে ছিদ্যতে অনেনেতি নিপাতো ধারা । করণে ঘঞ্ ।

মালিনী বৃত্তম্—"ননমযযযুতেয়ং মালিনী ভোগিলোকৈঃ" ইতি লক্ষণাত্ ॥১০॥

ননু তর্হি যেন কেনচিত্ সামান্যশস্ত্রেণ হরিণোঽয়ং মযা নিহন্যতামিত্যাহ তদিতি । তত্ তস্মাদাশ্রমমৃগত্বেনৈব অবধ্যত্বাত্, কৃতং সন্ধানং লক্ষ্যোপরি পাতায় স্থিরীকরণং যস্য তম্, সায়কম্ অমুং বাণম্ ; আশু শীঘ্রমেব, প্রতিসংহর নিবর্ত্তয় । তত্র কারণ-মাহ—আর্ত্তেতি । বো যুষ্মাকং শস্ত্রম্, আর্ত্তস্য বিপন্নস্য প্রাণিনঃ ত্রাণায় রক্ষণায়ৈব প্রবর্ত্ততে, কিন্তু অনাগসি নিরপরাধে প্রাণিনি, প্রহর্ত্তুং ন প্রবর্ত্ততে, ন্যায়প্রবর্ত্তনার্থমেব বিধাত্রা যুষ্মাকং সৃষ্টত্বাদিতি ভাবঃ ।

অত্রাপি পূর্ব্ববদেব কার্য্যকারণভাবে অর্থান্তরন্যাসোঽলঙ্কারঃ । তথা ত্রাণায়েতি যুট্-প্রত্যয়েন প্রক্রম্য প্রহর্ত্তুমিতি তুমুন্প্রত্যযাভিধানাত্ ভগ্নপ্রক্রমতা দোষঃ । স চ 'ত্রাতুমার্ত্তং হি বঃ শস্ত্রং ন প্রহর্ত্তুমনাগসম্' ইতি পাঠেন সমাধেয়ঃ । এবঞ্চ হিশব্দস্য হেত্বর্থত্বান্ন নিরর্থকত্বদোষোঽপি । ন বা আর্ত্তমিতি দ্বিতীয়ামভিধায় অনাগসীতি সপ্তম্যভিধানাত্ পুনর্ভগ্নপ্রক্রমতা চেতি ধ্যেয়ম্ ।

---

তূলার রাশিতে অগ্নির ন্যায়, এই কোমল মৃগশরীরে এই বাণ নিক্ষেপ করিবেন না, করিবেন না । হায় ! ক্ষুদ্র হরিণগণের নিতান্ত চঞ্চল জীবনই বা কোথায় ; আর বজ্রের ন্যায় বলবান্ ও সুধার আপনার বাণগুলিই বা কোথায় ॥১০॥

---

(১) আর্ত্তত্রাণায় তে শস্ত্রম্ ।

রাজা। সপ্রণামম্। এষ প্রতিসংহৃত এব। ইতি যথোক্তং করোতি (১)। (হ)

বৈখা। সহর্ষম্। সদৃশমেবৈতৎ পুরুবংশপ্রদীপস্য ভবতঃ (২)। (ক্ষ)

জন্ম যস্য পুরোর্বংশে যুক্তরূপমিদং তব।
পুত্রমেবং গুণোপেতং চক্রবর্ত্তিনমাপ্নুহি ॥১২॥

---

"আগোঽপরাধো মন্তুশ্চ" ইত্যমরঃ ॥১১॥

(হ) রাজেতি। প্রতিসংহৃত এব নিবর্ত্তিত এব। যথোক্তং করোতি প্রতিসংহরতীত্যর্থঃ।

(ক্ষ) বৈখেতি। পুরোর্যযাতিকনিষ্ঠপুত্রস্য বংশে প্রদীপস্তদুজ্জ্বলতাকারকস্তস্য। সদৃশমেব যোগ্যমেব।

জন্মেতি। পুরোস্তদাখ্যস্য যযাতিপুত্রস্য বংশে, যস্য তব জন্ম, তস্য তব, ইদম্ অস্মাকং নিবারণমাত্রেণৈব সংহিতস্যাপি বাণস্য প্রতিসংহরণম্, যুক্তরূপং সর্ব্বথৈব উপযুক্তং জাতম্। এতেন নিতান্তং সন্তুষ্যন্নাশাস্তে পুত্রমিতি। এবং গুণোপেতম্ ঈদৃশন্যায়বিনয়াদিগুণশালিনম্, চক্রবর্ত্তিনং সার্ব্বভৌমং পুত্রম্, আপ্নুহি লভস্ব।

---

অতএব কৃতসন্ধান বাণটাকে শীঘ্র প্রতিসংহার করুন। কারণ, বিপন্নের পরিত্রাণের জন্যই আপনাদের অস্ত্র; কিন্তু নিরপরাধের উপরে প্রহার করিবার জন্য নহে ॥১১॥

(হ) রাজা। (প্রণামের সহিত) এই প্রতিসংহৃতই হইল। (এই বলিয়া প্রতিসংহার করিলেন।)

(ক্ষ) তপস্বী। (আনন্দের সহিত) আপনি পুরুবংশের প্রদীপ; আপনার পক্ষে ইহা উপযুক্তই হইয়াছে।

---

(১) রাজা। এষ প্রতিসংহৃতঃ। (যথোক্তং করোতি।)

(২) বৈখা। (সহর্ষম্) উচিতমেবৈতৎ পুরুবংশপ্রভবস্য নরেন্দ্রদীপস্য ভবতঃ।

इतरौऽपि। हस्तमुद्यम्य। सर्वथा चक्रवर्त्तिनं पुत्रमाप्नुहि (१)। (क)

राजा। सप्रणामम्। प्रतिगृहीतं ब्राह्मणवचः (२)। (ख)

वैखा। राजन्! समिदाहरणाय प्रस्थिता वयम्। एष खल्वस्मद्गुरोः कण्वस्य कुलपतेः साधिदैवत एव शकुन्तलया अनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्य्यातिपातस्तदत्र प्रविश्य प्रतिगृह्यतामतिथिसत्कारः (३)। अपि च, (ग)

चक्रे भूमण्डले वर्त्तते अधीश्वरत्वेनावतिष्ठत इति चक्रवर्त्ती। "अग्निष्टोमयाजी पुत्रस्ते भविता" इत्यादिवत् "धातुसम्बन्धे प्रत्ययाः" इत्यनेन साधुत्वम्।

"चक्रवर्त्ती सार्वभौमः" इत्यमरः। एतदनुरूपवाक्यं यथा रघुवंशे—"भवन्तमीड्यं भवतः पितेव" ॥१२॥

(क) इतरौऽपीति। शिष्यौऽपीत्यर्थः। उद्यम्य उत्तोल्य। सर्वथा अवश्यम्।

(ख) राजेति। प्रतिगृहीतं सत्यतया स्वीकृतम्, ब्राह्मणोक्तत्वादेवेति भावः।

(ग) वैखेति। समिदाहरणाय यज्ञीयकाष्ठानयनाय। कुलपतेः शिष्यसमूहनियन्तुः अन्नदानादिपूर्वकमहत्तरमुख्याध्यापकस्य, कण्वस्य तदाख्यस्य महर्षेः, आश्रम इति परेणान्वयः। शकुन्तलयैव साधिदैवतः अधिदैवतेन अधिष्ठातृजनेन सहेति सः

পুরুবংশে যাঁহার জন্ম, সেই আপনার পক্ষে ইহা উপযুক্তই বটে। অতএব এইরূপ গুণসম্পন্ন সার্বভৌম পুত্র লাভ করুন ॥১২॥

(ক) অপর তপস্বীও। ( হস্ত উত্তোলন করিয়া ) অবশ্যই চক্রবর্ত্তী পুত্র লাভ করুন।

(খ) রাজা। ( প্রণামপূর্ব্বক ) ব্রাহ্মণের বাক্য ( সত্য বলিয়া ) স্বীকার করিলাম।

(१) क्वचित् अयं पाठो नास्ति। (२) राजा। ( सप्रणामम् ) प्रतिगृहीतम्।

(३) वैखानसः।···एष खलु काश्यपस्य कुलपतेरनुमालिनीतीरम्···।···पातः प्रविश्य।

धर्म्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य ।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति (१) ॥१३॥

शकुन्तलया अधिष्ठित इत्यर्थः, मालिन्यास्तदाख्याया नद्यास्तीरे इत्यनुमालिनीतीरम् । चेद्-यदि अन्यस्य कार्य्यस्य अतिपातः अतिक्रमः क्षतिरिति यावत्, न भवेत्, तत् तदा ।

शकुन्तलयेति "सर्वं त तेन पुत्रेण पृथिवी मनुरब्रवीत्" इत्यादिवत् अभेदे तृतीया । अनुमालिनीतीरमिति विभक्त्यर्थे अव्ययीभावः ।

कुलपतिलक्षणं यथा—"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः ॥"

अत्र उल्लेखी नाम नाट्यालङ्कारः "कार्य्यग्रहणमुल्लेखः" इति दर्पणलक्षणात् ।

धर्म्या इति । प्रतिहता भवद्बाहुबलप्रभावेणैव विनाशिताः विघ्ना यासां ताः, धर्म्या धर्म्मादनपेताः तपोधनाना तपस्विनाम्, क्रिया यागादिकर्म्माणि, समवलोक्य, मौर्व्या धनुर्गुणस्य यः किणः घर्षणेन शुष्कव्रणः स एव अङ्कश्चिह्नं यत्र स तादृशः मे मम दुष्मन्तस्येत्यर्थः, भुजो बाहुः, कियत् किंपरिमाणम्, रक्षति इति ज्ञास्यसि । धर्म्यक्रियाणां निर्विघ्नतादर्शनेन स्वकीयभुजः सर्वमेव भूमण्डलं सर्वथैव रक्षतीति ज्ञास्यतीति भावः ।

अत्र धर्म्यक्रियाणां निर्विघ्नतादर्शनेन स्वकीयबाहुद्वारा सर्वस्य सर्वथा रक्षाया अनुमानात् ज्ञप्तिर्नाम नाट्यलक्षणम् । यथा दर्पणे—

"ज्ञप्तिः केनचिदर्थेन किञ्चिदर्थानुमीयते ।"

आर्य्या जातिः ॥१३॥

(গ) তপস্বী। রাজন্! আমরা সমিধ আহরণ করিবার জন্য চলিয়াছি। মালিনীনদীর তীরে আমাদের গুরু কুলপতি কণ্বের এই আশ্রম দেখা যাইতেছে; শকুন্তলাই ইহার অধিষ্ঠাত্রী। যদি আপনার অন্য কার্য্যের অতিক্রম না হয়; তবে আপনি এই আশ্রমে প্রবেশ করিয়া, অতিথিসৎকার গ্রহণ করুন। আরও—

(१) रक्ष्यास्तपोधनानाम् ।

রাজা। অপি সন্নিহিতোঽত্র কুলপতিঃ ?। (ঘ)

বৈখা। ইদানীমেব দুহিতরং শকুন্তলামতিথিসৎকারায়াদিশ্য (১) দৈবমস্যাঃ প্রতিকূলং শময়িতুং সোমতীর্থং গতঃ। (ঙ)

রাজা। ভবতু, তামেব দ্রক্ষ্যামি। সা খলু বিদিতভক্তির্মাং মহর্ষয়ে নিবেদয়িষ্যতি (২)। (চ)

---

(ঘ) রাজেতি। অত্র আশ্রমে, কুলপতিঃ পূর্ব্বোক্তলক্ষণঃ কণ্বঃ, অপি কিং সন্নিহিত আসন্নঃ স্থিতঃ কিম্।

(ঙ) বৈখেতি। অস্যাঃ শকুন্তলায়াঃ প্রতিকূলম্ অভিমতবরাদ্যপ্রাপ্তেঃ বিরোধি, দৈবং পূর্ব্বজন্মীয়দুরিতম্, শময়িতুং বিনাশয়িতুম্। যথা উদ্বাহতত্ত্বধৃতম্—

"তত্র দৈবমভিব্যক্তং পৌরুষং পৌর্ব্বদৈহিকম্।"

(চ) রাজেতি। ভবতু অত্রৈব মম মৃগয়াসমাপ্তিরিতি শেষঃ। তাং শকুন্তলামেব। বিদিতা অবগতা ভক্তিঃ মহর্ষিং কণ্বং প্রতি পূজ্যতয়া মমানুরাগো যয়া সা, মহর্ষয়ে কণ্বায়, মাং তাদৃশভক্তিমন্তমিত্যর্থঃ, নিবেদয়িষ্যতি জ্ঞাপয়িষ্যতি। মহর্ষিং প্রতি মম ভক্তিং প্রত্যক্ষীকৃত্য শকুন্তলা তাং ভক্তিং মহর্ষয়ে কথয়িষ্যতি, ততশ্চ স মে কল্যাণং বিধাস্যতীতি ভাবঃ।

---

তপস্বীদিগের নির্বিঘ্ন-সম্পন্ন ধর্ম্মকার্য্যগুলি দেখিয়া, "ধনুর গুণ আকর্ষণের চিহ্নে চিহ্নিত আমার বাহু, কি পরিমাণ রক্ষা করিতেছে" ইহা জানিতে পারিবেন ॥১৩॥

(ঘ) রাজা। কুলপতি আশ্রমে আছেন কি ?।

(ঙ) তপস্বী। সম্প্রতিই, অতিথিসৎকার করিবার জন্য ; কন্যা শকুন্তলাকে আদেশ করিয়া, উহার প্রতিকূল দৈবের উপশম করিবার নিমিত্ত সোমতীর্থে গিয়াছেন।

---

(১) সন্দিশ্য। (২) ভবতু। তামেব পশ্যামি। সা খলু বিদিতভক্তিং মাং মহর্ষেঃ কথয়িষ্যতি।

वैखा। साधयामस्तावत्। इति (१) सशिष्यौ निष्क्रान्तः। (छ)

राजा। सूत! नोदय (२) अश्वान्, पुण्याश्रमदर्शने-नात्मानं पुनीमहे। (ज)

सूतः। यदाज्ञापयत्यायुष्मान्। इति भूयो रथवेगं रूपयति (३)। (झ)

राजा। समन्तादवलोक्य। सूत! अकथितोऽपि ज्ञायत एवायमाभोगस्तपोवनस्य (४)। (ञ)

विदितभक्तिरिति भक्तिशब्दो भावे क्तिप्रत्ययान्तः। तेन पूरण्यादित्वान्न पुंवद्भावनिषेध इति तत्रैव द्रष्टव्यम्।

(छ) वैखेति। तावत् वाक्यालङ्कारे, साधयामो गच्छामः। यथा दर्पणे—

"प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते।"

(ज) राजेति। नोदय चालय। पुनीमहे पवित्रं कुर्म्महे।

(झ) सूत इति। भूयः पुनरपि। रूपयति साधयति।

(চ) রাজা। হউক। তাঁহার সহিতই দেখা করি; তিনি (শকুন্তলা) আমার ভক্তি জানিয়া, মহর্ষিকে জানাইবেন।

(ছ) তপস্বী। তবে আমরা যাই। (এই বলিয়া শিষ্যের সহিত চলিয়া গেলেন।)

(জ) রাজা। সারথি! ঘোড়াগুলিকে চালাও; পুণ্য আশ্রম দেখিয়া আত্মাকে পবিত্র করি।

(ঝ) সারথি। আয়ুষ্মান্ যাহা আদেশ করেন। (এই বলিয়া রথের বেগ অভিনয় করিতে লাগিল।)

(ঞ) রাজা। (সকল দিকে দৃষ্টিপাত করিয়া) সারথি! কেহ না বলিয়া দিলেও, ইহাই যে তপোবনের সীমা, তাহা বুঝিতেছি।

(१) क्वचित् इतिशब्दो नास्ति। (२) चोदय।

(३) भूयो रथवेगं निरूपयति। (४) यथायमाश्रमस्तपोवनस्य।

सूतः। कथमिव?। (ट)

राजा। किं न पश्यति भवान्?। इह हि—

नीवाराः शुक-कोटरार्भक-मुख-भ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः (१) सूच्यन्त एवोपलाः।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः
तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ॥१४॥

(ञ) राजेति। समन्तात् सर्वासु दिक्षु। अकथितोऽपि केनाचिदपरिचायितोऽपि तपोवनस्य अयमेव आभोगः पूर्णता सीमेत्यर्थः ज्ञायते अनुमीयते।

"पूर्णत्वयत्नावाभोगः" इति त्रिकाण्डशेषः।

(ट) सूत इति। कथमिव कथम्भूतं तवेदं ज्ञानमित्यर्थः।

नीवारा इति। तरूणाम् अधो निम्नदेशे, शुकानां तदाख्यपक्षिणां ये कोटरार्भकाः तरुगात्रगतरन्ध्रस्थशावकाः तेषां मुखेभ्यो भ्रष्टाः पतिताः नीवारास्तृणधान्यानि दृश्यन्त इति शेषः। तपस्विभिरेव अनायासलभ्यतया नीवारव्यवहारात् शुकैश्च नीत्वा अर्भकेभ्यो दानात् अन्यत्र तु तद्बाहुल्यासम्भवात् तपोवनसीमेवेयमिति भावः। क्वचित् कुत्रचिदंशे, इङ्गुदीफलानि भिन्दन्ति तैलार्थं चूर्णयन्तीति ते इङ्गुदीफलभिदः, अतएव प्रस्निग्धाः प्रकर्षेण तैलाक्ता एव, उपलाः पाषाणाः, सूच्यन्ते तपोवनसीमासूचकतया दृश्यन्त इत्यर्थः। अन्यत्र ईदृशपाषाणदर्शनासम्भवात् तपोवनारम्भ एवायमित्यभिप्रायः। विश्वासस्य 'अस्मान् कोऽपि न हिंस्यात्' इति विस्रम्भस्य उपगमात् आजन्मत एव लाभात् अभिन्ना श्रेणीभेदरहिता गतिर्येषां ते तादृशा मृगाः, शब्दं रथशब्दम्, सहन्ते निरुद्वेगमाकर्णयन्ति। अन्यत्र मृगाणामीदृशी निर्भयता न स्यादिति तपोवनाभोग एवायमित्याशयः। तथा तोयाधारपथा जलाशयमार्गाश्च, वल्कलशिखानां परिहितवल्कलाग्राणां

(ট) সারথি। কিরূপে (বুঝিলেন)?।

রাজা। তুমি কি—দেখিতেছ না? এই স্থানে—

(१) इङ्गुदीफलभिदः।

अपि च,

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूलाः
भिन्नो रागः किशलयरुचामाज्यधूमोद्गमेन ।
एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति (१) ॥१५॥

निष्यन्दरेखाभिर्विगलज्जलचिह्नैः अङ्किताश्चिह्निता विद्यन्त इति शेषः । स्थूलरेखादर्शनात् वल्कलशिखानिष्यन्दजनितैवेयं रेखा इति, तथा मुहुः स्नायिनां तपस्विनामेव इमे पन्थानः, तेन च तपोवनस्यैवायमाभोग इति भावः ।

अत्र तपोवनाभोगानुमानकार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयः, तत्कृत-विच्छित्तिवशाच्चानुमानालङ्कारः ।

"तृणधान्यानि नीवाराः" इत्यमरः ।

शार्दूलविक्रीडितं वृत्तम्—"सूर्य्याश्वैर्मसजास्तताः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात् ॥१४॥

कुल्येति । पवनचपलैः वायुना कम्पितैः, कुल्यानां कृत्रिमक्षुद्रनदीनाम्, अम्भोभि-र्जलैः, शाखिनो वृक्षाः, धौतानि मूलानि येषां ते तादृशा भवन्ति । तपोवन एवेदृश-कृत्रिमसरिन्निर्म्माणादन्यत्र चासम्भवात् तपोवनाभोग एवायमिति भावः । आज्यस्य यज्ञाग्नौ आहुतघृतस्य धूमोद्गमेन, किशलयरुचां तरुपल्लवद्युतीनां रागो लौहित्यम्, भिन्नो वैपरीत्यं प्राप्तः । तपोवनादन्यत्र ईदृशाज्यधूमोद्गमासम्भवात् तदाभोग एवाय-

---

শুকপক্ষীর কোটরস্থ শাবকদিগের মুখ হইতে নিপতিত উড়ীধান সকল বৃক্ষের নীচে রহিয়াছে, কোন স্থানে ইঙ্গুদীফলভেদক সুস্নিগ্ধ পাষাণ সকল দেখা যাইতেছে, বিশ্বাস লাভ করায় শ্রেণীবদ্ধ হরিণগণ রথের শব্দ শুনিতেছে এবং জলাশয়ের পথগুলি, বল্কলের অগ্র হইতে বিগলিত জলরেখায় অঙ্কিত রহিয়াছে ॥১৪॥

---

(१) विद्यासागरैरयं श्लोकः परिहृतः ।

सूतः । सर्वमुपपन्नम् । (ठ)

राजा । स्तोकमन्तरं गत्वा । आश्रमोपरोधो माभूत्, तदिहैव रथं स्थापय, यावदवतरामि (१) । (ड)

नित्याश्रयः । एते हन्यमानाः हरिणशिशवश्च, नष्टाशङ्का आजन्मत एव स्वहिंसाया अदर्शनात् निर्भयाः सन्तः, छिन्ना छित्त्वा एभ्य एव खादनाय दत्ता दर्भाणां कुशानामङ्कुरा यस्यां तस्याम्, उपवनभुवि उद्यानचत्वरे, अर्वाक् अस्माकं समीप एव, मन्दमन्दम् अल्पमल्पं चरन्ति भ्रमन्ति । तपोवनं विना अन्यत्र हिंस्राहिंसाया अदर्शनात् तपोवनाभोग एवायमित्यभिप्रायः ।

अत्रापि पूर्ववदेवालङ्कारः ।

मन्दाक्रान्ता वृत्तम्—"मन्दाक्रान्ताम्बुधिरसनगैर्मोभनौ गौ ययुग्मम्" इति लक्षणात् ॥१५॥

(ठ) सूत इति । सर्वं भवदुक्तम्, उपपन्नं युक्तियुक्तम्, मयापि तथैव दर्शनादिति भावः ।

(ड) राजेति । स्तोकमन्तरं गत्वा रथारूढ एव किञ्चिदाश्रमाभ्यन्तरं गत्वा । तथा गमनेनैव रथचक्रघर्षणेन दर्भाङ्कुरादिक्षतिदर्शनादाह—आश्रमोपरोध इति । आश्रमस्य उपरोधः रथचक्रघोटकखुराघातेन क्षतिः, माभूत् न भवतु । तत् तस्मात् । यावच्छब्दो वाक्यालङ्कारे ।

---

আরও, বায়ুসঞ্চালিত কৃত্রিম ক্ষুদ্র নদীর জলে বৃক্ষসকলের মূল ধৌত হইতেছে, ঘৃতের ধূম উঠিতে থাকায় পল্লবকান্তির রক্তিমা বিপরীত হইয়া গিয়াছে এবং এই সকল হরিণশাবক, আমাদের নিকটেই নির্ভয়ে ছিন্নকুশাঙ্কুর উদ্যানভূমিতে অল্প অল্প বিচরণ করিতেছে ॥১৫॥

(ঠ) সারথি। সমস্ত ঠিক্ বটে।

(ড) রাজা। ( একটু ভিতরে যাইয়া ) আশ্রমের ক্ষতি না হয়, সেই জন্য এইখানেই রথ রাখ ; আমি নামি।

---

(१) तपोवननिवासिनामुपरोधो माभूत् एतावत्येव ।

সূতঃ। ধৃতাঃ প্রগ্রহাঃ, অবতরত্বায়ুষ্মান্। (ঢ)

রাজা। অবতীর্য্যাত্মানমবলোক্য চ (১)। সূত! বিনীতবেশেন প্রবেষ্টব্যানি তপোবনানি,. তদিমানি তাবদ্গৃহ্যন্তামাভরণানি ধনুশ্চ। ইতি সূতস্যার্পয়তি। (ণ)

সূতঃ। গৃহ্ণাতি। (ত)

রাজা। যাবদাশ্রমবাসিনঃ প্রত্যবেক্ষ্য নিবর্ত্তিষ্যে, তাবদার্দ্রপৃষ্ঠাঃ ক্রিয়ন্তাং বাজিনঃ (২)। (থ)

(ঢ) সূত ইতি। প্রগ্রহা অশ্বরশ্ময়ঃ, ধৃতা রথস্থাপনায় আকৃষ্টাঃ।

(ণ) রাজেতি। আত্মানং দেহম্। দেহাবলোকনং স্ববেশস্য ভাবপরীক্ষার্থম্। বিনীতবেশেন অনুদ্ধতপরিচ্ছদেন তপোবনানি প্রবেষ্টব্যানি। তথা চ মহামাননীয়ানাং মুনীনামন্তিকে বিনয়সূচনমেব সর্ব্বথা মঙ্গলমিতি ভাবঃ। তৎ তস্মাৎ। আভরণানি বীরভাবব্যঞ্জকাঃ অলঙ্কারাঃ। গৃহ্যন্তাং রক্ষ্যন্তাম্। তথা চ বীরত্বব্যঞ্জকানামাভরণধনুষামভাবে বিনীতবেশ এব স্যাদিত্যাশয়ঃ।

অত্র নীতির্নাম নাট্যালঙ্কারঃ—"নীতিঃ শাস্ত্রেণ বর্ত্তনম্" ইতি দর্পণলক্ষণাৎ। ইদমেব তন্নোদাহৃতম্। অত্রার্পণস্য স্থাপনমাত্ররূপতয়া স্বত্বধ্বংসাভাবেন সম্প্রদানত্বাসম্ভবাৎ সূতস্যেতি সম্বন্ধ এব ষষ্ঠী, রজকস্য বস্ত্রং দদাতীতিবৎ।

(ঢ) সারথি। অশ্বরজ্জু ধরিয়াছি; আপনি নামুন।

(ণ) রাজা। ( নামিয়া দেহের প্রতি দৃষ্টিপাত করিয়া ) সারথি! তপোবনে বিনীতবেশে প্রবেশ করিতে হয়, অতএব এই সকল অলঙ্কার ও ধনু গ্রহণ কর। ( এই বলিয়া সারথির নিকট সমর্পণ করিলেন। )

(১) ক্বচিৎ আত্মানমিত্যাদি নাস্তি।

(২) রাজা। অবতীর্য্য। সূত! বিনীতবেশেন প্রবেষ্টব্যানি তপোবনানি নাম। ইদং তাবদ্গৃহ্যতাম্। সূতায়াভরণানি ধনুশ্চোপনীয়ার্পয়তি। সূত! যাবদাশ্রমবাসিনঃ প্রত্যবেক্ষ্য অহমুপাবর্ত্তে, তাবৎ…।

सूत:। यथाज्ञापयत्यायुष्मान् । इति निष्क्रान्त: (१)।

राजा। परिक्रम्यावलोक्य च। इदमाश्रमपदं तावत् प्रविशामि।

प्रविश्य प्रवेष्टकेन निमित्तं सूचयित्वा। अये! (२)। (द)

शान्तमिदमाश्रमपदं स्फुरति च बाहु: कुत: फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥१६॥

(त) सूत इति। गृह्णाति राजदत्ताभरणधनं मौलि शेष:।

(थ) राजेति। प्रत्यवेक्ष्य अभावाभियोगश्रवणादिना पर्य्यवेक्ष्य। आर्द्रं गमन-श्रमजनितग्रीष्मनिवारणाय जलबिन्दुसिक्तं पृष्ठं येषां ते। वाजिनो घोटका:।

(द) राजेति। परिक्रम्य आश्रमं प्रति कियन्तं पदक्षेपं कृत्वा। आश्रम एव पदं स्थानम्। प्रवेष्टकेन दक्षिणबाहुना, निमित्तं स्पन्दनरूपं शुभलक्षणम्, सूचयित्वा अभिनीय। अये इति शुभलक्षणत्वादादरे।

"पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु।" "भुजबाहू प्रवेष्टो दो:" "निमित्तं हेतुलक्ष्मणो:" इति च अमर:। "अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च।" "सम्भ्रम: साध्वसेऽपि स्यात् संवेगादरयोरपि।" इति च विश्व:।

प्रवेष्टक इत्यनुकम्पायां कप्रत्यय:।

---

(ত) সারথি গ্রহণ করিল।

(থ) রাজা। আমি যাবৎ আশ্রমবাসীদিগকে পর্য্যবেক্ষণ করিয়া ফিরিয়া আসি; তুমি তাবৎ ঘোড়াগুলির পিঠ ভিজাইয়া দাও।

সারথি। আপনি যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল।)

(দ) রাজা। (পাদক্ষেপপূর্ব্বক দৃষ্টিপাত করিয়া) এই আশ্রম; প্রবেশ করি। (প্রবেশপূর্ব্বক দক্ষিণবাহুদ্বারা শুভলক্ষণ সূচনা করিয়া) ওহে!

---

(१) सूत:। तथा निष्क्रान्त:।

(२) इदमाश्रमद्वारं यावत् प्रविशामि। प्रविश्य निमित्तं सूचयन्।

नेपथ्ये । इदो इदो पिअसहीओ (१) । (घ)

(घ) इत इतः प्रियसख्यौ ।

शान्तमिति । इदम् आश्रमपदं तपोवनरूपं स्थानम्, शान्तं शान्तिरसस्यैव आश्रय-भूतम्; तपस्विभिरेवाश्रितत्वादिति भावः । अव्ययानां नानार्थत्वात् चकारः किन्त्वर्थे । तथा च किन्तु बाहुर्दक्षिणो भुजः स्फुरति स्पन्दते स्पन्दित्वा उत्तमस्त्रीलाभरूपं फलं सूचयतीत्यर्थः । इह आश्रमे, अस्य दक्षिणभुजस्पन्दनस्य, फलम् उत्तमस्त्रीलाभरूपः सूचितविषयः, कुतः कस्मात् सम्भवति ? कुतोऽपि नेत्यर्थः; शान्ततया निवृत्त्यास्पदे स्थाने शृङ्गाररूपोद्दामप्रवृत्तेः सर्वथैवासम्भवादित्याशयः । उक्तामनुपपत्तिं स्वयमेव समाधत्ते अथवेति । अथवेति समर्थने । अवश्यं भविष्यन्तीति भवितव्यानि तेषामवश्य-म्भाविनां वस्तूनाम्, द्वाराणि भवनकारणानि, सर्वत्रैव भवन्ति ईश्वरेच्छावशात् जायन्ते । तथा च कुसुमे कीटस्येव शान्तेऽप्याश्रमे ईश्वरेच्छयैव शृङ्गारस्यापि सम्भवादित्यभिप्रायः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः । तथा दक्षिणो बाहुरिति बाहुविशेषे वक्तव्ये बाहुरिति सामान्याभिधानात् विशेषे अविशेषाख्यदोषः; स च 'शान्त आश्रमो बाहुः, स्फुरति च दक्षिणः कुतः फलमिहास्य' इति पाठेन समाधेयः । "विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन" इत्युक्तेः 'अस्य' इति द्वितीयचरणान्तिमाक्षरस्य गुरुत्वमङ्गीकार्य्यम्, समाधानीयपाठे तु लघुत्वमेवेति बोध्यम् ।

"उपाये निर्गमे द्वारम्" इति त्रिकाण्डशेषः ।

भवितव्यानामिति "कृत्यल्युटोऽन्यत्रापि" इति कर्त्तरि तव्यप्रत्ययः ।

आर्य्या जातिः ॥१६॥

(घ) नेपथ्य इति । प्रियसख्यौ अनसूयाप्रियंवदे, इत इतः अस्यामस्यां दिशि,

এই আশ্রম, শান্তিরসের স্থান ; অথ চ দক্ষিণ বাহু স্পন্দিত হইতেছে ; সুতরাং এখানে ইহার ফল হইবে কোথা হইতে ? । অথবা, যাহা অবশ্যই হইবে ; তাহার উপায় সর্ব্বত্রই হইয়া থাকে ॥১৬॥

(१) सहीओ ।

राजा। कर्णं दत्त्वा। अये! दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते, यावदत्र गच्छामि। परिक्रम्यावलोक्य च। अये! एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्त्तन्ते। निरूप्य। अहो! मधुरमासां दर्शनम्। (न)

---

आगच्छतमिति शेषः। नेपथ्यात् शकुन्तलाया उक्तिरियम्। "शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्" इति साहित्यदर्पणात् शकुन्तलादीनां शौरसेनीभाषेयम्।

(न) राजेति। कर्णं दत्त्वा तदालापश्रवणाय कर्णं समर्प्य। अये इत्यात्मसम्बोधनम्। वृक्षवाटिकां दक्षिणेन उपवनस्य अदूरे दक्षिणस्यां दिशि, आलापः कथोपकथनं श्रूयत इव। यावच्छब्दोऽवधारणे। अत्रैव वृक्षवाटिकां दक्षिणेनैव। अये इति विस्मये। स्वप्रमाणानुरूपैः निजनिजदेहपरिमाणयोग्यैः, सेचनघटैः जलदानकुम्भैः, बालपादपेभ्यः क्षुद्रवृक्षेभ्यः पयो जलम्, दातुम्, इत एव अस्यामेव दिशि अभिवर्त्तन्ते आगच्छन्ति। निरूप्य विशेषेणावलोक्य। अहो इत्याश्चर्य्ये। आसां तपस्विकन्यकानाम्, दर्शनं मधुरं प्रीतिकरम्।

"अमात्यगणिकागेहोपवने वृक्षवाटिका" इति "यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इति आमरः। "मधुरो तु प्रियस्वादू" इत्यनेकार्थः।

दक्षिणेनेति "अदूरे एनोऽपञ्चम्याः" इत्येनप्रत्ययः। अव्ययमिदम्, वृक्षवाटिकामिति "द्वितीयैनेन" इति द्वितीया।

---

(ধ) নেপথ্যে। প্রিয়সখীরা এই দিকে এই দিকে।

(ন) রাজা। ( কাণ দিয়া ) ওহে! উদ্যানের অদূর দক্ষিণ দিকে যেন আলাপ শুনিতেছি; তা' এই খানেই যাই। ( কতিপয়পদক্ষেপপূর্ব্বক দর্শন করিয়া ) ওহে! এই তপস্বিকন্যারা, আপনাদের অনুরূপ সেচনকলসদ্বারা ক্ষুদ্র বৃক্ষগুলিকে জল দিবার নিমিত্ত, এই দিকেই আসিতেছে। ( বিশেষভাবে দেখিয়া ) কি আশ্চর্য্য! ইহাদের দর্শনটী বড়ই প্রীতিকর।

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥१७॥

यावदेतांश्छायामिमामाश्रित्य प्रतिपालयामि। इति विलोकयन् स्थितः (१)। (प)

---

शुद्धान्तेति। यदि, आश्रमे सर्वथासौन्दर्य्यवर्द्धकचेष्टारहिते तपोवने वसतीति तस्य, जनस्य शकुन्तलारूपस्य लोकस्य, इदं वपुः शरीरम्, शुद्धाः कामप्रवृत्त्यभावेन निर्म्मला रक्षकजना अन्ते समीपे यस्य तस्मिन् शुद्धान्ते राजान्तःपुरे, दुर्लभम् असम्भवात् दुष्प्रापम्, भवेदिति शेषः। तदा वनलताभिः अयत्नेनैव वृद्धिं प्राप्ताभिरिति भावः, गुणैः कोमलता-मनोहरताप्रभृतिभिः, उद्यानलताः बहुयत्नेन वर्द्धिता इत्याशयः, दूरीकृताः खलु परास्ता एव। तथा च अयत्नलालितया शकुन्तलया रूपमाधुर्य्येण प्रयत्नलालितानां राजान्तःपुर-वासिनीनां रमणीनां हीनीकरणम्, अयत्नवृद्धाभिर्वनलताभिः प्रयत्नवर्द्धितानामुद्यानलतानां हीनीकरणमिव अतीवविस्मयकरमिति भावः।

अतएवात्र असम्भवद्वस्तुसम्बन्धरूपा निदर्शनालङ्कारः। तेन च शकुन्तलायाः सौन्दर्य्य-मद्वितीयमिति ध्वन्यत इत्यलङ्कारेण वस्तुध्वनिः। यदीत्यभिधानानन्तरं तदा इत्यस्यानभि-धानेऽपि सामर्थ्यादेवावगतेर्न न्यूनपदत्वदोषः "क्वचिन्न दोषो न गुणः" इति दर्पणात्।

तथात्र शकुन्तलां प्रति दुष्मन्तस्य अनुरागरूपकाव्यार्थस्य समुत्पत्तेरुपक्षेपो नाम मुखसन्ध्यङ्गम्—"काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः" इति दर्पणलक्षणात्।

"स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम्। शुद्धान्तश्चावरोधश्च" इत्यमरः।

आर्य्या जातिः॥१७॥

(प) यावदिति। इमां छायां वृक्षाणां छायामाश्रित्य एता आगच्छन्तीस्तपस्वि-

---

তপোবনবাসী লোকের এই আকৃতি যদি রাজাদের অন্তঃপুরে দুর্ল্লভ হয়, তবে বনলতা নিজগুণে উদ্যানলতাকে পরাজিত করিল॥১৭॥

---

(१) यावदिमां छायामाश्रित्य प्रतिपालयामि। विलोकयन् स्थितः।

ততঃ প্রবিশতি যথোক্তব্যাপারা সহ সখীভ্যাং শকুন্তলা। (ফ)

একা। হলা সউন্তলে! তত্তো বি তাদকস্সস্স অস্সম-রুক্খআ পিঅদরা ত্তি তক্কেমি ; জেণ ণোমালিআকুসুমপরিপেলবাবি তুমং এদাণং আলবালপরিউরণে ণিউত্তা। (ব)

(ব) হলা শকুন্তলে! ত্বত্তোঽপি তাতকণ্বস্য আশ্রমবৃক্ষাঃ প্রিয়তরা ইতি তর্কয়ামি ; যেন নবমালিকাকুসুমপরিপেলবাপি ত্বম্ এতেষামালবালপরিপূরণে নিযুক্তা।

---

কন্যকাঃ প্রতিপালয়ামি প্রতীক্ষে। কো নাম স্বয়মুপস্থিতং সুহৃদং ন পশ্যতীতি ভাবঃ। যাবচ্ছব্দো বাক্যালঙ্কারে।

(ফ) তত ইতি। যথোক্তঃ সেচনঘটধারণমেব ব্যাপারো যস্যাঃ সা।

(ব) একেতি। হলেতি সখীসম্বোধনে। ত্বত্তোঽপি ভবত্যা অপি। প্রিয়তরাঃ অধিকপ্রিয়াঃ, ইতি তর্কয়ামি আলোচয়ামি ; যেন হেতুনা, নবমালিকাকুসুমবৎ পরিপেলবাপি সর্বতঃ কোমলাপি। এতেষাম্ আশ্রমবৃক্ষাণাম্, আলবালানাং মূলস্থখাতানাং পরিপূরণে জলৈঃ পূর্ণীকরণে। উপকারকাদুপকার্য্যং প্রিয়তরমেবেতি ভাবঃ।

"হণ্ডে হঞ্জে হলাহ্বানং নীচং চেটীং সখীং প্রতি।" "স্যাদালবালমাবালমাবাপঃ" ইতি অমরঃ। "পেলবং কোমলম্" ইতি ত্রিকাণ্ডশেষঃ।

---

(প) এই ছায়া অবলম্বন করিয়া ইহাদের প্রতীক্ষা করি। ( এই বলিয়া চাহিয়া রহিলেন। )

(ফ) ( তদনন্তর দুইটী সখীর সহিত উক্তরূপে (জলকুম্ভধারণ করিয়া) শকুন্তলা প্রবেশ করিল। )

(ব) একটী সখী। শকুন্তলা! আমি মনে করি—পিতা কণ্বের নিকট তোমা অপেক্ষা আশ্রমের গাছগুলি বিশেষপ্রিয় ; যেহেতু নব-মালিকাফুলের ন্যায় অতিশয় কোমল হইলেও, তোমাকে এগুলির পরিখা পূরণ করিতে নিযুক্ত করিয়াছেন।

शकु। हला अणसूए! ण केवलं तादस्स णिओओ, मम वि एदेसु सहोअरसिणिहो। इति वृक्षसेचनं नाटयति (१)। (भ)

द्वितीया। सहि! सउन्तले! उदअं लम्भिदा एदे गिह्मआलकुसुमदाइणो अस्समरुक्खआ। दाणिं अदिक्कन्त-कुसुमसमए वि रुक्खके सिञ्चह्म; तेण अणहिसन्धिगुरुओ धम्मो भविस्सदि (२)। (म)

(भ) हला अनसूये! न केवलं तातस्य नियोगः, ममापि एतेषु सहोदरस्नेहः।

(म) सखि! शकुन्तले! उदकं लम्भिता एते ग्रीष्मकालकुसुमदायिनः आश्रम-वृक्षाः। इदानीम् अतिक्रान्तकुसुमसमयानपि वृक्षान् सिञ्चामः; तेन अनभिसन्धिगुरुको धर्मो भविष्यति।

(भ) शकु इति। एतेषु आश्रमवृक्षेषु सहोदरस्नेहः एकाश्रमजातत्वात् सहोदरे-ष्विव प्रणयः। तेन तातनियोगं विनाप्यहं स्वयमेव स्नेहवशादेतान् सिञ्चामीति भावः। नाटयति अभिनयति।

(म) द्वितीयेति। उदकं सिक्तजलम्, लम्भिताः प्रापिताः। अतिक्रान्तः कुसुम समयः पुष्पोत्पादनकालो येषां तान्। अनभिसन्धिना उपकारप्रत्याशाभावेन गुरुको महान्। वर्त्तमानसमय एव पुष्पदायिभ्यो जलदानं प्रचुरपुष्पलाभाशयैव, अतिक्रान्त-कुसुमसमयेभ्यो जलदानन्तु तत्प्रत्याशां विनैवेति महत्त्वमेव तद्धर्म्मे इति भावः। यदाह नारदः—

(ভ) শকুন্তলা। ওলো অনসূয়া! কেবল পিতার নিয়োগ নহে; আমারও এগুলির প্রতি সহোদরের স্নেহ রহিয়াছে। (এই বলিয়া গাছে জল দেওয়া অভিনয় করিতে লাগিল।)

(१) शकुन्तला। ण केवलं तादणिओओ एव्व अत्थि मे सोदरसिणेहो वि एदेसु। नाट्यं न विद्यते। (२) द्वितीयेत्यादिपाठः पुस्तकान्तरे नास्ति।

शकु। हला पियम्बदे! रमणिज्जं मन्तेसि। इति भूयो वृक्षसेचनं नाटयति (१)। (य)

राजा। निर्वर्ण्य आत्मगतम्। कथमियं सा कण्वदुहिता शकुन्तला। सविस्मयम्। अहो! असाधुदर्शी खलु भगवान् कण्वः; य इमामाश्रमधर्म्मे नियुङ्क्ते (२)। (र)

(य) हला प्रियंवदे! रमणीयं मन्त्रयसि।

"पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्म्मबुद्ध्या तु धर्म्मदानं तदुच्यते॥"

(य) शकु इति। रमणीयं युक्तियुक्तत्वात् सुन्दरं यथा स्यात्तथा, मन्त्रयसि ब्रवीषि। भूयः पुनरपि।

(र) राजेति। निर्वर्ण्य परमकोमलामतीवरूपलावण्यवतीञ्च शकुन्तलां विलोक्य, आत्मनि स्वस्मिन्नेव गतं स्थितम् अन्यैरश्राव्यमित्यर्थः। कविस्तु राज्ञस्तथाविधं सम्भवपरं मनोभवभावं सम्भाव्य इदं रचितवानिति बोध्यम्। एवमन्यत्रापि। कथंशब्दः सम्भावनायाम्। सा पूर्वं समिदाहरणाय प्रस्थितैर्वैखानसैर्निवेदिता। अहोशब्दो विषादे। असाधुदर्शी असुष्ठुविवेचनकारी। आश्रमधर्म्मे तपोवनोचितव्यवहारे अतिथिसेवातरुसेचनादिकष्टकरकार्य्ये इत्यर्थः। तथा च ईदृशीं परमकोमलसुन्दरी-

(ম) দ্বিতীয়া সখী। সখি! শকুন্তলা! গ্রীষ্মকালে পুষ্পদায়ী এই সকল আশ্রমবৃক্ষকে জল দেওয়া হইয়াছে। এখন যাহাদের পুষ্পদান করিবার সময় অতীত হইয়াছে, সেই সকল বৃক্ষকে জল দান করি;— তাহাতে উপকার প্রত্যাশা না থাকায় গুরুতর ধর্ম্ম হইবে।

(য) শকুন্তলা। ওলো প্রিয়ংবদা! তুই ভাল বলিয়াছিস্। (এই বলিয়া পুনরায় গাছে জল দেওয়া অভিনয় করিতে লাগিল।)

(१) शकु इत्यादिपाठोऽपि क्वचिन्नास्ति।

(२) राजा। कथमियं सा कण्वदुहिता असाधुदर्शी खलु तत्रभवान् काश्यपः…।

इदं किलाव्याजमनोहरं वपुः
तपःक्षमं (१) साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥१८॥

मद्दालिकायामस्थापयन्, प्रत्युत कठोरकार्य्ये नियुञ्जानो मुनिर्नियोगमूढत्वादसाधुदर्शी एवेति भावः ।

"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम्" इति साहित्यदर्पणः ।

"निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः । "कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे । प्रश्ने सम्भावनायाञ्च" इति "अहो धिगर्थे शोके च करुणार्थ-विषादयोः । सम्बोधने प्रश्नसायां विस्मये पादपूरणे ॥ असूयायां वितर्के स्यात्" इति "धर्मोऽस्त्री पुण्य आचारे" इत्यादि च मेदिनी ।

उक्तमेव असाधुदर्शित्वं पुनः समर्थयितुमाह इदमिति । य ऋषिः, इदं दृश्य-मानम्, न विद्यते व्याजः सौन्दर्य्यसम्पादनार्थम् अलङ्कारधारणादिकं छलं यत्र तत्ताहृशमपि मनोहरं स्वभावादेव सुन्दरमित्यर्थः किल वपुः शरीरम्, तपःक्षमं तपस्याकरणयोग्यम्, साधयितुं सम्पादयितुम्, इच्छति । ध्रुवं निश्चितमेव, स ऋषिः कण्वः, नीलोत्पलपत्रस्य अतीवकोमलस्येत्याशयः धारया खड्गादिधारावत् प्रान्तभागेन, शमीलतां नितान्तकठिनां शमीवृक्षशाखाम्, छेत्तुं व्यवस्यति उद्युङ्क्ते । ईदृशकोमलवपुषः तपःक्षमत्वसाधनेच्छा, कोमलया नीलोत्पलपत्रधारया कठिनशमीशाखाच्छेदनेच्छेव अत्यन्तमसम्भवैव, ताञ्च कुर्वन् कण्वः असाधुदर्शी एवेति भावः ।

अतएवात्र पूर्वापरार्द्धवाक्यार्थः असम्भवन् उक्तरूपं सादृश्यं बोधयतीति असम्भव-

(ব) রাজা। (দেখিয়া স্বগত) ইনি সেই কণ্বের কন্যা শকুন্তলা। (বিস্ময়ের সহিত) ভগবান্ কণ্ব উপযুক্ত বিবেচক নহেন, যিনি ইহাকে আশ্রমধর্ম্মে নিযুক্ত করিয়াছেন।

(१) तपःक्लमम् इति साहित्यदर्पणधृतपाठः ।

ভবতু, পাদপান্তরিত এব বিশ্বস্তাং তাবদেনাং পশ্যামি ।
ইতি তথা করোতি (১)। (ল)

শকু। হলা অণসূএ! অদিপিণদ্ধেণ বক্কলেণ পিঅংবদাএ দঢ়ং পীড়িদাম্হি, তা সিঢ়িলেহি দাব ণং (২)। (ব)

বস্তুসম্বন্ধরূপা নিদর্শনালঙ্কারঃ। তথা প্রাগুৎপন্নস্য শকুন্তলাং প্রতি রাজানুরাগস্য অত্র বাহুল্যাৎ পরিকরো নাম মুখসন্ধেরঙ্গম্—"সমুৎপন্নার্থবাহুল্যং জ্ঞেয়ঃ পরিকরঃ পুনঃ" ইতি লক্ষণাৎ।

এবমভিপ্রায়ো নাম নাট্যলক্ষণঞ্চ "অভিপ্রায়স্তু সাদৃশ্যাদভূতার্থস্য কল্পনা" ইতি লক্ষণাৎ।

"ধ্রুবো ভভেদে ক্লীবন্তু নিশ্চিতে শাশ্বতে ত্রিষু" "সমে শাখালতে" ইতি চ অমরঃ।

বংশস্থবিলং বৃত্তম্—"বদন্তি বংশস্থবিলং জতৌ জরৌ" ইতি লক্ষণাৎ ॥১৮॥

(ল) ভবত্বিতি। ভবতু কণ্বস্য অসাধুদর্শিত্বং সাধুদর্শিত্বং বা তিষ্ঠতু, তদালোচনয়া ন মে কিঞ্চিৎ প্রয়োজনমিতি ভাবঃ। স্বাভিপ্রেতমেব করোমীত্যাহ পাদপেতি। পাদেন শিখরেণ পিবতি রসমাকর্ষতীতি পাদপো বৃক্ষস্তেন অন্তরিতস্তিরোহিতদেহঃ সন্নহম্। অতএব বিস্রব্ধাম্ অপরিচিতপুরুষদর্শনাভাবাৎ অনুদ্বেলিতচিত্তাম্, এনাং শকুন্তলাম্। তথা সতি সম্যগ্ দ্রষ্টুং শক্ষ্যামীতি ভাবঃ।

যিনি এই স্বভাবসুন্দর শরীরটীকে তপস্যার যোগ্য করিতে ইচ্ছা করেন, নিশ্চয়ই তিনি নীলোৎপলপত্রাধারাদ্বারা শমীবৃক্ষের শাখাচ্ছেদন করিতে উদ্যত হন ॥১৮॥

(ল) হউক, বৃক্ষের অন্তরালে থাকিয়াই বিশ্বস্তা শকুন্তলাকে দেখি। ( ইহার পর সেইরূপ করিতে লাগিলেন। )

(১) ক্বচিদিতি শব্দো নাস্তি।

(২) শকুন্তলা। স্মিত্বা। সখি অনসূয়ে! অতিপিনদ্ধেন বল্কলেন প্রিয়ংবদয়া নিযন্ত্রিতাস্মি শিথিলয় তাবদ্ এনং।

অন। শিথিলয়তি (১)। (শ)

প্রিয়ং। সহাসম্। এত্থ দাব পওহরবিত্থারহেদুঅং অত্তণো জোব্বণারম্ভং উবালহ, মং কিং উবালহসি (২)। (ষ)

(ব) হলা অনসূয়ে! অতিপিনদ্ধেন বল্কলেন প্রিয়ংবদয়া দৃঢ়ং পীড়িতাস্মি, তৎ শিথিলয় তাবদেনম্।

(ষ) অত্র তাবৎ পয়োধরবিস্তারহেতুকম্ আত্মনো যৌবনারম্ভম্ উপালভস্ব, মাং কিমুপালভসে?।

(ব) শকু ইতি। অতিপিনদ্ধেন অতীবদৃঢ়বদ্ধেন, বল্কলেন গাত্রাবরকতরুত্বচা। দৃঢ়মত্যন্তং পীড়িতাস্মি পীড়াং প্রাপিতাস্মি। শিথিলয় শিথিলীকুরু। এনং বল্কলম্।

অতিপিনদ্ধেতি "ধাঞ্ নহ্যোরপেরুপসর্গস্যাদেঃ" ইত্যপেরকারলোপঃ। শিথিলং কুরু ইতি শিথিলয় শিথিলশব্দাৎ "ইন্ কারিতং ধাত্বর্থে" ইতি ইন্।

(শ) অনেতি। শিথিলয়তি শিথিলীকরোতি বল্কলমিতি শেষঃ।

(ষ) প্রিয়মিতি। অত্র অস্মিন্ পীড়াবিষয়ে। পয়োধরয়োঃ স্তনয়োর্বিস্তারস্য হেতুকং হেতুভূতম্, আত্মনঃ স্বস্য। উপালভস্ব তিরস্কুরু। উপালভসে তিরস্করোষি। তথা চ পূর্বং ত্বদ্গাত্রাবরণযোগ্যেন পুরাতনেন বল্কলেন পূর্ববদেব ময়া বদ্ধাসি, কিন্তু সাম্প্রতং তে যৌবনারম্ভো জাতঃ, তেন চ ইতরাঙ্গবৎ স্তনাবপি পূর্বাপেক্ষয়া নিতরাং বিস্তৃতৌ জাতৌ, তত এব চ অতিপিনদ্ধতাপ্রতীতিঃ, ন পুনর্বল্কলমেব বিশেষেণাকৃষ্য ময়া বদ্ধেতি ভাবঃ।

---

(ব) শকুন্তলা। ওলো অনসূয়া! প্রিয়ংবদা বল্কলখানাকে অতি-দৃঢ়রূপে বন্ধন করিয়া দিয়াছে, তাহাতে আমি বড়ই কষ্ট পাইতেছি। তা তুমি একটু শিথিল করিয়া দাও।

(শ) অনসূয়া। ( শিথিল করিয়া দিল। )

---

(১) অনসূয়া। তহ। শিথিলয়তি।

(২) প্রিয়ংবদা। এত্থ পওহরবিত্থারইত্তঅং অত্তণো জোব্বণং উবালহ।

राजा। सम्यगियमाह (१)। (स)

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण (२) ॥१८॥

(स) राजेति। इयं सखी सम्यगाह समीचीनं ब्रवीति। तथा च यौवनाविर्भावेन स्वभावत एव स्तनयोर्विस्तारात् दृढबद्धताप्रतीतिः, न पुनर्वस्तुत एव प्रियंवदया अद्य पूर्वापेक्षया दृढबद्धेति भावः।

अथायं यौवनाविर्भावः पूर्वमेव कथं नानुभूतं इत्याह इदमिति। इदमभिनवम् अभिनवयौवनास्पदम्, अस्याः शकुन्तलायाः, वपुः शरीरम्, स्कन्धदेशे उपहितो दत्तः सूक्ष्मग्रन्थिः क्षुद्रबन्धनं यस्य तेन, तथा स्तनयुगस्य परिणाहं विशालताम्, आच्छादयतीति तेन वल्कलेन तदावरणेनेत्यर्थः, पाण्डुपत्राणां पक्वतया पाण्डुवर्णानां दलानाम् उदरेण अभ्यन्तरेण, पिनद्धं बद्धम् आवृतमिति यावत्, कुसुममिव, स्वां स्वयोग्यां शोभाम्, न पुष्यति आवृतत्वात् लोकलोचनगोचरतया न दधाति। अतएव सततवल्कलावृततया स्तनवृद्ध्यादिप्रत्यक्षाभावात् यौवनाविर्भावः पूर्वं नानुभूत इति भावः।

अत्र श्रौतोपमालङ्कारः। तथा पाण्डुशब्दः मुख्यं विधानं प्रति न किञ्चिदुपकुरुत इति अपुष्टार्थत्वदोषः; स च 'सान्द्रपत्रोदरेण' इति पाठेन समाधेयः। पत्राणां सान्द्रत्वे सुष्ठु विधानं स्यादिति भाव्यम्।

"परिणाहो विशालता" इत्यमरः। मालिनी वृत्तम् ॥१८॥

(য) প্রিয়ংবদা। (হাস্যের সহিত) এ বিষয়ে স্তনবিস্তারের কারণ নিজের যৌবনারম্ভকে তিরস্কার কর, আমাকে তিরস্কার করিতেছ কেন ?।

(স) রাজা। এ, ঠিক্ কথা বলিয়াছে।

(१) क्वचिदयं पाठो न दृश्यते। (२) अयं श्लोकोऽपि क्वचिन्नास्ति।

অথবা কামমননুরূপমস্যা বপুষো বল্কলং ন পুনরলঙ্কার-শ্রিয়ং ন পুষ্যতি। কুতঃ—(১) (ছ)

সরসিজমনুবিদ্ধং শৈবলেনাপি রম্যং
মলিনমপি হিমাংশোর্লক্ষ্ম লক্ষ্মীং তনোতি।
ইয়মধিকমনোজ্ঞা বল্কলেনাপি তন্বী
কিমিব হি মধুরাণাং মণ্ডনং নাকৃতীনাম্ ॥২০॥

(ছ) প্রিয়ংবদোক্তিং সমর্থ্য পক্ষান্তরে স্বাভিমতং ব্যনক্তি অথবেতি। অস্যাঃ শকুন্তলায়াঃ, বপুষঃ শরীরস্য, কামং পর্য্যাপ্তম্ অত্যন্তম্ অননুরূপম্ অযোগ্যমপি, বল্কলম্, অলঙ্কারশ্রিয়ম্ আভরণজন্যশোভাম্, ন পুষ্যতি ন দধাতি ইতি ন, অপি তু পুষ্যত্যেবেত্যর্থঃ। "সম্ভাব্যমাননিষেধনিবর্ত্তনে নঞ্‌ দ্বয়ম্" ইতি বামনোক্তের্নাধিকপদতাদোষঃ।

সরসিজমিতি। শৈবলেন অনুবিদ্ধং সম্বদ্ধমপি, সরসিজং পদ্মম্, রম্যং মনোহরমেব তিষ্ঠতি। তথা মলিনমপি হিমাংশোশ্চন্দ্রস্য লক্ষ্ম হরিণচিহ্নম্, লক্ষ্মীং তনোতি শোভাং বিস্তারয়তি। উভয়ত্রাপি বিশেষবৈচিত্র্যজননাদিত্যাশয়ঃ। তদ্বৎ ইয়মপি তন্বী কৃশাঙ্গী শকুন্তলা, বল্কলেনাপি তুচ্ছবল্কলপরিধানেনাপি অধিকমনোজ্ঞা বিশেষেণ মনোহরা জাতেতি শেষঃ। হি তথাহি, মধুরাণাং সৌন্দর্য্যাদিগুণেন প্রিয়াণাম্, আকৃতীনামঙ্গানাম্,

এই বল্কল, স্কন্ধদেশে সূক্ষ্মবন্ধনে বদ্ধ রহিয়াছে এবং স্তনদ্বয়ের বিশালতাকে আবৃত করিয়াছে; তথাপি শুভ্রবর্ণ পত্রের অভ্যন্তরে বদ্ধ পুষ্পের ন্যায় শকুন্তলার এই নবীন দেহখানি যে স্বকীয় শোভা ধারণ করিতেছে না, এমন নহে। কারণ—॥১৯॥

(ছ) অথবা বল্কলখানি, শকুন্তলার শরীরের অত্যন্ত অযোগ্য হইলেও যে অলঙ্কারের শোভা জন্মাইতেছে না, এমন নহে। কারণ—

(১) রাজা। কামমননুরূপমস্যা বয়সো বল্কলং ন পুনরলঙ্কারশ্রিয়ং ন পুষ্যতি। কুতঃ।

अपि च, (१)

कठिनमपि मृगाक्ष्या वल्कलं कान्तरूपं
न मनसि रुचिभङ्गं स्वल्पमप्यादधाति।
विकचसरसिजायाः स्तोकनिर्मुक्तकण्ठं
निजमिव कमलिन्याः कर्कशं वृन्तजालम् (२) ॥२१॥

किमिव वस्तु, मण्डनं भूषणम्, न भवति? अपि तु सर्वमेव वस्तु मण्डनं भवत्येवेत्यर्थः। अतएव इदं वल्कलमपि अस्या अलङ्कारश्रियं पुष्यत्येवेति भावः।

अत्र रम्यत्वमनोज्ञत्वयोः लक्ष्मीतननमनोज्ञत्वयोश्च सुन्दरत्वरूपैकधर्मत्वेऽपि वाक्यभेदेन पृथङ्निर्देशात् प्रतिवस्तूपमाद्वयम्, तथा लक्ष्म-लक्ष्मीमिति व्यञ्जनसङ्घस्य सकृत् साम्यात् छेकानुप्रासश्च, अनयोः संसृष्टिः। चतुर्थपादे सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः अर्थापत्तिश्चेत्यनयोरेकाश्रयानुप्रवेशरूपः सङ्करः; तादृशसङ्करस्य च उक्तसंसृष्ट्या सह निरपेक्षतयावस्थितेः पुनः संसृष्टिः। संसृष्टिसङ्करयोरपि संसृष्टिसङ्करौ सम्भवत इति प्रदर्शितमस्माभिः साहित्यदर्पणटीकायाम्।

"चिह्नं लक्ष्म च लक्षणम्" इत्यमरः। "मधुरौ तु प्रियस्वादू" इत्यनेकार्थध्वनिमञ्जरी। सरसिजमिति "सप्तम्याः प्रायेण क्वति" इत्यलुक्। मालिनी वृत्तम् ॥२०॥

पुनरपि स्वाभिमतमाह कठिनमिति। मृगाक्ष्या हरिणनयनायाः शकुन्तलायाः, कठिनमपि अकोमलमपि, कान्तरूपम् एतच्छरीरसम्बन्धात् मनोज्ञभूतम्, वल्कलं कर्तृ, विकचं प्रस्फुटितं सरसिजं पद्मं यस्यास्तस्याः, कमलिन्याः पद्मलतायाः, स्तोकमल्पं यथा स्यात्तथा निर्मुक्तः त्यक्तजलसंयोगः जलोपरि उत्थित इत्यर्थः, कण्ठः पद्मनिम्नदेशो यस्य

---

পদ্ম, শৈবলসংযুক্ত হইলেও, সুন্দরই থাকে এবং চন্দ্রের কলঙ্ক, মলিন হইলেও সৌন্দর্য্য বিস্তার করে; আর এই কৃশাঙ্গী, বল্কলদ্বারাও অধিক মনোহর হইয়াছে। কারণ, কোন্ বস্তু, স্বভাবসুন্দর আকৃতির অলঙ্কার না হয়? ॥২০॥

---

(१) अपि चेति क्वचित् पुस्तके नास्ति। (२) अयं श्लोकोऽपि क्वचिन्न दृश्यते।

শকু। অগ্রতোঽবলোক্য। সহীও! এস বাদেরিদপল্লবাঙ্গুলীহিং কিম্পি বাহরেদি বিঅ মং চূদরুক্খও। তা জাব ণং সম্ভাবেমি (১)। ইতি তথা করোতি। (ঘ)

(ঘ) সখ্যৌ! এষ বাতেরিতপল্লবাঙ্গুলীভিঃ কিমপি ব্যাহরতীব মাং চূতবৃক্ষঃ। তদ্‌যাবদেনং সম্ভাবয়ামি।

তৎ, তথা কর্কশং কঠিনম্, নিজং স্বকীয়ম্, বৃন্তজালং বৃন্তসমূহ ইব, মনসি চিত্তে, স্বল্পমপি রুচিভঙ্গম্ অনুরাগঘাতিম্, ন আদধাতি ন জনয়তি; বৈচিত্র্যকারিত্বাদিতি ভাবঃ।

অত্র শ্রৌতোপমালঙ্কারঃ। তথা "তদ্গচ্ছ সিদ্ধ্যৈ কুরু দেবকার্য্যম্" ইতি দর্পণোদাহৃতবৎ মৃগাক্ষ্যা ইত্যত্র পদাংশগতা দুঃশ্রবত্বদোষঃ; স চ 'কঠিনমপি মনোজ্ঞং বল্কলং চারুদৃষ্টেঃ' ইতি পাঠেন সমাধেয়ঃ। মালিনী বৃত্তম্ ॥২১॥

(ঘ) শকু ইতি। হে সখ্যৌ! এষ চূতবৃক্ষ আম্রতরুঃ, বাতেরিতা বায়ুসঞ্চালিতাঃ পল্লবা এব অঙ্গুল্যস্তাভিঃ, মাং কিমপি জলং দাতুমিতি ভাবঃ, ব্যাহরতীব বদতীব-ব্যাহারৈরিব স্পষ্টং সূচয়তীবেত্যর্থঃ। তত্তস্মাৎ যাবদ্বাক্যালঙ্কারে, এনং চূতবৃক্ষম্, সম্ভাবয়ামি জলসেচনেন সম্মানয়ামি। যথা অন্নাদিপরিবেশনসময়ে কশ্চিদঙ্গুলীসঙ্কেতেন আত্মনে দাতুং পরিবেষ্টারং প্রণোদয়তি তদ্বদিতি ভাবঃ।

অতএবাত্র কার্য্যে চূতবৃক্ষে তাদৃশজনব্যবহারসমারোপাৎ সমাসোক্তিরলঙ্কারঃ নিরঙ্গং কেবলরূপকং ক্রিয়োৎপ্রেক্ষা চ, ইত্যেতেষামঙ্গাঙ্গিভাবেন সঙ্করঃ।

আরও, হরিণনয়না শকুন্তলার বল্কলখানি কঠিন হইলেও সুন্দর দেখাইতেছে, সুতরাং প্রস্ফুটিতপদ্মসমন্বিত পদ্মিনীর জলোপরি ঈষদুত্থিত কঠিন স্বকীয় বৃন্তসমূহের ন্যায় এই বল্কল, মনে অল্পও অনুরাগের ক্ষতি করিতেছে না ॥২১॥

(১) এসো বাদেরিদপল্লবাঙ্গুলীহিং তুবরাবেই বিঅ মং কেসররুক্খও। জাব ণং সম্ভাবেমি। পরিক্রামতি।

प्रियं। हला सउन्तले ! इध ज्जेव मुहुत्तअं चिट्ठ (१)। (क)

शकु। किं णिमित्तं ?। (ख)

प्रियं। तए समीववट्ठिदाए लदासणाधो विअ अअं चूअ-रुक्खओ पड़िहादि। (ग)

(क) हला शकुन्तले ! इहैव मुहूर्त्तकं तिष्ठ।

(ख) किं निमित्तम् ?।

(ग) त्वया समीपस्थितया लतासनाथ इव अयं चूतवृक्षः प्रतिभाति।

(क) प्रियमिति। मुहूर्त्तं क्षणकालम्।

(ख) शकु इति। किं निमित्तं तिष्ठामीति शेषः।

(ग) प्रियमिति। लतासनाथ इव लतासहित इव।

अत्र गुणोत्प्रेक्षालङ्कारः। तेन च शकुन्तलायां लतासादृश्यं व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः।

(ক) শকুন্তলা। (সম্মুখে দৃষ্টিপাত করিয়া) সখীরা! এই আম্রবৃক্ষ, বায়ুসঞ্চালিত পল্লবরূপ অঙ্গুলীদ্বারা আমাকে যেন কিছু বলিতেছে। তা ইহাকে সম্মানিত করি। (এই বলিয়া তাহাই করিল।)

(ক) প্রিয়ংবদা। ওলো শকুন্তলা! তুই এইখানেই একটুকাল থাক্।

(খ) শকুন্তলা। কি নিমিত্ত?।

(গ) প্রিয়ংবদা। তুমি নিকটে থাকিলে এই আমগাছটীকে লতাযুক্ত বলিয়া মনে হয়।

(१) प्रियंवदा। हला सउन्तले ! एत्थ एव्व दाव मुहुत्तअं चिट्ठ तुए उवगदाए लदासणाधो विअ अअं केसररुक्खओ पड़िभाइ।

शकु। अहो ज्जेव तुमं पिअम्बद त्ति भणीअसि (१)। (घ)
राजा। अवितथमाह प्रियंवदा। तथाह्यस्याः—(२) (ङ)
अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥२२॥

(घ) अतएव त्वं प्रियं वदेति भण्यसे।

(घ) शकु इति। अतएव ईदृशप्रियोक्तिकरणादेव। प्रियोक्तित्वञ्च लता-सादृश्यसूचनेन लावण्यकोमलतादिसूचनादिति बोध्यम्। भण्यसे परिचितजनैरुच्यसे। प्रियं वदतीति प्रियंवदा "वदेः खः प्रियवशयोः" इति खः।

(ङ) राजेति। अवितथम् अमिथ्या सत्यमित्यर्थः। तत् सत्यत्वं प्रतिपादयितु-माह तथाहीति। अस्याः शकुन्तलायाः। अस्य च अधर इत्यादिना श्लोकस्थेनान्वयः।

अधर इति। अधर ओष्ठः, किसलयस्य पल्लवस्य राग इव रागो रक्तिमा यस्य स तादृशः; बाहू भुजद्वयम्, कोमलयोर्विटपयोः शाखयोः अनुकारिणौ। तथा अङ्गेषु कुसुममिव, लोभनीयं हृदयाकर्षकम्, यौवनं सन्नद्धं विधिना निबद्धम्। अतएवेयं लतासदृशी, तेन च प्रियंवदा अवितथमेवाहेति भावः।

अत्र प्रथमे पादे लुप्तोपमा, द्वितीये आर्थोपमा, तृतीये च श्रौतोपमा इत्येतासां परस्परनिरपेक्षतया संसृष्टिः।

तथा अधरादिकोमलार्थानुरूपाणां कोमलानामेव पदानां निबन्धनात् पदौचयो नाम नाट्यलक्षणम्—"सञ्चयोऽर्थानुरूपो यः पदानां स पदोच्चयः" इति दर्पणात्।

लोभयतीति लोभनीयम् "कृत्यल्युटोऽन्यत्रापि" इति कर्त्तर्यनीयः।

आर्या जातिः ॥२२॥

(घ) শকুন্তলা। এই জন্যই তোমাকে সকলে প্রিয়ংবদা বলে।

(ঙ) রাজা। প্রিয়ংবদা সত্যই বলিয়াছে। তাহার কারণ—

(१) शकुन्तला। अहो खलु, प्रियंवदासि त्वम्।

(२) राजा। प्रियमपि तथ्यमाह शकुन्तलां प्रियंवदा। अस्याः खलु।

অন। হলা সউন্তলে! ইঅং সঅম্বরবহূ সহআরস্স তুএ কিদণামহেআ বনদোসিণী ত্তি (১) ণোমালিআ; ণং বিসুমরিদাসি। (চ)

শকু। তদো অত্তাণম্মি বিসুমরিস্সং। লতামুপেত্য অবলোক্য চ। হলা! রমণীও ক্খু কালো ইমস্স পাদবমিহুণস্স বদিঅরো (২) সংবুত্তো। জেণ ণবকুসুমজোব্বণা ণোমালিআ (৩) অঅং পি বহুফলদাএ (৪) উঅভোঅক্খমো সহআরো। ইতি পশ্যন্তী তিষ্ঠতি। (ছ)

(চ) হলা শকুন্তলে! ইয়ং স্বয়ম্বরবধূঃ সহকারস্য ত্বয়া কৃতনামধেয়া বনতোষিণীতি নবমালিকা; এনাং বিস্মৃতাসি?।

(চ) অনেতি। স্বয়মেব বৃণীতে ইতি স্বয়ম্বরা চাসৌ বধূশ্চেতি স্বয়ম্বরবধূঃ। সহকারস্য অতিসৌরভস্য আম্রতরোঃ, স্বয়ম্বরবধূঃ স্বয়মেবাশ্রয়ণাৎ স্বয়ম্বরবধূরিব স্থিতা। বনং তোষয়তীতি বনতোষিণী ইতি ইত্থং ত্বয়া কৃতং নামধেয়ং নাম যস্যাঃ সা। এনাং নবমালিকাম্, বিস্মৃতাসি জলং দাতুমিতি শেষঃ।

বিস্মৃতেতি জ্ঞানার্থত্বাৎ কর্ত্তরি বর্ত্তমানে ক্তঃ।

ইহার ওষ্ঠযুগল পল্লবের ন্যায় রক্তবর্ণ; বাহুযুগল কোমল শাখার অনুকরণ করিতেছে এবং বিধাতা ইহার অঙ্গে পুষ্পের ন্যায় লোভনীয় যৌবন নিবদ্ধ করিয়াছেন ॥২২॥

(চ) অনসূয়া। ওলো শকুন্তলা! এই নবমালিকা লতাটী আমগাছটীর স্বয়ম্বরবধূর ন্যায় রহিয়াছে, তুমি ইহার 'বনতোষিণী' এইরূপ নাম করিয়াছ; তা ইহাকে বিস্মৃত হইলে?।

(১) বণজোসিণী। (২) রমণীএ ক্খু কালে ইমস্স লদাপাঅবমিহুণস্স বইঅরো।
(৩) বণজোসিণী। (৪) বদ্ধপল্লবদাএ।

प्रियं। (सस्मितम्।) अणसूए! जाणासि किं णिमित्तं सउन्तला वणदोसिणीं (१) अदिमेत्तं पेक्खदि त्ति। (ज)

(छ) तत आत्मानमपि विस्मरिष्यामि। हला! रमणीयः खलु कालः अस्य पादपमिथुनस्य रतिकरः संवृत्तः। येन नवकुसुमयौवना नवमालिका, अयमपि बहुफलतया उपभोगक्षमः सहकारः।

(क) शकु इति। ततस्तदा अस्या नवमालिकाया विस्मरणं इत्यर्थः। तथा चेयं नवमालिका ममात्मसदृशी ; तेनात्मा यथा विस्मरणायोग्यस्तथा इयमपीति इदानीमेवेनां सिञ्चामीति भावः। लतामुक्ता नवमालिकाम्। पादपमिथुनस्य पादपजातीयद्वयस्य नवमालिकासहकारयोरित्यर्थः, रतिकरः सौन्दर्य्यात् लोकानुरागजनकः सुरतघटकश्च। नवं कुसुमं पुष्पं रजश्च यस्मिन् तत्तादृशं यौवनं तारुण्यं यस्याः सा। बहूनि फलानि ग्रीष्मकालत्वादाम्राणि लाभाश्च यस्य तस्य भावस्तया हेतुना, उपभोगक्षमः लोकानां भोगयोग्यः सम्भोगसमर्थश्च। पश्यन्ती साभिलाषमिति शेषः। एतेनात्मनोऽपि तादृशसम्मिलनेच्छा व्यज्यते।

अत्र नवमालिकासहकारयोर्लिङ्गसाम्येन स्त्रीपुंसयोर्व्यवहारसमारोपात् समासोक्तिरलङ्कारः। तथा लतापादपरूपसिद्धार्थेन सह मानुषदम्पतिरूपासिद्धार्थस्य प्रकाशनात् श्लिष्टविचित्रार्थवत्त्वाच्च शोभा नाम नाट्यलक्षणम्—"सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते। श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते॥" इति दर्पणलक्षणात्।

"कुसुमं स्त्रीरजःपुष्पम्" "फलं जातीफले लाभे बाणाग्रे फलकेऽपि च" इति च त्रिकाण्डशेषः। "भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरः।

---

(ছ) শকুন্তলা। তাহা হইলে আপনাকেও বিস্মৃত হইব। ( লতার নিকটে যাইয়া দেখিয়া ) হলো! এই তরুলতা দুইটীর এই সময়টী বড়ই মনোহর ও রুচিকর হইয়াছে। যে হেতু নবমালিকা নব-কুসুম-যৌবনা, আর এই আমগাছটীও বহুফলশালী বলিয়া উপভোগ যোগ্য। ( এই বলিয়া দেখিতে লাগিল। )

---

(१)…किं वणजोसिणीं।

অন। ণ ক্খু বিভাবেমি, তা কধেহি মে (১)। (ঝ)

প্রিয়ং। জহ বণদোসিণী অণুরূবেণ পাদবেণ সঙ্গদা, তহ অহম্মি অত্তণো অণুরূবং বরং লহেঅং ত্তি (২)। (ঞ)

শকু। এস দে অত্তণো চিত্তগদো মণোরহো। ইতি কলসমাবর্জয়তি (৩)। (ট)

(জ) অনসূয়ে! জানাসি কিং নিমিত্তং শকুন্তলা বনতোষিণীমতিমাত্রং প্রেক্ষত ইতি।

(ঝ) ন খলু বিভাবয়ামি, তত্ কথয় মে।

(ঞ) যথা বনতোষিণী অনুরূপেণ পাদপেন সঙ্গতা, তথা অহমপি আত্মনঃ অনুরূপং বরং লভেয় ইতি।

(জ) প্রিয়মিতি। অতিমাত্রমেকান্তম্। প্রেক্ষতে পশ্যতি।

(ঝ) অনেতি। বিভাবয়ামি বিভাব্যাপি সম্প্রধারয়ামি।

(ঞ) প্রিয়মিতি। অনুরূপেণ স্বযোগ্যেন। সঙ্গতা সম্মিলিতা। ইতি হেতোঃ, অতিমাত্রং প্রেক্ষত ইতি পূর্বেণান্বয়ঃ।

(ট) শকু ইতি। আত্মনঃ স্বস্যৈব। মনোরথঃ অভিলাষঃ। ত্বমেবানুরূপং বরং লব্ধুমিচ্ছসীতি ভাবঃ। আবর্জয়তি ন্যুব্জীকরোতি।

(জ) প্রিয়ংবদা। ( ঈষৎ হাস্য করিয়া ) অনসূয়া! জানিস্ কি জন্য শকুন্তলা বনতোষিণীকে এত বেশী দেখিতেছে?।

(ঝ) অনসূয়া। আমি বুঝিতেছি না; তা আমায় বল দেখি।

(ঞ) প্রিয়ংবদা। বনতোষিণী যেমন অনুরূপ বৃক্ষের সহিত মিলিয়াছে, আমিও সেইরূপ নিজের অনুরূপ বর লাভ করিব।

(ট) শকুন্তলা। ইহা তোর নিজের মনোগত ইচ্ছা। ( এই বলিয়া কলস ন্যুব্জ ( উবুড় ) করিল। )

(১) তা কহেহি। (২) বণজোসিণী। অবি ণাম এব্বং অহম্পি…।

(৩) এসো ণূণং তুহ অত্তগদো।

अन। हला सउन्तले! इअं तादकस्सेण तुमं विअ सहत्थेण सम्बड्ढिदा माहवीलदा, ता कधं इमं विसुमरिदासि ? (१)। (ठ)

शकु। तदो अत्ताणम्मि विसुमरिस्सं। लतामुपेत्यावलोक्य च सहर्षम्। अच्चरीअं अच्चरीअं, पिअम्बदे! पिअं दे णिवेदेमि। (ड)

प्रियं। सहि! किं मे पिअं ?। (ढ)

(ट) एष ते आत्मनोऽनुरूपगतो मनोरथः।

(ठ) हला शकुन्तले! इयं तातकण्वेन त्वमिव स्वहस्तेन संवर्द्धिता माधवीलता, तत् कथमिमां विस्मृतासि ?।

(ड) तत आत्मानमपि विस्मरिष्यामि। आश्चर्यमाश्चर्यम्, प्रियंवदे! प्रियं ते निवेदयामि।

(ढ) सखि। किं मे प्रियम् ?।

---

(ठ) अनेति। विस्मृतासीति स्वरविकारेण प्रश्नो व्यज्यते।

(ड) शकु इति। तत इत्यनेन माधवीलतापि आत्मसदृशीति व्यज्यते। लतां माधवीलताम्।

---

(ঠ) অনসূয়া। ওলো! শকুন্তলা! পিতা কণ্ব তোমার ন্যায় এই মাধবী লতাটীকে নিজহস্তে সংবৰ্দ্ধিত করিয়াছেন, তা ইহাকে বিস্মৃত হইলে কেন ?।

(ড) শকুন্তলা। তা হইলে আপনাকেও বিস্মৃত হইব। (লতার নিকটে যাইয়া এবং দেখিয়া আনন্দের সহিত) আশ্চর্য্য আশ্চর্য্য! প্রিয়ংবদে! তোর প্রীতিকর বিষয় জানাইতেছি।

(ঢ) প্রিয়ংবদা। সখি! আমার প্রীতিকর বিষয় কি ?।

---

(१) इत्यारभ्य पुनः कलसमावर्जयतीत्यन्तः पाठसन्दर्भो विद्यासागरेण परित्यक्तः।

शकु। असमए क्खु एसा आमूलादो मुउलिदा माहवी-लदा। (ण)

उभे। सत्वरमुपगम्य। सहि! सच्चं सच्चं?। (त)

शकु। सच्चं किं ण पेक्खध। (थ)

प्रियं। सहर्षं निरूप्य। सहि! तेण हि पड़िप्पिअं दे णिवेदेमि। (द)

शकु। किं मे पड़िप्पिअं?। (ध)

(ण) असमये खल्वेषा आमूलात् मुकुलिता माधवीलता।

(त) सखि! सत्यं सत्यम्?।

(थ) सत्यं किं न प्रेक्षेथे।

(द) सखि! तेन हि प्रतिप्रियं ते निवेदयामि।

(ध) किं मे प्रतिप्रियम्?।

---

(ण) शकु इति। मुकुलानि अस्याः सञ्जातानीति मुकुलिता तारकादित्वा-दितच् प्रत्ययः।

(त) उभे इति। अत्र काकुवशात् प्रश्नो व्यज्यते।

---

(ণ) শকুন্তলা। এই মাধবীলতা, অকালে মূল হইতে মুকুলিত হইয়াছে।

(ত) অনসূয়া ও প্রিয়ংবদা। (সত্বর নিকটে যাইয়া) সখি! সত্য সত্য কি?।

(থ) শকুন্তলা। সত্য কিনা দেখ।

(দ) প্রিয়ংবদা। (আনন্দের সহিত দেখিয়া) সখি! তবে তোমারও প্রীতিকর বিষয় জানাইতেছি।

(ধ) শকুন্তলা। আমার কি প্রীতিকর বিষয়?।

प्रिय'। आसस्मपाणिग्गहणासि तुमं। (न)

शकु। सासूयमिव। एस दे अत्तणो चित्तगदो मणोरहो, ता ण दे वअणं सुणिस्सं। (प)

प्रिय'। सहि! ण क्खु परिहासेण भणामि, सुदं मए तादकस्सस्स मुहादो तुह कल्लाणसूअअं एदं णिमित्तं त्ति। (फ)

अन। हला पिअम्बदे! अदो ज्जेव सविणोहा सउन्तला माहवीलदां सिञ्चदि। (ब)

(न) आसन्नपाणिग्रहणासि त्वम्।

(प) एष ते आत्मनश्चित्तगतो मनोरथः, तन्न ते वचनं श्रोष्यामि।

(फ) सखि! न खलु ते परिहासेन भणामि, श्रुतं मया तातकण्वस्य मुखात् तव कल्याणसूचकम् एतन्निमित्तमिति।

(ब) हला प्रियंवदे! अतएव सस्नेहा शकुन्तला माधवीलतां सिञ्चति।

(न) प्रियमिति। आसन्नं निकटवर्त्ति पाणिग्रहणं विवाहो यस्याः सा।

(प) शकु इति। सासूयमिव मुखभङ्ग्या बहिरसूयां प्रकाश्य। एतेन पाणि-ग्रहणाकाङ्क्षा सूचिता। तत्तस्मात् स्वाकाङ्क्षायाः परोपरि प्रवर्त्तनादित्यर्थः।

(फ) प्रियमिति। परिहासेन परिहासकरणेच्छया। एतत् माधवीलतायाः असमये मुकुलितत्वरूपं निमित्तं लक्षणम्, कल्याणसूचकं पाणिग्रहणरूपमङ्गलज्ञापकम्।

---

(न) প্রিয়ংবদা। তোমার বিবাহ নিকটবর্ত্তী হইয়াছে।

(প) শকুন্তলা। ( অসূয়ার সহিতই যেন ) ইহা তোর নিজের মনোগত ইচ্ছা; তা তোর কথা আমি শুনিব না।

(ফ) প্রিয়ংবদা। সখি! পরিহাস করিয়া বলিতেছি না। আমি পিতা কণ্বের মুখ হইতে শুনিয়াছি যে, এই লক্ষণটী তোমার মঙ্গলসূচক।

शकु। असमए क्खु एसा आमूलादो मुउलिदा माहवी-लदा। (ण)

उभे। सत्वरमुपगम्य। सहि! सच्चं सच्चं?। (त)

शकु। सच्चं किं ण पेक्खध। (थ)

प्रियं। सहर्षं निरूप्य। सहि! तेण हि पडिप्पिअं दे णिवेदेमि। (द)

शकु। किं मे पडिप्पिअं?। (ध)

---

(ण) असमये खल्वेषा आमूलात् मुकुलिता माधवीलता।

(त) सखि! सत्यं सत्यम्?।

(थ) सत्यं किं न प्रेक्षेथे।

(द) सखि! तेन हि प्रतिप्रियं ते निवेदयामि।

(ध) किं मे प्रतिप्रियम्?।

---

(ण) शकु इति। मुकुलानि अस्याः सञ्जातानीति मुकुलिता तारकादित्वा-दितच् प्रत्ययः।

(त) उभे इति। अत्र काकुवशात् प्रश्नो व्यज्यते।

---

(ণ) শকুন্তলা। এই মাধবীলতা, অকালে মূল হইতে মুকুলিত হইয়াছে।

(ত) অনসূয়া ও প্রিয়ংবদা। (সত্বর নিকটে যাইয়া) সখি! সত্য সত্য কি?।

(থ) শকুন্তলা। সত্য কিনা দেখ।

(দ) প্রিয়ংবদা। (আনন্দের সহিত দেখিয়া) সখি! তবে তোমারও প্রীতিকর বিষয় জানাইতেছি।

(ধ) শকুন্তলা। আমার কি প্রীতিকর বিষয়?।

प्रियं । आसस्रपाणिग्गहणासि तुमं । (न)

शकु । सासूयमिव । एस दे अत्तणो चित्तगदो मणोरहो, ता ण दे वअणं सुणिस्सं । (प)

प्रियं । सहि ! ण क्खु परिहासेण भणामि, सुदं मए तादकस्सस्स मुहादो तुह कल्लाणसूअअं एदं णिमित्तं त्ति । (फ)

अन । हला पिअम्बदे ! अदो ज्जेव सिणेहा सउन्तला माहवीलदां सिञ्चदि । (ब)

(न) आसन्नपाणिग्रहणासि त्वम् ।

(प) एष ते आत्मनश्चित्तगतो मनोरथः, तन्न ते वचनं श्रोष्यामि ।

(फ) सखि ! न खलु ते परिहासेन भणामि, श्रुतं मया तातकण्वस्य मुखात् तव कल्याणसूचकम् एतन्निमित्तमिति ।

(ब) हला प्रियंवदे ! अतएव सस्नेहा शकुन्तला माधवीलतां सिञ्चति ।

---

(न) प्रियमिति । आसन्नं निकटवर्त्ति पाणिग्रहणं विवाहो यस्याः सा ।

(प) शकु इति । सासूयमिव मुखभङ्ग्या बहिरसूयां प्रकाश्य । एतेन पाणिग्रहणाकाङ्क्षा सूचिता । तत्तस्मात् स्वाकाङ्क्षायाः परोपरि प्रवर्त्तनादित्यर्थः ।

(फ) प्रियमिति । परिहासेन परिहासकरणेच्छया । एतत् माधवीलतायाः असमये मुकुलितत्वरूपं निमित्तं लक्षणम्, कल्याणसूचकं पाणिग्रहणरूपमङ्गलज्ञापकम् ।

---

(न) প্রিয়ংবদা। তোমার বিবাহ নিকটবর্ত্তী হইয়াছে।

(প) শকুন্তলা। ( অসূয়ার সহিতই যেন ) ইহা তোর নিজের মনোগত ইচ্ছা; তা তোর কথা আমি শুনিব না।

(ফ) প্রিয়ংবদা। সখি! পরিহাস করিয়া বলিতেছি না। আমি পিতা কণ্বের মুখ হইতে শুনিয়াছি যে, এই লক্ষণটী তোমার মঙ্গলসূচক।

शकु। जदो बहिणी मे भोदि, तदो किं त्ति ण सिञ्चेमि।

इति कलसमावर्जयति। (भ)

राजा। अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा भवेत्? (१)। अथवा कृतं सन्देहेन। (म)

(भ) यतो भगिनी मे भवति, ततः किमिति न सिञ्चामि।

(भ) शकु इति। भगिनी एकेनैव कण्वेन परिवर्द्धिततया भगिनी तुल्यस्नेह-भागिनी, इयं माधवीलतेति शेषः। आवर्जयति जलसेकार्थं न्युब्जीकरोति।

(म) राजेति। अपिशब्दः प्रश्ने। नामशब्दः सम्भावनायाम्। इति सम्भावयितु-मर्हामि किमित्यर्थः। तथा च इयं शकुन्तला, कुलपतेः कण्वस्य, असवर्णम् असमान-वर्णं ब्राह्मणजातीयभिन्नं यत् क्षेत्रं कलत्रं तत्र सम्भव उत्पत्तिर्यस्याः सा तादृशी भवेत्। तथा च इयं यदि ब्राह्मणस्य कण्वस्य क्षत्रियादिजातीयपत्नीगर्भजाता कन्या भवेत्, तदा मे परिणययोग्या स्यात्, ब्राह्मणजातीयपत्नीगर्भजातत्वे तु प्रतिलोमविवाहनिषेधात् अस्या आशापि निष्फलैवेति भावः। कृतमलम्।

कुलपतिमाहुः साम्प्रदायिकाः। यथा—

"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः॥"

कण्वस्य असवर्णक्षेत्रसम्भवाया दुष्मन्तस्य परिणययोग्यत्वे प्रमाणं यथा मनुः—

"पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्।
ताननन्तरनाम्नस्तु मातृदोषात् प्रचक्षते॥"

"क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" "कृतं युगेऽलमर्थे च" इत्यादि च मेदिनी।

(ব) অনসূয়া। ওলো প্রিয়ংবদা! এই জন্যই শকুন্তলা স্নেহের সহিত মাধবীলতাটীকে সিক্ত করিতেছে।

(ভ) শকুন্তলা। যে হেতু আমার ভগিনী হয়, সেই হেতু সিক্ত করিব না কেন?। (এই বলিয়া কলস উবুড় করিল।)

(१) स्यात्।

असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥२३॥
तथापि तत्त्वत एवैनामुपलप्स्ये (१)। (य)

असंशयमिति। असंशयं ध्रुवमेव, क्षत्रस्य क्षत्रियजातेः परिग्रहक्षमा पत्नीत्वेन ग्रहणयोग्या, इयं शकुन्तलेति शेषः। यद्यस्मात्, आर्य्यं चिरसत्पथगामित्वात् साधुभूतम्, मे मम मनः, अस्यां शकुन्तलायाम्, अभिलाषि एतद्विषयाकाङ्क्षाशालि वर्त्तत इति शेषः। ननु मनसः अभिलाषित्वमात्रेण कथं क्षत्रपरिग्रहक्षमेति निर्णीयत इत्याह सतामिति। हि यस्मात्, सन्देहपदेषु संशयविषयेषु, वस्तुषु पदार्थेषु, सतां सज्जनानाम्, अन्तःकरणस्य मनसः, प्रवृत्तयो गतय एव प्रमाणम् एकतरनिश्चायिकाः। तथा चास्यां शकुन्तलायां मन्मनसो ग्राह्यत्वेन प्रवृत्तिमत्त्वात् क्षत्रस्येयं परिग्रहक्षमैवेति भावः।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। तथा राज्ञः शकुन्तलानुरागरूपकाव्यार्थस्यात्र निश्चयेनोपस्थितेः परिन्यासो नाम मुखसन्धेरङ्गम्। तथा च दर्पणः—"तन्निष्पत्तिः परिन्यासः।"

संशयस्याभावः असंशयम्, अभावार्थे अव्ययीभावः। "वेदाः प्रमाणम्" इत्यादिवदत्रापि द्वयोः सामानाधिकरण्येऽपि अजहल्लिङ्गत्वात् भिन्नलिङ्गत्वं बहुत्वावच्छिन्नप्रवृत्तीनामेकप्रमाणत्वाच्च भिन्नवचनत्वम्।

"आर्य्यः साधौ सौविदल्ले" इत्यादि विश्वः। वंशस्थविलं वृत्तम् ॥२३॥

(य) तथापीति। अन्तःकरणप्रवृत्तिप्रमाणेन क्षत्रपरिग्रहक्षमत्वनिश्चयेऽपीत्यर्थः।

(য) রাজা। এই শকুন্তলা কি কুলপতি কণ্বের অসবর্ণ স্ত্রীর গর্ভজাত সন্তান হইবেন ?। অথবা সন্দেহের প্রয়োজন নাই। ( কারণ, ) ইনি ( শকুন্তলা ), নিশ্চয়ই ক্ষত্রিয়ের গ্রহণযোগ্য ; যে হেতু আমার নির্দোষ মন ইঁহার প্রতি অভিলাষী হইয়াছে। কারণ, সন্দিগ্ধ বিষয়ে সজ্জনের মনের প্রবৃত্তিই প্রমাণ ॥২৩॥

(१) तत्त्वत एनाम्

शकु। ससम्भ्रमम्। अम्म! सलिलसेअसम्भमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टदि। इति भ्रमरबाधां नाटयति (१)। (र)

राजा। सस्पृहं विलोक्य। साधु, बाधनमपि रमणीयमस्याः (२)। (ल)

यतो यतः षट्चरणोऽभिवर्त्तते
ततस्ततः प्रेरितवामलोचना।

(र) अहो! सलिलसेकसम्भ्रमोद्गतो नवमालिका उज्झित्वा वदनं मे मधुकरोऽभिवर्त्तते।

तत्त्वत एव शब्दादिप्रमाणान्तरेण यथार्थत एव, एनां शकुन्तलाम्, उपलप्स्ये ज्ञास्यामि; अन्तःकरणप्रवृत्तिमात्रप्रमाणस्य कदाचित् व्यभिचारस्यापि दर्शनादिति भावः।

(र) शकु इति। ससम्भ्रमम् आकुलभावेन सहितम्। अम्म इति विस्मये। सलिलसेकेन जलसेचनेन यः सम्भ्रमो व्यस्तता तेन उद्गत उड्डीनः, मधुकरो भ्रमरः, नवमालिकाम् उज्झित्वा परित्यज्य, मे मम वदनम्, अभिवर्त्तते लक्ष्यीकृत्य आगच्छतीत्यर्थः। भ्रमरस्य बाधां दूरीकरणम्।

(ल) राजेति। सस्पृहं शकुन्तलाकाङ्क्षासहितम्। साधु समीचीनम्, बाधनं भ्रमरदूरीकरणम्। अस्याः शकुन्तलायाः।

(ব) তথাপি যথার্থরূপেই ইঁহাকে জানিব।

(র) শকুন্তলা। (ব্যস্ততার সহিত) ওমা! জলসেকে ব্যস্ততাবশতঃ একটা ভ্রমর উড়িয়া, নবমালিকাকে পরিত্যাগ করিয়া, আমার মুখের দিকে আসিতেছে।

(ল) রাজা। (স্পৃহার সহিত দেখিয়া) ভাল, বাধা দেওয়াও ইঁহার সুন্দর বটে। (কারণ,)

(१) भ्रमरबाधां रूपयति। (२) सस्पृहमवलोक्य।

निवर्त्तितभ्रूरियमद्य शिक्षते
भयादकामापि हि दृष्टिविभ्रमम् (१) ॥२४॥

अपि च, 　सासूयमिव । (ब)

भ्रमरबाधनस्य रमणीयत्वे हेतुमाह यत इति । हि तथाहि । षट् चरणाः पादा यस्य स षट्चरणो भ्रमरः, यतो यतः यस्यां यस्यां दिशि, अभिवर्त्तते मुखं लक्ष्यीकृत्य तिष्ठति । यतो यतः यस्या यस्या दिशः सकाशात् मुखमभ्यागच्छतीति वा । ततस्ततः तस्यां तस्यां दिशि, प्रेरिते निक्षिप्ते वामे मनोहरे लोचने नयनद्वयं यया सा, तथा विवर्त्तिते मुहुः परिवर्त्तिते भ्रुवौ यया सा तादृशी, इयं शकुन्तला, अकामापि कारणाभावात् कामप्रवृत्तिरहितापि सती, भयात् भ्रमरदंशनत्रासात्, अद्य इदानीम्, दृष्टिविभ्रमं नायके स्वमनोवृत्तिज्ञापकं दृष्टिविलासम्, शिक्षते ज्ञातुमारभत इवेत्यर्थः ।

दृष्टिविभ्रमं प्रति सकामत्वमेव कारणम् । तेन चात्र तत्सकामत्वरूपकारणाभावेऽपि दृष्टिविभ्रमरूपकार्य्योत्पत्तिसत्त्वात् विभावनालङ्कारः ; सा च भयादित्यभिधानादुक्तनिमित्ता ; तथा शिक्षत इति सम्भावनावगमेऽपि तद्वाचकेवादिशब्दाभावात् प्रतीयमाना भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः । अनयोर्मिथो निरपेक्षतया संसृष्टिः ।

"वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे" इत्यादि विश्वः ।

वंशस्थविलं वृत्तम् ॥२४॥

(ब) अपि चेति । सासूयमिव स्वं विना भ्रमरस्य शकुन्तलासम्भोगात्मककृतार्थतादर्शनादसूयया सहितमिव ।

---

ভ্রমরটা যে যে দিক্ হইতে আসিতেছে, সেই সেই দিকে ( ইনি ) সুন্দর নয়নযুগল নিক্ষেপ করিতেছেন এবং ভ্রূদুইটী ঘুরাইতেছেন। সুতরাং শকুন্তলা আজ কামপ্রবৃত্তিশূন্য হইয়াও, ভয়বশতঃ দৃষ্টিবিলাস শিক্ষা করিতেছেন ॥২৪॥

(ব) আরও, ( অসূয়ার সহিতই যেন )

---

(१) श्लोकोऽयं विद्यासागरेण प्रक्षिप्तो मन्यते ।

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं (१) व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलु कृती ॥२५॥

चलेति । हे मधुकर ! भ्रमर ! करं हस्तम्, व्याधुन्वत्या भ्रमरबाधनार्थमितस्ततः सञ्चालयन्त्याः शकुन्तलायाः, वेपथुमतीं भयादन्यत्र कामावेगात् कम्पान्विताम्, अतएव चलश्चञ्चलः अपाङ्गः प्रान्तभागो यस्यास्ताम्, दृश्यतेऽनयेति दृष्टिर्नयनं ताम्, बहुशो वारं वारम्, स्पृशसि दंशनार्थमित्यर्थः, अन्यत्र तु चुम्बसि । रहस्यं गोपनीयविषयम् आचष्ट इति रहस्याख्यायी स इव, कर्णान्तिकचरः कर्णसमीपगामी सन्, मृदु कोमलं क्षुद्रमित्यर्थः, स्वनसि शब्दायसे अन्यत्र तु ब्रवीषि । तथा रतिसर्वस्वं सुरतस्य सर्वसम्पत्स्वरूपम्, अधरमोष्ठम्, पिबसि दशसि, अन्यत्र चुम्बसि । अतएव वयम् अहमित्यर्थः, तत्त्वान्वेषात् 'कस्येयं कन्या मम परिणेया न वा' इति तथ्यानुसन्धानात् तदाश्रित्येत्यर्थः, हता मनोहता व्यर्थमनोरथा इति तात्पर्य्यम्, किन्तु त्वं खलु त्वमेव कृती कर्म्मकुशलः ।

अत्र भ्रमरस्य कृतित्वं प्रति प्रथमचरणत्रयगतवाक्यार्थो हेतव इति वाक्यार्थहेतुकं काव्यलिङ्गम्, रहस्याख्यायीवेति क्रियोत्प्रेक्षा ; उक्तविधकार्य्यविशेषेण भ्रमरे गुप्तप्रेमिकव्यवहारसमारोपात् समासोक्तिः ; उपमानभूतस्य भ्रमरस्य कृतित्वरूपाधिक्यवर्णनात् व्यतिरेकश्च ; इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः ।

"दृग् दृष्टिः" इति "तत्त्वं ब्रह्मणि याथार्थ्ये" इति "मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः" इति चामरः । "कृती स्यात् कर्म्मकुशले पण्डिते शववर्म्मणि" इति कलापचन्द्रधृतः कोषः ।

वेपथुरस्या अस्तीति वेपथुमती । वयमिति "वाऽस्मदश्च" इति बहुवचनम् । तत्त्वान्वेषमाश्रित्येति ल्यब्लोपे पञ्चमी ।

शिखरिणी वृत्तम् ॥२५॥

---

(१) करौ ।

अपि च,

लोलां दृष्टिमितस्ततो वितनुते सभ्रूलताविभ्रमाम्
आभुग्नेन विवर्त्तिता बलिमता मध्येन कम्रस्तनी ।
हस्ताग्रं विधुनोति पल्लवनिभं शीत्कारभिन्नाधरा
जातेयं भ्रमराभिलङ्घनभिया वाद्यैर्विना नर्त्तकी ॥२६॥

लोलामिति । कम्रौ कमनीयौ स्तनौ यस्याः सा तादृशी, इयं शकुन्तला, भ्रूलतयोर्विभ्रमेण भ्रमणेन विलासेन च सहेति सभ्रूलताविभ्रमाम्, लोलां चञ्चलाम्, दृष्टिं चक्षुः, इतस्ततः सर्वासु दिक्षु, वितनुते विस्तार्य्य प्रेरयति । कुतो भ्रमर आगच्छतीत्येतत् परीक्षार्थं लोकमोहनार्थञ्चेति भावः । आभुग्नेन ईषत् वक्रीभूतेन, बलिमता चर्म्मतरङ्गवता, मध्येन देहमध्यभागेन, विवर्त्तिता भ्रमरदंशनादात्मत्राणाय किञ्चित् किञ्चित् परिवर्त्तिता, भङ्गीविशेषप्रदर्शनाय परिवर्त्तिता च । तथा शीत्कारेण भ्रमरदंशनत्रासजनितेन शीदिति शब्देन भिन्नौ वियुक्तौ अधरौ यस्याः सा तथाविधा सती, पल्लवनिभं पल्लववत् रक्तकोमलम्, हस्ताग्रम्, विधुनोति भ्रमरबाधनाय भङ्गीविशेषप्रदर्शनाय च सञ्चालयति । अतएव भ्रमरेण यदभिलङ्घनमाक्रमणं तस्मात् भिया भयेन, वाद्यैर्विना नृत्यकालीनवाद्यानि विना, नर्त्तकी नर्त्तकीरूपा जाता । अतीवाश्चर्य्यमिदमिति भावः ।

अत्रापि नर्त्तकीरूपेण जातत्वं प्रति प्रथमचरणत्रयगतवाक्यार्थत्रयस्य हेतुत्वात् पूर्ववत् काव्यलिङ्गम् ; तथा "मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा" इति दर्पणोदाहृतवत् समासाभावेऽपि निरङ्गं केवलरूपकम् ; तत्र वाद्यैर्विनेत्यभिधानादधिकारूढवैशिष्ट्यरूपमित्यनयोर्मिथो निरपेक्षतया संसृष्टिः । शार्दूलविक्रीडितं वृत्तम् ॥२६॥

হে ভ্রমর ! শকুন্তলা হস্ত সঞ্চালন করিতেছেন, এদিকে তুমি উঁহার চঞ্চলপ্রান্তসমন্বিত চঞ্চলনয়ন বার বার স্পর্শ করিতেছ, গুপ্তভাষার ন্যায় কাণের নিকটে যাইয়া ছোট ছোট শব্দ করিতেছ এবং সুরতসর্ব্বস্ব অধর পান করিতেছ। অতএব তত্ত্বান্বেষণ করিয়া আমি ব্যর্থমনোরথ হইলাম, আর তুমিই চরিতার্থ হইলে ॥২৫॥

शकु। हला! परित्तायध परित्तायध मं इमिणा दुट्ठ-महुअरेण अहिहूअमाणं (१)। (ग)

उभे। सस्मितम्। का अम्हे परित्ताणे। एत्थ दाव दुस्सन्दं अक्कन्द, जदो राअरक्खिदाइं तवोवणाइं (२)। (घ)

(ग) हला! परित्रायेथां परित्रायेथां मामनेन दुष्टमधुकरेणाभिभूयमानाम्।

---

(ग) शकु इति। परित्रायेथां युवामिति शेषः। अभिभूयमानाम् अत्यन्तमेवाकुलीक्रियमाणाम्।

(घ) उभे इति। अनसूयाप्रियंवदे द्वे एवेत्यर्थः। सामान्यमधुकरस्याक्रमणम् अकिञ्चित्करमेव; तथापि शकुन्तला नितरामेवाकुलीभूता इत्यतः कौतुकात् स्मितम्। तस्मादेव कौतुकादाह के इत्यादि। के असमर्थे इत्यर्थः, स्त्रीभावत्वादिति भावः। आक्रन्द आह्वय। यत इति। भीतेन रक्षकाह्वानस्यौचित्यादिति भावः।

"क्रन्दने रोदनाह्वाने" इत्यमरः।

---

আরও, এই কমনীয়স্তনী শকুন্তলা, ভ্রূবিলাসের সহিত চঞ্চলদৃষ্টি ইতস্ততঃ সঞ্চালন করিতেছেন, ঈষৎ বক্র এবং চর্ম্মতরঙ্গশালী (থর-বিশিষ্ট) দেহমধ্যভাগদ্বারা বার বার ফিরিতেছেন, পল্লবতুল্য হস্তাগ্র সঞ্চালন করিতেছেন এবং ওষ্ঠযুগল শীৎকারে বিশ্লিষ্ট হইতেছে; অতএব ভ্রমরদংশনের ভয়ে বাদ্য ব্যতীত নর্ত্তকী হইয়াছেন ॥২৬॥

(শ) শকুন্তলা। ওলো! এই দুষ্ট ভ্রমর আমাকে অত্যন্ত আকুল করিয়া তুলিয়াছে; তা আমাকে রক্ষা কর রক্ষা কর।

---

(१) शकुन्तला। ण एसो धिट्ठो विरमइ, अण्णदो गमिस्सं। पदान्तरे ठिदा सदृष्टिक्षेपम्। कधं इदोऽवि आअच्छइ। हला! परित्तायध मं इमिणा दुव्विणीदेण महुअरेण अहिहूअमाणं।

(२) का वअं परित्तादुं।...राअरक्खिदव्वाइं तपोवणाइं णाम।

রাজা। অবসরঃ খল্বয়মস্মাকমাত্মানং দর্শয়িতুম্। ন ভেতব্যং ন ভেতব্যম্। ইত্যর্দ্ধোক্তে স্বগতম্। এবং হি রাজাহমস্মীতি পরিজ্ঞানং ভবিষ্যতি। ভবতু, অতিথিসমাচারমেবাবলম্বিষ্যে (১)। (স)

---

(ষ) কে আবাং পরিত্রাতুং। অত্র তাবৎ দুষ্মন্তমাক্রন্দ; যতো রাজরক্ষিতানি তপোবনানি।

---

(স) রাজেতি। অবসরঃ সময়ঃ; মৎপ্রস্তাবস্যোত্থানাদিত্যাশয়ঃ। 'ন ভেতব্যং ন ভেতব্যম্, অয়মহমুপস্থিত এবাস্মি' ইতি বাক্যসমুদায়স্য 'ন ভেতব্যং ন ভেতব্যম্' ইত্যয়মংশঃ অর্দ্ধ এব স্যাদত আহ ইত্যর্দ্ধোক্তে ইতি। এবং হি দুষ্মন্তপ্রস্তাবোত্থানানন্তরমেব আত্মপ্রকাশে, রাজা দুষ্মন্তরূপঃ। পরিজ্ঞানং পরিচয়ঃ। তথা চ সতি, অতর্কিতভাবেন কন্যাসমবায়ান্তিকে রাজ্ঞ এবোপস্থিতিঃ কথমিতি মহান্ সন্দেহঃ স্যাদিতি ভাবঃ। ভবতু পরিজ্ঞানমিতি পূর্বেণান্বয়ঃ। অতিথেঃ সমাচারং ব্যবহারম্। অবলম্বিষ্যে আশ্রয়িষ্যে। এবঞ্চ অতিথীনামতর্কিতভাবেনৈব সর্বত্রোপস্থিতের্ন সন্দেহসম্ভব ইত্যাশয়ঃ।

---

(ষ) অনসূয়া ও প্রিয়ংবদা। (ঈষৎ হাস্যের সহিত) আমরা রক্ষা করিতে কে?। এবিষয়ে দুষ্মন্তকে ডাক; যে হেতু তপোবনগুলি রাজার রক্ষিত।

(স) রাজা। আপনাকে দেখাইবার আমার এই-ই অবসর। ভয় করিবেন না, ভয় করিবেন না। (এই অর্দ্ধোক্তির পর স্বগত) ইহাতে 'আমি রাজা' ইহা পরিচয় হইবে; হউক, অতিথির আচরণই অবলম্বন করিব।

---

(১) অবসরোঽয়মাত্মানং প্রকাশয়িতুম্।···রাজভাবস্ত্বভিজ্ঞাতো ভবেৎ। ভবতু, এবং তাবদভিধাস্যে।

शकु । ण एसो दुव्विणीदो विरमदि, ता अण्णदो गमिस्सं । पदान्तरे सदृष्टिक्षेपम् । हद्दी हद्दी ! कधं इदो वि मं अणुसरदि, ता परित्ताअध मं (१) । (ङ)

राजा । सत्वरमुपगम्य । आः ! (२) । (च)

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥२७॥

(ङ) नैष दुर्विनीतो विरमति, तदन्यतो गमिष्यामि । हा धिक् हा धिक् । कथमितोऽपि मामनुसरति तत् परित्रायेथां माम् ।

(ङ) शकु इति । दुर्विनीतो दुष्टः, एष मधुकरः । अन्यतः अन्यस्मिन् स्थाने । पदान्तरे स्थानान्तरं गत्वेति शेषः । दृष्टिक्षेपेण भ्रमर आगच्छति न वेति परीक्षार्थं दृष्टिदानेन सहेति सदृष्टिक्षेपम् । हा धिगित्येकमेव विषादसूचकमव्ययम् । इतोऽपि अस्मिन् स्थानेऽपि ।

(च) राजेति । उपगम्य शकुन्तलादीनां समीप उपस्थाय । आ इति कोप-सूचकमव्ययम् । "आस्तु स्यात् कोपपीड़योः" इत्यमरः ।

क इति । दुर्विनीतानां दुष्टानाम्, शासितरि शासनकर्त्तरि, पौरवे पुरुवंशीये नृपे, वसुमतीं पृथिवीम्, शासति पालयति सति, अयं कः, मुग्धासु जगद्व्यापारानभिज्ञतया मूढासु तपस्विकन्यासु, अविनयमशिष्टम्, आचरति व्यवहरति ? तद्ब्रूहीति शेषः । अधुनैव तस्य दण्डं विदधामीति भावः ।

(ঙ) শকুন্তলা। এই দুষ্ট ভ্রমর বিরত হইতেছে না; তা অন্য স্থানে যাই। (স্থানান্তরে যাইয়া দৃষ্টিপাতের সহিত) হায়! হায়! এখানেও আমার অনুসরণ করিতেছে; তা আমাকে রক্ষা কর।

(চ) রাজা। (সত্বর উপস্থিত হইয়া) আঃ!।

(१) शकुन्तला । पदान्तरे स्थित्वा सदृष्टिक्षेपम् । कहं इदो वि मं अणुसरइ ।

(२) क्वचित् 'आः' इति नास्ति ।

সর্ব্বা রাজানং দৃষ্ট্বা কিঞ্চিদিব সংভ্রান্তাঃ। (ক)

সখ্যৌ। অজ্জ! ণ কিম্পি অচ্চাহিদং, কিন্তু খু ইঅং পিঅসহী দুট্ঠমহুঅরেণ আউলীকিঅমাণা কাদরীভূদা।

ইতি শকুন্তলাং দর্শয়তঃ (১)। (খ)

(খ) আর্য্য! ন কিমপি অত্যাহিতম্, কিন্তু খলু ইয়ং প্রিয়সখী দুষ্টমধুকরেণ আকুলীক্রিয়মাণা কাতরীভূতা।

---

অহো কামপ্রবৃত্তিমহিমা! যৎ মহাবীরো রাজা দুষ্মন্তঃ পশ্যন্নপি ক্ষুদ্রং কীটমাত্রমুৎপীড়য়িতারমেকং ভ্রমরম্, স্বসমকক্ষং প্রতিপক্ষং লক্ষয়ন্নিব তীব্রমাস্ফালয়তি; তচ্চাবিষ্করোতি নিতরাং কবিচূড়ামণেরিব চমৎকারিণীং রচনাচাতুরীম্।

অত্র 'শাস-শাস' ইতি ব্যঞ্জনসঙ্ঘস্য সকৃদনেকধাসাম্যাৎ ছেকানুপ্রাসোঽলঙ্কারঃ।

আর্য্যা জাতিঃ ॥২৭॥

(ক) সর্ব্বা ইতি। সর্ব্বাঃ শকুন্তলানসূয়াপ্রিয়ংবদাঃ। সম্ভ্রান্তাঃ রাজ্ঞঃ পূর্ব্বমদৃষ্টত্বাৎ আকৃতিদর্শনেন মহাপুরুষত্বানুমানাচ্চ চকিতাঃ।

(খ) সখ্যাবিতি। অত্যাহিতং মহাভীতিঃ। শকুন্তলায়াঃ প্রদর্শনং তদসুস্থতা-প্রদর্শনেন স্ববাক্যসত্যতাপ্রমাণার্থম্।

---

দুষ্টদিগের শাসনকর্ত্তা পুরুবংশীয় লোক পৃথিবী শাসন করিতেছে, এই অবস্থায় কোন্ ব্যক্তি এই সকল তপস্বিকন্যাগণের প্রতি অন্যায় আচরণ করিতেছে? ॥২৭॥

(ক) (সকলে রাজাকে দেখিয়া একটু যেন চকিত হইল।)

(খ) সখীদ্বয়। আর্য্য! কোন অত্যাহিত হয় নাই। কিন্তু দুষ্ট ভ্রমর আমাদের এই প্রিয়সখীকে আকুল করিয়াছিল; তাই ইনি কাতর হইয়াছেন। (এই বলিয়া শকুন্তলাকে দেখাইল।)

---

(১) কুত্রচিৎ ইতিশব্দো ন বর্ত্ততে।

রাজা। শকুন্তলামুপেত্য। অয়ি! তপো বর্দ্ধতে ? (১)। (গ)

শকু। সসাধ্বসাবনতমুখী তিষ্ঠতি (২)। (ঘ)

অন। দাণিং অদিধিবিসেসলাহেণ। (ঙ)

প্রিয়ং। সাঅদং অজ্জস্স ?। হলা সউন্তলে! গচ্ছ, উড়আদো ফলমিস্সং অগ্‌ঘভাঅণং উবহর, ইদম্পি পাওদঅং ভবিস্সদি। ইতি ঘটং দর্শয়তি (৩)। (চ)

(ঙ) ইদানীম্ অতিথিবিশেষলাভেন।

(চ) স্বাগতমার্য্যস্য ? হলা শকুন্তলে! গচ্ছ, উটজাৎ ফলমিশ্রমর্ঘ্য-ভাজনমুপহর, ইদমপি পাদোদকং ভবিষ্যতি।

(গ) রাজেতি। অয়ীতি কোমলসম্বোধনে। তপো বর্দ্ধতে ইতি কাকুস্বরেণ প্রশ্নো ব্যজ্যতে।

(ঘ) শকু ইতি। সসাধ্বসা সহসা অদৃষ্টপূর্ব্বমহাপুরুষদর্শনাৎ সভয়া।

(ঙ) অনেতি। পৃষ্টায়াঃ শকুন্তলায়া ভয়েন তূষ্ণীম্ভাবাৎ কর্ত্তব্যবুদ্ধ্যা অনসূয়া প্রত্যুত্তরয়তীতি বোধ্যম্। অতিথিবিশেষস্য ভবাদৃশস্যাতিথের্লাভেন তপো বর্দ্ধতে ইতি পূর্ব্বেণান্বয়ঃ।

(চ) প্রিয়মিতি। আর্য্যস্য মান্যস্য ভবতঃ, স্বাগতং সুখেন আগমনং জাতং

(গ) রাজা। ( শকুন্তলার নিকটে যাইয়া ) অয়ি! তপস্যা বৃদ্ধি পাইতেছে ত ?।

(ঘ) শকুন্তলা। ( লজ্জার সহিত অবনতমুখ হইয়া থাকিল। )

(ঙ) অনসূয়া। এখন অতিথিবিশেষ লাভ করায় তপস্যা বৃদ্ধি পাইতেছে।

(১) রাজা। শকুন্তলাভিমুখো ভূত্বা। অপি তপো বর্দ্ধতে।

(২) সাধ্বসাদবনতা তিষ্ঠতি।

(৩) অনসূয়া। দাণিং অদিহিবিসেসলাহেণ। হলা সউন্তলে! গচ্ছ উড়অং ফলমিস্সং অগ্‌ঘং উবহর। ইদং পাদোদঅং ভবিস্সদি।

राजा। भवतीनां सूनृतयैव वाचा कृतमातिथ्यम्। (छ)

अन। इमस्सिं दाव पच्छाअसीदलाए सत्तवण्णवेदिआए उववि‌सिअ अज्जो परिस्समं अवणेदु (१)। (ज)

(ज) अस्यां तावत् प्रच्छायशीतलाया सप्तपर्णवेदिकायामुपविश्य आर्य्यः परिश्रम-मपनयतु।

---

किमिति काकुः। आगतमिति भावे क्तः। उटजात् पर्णशालायाः, फलेन मिश्रं युक्तम्। उपहर आनय। पादोदकं पादप्रक्षालनजलम्। आतिथ्यसम्पादनार्थं प्रथममेतत् देयमिति भावः।

(छ) राजेति। सूनृतया सत्यप्रियया, वाचा वाक्येनैव, आतिथ्यम् अतिथिसत्कारः कृतं सम्पादितम्। तथा च पुनः क्रियया आतिथ्यकरणमनावश्यकमेवेति भावः।

सुष्ठु नृत्यन्त्यनेनेति सूनृतं पृषोदरादित्वात् साधुः।

"सूनृतं प्रिये। सत्ये" इत्यमरः।

(ज) अनेति। प्रकृष्टा छाया यस्यां सा प्रच्छाया, अतएव शीतला तस्याम्। सप्तपर्णवेदिकायां सप्तच्छदवृक्षस्य मूलस्थपरिष्कृतभूमौ।

"भाष्यं प्रसन्नगम्भीरम्" "प्रसन्नकर्कशा वाच." इत्यादिवत् प्रच्छायशीतलेत्यत्र परपदस्य विशेष्यत्वविवक्षया कर्म्मधारयः।

---

(চ) প্রিয়ংবদা। আর্য্যের শুভাগমন ত? ওলো শকুন্তলা! যাও, পর্ণগৃহ হইতে ফলযুক্ত অর্ঘ্যপাত্র আনয়ন কর ; আর ইহা পাদোদক হইবে। ( এই বলিয়া ঘট দেখাইল। )

(ছ) রাজা। আপনাদের সত্য ও প্রিয়বাক্যই অতিথিসৎকার করিয়াছে।

(জ) অনসূয়া। আপনি এই প্রকৃষ্ট ছায়াযুক্ত শীতল সপ্তপর্ণবেদীতে উপবেশন করিয়া পরিশ্রম দূর করুন।

---

(१) तेण हि इमस्सिं·· परिस्समविणोदं करेदु अज्जो।

রাজা। নূনং যূয়মপ্যনেন ধর্ম্মকর্ম্মণা পরিশ্রান্তাঃ, তন্মুহূর্ত্তমুপবিশত (১)। (ঝ)

প্রিয়ং। জনান্তিকম্। হলা সউন্তলে! উইদং ণো অদিধিপজ্জুবাসণং, তা এহি উববিসহ্ম। ইতি সর্ব্বা উপবিশন্তি (২)। (ঞ)

শকু। আত্মগতম্। কধং ইমং জণং পেক্খিঅ তবোবিরোহিণো বিআরস্স গমণীঅহ্মি সংবুত্তা (৩)। (ট)

---

(ঞ) হলা শকুন্তলে! উচিতং নঃ অতিথিপর্য্যুপাসনম্, তৎ এহি, উপবিশামঃ।

(ট) কথমিদং জনং প্রেক্ষ্য তপোবিরোধিনো বিকারস্য গমনীয়াস্মি সংবৃত্তা।

---

(ঝ) রাজেতি। নূনং নিশ্চিতমেব। অনেন দৃশ্যমানেন জলসেচনেন।

(ঞ) প্রিয়মিতি। জনস্য উদ্দিষ্টস্যৈব লোকস্য অন্তিকমিতি জনান্তিকম্ অনন্যশ্রব্যং যথা স্যাত্তথেত্যর্থঃ। তথা চ দর্পণে—

"ত্রিপতাককরেণান্যানপবার্য্যান্তরা কথাম্।
অন্যোন্যামন্ত্রণং যৎ স্যাৎ জনান্তে তজ্জনান্তিকম্॥"

(ট) শকু ইতি। তপসো ব্রহ্মচর্য্যস্য বিরোধিনো বিনাশকতয়া প্রতিকূলস্য, বিকারস্য কামস্যেত্যর্থঃ, গমনীয়া আশ্রয়ণীয়া। মহাননর্থমূলোঽয়মিতি ভাবঃ।

অয়ং ভাবো নাম সাত্ত্বিকোঽলঙ্কারঃ—"নির্বিকারাত্মকে চিত্তে ভাবঃ প্রথমবিক্রিয়া।" ইতি দর্পণোক্তেঃ।

---

(ঝ) রাজা। আপনারাও, এই ধর্ম্মকার্য্যদ্বারা নিশ্চয়ই পরিশ্রান্ত হইয়া পড়িয়াছেন; সুতরাং একটু কাল উপবেশন করুন।

(ঞ) প্রিয়ংবদা। (শকুন্তলার প্রতি গোপনে) ওলো শকুন্তলা! অতিথির সেবা করা আমাদের উচিত; তা আইস, আমরা উপবেশন করি। (ইহার পর সকলে উপবেশন করিল।)

---

(১) কর্ম্মণা। (২)...পজ্জুবাসণং অদিহীণং। এত্থ উববিসহ্ম।

(৩) শকু।...কিং ণু ক্খু ইমং পেক্খীঅ তবোবণবিরোহিণো...।

राजा । (सर्वा अवलोक्य ।) अहो ! समानवयोरूपरमणीयं सौहार्दमत्रभवतीनाम् (१) । (ठ)

प्रियं । (जनान्तिकम् ।) हला अणसूए ! को णु क्खु एसो दुरवगाहगम्भीराकिदी महुरं आलवन्तो पहुत्तदाक्खिण्णं वित्थारेदि (२) । (ड)

(ड) हला अनसूये ! को नु खलु एष दुरवगाहगम्भीराकृतिमधुरमालपन् प्रभुत्वदाक्षिण्यं विस्तारयति ।

---

(ठ) राजेति । अत्रभवतीनां तपस्वित्वेन पूज्यानां युष्माकम्, सौहार्दम् आलापाद्यनुमिता मैत्री, समानाभ्यां वयोरूपाभ्यां रमणीयं मनोहरम् । "समे विरोधो मैत्री च न च पुष्टविपुष्टयोः" इति न्यायानुसारादिदमतीवानन्दकरमिति भावः ।

(ड) प्रियमिति । दुःखेनावगाह्यते प्रविश्यत इति दुरवगाहा दुर्बोधस्वभावा गम्भीरा धीरा धैर्य्यव्यञ्जकेत्यर्थः आकृतिर्यस्य सः । प्रभुत्वदाक्षिण्यं प्रभावौदार्य्यं "कः पौरवे" इत्यादिना स्वप्रभावमहिमानमित्यर्थः, विस्तारयति विस्तरेण व्यनक्ति ।

(ট) শকুন্তলা। ( স্বগত ) এই লোকটীকে দেখিয়া তপোবিরোধী বিকারের বিষয় হইলাম কেন ?।

(ঠ) রাজা। ( সকলকে দেখিয়া ) ভাল ! সমান বয়স এবং সমান রূপ ; সুতরাং আপনাদের এই সখ্যভাব মনোহরই বটে।

(ড) প্রিয়ংবদা। ( অনসূয়ার প্রতি গোপনে ) ওলো অনসূয়া ! ইনি কে ? ইঁহার আকৃতিটী গাম্ভীর্য্যব্যঞ্জক এবং দুর্বোধস্বভাব ; ইনি মধুর আলাপকরতঃ প্রভুত্বের উদারতা প্রকাশ করিতেছেন।

---

(१) राजा । सर्वा विलोक्य । अहो ! समवयोरूपरमणीयं भवतीनां सौहार्दम् ।

(२) प्रियं ।···महुरगम्भीराकिदी चउरं पिअं आलवन्तो पहावव्वन्तो विअ लक्खीअदि ।

अन। हला! मम वि अत्थि कोदूहलं, तां पुच्छिस्सं दाव णं। प्रकाशम्। अज्जस्स महुरालावजणिदो वीसम्भो मं आलावेदि। कदरो राएसिवंसो अलंकरीअदि अज्जेण? कदमो वा देसो विरहपज्जुस्सुओ करीअदि? किं णिमित्तं वा अज्जेण सुउमारेण तवोवणगमणपरिस्समे अप्पा उवणी-दोत्ति? (१)। (ढ)

(ढ) हला! ममापि अस्ति कौतूहलम्, तत् प्रक्ष्यामि तावदेनम्। आर्य्यस्य मधुरालापजनितो विश्रम्भो मामालापयति। कतरो राजर्षिवंशः अलङ्क्रियते आर्य्येण? कतमो वा देशो विरहपर्य्युत्सुकः क्रियते? किं निमित्तं वा आर्य्येण सुकुमारेण तपोवनगमनपरिश्रमे आत्मा उपनीतः?।

(ढ) अनेति। विश्रम्भः 'प्रश्ने कृतेऽपि न खलु भवानपरज्येत' इत्येवं विश्वासः, आलापयति आलापाय नियुङ्क्ते। कोऽसौ प्रश्न इत्याह कतर इति। आर्य्येण मान्येन भवता, कतरो राजर्षिवंशः चन्द्रसूर्य्योत्पन्नयोर्द्वयो राजर्षिवंशयोर्मध्ये को राजर्षिवंशः, अलङ्क्रियते जन्मना शोभ्यते। कतमो वा बहूनां मध्ये को वा देशः, विरहेण आत्मविच्छेदेन पर्य्युत्सुकः उत्कण्ठितः क्रियते। सुकुमारेण कोमलाङ्गेन। आत्मा देहः, उपनीत उपस्थापितः। इति एष प्रश्न इत्यर्थः।

(ঢ) অনসূয়া। ওলো! এ বিষয়ে আরও কৌতূহল আছে; তা ইঁহাকে জিজ্ঞাসা করি। (প্রকাশ্যে) মহাশয়ের মধুরালাপজনিত বিশ্বাস আমাকে বলাইতেছে। আপনি কোন্ রাজর্ষিবংশ অলঙ্কৃত করিতেছেন? কোন্ দেশকেই বা বিরহোৎকণ্ঠিত করিতেছেন?। কি নিমিত্তই বা আপনি কোমল হইয়া আপনাকে তপোবনে আগমনের পরিশ্রমে নিযুক্ত করিয়াছেন।

(१)··वीसम्भो मं मन्तावेइ।···कदमो।···विरहपज्जुस्सुअजणो किदो देसो सुउमारदरो वि तवोवणपरिस्समस्स अत्ता पदं उवणीदो।

शकु। आत्मगतम्। हिअअ! मा उत्तम्म, जं तुए चिन्तिदं, तं अणसूआ मन्तेदि (१)। (घ)

राजा। स्वगतम्। कथमिदानीमात्मानं निवेदयामि, कथं वात्मनः परिहारं करोमि। भवतु, एवं तावत्। प्रकाशम्। भवति! वेदविदस्मि राज्ञः पौरवस्य नगरधर्म्माधिकारे नियुक्तः पुण्याश्रमदर्शनप्रसङ्गेन धर्म्मारण्यमिदमायातः (२)। (ङ)

(घ) हृदय! मा उत्ताम्य, यत् त्वया चिन्तितम्, तदनसूया मन्त्रयति।

(घ) शकु इति। मा उत्ताम्य अस्य परिचयलाभेच्छया व्यस्तं न भव। व्यस्ततानिवारणाय कारणमाह यदिति। मन्त्रयति ब्रवीति। तत एव च परिचयलाभसम्भवादिति भावः।

उत्ताम्येति उत्पूर्वस्य दैवादिकस्य तमधातोः पञ्चम्या ह्नौ प्रयोगः, "शमादीनां दीर्घो यनि" इति दीर्घः।

(ङ) राजेति। आत्मानं निवेदयामि राजत्वादिना सर्वथा परिचाययामि। तथा सति कन्याजनान्तिके प्रच्छन्नप्रवेशेन असदभिप्रायः प्रकाशेत इति भावः। आत्मन आत्मपरिचयस्य, परिहारम् अन्यथाभिधाय परित्यागं करोमि। तथा च सति मिथ्यावादिता स्यात्। अतएव च महासङ्कटमिदमित्याशयः। भवतु महासङ्कटमिति शेषः। एवमित्थं तावत् वक्ष्यामिति शेषः। तेन च तत्सङ्कटपरिहारो भवेदित्यर्थः। भवतीति पृच्छन्त्या अनसूयायाः सम्बोधनम। अस्मि अहम, वेदवित् वेदज्ञः। एतेनात्मनो

(ग) শকুন্তলা। (স্বগত) মন! তুমি ব্যস্ত হইও না; তুমি যাহা চিন্তা করিতেছিলে; তাহা অনসূয়া বলিতেছে।

(১) शकुन्तला।···एसा तुए चिन्तिदाइ अणसूआ मन्तेदि।

(२) राजा। आत्मगतम्।·· कथं वा आत्मापहारं करोमि। भवतु, एवं तावदेनां वक्ष्ये। प्रकाशम्। भवति! यः पौरवेण राज्ञा धर्म्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्म्मारण्यमिदमायातः।

अन। अज्ज सणाधा धम्मआरिणो (१)। (थ)

ब्राह्मणत्वं सूचितम्। पौरवस्य पुरुवंशातपन्नस्य, राज्ञो दुष्मन्तस्य, नगरधर्म्माधिकारे राजधानीस्थधर्म्माधिकरणे राजधानीगतसर्वप्रधानविचारालये इत्यर्थः, नियुक्तः स्थापितः, तदधिकारे यावन्तः पुण्याश्रमास्तेषां दर्शनप्रसङ्गेन अभावाभियोगनिवारणाय पर्य्यवेक्षण-सम्बन्धेन, इदं धर्म्मारण्यं तपोवनम्, आयात आगतः। एतेनात्मनो ब्राह्मणत्वं दुष्मन्तस्य राज्ञः प्रधानविचारपतित्वञ्च सूचितम्, पर्य्यवेक्षकस्य सर्वत्र सर्वदा सर्वभावेन प्रवेशस्य न्याय्यत्वात् कन्याजनान्तिके गोपनप्रवेशदोषोऽपि परिहृत इत्यवधेयम्।

अवेदमप्यर्थान्तरं सूचयति। तथा च अस्मि अहम्, वेदवित् क्षत्रियत्वेनापि वेदज्ञः, पौरवस्य पुरुवंशीयस्य राज्ञः यावन्ति नगराणि ये च धर्म्माः शौचाचारादयस्तेषामधिकारे पालनव्यापारे नियुक्तो विधात्रैव व्यापारितः। अस्मिन् पक्षे नगरपदं राज्यसामान्योप-लक्षणम्। मृगयार्थमागतोऽपि समिदाहरणाय प्रस्थितानां मुनीनामनुरोधात् पुण्याश्रम-दर्शनप्रसङ्गेनेत्यर्थः इदं धर्म्मारण्यं तपोवनमायातः। अहं वेदवित् पुरुवंशीयो राजा मुनीनामनुरोधात् पुण्याश्रमदर्शनोद्देशेन इदं तपोवनमागत इति निष्कर्षः। एतेनात्मनो मिथ्यावादित्वं परिहृतम्।

अत एवेदमेकं पताकास्थानम्। तथा च साहित्यदर्पणे—

"द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्॥"

अत्र श्लेषालङ्कार इति केचित्। तदसत् उभयोरेवार्थयोर्वाच्यत्व एव दर्पणकारादिभिः श्लेषाङ्गीकारात् अत्र तु एकतरार्थस्य व्यङ्गत्वेन उभयोर्वाच्यत्वाभावात्।

(ত) রাজা। (স্বগত) এখন কি করিয়াই বা আত্মপরিচয় দি? কি করিয়াই বা আত্মপরিচয় পরিত্যাগ করি? হউক, এইরূপ বলিতে হইবে। (প্রকাশ্যে) আর্য্যে! আমি বেদাভিজ্ঞ এবং পুরুবংশীয় রাজার রাজধানীস্থ ধর্ম্মাধিকরণে নিযুক্ত আছি; কিন্তু পবিত্র আশ্রম দেখিবার জন্য এই তপোবনে আসিয়াছি।

(१) अनसूया। सणाहा दाणिं धम्मआरिणी।

শকু। শৃঙ্গারলজ্জাং নাটয়তি (১)। (দ)

সখ্যৌ। উভয়োরাকারং বিদিত্বা। হলা সউন্তলে! জই অজ্জ তাদো ইধ সণ্ণিহিদো ভবে। (ধ)

শকু। তদো কিং ভবে। (ন)

সখ্যৌ। তদো জীবিদসব্বস্সেণ বি ইমং অদিধিবিসেসং কদত্থং করেদি (২)। (প)

---

(থ) অদ্য সনাথা ধর্ম্মচারিণঃ।

(ধ) হলা শকুন্তলে! যদি অদ্য তাত ইহ সন্নিহিতো ভবেৎ।

(ন) ততঃ কিং ভবেৎ।

(থ) অনেতি। ধর্ম্মচারিণঃ ধর্ম্মকার্য্যানুষ্ঠায়িনঃ, সনাথা নাথবন্তঃ প্রভুমন্ত ইতি যাবৎ, ভবদাগমনাদিতি ভাবঃ।

(দ) শকু ইতি। শৃঙ্গারলজ্জা মনোহরাকৃতের্দুষ্মন্তস্য দর্শনাৎ মনস্যাবির্ভূত-শৃঙ্গারজনিতাং লজ্জামিত্যর্থঃ, নাটয়তি মুখাবনমনসঙ্কোচাদিনা অভিনয়তি।

(ধ) সখ্যাবিতি। উভয়োঃ শকুন্তলাদুষ্মন্তয়োঃ, আকারম্ আকারগতকম্প-রোমাঞ্চাদিবিকারম্, বিদিত্বা প্রত্যক্ষেণাবগম্য। তাতঃ কণ্বঃ, ইহ অস্মিন্নাশ্রমে, সন্নিহিতঃ স্থিতঃ।

(ন) শকু ইতি। তত্তদা।

---

(থ) অনসূয়া। আজ ধর্ম্মকার্য্যকারী ঋষিরা সনাথ হইলেন।

(দ) শকুন্তলা। (শৃঙ্গারলজ্জা অভিনয় করিল।)

(ধ) সখীদ্বয়। (উভয়ের আকৃতি দেখিয়া) ওলো শকুন্তলা! আজ যদি পিতা এই আশ্রমে থাকিতেন।

(ন) শকুন্তলা। তা হইলে কিংহইত?।

---

(১) শকুন্তলা। শৃঙ্গারলজ্জাং রূপয়তি।

(২) সখ্যৌ। ইমং জীবিদসব্বস্সেণ বি অদিধিবিসেসং কদত্থং করিস্সদি।

শকু। সকৃতককোপম্। অবেধ, তুম্হে কিম্পি হিঅএ কদুঅ মন্তেধ, ণ বো বঅণং সুণিস্সং। (ফ)

রাজা। বয়মপি ভবত্যোঃ সখীগতং কিঞ্চিৎ পৃচ্ছামঃ (১)। (ব)

(প) ততো জীবিতসর্বস্বেনাপি ইমম্ অতিথিবিশেষং কৃতার্থং করোতি।

(ফ) অপেতম্, যুবাং কিমপি হৃদয়ে কৃত্বা মন্ত্রয়থঃ, ন বাং বচনং শ্রোষ্যামি।

(প) সখ্যাবিতি। ততস্তদা, জীবিতস্য আত্মনো জীবনস্য সর্বস্বেনাপি সর্ব-সম্পত্তিস্বরূপেণাপি পদার্থেন শকুন্তলয়েত্যর্থঃ। অতিথিবিশেষং সাধারণবিলক্ষণমতিথিম্, কৃতার্থং চরিতার্থং পূর্ণমনোরথমিতি তাৎপর্য্যম্, করোতি করিষ্যতীতি ভবিষ্যৎসামীপ্যে বর্ত্তমানা। তদা ত্বাং শকুন্তলাং দত্ত্বা ইমম্ অসাধারণমতিথিং সন্তোষয়েদিতি সরলার্থঃ।

(ফ) শকু ইতি। কৃতককোপেন কৃত্রিমক্রোধেন সহেতি সকৃতককোপম্। অত্র কৃতকপটেন শকুন্তলায়া অপি তথাবিধাভিপ্রায়া বর্ত্তত ইতি ধ্বনিতম্। অপেতং দূরং গচ্ছতম্। কিমপি তপস্যানিরতত্বাদবাচ্যং মৎপরিণয়বিষয়মিত্যর্থঃ। মন্ত্রয়থঃ কথয়থঃ। বাং যুবয়োঃ। ন শ্রোষ্যামীতি অনভিপ্রেতপ্রলাপিত্বাদিতি ভাবঃ।

অহো! ঈদৃশং যথাযথলোকচরিত্রচিত্রণং কালিদাসমন্তরেণ জগতি দুর্লভমেবেতি সমুদ্ঘোষয়ন্তি কাব্যরসিকাঃ।

(ব) রাজেতি। বয়মপি "অস্মদশ্চ" ইতি বহুবচনাৎ অহমপীত্যর্থঃ, ভবত্যোর্যুবয়োঃ, সখীগতং শকুন্তলাবিষয়ম্। পৃচ্ছাম ইতি কাক্বা প্রার্থনা ব্যজ্যতে।

(প) সখীদ্বয়। তা হইলে জীবনসর্বস্ব দিয়াও, এই অতিথি-প্রধানকে চরিতার্থ করিবেন।

(ফ) শকুন্তলা। (কৃত্রিম কোপের সহিত) দূরে যাও; তোমরা কোন্ বিষয় মনে কল্পনা করিয়া আলোচনা করিতেছ; তা তোমাদের কথা শুনিব না।

(১) রাজা। বয়মপি তাবদ্ভবত্যোঃ সখীগতং পৃচ্ছামঃ।

सख्यौ । अज्ज ! अणुग्गहे वि अब्भत्थणा (१) । (भ)

राजा । तत्रभवान् कण्वः शाश्वते ब्रह्मणि वर्त्तते, इयञ्च वः सखी तदात्मजा, कथमेतत् ? (२) । (म)

---

(भ) आर्य्ये ! अनुग्रहेऽपि अभ्यर्थना ? ।

---

(भ) सख्याविति । अनुग्रहेऽपि अनुग्रहस्थलेऽपि अभ्यर्थना प्रार्थना । तथा च अस्मादृशान् प्रति भवादृशस्य प्रश्नकरणमनुग्रह एव ; अतएव तद्विषये पुनः प्रार्थना कथमपि न सङ्गच्छत इति भावः ।

(म) राजेति । तत्रभवान् पूज्यः कण्वः, शाश्वते नित्ये नैष्ठिक इत्यर्थः, ब्रह्मणि ब्रह्मचर्य्यव्रते वर्त्तते ; इयञ्च वो युष्माकं सखी शकुन्तला, तस्य कण्वस्य आत्मजा औरसी कन्या, एतत् कथं सम्भवतीति शेषः । तथा च अष्टविधमैथुनवर्ज्जनमेव ब्रह्मचर्य्यम्, मैथुनाभावे च औरसः सन्तानो न सम्भवति । एवञ्च कण्वो नैष्ठिकब्रह्मचारी, शकुन्तला च तस्यौरसी कन्या इत्येतत् परस्परविरुद्धमिति भावः ।

अष्टविधं ब्रह्मचर्य्यमाह आह्निकतत्त्वे दक्षः—

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
एतन्मैथुनमष्टाङ्गं विद्वद्भिः परिकीर्त्तितम् ।
विपरीतं ब्रह्मचर्य्यम् एतदेवाष्टलक्षणम् ॥"

तदनुष्ठायी ब्रह्मचारी च द्विविधः उपकुर्वाणो नैष्ठिकश्च । यथा कूर्म्मपुराणम्—

---

(ব) রাজা। আমিও আপনাদের সখীর বিষয়ে কিছু জিজ্ঞাসা করি ?।

(ভ) সখীদ্বয়। আর্যা ! অনুগ্রহস্থলেও প্রার্থনা !।

---

(१) सख्यौ । अज्ज ! अणुग्गहो एव्वं इअं अब्भत्थणा ।

(२) राजा । भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयञ्च वः सखी तदात्मजेति कथमेतत् ।

अन। सुणादु अज्जो। अत्थि को वि कोसिओ त्ति गोत्तणामहेओ महाप्पहावो राएसी। (य)

राजा। स खलु भगवान् कौशिकः (१)। (र)

अन। तं सहीए पहवं अवगच्छ। उज्झिदाए सरीर-सम्वड्ढणादिहिं उण तादकस्सो वि एदाए पिता (२)। (ल)

(य) शृणोतु आर्य्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः।

---

"योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्।
उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः॥"

अतएवोक्तं शाश्वत इति। "शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः" "वेदस्तत्त्वं तपो ब्रह्म" इति चामरः।

(य) अन्वेति। कुशिकस्य राज्ञः अपत्यं पुमानिति कौशिकः, इति इत्थं गोत्र-नामधेयं गोत्रसूचकं नाम यस्य सः, महाप्रभावो महातपः शक्तिसम्पन्नः, राजा सन् ऋषिः राजर्षिः।

(र) राजेति। स सर्वत्र विख्यातः, भगवान् अतीवमाहात्म्यवान्। शिरश्चालनेन नामपरिचयमङ्गीकरोति।

"भगं श्रीः काममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिषु" इत्यमरः।

---

(ম) রাজা। মাননীয় মহর্ষি কণ্ব, নৈষ্ঠিকব্রহ্মচর্য্যব্রতে অবস্থান করিতেছেন; অথ চ আপনাদের এই সখী তাঁহার কন্যা! ইহা কি করিয়া সম্ভব হয়?।

(য) অনসূয়া। মহাশয় শ্রবণ করুন। 'কৌশিক' ইত্যাকার বংশসূচক নামধারী মহাপ্রভাবশালী কোন রাজর্ষি আছেন।

(র) রাজা। সেই ভগবান্ কৌশিক।

(१) राजा। अस्ति श्रूयते।

(२) अनसूया। तं खो पिअसहीए···तादकस्सवो मे पिदा।

রাজা। উজ্ঝিতশব্দেন জনিতং নঃ কুতূহলম্। তদামূলাচ্ছ্রোতুমিচ্ছামঃ (১)। (ব)

অন। সুণাদু অজ্জো। পুরা কিল তস্স রাএসিণো উগ্গে তবসি বট্টমাণস্স কধম্পি (২) জাদসঙ্কেহিং দেবেহিং মেণআ ণাম অচ্ছরা ণিঅমবিগ্ঘআরিণী পেসিদা। (শ)

(ল) তং সখ্যাঃ প্রভবমবগচ্ছ। উজ্ঝিতায়াঃ শরীরসংবর্দ্ধনাদিভিঃ পুনস্তাত-কণ্বোঽপি এতস্যাঃ পিতা।

(শ) শৃণোতু আর্য্যঃ। পুরা কিল তস্য রাজর্ষেরুগ্রে তপসি বর্ত্তমানস্য কথমপি জাতশঙ্কৈঃ দেবৈঃ মেনকা নাম অপ্সরাঃ নিয়মবিঘ্নকারিণী প্রেষিতা।

---

(ল) অনেতি। তং কৌশিকম্, সখ্যাঃ শকুন্তলায়াঃ, প্রভবং জনকম্। উজ্ঝিতায়াঃ পরিত্যক্তায়াঃ, শরীরসংবর্দ্ধনাদিভিঃ অন্নদানাদিনেতি শেষঃ। আদিশব্দেন রক্ষণাদি-পরিগ্রহঃ। অন্নদানাদিভিঃ পালয়িতাপি পিতেত্যুচ্যতে। তথা চোক্তম্—

"অন্নদাতা ভয়ত্রাতা যস্য কন্যা বিবাহিতা।
জনয়িতোপনেতা চ পঞ্চৈতে পিতরঃ স্মৃতাঃ॥"

(ব) রাজেতি। উজ্ঝিতশব্দেনেতি তস্য কর্ত্তুরনির্দ্দেশাৎ কারণস্যানভিধানাচ্চেতি ভাবঃ। তত্তস্মাৎ, আমূলাৎ আদ্যাদবধি।

(শ) অনেতি। কিলেতি লোকবার্ত্তায়াম্। উগ্রে ভয়ঙ্করে। ভয়ঙ্করং তপশ্চরত ইত্যর্থঃ, তস্য রাজর্ষের্বিশ্বামিত্রস্য সমীপ ইতি শেষঃ, কথমপি কেনাপি কারণেন স্বস্ব-

---

(ল) অনসূয়া। তাঁহাকে আমাদের সখীর জনক বলিয়া জানুন। পরিত্যক্তা সখীর শরীরসংবর্দ্ধনপ্রভৃতিদ্বারা আবার পিতা কণ্বও ইহার পিতা হন।

(ব) রাজা। পরিত্যক্তশব্দে আমাদের কৌতুক জন্মাইয়াছে। তাই প্রথম হইতে শুনিতে ইচ্ছা করি।

---

(১) রাজা।·· মে···। আমূলাৎ শ্রোতুমিচ্ছামি। (২) অনসূয়া। কিম্পি।

রাজা। অস্ত্যেতদন্যসমাধিভীরুত্বং দেবানাম্। ততস্ততঃ (১)। (ষ)

অন। তদো বসন্তাবদাররমণীএ সমএ উম্মাদইত্তুঅং তাএ রূবং পেক্খিঅ। ইত্যর্দ্ধোক্তে লজ্জাং নাটয়তি (২)। (স)

(স) ততো বসন্তাবতাররমণীয়ে সময়ে উন্মাদহেতুকং তস্যা রূপং প্রেক্ষ্য।

পদলোপাশঙ্কয়েতি তাৎপর্য্যম্, জাতশঙ্কৈস্তৎপ্রভয়ৈঃ। নিয়মবিঘ্নকারিণী তপোনিয়মভঙ্গকারিণী।

অত্র "বহুবস্ত্র সমাঃ সিকতা বর্ষাঃ সুমনসো জলৌকসোঽপ্সরসঃ" ইতি বামনঃ। "দারা দিশা অপ্সরসো বর্ষাঃ কৃত্তিকা মঘাঃ। বহুত্বস্তু সদৈতত্বমানবতেষু বিংশতেঃ॥" ইতি চন্দ্রগোমী। "স্ত্রীয়াং বহুষ্বপ্সরসঃ" ইত্যমরশ্চ। অতএব অমীষাং মতে অপ্সরশব্দস্য বহুত্বম্। কাতন্ত্রপরিশিষ্টে "বহুত্ববদস্বাদে"রিত্যাদিসূত্রে "বা চ জলৌকসঃ সমা অপ্সরসঃ" ইতি শ্রীপতিনা বিকল্পাবিধানাৎ "অপ্সরো ব্যথিতপার্শ্বমশূন্যম্" ইতি প্রয়োগান্তরদর্শনাচ্চ একবচনান্তোঽপ্যপ্সরঃশব্দঃ স্বীকার্য্যঃ।

(ষ) রাজেতি। অন্যেষাং যঃ সমাধিঃ তপঃপ্রভৃতিনিয়মঃ তস্মাৎ ভীরুত্বং ভয়শীলত্বম্। পুরাণাদিষু বহুশঃ শ্রবণাদিতি ভাবঃ।

(শ) অনসূয়া। আর্য্য শ্রবণ করুন। পূর্ব্বে সেই রাজর্ষি বিশ্বামিত্র ভয়ঙ্কর তপস্যা করিতেছিলেন; তখন দেবগণ কোন কারণে আশঙ্কিত হইয়া, তপস্যার বিঘ্নকারিণী মেনকানাম্নী অপ্সরাকে তাঁহার নিকট পাঠাইয়া দেন।

(ষ) রাজা। অন্যের তপস্যায় এইরূপ ভয়, দেবগণের আছে বটে। তার পর তার পর?।

(১) অস্ত্যেতদন্যসমাধিভীরুত্বং দেবানাম্।

(২) তদো বসন্তোদারসমএ সে উম্মাদইত্তঅং রূবং পেক্খিঅ। ইত্যর্দ্ধোক্তে লজ্জয়া বিরমতি।

राजा। पुरस्तादवगम्यत एव सर्वथा अप्सरःसम्भवैषा (१)। (ह)

अन। अध इं। (ख)

राजा। उपपद्यते। (क)

(ख) अथकिम्।

(स) अनेति। वसन्तस्य ऋतोः अवतारेण आविर्भावेन रमणीये मनोहरे। उन्मादहेतुकं चित्ते कामविकारजनकं तस्या मेनकाया रूपं सौन्दर्य्यम्, प्रेक्ष्य दृष्ट्वा, तया सह सङ्गतो गर्भमजनयदिति वाक्यसमुदायस्य प्रत्येत्यन्तमर्द्धमेव स्यात्। अत उक्तमित्यर्द्धोक्त इति।

(ह) राजेति। पुरस्तादग्रतः परत इति यावत्, अवगम्यत एव। अतो न ते कथनमनावश्यकमिति भावः। एषा शकुन्तला, सर्वथा अप्सरसः सम्भवतीति सा अप्सरोगर्भसम्भूतेत्यर्थः।

(ख) अनेति। अथकिम् एतदेवाङ्गीकरोमीत्यर्थः।

"अङ्गीकारेऽपि चाथकिम्" इति हारावली।

"अत्थि कोसिओत्ति गोत्तणामहेओ राएसी" इत्यारभ्य एतदन्तसन्दर्भे आख्यानं नाम नाट्यालङ्कारः—"आख्यानं पूर्ववृत्तोक्तिः" इति लक्षणात्।

(क) राजेति। उपपद्यते अस्या अप्सरःसम्भवत्वं युज्यते।

(স) অনসূয়া। তার পর, বসন্তের আবির্ভাববশতঃ মনোহর সময়ে উন্মাদজনক মেনকার রূপ দেখিয়া ( এই অর্দ্ধোক্তির পর লজ্জা অভিনয় করিল। )

(হ) রাজা। পরের ঘটনা বুঝিতে পারিতেছি, নিশ্চয়ই ইনি অপ্সরার গর্ভজাত ?।

(ক্ষ) অনসূয়া। হাঁ।

(१) परस्तादवगम्यत एव···।

मानुषीभ्यः कथं नु स्यात् (१) अस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥२८॥

शकु। सव्रीडाधोमुखी तिष्ठति (२)। (ख)

कथमुपपद्यत इत्याह मानुषीभ्य इति। मानुषीभ्यः ब्राह्मण्यादिभेदेन नानाविध-मनुष्यजातीयस्त्रीभ्यः, अस्य दृश्यमानस्य एवंविधस्य, रूपस्य सौन्दर्यस्य, कथं नु सम्भव उत्पत्तिः स्यात् कथमपि नेत्यर्थः। सर्वथा मानुषीविलक्षणत्वादिति भावः। तथा च प्रभा दीप्तिस्तरला चञ्चला यस्य तत् प्रभया तरलमिति वा, ज्योतिस्तेजः विद्युदित्यर्थः, वसुधातलात् भूतलात्, न उदेति न उत्पद्यते। यथा भूतलात् विद्युत् नोत्पद्यते, तथा मानुषीतो नेयमुत्पत्तुमर्हतीति भावः।

अतएवात्र एकस्यैव उत्पत्तिपदार्थस्य सम्भव इति उदेतीति च वाक्यभेदेन पृथक् निर्द्देशात् प्रतिवस्तूपमालङ्कारः। केचित्तु ज्योतिःपदस्य सूर्य्यपरतां व्याख्याय उदेतीत्यस्य उदयं व्रजतीति अर्थभेदमाचक्षाणा दृष्टान्तालङ्कारं वदन्ति। तदसत्, ज्योतिःपदस्य तेजोमात्रवाचितया सूर्य्यपरत्वव्याख्याने विशेषे अविशेषाख्यदोषापत्तेः। मन्मते तु प्रभा-तरलपदेनैव विद्युत्प्रत्यायनात् न तद्दोषावसर इति सुधीभिर्भावनीयम्।

तथात्र विलोभनं नाम मुखसन्ध्यङ्गमुपन्यस्तम्। यथा दर्पणे—

"गुणाख्यानं विलोभनम्" ॥२८॥

(ख) शकु इति। सव्रीडा समक्षमेव स्वप्रशंसया सलज्जा।

---

(क) রাজা। তাহাই সম্ভবপর বটে। (কারণ,)

মনুষ্যজাতীয় স্ত্রী হইতে এতাদৃশ রূপের উৎপত্তি কি প্রকারে সম্ভব হয়। বিদ্যুৎ ভূতল হইতে উৎপন্ন হয় না ॥২৮॥

(খ) শকুন্তলা। (সলজ্জ অবস্থায় অধোমুখ হইয়া রহিল।)

---

(१) मानुषीषु कथं वा स्यात्।

(२) शकु। अधोमुखी तिष्ठति।

राजा । आत्मगतम् । हन्त ! लब्धावकाशो मे मनोरथः (१) । (ग)

प्रियं । सस्मितं शकुन्तलां विलोक्य । पुणो वि वत्तुकामो विअ अज्जो लक्खीअदि (२) । (घ)

शकु । सखीमङ्गुल्या तर्जयति । (ङ)

(घ) पुनरपि वक्तुकाम इव आर्य्यो लक्ष्यते ।

---

(ग) राजेति । हन्तेति हर्षे । लब्धः प्राप्तः अवकाशः अवसरो येन सः, इदानीं मम शकुन्तला ग्रहीतुं योग्या इत्यभिलाषो भवितुमर्हतीत्यर्थः ; अप्सरःसम्भवत्वादित्याशयः ।

अतएवात्र युक्तिर्नाम सन्ध्यङ्गम् । तथा च साहित्यदर्पणे—

"सम्प्रधारणमर्थानां युक्तिः ।"

(घ) प्रियमिति । राजकृतप्रश्नं समाकर्ण्य शकुन्तला सलज्जा जाता इत्यतः पुनरपि कौतुकाय तां लज्जापयितुं प्रवर्त्तत इति सस्मितमित्युक्तम् । वक्तुकाम इवेति अधरस्पन्दनादिदर्शनादिति भावः ।

---

(গ) রাজা । ( স্বগত ) ভাল ! আমার অভিলাষ এখন অবসর প্রাপ্ত হইয়াছে ।

(ঘ) প্রিয়ংবদা । ( ঈষৎ হাস্যের সহিত শকুন্তলাকে দেখিয়া ) আবারও কিছু বলিতে ইচ্ছা করিতেছেন বলিয়া মহাশয়কে লক্ষ্য করিতেছি ।

---

(१) राजा ।···मनोरथः । किन्तु सख्या परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः ।

(२) प्रियंवदा । सस्मितम् । शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा । पुणो वि वत्तुकामो विअ अज्जो ।

রাজা। সম্যগুপলক্ষিতং ভবত্যা। অস্তি নঃ সচ্চরিত-শ্রবণলোভাদন্যদপি প্রষ্টব্যম্। (চ)

প্রিয়ং। তেণ হি অলং বিআরিদেণ, অণিজ্জন্তণাণুজোও ক্খু তবস্সিজণো (১)। (ছ)

(ছ) তেন হি অলং বিচারিতেন, অনির্যন্ত্রণানুযোগঃ খলু তপস্বিজনঃ।

---

(ঙ) শকু ইতি। অঙ্গুল্যা অঙ্গুলীসঙ্কেতেন, সখীং প্রিয়ংবদাম্, তর্জ্জয়তি অপরিচিতপুরুষেণ সহ স্বৈরালাপাৎ ভর্ৎসয়তি। পুনরালাপনিবৃত্ত্যর্থমিতি ভাবঃ।

(চ) রাজেতি। সম্যগুপলক্ষিতং যথার্থমবগতম্। সচ্চরিতশ্রবণলোভাৎ যুষ্মাকং সদাচারশ্রবণাভিলাষাৎ, নঃ অস্মাকং "বাস্মদশ্চ" ইতি বহুবচনাৎ মমেত্যর্থঃ, অন্যদপি প্রষ্টব্যমস্তি।

(ছ) প্রিয়মিতি। তেন হি অন্যস্যাপি প্রষ্টব্যস্য সত্ত্বেনৈব হেতুনা, বিচারিতেন প্রষ্টব্যং ন বেতি বিতর্কেণ অলম্। নিশ্চয়েন যন্ত্রণা নিয়মো নির্যন্ত্রণা ন বিদ্যতে নির্যন্ত্রণা নির্দ্দিষ্টনিয়মো যস্মিন্ সঃ অনির্যন্ত্রণঃ অনুযোগঃ প্রশ্নো যস্মিন্ স তথোক্তঃ। তপস্বিজনস্য নির্ব্বিকারত্বাৎ সর্ব্বত্র নির্লিপ্তত্বাচ্চ তপস্বিনীনামস্মাকমন্তিকে অনিয়মেনৈব যথেষ্টং প্রষ্টুমর্হসীতি ভাবঃ।

"যন্ত্রণং স্যান্নিয়মনে বন্ধনে রক্ষণেঽপি চ" ইতি বিশ্বঃ। "প্রশ্নোঽনুযোগঃ পৃচ্ছা চ" ইত্যমরঃ।

(ঙ) শকুন্তলা। ( অঙ্গুলীসঙ্কেতে সখীকে তর্জ্জন করিল।)

(চ) রাজা। আপনি ঠিক্ লক্ষ্য করিয়াছেন। আপনাদের সচ্চরিত্র শুনিবার লোভে আমার আরও জিজ্ঞাস্য আছে।

(ছ) প্রিয়ংবদা। তাহা হইলে বিবেচনার প্রয়োজন নাই; কারণ, তপস্বীদিগের নিকটে প্রশ্ন করিবার কোন নির্দ্দিষ্ট নিয়ম নাই।

(১) অনসূয়া। অলং বিআরিঅ, অণিঅন্তণাণুজোঈ তবস্সিজণো ণাম।

राजा । एतत् पृच्छामि (१) ।

वैखानसं किमनया व्रतमाप्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेवसदृशेक्षणवल्लभाभिः
आहो निवत्स्यति समं हरिणाङ्गनाभिः ॥२८॥

वैखानसमिति । अनया शकुन्तलया, आ प्रदानात् वराय दानपर्य्यन्तं वरहस्ते दानात् पूर्वपर्य्यन्तमित्यर्थः, मदनस्य कामस्य, व्यापारं कार्य्यम् अष्टाङ्गमैथुनमिति यावत्, रुणद्धि बाधत इति तत् तादृशम्, वैखानसानां तपस्विनामिदमिति वैखानसं व्रतं ब्रह्मचर्य्यनियमः, किं निषेवितव्यम् आश्रयणीयम्? आहो अथवा, सदृशाभ्यां स्वसमानाभ्याम् ईक्षणाभ्यां चक्षुर्भ्यां वल्लभाभिः प्रियाभिर्हरिणाङ्गनाभिः मृगीभिः, समं सह, अत्यन्तमेव सातिशयमेव चिरजीवनमेवेत्यर्थः, निवत्स्यति तपोवन एव स्थास्यति । शकुन्तलया किमुपकुर्वाणब्रह्मचारिता नैष्ठिकब्रह्मचारिता वा अवलम्बितेति सरलार्थः । तत्र ब्रह्मचर्य्यस्य द्वैविध्यं पूर्वमेव दर्शितम् ।

मदनव्यापारविषयकः प्रश्न एव राज्ञः प्रधानोद्देश्यः । तेन 'अनया आप्रदानात् किं वैखानसं व्रतं निषेवितव्यम्?' इत्युक्तिमात्रेणैव वैखानसव्रतस्य ब्रह्मचर्य्यरूपतया प्रकृतजिज्ञासानिर्वाहेऽपि पुनः "व्यापाररोधि मदनस्य" इति विवृत्याभिहितम् ।

अहो ! नितान्तसरलानां मुनिकन्यानामन्तिके आपातत एव राज्ञ ईदृशस्पष्टवादितया नितरामेव गाम्भीर्य्यहानिर्जाता ।

वसन्ततिलका वृत्तम् ॥२९॥

---

রাজা। ইহা জিজ্ঞাসা করিতেছি।

ইনি কি কেবল বিবাহের পূর্ব্বপর্য্যন্ত কামকার্য্যবিরোধী ব্রহ্মচর্য্যব্রতের অনুষ্ঠান করিবেন? না—সমাননয়ননিবন্ধন প্রিয়তম হরিণরমণীগণের সহিত চিরকালই বাস করিবেন? ॥২৯॥

---

(१) राजा । इति सखीं ते ज्ञातुमिच्छामि ।

প্রিয়ং। অজ্জ! ধম্মাঅরণপরবসো এস জণো, গুরুণো উণ সে অণুরূঅবরপ্পদাণে সংকপ্পো (১)। (জ)

রাজা। সহর্ষমাত্মগতম্ (২)। (ঝ)

ভব হৃদয়! সাভিলাষং সম্প্রতি সন্দেহনির্ণয়ো জাতঃ।
আশঙ্কসে যদগ্নিং তদিদং স্পর্শক্ষমং রত্নম্ ॥৩০॥

(জ) আর্য্য! ধর্ম্মাচরণপরবশ এষ জনঃ, গুরোঃ পুনরস্যাঃ অনুরূপবরপ্রদানে সঙ্কল্পঃ।

(জ) প্রিয়মিতি। এষ জনঃ শকুন্তলেত্যর্থঃ, ধর্ম্মাচরণপরবশঃ গুরুনিয়োগাৎ ধর্ম্মানুষ্ঠানাধীনা। অতএব চ অধর্ম্মজনকং সম্ভোগমিদানীং নানুষ্ঠাতুমর্হতীতি ভাবঃ। অহো! এতেন জিজ্ঞাসিতবিষয়স্য কিমুত্তরং দত্তমিত্যাহ গুরোরিত্যাদি। পুনঃ কিন্তু, অস্যাঃ শকুন্তলায়াঃ, গুরোঃ পিতুঃ কণ্বস্য, অনুরূপায় যোগ্যায় বরায় জামাত্রে প্রদানে প্রদানবিষয়ে সঙ্কল্পঃ অভিলাষো বর্ত্তত ইতি শেষঃ। এতেন আপ্রদানাদেবানয়া বৈখানসং ব্রতং নিষেবিতব্যমিত্যভিহিতম্।

(ঝ) রাজেতি। তদুত্তরশ্রবণাৎ শকুন্তলায়াঃ প্রাপ্ত্যাশয়া রাজ্ঞো হর্ষং ইতি বোধ্যম্। ভবেতি। হে হৃদয়! সাভিলাষং শকুন্তলায়াং লিপ্সান্বিতং ভব। কথমিত্যাহ সম্প্রতি ইদানীম্, সন্দেহে 'শকুন্তলা কিমুপকুর্ব্বাণ ব্রহ্মচারিণী নৈষ্ঠিকব্রহ্মচারিণী বা' ইতি সন্দেহবিষয়ে, নির্ণয়ঃ উপকুর্ব্বাণব্রহ্মচারিণ্যেব নিশ্চয়ো জাতঃ। গুরোঃ পুনরস্যা ইত্যাদি প্রিয়ংবদাবচনাদিতি ভাবঃ। অতএবাহ যৎ শকুন্তলাত্মকং বস্তু, অগ্নিং ব্রহ্মচারিতয়া অস্পর্শমাত্রমেব অগ্নিস্বরূপং সন্তাপকম্, আশঙ্কসে সন্দেহং করোষি,

(জ) প্রিয়ংবদা। মহাশয়! এই ব্যক্তি ধর্ম্মানুষ্ঠানের অধীন; কিন্তু ইহাকে উপযুক্ত বরের হাতে সম্প্রদান করাই ইহার পিতার সঙ্কল্প।

(ঝ) রাজা। (আনন্দের সহিত স্বগত)

(১) প্রিয়ংবদা। অজ্জ! ধম্মচরণে বি পরবসো অঅং জণো…।

(২) রাজা। আত্মগতম্। ন খলু দুরবাপেয়ং প্রার্থনা।

শকু। সরোষমিব। অণসূএ! অহং গমিস্সং। (অ)

(অ) অনসূয়ে! অহং গমিষ্যামি।

---

তদিদং শকুন্তলাত্মকং বস্তু, স্পর্শক্ষমং স্পর্শযোগ্যং রত্নং রত্নস্বরূপম্, জাতমিতি শেষঃ। অপ্সরঃসম্ভবত্বেন অব্রাহ্মণীরূপত্বাৎ উপকুর্বাণব্রহ্মচারিতয়া পরিণয়স্যৈব যোগ্যত্বাচ্চেত্যাশয়ঃ।

অত্র পরার্দ্ধং প্রতি পূর্বার্দ্ধবাক্যার্থো হেতুরিতি বাক্যার্থহেতুকং কাব্যলিঙ্গম্, তথা অগ্নিম্ অগ্নিস্বরূপং রত্নং রত্নস্বরূপমিত্যর্থস্য অবশ্যবক্তব্যত্বাৎ অসমাসগতং নিরঙ্গকেবলরূপকালঙ্কারদ্বয়ম্; "সমস্তং ব্যস্তমুভয়মেকদেশবিবর্ত্তি চ" ইতি সরস্বতীকণ্ঠাভরণে ব্যস্তস্যাপি রূপকভেদস্যাঙ্গীকৃতত্বাৎ "মুখং তব কুরঙ্গাক্ষি! সরোজমিতি নান্যথা" ইতি সাহিত্যদর্পণে সমাসাভাবেঽপি নিরঙ্গকেবলরূপকতয়া উদাহৃতত্বাচ্চ। তেষাঞ্চ মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ।

ন পুনরপ্রস্তুতপ্রশংসা, 'যৎ' 'তদিদম্' ইতি শব্দদ্বয়েন প্রস্তুতায়া উপমেয়ভূতশকুন্তলায়া অভিহিতত্বাৎ প্রস্তুতানভিধানস্থল এব অপ্রস্তুতাভিধানেন তৎপ্রস্তুতপ্রতীতৌ অপ্রস্তুতপ্রশংসায়া অঙ্গীকারাৎ। ন বা অতিশয়োক্তিঃ, "বিশেষণাভাবে চ রূপকস্য। যথা রাজা পাকশাসনঃ" ইতি ব্রুবতা দর্পণকৃতৈব এবম্ভূতস্থলে রূপকস্য মীমাংসিতত্বাদিত্যলঙ্কারনিরূপণনিপুণৈঃ সমালোচনীয়ম্।

তথাত্র প্রাপ্তির্নাম মুখসন্ধেরঙ্গম্—"প্রাপ্তিঃ সুখাগমঃ" ইতি লক্ষণাৎ।

আর্য্যা জাতিঃ ॥৩০॥

(অ) শকু ইতি। সরোষমিবেতি ইবশব্দেন রোষস্য কৃত্রিমত্বং সূচিতম্। তেন চ হৃদয়ালাপশ্রবণোৎকণ্ঠৈবাস্তীতি ব্যজ্যতে।

---

হে হৃদয়! তুমি অভিলাষী হও; কারণ, এখন সন্দেহের স্থানে নিশ্চয় জন্মিয়াছে। যাহাকে তুমি অগ্নিস্বরূপ আশঙ্কা করিয়াছিলে, তাহা এই স্পর্শের যোগ্য রত্ন ॥৩০॥

(অ) শকুন্তলা। (ক্রোধের সহিতই যেন) অনসূয়া! আমি যাই।

अन। किं णिमित्तं ?। (ट)

शकु। इमं असम्बद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए गदुअ (१) णिवेदइस्सं। उत्तिष्ठति। (ठ)

अन। सहि! ण जुत्तं अस्समवासिणो जणस्स अकिदसक्कारं अदिधिविसेसं उज्झिअ सच्छन्ददो गमणं (२)। (ड)

(ट) किं निमित्तम् ?।

(ठ) इमामसम्बद्धप्रलापिनीं प्रियंवदाम् आर्य्यायै गौतम्यै गत्वा निवेदयिष्यामि।

(ड) सखि! न युक्तमाश्रमवासिनो जनस्य अकृतसत्कारमतिथिविशेषम् उज्झित्वा स्वच्छन्दतो गमनम्।

(ट) अनेति। किं निमित्तं गमिष्यसीति शेषः।

(ठ) शकु इति। असम्बद्धम् अप्रस्तुतत्वादनावश्यकत्वाच्च असंलग्नं प्रलपति अनर्थकं वदतीति ताम्। आर्य्यायै कण्वस्य धर्मभगिनीत्वान्मान्यायै। प्रियंवदाया असम्बद्धप्रलापित्वदोषं निवेदयिष्यामीत्यर्थः। शासनेन पुनस्तद्दोषनिवृत्त्यर्थमिति भावः।

(ड) अनेति। न कृतः सत्कारः खाद्यपेयदानादिभिः सेवा यस्य तम्, अतिथिविशेषमुत्तमातिथिम् एनं राजानमित्यर्थः, उज्झित्वा परित्यज्य, स्वच्छन्दतः स्वाभिप्रायमात्रतः, गमनं न युक्तं नोचितम्; आतिथ्यसम्पादनार्थं नियोगस्य नियमभङ्गप्रसङ्गादिति भावः।

"अभिप्रायश्छन्द आशयः" इत्यमरः।

(ট) অনসূয়া। কি জন্য ?।

(ঠ) শকুন্তলা। এই প্রিয়ংবদা যে অসংলগ্ন ও অনর্থক কথা বলে, তাহা যাইয়া আর্য্যা গোতমীকে জানাই। ( এই বলিয়া উঠিল। )

(१) गदुअ इति क्वचिन्नास्ति।

(२) अनसूया। सहि! ण जुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जिअ सच्छन्ददो गमणं।

শকু। উত্তরমদত্ত্বৈব প্রস্থিতা (১)।

রাজা। স্বগতম্। কথমিয়ং গচ্ছতি। জিঘৃক্ষুরিব পুনরিচ্ছাং নিগৃহ্য। অহো! চেষ্টানুরূপিণী কামিজনচিত্তবৃত্তিঃ। অহং হি—(২) (ঢ)

অনুযাস্যন্ মুনিতনয়াং সহসা বিনয়েন বারিতপ্রসরঃ।
স্বস্থানাদচলন্নপি গত্বেব পুনঃ প্রতিনিবৃত্তঃ ॥২১॥

(ঢ) রাজেতি। ইয়ং শকুন্তলা। কথংশব্দঃ সম্ভ্রমে। জিঘৃক্ষুরিব শকুন্তলাং গৃহীতুমিচ্ছুরিব। নিগৃহ্য বলান্নিবর্ত্ত্য। অহো আশ্চর্য্যম্। কামিজনস্য কামুক-লোকস্য চিত্তবৃত্তিঃ, চেষ্টানুরূপিণী বাহ্যকায়িকব্যাপারসদৃশী। যস্যাং যস্যামবস্থায়াং যথা যথা কায়িকব্যাপারো ভবিতুমর্হতি, মনোবৃত্তিরপি তস্যাং তস্যামবস্থায়াং তথা তথৈব ভবতীত্যর্থঃ। উক্তমর্থং সমর্থয়িতুমাহ অহং হীতি। হি যস্মাৎ।

"কথং হর্ষে চ গর্হায়াং প্রকারার্থে চ সম্ভ্রমে। প্রশ্নে সম্ভাবনায়াঞ্চ" ইতি মেদিনী।

অন্বিতি। মুনিতনয়াং শকুন্তলাম্, অনুযাস্যন্ তদ্দর্শনাদ্যাবেগাৎ অনুগমিষ্যন্, সহসা হঠাৎ, বিনয়েন শিক্ষয়া শিক্ষাজনিতধৈর্য্যেণেত্যর্থঃ, বারিতো নিবর্ত্তিতঃ প্রসরো

(ড) অনসূয়া। সখি! যাহার সেবা করা হয় নাই, এইরূপ উৎকৃষ্ট অতিথিকে পরিত্যাগ করিয়া, ইচ্ছানুসারে চলিয়া যাওয়া আশ্রমবাসী লোকের উচিত নহে।

শকুন্তলা। (উত্তর না দিয়াই চলিল

(ঢ) রাজা। (স্বগত) ইনি যাইতেছেন যে?। (যেন ধরিতে ইচ্ছা করিয়া, আবার সেই ইচ্ছাকে দমন করিয়া) কি আশ্চর্য্য! কামুক লোকের মনোবৃত্তি বাহিরের ঘটনার অনুরূপ। কারণ—

(১) শকুন্তলা। ন কিঞ্চিদুক্ত্বা প্রস্থিতৈব।

(২) রাজা। গৃহীতুমিচ্ছন্ নিগৃহ্যাত্মানম্। আত্মগতম্। অহো! চেষ্টা-প্রতিরূপিকা কামিজনমনোবৃত্তিঃ…।

প্রিয়ং। শকুন্তলামুপেত্য। হলা চণ্ডি! ণারিহসি গন্তুং (১)। (ক)

শকু। পরিবৃত্য সভ্রূভঙ্গম্। কিং ত্তি? (২)। (খ)

প্রিয়ং। দুবে মে রুক্খসেঅণকে ধারেসি, তেহিং দাব অত্তাণং মোআবেহি, তদো গমিস্সসি। ইতি বলান্নিবর্ত্তয়তি (৩)। (গ)

(ক) হলা চণ্ডি! নার্হসি গন্তুম্।

(খ) কিমিতি?।

বেগো যস্য সঃ; অতএব স্বস্থানাৎ অধ্যুষিতদেশাৎ, অচলন্নপি, গত্বা পুনঃ প্রতিনিবৃত্ত ইব জাতঃ। তথা চ যথা শকুন্তলায়া অনুগমনং পুনঃ প্রত্যাবর্ত্তনঞ্চ কায়িকব্যাপারঃ, তথা তস্যা গ্রহণেচ্ছা পুনস্তন্নিগ্রহশ্চ মনোবৃত্তিরিতি কামিজনচিত্তবৃত্তিস্বেচ্ছানুরূপিণ্যে-বেতি ভাবঃ।

অত্র ভাবাভিমানিনী বাচ্যা ক্রিয়োৎপ্রেক্ষালঙ্কারঃ। আর্য্যা জাতিঃ ॥৩১॥

(ক) প্রিয়মিতি। চণ্ডি! অতিকুপিতে!।

"চণ্ডস্ত্বত্যন্তকোপনঃ" ইত্যমরঃ।

(খ) শকু ইতি। ইতি মম নিবর্ত্তনম্, কিং কথং কৃতমিতি শেষঃ।

আমি মুনিকন্যা শকুন্তলার অনুগমন করিব, এমন সময় হঠাৎ ধৈর্য্য আসিয়া সে বেগ নিবারিত করিল। সুতরাং স্বস্থান হইতে না চলিয়াও, যাইয়াই যেন ফিরিয়া আসিলাম ॥৩১॥

(গ) প্রিয়ংবদা। (শকুন্তলার নিকটে যাইয়া) ওলো ক্রুদ্ধে! তুমি যাইতে পারিবে না।

(১) প্রিয়ংবদা। শকুন্তলা নিরুধ্য। হলা! ণ দে জুত্তং গন্তুং।

(২) শকুন্তলা। সভ্রূভেদম্। কিং ণিমিত্তং।

(৩) প্রিয়ংবদা। রুক্খসেঅণং দুবে ধারেসি মে। এহি দাব অত্তাণং মোআবেহি তদো গমিস্সসি। বলাদেনাং নিবর্ত্তয়তি।

राजा। भद्रे! वृक्षसेचनादेवात्रभवतीं परिश्रान्तां तर्कयामि। तथाह्यस्याः—(१) (द)

स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणा-
दद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
बद्धं कर्णशिरीषरोधि वदने घर्म्माम्भसा जालकं (२)
बन्धे स्रंसिनि चैकहस्तयमिताः पर्य्याकुला मूर्द्धजाः॥२२॥

(थ) द्वे मे वृक्षसेचनके धारयसि, ताभ्यां तावदात्मानं मोचय, ततो गमिष्यसि।

(थ) प्रियमिति। मे मह्यम्, द्वे वृक्षसेचनके वृक्षमूले जलसेकौ, धारयसि ऋणत्वेन गृहीतवत्यसि। तथा च पूर्व्वद्युरित्थं जातम्, यत्, वृक्षमूलेषु पञ्चाशत्संख्यके कुम्भजलसेके त्वया दातव्ये, अष्टचत्वारिंशत्संख्यकं जलसेकं दत्त्वैव एवमुक्तम्, "प्रियंवदे! अद्याहं परिश्रान्ततया अवशिष्टं वृक्षसेचनद्वयं न दातुमर्हामि, तत् त्वं देहि, दिनान्तरे तु तव देयं वृक्षसेचनद्वयमहं दत्त्वा तव तत् परिशोधयिष्यामि" तच्च मया दत्तम् इति। अतो द्वयोर्वृक्षसेचनयोः ऋणत्वेनैव ग्रहणमिति बोध्यम्। ताभ्यां वृक्षसेचनकाभ्यां सकाशात्, आत्मानं मोचय तत् द्वयं दत्त्वा मुक्तं कुरु।

(द) राजेति। अत्रभवतीं मुनिकन्यात्वेन मान्याम्। तर्कयामि सम्भावयामि। स्रस्तांसाविति। अस्याः शकुन्तलाया इति पूर्व्वगद्यस्थमत्रान्वेति। बाहू हस्तद्वयम्,

(त) শকুন্তলা। (ফিরিয়া ভ্রূভঙ্গের সহিত) এ কি?।

(থ) প্রিয়ংবদা। তুমি আমার নিকট দুইবার গাছে জল দেওয়া ধার, তাহা হইতে আপনাকে মুক্ত কর, তার পর যাইবে। (এই বলিয়া বলক্রমে নিবৃত্ত করিল।)

(দ) রাজা। ভদ্রে! গাছে জল দেওয়ার জন্যই ইনি পরিশ্রান্ত হইয়াছেন ইহা আমি মনে করি। কারণ—

(१) राजा। भद्रे। वृक्षसेचनादेव परिश्रान्तामत्रभवतीं लक्षये···।

(२) स्रस्तं कर्णशिरीषरोधि वदने घर्म्माम्भसां जालकम्।

তদহমেনামনৃণাং করোমি। ইত্যঙ্গুরীয়কং দদাতি (১)। (খ)

ঘটোৎক্ষেপণাৎ জলসেকায় তৎকুম্ভোত্তোলনাৎ হেতোঃ, অস্যাঃ ক্লান্ততয়া অবনতৌ অংসৌ স্কন্ধৌ যয়োস্তৌ, তথা অতিমাত্রং লোহিতৌ ঘটঘর্ষণাৎ রক্তবর্ণৌ তলে তলদ্বয়ং যয়োস্তৌ তাদৃশৌ জাতাবিতি শেষঃ। প্রমাণাধিকঃ স্বাভাবিকাদধিকীভূতঃ শ্বাসঃ, অদ্যাপি ইদানীমপি, স্তনয়োর্বেপথুং কম্পম্, জনয়তি। বদনে মুখমণ্ডলে, ঘর্ম্মাম্ভসা স্বেদজলেন, কর্ণয়োঃ শিরীষে শিরীষকুসুমদ্বয়ং রুণদ্ধি রোধনাৎ স্খলয়তীতি তৎ তথোক্তম্, জালকং বিন্দুসমূহঃ, বদ্ধং ধৃতম্ উৎপাদিতমিত্যর্থঃ। তথা বন্ধে বন্ধনে, স্রংসিনি স্খলিতে সতি, একহস্তেন হস্তান্তরস্য ঘটধারণে ব্যাপৃতত্বাদিতি ভাবঃ, যমিতা বদ্ধাঃ, মূর্দ্ধজাঃ কেশাশ্চ, পর্য্যাকুলাঃ বিষমাঃ স্থিতা ইতি শেষঃ।

অত্র শকুন্তলায়াঃ পরিশ্রান্তত্বসমর্থনকার্য্যং প্রতি বহুতরকারণানামুক্তত্বাৎ সমুচ্চয়োঽলঙ্কারঃ। অত্র স্বভাবোক্তিরলঙ্কার ইতি কেচিৎ প্রলপন্তি। তদসৎ, স্বভাবোক্তিমূলীভূতবৈচিত্র্যস্যাভাবাদিতি সহৃদয়সংবেদ্যম্।

শার্দ্দূলবিক্রীড়িতং বৃত্তম্ ॥৩২॥

(খ) তদিতি। তস্মাৎ। অনৃণাং প্রিয়ংবদায়া ঋণমুক্তাম্। শকুন্তলা খল্বিদমঙ্গুরীয়কং গৃহীত্বা প্রিয়ংবদায়া দ্বয়োর্বৃক্ষসেচনয়োঃ পরিশোধনার্থং তস্যৈ পুনর্দদাতু ইত্যাশয়ঃ।

বার বার ঘট উত্তোলন করায় ইহার হস্তযুগলের তলদ্বয় অত্যন্ত রক্তবর্ণ হইয়াছে এবং স্কন্ধদ্বয় নামিয়া পড়িয়াছে, প্রমাণের অপেক্ষায় অধিক শ্বাস এখনও স্তনকম্পন জন্মাইতেছে, ঘর্ম্মের জল মুখমণ্ডলে বিন্দুসমূহ জন্মাইয়াছে, তাহাতে কর্ণের শিরীষকুসুমদ্বয় অবরুদ্ধ হইতেছে এবং বন্ধন খুলিয়া গেলে বিক্ষিপ্ত কেশকলাপকে এক হস্তদ্বারা বাঁধিয়া রাখিয়াছেন ॥৩২॥

(খ) তা, আমি ইহাকে ঋণমুক্ত করি। (এই বলিয়া একটী অঙ্গুরী দান করিলেন।)

(১)…অঙ্গুরীয়ং দাতুমিচ্ছতি।

সখ্যৌ। প্রতিগৃহ্য নামাক্ষরাণি বাচয়িত্বা চ পরস্পরমবলোকয়তঃ (১)। (ন)

রাজা। অলমন্যথা সম্ভাবনয়া, রাজ্ঞঃ প্রতিগ্রহোঽয়ম্ (২)। (প)

প্রিয়ং। তেণ হি ণারিহদি এদং অঙ্গুলীঅঅং অঙ্গুলীবিওঅং। অজ্জস্স বঅণাদো জ্জেব অণিণা এসা ভোদু। (ফ)

(ফ) তেন হি নার্হতি ইদমঙ্গুরীয়কমঙ্গুলীবিয়োগম্। আর্য্যস্য বচনাদেব অনৃণা এষা ভবতু।

(ন) সখ্যাবিতি। প্রতিগৃহ্য শকুন্তলায়াঃ প্রতিনিধিভাবেন রাজ্ঞঃ সকাশাদঙ্গুরীয়কং গৃহীত্বা, নামাক্ষরাণি তস্মিন্নঙ্গুরীয়কে সমুৎকীর্ণান্ 'দুষ্মন্ত' ইতি নামবর্ণান্, বাচয়িত্বা পঠিত্বা। অকস্মাদেব ছদ্মনা মহারাজো দুষ্মন্ত এবায়মাগত ইতি বিস্ময়বিশেষসূচনার্থং পরস্পরাবলোকনম্।

(প) রাজেতি। অন্যথা সম্ভাবনয়া দুষ্মন্ত ইতি নামাক্ষরদর্শনেন প্রাক্ পরিচায়িতরাজপুরুষাদন্যপ্রকারেণ ময়ি নিরূপণয়া অলম্, 'দুষ্মন্ত' ইতি নামাক্ষরদর্শনেন দুষ্মন্ত এবাহমিতি নাবধারয়েত্যর্থঃ। ননু তর্হি কথং তদীয়নামাক্ষরাণীত্যাহ রাজ্ঞ ইতি। রাজ্ঞো দুষ্মন্তাদয়ম্ অঙ্গুরীয়পদার্থঃ প্রতিগ্রহঃ। তথা চ দুষ্মন্তেনেদং পুরস্কারায় দত্তং ময়া চ ততো গৃহীতমিতি রাজপুরুষ এবাহমিতি ভাবঃ।

(ফ) প্রিয়মিতি। তেন হি রাজ্ঞঃ প্রতিগ্রহত্বেনৈব হেতুনা। অঙ্গুলীবিয়োগম্ অস্যাঃ প্রদানেন ভবদঙ্গুলীবিচ্ছেদম্। স্বপুরস্কারপ্রখ্যাপনার্থং ভবদঙ্গুল্যামবস্থান-

(ন) সখীদ্বয়। (গ্রহণ করিয়া, নামের বর্ণগুলি পাঠ করিয়া, পরস্পর মুখ দর্শন করিতে লাগিল।)

(প) রাজা। অন্যরূপ মনে করিবেন না; ইহা রাজার নিকট হইতে প্রতিগৃহীত।

(১) উভে। নামমুদ্রাক্ষরাণ্যনুবাচ্য পরস্পরমবলোকয়তঃ। (২) রাজা। অলমন্যথা সম্ভাব্য। রাজ্ঞঃ পরিগ্রহোঽয়মিতি রাজপুরুষং মামবগচ্ছত।

অন। হলা সউন্তলে! মোআবিদাসি অণুকম্পিণা অজ্জেণ অহবা রাএসিণা। তা কহিং দাণিং গমিস্সসি (১)। (ব)

শকু। আত্মগতম্। ণ এদং জণং পরিহরিস্সং, জই অত্তণো পহবিস্সং (২)। (ভ)

(ব) হলা শকুন্তলে! মোচিতাসি অনুকম্পিনা আর্য্যেণ, অথবা রাজর্ষিণা। তৎ কস্মিন্নিদানীং গমিষ্যসি।

(ভ) নৈতং জনং পর্য্যহরিষ্যম্, যদ্যাত্মনঃ প্রাভবিষ্যম্।

---

মেবাস্য যুক্তমিতি ভাবঃ। আর্য্যস্য ভবতঃ, বচনাদেব 'অহমেনামনৃণাং করোমি' ইতি বাক্যাদেব। মহাজনবাক্যস্য অব্যর্থত্বাদিতি ভাবঃ।

(ব) অনেতি। অনুকম্পিনা দয়াকারিণা। নামাক্ষরদর্শনেন মহারাজদুষ্মন্তস্যৈব সন্দেহাদাহ রাজর্ষিণেতি। তৎ তস্মাৎ, কস্মিন্নিদানীং গমিষ্যসি; অতিথিভূতস্য রাজ্ঞঃ সেবামকৃত্বেতি শেষঃ। তথাত্বে চ মহাজনং প্রতি অবজ্ঞৈব সূচিতা স্যাদিতি ভাবঃ।

(ভ) শকু ইতি। পর্য্যহরিষ্যং পর্য্যত্যক্ষ্যম্। প্রাভবিষ্যং প্রভুর্নিয়ন্তা অভবিষ্যম্। তথা চ যদ্যহং স্বাধীনা অভবিষ্যম্, তদা এনমেব রাজানমবশ্যমেব পতিত্বেনাবরিষ্যমিতি সরলার্থঃ। পিতুরধীনতয়া তন্ন শক্যত ইতি মহদ্দুঃখমেবেতি ভাবঃ।

---

(ক) প্রিয়ংবদা। তাহা হইলে এই অঙ্গুরী আপনার অঙ্গুলীবিচ্ছিন্ন হইতে পারে না। আপনার বাক্যেই শকুন্তলা ঋণমুক্ত হউক।

(ব) অনসূয়া। ওলো শকুন্তলা! আর্য্য অথবা রাজর্ষি, দয়া করিয়া তোমাকে মুক্ত করিয়াছেন; তা এখন কোথা যাইবে?।

(১) প্রিয়ংবদা।...অরিণা দাণিং এসা। কিঞ্চিদ্বিহস্য। হলা সউন্তলে! মোইদাসি অণুকম্পিণা অজ্জেণ। অহবা মহারাএণ। গচ্ছ দাণিং।

(২) শকুন্তলা। আত্মগতম্। জই অত্তণো পহবিস্সং। প্রকাশম্। কা তুমং বিসজ্জিদব্বস্স রুন্ধিদব্বস্স বা।

প্রিয়ং। কিং দাণিং ণ গচ্ছীঅদি ? (১)। (ম)

শকু। দাণিং কিং তুহ আঅত্তহ্মি। জদো মে রোঅদি, তদো গমিস্সং (২)। (য)

রাজা। শকুন্তলাং বিলোকয়ন্নাত্মগতম্। কিং খলু যথা বয়মস্যাম্ ইয়মপি অস্মান্ প্রতি তথা স্যাৎ ?। অথবা লব্ধাবকাশা মে মনোবৃত্তিঃ। কুতঃ—(৩) (র)

(ম) কিমিদানীং ন গম্যতে ?।

(য) ইদানীং কিং তব আয়ত্তাস্মি ?। যতো মে রোচতে, ততো গমিষ্যামি।

অত্র নায়িকায়া অপি অনুরাগরূপবীজোদয়াৎ সমাধানং নাম মুখসন্ধেরঙ্গম্— "বীজস্যাগমনং যত্তু তৎ সমাধানমুচ্যতে" ইতি লক্ষণাৎ।

(ম) প্রিয়মিতি। শকুন্তলায়াঃ খলু বিকারো জাত ইত্যনুমায় সকৌতুকোক্তিরিয়ম্। অতএবাত্র পরিভাবনা নাম মুখসন্ধেরঙ্গম্। যথা দর্পণে—

"কুতূহলোত্তরা বাচঃ প্রোক্তা তু পরিভাবনা।"

ন চ বিধানাখ্যমঙ্গমতিক্রম্য প্রাক্ পরিভাবনাখ্যাঙ্গনিবেশে "বিধানং পরিভাবনা" ইতি দর্পণোক্তপাঠক্রমবাধ ইতি বাচ্যম্ উপক্ষেপ-পরিকর-পরিন্যাসাখ্যমঙ্গত্রয়ং লক্ষয়িত্বা "এতানি চাঙ্গানি উক্তেনৈব পৌর্বাপর্য্যেণ ভবন্তি অঙ্গান্তরাণি তু অন্যথাপি" ইতি দর্পণকৃতৈবাভিহিতত্বাৎ।

(ভ) শকুন্তলা। (স্বগত) যদি আমি নিজের প্রভু হইতাম, তবে ইঁহাকে পরিত্যাগ করিতাম না।

(ম) প্রিয়ংবদা। এখন যাও না কেন ?।

(য) শকুন্তলা। এখন আমি কি তোমার অধীন ?। যখন আমার ইচ্ছা হইবে তখন যাইব।

(১) ক্বচিদয়ং পাঠো নাস্তি। (২) কুত্রচিদেষ পাঠোঽপি ন দৃশ্যতে।

(৩) রাজা।...বিলোক্য।... এবমিয়মপ্যস্মান্ প্রতি স্যাৎ।... মে প্রার্থনা।

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे ।
कामं न तिष्ठति मदाननसम्मुखीयं (१)
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः ॥२२॥

(य) शकु इति । आयत्ता अधीना । यतो यदा । ततस्तदा ।

(र) राजेति । अस्यां शकुन्तलायाम्, यथा सञ्जातानुरागाः । इयं शकुन्तलापि । तथा उत्पन्नानुरागा स्यात् किम् । लब्धावकाशा 'इयं मयि अनुरक्तैव जाता' इति भावस्थाना ।

अत्र तथा स्यादित्यन्तेन सन्देहात् दुःखम्, अथवेत्यादिना तु अनुरागनिश्चयात् सुखमिति विधानं नाम मुखसन्ध्यङ्गम्—"सुखदुःखकृतो योऽर्थस्तद्विधानमिति स्मृतम्" इति लक्षणात् ।

वाचमिति । इयं शकुन्तला, यद्यपि मद्वचोभिर्मम वाक्यैः सह, वाचं निजवाक्यम्, न मिश्रयति न सम्मेलयति, मया सार्द्धं साक्षात् नालपतीत्यर्थः ; तथापि मयि भाषमाणे यत् किञ्चित् वदति सति, अवहिता तद्विषये कृतमनोयोगा सती, कर्णं ददाति निक्षिपति । तथा यद्यपि मदाननसम्मुखी मन्मुखाभिमुखी सति, कामं यथेष्टं यथा स्यात्तथा, न तिष्ठति ; तथापि तु अस्याः शकुन्तलायाः, दृष्टिः, भूयिष्ठं बाहुल्यं यथा स्यात्तथा, अन्यो मद्भिन्नो विषयो यस्याः सा तादृशी न । अतएव कार्य्यभूतधूमदर्शनात् कारणभूतवह्नेरनुमानमिव कार्य्यभूतमनोयोगमद्वाक्यश्रवणावगमात् कार्य्यभूतविषयान्तरदृष्ट्यदानदर्शनाच्च कारणभूतस्य मदनुरागस्यानुमानमुपपद्यत एवेति भावः ।

अत्र अनुरागोत्पत्तिसमर्थनकार्य्यं प्रति कारणद्वयोपन्यासात् समुच्चयोऽलङ्कारः ।

(র) রাজা। (শকুন্তলার প্রতি দৃষ্টিপাতকরতঃ স্বগত) আমি ইহার প্রতি যেমন হইয়াছি, ইনিও কি আমার প্রতি সেইরূপ হইবেন ?। অথবা আমার মনোবৃত্তি স্থান পাইয়াছে। কারণ—

---

(१) मदाननसम्मुखीना ।

नेपथ्ये। भो भोस्तपस्विनः! तपोवनसन्निहितसत्त्वरक्षणाय सज्जीभवन्तु भवन्तः, प्रत्यासन्नः किल मृगयाविहारी राजा दुष्मन्तः (१)। (ल)

न च यद्यपीत्यभिधाय तथापीत्यनभिधानात् न्यूनपदत्वदोष इति वाच्यम्, तथापीत्यस्य सामर्थ्यादेवागमात् ईदृशविषय एव दर्पणे "क्वचिन्न दोषो न गुणः" इत्यभिधानात्।

"कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सितम्" इत्यमरः।

मिश्रं करोतीति मिश्रयति "इन्कारितं धात्वर्थे" इतीन्। वसन्ततिलका वृत्तम्॥३३॥

(ल) नेपथ्य इति। तपोवने सन्निहितानामवस्थितानां सत्त्वानां हरिणादिजन्तूनां रक्षणाय, सज्जीभवन्तु उद्यता भवन्तु। कथमित्याह—मृगयार्थं पशुहिंसार्थं विहरति विचरतीति मृगयाविहारी। प्रत्यासन्नः सन्निहितो जातः। किलेति लोकवार्त्तायाम्।

चूलिका नाम अर्थोपक्षेपकोऽयम्। यथा दर्पणे—

"अन्तर्यवनिकासंस्थैः सूचनार्थस्य चूलिका।"

"सत्त्वमस्त्री तु जन्तुषु" इत्यमरः।

मृग्यते अन्विष्यते इति मृगया, "मृग अन्वेषणे" इति चौरादिकस्वार्थेनन्तात् मृगधातोः "धातुसम्बन्धभिदादिभ्यस्त्वङ्" तत्र च संज्ञापूर्वकविधेरनित्यत्वात् कारितलोपाभावः गणपाठ-सामर्थ्याच्च गुणः। तथा च तत्रोक्तम्—"गुणवृद्ध्यादिकमर्थाविशेषय गणपाठसामर्थ्यात्।"

যদিও ইনি আমার বাক্যের সহিত নিজের বাক্য মিশাইতেছেন না; তথাপি আমি বলিতে লাগিলে ইনি একাগ্রচিত্ত হইয়া কাণ দেন এবং যদিও ইনি আমার মুখের সম্মুখী হইয়া অধিক থাকেন না; তথাপি ইঁহার দৃষ্টি অন্য বিষয়ে বেশী যায় না ॥৩৩॥

(ল) নেপথ্যে। ওহে ওহে তপস্বিগণ! আপনারা তপোবনস্থ-প্রাণিগণের রক্ষার নিমিত্ত সজ্জীভূত হউন; কারণ, মৃগয়াবিহারী রাজা দুষ্মন্ত সন্নিহিত হইয়াছেন।

---

(१)…सन्निहितास्तपोवनसत्त्वरक्षायै भवत।…पार्थिवः।

तुरग-खुर-हतस्तथाहि रेणु-विटप-विषक्त-जलार्द्र-वल्कलेषु ।
पतति परिणतारुणप्रकाशः शलभसमूह इवाश्रमद्रुमेषु ॥२४॥

राजा । (स्वगतम्) अहो धिक्! ममान्वेषिणः सैनिकास्तपोवनमभिरुन्धन्ति (१)। (व)

तुरगेति । "तथाहि तमेवार्थं जानीहि" इति कातन्त्रपरिशिष्टटीकायां गोपीनाथः । तुरगाणां दुष्मन्तसैन्यान्तर्गतघोटकानाम्, खुरैर्हत उत्थापितः, परिणतः अस्तगमनपूर्वकालीनः यः अरुणः सूर्य्यः तस्य प्रकाश इव प्रकाशः प्रभा यस्य स तथोक्तः लोहितवर्ण इत्यर्थः । एतेन गैरिकस्थानोत्थितत्वं रेणोः सूचितम् । रेणुः धूलिः शलभसमूह इव पतङ्गनिकर इव, पतङ्गानामपि पक्षलौहित्येन लोहित्यप्रायत्वादिति द्रष्टव्यम् । विटपेषु शाखासु विषक्तानि संलग्नानि जलार्द्राणि स्नानानन्तरतज्जलशोषणाय विषक्तत्वात् जलस्तिमितानि वल्कलानि येषां तेषु, आश्रमद्रुमेषु तपोवनतरुषु, पतति उड्डीय संलगति । वाताभावेन तदुत्थापितत्वासम्भवात् तुरगान्तराणाञ्चासम्भवात् एतद्देशस्य दुष्मन्ताधिकृततया दुष्मन्ततुरगखुरहत एवायं रेणुरिति स एव मृगयार्थमागत इति तपोवनसत्त्वरक्षणाय सज्जीभवन्तु भवन्त इति भावः ।

अत्र परिणतारुणप्रकाश इति लुप्तोपमा, शलभसमूह इवेति च श्रौतोपमा, अनयोश्च परस्परनिरपेक्षतया संसृष्टिरलङ्कारः ।

पुष्पिताग्रा वृत्तम्—"अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥२४॥

(व) राजेति । अहो इति विषादे । धिगिति निन्दायाम् । तपोवनावरोधाय

তাহাই দেখুন, অশ্বখুরোত্থাপিত অস্তগমনের পূর্ব্বকালীন সূর্য্যের ন্যায় রক্তবর্ণ ধূলিসমূহ পতঙ্গসমূহের ন্যায় আশ্রমের বৃক্ষসমূহে পতিত হইতেছে, যে সকল বৃক্ষের শাখায় জলস্তিমিত বল্কল সকল সংলগ্ন করিয়া রাখা হইয়াছিল ॥২৪॥

(१) अयं पाठो विद्यासागरेण परित्यक्तः ।

পুনর্নেপথ্যে। ভো ভোস্তপস্বিনঃ! পর্য্যাকুলয়ন্ বৃদ্ধ-স্ত্রী-কুমারান্ এষ গজঃ প্রাপ্তঃ (১)। (শ)

তীব্রাঘাতাদভিমুখতরুস্কন্ধভগ্নৈকদন্তঃ
প্রৌঢ়াকৃষ্টব্রততিবলয়াসঙ্গনাজ্জাতপাশঃ।
মূর্ত্তো বিঘ্নস্তপস ইব নো ভিন্নসারঙ্গযূথো
ধর্ম্মারণ্যং বিশতি গজঃ স্যন্দনালোকভীতঃ (২) ॥৩৫॥

প্রাগেব সৈন্যানাং নিষেধাকরণাৎ অবিমৃষ্যকারিতয়া আত্মানং নিন্দামীত্যর্থঃ। অভিরুন্ধন্তি পরিবেষ্টন্তে পরিবেষ্ট্য পীড়য়ন্তীত্যর্থঃ।

"অহো ধিগর্থে শোকে চ করুণার্থবিষাদয়োঃ। সম্বোধনে প্রশংসায়াং বিস্ময়ে পাদপূরণে ॥ অসূয়ায়াং বিতর্কে স্যাৎ" ইতি মেদিনী।

(শ) পুনরিতি। পর্য্যাকুলয়ন্ ত্রাসেন ব্যতিব্যস্তান্ কুর্ব্বন্। প্রাপ্ত উপস্থিতঃ।

তীব্রেতি। তীব্রাঘাতাৎ দৃঢ়প্রহারাৎ, অভিমুখস্য সম্মুখবর্ত্তিনঃ তরোর্বৃক্ষস্য স্কন্ধে প্রকাণ্ডদেশে ভগ্ন একো দন্তো যস্য স তথোক্তঃ প্রৌঢ়মত্যন্তং যথা স্যাত্তথা আকৃষ্টং যৎ ব্রততিবলয়ং লতামণ্ডলং তস্য আসঙ্গনাৎ সম্বন্ধত্বাৎ জাতঃ পাশো বন্ধনং যস্য সঃ; ভিন্নং ভয়োৎপাদনেন পৃথক্ কৃতং সারঙ্গযূথং হরিণশ্রেণির্যেন সঃ; তথা স্যন্দনালোকাৎ রাজসৈন্যগতরথদর্শনাৎ ভীতঃ, মূর্ত্তো মূর্ত্তিমান্ তপসো বিঘ্ন ইব, ত্রাসোৎপাদনেন তপো-

(শ) রাজা। (স্বগত) হায়! আমার অন্বেষণকারী সৈন্যগণ আসিয়া তপোবন অবরোধ করিয়াছে।

(শ) আবার নেপথ্যে। ওহে ওহে তপস্বিগণ! বালক, বৃদ্ধ ও স্ত্রীলোকদিগকে আকুল করতঃ এই একটা হাতী উপস্থিত হইয়াছে।

(১) এষ পাঠোঽপি বিদ্যাসাগরেণ পরিহৃতঃ।

(২) তীব্রাঘাতপ্রতিহততরুঃ স্কন্ধলগ্নৈকদন্তঃ পাদাকৃষ্টব্রততিবলয়াসঙ্গসঞ্জাতপাশঃ। ...ধর্ম্মারণ্যং প্রবিশতি গজঃ...।

সর্ব্বাঃ। শ্রুত্বা সসম্ভ্রমমুত্তিষ্ঠন্তি (১)। (ঘ)

রাজা। স্বগতম্‌। অহো ধিক্‌! কথমপরাদ্ধস্তপস্বিনামস্মি। ভবতু, প্রতিগচ্ছামি তাবৎ (২)। (ঙ)

ভঙ্গকরণাদিতি ভাবঃ, গজঃ কশ্চিৎ বন্যহস্তী, নঃ অস্মাকম্‌, ধর্ম্মারণ্যং তপোবনম্‌, বিহৃজতি উৎপীড়য়তি।

অত্র বাচ্যা ভাবাভিমানিনী বিঘ্নস্বরূপোৎপ্রেক্ষালঙ্কারঃ। তথা বিহৃজতি গজ ইত্যনেনৈব বাক্যসমাপ্তৌ পুনর্গজ ইত্যস্য বিশেষণতয়া স্যন্দনালোকভীত ইত্যস্যোপাদানাৎ "পতন্তি শশিনঃ পাদা ভাসয়ন্তঃ ক্ষমাতলম্‌" ইতি দর্পণোদাহৃতবৎ সমাপ্তপুনরাত্ততাদোষঃ; স চ 'বিহৃজতি রথালোকভীতঃ করীন্দ্রঃ' ইতি পাঠেন সমাধেয়ঃ।

মন্দাক্রান্তা বৃত্তম্‌ ॥২৫॥

(ঘ) সর্ব্বা ইতি। সসম্ভ্রমং সত্বরম্‌, উত্তিষ্ঠন্তি গৃহগমনায়েতি শেষঃ।

(ঙ) রাজেতি। অহো ধিগিতি পূর্ব্ববদেব ব্যাখ্যানম্‌। তপস্বিনাং সমীপ ইতি শেষঃ, অপরাদ্ধঃ অপরাধী অস্মি, বিনা কারণং ক্ষতিকরণাদিতি ভাবঃ। ভবতু তদপরাদ্ধত্বমিতি শেষঃ। প্রতিগচ্ছামি সৈন্যান্তিকমেব প্রত্যাবর্ত্তে; তন্নিবর্ত্তনায়েত্যাশয়ঃ।

তীব্র আঘাত করায় সম্মুখবর্ত্তী বৃক্ষের স্কন্ধদেশে একটী দন্ত ভগ্ন হইয়া রহিয়াছে, গুরুতর আকর্ষণ করায় বলয়াকারে লতা সংলগ্ন হইয়াছে বলিয়া চরণে বন্ধন হইয়া পড়িয়াছে এবং হরিণসমূহকে বিচ্ছিন্ন করিয়াছে; এই অবস্থায় হাতীটা রথদর্শনে ভীত হইয়া, তপস্যার মূর্ত্তিমান্‌ বিঘ্নের ন্যায় আমাদের তপোবন উৎপীড়িত করিতেছে ॥৩৫॥

(ঘ) সকলে। (শুনিয়া গাত্রোত্থান করিল।)

(ঙ) রাজা। (স্বগত) হায়! আমি তপস্বীদিগের নিকটে অপরাধী হইলাম। হউক, ফিরিয়া যাইয়া দেখি।

(১) সর্ব্বাঃ। কর্ণং দত্ত্বা কিঞ্চিদিব সংভ্রান্তাঃ।

(২) রাজা। আত্মগতম্‌। অহো ধিক্‌! পৌরা অস্মদন্বেষিণস্তপোবনমুপরুন্ধন্তি। ভবতু, প্রতিগমিষ্যামস্তাবৎ।

সখ্যৌ। মহাভাঅ! ইমিণা হত্থিসম্ভমেণ পজ্জাউলা ম্হ। তা অণুজাণীহি ণো উড়অগমণে (১)। (ছ)

অন। শকুন্তলাং প্রতি। হলা সউন্তলে! পজ্জাউলা অজ্জা গোদমী ভবিস্সদি, তা এহি সীগ্‌ঘং একত্থা হোম্হ (২)। (জ)

শকু। গতিরোধং রূপয়িত্বা। হদ্ধী হদ্ধী! ঊরুত্থম্ভবিব্‌ভম্‌লম্হি সংবুত্তা (৩)। (ক)

(ছ) মহাভাগ! অনেন হস্তিসম্ভ্রমেণ পর্য্যাকুলাঃ স্মঃ। তদনুজানীহি নঃ উটজগমনে।

(জ) হলা শকুন্তলে! পর্য্যাকুলা আর্য্যা গৌতমী ভবিষ্যতি, তদেহি শীঘ্রমেকত্রা ভবামঃ।

(ক) হাধিক্‌ হাধিক্‌! ঊরুস্তম্ভবিহ্বলাস্মি সংবৃত্তা।

(ছ) সখ্যাবিতি। হস্তিনঃ সম্ভ্রমেণ সর্ব্বেণ উপদ্রবেণেত্যর্থঃ; পর্য্যাকুলা ব্যতিব্যস্তাঃ। নঃ অস্মান্‌। উটজগমনে পর্ণশালায়াং গমনে।

(জ) অনেতি। পর্য্যাকুলা অস্মাকং বৃত্তান্তমপ্রাপ্য উদ্বিগ্নচিত্তা। একত্রা উটজরূপৈকস্থানস্থিতাঃ।

(ক) শকু ইতি। গতিরোধং গমনব্যাঘাতম্‌. রূপয়িত্বা অভিনীয়। হাধিগিত্যা-

(ছ) সখীদ্বয়। মহাশয়! আমরা এই হস্তীর উপদ্রবে পর্য্যাকুল হইয়া পড়িয়াছি। সুতরাং পর্ণশালায় যাইবার জন্য আমাদিগকে অনুমতি করুন।

(জ) অনসূয়া। (শকুন্তলার প্রতি) ওলো শকুন্তলা! আর্য্যা গৌতমী ব্যস্ত হইবেন, তা আইস আমরা সকলে শীঘ্র একত্র হই।

(১) অনসূয়া। অজ্জ! ইমিণা আরণ্ণঅবুত্তন্তেণ পজ্জাউলা ম্হ। অণু-জাণাহি ণো উড়অগমণস্স।

(২) অয়ং পাঠঃ ক্বচিন্নাস্তি। (৩) এষ পাঠোঽপি ক্বচিন্ন দৃশ্যতে।

राजा। स्वैरं स्वैरं गच्छन्तु भवत्यः। आश्रमबाधा यथा न भवति, तथाहमपि यतिष्ये (१)। (ख)

सख्यौ। महाभाअ! विदिदभूइट्ठोसि। सम्पदं उवआरमज्झत्थदाए अवरद्ध ह्म ; तं मरिसेहि, असम्भाविदसक्कारं भूओ वि पच्चवेक्खणणिमित्तं अज्जं विण्णवेह्म (२)। (ग)

---

(ग) महाभाग! विदितभूयिष्ठोऽसि। साम्प्रतमुपचारमध्यस्थतया अपराद्धाः स्मः; तन्मर्षय, असम्भावितसत्कारं भूयोऽपि प्रत्यवेक्षणनिमित्तमार्य्यं विज्ञापयामः।

---

मेवाव्ययं विश्रमविषादसूचकम्, तस्यातिशये द्विरुक्तिः। एकस्मिन् स्थाने बहुकालं यावदेकभावेनावस्थाने रक्तादीनां गमनागमनबन्धात् अङ्गानां स्तम्भो भवतीति सर्व्वेषामेवानुभवविषयः। शकुन्तलाया अपि तत्रैकभावेनोपवेशनात् ऊरुस्तम्भ इति बोध्यम्। ऊरुस्तम्भेन विह्वला व्याकुला। इतः शीघ्रगमनमावश्यकम्, इतश्च ऊरुस्तम्भात् चरणौ न चलतीति हेतोरिति भावः।

(ख) राजेति। स्वैरं स्वैरं मन्दं मन्दम्। तथा च इदानीमपि द्रुतगमनं प्रति न किञ्चित् कारणमुपस्थितमिति भावः। तत्र हेतुमाह आश्रमेति।

"मन्दस्वच्छन्दयोः स्वैर"मित्यमरः।

(ग) सख्याविति। महान् भागो भाग्यं यस्य तत्सम्बोधनम्। विदितमवगतं

(क) शकुन्तला। (গতিরোধ অভিনয় করিয়া) হায়! হায়! উরুস্তম্ভবশতঃ আমি বিহ্বলা হইয়াছি।

(খ) রাজা। আপনারা ধীরে ধীরে গমন করুন। যাহাতে আশ্রমের ক্ষতি না হয়, আমিও সেইভাবে চেষ্টা করিব।

---

(१) राजा। अवधानम्। गच्छन्तु भवत्यः। वयमप्याश्रमपीड़ा यथा न भवति, तथा प्रयतिष्यामहे। सर्व्वे उत्तिष्ठन्ति।

(२) सख्यौ। अज्ज! असम्भाविदअदिहिसक्कारा भूओ पेक्खणणिमित्तं लज्जेमो विण्णविदुं।

রাজা। মা মৈবম্। দর্শনেনৈব ভবতীনাং সম্ভূত-সৎকারোঽস্মি (১)। (ঘ)

শকু। হলা অণসূএ! অহিণব-কুস-সূই-পরিক্খদং মে চলণং, কুরবঅ-সাহা-পরিলগ্গং চ বক্কলং, দাব পরিবালেধ মং জাব ণং মোআবেমি। ইতি রাজানমবলোকয়ন্তী সব্যাজং বিলম্ব্য সহ সখীভ্যাং নিষ্ক্রান্তা। (ঙ)

---

ভূয়িষ্ঠং বহুলম্ অস্মাকমাচারমনোভাবাদির্যেন সঃ। এতেন শকুন্তলায়া অপি মনোভাবাবগমাৎ পুনরপি তবাগমনমাবশ্যকমেবেতি সূচিতম্। উপচারে ভবতঃ সৎকারে মধ্যস্থতয়া উদাসীনতয়া, অপরাদ্ধাঃ অপরাধিন্যঃ স্মো বয়মিতি শেষঃ; অবশ্যকর্ত্তব্যাকরণাদিতি ভাবঃ। তৎ অপরাদ্ধত্বম্, মর্ষয় ক্ষমস্ব। অসম্ভাবিতঃ অস্মাভিরনিষ্পাদিতঃ সৎকারঃ সেবা যস্য সঃ। অতএব ভূয়ঃ পুনরপি প্রত্যবেক্ষণনিমিত্তং সন্দর্শনার্থম্। দর্শনদানায় সৎকারলাভায় চ ভবতা পুনরপ্যত্রাগন্তব্যমিতি প্রার্থয়াম ইতি তাৎপর্য্যম্।

(ঘ) রাজেতি। এবম্ অসম্ভাবিতসৎকারত্বম্, মা মা ন খলু ন খলু জাতমিতি শেষঃ। তত্র হেতুমাহ দর্শনেনৈবেত্যাদি। সম্ভূতসৎকারঃ সঞ্জাতসৎকারঃ। তথা চ প্রীতিকরো ব্যাপারো নাম সৎকারঃ। তেন চ ভবতীনাং দর্শনেন ঈদৃশী মে প্রীতিঃ কৃতা, যথা ব্যাপারান্তরেণ তাদৃশী কর্ত্তুং ন শক্যতে। এবঞ্চ সৎকারাকরণাৎ যদপরাদ্ধত্বমাত্মনামুদ্ঘোষিতং তদপি ন জাতমিত্যাশয়ঃ।

---

(গ) সখীদ্বয়। মহাশয়! বহুতর জানিয়াছেন। আপনার সেবায় ঔদাসীন্য করায় এখন আমরা অপরাধী হইয়াছি; তা ক্ষমা করুন। আপনার সেবা করা হয় নাই বলিয়া আবারও দর্শনদানের জন্য আপনাকে জানাইতেছি।

(ঘ) রাজা। না না; এরূপ হয় নাই। আপনাদের দর্শনেই আমার সৎকার হইয়াছে।

---

(১)···ভবতীনাং পুরস্কৃতোঽস্মি।

राजा । (निश्वस्य ।) गताः सर्वाः । भवतु, अहमपि गच्छामि शकुन्तलादर्शनादेव मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकानतिदूरे तपोवनस्य निवेशयामि । न खलु शक्तोऽस्मि शकुन्तलादर्शनव्यापारादात्मानं निवर्त्तयितुम् । मम हि—(१) (च)

(ङ) हला अनसूये ! अभिनव कुश-सूचि-परिक्षतं मे चरणम्, कुरुवक-शाखा-परिलग्नञ्च वल्कलम् । तावत् प्रतिपालयत मां, यावदेनं मोचयामि ।

(ङ) शकु इति । अभिनवस्य कुशस्य सूच्या अग्रभागेन परिक्षतम् । वल्कलञ्च परिहितवल्कलञ्च, कुरुवकस्य वृक्षविशेषस्य शाखायां परिलग्नम् असावधानतया संसक्तम् । प्रतिपालयत प्रतीक्षेथाम् । एनं वल्कलम । व्याजेन वल्कलमोचनच्छलेन सहैव सव्याजम । एतेन राजानं प्रति महाननुरागो व्यज्यते ।

अतएवात्र अनुरागरूपस्य वीजस्य पुनरुत्पत्तेरुद्भेदो नाम मुखसन्धेरङ्गम्—"वीजार्थस्य प्ररोहः स्यादुद्भेदः" इति लक्षणात् ।

(च) राजेति । भवतु सर्वासामेव गमनमिति शेषः । अत्र तु निवारणोपाय एव नास्तीति भावः । अहमपि गच्छामि, अत्रावस्थानस्य निष्फलत्वादित्याशयः । मन्द-मन्दीभूतम् औत्सुक्यम् उद्योगो यस्य सः, नगरगमनं प्रति राजधान्यां गमनविषये अत्रावस्थाने

(ঙ) শকুন্তলা। ওলো অনসূয়া! নূতন কুশাগ্রে আমার চরণ ক্ষত হইয়াছে এবং বল্কলখানি কুরুবকশাখায় লাগিয়া পড়িয়াছে; তা আমার জন্য প্রতীক্ষা কর, যাবৎ ইহা মুক্ত করি। ( এই বলিয়া রাজাকে দেখিতে দেখিতে কপটতাবশতঃ বিলম্ব করিয়া, সখীদ্বয়ের সহিত চলিয়া গেল। )

(१) राजा । मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावदनुयात्रिकान् समेत्य नातिदूरेण तपोवनस्य निवेशयेयम् । न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्त्तयितुम् । मम हि ।

গচ্ছতি পুরঃ শরীরং ধাবতি পশ্চাদসংস্থিতং চেতঃ।
চীনাংশুকমিব কেতোঃ প্রতিবাতং নীয়মানস্য ॥৩৬॥

যদি শকুন্তলাং লভেয়মিত্যাশয়েত্যভিপ্রায়ঃ। যাবৎ সর্বান্। "যাবত্তাবচ্চ সাকল্যেঽবধৌ মানেঽবধারণে" ইত্যমরঃ। অনুযাত্রিকান্ অনুচরান্। নিবেশয়ামি স্থাপয়ামি; আশ্রমবাধানিবৃত্ত্যর্থমিতি ভাবঃ।

অতএবাত্র করণং নাম মুখসন্ধ্যঙ্গম্—"করণং পুনঃ। প্রকৃতার্থসমারম্ভঃ" ইতি লক্ষণাৎ।

পুনরনুরাগাবস্থাং ব্যনক্তি ন খল্বিতি। আত্মানং মনঃ। অনুরাগাকর্ষস্য দুর্নিবারত্বাদিত্যাশয়ঃ।

গচ্ছতীতি। মমেতি প্রাগুক্তমত্রান্বেতি। তথা চ মম শরীরম্, পুরঃ অগ্রতো গচ্ছতি, তপোবনস্যাতিদূরে অনুযাত্রিকাণাং নিবেশনার্থমিতি ভাবঃ। কিন্তু, প্রতিবাতং বায়োঃ প্রতিকূলং বাতাভিমুখং যথা স্যাত্তথা, নীয়মানস্য কেতোর্ধ্বজস্য, চীনাংশুকম্ উপরিবদ্ধং রাঙ্কবং বস্ত্রমিব তৎপতাকৈবেত্যর্থঃ, অসংস্থিতম্ অস্থিরং চঞ্চলমিতি যাবৎ, চেতশ্চিত্তম্, পশ্চাদ্দিশি ধাবতি বেগেন গচ্ছতি; শকুন্তলারূপাদিভিঃ সমাকর্ষণাদিত্যাশয়ঃ। যথা ধ্বজদণ্ডে বাতাভিমুখং নীয়মানে, তদীয়পতাকা বায়ুনা পশ্চাদ্দিশি চাল্যতে; তথা শরীরে অনুযাত্রিকাভিমুখং নীয়মানেঽপি মনঃ শকুন্তলানুরাগেণ তাং প্রতি পশ্চাদ্দিশি চাল্যত ইতি সকলার্থঃ।

অত্র শ্রৌতোপমালঙ্কারঃ। গচ্ছতি পুরঃ শরীরমিত্যনন্তরং সামর্থ্যাদেব কিন্ত্বর্থাবগমো ভবতীতি তদনুক্তাবপি ন ন্যূনপদত্বদোষঃ "ক্বচিন্ন দোষো ন গুণঃ" ইতি দর্পণাভিধানাৎ।

(চ) রাজা। (নিশ্বাস ত্যাগ করিয়া) সকলেই গেল। হউক, আমিও যাই। শকুন্তলার দর্শনবশতই রাজধানীতে যাইতে মন্দোৎসাহ হইয়াছি। অনুচরদিগকে তপোবনের অতিদূরে সংস্থাপিত করি। শকুন্তলার দর্শনব্যাপার হইতে আপনাকে নিবৃত্ত করিতে সমর্থ হইতেছি না। কারণ—

ইতি নিষ্ক্রান্তাঃ সর্ব্বে (১)। (ছ)

# প্রথমোঽঙ্কঃ ॥০॥ (জ)

"চীনো দেশে ব্রতন্তুষু। স্ত্রীহী বস্ত্রে" ইতি হেমচন্দ্রঃ। তেন চ চীননির্ম্মিতমংশুকং চীনাংশুকম্ ইতি মধ্যপদলোপী সমাসঃ।

আর্য্যা জাতিঃ ॥৩৬॥

(ছ) ইতীতি। ইতি ইত্যুক্তা পরম্। রাজ্ঞঃ কেচন শরীররক্ষিণ আসন্নেবেতি মন্তব্যম্, তে চ তদানীং দূরে অবস্থিতাঃ, তৈঃ সহ রাজ্ঞো বহুত্বাৎ বহুবচনং সর্ব্বশব্দোপাদানঞ্চ সঙ্গচ্ছতে।

পূর্ব্বং শকুন্তলাদীনাম্ ইদানীঞ্চ রাজ্ঞঃ প্রস্থানেন সংহতিভেদনাৎ ভেদো নাম মুখসন্ধ্যঙ্গম্—"ভেদঃ সংহতিভেদনম্" ইতি দর্পণলক্ষণাৎ।

(জ) প্রথম ইতি। অঙ্কঃ পরিচ্ছেদঃ সমাপ্ত ইতি শেষঃ।

"প্রত্যক্ষনেতৃচরিত" ইত্যাদি "অন্তনিষ্ক্রান্তনিখিলপাত্রোঽঙ্কঃ" ইত্যন্তমঙ্কলক্ষণং সাহিত্যদর্পণে অনুসন্ধেয়ম্।

"অঙ্কঃ স্থানেঽন্তিকে মন্তৌ রূপকাত্মঙ্গলক্ষ্মসু। নাটকাদিপরিচ্ছেদে চিত্রযুদ্ধে চ ভূষণে ॥" ইতি বিশ্বঃ। এবমন্যত্রাপি বোধ্যম্।

ইতি মহামহোপাধ্যায়-ভারতাচার্য্য শ্রীহরিদাসসিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াম্ অভিজ্ঞানশকুন্তলটীকায়ামভিজ্ঞানকৌমুদ্যাং প্রথমাঙ্কবিবরণং সমাপ্তম্ ॥০॥

---

যেমন বায়ুর প্রতিকূলে ধ্বজ সঞ্চালিত করিলে, তাহার পতাকা পিছনের দিকে যায়, সেইরূপ আমার শরীর সম্মুখে যাইতেছে; কিন্তু অস্থির চিত্ত পিছনের দিক্ দৌড়াইতেছে ॥৩৬॥

(ছ) (ইহার পর সকলেই চলিয়া গেল।)

## (জ) প্রথম অঙ্ক ॥০॥

---

(১) ক্বচিৎ ইতিশব্দো নাস্তি।

# द्वितीयोऽङ्कः ।

—०:*:०—

ततः प्रविशति विदूषकः (१) । (क)

(क) तत इति । शृङ्गारिनायकस्य सहायविशेषो विदूषकः । तथा च साहित्यदर्पणे—

"शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः ।
भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः ॥"

विदूषकस्य लक्षणमपि तत्रैव । यथा—

"कुसुमवसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्म्मज्ञः ॥"

इतः प्रभृति तृतीयाङ्कगत-'स्पृष्टा जनेन समदुःखसुखेन बाला' इत्यादिश्लोकात् पूर्वपर्य्यन्तः प्रतिमुखसन्धिः । तथा चात्र शकुन्तलासम्मेलनरूपफलप्राप्तौ अतित्वरान्वितभावेन राज्ञो दुष्मन्तस्य शकुन्तलान्वेषणात्मकव्यापाररूपः प्रयत्नो नाम द्वितीया कार्य्यावस्था निबद्धा । यथा तत्रैव—

"प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः ।"

एवं शकुन्तलादुष्मन्तयोः सम्मेलनरूपफलस्य प्रधानोपायभूतो यस्तयोः परस्परानुरागो मुखसन्धौ निविष्टः, तस्यात्र "कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि" इत्यादिना दुष्मन्ते लक्ष्यतया उद्भेदः ; शकुन्तलायान्तु स्पष्टानभिधानात् अवस्थया सूचितत्वाच्च अलक्ष्य इव उद्भेदः कविना सन्दर्शितः । यथा तत्रैव—

"फलप्रधानोपायस्य मुखसन्धिनिवेशिनः ।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखञ्च तत् ॥"

अस्य तु विलासादीनि त्रयोदश अङ्गानि यथास्थानं निवेश्य लक्षणानि वक्ष्यामः ।

---

(क) তদনন্তর বিদূষকের প্রবেশ ।

---

(१) विषण्णो विदूषकः ।

विदू। निश्वस्य। भो! हदोह्मि (१) एदस्स मिअआसीलस्स रण्णो वअस्सभावेण णिव्विस्णो (२) अअं मिओ, अअं वराहो, अअं सद्दूलो त्ति मज्झन्दिणेवि गिह्मे विरलपादवच्छाआसु वणराईसु आहिण्डिअ पत्तसङ्करकसाअविरसाइं उह्मकडुआइं पिज्जन्ति गिरिणईसलिलाइं (३) (ख)।

(ख) भोः! हतोऽस्मि एतस्य मृगयाशीलस्य राज्ञो वयस्यभावेन निर्विण्णः। अयं मृगः, अयं वराहः, अयं शार्दूल इति मध्यन्दिनेऽपि ग्रीष्मे विरलपादपच्छायासु वनराजिषु आहिण्ड्य पत्रसङ्करकषायविरसानि उष्णकटुकानि पीयन्ते गिरिनदी-

(ख) विदू इति। भो इति विषादसूचकमव्ययम्। "भोस्तु सम्बोधनविषादयोः" इति मेदिनी। वयस्यभावेन सख्येन। निर्विण्णः प्राप्तनिर्वेदो दुःखित इति यावत्। तत्कारणमाह अयमित्यादि। दिनस्य मध्यमिति मध्यन्दिनम् "धेन्वनडुहादयश्च" इति निपातः। ग्रीष्मे ग्रीष्मकाले मध्यन्दिनेऽपि मध्याह्नेऽपि। एतेन तापाधिक्यं सूचितम्। विरला अन्तरान्तरातपयुक्ताः पादपानां वृक्षाणां छाया यासु तासु, वनराजिषु वनश्रेणिषु, आहिण्ड्य विचर्य्य। "हिडि गतौ" इत्यस्य क्त्वाप्रत्ययप्रयोगः। पत्राणां नानाजातीयवृक्षपर्णानां सङ्करेण सम्मिश्रणेन कषायाणि सनिर्यासानि अतएव विरसानि कुस्वादानि, तथा उष्णानि च तानि आतपतापादिति भावः कटुकानि अल्पकटुरसानि चेति तानि, गिरिनदीसलिलानि पर्व्वतप्रस्रवणजलानि पीयन्ते। अन्येषां सुस्वादुजलानामलाभात् दुष्टजलपानस्य च गुरुतरक्लेशजनकत्वात् निर्विण्ण इति भावः।

कषायविरसानि उष्णकटुकानीति च "प्रसन्नकर्कशा भारती" "भाष्यं प्रसन्नगम्भीरम्" इत्यादिवत् परपदस्य विशेषत्वविवक्षया कर्म्मधारयः। कटुकेति अल्पार्थे कप्रत्ययः।

(থ) বিদূষক। (নিশ্বাস ত্যাগ করিয়া) হায়! মারা গেলাম এই মৃগয়াসক্ত রাজার বয়স্যরূপে কষ্ট ভোগ করিয়া। গ্রীষ্মকালে বেলা

(१) दिट्ठं। (२) णिव्विण्णोह्मि (३) मज्झण्णेवि। गिह्मविरलपाअवच्छाआसु वणराइसु आहिण्डीअदि कडुआइं णिज्झरजलाइं पीअन्ति।

अणिअदवेलञ्च उण्होसमंसभूइट्ठं भुञ्जीअदि (१) (ग)। तुरअ-गआणां च सद्देण रत्तिं पि मे णत्थि पकामसुइदव्वं (२) (घ)। महन्ते ज्जेव पच्चूसे दासीए पुत्तेहिं साउणिअलुद्धेहिं कण्णोपघादिणा वणग्गमणकोलाहलेण पडिबोधिदह्मि (ङ)। एत्ति-

सलिलानि। (ग) अनियतवेलञ्च उष्णोष्णमांसभूयिष्ठं भुज्यते। (घ) तुरगगजानाञ्च शब्देन रात्रावपि मे नास्ति प्रकामशयितव्यम्। महत्येव प्रत्यूषे दास्याः पुत्रैः शाकुनिकलुब्धैः कर्णोपघातिना वनगमनकोलाहलेन प्रतिबोधितोऽस्मि। (ङ) एतावतापि मे

(ग) अनियतेति। अनियता अनिर्द्दिष्टा वेला कालो यस्मिन् कर्म्मणि तद्यथा तथा; आपेक्षिकसुविधया कदाचित् पूर्व्वाह्णे कदाचित् मध्याह्ने कदाचिदपराह्ण इत्यर्थः, उष्णोष्णानि शैत्यसम्पादनावसराभावात् अत्युष्णानि मांसान्येव भूयिष्ठानि बहुलानि यस्मिन् तत्। एतेन चिराभ्यस्तभोजनाभावात् महत् दुःखं सूचितम्।

(घ) तुरगेति। किञ्चेति चार्थः। रात्रावपि तुरगगजानां सैन्यान्तर्गतघोटकहस्तिनाम्, शब्देन कण्ठध्वनिना प्रकामशयितव्यं यथेष्टनिद्रा। सुष्ठु निद्राभावेनापि गुरुतरं दुःखमिति भावः।

(ङ) ननु प्रायेण प्रभाते हस्तिघोटकादीनां शब्दनिवृत्तिदर्शनात् तत्रैव प्रकामं

দুপুরের সময়েও এই হরিণ, এই শূকর এবং এই বাঘ এই করিয়া বনশ্রেণীর ভিতরে বিচরণ করিতে হয়; তাহাতে গাছের ছায়া কমই পাওয়া যায়; তাহাতে আবার পার্ব্বত্যনদীর যে জল পান করা হয়, সেগুলি গাছের পাতা পড়ায় কসও বিরস এবং রৌদ্রের তাপে গরম, আর স্বভাবতই কটু। (গ) তার পর অনির্দ্দিষ্ট সময়ে খাইতে হয়, সে খাদ্যের মধ্যে আবার গরম গরম মাংসই বেশী। (ঘ) এদিকে রাত্রিতেও যে একটু ইচ্ছামত ঘুমাইব তাহাও হাতী-ঘোড়ার শব্দে

(१) अणिअदवेलं सुल्लमंसभूइट्ठो आहारो अण्हीअइ।

(२) तुरगाणुधावणकण्डिदसन्धिणो रत्तिम्मि णिकामं सइदव्वं णत्थि।

केण वि मे पीड़ा ण संवुत्ता; जदो अअं गण्डस्स उवरि विप्फोड़ओ संवुत्तो (१) (च)। तेण हि किल अम्हेसु अवहीणेसु तत्थभअदा मिआणुसारिणा अस्समपदं पविट्टेण मम अधस्सदाए सउन्तला णाम कावि तवस्सिकण्णआ दिट्टा, तं पेक्खिअ सम्पदं णअरगमणस्स कथम्पि ण करेदि (२) (छ)।

पीड़ा न संवृत्ता, यत: अयं गण्डस्य उपरि विस्फोटक: संवृत्त:। (च) तेन हि किल अस्मासु अवहीनेषु तत्रभवता मृगानुसारिणा आश्रमपदं प्रविष्टेन मम अधन्यतया शकुन्तलया

शय्यतामित्याह महत्येवेति। महत्येव प्रत्यूषे प्रत्यूषकाले दास्या: पुत्रैर्नितान्तनीचै:, शाकुनिकलुब्धै: पक्षिहिंसकव्याधै: कर्तृभि:, कर्णोपघातिना कर्कशत्वात् कर्णपीड़ाजनकेन, वनगमने तत्काले कोलाहलेन करणेन, प्रतिबोधितो जागरित:। तत् कुत: प्रभातेऽपि निद्रेति भाव:।

शकुनान् पक्षिणो हिंसन्तीति शाकुनिका:, ते च ते लुब्धाश्चेति शाकुनिकलुब्धा:।

"व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि स:" इत्यमर:।

(च) उक्ताधिक्यमपि दुःखमाह एतावतेति। एतत्परिमाणेनापि असुविधासमूहेनेत्यर्थ:। पीडा असह्यदु:खम्, संवृत्ता सञ्जाता। गण्डस्य कपोलस्य। विस्फोटक: नितान्तपीडाकरो व्रणविशेष:, संवृत्त: सञ्जात:। तेनैवासह्यं दु:खं जातमिति भाव:।

পারি না। (ঙ) তার পর অতিপ্রত্যূষেই বাঁদীর পো পাখীমারা ব্যাধগুলির বনগমনকালের কর্ণপীড়াজনক কোলাহলে জাগিয়া উঠি। (চ) এততেও আমার সেরূপ কষ্ট হয় নাই। কিন্তু যে হেতু গালের উপরে এই একটা বিস্ফোট হইয়াছে, সেই জন্যই অসহ্য কষ্ট হইতেছে।

(१) एत्तएण दाणिं वि पीड़ा ण णिक्कमइ। जदो गण्डस्स उवरि पिलुआ संवुत्तो।

(२) हिओ किल अम्हेसु ओहीणेसु तत्तहोदो मिआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्तला णाम मम अधण्णदाए दंसिदा। संपदं णअरगमणस्स मणं कहं वि ण करेइ।

এবং জ্জেব চিন্তঅন্তস্স মে পহাদা অচ্ছিসু রঅণী, কা গদী। জীব ণং কিদআআরপরিগ্গহং পিঅবঅস্সং পেক্খামি (১) (জ)। পরিক্রম্যাবলোক্য চ। এসো বাণাসণহত্থো হিঅঅ-ণিহিদ-পিঅ-

নাম কাপি তপস্বিকন্যকা দৃষ্টা, তাং প্রেক্ষ্য সাম্প্রতং নগরগমনস্য কথামপি ন করোতি। (ছ) এবমেব চিন্তয়তঃ মে প্রভাতা অক্ষ্ণোঃ রজনী, কা গতিঃ। যাবদেনং কৃতাচারপরিগ্রহং প্রিয়বয়স্যং প্রেক্ষে। (জ) এষ বাণাসনহস্তঃ হৃদয়নিহিতপ্রিয়জনঃ,

(ছ) দুঃখান্তরমাহ তেনেতি। তেন উক্তবিধেন দুঃখপ্রবাহেণ পীড্যমানেষ্বিত্যর্থঃ, অবহীনেষু বেগেন রাজ্ঞো গমনাৎ পশ্চাৎ স্থিতেষু সৎস্বিতি তাৎপর্য্যম্, তত্রভবতা মাননীয়েন রাজ্ঞা, মৃগানুসারিণা মৃগস্য পশ্চাৎ ধাবতা, আশ্রমপদং তপোবনম্, প্রবিষ্টেন সতা। অধন্যতয়া পুণ্যশূন্যতয়া মন্দভাগ্যতয়েত্যর্থঃ। কথামপি প্রস্তাবমপি। ততশ্চ শীঘ্রশান্তিলাভোপায়োঽপি নাস্তীত্যাশয়ঃ।

(জ) এবমিতি। এবমেব ইত্থমেব, চিন্তয়তঃ শয়িত্বৈব ভাবয়তঃ। অক্ষ্ণোশ্চক্ষুষোরপি, রজনী প্রভাতা, বহিরালোকপ্রসরণাৎ বহিঃ সর্ব্বথৈব প্রভাতা, শয়নকুঞ্জেঽপ্যালোকাগমনাৎ চক্ষুষোরপি প্রভাতেত্যর্থঃ, কা গতিঃ শান্তিলাভে ক উপায়ঃ, অপি তু কাপি নাস্তীত্যর্থঃ। কৃত আচারপরিগ্রহঃ মৃগয়োচিতবেশধারণং যেন তম্।

(ছ) তাহাতে আবার রাজা, আমাকে পিছনে ফেলিয়া, অত্যন্তবেগে একটা হরিণের অনুসরণ করিতে করিতে, তপোবনে প্রবেশ করিয়া, আমারই দুরদৃষ্টবশতঃ শকুন্তলা নামে কোনও তপস্বিকন্যাকে দেখিয়াছেন; তাহাকে দেখিয়া এখন আর বাড়ী যাওয়ার নামও করেন না। (জ) শয়ন করিয়া এইরূপই কেবল চিন্তা করিতেছিলাম, এই অবস্থায় আমার চোখে রাত পোহাইয়া গিয়াছে; তা উপায় কি? যাহা হউক, মৃগয়াবেশধারী প্রিয়সখার সহিতই সাক্ষাৎ করি। (ঝ) (পদক্ষেপ-

(১) অন্নবি নত্ত নং এব্বং চিন্তঅন্তস্স অচ্ছীসু পহাদং আসি···কিদাআর-পরিক্কমং (কিদদারপরিগ্গহং)।

অয়ো বণপুপ্ফমালাধারী ইদো জ্জেব আঅচ্ছদি পিঅবঅস্সো (১) (ঝ)। ভোদু, অঙ্গ-ভঙ্গ-বিঅলো ভবিঅ চিট্ঠিস্সং। এব্বম্পি ণাম বিস্সামং লহেঅং (২)। ইতি দণ্ডকাষ্ঠমবলম্ব্য স্থিতঃ। (ঞ)

ততঃ প্রবিশতি যথানির্দ্দিষ্টো রাজা (৩)। (ট)

---

বনপুষ্পমালাধারী ইত এব আগচ্ছতি প্রিয়বয়স্যঃ। (ঝ) ভবতু, অঙ্গভঙ্গবিকলো ভূত্বা স্থাস্যামি। এবমপি নাম বিশ্রামং লভেয়।

(ঝ) অয়ীতি। পরিক্রম্য কিয়ন্তং পদক্ষেপং কৃত্বা। বাণান্ অস্যতি ক্ষিপত্যনেনেতি বাণাসনং ধনুঃ হস্তে যস্য সঃ, হৃদয়ে নিহিতঃ স্থাপিতঃ প্রিয়জনঃ শকুন্তলেতি তাৎপর্য্যং যস্য সঃ, প্রিয়াং শকুন্তলাং চিন্তয়ন্নিত্যর্থঃ। এতত্তু নয়নভঙ্গ্যাদিনা অনুমিতমিতি বোধ্যম্।

(ঞ) ভবত্বিতি। ভবতু পুনরপি মৃগানুধাবনাদিপ্রস্তাব ইতি শেষঃ। অঙ্গানাং কটিদেশপ্রভৃত্যবয়বানাং ভঙ্গেন অস্বাস্থ্যব্যঞ্জককৌটিল্যকরণেন বিকলঃ অস্বাভাবিকাবস্থঃ। এবমপি অঙ্গভঙ্গবিকলভাবেনাবস্থানেনাপি। নাম সম্ভাবয়ামি। ঈদৃগবস্থাদর্শনাৎ অস্বাস্থ্যানুমানেন মাং প্রতি রাজ্ঞো বিশ্রামানুমতিদানস্যৈব সর্ব্বথা সম্ভবাদিতি ভাবঃ। দণ্ডকাষ্ঠং কাষ্ঠময়ং দণ্ডম্।

(ট) তত ইতি। যথানির্দ্দিষ্টঃ বাণাসনহস্তাদিরূপঃ।

---

পূর্ব্বক দর্শন করিয়া) এই যে বনপুষ্পমালাধারী প্রিয়বয়স্য, মনে মনে প্রিয়জনের চিন্তা করতঃ, ধনু হাতে করিয়া এই দিকেই আসিতেছেন। (ঝ) হউক, অঙ্গ-ভঙ্গ-বিকল হইয়া থাকি। দেখি ইহাতেও যদি বিশ্রাম লাভ করিতে পারি। (এই বলিয়া যষ্টি অবলম্বন করিয়া থাকিল।)

(১) বাণাসণহত্থাহিং জবণীহিং বণপুপ্ফমালাধারিণীহিং পরিবুদো···।

(২)···বিস্সমিঅ···। অহ এব্বং বি। (৩)··· যথানির্দ্দিষ্টপরিবারো রাজা।

রাজা । আত্মগতম্ (১) ।

কামং প্রিয়া ন সুলভা মনস্তু তদ্ভাবদর্শনাশ্বাসি (২) ।
অকৃতার্থেঽপি মনসিজে রতিমুভয়প্রার্থনা কুরুতে ॥১॥

---

কামমিতি । প্রিয়া শকুন্তলা, কামং যথেষ্টম্, ন সুলভা অযত্নেনায়াসলভ্যা ন কথঞ্চিদায়াসেন লভ্যা তু স্যাদেবেত্যর্থঃ । তথা চ মাং প্রতি তস্যা অনুরাগে সত্যপি পরাধীনতয়া আত্মদানাসম্ভবাৎ ন অযত্নেনায়াসলভ্যা, সখ্যাদিভির্মৎকুলশীলাবস্থাদিবর্ণনেন কণ্বাদীনাং তৎপ্রভূণাং সম্মতিসম্ভবাৎ কিয়দায়াসলভ্যা তু স্যাদেবেতি ভাবঃ । তু কিন্তু, মনো মম চিত্তম্, তস্যাঃ শকুন্তলায়া ভাবদর্শনেন অনুরাগব্যঞ্জকাপাঙ্গদৃষ্ট্যাদ্যবলোকনেন আশ্বসিতি তৎপ্রাপ্তিসম্ভাবনাজনিতানন্দমনুভবতীতি তৎ তথোক্তং জাতমিতি শেষঃ । ননু লিপ্সিতায়া অসুলভত্বে কথমাশ্বাসানন্দ ইত্যাহ অকৃতার্থেঽপীতি । মনসিজে কামে, অকৃতার্থেঽপি তৎফলীভূতসুরতসুখানুৎপত্ত্যা অচরিতার্থে সত্যপি, উভয়প্রার্থনা নায়কনায়িকয়োঃ পরস্পরপ্রাপ্ত্যাকাঙ্ক্ষা, রতিং সম্ভাব্যমানং সম্মেলনানন্দম্, কুরুতে জনয়তি । অতএব চ মম মনস্তদ্ভাবদর্শনাশ্বাসি জাতমেবেত্যাশয়ঃ ।

অত্র পরার্দ্ধসামান্যেন পূর্ব্বার্দ্ধবিশেষসমর্থনাদর্থান্তরন্যাসোঽলঙ্কারঃ, তথা অপ্রস্তুতাৎ নায়কনায়িকাত্মকোভয়সামান্যাৎ প্রস্তুতয়োর্দুষ্মন্তশকুন্তলরূপয়োর্বিশেষনায়কনায়িকয়োঃ প্রতীতেরপ্রস্তুতপ্রশংসা চ, অনয়োরেকাশ্রয়ানুপ্রবেশরূপঃ সঙ্করঃ ।

তথাত্র শকুন্তলায়াং দুষ্মন্তস্য সমীহাকরণাৎ বিলাসো নাম প্রতিমুখসন্ধেরঙ্গম্ । যথা সাহিত্যদর্পণে—

"সমীহা রতিভোগার্থা বিলাস ইতি কথ্যতে ।"

ইদমেব তত্রোদাহৃতং দ্রষ্টব্যম্ । আর্য্যা জাতিঃ ॥১॥

---

(ট) (তাহার পর নির্দ্দিষ্টরূপে রাজার প্রবেশ ।)

রাজা । (স্বগত) প্রিয়তমা শকুন্তলা একেবারে সুলভ নহে; কিন্তু তথাপি আমার মন তাহার অবস্থা দেখিয়া আশ্বস্ত হইয়াছে ।

(১) ক্বচিৎ আত্মগতমিতি নাস্তি । (২) তদ্ভাবদর্শনায়াসি ।

स्मितं कृत्वा। एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विप्रलभ्यते (१)। कुतः—(२) (ठ)

स्निग्धं वीक्षितमन्यतोऽपि नयने यत् प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव।
मा गा इत्युपरुद्धया यदपि तत्सासूयमुक्ता सखी,
सर्व्वं तत् किल मत्परायणमहो कामः (३) स्वतां पश्यति ॥२॥

(ठ) स्मितमिति। स्मितम् आत्मनो भ्रान्तत्वसूचकं मन्दहास्यं कृत्वेत्यर्थः। आत्मनो भ्रान्तत्वमेव व्यनक्ति एवमिति। एवम् अनेन प्रकारेण अहमिवेत्यर्थः, आत्माभिप्रायेण निजमनोवृत्तेरानुरूप्येणेति तात्पर्य्यम्, सम्भाविता निरूपिता इष्टजनस्य नायकस्य नायिकाया वा चित्तवृत्तिर्मनोभावो येन सः, प्रार्थयिता कामयिता जनः, विप्रलभ्यते प्रतार्य्यते। तथा च कश्चिज्जनो जनान्तरस्य भावविशेषमभिलक्ष्य "मयि खल्वयमनुरक्तः" इत्येवं मन्यमानो यदा तस्मिन् प्रसक्तुमुपक्रमते, तदा तु तद्भावस्य विषयान्तरगततया स्वाभाविकतया वा स खल्विष्टजनः प्रकुप्यति उदास्ते उपहसति वा। तेन च स जन इष्टजनेन प्रतारित एव भवतीति सरलार्थः। इत्थञ्च तेषां शकुन्तलाभावानां विषयान्तरगतत्वेनापि सम्भवात् तथाहं प्रतारित एव भवामीति भावः। ननु आत्माभिप्रायेण आत्मविषये तादृशी इष्टजनचित्तवृत्तिः कथं सम्भाविता, यत् एवमित्यादि सामान्यमुपन्यस्तमित्याह कुत इति।

स्निग्धमिति। तथा शकुन्तलया, नयने नेत्रद्वयम् अन्यतः अन्यस्मिन् वस्तुनि,

---

তাহার কারণ এই যে, কাম চরিতার্থ না হইলেও, নায়ক-নায়িকার পরস্পরের প্রার্থনা, পরস্পরের আনন্দ জন্মাইয়া থাকে ॥১॥

(ঠ) (ঈষৎ হাস্য করিয়া) নিজের মনোবৃত্তি অনুসারে যিনি ইষ্টজনের মনোবৃত্তি স্থির করেন, সেই প্রার্থী ব্যক্তি এইরূপই প্রতারিত হন। কারণ—

---

(१) विप्रलभ्यते। (२) क्वचित् कुत इति नास्ति। (३) कामी।

বিদূ। (তথাস্থিত এব।) ভো মহারাঅ! ণ মে হত্থো পসরদি, তা বাআমেত্তেণ জআবীঅসি। জঅদু জঅদু ভবং (১)। (ঙ)

প্রেরয়ন্ত্যাপি প্রকাশ্যভাবেন নিক্ষিপন্ত্যাপি, স্নিগ্ধং সানুরাগম্, যৎ বীক্ষিতং গোপনীয়ভাবেন তারাদ্বয়ং সঞ্চাল্য ময়ি দৃষ্টিপাতঃ কৃতঃ; নিতম্বয়োর্গুরুতয়া স্থূলত্বেন ভারবত্তয়া, বিলাসাদিব ময়ি বিভ্রমং প্রদর্শ্যৈব, যৎ মন্দং যাতম্ অল্পমল্পং গমনং কৃতম্; তথা মা গা ন গচ্ছ ইতি ইত্যম্, উপরুদ্ধয়া প্রিয়ংবদাকর্তৃকমনুরুদ্ধয়া সত্যা শকুন্তলয়া সখী প্রিয়ংবদা, যদপি তৎ "দাণিং কিং তুহ আঅত্তাহ্মি" ইত্যাদিপূর্বোক্তপ্রকারম্, সাসূয়ং সের্ষ্যং যথা স্যাত্তথা, উক্তা। তৎ সর্বম্, অহমেব পরম্ অয়নম্ আশ্রয়ো বিষয়ো যস্য তৎ মাদৃশম্, কিল সম্ভাবয়ামীত্যর্থঃ। অহো আশ্চর্য্যম্, কামঃ কামাবেশঃ, স্বতাং পরবিষয়াণামপি ভাবানামাত্মবিষয়তাম্, পশ্যতি উৎপ্রেক্ষতে সম্ভাবয়তীত্যর্থঃ। তথা চ তেষাং শকুন্তলাভাবানাং পদার্থান্তরবিষয়কতায়াঃ স্বাভাবিকতায়া বা সম্ভবেঽপি যন্ময়া মদ্বিষয়কত্বং সম্ভাবিতম্, এতদেব মে ভ্রান্তত্বম্। তেন চ যদৈবাহং তদ্বশেন তস্যাং প্রসক্তুং প্রবর্ত্তিষ্যে তদৈব তয়া প্রকুপ্যন্ত্যা উদাসীনয়া উপহসন্ত্যা বা সত্যা প্রতারণীয় ইতি ভাবঃ।

অত্র কামঃ স্বতাং পশ্যতীতি সামান্যেন পূর্ববিশেষসমর্থনাদর্থান্তরন্যাসোঽলঙ্কারঃ।
"বার্ত্তাসম্ভাব্যয়োঃ কিল" ইত্যমরঃ। শার্দূলবিক্রীড়িতং বৃত্তম্ ॥২॥

---

শকুন্তলা অন্যদিকে নয়নযুগল নিক্ষেপ করিয়াও যে অনুরাগের সহিত দৃষ্টিপাত করিয়াছেন এবং আমাকে বিলাসভাব দেখাইবার জন্যই যেন নিতম্বযুগলের ভারবশতঃ যে অল্প অল্প গমন করিয়াছেন, আর "যাইও না" এইরূপ উপরোধ করিলে পর, অসূয়ার সহিত সখীকে সেই যাহা কিছু বলিয়াছেন, সে সমস্ত আমার বিষয়ে (করিয়াছেন)। কি আশ্চর্য্য! কাম পরবিষয়ক ব্যাপারকেও স্ববিষয়ক বলিয়া মনে করে ॥২॥

(১)···হত্থপাআ পসরন্তি···জীআবইস্সং।

রাজা। বিলোক্য সস্মিতম্ (১)। কুতোঽয়ং গাত্রোপঘাতঃ। (ঢ)

বিদূ। কধং কুদো ত্তি, সঅং জ্জেব অচ্ছিং ভঞ্জিঅ অস্সুকারণং পুচ্ছসি (২)। (ণ)

---

(ড) ভো মহারাজ! ন মে হস্তঃ প্রসরতি, তৎ বাচামাত্রেণ জাপ্যসে। জয়তু জয়তু ভবান্।

(ণ) কথং কুত ইতি, স্বয়মেব অক্ষি ভঙ্‌ক্ত্বা অশ্রুকারণং পৃচ্ছসি।

---

(ড) বিদূ ইতি। দণ্ডকাষ্ঠমবলম্ব্য বক্রভাবেন স্থিত এব। প্রসরতি আশীর্বাদায় উত্থানাবশ্যকত্বেঽপি উত্থাতুং ন শক্নোমি গাত্রোপঘাতাদিতি ভাবঃ। তৎ তস্মাৎ, বাচামাত্রেণ কেবলেন বাক্যেন, ন পুনর্হস্তস্যাভ্যুত্তোলনেনেত্যর্থঃ, জাপ্যসে জয়পাশীক্রিয়সে।

বাচেতি বাক্‌শব্দাৎ টাপ্। তথা চ—

"বষ্টি ভাগুরিরল্লোপমবাপ্যোরুপসর্গয়োঃ।
টাপঞ্চাপি হলন্তানাং ক্ষুধা বাচা নিশা গিরা॥"

জাপ্যসে ইতি জয়ন্ প্রযুজ্যতে ইতি ইনি "ক্রিজিক্রীঙামিনি" ইতি ণেরিকারস্য আকারঃ "অর্ত্তিহ্রী" ইত্যাদিনা পকারাগমশ্চ।

(ঢ) রাজেতি। কুতঃ কারণাৎ। গাত্রোপঘাতঃ অঙ্গবৈকল্যম্।

---

(ড) বিদূষক। (সেইভাবে থাকিয়াই) মহারাজ! আমার হাত চলিতেছে না; তাই কেবল বাক্যদ্বারা আপনার সংবর্দ্ধনা করিতেছি। আপনার জয় হউক, আপনার জয় হউক।

(ঢ) রাজা। (দেখিয়া ঈষৎ হাস্যের সহিত) তোমার এই অঙ্গ বৈকল্য হইল কেন?।

(ণ) বিদূষক। নিজেই চোখে আঘাত করিয়া—'চোখের জল পড়িতেছে কেন?' ইহা জিজ্ঞাসা করিতেছ কি জন্য?।

---

(১) ক্বচিৎ বিলোক্য সস্মিতমিতি নাস্তি।

(২) কুদো কিল সঅং অচ্ছী আউলীকরিঅ।

राजा। न खल्ववगच्छामि, भिन्नार्थमभिधीयताम् (१)। (त)

विदू। जं वेदसो खुज्जस्स लीलं विडम्बेदि, तं किं अत्तणो पहावेण? अधवा णईवेअस्स? (२)। (थ)

राजा। नदीवेगस्तत्र कारणम्। (द)

विदू। मम वि भवं। (ध)

---

(थ) यत् वेतसः कुब्जस्य लीलां विडम्बयति, तत् किम् आत्मनः प्रभावेण? अथवा नदीवेगस्य?।

(ध) ममापि भवान्।

---

(ण) विदू इति। अक्षि भङ्क्त्वा नयनमुपमर्द्य, कुत इति कथमिदमश्रु? इत्यम् अश्रुणः निर्गतस्य तन्नयनजलस्य कारणम्, कथं पृच्छसीत्यन्वयः। भवानेव मम तद्-गात्रोपघातस्य कारणमित्याशयः।

(त) राजेति। अवगच्छामि तव वाक्यार्थमिति शेषः। भिन्नः शक्त्या व्यङ्ग्यार्थात् पृथक् कृतः अर्थो यस्य तत् भिन्नार्थं स्पष्टार्थं वाक्यमित्यर्थः।

(थ) विदू इति। वेतसः स्वनामख्यातो लताविशेषः, यत् कुब्जस्य जनस्य, लीलां क्रियां कुब्जभावमित्यर्थः, विडम्बयति अनुकरोति, तत्कुब्जलीलाविडम्बनम्, प्रभावेण शक्त्या। नदीवेगस्य प्रभावेणेति सम्बन्धः।

(द) राजेति। अत्र कुब्जलीलाविडम्बने। तथा च नदीवेग एव वेतसं कुब्जं करोति, स्वयन्तु स सरल एवेत्यर्थः।

---

(ত) রাজা। বুঝিতে পারিলাম না। স্পষ্ট করিয়া বল।

(থ) বিদূষক। বেত যে কুব্জলোকের অবস্থার অনুকরণ করে, সে কি নিজের শক্তিতে? না—নদীবেগের শক্তিতে?।

(দ) রাজা। সে বিষয়ে নদীর বেগই কারণ।

---

(१) क्वचित् भिन्नार्थमभिधीयताम् इति नास्ति।

(२) भो वयस्य!... खुज्जलीलं... णं णईवेअस्स।

राजा। कथमिव?। (न)

विदू। जुत्तं णाम एव्वं, जं तुए रज्जकज्जाइं उज्झिअ तादिसं अक्खलिदपदं पदेसं च वणचलविति्तणा होदव्वं त्ति। किं एत्थ मन्तीअदु, अहं वम्हणो पच्चहं सापदाणुसरणेहिं संक्खोहिदसन्धिवन्धणाणं अत्तणो अङ्गाणं अणीसोह्मि। ता पसीद मे, एक्काहम्मि दाव विसमीअदु (१)। (प)

(प) युक्तं नाम एवम्, यत् त्वया राजकार्य्याणि उज्झित्वा तादृशं अस्खलितपदं प्रदेशञ्च वनचरवृत्तिना भवितव्यमिति। किमत्र मन्त्र्यताम्, अहं पुनर्ब्राह्मणः प्रत्यहं श्वापदानुसरणैः संक्षोभितसन्धिबन्धनानामङ्गानामनीशोऽस्मि। तत् प्रसीद मे, एकाहमपि तावद्विश्रम्यताम्।

(ध) विदू इति। तद्वत् ममापि गात्रोपघाते भवान् कारणमित्यर्थः।

(न) राजेति। कथमिव तव गात्रोपघाते अहं कारणमित्यर्थः।

(प) विदू इति। एवं भवतश्चरित्रम्, युक्तं नाम सङ्गतं सम्भाव्यते, "उपपन्नं बहु तव किमुच्यते" इत्यादिवद्विपरीतलक्षणया अतीवायुक्तं सम्भाव्यत इत्यर्थः किन्त्वदित्याह यदिति। उज्झित्वा परित्यज्य। न स्खलितं न प्रच्युतं पदं स्थानं यस्मिन् तं सर्वदैव रक्षोपायसम्पन्नमित्यर्थः प्रदेशं राजधानीञ्च, उज्झित्वेत्यन्वयः, वनचरस्य सततवनविचरणशीलस्य व्याधस्य वृत्तिरिव वृत्तिर्व्यवहारो यस्य तेन तादृशेन भवितव्यं त्वयेति शेषः। तथा च पालनात्मकं राजकार्य्यं विहाय यत् हिंसात्मिका मृगया

(ध) বিদূষক। আমারও তুমি।

(ন) রাজা। কি রকম?।

(१) एव्वं रायकज्जाइ उज्झिअ एआरिसे आउलप्पदेसे वणयरवुत्तिणा तुए होदव्वं। जं अहं पच्चहं सावदसमुच्छारणेहिं संखोहिअसन्धिबन्धणाणं मम गत्ताणं अणीसोह्मि संवुत्तो। तापसादइस्सं विसज्जिदुं मं एक्काहं वि विस्समिदुं।

राजा । आत्मगतम् । अयमेवमाह, ममापि कण्वसुता-मनुंस्मृत्य मृगयां प्रति निरुत्सुकं चेतः । तथाहि—(१) (फ)

क्रियते, यत्र सर्वथा निरापदं राजधानीं परित्यज्य नानाविपत्सङ्कुले वने विचर्य्यते, तदतीवायुक्तमित्याशयः ।

"पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः ।

नन्वास्तां तावत् तत् सर्वमयुक्तम्, तथापि तव गात्रोपघाते कथमहं कारणमिति मत्प्रश्नस्य भवतः किमुत्तरमित्याह किमिति । अत्र भवत्प्रश्ने, किं मन्त्र्यतां मया उत्तरं दीयतां स्वयं चिन्तामात्रेणैव ज्ञातव्यत्वात् मदुत्तरस्य कापि नापेक्षास्तीत्यर्थः । परन्तु स्पष्टमाह अहमिति । शुनां कुक्कुराणामापदो येभ्यस्ते श्वापदा हिंस्रजन्तवो व्याघ्रादयः तेषामनुसरणैः भवद्भिः सार्द्धं पश्चात् पश्चात् धावनैः संक्षोभितानि सञ्चालितानि सन्धिबन्धनानि संयोगस्थानस्थबन्धा येषां तेषाम् अङ्गानां हस्तपदादीनाम् अनीशः सञ्चालनादौ असमर्थः ; गुरुतरवेदनानुभवादित्यर्थः । अतएव श्वापदानुसरणं मां प्रत्यनुमतिकरणेन मम गात्रोपघाते भवानेव कारणमिति भावः ।

(फ) राजेति । कण्वसुतां शकुन्तलाम्, अनुस्मृत्य चिन्तयित्वा चिन्तया मृगैः सह शकुन्तलायाः सम्पर्कोऽस्तीत्यवधार्य्य ।

---

(প) বিদূষক । ইহা সঙ্গতই হইতেছে যে ; তুমি রাজ্যের কার্য্য এবং সেইরূপ নিরাপদস্থান পরিত্যাগ করিয়া, একেবারে ব্যাধবৃত্তি হইয়াছ । আমি তোমার এ প্রশ্নের কি উত্তর দিব ; আমি ব্রাহ্মণ হইয়া প্রতিদিন হিংস্রজন্তুর অনুসরণ করিতেছি ; তাহাতে আমার প্রত্যেক সন্ধিস্থানের বন্ধনগুলি, স্থানভ্রষ্ট হইয়াছে ; সুতরাং আমি নিজের অঙ্গ সঞ্চালন করিতে পারিতেছি না । অতএব আমার প্রতি প্রসন্ন হও ; একটী দিনের জন্যও বিশ্রাম কর ।

(१) स्वगतम् । अयं चैवमाह । ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः । कुतः ।

রাজা। বিলোক্য সস্মিতম্ (১)। কুতোঽয়ং গাত্রোপঘাতঃ। (ঢ)

বিদূ। কধং কুদো ত্তি, সঅং জ্জেব অচ্ছিং ভঞ্জিঅ অস্সু কারণং পুচ্ছসি (২)। (ণ)

---

(ড) ভো মহারাজ! ন মে হস্তঃ প্রসরতি, তদ্ বাচামাত্রেণ জাপ্যসে। জয়তু জয়তু ভবান্।

(ণ) কথং কুত ইতি, স্বয়মেব অক্ষি ভঙ্ক্ত্বা অশ্রুকারণং পৃচ্ছসি।

---

(ড) বিদূ ইতি। দণ্ডকাষ্ঠমবলম্ব্য বক্রভাবেন স্থিত এব। প্রসরতি আশীর্বাদায় উত্থানাবশ্যকত্বেঽপি উত্থাতুং ন শক্নোমি গাত্রোপঘাতাদিতি ভাবঃ। তদ্ তস্মাত্, বাচা-মাত্রেণ কেবলেন বাক্যেন, ন পুনর্হস্তাদ্যুত্তোলনেনেত্যর্থঃ, জাপ্যসে জয়পার্শ্বীক্রিয়সে।

বাচেতি বাক্শব্দাত্ টাপ্। তথা চ—

"বষ্টি ভাগুরিরল্লোপমবাপ্যোরুপসর্গয়োঃ।
টাপঞ্চাপি হলন্তানাং ক্ষুধা বাচা নিশা গিরা॥"

জাপ্যসে ইতি জয়ন্ প্রযুজ্যসে ইতি ইনি "ক্ষিজিক্রীঙামিনি" ইতি ণেরিকারস্য আকারঃ "অর্ত্তিহ্রী" ইত্যাদিনা পকারাগমশ্চ।

(ঢ) রাজেতি। কুতঃ কারণাত্। গাত্রোপঘাতঃ অঙ্গবৈকল্যম্।

---

(ড) বিদূষক। (সেইভাবে থাকিয়াই) মহারাজ! আমার হাত চলিতেছে না; তাই কেবল বাক্যদ্বারা আপনার সংবর্দ্ধনা করিতেছি। আপনার জয় হউক, আপনার জয় হউক।

(ঢ) রাজা। (দেখিয়া ঈষৎ হাস্যের সহিত) তোমার এই অঙ্গ বৈকল্য হইল কেন?।

(ণ) বিদূষক। নিজেই চোখে আঘাত করিয়া—'চোখের জল পড়িতেছে কেন?' ইহা জিজ্ঞাসা করিতেছ কি জন্য?।

---

(১) ক্বচিত্ বিলোক্য সস্মিতমিতি নাস্তি।

(২) কুদো কিল সঅং অচ্ছী আকুলীকরিঅ।

राजा। न खल्ववगच्छामि, भिन्नार्थमभिधीयताम् (१)। (त)

विदू। जं वेदसो खुज्जस्स लीलं विडम्बेदि, तं किं अत्तणो पहाविण ? अधवा णईवेअस्स ? (२)। (थ)

राजा। नदीवेगस्तत्र कारणम्। (द)

विदू। मम वि भवं। (ध)

(थ) यत् वेतसः कुब्जस्य लीलां विडम्बयति, तत् किम् आत्मनः प्रभावेण ? अथवा नदीवेगस्य ?।

(ध) ममापि भवान्।

(ण) विदू इति। अक्षि भङ्क्त्वा नयनमुपमर्द्य, कुत इति कथमिदमश्रु ? इत्यम् अश्रुणः निर्गतस्य तन्नयनजलस्य कारणम्, कथं पृच्छसीत्यन्वयः। भवानेव मम तद-गात्रोपघातस्य कारणमित्याशयः।

(त) राजेति। अवगच्छामि तव वाक्यार्थमिति शेषः। भिन्नः स्पष्टया व्यङ्ग्यार्थात् पृथक्कृतः अर्थो यस्य तत् भिन्नार्थं स्पष्टार्थं वाक्यमित्यर्थः।

(थ) विदू इति। वेतसः स्वनामख्याता लताविशेषः, यत् कुब्जस्य जनस्य, लीलां क्रियां कुब्जभावमित्यर्थः, विडम्बयति अनुकरोति, तत्कुब्जलीलाविडम्बनम्, प्रभावेण शक्त्या। नदीवेगस्य प्रभावेणेति सम्बन्धः।

(द) राजेति। अत्र कुब्जलीलाविडम्बने। तथा च नदीवेग एव वेतसं कुब्जं करोति, स्वयन्तु स सरल एवेत्यर्थः।

(त) রাজা। বুঝিতে পারিলাম না। স্পষ্ট করিয়া বল।

(থ) বিদূষক। বেত যে কুব্জলোকের অবস্থার অনুকরণ করে, সে কি নিজের শক্তিতে ? না—নদীবেগের শক্তিতে ?।

(দ) রাজা। সে বিষয়ে নদীর বেগই কারণ।

(१) क्वचित् भिन्नार्थमभिधीयताम् इति नास्ति।

(२) भो वअस्स !… खुज्जलीलं… णं णईवेअस्स।

राजा । कथमिव ? । (न)

विदू । जुत्तं णाम एव्वं, जं तुए रज्जकज्जाइं उज्झिअ तादिसं अक्खलिदपदं पदेसं च वणचलवित्तिणा होदव्वं त्ति । किं एत्थ मन्तीअदु, अहं वह्मणो पच्चहं सापदाणुसरणेहिं संखोहिदसन्धिवन्धणाणं अत्तणो अङ्गाणं अणीसोह्मि । ता पसीद मे, एक्काहम्मि दाव विसमीअदु (१) । (प)

(प) युक्तं नाम एवम्, यत् त्वया राजकार्य्याणि उज्झित्वा तादृशं अस्खलितपदं प्रदेशञ्च वनचरवृत्तिना भवितव्यमिति । किमत्र मन्त्र्यताम्, अहं पुनर्ब्राह्मणः प्रत्यहं श्वापदानुसरणैः संक्षोभितसन्धिबन्धनानामङ्गानामनीशोऽस्मि । तत् प्रसीद मे, एकाहमपि तावद्विश्रम्यताम् ।

(ध) विदू इति । तद्वत् ममापि गात्रोपघाते भवान् कारणमित्यर्थः ।

(न) राजेति । कथमिव तव गात्रोपघाते अहं कारणमित्यर्थः ।

(प) विदू इति । एवं भवतश्चरित्रम्, युक्तं नाम सङ्गतं सम्भाव्यते, "उपकृतं बहु तत्र किमुच्यते" इत्यादिवद्विपरीतलक्षणया अतीवायुक्तं सम्भाव्यत इत्यर्थः । किन्त्वदित्याह यदिति । उज्झित्वा परित्यज्य । न स्खलितं न प्रच्युतं पदं स्थानं यस्मिन् तं सर्व्वदैव रक्षोपायसम्पन्नमित्यर्थः । प्रदेशं राजधानीञ्च, उज्झित्वेत्यन्वयः, वनचरस्य सततवनविचरणशीलस्य व्याधस्य वृत्तिरिव वृत्तिर्व्यवहारो यस्य तेन तादृशेन भवितव्यं त्वयेति शेषः । तथा च पालनात्मकं राजकार्य्यं विहाय यत् हिंसात्मिका मृगया

(ধ) বিদূষক। আমারও তুমি।

(ন) রাজা। কি রকম ?।

(१) एव्वं राअकज्जाइं उज्झिअ एआरिसे आउलप्पदेसे वणचरवुत्तिणा तुए होदव्वं । जं सव्वं पच्चहं सावदसमुच्छारणेहिं संखोहिअसन्धिवन्धणाणं मम गत्ताणं अणीसोह्मि संवुत्तो । तापसादइस्सं विसज्जिदुं मं एक्काहं वि विस्समिदुं ।

राजा। आत्मगतम्। अयमेवमाह, ममापि कण्वसुता-मनुस्मृत्य मृगयां प्रति निरुत्सुकं चेतः। तथाहि—(१) (फ)

क्रियते, यत्र सर्वथा निरापदं राजधानीं परित्यज्य नानाविपत्सङ्कुले वने विचर्य्यते, तदतीवायुक्तमित्याशयः।

"पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः।

नन्वास्तां तावत् तत् सर्वमयुक्तम्, तथापि तव गात्रोपघाते कथमहं कारणमिति मत्प्रश्नस्य भवतः किमुत्तरमित्याह किमिति। अत्र भवत्प्रश्ने, किं मन्त्रातां मया उत्तरं दीयतां स्वयं चिन्तामात्रेणैव ज्ञातव्यत्वात् मदुत्तरस्य कापि नापेक्षास्तीत्यर्थः। परन्तु स्पष्टमाह अहमिति। शुनां कुक्कुराणामापदो येभ्यस्ते श्वापदा हिंस्रजन्तवो व्याघ्रादयः तेषामनुसरणैः भवद्भिः सार्द्धं पश्चात् पश्चात् धावनैः संक्षोभितानि सञ्चालितानि सन्धिबन्धनानि संयोगस्थानस्थबन्धा येषां तेषाम् अङ्गानां हस्तपदादीनाम् अनीशः सञ्चालनादौ असमर्थः; गुरुतरवेदनानुभवादित्यर्थः। अतएव श्वापदानुसरणे मां प्रत्यनुमतिकरणेन मम गात्रोपघाते भवानेव कारणमिति भावः।

(फ) राजेति। कण्वसुतां शकुन्तलाम्, अनुस्मृत्य चिन्तयित्वा चिन्तया मृगैः सह शकुन्तलायाः सम्पर्कोऽस्तीत्यवधार्य्य।

(প) বিদূষক। ইহা সঙ্গতই হইতেছে যে; তুমি রাজ্যের কার্য্য এবং সেইরূপ নিরাপদস্থান পরিত্যাগ করিয়া, একেবারে ব্যাধবৃত্তি হইয়াছ। আমি তোমার এ প্রশ্নের কি উত্তর দিব; আমি ব্রাহ্মণ হইয়া প্রতিদিন হিংস্রজন্তুর অনুসরণ করিতেছি; তাহাতে আমার প্রত্যেক সন্ধিস্থানের বন্ধনগুলি, স্থানভ্রষ্ট হইয়াছে; সুতরাং আমি নিজের অঙ্গ সঞ্চালন করিতে পারিতেছি না। অতএব আমার প্রতি প্রসন্ন হও; একটী দিনের জন্যও বিশ্রাম কর।

(१) स्वगतम्। अयं चैवमाह। ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः। कुतः।

न नमयितुमधिज्यमुत्सहिष्ये (१)
धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः
कृत इव लोचनकान्तिसंविभागः ॥३॥

नेति। अध्यारूढ़ा ज्या गुणो यत्र तदधिज्यम्, तथा आहितः क्षेपणाय स्थापितः सायको बाणो यत्र तदाहितसायकम्, इदं धनुः, मृगेषु हरिणेषु हरिणान् लक्ष्यीकृत्येत्यर्थः, नमयितुम् आकर्ष्टुम्, न उत्सहिष्ये न शक्ष्यामि। कथमित्याह सहेति। यैः मृगैः, सहवसतिम् एकत्रावस्थानं तन्निबन्धनं सौहार्द्दमिति तात्पर्य्यम्, उपेत्य प्राप्य, प्रियायाः शकुन्तलायाः सम्बन्धे, लोचनयोश्चक्षुषोः कान्तेः शोभायाः संविभागः सम्यग् विभज्य दानं कृत इव। तथा च प्रियायाः सुहृत्सु ममापि सौहार्द्दस्यौचित्यात् आदर-करणमेव न्याय्यं न पुनर्हिंसेत्याशयः।

अत्र पूर्वार्द्धं प्रति परार्द्धवाक्यार्थो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः, वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा च, अनयोः परस्परनिरपेक्षतया संसृष्टिः। उत्प्रेक्षया च हरिणनयनमिव शकुन्तलानयनं सुन्दरमित्युपमा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः।

पुष्पिताग्रा वृत्तम् ॥३॥

(क) রাজা। (স্বগত) ইনি এইরূপ বলিতেছেন; এদিকে শকুন্তলাকে মনে করিয়া, আমার চিত্তও মৃগয়ার প্রতি নিরুৎসুক হইয়াছে। কারণ—

গুণ আরোপিত আছে, বাণও তাহার উপর স্থাপিত রহিয়াছে; তথাপি কিন্তু হরিণগণের প্রতি এ ধনু আকর্ষণ করিতে পারিতেছি না। কারণ, যে হরিণগণ একত্র অবস্থাননিবন্ধন (বন্ধুতাবশতঃ) আপনাদের নয়নের সৌন্দর্য্য, প্রিয়তমা শকুন্তলাকে যেন ভাগ করিয়া দিয়াছে ॥৩॥

(१) अधिक शक्तः।

विदू। (राज्ञो मुखमवलोक्य।) अत्तभवं किम्पि हिअए करुअ मन्तेदि, अरस्से क्खु मए रुदिदं (१)। (ब)

राजा। (सस्मितम्।) अनतिक्रमणीयं सुहृद्वाक्यमिति स्थितोऽस्मि (२)। (भ)

विदू। (सपरितोषम्।) तेण हि तुमं चिरं जीव (३)। (इत्युत्थातुमिच्छति।) (म)

(ब) अत्र भवान् किमपि हृदये कृत्वा मन्त्रयति, अरण्ये खलु मया रुदितम्।

(म) तेन हि त्वं चिरं जीव।

---

(ब) विदू इति। हृदये कृत्वा चिन्तयित्वेत्यर्थः मन्त्रयति स्वयमेव गुप्तं भाषते। अतएव मया खलु अरण्ये रुदितम् अरण्यरोदनमिव अनर्थकमुक्तम्, भवता अन्यमनस्कतया अश्रुतत्वादित्याशयः।

(भ) राजेति। सुहृदो भवतो वाक्यम्, अनतिक्रमणीयम् अलङ्घनीयम्, इति हेतोः, स्थितोऽस्मि अवस्थितोऽस्मि किमपि कथनात् विरतोऽस्मीत्यर्थः।

(म) विदू इति। सपरितोषं परितोषव्यञ्जकं मुखप्रफुल्लतादिकमभिनीयेत्यर्थः। तेन हि मद्वाक्यरक्षणेनैव हेतुना। उत्थातं विश्रामार्थं गमनायेति शेषः।

---

(ব) বিদূষক। (রাজার মুখের দিকে দৃষ্টিপাত করিয়া) তুমি মনে মনে চিন্তা করিয়া কোন বিষয় আলোচনা করিতেছ, আর আমি অরণ্যে রোদন করিলাম।

(ভ) রাজা। (ঈষৎ হাস্যের সহিত) বন্ধুর বাক্য লঙ্ঘন করা যায় না, এই জন্য নীরব রহিয়াছি।

(ম) বিদূষক। (সন্তোষের সহিত) তা হইলে তুমি দীর্ঘজীবী হও। (এই বলিয়া চলিয়া যাইবার জন্য উঠিল।)

---

(१)·· अरस्से मए रुदिदं आसि। (२) किमन्यत्। अनतिक्रमणीयं मे···। (३) विदूषकः। चिरं जीव।

राजा। तिष्ठ, शृणु मे सावशेषं वचः (१)। (य)

विदू। आज्ञापयतु भवं। (र)

राजा। विश्रान्तेन भवता ममान्यस्मिन्ननायासे कर्म्मणि सहायेन भवितव्यम् (२)। (ल)

विदू। किं मोदअ खज्जिआए (३)। (व)

(र) आज्ञापयतु भवान्।

(व) किं मोदकखादिकायाम्।

(य) राजेति। सावशेषम् अवशेषपर्य्यन्तम्। तथा च उक्तमात्रं श्रुत्वा न गन्तव्यम्, वक्ष्यमाणमपि श्रोतुं त्वया स्थातव्यमित्यर्थः।

(ल) राजेति। विश्रान्तेन कृतविश्रामेण। "गत्यर्थाकर्म्मक" इत्यादिना अकर्म्मकात् श्रमेः कर्त्तरि क्तः। अन्यस्मिन् मृगयाभिन्ने, न विद्यते आयासो यस्मिन् तत्र अपरिश्रम-साध्ये इत्यर्थः; अतो न परिश्रमभयादस्वीकारः कर्त्तव्य इति भावः।

(व) विदू इति। मोदकं लड्डुकविशेषस्तस्य खादिकायां खादने किं मया भवतः सहायेन भवितव्यमित्यर्थः। अनायाससाध्यत्वात्तत्र तवाहमवश्यमेव सहायो भविष्यामीति भावः। औदरि प्रायेण खाद्यपरमेव व्यवहरतीति कौतुककरमेतत्।

अत्र नर्म्म नाम प्रतिमुखसन्धेरङ्गम्—"परिहासवचो नर्म्म" इति लक्षणात्।

खादिकेति प्रश्ने खादधातोः "प्रश्नाख्यानयोरिञ् च वा" इति वुञ् प्रत्ययः।

---

(য) রাজা। থাম; শেষপর্য্যন্ত আমার কথা শোন।

(র) বিদূষক। আদেশ কর।

(ল) রাজা। তুমি বিশ্রাম করিয়া, অনায়াসসাধ্য অন্য একটী কার্য্যে আমার সহায় হইবে।

(ব) বিদূষক। কি মোদকভক্ষণে?।

---

(१) वयस्य! तिष्ठ सविशेषं मे वचः। (२)···ममाप्येकस्मिन्···।

(३) किं मोदअखण्डिआए। तेण हि अअं सुगहीदो खणो।

राजा। यद्वक्ष्यामि (१)। (श)

विदू। गहीदो क्खणो (२)। (ष)

राजा। कः कोऽत्र भोः!। (स)

दौवारिकः। प्रविश्य। आणवेदु भट्टा। (ह)

राजा। रैवतक! सेनापतिस्तावदाहूयताम्। (क्ष)

दौवा। तह। इति निष्क्रम्य सेनापतिना सह प्रविश्य। एदु एदु

(ष) गृहीतः क्षणः।

(ह) आज्ञापयतु भर्त्ता।

(श) राजेति। यद्वक्ष्यामि, तत्र सहायेन भवितव्यमित्यर्थः।

विदूषकेण उक्तविधे परिहासे कृतेऽपि राज्ञो धैर्य्यादत्र नर्म्मद्युतिर्नाम प्रतिमुख-सन्ध्यङ्गम्—"धृतिस्तु परिहासजा। नर्म्मद्युतिः" इति लक्षणात्।

(ष) विदू इति। क्षणः समयः श्रवणावसर इत्यर्थः, गृहीतः स्वीकृतः, श्रवण-समाप्तिं यावत् स्थास्यामीति तात्पर्य्यम्।

(स) राजेति। भो इति परिजनसम्बोधने। कः कः परिजनः तिष्ठतीति शेषः।

(ह) दौवेति। द्वारे नियुक्तो दौवारिकः। भर्त्ता स्वामी राजेति यावत्।

(क्ष) राजेति। रेवती नामिकायाः स्त्रिया अपत्यमिति रैवतकः। अपत्यार्थे अण्प्रत्ययान्तात् रैवतशब्दात् सञ्ज्ञायां कप्रत्ययः।

(শ) রাজা। যে বিষয় বলিতেছি।

(ষ) বিদূষক। শুনিবার অবসর লইলাম।

(স) রাজা। ওহে! এখানে কে কে আছ?।

(হ) দৌবারিক। (প্রবেশ করিয়া) মহারাজ আদেশ করুন।

(ক্ষ) রাজা। রৈবতক! সেনাপতিকে ডাক।

(१) यत्र वक्ष्यामि। कः कोऽत्र भोः!। (२) अयं पाठः क्वचित् नास्ति।

अज्जो । एस आलावदिस्सकस्सो भट्टा इध ज्जेव चिट्ठदि, उवसप्पदु णं अज्जो (१) । (क)

सेनापतिः । राजानमवलोक्य स्वगतम् । दृष्टदोषापि मृगया स्वामिनि केवलं गुणायैव संवृत्ता । तथाहि देवः—(२) (ख)

(क) तथा । एतु एतु आर्य्यः । एष आलापदत्तकर्णः भर्त्ता इह एव तिष्ठति, उपसर्पतु एनमार्य्यः ।

(क) दौवेति । तथा यथा भवानाज्ञापयति तथा करोमीत्यर्थः । आलापे तव मम च कथोपकथने दत्तौ प्रेरितौ कर्णौ येन सः, भर्त्ता राजा । आर्य्यः सज्जनो भवान् ।

(ख) सेनापति इति । दृष्टः प्रत्यक्षसिद्धः दोषः हिंस्रजन्तुभ्यो विपत् अथवा श्रमव्याकुलतादिर्यस्यां सा दृष्टदोषापि अन्यस्मिन् जने इत्यर्थः, मृगया पशुहिंसा, स्वामिनि राजनि, केवलमेकम्, गुणायैव गुणसम्पादनायैव । तथाहि तमेवार्थं जानीहि । "तर्थं त्या-गणपरिपठितौ धातुर्गतौ" इति कातन्त्रपरिशिष्टटीकायां गोपीनाथः । देवो राजा । एतच्च बिभर्त्तीतिश्लोकक्रियायाः कर्त्तृपदम् ।

(क) দৌবারিক। তাহাই। (এই বলিয়া নির্গত হইয়া, সেনাপতির সহিত পুনরায় প্রবেশ করিয়া) আসুন আসুন আপনি। এই যে আমাদের আলাপে কাণ দিয়া মহারাজ এইখানেই রহিয়াছেন। আপনি ইঁহার নিকট যান।

(খ) সেনাপতি। (রাজাকে দেখিয়া স্বগত) মৃগয়ার দোষ প্রত্যক্ষ দেখিতে পাইলেও, মহারাজের প্রতি তাহা কেবল গুণেই বর্ত্তিয়াছে। কারণ—

(१)···एसो अत्थावत्थणुक्कण्ठो इदो दिण्णादिट्ठी एव्व भट्टा चिट्ठदि । उवसप्पदु अज्जो ।

(२) सेनापतिः । राजानमवलोक्य । दृष्टदोषापि स्वामिनि मृगया केवलं गुण एव संवृत्ता ।

অনবরতধনুর্জ্যাস্ফালনক্রূরবর্ষ্মা (১)
রবিকিরণসহিষ্ণুঃ স্বেদলেশৈরভিন্নঃ (২)।
অপচিতমপি গাত্রং ব্যায়তত্বাদলক্ষ্যং
গিরিচর ইব নাগঃ প্রাণসারং বিভর্ত্তি ॥৪॥

অনেতি। অনবরতং সততং ধনুষো জ্যায়া গুণস্য আস্ফালনেন ক্রূরং কঠিনং বর্ষ্ম শরীরং যস্য সঃ, অতএব রবিকিরণান্ সূর্য্যরশ্মীন্ সহিষ্ণুঃ ন পুনস্তেভ্যঃ ক্লান্ত ইত্যর্থঃ, তথা স্বেদলেশৈঃ ঘর্ম্মবিন্দুভিঃ অভিন্নঃ অবিগলিতঃ অবিহ্বল ইতি তাৎপর্য্যম্। তেন চ গিরৌ পর্ব্বতে চরতীতি গিরিচরঃ সর্ব্বদা পর্ব্বতসঞ্চারী, নাগো হস্তীব, অপচিতমপি উক্তবিধপরিশ্রমাৎ ক্ষীণমপি, ব্যায়তত্বাৎ পরিচ্ছদপরিহিতত্বেন ব্যায়ততয়া অতিশয়েন বিশালস্থূলতয়া লক্ষ্যমাণত্বাদিত্যর্থঃ, অলক্ষ্যং কৃশতয়া অদৃশ্যম্, তথা প্রাণো বলমেব সারঃ স্থিরাংশো যত্র তৎ প্রাণসারং গাত্রম্ অঙ্গনিবহম্, বিভর্ত্তি ধারয়তি। তথা চ অন্যো রাজা আজন্মসুখলালিততয়া কোমলদেহঃ রবিকিরণাসহিষ্ণুঃ ঘর্ম্মৈর্বিহ্বলঃ হিংস্রজন্তুভ্যো বিপন্নশ্চ ভবতি, অতএব তাদৃশে মৃগয়া দুষ্টদোষৈব; অস্মাকময়ং রাজা তু মৃগয়াবশাদেব কঠিনদেহঃ রবিকিরণসহিষ্ণুঃ ঘর্ম্মৈরবিহ্বলঃ, হিংস্রজন্তুভ্যঃ অবিপন্নশ্চ। অতএব দুষ্টদোষাপি মৃগয়া স্বামিনি কেবলং গুণায়ৈব সংবৃত্তেতি ভাবঃ।

অত্র শ্রৌতোপমালঙ্কারঃ।

"শরীরং বর্ষ্ম বিগ্রহঃ" ইত্যমরঃ। "ব্যায়তং ব্যাপৃতে দীর্ঘে দৃঢ়ে চাতিশয়েঽন্যবৎ" ইতি মেদিনী। মালিনী বৃত্তম্ ॥৪॥

ধনুর গুণ অনবরত আকর্ষণ করায় মহারাজের দেহ কঠিন হইয়াছে, সূর্য্যের কিরণ সহ্য করিতে পারিতেছে এবং ঘর্ম্মবিন্দু নির্গত হওয়ায় বিহ্বল হইতেছে না। অঙ্গসকল কৃশ হইয়া থাকিলেও, পরিচ্ছদাবৃত থাকায় বিশাল বলিয়া, তাহা লক্ষ্য করা যায় না; সুতরাং পার্ব্বত্য হস্তীর ন্যায় ইনি, কেবল বলসার দেহ ধারণ করিতেছেন ॥৪॥

(১) ক্রূক্রূরপূর্ব্বম্, বকর্ম্মা। (২) রবিকিরণসহিষ্ণুস্বেদলেশৈরভিন্নম্।

उपगम्य। जयति जयति स्वामी। स्वामिन्! गृहीतमृगप्रचारं सूचितश्वापदमरण्यम्, तत् किमन्यदनुष्ठीयताम् (१)। (ग)

राजा। भद्रसेन! भग्नोत्साहः कृतोऽस्मि मृगयापवादिना माधव्येन (२)। (घ)

(ग) उपेति। उपगम्य राज्ञः समीपं गत्वा। स्वामी प्रभुः। गृहीतः अवगतः मृगाणां हरिणानां प्रचारो गमनागमनं यस्मिन् तत्, तथा सूचिताः पदचिह्नप्रदर्शनादिना स्ववर्गेषु ज्ञापिताः श्वापदा व्याघ्रादयो हिंस्रजन्तवो यस्मिन् तत्। तथा च अस्मिन्नरण्ये कुत्र देशे हरिणाः प्रचरन्ति कुत्र वा व्याघ्रादयो अवतिष्ठन्ते तत् अवगतमस्माभिरित्यर्थः। एतेन एतदवगमार्थं सेनापतिं प्रति राज्ञ आज्ञा आसीदिति बोध्यम्। तत् तस्मात्, अन्यत् उक्तकार्य्यद्वयभिन्नं किं कार्य्यम्, अनुष्ठीयतां मया क्रियताम्, तदाज्ञाप्यतामित्यर्थः।

(घ) राजेति। भद्रा उत्कृष्टा सेना यस्य स भद्रसेन इति सेनापतेर्नाम, तत्सम्बोधनम्। मृगयापवादिना मृगयाया निन्दाकारिणा, माधवे वसन्ते साधुरिति माधव्यस्तेन तन्नाम्ना विदूषकेणेत्यर्थः। एवञ्च "कुसुमवसन्ताद्यभिधः" इत्यालङ्कारिकनियमः संगृहीत इति ज्ञेयम्। भग्नोत्साहो मृगयां प्रति नष्टोद्यमः। तदद्य न किञ्चिदन्यदनुष्ठातव्यम्, विश्रम्यतामित्याशयः।

(গ) (নিকটে যাইয়া) মহারাজের জয় হউক, জয় হউক। মহারাজ! বনের ভিতরে হরিণগণের বিচরণস্থান জানিয়াছি এবং হিংস্রজন্তুগণেরও অনুসন্ধান করিয়াছি; অতএব আর কি করিব?।

(ঘ) রাজা। ভদ্রসেন! মৃগয়ার অপবাদকারী মাধব্য, মৃগয়াসম্বন্ধে আমাকে ভগ্নোৎসাহ করিয়াছে।

(१) उपेत्य। जयतु स्वामी। गृहीतश्वापदमरण्यं किमतावस्थीयते।

(२)…मन्दोत्साहः…माढव्येन।

সেনা। (জনান্তিকম্।) সখে! মাধব্য! স্থিরপ্রতিজ্ঞো ভব, অহং তাবৎ স্বামিনশ্চিত্তবৃত্তিমনুবর্ত্তিষ্যে। (প্রকাশম্।) দেব! প্রলপত্যেষ বৈধেয়ঃ, ননু প্রভুরেব নিদর্শনম্। পশ্যতু দেবঃ (১)। (ঙ)

মেদশ্ছেদকৃশোদরং লঘু ভবত্যুৎসাহযোগ্যং বপুঃ (২)
সত্ত্বানামপি লক্ষ্যতে বিকৃতিমচ্চিত্তং ভয়ক্রোধয়োঃ।
উৎকর্ষঃ স চ ধন্বিনাং যদিষবঃ সিধ্যন্তি লক্ষ্যে চলে,
মিথ্যা হি ব্যসনং বদন্তি মৃগয়ামীদৃগ্ বিনোদঃ কুতঃ ॥৫॥

(ঙ) সেনেতি। আত্মনা সহাপি বিদূষকঃ সখৈব ব্যবহরতীতি সেনাপতিরপি 'সখে' ইত্যেব সম্বোধয়তি। স্থিরপ্রতিজ্ঞো ভব মৃগয়া নিবর্ত্তনবিষয়ে ইতি শেষঃ। অনুবর্ত্তিষ্যে অনুসরিষ্যামি। বিধেয়ঃ আত্মনঃ কর্ত্তব্যাকর্ত্তব্যজ্ঞানহীনতয়া সর্ব্বেষামেব বচনে স্থিতঃ, বিধেয় এব বৈধেয়ো মূর্খঃ প্রজ্ঞাদিত্বাৎ স্বার্থে অণ্। প্রলপতি অনর্থকং মৃগয়ামপবদতি। নন্বিতি দৃঢামন্ত্রণে। প্রভুর্ভবানেব, নিদর্শনং মৃগয়ায়া উপকারিত্বে দৃষ্টান্তঃ।

মেদ ইতি; বপুঃ শরীরম্, মেদসঃ দেহস্থূলতাসম্পাদকধাতুবিশেষস্য ছেদেন পরিশ্রমাধিক্যাৎ বিনাশেন কৃশং ক্ষীণমুদরম্, যত্র তৎ, অতএব লঘু ভারহীনম্, অতএব চ উৎসাহযোগ্যং সর্ব্বেষ্বেব কর্ম্মসু উদ্যমকরণক্ষমং ভবতি। অপি তথা, সত্ত্বানাং হন্তব্যজন্তূনাম্, ভয়ক্রোধয়োঃ ভয়কালে ক্রোধকালে চেত্যর্থঃ, বিকৃতিমৎ সঞ্জাতবিকারম্,

(ঙ) সেনাপতি। (বিদূষকের নিকট চুপি চুপি) সখে! মাধব্য! তুমি স্থিরপ্রতিজ্ঞ হও; আমি কিন্তু রাজার মনোবৃত্তি অনুসরণ করিব। (প্রকাশ্যে) মহারাজ! এ মূর্খ, অনর্থক বলিতেছে; কারণ, মৃগয়ার উপকারিতাসম্বন্ধে মহারাজই দৃষ্টান্ত। তাহা মহারাজ দেখুন—

(১) মাধব্য! ইতি সম্বোধনং পশ্যতু দেবঃ, ইতি চ ক্বচিৎ নাস্তি।

(২) উত্থানযোগ্যং বপুঃ।

विदू। सरोषम्। अवेहि रे उच्छाहहेतुअ! अत्तभवं पइदिं आवस्सो, तुमं दाव दासीए पुत्तो अडइदो अडइं

चित्तं लक्ष्यते चेष्टाविशेषदर्शनेन अवगम्यते। तथा च सति युद्धेऽपि शत्रूणां भयस्य क्रोधस्य वा प्रागवगमात् बाहुल्येन सुविधैव जायत इति भावः। अपि चेति चार्थः। धन्विनां धनुर्द्धराणाम्, स उत्कर्षः प्राधान्यम्, यत् चले चञ्चले गमनशीले इति यावत्, लक्ष्ये शरव्ये, इषवो बाणाः, सिध्यन्ति कृतकार्य्या भवितुमर्हन्ति जङ्गम-लक्ष्यवेधाय शक्नुवन्तीत्यर्थः। अतएव मृगयां मिथ्या हि मिथ्यैव व्यसनं वदन्ति 'मृगया व्यसनम्' इति मन्वादयो मिथ्यैव ब्रुवन्तीत्यर्थः; व्यसनस्य निरर्थकत्वात् मृगयायास्तु उक्तरीत्या सार्थकत्वादित्याशयः। विशेषतश्च ईदृक् विनोद आमोदः, कुतः मृगया-भिन्नात् कस्मात् कार्य्यात् भवति, अपि तु कुतोऽपि नेत्यर्थः। अतएव एष वैशेषः प्रलपत्ये-वेति भावः।

अत्र मृगयाया व्यसनत्वस्य मिथ्यात्वं प्रति बहुकारणोपन्यासात् समुच्चयोऽलङ्कारः, तथा वदन्तीत्यन्तवाक्यं प्रति पूर्ववाक्यत्रयार्था हेतव इति वाक्यार्थहेतुकं काव्यलिङ्गम् अर्था-पत्तिश्चेति ; एषाञ्च परस्परनिरपेक्षतया संसृष्टिः।

"द्रव्यासु व्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः।

मृगयाया व्यसनत्वमाह मनुः—

"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥"

शार्दूलविक्रीडितं वृत्तम्॥५॥

মৃগয়ার পরিশ্রমে মেদধাতু নষ্ট হওয়ায় উদর কৃশ হয় এবং শরীর হালকা ও উৎসাহের উপযুক্ত হয়; ভয় এবং ক্রোধের সময় জন্তুগণের চিত্তবিকার বুঝিতে পারা যায়; ধনুর্দ্ধরদিগের তাহাই প্রাধান্য যে, গমন-শীল লক্ষ্যের প্রতি বাণগুলি কৃতকার্য্য হইতে পারে। অতএব মহর্ষিরা মৃগয়াকে যে ব্যসন বলিয়াছেন, তাহা মিথ্যা। কারণ, মৃগয়াভিন্ন এমন আমোদ কোথায় পাওয়া যায়॥৫॥

আহিণ্ডন্তো জাৱ সিআলমিঅলোলুঅস্স কস্স বি জিণ্ণরিচ্ছস্স মুহে ণিবড়িদো হোহি (১)। (চ)

রাজা। সেনাপতে! আশ্রমসন্নিকর্ষে স্থিতোঽস্মীতি বচনং তে নাভিনন্দামি। অদ্য তাবত্—(২) (ছ)

(চ) অপেহি রে উৎসাহহেতুক! অয়ংভবান্ প্রকৃতিমাপন্নঃ, ত্বং তাবৎ দাস্যাঃ পুত্রঃ অটবীতঃ অটবীমাহিণ্ডমানঃ যাবৎ শৃগালমৃগলোলুপস্য কস্যাপি জীর্ণঋক্ষস্য মুখে নিপতিতো ভব।

(চ) বিদূ ইতি। অপেহি দূরং গচ্ছ। অয়ংভবান্ মাননীয়ো রাজা, প্রকৃতিমাপন্নঃ মৎপ্রবোধেন স্বভাবং প্রাপ্তঃ। উৎসাহজননাৎ শপতি ত্বামিতি। দাস্যাঃ পুত্রঃ হীন ইত্যর্থঃ, অটবীতঃ অটবীং বনাৎ বনম্, আহিণ্ডমানঃ পর্য্যটন্, শৃগালমৃগলোলুপস্য শৃগালহরিণয়োর্ভক্ষণায় অভিলাষিণঃ। জীর্ণঋক্ষস্য বৃদ্ধভল্লুকস্য।

(ছ) রাজেতি। আশ্রমস্য সন্নিকর্ষে সমীপে। নাভিনন্দামি ন প্রশংসামি ত্বয়াভিহিতং বচনমভিনন্দ্য তদনুসারেণ ন খলু মৃগয়ায়াং প্রবৃত্তো ভবামীত্যর্থঃ; আশ্রমসন্নিকর্ষে অবস্থানেন তত্রত্যপ্রাণিনাং হননস্য নিতরামন্যায্যত্বাদিতি ভাবঃ। অদ্যেত্যস্য গাহন্তামিত্যাদিভিঃ শ্লোকস্থক্রিয়াভিরন্বয়ঃ।

(চ) বিদূষক। (ক্রোধের সহিত) ওহে উৎসাহজনক! তুমি চলিয়া যাও। রাজা প্রকৃতিস্থ হইয়াছেন। দাসীর ছেলে তুমি, এক বন হইতে অন্য বনে বিচরণ করতঃ, শৃগাল ও মৃগলোভী বৃদ্ধ ভল্লুকের মুখে নিপতিত হও।

(ছ) রাজা। সেনাপতি! তপোবনের নিকটে রহিয়াছি;

(১) অবভবং পকিদিং আপণ্ণো। তুমং অডবীদো অড়বীং আহিণ্ডন্তো ণরণাসিআ-লোলুবস্স জিণ্ণরিচ্ছস্স কস্স বিমুহে পড়িস্সসি।

(২) ভদ্র সেনাপতে! আশ্রমসন্নিকৃষ্টে স্থিতাঃ স্মঃ, অতস্তে বচঃ···।

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताड़ितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले (१)
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥६॥

गाहन्तामिति । महिषाः, मुहुर्वारं वारं शृङ्गैस्ताड़ितम् आहतम्, निपीयते अस्मिन्निति निपानं जलाशयस्तस्य सलिलं जलम्, गाहन्ताम् आलोडयन्तु । मृगयातो निवृत्तिवशेन भयाशङ्काभावात् यथास्वभावमाचरन्त्विति भावः । एवमन्यत्रापि । मृगकुलं हरिणसमूहः, छायायाम् अनातपे देशे बद्धं विहितं कदम्बकं समवेतभावो येन तादृशं सत्, रोमन्थं गिलितं वस्तु समुद्गीर्य्य पुनस्तस्य चर्व्वणम्, अभ्यस्यतु पौनःपुन्येन करोतु । वराहपतिभिः शूकरश्रेष्ठैः, विस्रब्धैः भयाशङ्काभावेन आश्वस्तचित्तैः सद्भिः, पल्वले क्षुद्रजलाशये, मुस्ताक्षतिः मूलोत्पाटनेन मुस्तकानां हानिः, क्रियताम् । तथा इदम् अस्मद्धनुश्च, शिथिलः प्रान्तभागद्वये संश्लेषाभावात् श्लथीभूतः ज्याबन्धः एकप्रान्तबद्धगुणो यस्य तत् तथाभूतं सत्, विश्रामं लभतां मृगयानिवृत्त्या बाणक्षेपार्थमाकर्षणाभावादिति भावः ।

अत्र गाहन्ताम् इति बहुवचनेन प्रक्रम्य अभ्यस्यतु इत्येकवचनप्रयोगाद्वचनविषयो भग्नप्रक्रमतादोषः, आत्मनेपदपरस्मैपदाभ्यामन्योऽपि प्रत्ययविषयः; किन्तु महिषा इति मृगकुलमिति च बहुवचनैकवचनाभ्याम् अपरोऽदि वचनविषयः, पुंलिङ्गनपुंसकलिङ्गाभ्याम् अन्यो लिङ्गविषयः, क्रियतामिति कर्म्मणि प्रत्ययात् इतरो वाच्यविषयः, वराहपतिभिरिति बहुवचनात् आत्मवचनविषयः पुनर्लभतामिति कर्त्तरि प्रत्ययादपरोऽपि वाच्यविषय इति सर्व्वे व भग्नप्रक्रमतादोषाः । तेषां समाधानाय च श्लोक एवं पठनीयः—

शृङ्गैः कासरवृन्दमम्बु सरसी भूम्नाहतं गाहतां
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यताम् ।
विस्रब्धं कुरुतां वराहसमितिं मुस्ताक्षतिं पल्वले
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥

(१) विस्रब्धं क्रियतां वराहततिभिः···।

सेना। यथा प्रभविष्णवे रोचते (१)। (ज)

राजा। तेन हि निवर्त्तय पुरोगतान् धनुर्ग्राहिणः। यथा च मे सैनिकास्तपोवनं नाभिरुन्धन्ति दूरात् परिहरन्ति च, तथा निषिद्धव्याः। पश्य—(२) (झ)

एतत्पाठ अभ्यस्यतामिति "उपसर्गादस्यत्यूह्योर्वा" इति पचे वचादित्वादात्मनेपदम्। शार्दूलविक्रीड़ितं वृत्तम् ॥६॥

(ज) सेनेति। प्रभविष्णवे प्रभुत्वशीलाय भवते, यथा रोचते, तथैव भवत्वित्यर्थः। प्रभविष्णव इति "भ्राज्यलङ्कृञ्भुवि" इत्यादिना भवतेरिष्णुच्।

(झ) राजेति। तेन हि विश्रामस्य भवतोऽप्यभिमतत्वेनैव हेतुना। पुरोगतान् अग्रगतान् धनुर्ग्राहिणो धानुष्कान्। नाभिरुन्धन्ति नोत्पीडयन्ति, परिहरन्ति परित्यजन्ति। निषिद्धव्याः सैनिका इत्यन्वयः। ननु तत्रतपोवनाभिरोधे को दोष इत्याह पश्येति। दोषं पर्य्यालोचयेत्यर्थः।

সুতরাং আপনার কথার প্রশংসা করিয়া মৃগয়ায় প্রবৃত্ত হইতে পারি না। অতএব আজ—

মহিষগণ, শৃঙ্গদ্বারা বার বার সন্তাড়িত সরোবরের জলে অবগাহন করুক; হরিণগণ ছায়াতে সমবেত হইয়া, চর্ব্বিত চর্ব্বণ করুক, বৃহৎ শূকরসমূহ, বিশ্বস্তচিত্ত হইয়া, ক্ষুদ্র জলাশয়ের তীরে মুথা নষ্ট করুক এবং শিথিলগুণ আমার এই ধনু, বিশ্রাম লাভ করুক ॥৬॥

(জ) সেনাপতি। প্রভুর যাহা অভিরুচি।

(ঝ) রাজা। তাহা হইলে অগ্রগামী ধনুর্দ্ধরদিগকে নিবৃত্ত করুন। আমার সৈন্যগণ যাহাতে তপোবনের ক্ষতি না করে এবং দূর হইতেই

(१) यत् प्रभविष्णवे रोचते।

(२) तेन हि निवर्त्तय पूर्वगतान् वनग्राहिणः। यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषिद्धव्याः। पश्य—

शमप्रधानेषु तपोवनेषु
गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला अपि सूर्य्यकान्ता
ते ह्यन्यतेजोऽभिभवाद्दहन्ति (१) ॥७॥

सेना । यथाज्ञापयति स्वामी ।

---

शमेति । शमः शान्तिरेव प्रधानं येषु तादृशेषु तपोवनेषु, गूढं हि गुप्तमेव अनभिभवावस्थायाम् अन्यैरलक्षितमेवेत्यर्थः, दाहो भस्मकरणमेव आत्मा स्वभावो यस्य तत् दाहात्मकं तेजः, अस्ति । हि तथाहि, स्पर्शे अनुकूला गूढतेजस्कतया वहिः सुखकरा अपि, ते प्रसिद्धाः, सूर्य्यकान्ताः स्वनामख्याता मणिविशेषाः, अन्यस्य तेजसः सूर्य्यस्येत्यर्थः अभिभवात् स्पर्शेनाक्रमणात्, दहन्ति दाहजनकं तेज उद्गिरन्ति । तथा च यथा वहिः स्पर्शानुकूला अपि सूर्य्यकान्ताः सूर्य्यकिरणाक्रमणात् तेज उद्गीर्य्य दहन्ति ; तथा वहिः शान्तिप्रधानान्येतानि तपोवनानि पराक्रमणात् मुनिगणद्वारा तेज उद्गीर्य्य दग्धीकुर्व्वन्त्वेवेति तपोवनाभिरोधो न कर्त्तव्य एव इत्याशयः ।

अतएवात्र दृष्टान्तोऽलङ्कारः ।

"आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः ।

उपेन्द्रवज्रेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥७॥

---

সে তপোবন পরিত্যাগ করে, সেইভাবে তাহাদিগকে নিষেধ করিয়া দিবেন। দেখুন—

শান্তিপ্রধান তপোবনে দাহকারী একপ্রকার তেজ গুপ্তভাবে রহিয়াছে। স্পর্শযোগ্য সূর্য্যকান্তমণিও অন্য তেজের আক্রমণ হইলে দাহ করিয়া থাকে ॥৭॥

সেনাপতি। প্রভু যাহা আদেশ করেন।

---

(१) स्पर्शानुकूला इव सूर्य्यकान्तास्तदन्यतेजोऽभिभवाद्दहन्ति ।

विदू। भो उच्छाहहेतुअ ! णिक्कम णिक्कम (१)। (ञ)

सेनापतिर्निष्क्रान्तः।

राजा। परिजनानवलोक्य। मृगयावेशमपनयन्तु भवन्तः। रैवतक ! त्वमपि स्वनियोगमशून्यं कुरु (२)। (ट)

रैव। जं महाराओ आणवेदि (३)। इति निष्क्रान्तः। (ठ)

विदू। किदं भवदा णिम्मच्छिअं ; ता इमस्सिं पादव-

(ञ) भोः उत्साहहेतुक ! निष्क्राम निष्क्राम।

(ठ) यत् महाराज आज्ञापयति।

---

(ञ) विदू इति। उत्साहहेतुक ! मृगयां प्रति उत्साहजनक !। हेतुकेति कुत्सायां कप्रत्ययः। कुत्सा च विदूषकस्यैव मते।

(ट) राजेति। अपनयन्तु परित्यजन्तु अद्य मृगयाया अकरणीयत्वादिति भावः। रेवत्याः तदाख्यायाः स्त्रिया अपत्यमिति रैवतः "वाणपत्ये" इत्यण्प्रत्ययान्तात् संज्ञायां कप्रत्ययः। रैवतकेति दौवारिकसम्बोधनम्। स्वनियोगम् आत्मानं प्रति आदेशम्, अशून्यं पूर्णं कुरु आदेशं पालयेत्यर्थः। अथवा स्वनियोगं द्वाररक्षारूपमात्मनोऽधिकारम् अशून्यं पूर्णं कुरु पूर्ववत् द्वारमेवेदानीं रक्षेत्यर्थः।

---

(ঞ) বিদূষক। ওহে উৎসাহজনক! নির্গত হও, নির্গত হও।
(সেনাপতি চলিয়া গেলেন।)

(ট) রাজা। (পরিজনবর্গের প্রতি দৃষ্টিপাত করিয়া) তোমরা মৃগয়াবেশ পরিত্যাগ কর; রৈবতক! তুমিও নিজের স্থান পূর্ণ কর।

(ঠ) রৈবতক। মহারাজ যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল।)

---

(१) धं सदु दे उच्छाहवुत्तन्तो।

(२) परिजनं विलोक्य। अपनयन्तु भवन्तो मृगयावेशम्।...स्वं नियोगं...।

(३) परिजनः। जं देवो आणवेदि।

চ্ছাআ-বিরইদ-বিদাণ-সণাহে সিলাঅলে উৱবিসদু ভবং ;
জাব অহম্পি সুহাসীণো হোমি (১)। (ড)

রাজা। গচ্ছাগ্রতঃ। (ঢ)

বিদূ। এদু এদু ভবং। (ণ)

উভৌ। পরিক্রম্যোপবিষ্টৌ। (ত)

(ড) কৃতং ভবতা নির্ম্মক্ষিকম্‌ ; তদস্মিন্‌ পাদপচ্ছায়া বিরচিত-বিতান-সনাথে শিলাতলে উপবিশতু ভবান্‌ ; যাবদহমপি সুখাসীনো ভবামি।

(ণ) এতু এতু ভবান্‌।

(ড) বিদূ ইতি। মক্ষিকাণামভাব ইতি নির্ম্মক্ষিকম্‌। অভাবার্থে অব্যয়ীভাবঃ। স্থানমিদমিদানীং জনশূন্যং কৃতমিত্যর্থঃ। পাদপানাং বৃক্ষাণাং ছায়য়া বিরচিতং বিহিতং যৎ বিতানং চন্দ্রাতপঃ তৎসনাথে তদ্যুক্তে পাদপচ্ছায়াত্মকবিতানাবৃতে ইতি তাৎপর্য্যম্‌, শিলাতলে প্রস্তরোপরি। সুখং যথা স্যাত্তথা আসীন উপবিষ্টঃ। স্বচ্ছন্দালাপার্থমিতি ভাবঃ।

(ঢ) রাজেতি। অগ্রতঃ পুরতো গচ্ছ, মদভিমুখীভবনায়েতি ভাবঃ।

(ত) উভাবিতি। উভৌ রাজবিদূষকৌ। পরিক্রম্য পাদক্ষেপং কৃত্বা।

(ড) বিদূষক। তুমি স্থানটীকে একেবারে মক্ষিকাশূন্য করিয়াছ ; তা এই প্রস্তরখণ্ডের উপরে উপবেশন কর, বৃক্ষের ছায়া ইহার উপরে চন্দ্রাতপ করিয়া রাখিয়াছে ; আমিও সুখোপবিষ্ট হইতেছি।

(ঢ) রাজা। সম্মুখে যাও।

(ণ) বিদূষক। এস এস তুমি।

(ত) উভয়ে। ( পদক্ষেপ করিয়া উপবেশন করিলেন। )

(১)…তুম্হে এতস্সিং পাঅবচ্ছাআএ বিরইদলদাবিদাণসণাহে আসণে ণিসীদদু ভবং…।

राजा । सखे ! माधव्य ! अनाप्तचक्षुःफलोऽसि ; येन त्वया द्रष्टव्यानां परं न दृष्टम् (१) । (थ)

विदू । णं भवं ज्जेव मे अग्गदो वट्टदि (२) । (द)

राजा । सर्वः खलु कान्तमात्मानं पश्यति । अहन्तु तामेवाश्रमललामभूतां शकुन्तलामधिकृत्य ब्रवीमि (३) । (ध)

(द) ननु भवानेव मे अग्रतो वर्त्तते ।

---

(थ) राजेति । न आप्तं लब्धं चक्षुःफलं रमणीयवस्तुदर्शनरूपं नेत्रप्रयोजनं येन सः । येन हेतुना । द्रष्टव्यानां वस्तूनां मध्ये, परम् उत्कृष्टं वस्तु ।

"दूरानात्मोत्तमाः पराः" इत्यमरः ।

(द) विदू इति । नन्विति राजसम्बोधने । भवानेव द्रष्टव्यानां पर इत्यर्थः, अग्रतो वर्त्तते सम्मुखे तिष्ठति । अतएव कथं द्रष्टव्यानां परं न मया दृष्टमित्याशयः । एतेन राज्ञः परमसुन्दरत्वं व्यज्यते ।

अस्य उत्कृष्टोत्तररूपवाक्यत्वादिदं प्रगमनं नाम प्रतिमुखसन्धेरङ्गम् । यथा दर्पणे—

"प्रगमनं वाक्यं स्यादुत्तरोत्तरम् ।"

(ध) राजेति । सर्वो जनः, आत्मानम् आत्मीयं जनमित्यर्थः, कान्तं सुन्दरं पश्यति । सुन्दरत्वदर्शनं प्रति आत्मीयतायाः प्रयोजकत्वात् भवान् आत्मीयं मां यत् कान्तं पश्यति, न तत्र किञ्चित् वास्तवत्वमिति भावः । आश्रमस्य कण्वतपोवनस्य ललामभूतां भूषणस्वरूपाम् । अधिकृत्य आश्रित्य ।

"ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु" इत्यमरः ।

---

(थ) রাজা। সখে! মাধব্য! তুমি চোখের ফল লাভ কর নাই। যে হেতু তুমি দৃশ্য বস্তুর মধ্যে উৎকৃষ্ট বস্তু দেখ নাই।

(দ) বিদূষক। ওহে! তুমিই যে আমার সম্মুখে রহিয়াছ।

---

(१) माठव्य ! अनवाप्तचक्षुःफलोऽसि, तेन त्वया दर्शनीयं वस्तु न दृष्टम् ।

(२) णं भवं अग्गदो मे वट्टइ । (३) सर्वः कान्तम्…।

বিদূ। স্বগতম্। ভোদু, ণ সে পস্সঅং বড্ঢইস্সং। প্রকাশম্। ভো। জই সা তবস্সিকঞ্ঞআ অণব্ভত্থণীআ, তা কিং তাএ দিট্ঠআএ ? (১)। (ন)

রাজা। ধিঙ্মূর্খ ! (২)*। (প)

(ন) ভবতু, নাস্য প্রশ্রয়ং বর্দ্ধয়িষ্যামি। ভোঃ ! যদি সা তপস্বিকন্যকা অনভ্যর্থনীয়া; তৎ কিং তয়া দৃষ্টয়া ?।

(ন) বিদূ ইতি। ভবতু শকুন্তলামধিকৃত্য অস্ত্বোক্তিরিতি শেষঃ। অস্য রাজ্ঞঃ, প্রশ্রয়ং প্রণয়ং শকুন্তলাং প্রতি অনুরাগমিত্যর্থঃ, ন বর্দ্ধয়িষ্যামি অনুকূলবাক্যেনেতি শেষঃ। সা শকুন্তলা তপস্বিকন্যকা, অতএব অনভ্যর্থনীয়া অপ্রার্থনীয়া। দৃষ্টয়া প্রয়োজনমিতি শেষঃ, ন কিঞ্চিদপীত্যর্থঃ। তপস্বিকন্যাত্বেন ব্রহ্মচারিত্বস্যৈব অবশ্যম্ভাবেন তদভ্যর্থনায়া দর্শনস্য চ নিষ্ফলত্বাৎ প্রতিলোমসংসর্গস্য চ গুরুতরপাপজনকত্বাদিত্যাশয়ঃ।

(প) রাজেতি। হে মূর্খ ! ধিক্ ত্বামিতি শেষঃ। মূর্খত্বেন লোকস্বভাবস্যাপ্যনভিজ্ঞতয়া ত্বাং নিন্দামীতি ভাবঃ। "ধিঙ্ নির্ভর্ৎসননিন্দয়োঃ" ইত্যমরঃ।

(ধ) রাজা। সকলেই আত্মীয় লোককে সুন্দর দেখে; আমি কিন্তু সেই তপোবনের অলঙ্কারস্বরূপা শকুন্তলাকে লক্ষ্য করিয়া বলিতেছি।

(ন) বিদূষক। (স্বগত) হউক, আমি ইহার প্রশ্রয় বাড়াইব না। (প্রকাশ্যে) ওহে ! যদি তিনি তপস্বীর কন্যা বলিয়া প্রার্থনীয় নহেন, তবে তাঁহাকে দেখিয়া ফল কি ?।

(প) রাজা। দূর মূর্খ !।

(১) হোদু, সে অবসরং ণ দাইস্সং। ভো বঅস্স ! ঈ তাবসকঞ্ঞআ অণব্ভত্থণীআ দীসই। (২) ইতি পাঠঃ ক্বচিন্নাস্তি।

निवारितनिमेषाभिर्नेत्रपङ्क्तिभिरुन्मुखः।
नवामिन्दुकलां लोकः केन भावेन पश्यति (१) ॥८॥

न च परिहार्य्ये वस्तुनि दुष्मन्तस्य मनः प्रवर्त्तते (२)। (फ)

विदू। ता कधेहि (३)। (ब)

लोकस्वभावमेव दर्शयति निवारितेति। लोकः सर्व्व एव जनः, उन्मुख ऊर्द्ध-वदनः सन्, निवारितनिमेषाभिः अविरतदर्शनाय निवर्त्तितस्पन्दनाभिः, नेत्रपङ्क्तिभिः नयनश्रेणिभिः, केन भावेन अभिप्रायेण, नवां नवोदिताम्, इन्दुकलां चन्द्ररेखाम्, पश्यति। तथा च यथा अतिदूरवर्त्तित्वादलभ्यत्वनिश्चयेऽपि केवलनयनतृप्तिसाधनाय सर्व्वो लोकः नवोदितां चन्द्रकलां पश्यति; तथा तपस्विकन्यात्वेन अलभ्यत्वनिश्चयेऽपि केवलनयनतृप्तिसाधनाय सा नवीना शकुन्तला दर्शनीयैवेति भावः।

अतएवात्र अप्रस्तुतायाः समाया इन्दुकलायाः प्रस्तुतायाः समायाः शकुन्तलायाः प्रतीतेरप्रस्तुतप्रशंसालङ्कारः। तेन च शकुन्तलादर्शनमतीव प्रीतिकरमिति वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः।

"भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु" इत्यमरः ॥८॥

(फ) सा तपस्विकन्यात्वेन अनभ्यर्थनीया इति यदुक्तं तदपि नेत्याह न चेति। परिहार्य्ये येन केनापि कारणेन परित्याज्ये। तथा च मम मनःप्रवृत्तिवशात् न खलु सा परिहार्य्या, अपि तु सति सम्भवे ग्राह्यैवेत्याशयः।

মানুষ উৰ্দ্ধমুখ হইয়া নির্নিমেষ নয়নে নূতন চন্দ্রকলাকে কোন্ অভিপ্রায়ে দেখিয়া থাকে? ॥৮॥

(ফ) ইহাও জানিও যে, পরিত্যাগযোগ্য বস্তুর প্রতি দুষ্মন্তের মন প্রবৃত্ত হয় না।

(१) अयं श्लोकोऽपि क्वचिन्न दृश्यते।

(२) राजा। सखे! न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते।

(३) अयं पाठः क्वचिन्नास्ति।

राजा।

ललिताप्सरोभवं किल मुनेरपत्यं तदुज्झिताधिगतम्।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् (१) ॥८॥

(व) तत् कथय।

(व) विदू इति। तत् तदा, कथय शकुन्तलावृत्तान्तमिति शेषः।

ललितेति। तत् शकुन्तलेत्यर्थः। अपत्यमिति प्रकंस्यमानलिङ्गत्वात् तदित्यस्य क्लीवत्वम्, "य आधारस्तदधिकरणम्" इतिवत्। ललितायाः सुन्दर्या अप्सरसो मेनकाया भवतीति तथोक्तम्, मुनेर्विश्वामित्रस्य, अपत्यम् औरसी कन्येत्यर्थः, उज्झितम् आदौ तया मेनकया परित्यक्तम्, परञ्च अधिगतं कण्वेन मुनिना लब्धं लालितमिति तात्पर्य्यम्। तथा च शिथिलं श्लथीभूतं वृन्तात् गलितमित्यर्थः अर्कस्य तदाख्यवृक्षस्य उपरि च्युतं पतितम्, नवमालिकाया लतायाः कुसुममिव स्थितम्। तथा च कुसुमं यथा नवमालिका-लतातो विच्छिन्नम्, इयमपि तथा मातुर्मेनकातो विच्छिन्ना; कुसुमं यथा वृन्तात् प्रच्युतम्, एषापि जनकात् विश्वामित्रात् तथा प्रच्युता; कुसुमं यथा अर्कस्योपरि पतितम्, शकुन्तलापि तथा कण्वाश्रमे पतितेति सर्वसामञ्जस्यम्। अतएव "मातृवत् वर्णसङ्कराः" इति स्मृतेः शकुन्तला मे न खलु परिहार्य्या अपि तु ग्राह्यैवेति न अनभ्यर्थ-नीया सफलदर्शना चेति भावः।

अत्र श्रौती उपमालङ्कारः। इदं तावदवधेयम्, शकुन्तलायाः स्वपरिग्रहयोग्यत्व-सूचनाय कस्यचिन्मुनेरसवर्णा चेवसम्भवत्वमात्रप्रदर्शनमपेक्षितम्; तत्र सामान्याभिधानेऽपि सिध्यतीति मेनका इति विशेषमनभिधाय अप्सर इति सामान्याभिधानेऽपि विश्वामित्रस्येति विशेषमनुक्त्वा मुनेरिति सामान्योक्तावपि च न विशेषे अविशेषाख्यदोषः। तथा जनकजननीभूतयोः पुंस्त्रियोर्वैजात्यमात्रप्रदर्शनाय अर्कस्येति नवमालिकेति च दर्शित-मिति न अविशेषे विशेषाख्यदोष इति।

(व) विदूषक। তবে বল।

(१) सुरयुवतिसम्भवं किल।···नवमल्लिकाकुसुमम्।

विदू। विहस्य। भो! जधा पिण्डीखज्जुरेहिं उव्वेजिदस्स तिन्तिड़ीए सद्धा भोदि, तधा अन्तेउर-इत्थिआ-रअण-परिभोइणो भअदो इअं पत्थणा (१)। (भ)

राजा। सखे! तावदेनां न जानासि, येन त्वमेवमवादीः (२)। (म)

(भ) भोः! यथा पिण्डीखर्ज्जूरैरुद्वेजितस्य तिन्तिड्यां श्रद्धा भवति, तथा अन्तःपुरस्त्रीरत्नपरिभोगिनो भवत इयं प्रार्थना।

---

अत्र आख्यानं नाम नाट्यालङ्कारः—"आख्यानं पूर्ववृत्तोक्तिः" इति दर्पणलक्षणात्। उज्झिताधिगतमिति कृष्टमदीकृत इत्यादिवत् कर्म्मधारयः। आर्य्या जातिः ॥९॥

(भ) विदू इति। पिण्डीखर्ज्जूरैः अतीवमधुरैः पिण्डीनामकखर्ज्जूरैः, उद्वेजितस्य तद्भक्षणेन विरक्तीभूतस्य जनस्य, तिन्तिड्याम् अम्लरसवत्यां चिञ्चायाम्, श्रद्धा आकाङ्क्षा। इयं वन्यशकुन्तलाविषया। एतेन अन्तःपुरस्थस्त्रीभ्यः शकुन्तलाया हीनत्वं व्यज्यते।

"पिण्डी तु पिण्डीतगरेऽलाबूखर्ज्जूरभेदयोः" इति मेदिनी।

---

রাজা। তিনি মুনির সন্তান, সুন্দরী অপ্সরার গর্ভে জন্মিয়াছেন; সে অপ্সরা তাঁহাকে ত্যাগ করিয়া চলিয়া গিয়াছিল; আবার কেহ তাঁহাকে পাইয়াছিল। সুতরাং নবমালিকাপুষ্প, বৃন্ত হইতে পরিভ্রষ্ট হইয়া অর্কবৃক্ষের পরে যেমন থাকে, তিনি তেমন ভাবে রহিয়াছেন ॥৯॥

(ভ) বিদূষক। (হাস্য করিয়া) ওহে! অত্যন্ত মিষ্ট খর্জ্জুর ভক্ষণ করিয়া বিরক্ত হইলে পর তিন্তিড়ীভক্ষণে যেমন ইচ্ছা হয়, সেইরূপ তোমারও অন্তঃপুরস্থ রমণীরত্ন সম্ভোগের পর এই আকাঙ্ক্ষা হইয়াছে।

---

(१) जइ कस्सवि पिण्डखज्जुरेहिं उव्वेजिदस्स तिन्तिलीए अहिलासो होइ, तह इत्थिआरअणपरिहाइणो भअदो इअं अब्भत्थणा।

(२) न तावदेनां पश्यसि, येनैवमवादीः।

विदू। तं क्खु रमणीअं णाम, जं भवदोवि विम्हअं उप्पादेदि। (य)

राजा। वयस्य! किं बहुना। (र)

चित्ते निवेश्य परिकल्पितसर्वयोगान्
रूपोच्चयेन विधिना विहिता कृशाङ्गी।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः (१) ॥१०॥

(य) तत् खलु रमणीयं नाम, यत् भवतोऽपि विस्मयमुत्पादयति।

(म) राजेति। एनां शकुन्तलाम्। येन हेतुना। एवं यथेत्यादिकम्। शकुन्तला खलु अन्तःपुरस्थस्त्रीभ्य उत्कृष्टैवेति भावः।

(य) विदू इति। तत् शकुन्तलारूपं वस्तु, रमणीयं नाम परमसुन्दरमिति सम्भावयामि। यत् वस्तु, भवतोऽपि अनन्यरमणीयदर्शनेऽपि अविस्मितस्येत्यर्थः।

(र) राजेति। बहुना प्रचुरेणाभिहितेनेत्यर्थः, किं प्रयोजनमिति शेषः। अल्पाभिधानेनैव सर्वथा भवता ज्ञास्यमानत्वादिति भावः। संख्यावाचकबहुशब्दस्यैव नित्यबहुवचनान्तता; प्रचुरार्थकबहुशब्दस्य तु एकवचनद्विवचनान्ततापि। अतएवात्र एकवचनम्। न्यायकुसुमाञ्जलावपि यथा—"किं बहुना, यं कारवोऽपि विश्वकर्म्मेत्युपाचते" इति।

(ম) রাজা। সখে! তুমি ইহাকে দেখ নাই; সুতরাং এইরূপ বলিতেছ।

(য) বিদূষক। আমি মনে করি—তিনি নিশ্চয়ই সুন্দরী; যে হেতু তোমারও বিস্ময় উৎপাদন করিয়াছেন।

(র) রাজা। সখে! অধিক বলিবার প্রয়োজন নাই।

(१) चित्ते निवेश्य परिकल्पितसत्त्वयोगा रूपोच्चयेन मनसा विधिना कृता नु···।

विदू। सव्वधा पच्चादेसो क्खु सा रूववदीणं (१)। (ल)

(ल) सर्व्वथा प्रत्यादेशः खलु सा रूपवतीनाम्।

चित्त इति। धातुः स्रष्टुः, विभुत्वं सृष्टिसामर्थ्यम्, तस्याः शकुन्तलायाः वपुः शरीरञ्च अनुचिन्त्य विभाव्य वर्त्तमानस्येति शेषः विधातुः सर्वप्रकारनिर्म्माणक्षमताम् अलौकिकसौन्दर्य्यवत् शकुन्तलाशरीरञ्च स्मरत इत्यर्थः, मे मम, परिकल्पिताः तदानीमेव निर्म्मिताः सर्वे योगा उपादानकारणानि तान्, चित्ते निवेश्य मनसि निधाय विधिना सृष्टिकर्त्रा, रूपोच्चयेन सौन्दर्य्यराशिना, विहिता निर्म्मिता, कृशाङ्गी सा शकुन्तला, अपरा साधारणविलक्षणा, स्त्रीरत्नसृष्टिः सर्वश्रेष्ठरूपेण निर्म्मिता स्त्री, प्रतिभाति प्रतीतिगोचरी-भवति, तादृशसुन्दर्य्या अन्यत्रादर्शनादिति भावः।

अत्र शकुन्तलास्त्रीरत्नसृष्ट्योरभेदेऽपि अपरत्वेनेन भेदाध्यवसायादतिशयोक्तिरलङ्कारः, "अयं राजा अपरः पाकशासनः" इति दर्पणोदाहरणवत्।

"योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः। उपाय एव कारणम्। "रूपं स्वभावे सौन्दर्य्ये" इत्यादि मेदिनी। "विभुः प्रभौ" इत्यादि हेमचन्द्रः।

अनुचिन्त्य वर्त्तमानस्येत्यध्याहारात् न कर्त्तृकालहानिरिति बोध्यम्।

वसन्ततिलका वृत्तम् ॥१०॥

(ल) विदू इति। सा शकुन्तला, सर्वथा ध्रुवमेव, रूपवतीनाम् अन्यासां सुन्दरीणाम्, प्रत्यादेशः खलु स्वसौन्दर्य्येण प्रत्याख्यानकारिण्येव इति मन्ये इति शेषः, सर्वत्र दर्शनाभावादिति भावः।

বিধাতার সৃষ্টি করিবার সামর্থ্য এবং শকুন্তলার দেহখানি চিন্তা করিয়া আমার মনে হয় যে, বিধাতা সৃষ্টি করিবার সমস্ত উপকরণ মনে মনে চিন্তা করিয়া কেবল রূপরাশিদ্বারা সেই কৃশাঙ্গীকে সৃষ্টি করিয়াছেন; তাহাতে তিনি অন্যবিধ স্ত্রীরত্ন দাঁড়াইয়াছেন ॥১০॥

(ল) বিদূষক। তিনি তবে অন্য সুন্দরীরমণীগণের একেবারে প্রত্যাখ্যানকারিণী হইয়াছেন।

(१) जइ एव्वं पच्चादेसो दाणिं रूववदीणं।

राजा। इदञ्च मे मनसि वर्त्तते। (व)

अनाघ्रातं पुष्पं, किसलयमलूनं कररुहै-
रनामुक्तं रत्नं, मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति भुवि (१) ॥११॥

अत्र हेतुमता (कार्य्येण) प्रत्यादेशेन सह हेतोः शकुन्तलाया अभेदेनाभिधानात् हेतुर्नामालङ्कारः। तथा च दर्पणे—"अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह।"

"सर्वथा हेतुवाढयोः" इति विश्वः।

(व) राजेति। इदम् इदानीमेवाभिधीयमानम्।

अनाघ्रातमिति। फलमिवेति इवशब्दः पुष्पमित्यादौ सर्वत्र सम्बध्यते योग्यत्वात्। तथा च अनाघ्रातं केनापि अगृहीतगन्धं पुष्पमिव। आघ्राणार्थग्रहणेन कथमपि मर्द्दिततया कथञ्चित्सौन्दर्य्यहानिसम्भावनया अनाघ्रातविशेषणम्। कररुहैर्नखैः, अलूनम् अच्छिन्नं किसलयं पल्लवमिव। नखच्छेदेन पल्लवस्य वैरूप्यापत्तेः कररुहैरलूनमित्युक्तम्। अनामुक्तम् अपरिहितं रत्नमिव। परिधाने घर्षणादिना स्वरूपहानिरित्यत उक्तम् अनामुक्तमिति। अनास्वादितः केनाप्यननुभूतः रसो माधुर्य्यं यस्य तत्, नवं नूतनं न पुनः पर्य्युषितमित्यर्थः मधु इव। पर्य्युषितत्वे आस्वादनार्थग्रहणे च कथमपि स्वभाववैषम्यं स्यादिति नवमनास्वादितरसञ्चेति विशेषणद्वयम्। पुण्याना यागादिजनितधर्म्माणाम्, अखण्डं सम्पूर्णं फलमिव च। फलस्य खण्डत्वे तस्य कथञ्चित् वैकल्यं स्यादिति अखण्डमिति विशेषणम्। अनघं निष्पापं पापजनितकुत्सितत्वादिदोषरहितं मनोज्ञमित्यर्थः, तत् शकुन्तलागतम्, रूपं सौन्दर्य्यम्, इह भुवि अस्यां पृथिव्याम्, कं जनम्, भोक्तारं स्वसम्भोगकर्त्तारम्, उपस्थास्यति उपगमिष्यति इति न जाने। यमुपस्थास्यति स खलु महाभाग्यवानिति भावः।

---

(व) রাজা। ইহাও আমার মনে হয় (যে,)

---

(१) अनाविद्धं रत्नम्…। समुपस्थास्यति विधिः।

विदू। तेण हि लहुं लहुं गच्छदु भवं; मा जाव सा कस्सवि तवस्सिणो इङ्गुदीतेल्लचिक्कणसीसस्स हत्थे णिवड्ढिस्सदि (१)। (अ)

(अ) तेन हि लघु लघु गच्छतु भवान्, मा यावत् सा कस्यापि तपस्विनः इङ्गुदीतैलचिक्कणशीर्षस्य हस्ते निपतिष्यति।

अत इवशब्दस्य पूर्व्वमित्यादौ सर्व्वत्रान्वयात् शोरामचन्द्रदेहादौ अखण्डपुण्यफलत्वस्य प्रसिद्धत्वाच्च मालोपमालङ्कारः, अनाघ्रातमित्यादिविशेषणानां साभिप्रायप्रयोगात् परिकरालङ्कारश्च; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। परिकरालङ्कारेण च शकुन्तलाया रूपं सम्भोगाभावेन सम्पूर्णं स्वस्थम् अभिनवञ्चेति वस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः, श्लोकसमुदायेन च बलवती तत्सम्भोगाकाङ्क्षा व्यज्यत इति वस्तुना वस्तुध्वनिश्च।

अत्र गुणकीर्त्तनं नाम नाट्यलक्षणञ्च। यथा दर्पणे—

"गुणानां कीर्त्तनं यत्तु तदेव गुणकीर्त्तनम्।"

"अनघो निर्म्मलापापमनोज्ञेषु च भेद्यवत्" इति विश्वः। "रूपं स्वभावे सौन्दर्य्ये" इत्यादि मेदिनी।

शिखरिणी वृत्तम्॥११॥

(अ) विदू इति। लघु लघु शीघ्रं शीघ्रम्। सा शकुन्तला। इङ्गुदीतैलेन इङ्गुदीफलसञ्जाततैलव्यवहारेण चिक्कणं समस्तकेशापगमात् मसृणं शीर्षं मस्तकं यस्य तस्य, तपस्विनः तापसस्य दैन्यस्येत्यपि व्यज्यते। तथा च स्त्रीरत्नभूतायाः शकुन्तलायाः सर्व्वप्रकारविलासविहीनस्य विकृतरूपस्य तपस्विनो हस्ते पतनं पश्चिम्बा गोमये अवस्थान-

অনাঘ্রাত পুষ্পের ন্যায়, নখদ্বারা অচ্ছিন্ন পল্লবের ন্যায়, অধৃত রত্নের ন্যায়, অনাস্বাদিতরস নূতন মধুর ন্যায় এবং পুণ্যের অখণ্ডফলের ন্যায় শকুন্তলার সেই মনোহর রূপ, পৃথিবীতে কোন্ ভোক্তার নিকট উপস্থিত হইবে তাহা জানি না॥১১॥

(१) तेण हि लहु परित्ताअदु णं भवं। मा कस्सवि·· इन्दुलितेल्लमिस्सचिक्कणसीसस्स हत्थे पडिहिइ।

राजा । परवती खलु तत्रभवती, न च सन्निहितगुरु-जना (१) । (ष)

विदू । अध तुह उवरि कीदिसो से चित्तराओ (२) । (स)

राजा । वयस्य ! स्वभावादेवाप्रगल्भास्तपस्विकन्यकाः । तथापि तु—(३) (ह)

---

(स) अथ तव उपरि कीदृशः अस्याः चित्तरागः ? ।

---

मिव सर्वेषामेव महादुःखकरमित्यतो लघुगमनमेव भवत उचितम्, येन सा भवत एव हस्ते पततीति भावः ।

(ष) राजेति । तत्रभवती तपस्विकन्यात्वेन माननीया शकुन्तला परवती खलु पराधीनैव । अतएव स्वयमेवात्मप्रदानं कर्त्तुं न शक्नुयादिति भावः । अथ तर्हि गुरुजन एव चेदन्यस्मै ददातीत्याह न चेति । सन्निहितो गुरुजनः प्रभुभूतः पित्रादि-जनो यस्याः सा तादृशी च न । अतो गुरुजनेनापि दानासम्भवात् सहसैव तस्याः परहस्ते पतनमसम्भवमेवेति भावः ।

(स) विदू इति । अस्याः शकुन्तलायाः, चित्तरागः मनसोऽनुरागः । अनुरागा-भावे तत्प्राप्तिकामना नितरामनर्थिकैवेत्याशयः ;

---

(শ) বিদূষক। তবে তুমি সত্বর সত্বর যাও; যে পর্য্যন্ত তিনি, ইঙ্গুদীতৈল ব্যবহার করায় চক্‌মকেমাথা কোন তপস্বীর হাতে না পড়েন।

(ষ) রাজা। তিনি পরাধীনা; গুরুজনও নিকটে নাই।

(স) বিদূষক। তোমার উপরে তাঁহার মনের অনুরাগ কিরূপ ?।

---

(१)···न च सन्निहितोऽस्य गुरुजनः ।

(२) अत्रभवन्तं अन्तरेण कीदिसो से दिट्ठिराओ ।

(३) निसर्गादेवाप्रगल्भस्तपस्विकन्याजनः···।

अभिमुखे मयि संहृतमीक्षितं
हसितमन्यनिमित्तकथोदयम्।
विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः (१) ॥१२॥

(ह) राजेति। अप्रगल्भा अधृष्टा अतीवमुग्धा इत्यर्थः। नागरजनैरालापस्याप्य-सम्भवादिति भावः।

अभिमुख इति। मयि अभिमुखे तत्सम्मुखे तन्मुखोपरि दृष्टिपातकारिणि सतीत्यर्थः; तया ईक्षितं मन्मुखोपरि दृष्टिदानम्, संहृतं संहृतम् आकृष्यान्यत्र प्रवर्त्तितमिति तात्पर्य्यम्। तथा अन्यदेव निमित्तं यस्याः सा चासौ कथा चेति सा तस्या उदय उत्पत्तिर्यस्य तादृशम्, तथा हसितं हास्यं कृतम् अहास्यकारणीभूतामपि कथा-मवलम्ब्य हास्यं कृतमित्यर्थः। अतः कारणात्, तया शकुन्तलया, विनयेन स्वशिक्षया वारिता निवर्त्तिता वृत्तिः प्रसारो यस्य स तादृशः, मदनः कामः न विवृतः ईक्षणसंवरणात् न प्रकटितः, न च संवृतः तादृशहसितात् न वा गोपितः।

अतएवात्र यथासंख्यमलङ्कारः।

"विनयः शिक्षाप्रणत्योर्विनया तु बलौषधौ" इति हेमचन्द्रः।

द्रुतविलम्बितं वृत्तम्—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥१२॥

(ह) রাজা! সখে! তপস্বিকন্যারা স্বভাবতই অপ্রগল্ভা। কিন্তু তাহা হইলেও—

আমি অভিমুখ হইলে, তিনি চোখ সরাইয়া নিয়াছেন; অন্য কথা উপলক্ষ্যে তিনি হাসিয়াছেন। অতএব তাঁহার কামপ্রবৃত্তি, বিনয়-দ্বারা রুদ্ধ হইয়াছিল; সুতরাং তিনি সে কাম, প্রকাশিতও করেন নাই, সংবৃতও করেন নাই ॥১২॥

(१)···मयि संहृतम्। कृतोदयम्।

विदू। विहस्य। किं दिट्ठिमेत्तेण ज्जेव भग्नदो अङ्कं आरोहदु (१)। (च)

राजा। सखीभ्यां मिथः प्रस्थाने पुनः सलीलया तत्रभवत्या मयि भूयिष्ठमाविष्कृतो भावः। तथाहि—(२) (क)

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।

(च) किं दृष्टिमात्रेणैव भवतः अङ्कम् आरोहतु।

(च) विदू इति। राज्ञोऽधिकाकाङ्क्षानुमानात् विहसितम्। अङ्कं क्रोड़म्, आरोहतु अधिरोहेत्, शकुन्तलेति शेषः, कथमपि नेत्यर्थः।

आरोहत्विति "विध्यादिषु सप्तमी च" इति सम्भावनायां पञ्चमी।

(क) राजेति। अप्रथमे पुनःशब्दः सखीभ्याम् अनसूयाप्रियंवदाभ्यां सहेति शेषः, मिथो रहसि सख्योरग्रगमनात् निर्जनावस्थायामित्यर्थः, प्रस्थाने उटजं प्रति प्रस्थानकाले, सलीलया सविलासया, तत्रभवत्या शकुन्तलया, मयि मद्विषये, भावोऽनुरागः, भूयिष्ठं बहुलं यथा स्यात्तथा आविष्कृतः प्रकाशितः। कीदृशो भाव इत्याह तथाहीति।

"मिथोऽन्योन्यं मिथो रहः" इति विश्वः। "भावः सत्तास्वभावाभिप्रायचेष्टात्म-जन्मसु। क्रियालीलापदार्थेषु विभूतिबुधजन्तुषु। रत्यादौ" इति मेदिनी।

(क्ष) বিদূষক। (হাস্য করিয়া) দেখিবামাত্রই কি তোমার কোলে উঠিবেন।

(ক) রাজা। তিনি সখাদের সহিত প্রস্থান করিবার সময়ে নির্জ্জন অবস্থায় আমার প্রতি বিলাসের সহিত বহুতর ভাব প্রকাশ করিয়াছেন। তাহাই বলিতেছি—

(१) न खलु, दिट्ठिमेत्तस्स तुह अङ्कं आरोहदु।

(२) मिथः प्रस्थाने पुनः शालीनतयापि काममाविष्कृतो भावस्तत्रभवत्या। तथाहि—

आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥१३॥

विदू। गहीदपाधेओ किदोम्हि तए। अदो अणुरत्तं तपोवणं त्ति तक्केमि (१)। (ख)

(ख) गृहीतपाथेयः कृतोऽस्मि तया। अतः अनुरक्तं तपोवनमिति तर्कयामि।

दर्भेति। तन्वी कृशाङ्गी सा शकुन्तला, कतिचित् कतिपयानि पदानि गत्वैव, अकाण्डे अनवसरे हठादित्यर्थः, दर्भाङ्कुरेण कुशाग्रेण, चरणः क्षतो विदीर्णः, इति उक्त्वेति शेषः, स्थिता मम दर्शनार्थम् अवस्थिता। तथा द्रुमाणां वृक्षाणाम्, शाखासु विटपेषु, असक्तमपि अलग्नमपि, वल्कलं परिहितवल्कवसनम्, विमोचयन्ती विमोचनम् अभिनयन्ती सती, विवृत्तं मद्दर्शनार्थं परावर्त्तितं वदनं मुखं यया सा तादृशी च आसीत्। दर्भाङ्कुरेण चरणक्षतव्याजेनावस्थानं वल्कलविमोचनच्छलेन वदनविवर्त्तनञ्च भावाविष्कारलक्षणमिति।

अत्र उद्भिन्नस्य दुष्मन्तावलोकनार्थावस्थानस्य चरणक्षतव्याजेन गोपनात् एका व्याजोक्तिः, तथैव उद्भिन्नस्य दुष्मन्तावलोकनार्थमेव वदनविवर्त्तनस्य वल्कलविमोचन-व्याजेन गोपनात् अपरापि व्याजोक्तिः; अनयोः परस्परनिरपेक्षतया संसृष्टिः।

"काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु" इत्यमरः।

वसन्ततिलका वृत्तम् ॥१३॥

(ख) विदू इति। तया शकुन्तलया, गृहीतं प्राप्तं पाथेयं पथिव्ययोपयोगि धनं येन स तादृशः कृतोऽस्मि; सानुरागदृष्टिदानात् तेनैव च पथिकष्टनिवारणादिति

কৃশাঙ্গী শকুন্তলা, কয়েক পা যাইয়াই, "কুশের আগায় পা ক্ষত হইয়াছে" এই ছল করিয়া হঠাৎ দাঁড়াইয়াছিলেন এবং পরিহিত বল্কল, বৃক্ষের শাখায় সংলগ্ন না হইলেও, তাহা মুক্ত করিবার ছলে আমার দিকে মুখ ফিরাইয়াছিলেন ॥১৩॥

(१) तेण हि गहीदपाहेओ होदि। किदं तुए उववणं तपोवणं त्ति पेक्खामि।

राजा। सखे! तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन पुनराश्रमपदं गच्छामः (१)। (ग)

विदू। को अवरो अवदेसो ; तुमं भवं राआ (२)। (घ)

राजा। ततः किम्? (३)। (ङ)

(घ) कः अपरः अपदेशः ; ननु भवान् राजा।

---

भावः। अतः शकुन्तलाया एव अनुरक्तत्वात्, तपोवनमेव अनुरक्तं जातमिति शेषः। इति तर्कयामि मन्ये ; शकुन्तलाया एवेदानीं समस्ततपोवनस्याधिष्ठातृत्वात् तस्याश्चानुरक्तत्वात् अधिष्ठातृभावस्य अधिष्ठितेन स्वभावत एव ग्रहणीयत्वादित्याशयः।

(ग) राजेति। परिज्ञातोऽस्मि अत्राहमागत इत्यवगतोऽस्मि। तथा च यदि तपस्विभिरज्ञातः अभविष्यम्, तदा गोपनभावेन गमनागमने कृताश्च तपस्विभिर्दर्शने प्रथममेवायमागत इत्युक्त्वा दोषमुक्तः अभविष्यम् ; किन्तु तपस्विभिः परिज्ञातत्वे सति गोपनभावेन गमनागमने कृताश्च तैर्दर्शने मम दुरभिसन्धिं ते जानीयुरिति भावः। अपदेशेन छलेन। अत्र तापनं नाम प्रतिमुखसन्धेरङ्गम्—"उपायादर्शनं यत्तु तापनं नाम तद्भवेत्" इति दर्पणलक्षणात्।

(घ) विदू इति। नन्वित्यवधारणे।

(খ) বিদূষক। তবে তিনি তোমাকে পাথেয় গ্রহণ করাইয়া দিয়াছেন, অতএব আমি মনে করি, সম্পূর্ণ তপোবনই তোমার প্রতি অনুরক্ত হইয়াছে।

(গ) রাজা। সখে! অনেক তপস্বী আমাকে জানিয়াছেন। অতএব চিন্তা কর দেখি, কোন্ ছলে আবার তপোবনে যাই।

(ঘ) বিদূষক। অন্য কোন ছলে হইবে, তুমি যে রাজা।

---

(१)…केनापदेशेन सकृदपि आश्रमे वसामः।

(२)…अवदेसो तुम्हाणं राआणं णीवारच्छट्ठभाअं अम्हाणं उवहरन्तु त्ति।

(३) पाठोऽयं कुत्रचित् न दृश्यते।

विदू। णीवारच्छट्ठभाअं तावसा मे उवहरन्तु त्ति (१)। (च)

राजा। मूर्ख! अन्यमेव भागधेयमेते तपस्विनो मे निर्वपन्ति, यो रत्नराशीनपि विहायाभिनन्द्यते। पश्य—(२) (छ)

---

(च) नीवारषष्ठभागं तापसा मे उपहरन्तु इति।

---

(ङ) राजेति। ततः किं राजत्वमात्रात् कोऽपदेशो भवितुमर्हतीति भावः।

(च) विदू इति। नीवाराणां मुनिधान्यानाम्, षष्ठभागम्। उपहरन्तु करत्वेन ददतु। करादानमेव पुनराश्रमपदगमनस्यापदेशः अस्त्विति भावः।

अहो! बुद्ध्यनुरूप एवायं विदूषकस्य स्थूलापदंशापदेशः।

धान्यानामधिकाल्पत्वभेदेन षष्ठमादिभागः करत्वेन राज्ञा ग्राह्य इत्याह मनुः—

"पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा॥"

(छ) राजेति। अन्यमेव धनभिन्नमेव, भागधेयं करम्। निर्वपन्ति ददति। यो भागधेयः, अभिनन्द्यते प्रशस्यते। कोऽसौ भागधेय इत्याह पश्येति।

"भागधेयः करो बलिः" इत्यमरः।

अत्र मूर्ख इत्यनेन प्रत्यक्षनिष्ठुरोक्तेर्वज्रं नाम प्रतिमुखसन्धेरङ्गम्—"प्रत्यक्षनिष्ठुरं वज्रम्" इति दर्पणलक्षणात्।

---

(ঙ) রাজা। তা'তে কি ?।

(চ) বিদূষক। তপস্বীরা উড়ীধানের ছয় ভাগের এক ভাগ আমাকে খাজনা দিন।

(ছ) রাজা। মূর্খ! এই তপস্বীরা অন্য প্রকার খাজনাই আমাকে দিয়া থাকেন, লোকে রত্নরাশি পরিত্যাগ করিয়াও যাহার আদর করে। দেখ—

(१) अयमपि क्वचित् नास्ति। (२) मूर्ख! अन्यद्भागधेयमेतेषां रक्षणे निपतति, यत् रत्नराशीनपि विहायाभिनन्द्यम्। पश्य—

যদুত্তিষ্ঠতি বর্ণেভ্যো নৃপাণাং ক্ষয়ি তদ্ধনম্ ।
তপঃষড্ভাগমক্ষয্যং দদত্যারণ্যকা হি নঃ (১) ॥১৪॥

যদিতি । নৃপাণাং রাজ্ঞাম্, বর্ণেভ্যো ব্রাহ্মণাদিভ্যঃ, যৎ উত্তিষ্ঠতি করত্বেন গৃহমাগচ্ছতি, তদ্ধনম্, ক্ষয়ি বঙ্কতস্করাদিনা ক্ষয়শীলম্, তথৈব প্রত্যক্ষদর্শনাদিতি ভাবঃ । কিন্তু আরণ্যকা বনবাসিনস্তপস্বিনঃ, অক্ষয্যং হি বহ্নিতস্করাদিনা ক্ষেতুমশক্যমেব, তপঃ ষড্ভাগং স্বস্বকৃততপস্যায়াঃ ষষ্ঠমংশম্, নঃ অস্মভ্যং রাজভ্য ইত্যর্থঃ দদতি অপ্রত্যক্ষভাবেন অর্পয়ন্তি ; ন্যায়তঃ শাস্ত্রতশ্চেতি তাৎপর্য্যম্ । অতশ্চ তপস্বিভ্যো ধনাত্মককরগ্রহণস্য কদাপ্যকৃতত্বাৎ তদাদানাপদেশেন তপোবনগমনমসম্ভবমেবেতি ভাবঃ ।

অত্র ক্ষয়িণঃ সাধারণধনাৎ তপসঃ অক্ষয্যত্বেন প্রাধান্যপ্রতিপাদনাৎ ব্যতিরেকালঙ্কারঃ । আরণ্যকপদেন বনবাসিমাত্রবোধকতয়া ব্যাধাদিবোধনেঽপি তৈঃ তপঃষড্ভাগদানাসম্ভবাৎ আরণ্যকপদেনৈব তপস্বিনঃ প্রত্যায্যন্ত ইতি ন বিশেষে অবিশেষাখ্যদোষঃ ।

ক্ষয়ীতি "জীণ্দৃক্ষিবিশ্রিপরিভূবমাভ্যমাব্যথাং চ" ইতি তাচ্ছীল্যে ক্ষয়তেরিন্‌প্রত্যয়ঃ । ষড্ভাগশব্দেনৈব ষষ্ঠো ভাগঃ প্রতিপাদ্যতে, বৃত্তিবিষয়ে সংখ্যাশব্দানাং পূরণার্থত্বাঙ্গীকারাৎ "বিভাগশেষাসু নিশাসু চ ক্ষণম্" ইতি কুমারসম্ভবশ্লোকব্যাখ্যানাবসরে মল্লিনাথেনাপি এবমেব সিদ্ধান্তিতত্বাৎ । অক্ষয্যমিতি ক্ষয়তেঃ স্বরাদ্যঃ সাম্যন্তত্বাৎ গুণঃ, "জিক্ষ্যোঃ শক্য" ইতি যকারস্য স্বরবদ্ভাবাৎ "এ অয়্" ইত্যয়াদেশঃ ।

রাজা করত্বেন তপসোঽপি ষড্ভাগং গৃহ্ণাতীত্যাহ স্মৃতিঃ—

"যদধীতে যদ্যজতে যদ্দদাতি যদর্চ্চতি ।
তস্য ষড্ভাগভাগ্ রাজা সম্যগ্ভবতি রক্ষণাৎ ॥" ॥১৪॥

---

ব্রাহ্মণাদি বর্ণসমষ্টি হইতে খাজনারূপে রাজাদের যে ধন উঠে, সে ধন ক্ষয় পাইয়া যায় ; কিন্তু বনবাসী তপস্বীরা আমাদিগকে তপস্যার ছয় ভাগের এক ভাগরূপ অক্ষয় ধন দিয়া থাকেন ॥১৪॥

---

(১)···ক্ষয়ি তৎ ফলম্ ।

नेपथ्ये। हन्त! सिद्धार्थौ स्वः। (ज)

राजा। कर्णं दत्त्वा। अये! प्रशान्तस्वरैस्तपस्विभिर्भवितव्यम् (१)। (झ)

प्रविश्य दौवारिकः। जअदु जअदु भट्टा। एदे दुवे इसिकुमारआ पड़िहारभूमिं उवत्थिदा (२)। (ञ)

राजा। अविलम्बं प्रवेशय तौ (३)।

दौवा। जं भट्टा आणवेदि। इति निष्क्रम्य ऋषिकुमाराभ्यां सह पुनः प्रविश्य। इदो इदो भवन्ता (४)। (ट)

(ञ) जयतु जयतु भर्त्ता। एतौ द्वौ ऋषिकुमारौ प्रतिहारभूमिम् उपस्थितौ।

(ज) नेपथ्य इति। हर्षे हन्तशब्दः। सिद्धार्थौ सम्पन्नप्रयोजनौ, स्व आवामित्यादिः; राज्ञः साक्षात्कारलाभादिति भावः। नेपथ्यात् ऋषिकुमारयोरुक्तिरियम्।

(झ) राजेति। कर्णं दत्त्वा "हन्त! सिद्धार्थौ स्वः" इति शब्दं प्रति कर्णमवहितीकृत्येत्यर्थः। अये इति सम्भ्रमे। प्रशान्तस्वरैः अकर्कशकण्ठैः। मन्ये तपस्विनामिवेयमुक्तिः प्रशान्तस्वरत्वादित्यर्थः।

(ञ) प्रविश्येति। प्रतीहारभूमिं द्वारदेशम्। "स्त्री द्वार्द्वारं प्रतीहारः" इत्यमरः। उपस्थितौ उपागतौ। तयोर्विषये कानुमतिरिति भावः।

(জ) নেপথ্যে। ভাল, আমাদের প্রয়োজন সিদ্ধ হইয়াছে।

(ঝ) রাজা। (কাণ দিয়া) ওহে! যখন শান্ত স্বর, তখন তপস্বীরাই হইবেন।

(ঞ) দৌবারিক। (প্রবেশ করিয়া) মহারাজের জয় হউক, জয় হউক। এই দুইজন মুনিকুমার দ্বারদেশে উপস্থিত হইয়াছেন।

রাজা। তাঁহাদিগকে সত্বর প্রবেশ করাও।

(१)·· धीरप्रशान्तस्वरैः···। (२) जेदु जेदु ··। (३) तेन हि अविलम्बितं···।
(४) एदौ पवेसेमि।···भअवन्ता।

उभौ। राजानं विलोकयतः। (ठ)

एकः। अहो! दीप्तिमतोऽपि विश्वसनीयताऽस्य वपुषः। अथवा उपपन्नमेतदस्मिन् ऋषिकल्पे राजनि। कुतः—(१) (ड)

अध्याक्रान्ता वसतिरमुनाऽप्याश्रमे सर्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति।

(ट) यत् भर्त्ता आज्ञापयति। इत इतो भवन्तौ।

(ट) दौवेति। इत इतः अनेनानेन पथा, भवन्तौ आगच्छतामिति शेषः। इत इति "सर्वविभक्तिभ्यस्तस्" इति तृतीयान्तात्तस्।

(ठ) उभाविति। ऋषिकुमारावित्यर्थः, राजानं विलोकयतः विलोकनेन राज्ञो भावं निरूपयत इत्यर्थः।

(ड) एक इति। ऋषिकुमारयोर्मध्ये कश्चिदित्यर्थः। अहो इति आश्चर्ये। अस्य राज्ञः, दीप्तिमतोऽपि महातेजःशालिनोऽपि वपुषो देहस्य, विश्वसनीयता सद्व्यवहार-कारित्वेनैव विश्वास्यता। तथा च प्रायेणैव तेजस्विन उग्रस्वभावतया उद्वेजकतैव स्यात्; अस्य तु तेजस्वित्वेऽपि विश्वसनीयतैव इत्याश्चर्य्यमेवेति भावः। एतत् विश्वसनीयत्वम्, उपपन्नं युक्तम्।

(ট) দৌবারিক। প্রভু যাহা আদেশ করেন। (ইহার পর নির্গত হইয়া ঋষিকুমারদ্বয়ের সহিত পুনরায় প্রবেশ করিয়া) আপনারা এদিকে আসুন।

(ঠ) (মুনিকুমারেরা রাজাকে দেখিতে লাগিলেন।)

(ড) একজন মুনিকুমার। ওহে! তেজস্বী হইলেও ইঁহার দেহে বিশ্বাসের যোগ্যতা আছে। অথবা ঋষিতুল্য এই রাজাতে ইহা সম্ভবই বটে। কারণ,

(१)···उपपन्नमेतदृषिभ्यो नातिभिन्ने···।

अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्वः ॥१५॥

अध्येति । अमुना दुष्मन्तेनापि, सर्वाणि भोग्यानि स्त्रीसंसर्गसुखादीनि यस्मिन् तत्र, अन्यत्र तु सर्वैर्धार्म्मिकजनैः भोग्ये भोगयोग्ये, आश्रमे गार्हस्थ्ये तपोवने च वसतिरवस्थानम्, अध्याक्रान्ता अवलम्बिता । अतएव आश्रमवासित्वादयमपि ऋषिरेवेति भावः । अयं दुष्मन्तोऽपि, रक्षायोगात् प्रजानां पालनसम्बन्धात्, प्रत्यहं तपः कृच्छ्र-चान्द्रायणादिकं पवित्रं धर्म्मञ्च, सञ्चिनोति संगृह्णाति । अतश्च तपःसञ्चयादयमपि ऋषि-रेवेत्याशयः । तथा वशिनः जितेन्द्रियस्य, अस्य दुष्मन्तस्यापि, केवलं प्रकृतमुनिभ्यो विशेषेणेत्यर्थः, राजा इत्यानुपूर्वीकः शब्दः पूर्वस्मिन् यस्य सः, पुण्यः पवित्रः 'मुनिः' इति शब्दः 'राजमुनिः' 'राजर्षिः' इत्याद्युपाधिरित्यर्थः, मुहुर्वारं वारम्, चारयन्ति प्रख्यापयन्ति यशस्विनां यशांसीति चारणा नटाः तेषां द्वन्द्वैर्मिथुनैर्दम्पतिभिरित्यर्थः गीतः कीर्त्तितः सन्, द्यां स्वर्गम्, स्पृशति गच्छति । अतश्चास्य राजत्वात् दौर्मिमतः ऋषित्वाच्च शान्तस्य वपुषो विश्वसनीयतायां किमपि नाश्चर्य्यमिति भावः ।

अत्र 'ऋषिकल्पे राजनि' इति पूर्वमुक्तत्वात् द्वयोरपि ऋषिराज्ञोः प्रस्तुतत्वं ज्ञेयम् । तेन उभयोरपि ऋषिराज्ञोः वसत्यध्याक्रमणात्मकक्रियारूपैकधर्म्माभिसम्बन्धात् तपः-सञ्चयात्मकक्रियारूपैकधर्म्माभिसम्बन्धात् मुनिशब्दात्मकगुणरूपैकधर्म्माभिसम्बन्धाच्च तुल्य-योगितालङ्कारत्रयम्, 'केवलं राजपूर्वः' इत्यनेन इतरऋषिभ्य आधिक्यप्रतिपादनात् व्यतिरेकालङ्कारस्य, अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः ।

तथा अध्याक्रान्तेत्यादीन् बहून् प्रसिद्धान् सामान्यधर्म्मानुक्त्वा 'केवलं राजपूर्वः' इत्यनेन विशेषोक्तेर्विशेषणं नाम नाट्यलक्षणम्—"यत्रान् सिद्धान् बहूनुक्त्वा विशेषोक्ति-र्विशेषणम्" इति दर्पणलक्षणात् ।

"आश्रमो ब्रह्मचर्य्यादौ वानप्रस्थे वने मठे । अस्त्रियाम्" इति मेदिनी । "अथ कृच्छ्रो" ... इति त्रिकाण्डशेषः । "भरता इत्यपि नटाश्चारणाश्च कुशीलवाः" इत्यमरः ।

प्रजापालने राज्ञो धर्म्ममाह मनुः—

দ্বিতীয়:। সখে! অয়ং স বলভিৎসখো দুষ্মন্তঃ? (১)। (ঢ)

প্রথমঃ। অথকিম্। (ণ)

দ্বিতীয়ঃ। তেন হি—(ত)

"সংগ্রামেষ্বনিবর্ত্তিত্বং প্রজানাঞ্চৈব পালনম্।
শুশ্রূষা ব্রাহ্মণানাঞ্চ রাজ্ঞাং শ্রেয়স্করং পরম্॥"

মন্দাক্রান্তা বৃত্তম্॥১৫॥

(ঢ) দ্বিতীয় ইতি। দ্বিতীয়: পূর্ব্বভিন্ন ঋষিকুমার ইত্যর্থঃ। স প্রসিদ্ধঃ, বলং তদাখ্যমসুরং ভিনত্তি বিনাশয়তীতি বলভিদিন্দ্রঃ, তস্য সখেতি বলভিৎসখঃ "রাজাহঃসখিভ্যষ্টচ্" ইতি টজাদিত্বাৎ টচ্। অত্র কাক্বা প্রশ্নো ব্যজ্যতে।

"বলারাতিঃ শচীপতিঃ" ইত্যমরঃ।

(ণ) প্রথম ইতি। অথকিমিত্যেকমেব অঙ্গীকারার্থমব্যয়ম্।

"অঙ্গীকারেঽপি চাথকিম্" ইতি হারাবলী।

(ত) দ্বিতীয় ইতি। তেন হি দুষ্মন্তত্বেনৈব হেতুনা।

ইনিও, সর্ব্বভোগ্য আশ্রমে বাস করেন, প্রজা পালন করায় ইনিও প্রত্যহ তপস্যা সঞ্চয় করেন এবং জিতেন্দ্রিয় এই মহাত্মারও 'মুনি' এইরূপ পবিত্র নাম আছে, তবে তাঁহার পূর্ব্বে 'রাজ' এই শব্দটী অধিক; সেই 'রাজমুনি বা রাজর্ষি' শব্দ, নটদম্পতিগণকর্তৃক কীর্ত্তিত হইয়া স্বর্গ স্পর্শ করিয়া থাকে॥১৫॥

(ঢ) দ্বিতীয়মুনিকুমার। সখে! ইনি কি সেই ইন্দ্রের সখা দুষ্মন্ত?।

(ণ) প্রথমমুনিকুমার। হাঁ।

(ত) দ্বিতীয়মুনিকুমার। তাহা হইলে—

(১) গৌতম! অয়ং সঃ…।

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्रीम्
एकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते समितिषु सुराः सक्तवैरा हि दैत्यैः
अस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे (१) ॥१६॥

नैतदिति । नगरस्य नगरद्वारस्य यः परिघः अर्गलं तद्वत् प्रांशू दीर्घौ बाहू यस्य सः, एक एव अयं दुष्मन्तः, उदधिः समन्तात् परिवेष्टनकारी समुद्र एव श्यामा तज्जलस्य श्यामत्वात् श्यामवर्णा सीमा यस्याः ताम्, कृत्स्नां समग्राम्, धरित्रीं पृथिवीम्, यत् भुनक्ति पालयति; एतत् चित्रम् आश्चर्यं न; एकस्यैव समग्रपृथिवीपालनम् आश्चर्यमेव भवितुमर्हति, किन्तु अस्मिन् तदाश्चर्यं नेत्यर्थः । कुत इत्याह हि यस्मात्, दैत्यैः सह सक्तं प्रवृत्तं वैरं विरोधो येषां ते, सुरा देवाः, समितिषु युद्धेषु, अधिज्ये आरोपितगुणे, अस्य दुष्मन्तस्य धनुषि, पुरु प्रचुरं हूतं यज्ञीयघृतादिकं यस्य स पुरुहूत इन्द्रस्तस्येदमिति तस्मिन् पौरुहूते वज्रे च, विजयम्, आशंसन्ते उभयोरपि दुष्करकार्यसाधकत्वविश्वासात् आकाङ्क्षन्ति । अतश्च इन्द्रसमानवीरत्वादेकस्यैव दुष्मन्तस्य समग्रपृथिवीपालने न किञ्चिदाश्चर्यमिति भावः ।

अत्र दुष्मन्तस्य प्रस्तुतत्वेन तदङ्गतया तद्धनुषोऽपि प्रस्तुतत्वात् पौरुहूतवज्रस्य चाप्रस्तुतत्वात् तयोरुभयोरेकविजयक्रियाभिसम्बन्धात् दीपकमलङ्कारः, नगरेत्यादिविशेषणे लुप्तोपमा च, अनयोर्मिथो निरपेक्षतया संसृष्टिः । तथा श्यामशब्दः समस्तधरित्रीपालनं प्रति न किञ्चिदुपकुरुत इति "विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये !" इति दर्पणोदाहृतवत् अपुष्टार्थत्वदोषः, एवं नगरपदेन नगरद्वारे लक्षणाकरणात् तत्र च रूढि प्रयोजनाभावात् नेयार्थत्वदोषः; 'उदधिप्रान्तसीमाम्' इति पाठेन 'एकः कृत्स्नामवति नगरद्वारकीलप्रवेष्टौ' इति पाठेन च तयोः समाधानम् । नगरद्वारस्य कीलवत् अर्गलवत् प्रवेष्टौ बाहू यस्य स इति तदर्थः; तेनैव च बाह्वोर्दैर्घ्यत्वप्रतीतिः, "राजते मृगलोचना" इत्यादौ मृगलोचनवत् सुन्दरलोचना इति प्रतीतिवत् । उदधिसीमत्वेऽपि

(१) सुरा बद्धवैराः··· ।

উভৌ । উপগম্য । বিজয়স্ব রাজন্ ! ।

রাজা । আসনাদুত্থায় । অভিবাদয়ে ভবন্তৌ ।

উভৌ । স্বস্তি ভবতে । ইতি ফলান্যুপহরতঃ (১) । (ঘ)

অস্মিন্নহি স্বল্পবিশিষ্টেষু অন্যর্থা পালনস্য নিরাসায় ক্রন্দ্বামিতি বিশেষণম্ ; অতো নাধিকপদতাদোষঃ ।

অধ্যাক্রান্তেত্যাদিনা এতদন্তে রাজ্ঞঃ প্রশংসনাৎ পুষ্পং নাম প্রতিমুখসন্ধ্যঙ্গম্— "পুষ্পং বিশেষবচনং মতম্" ইতি দর্পণলক্ষণাৎ ।

"পরিঘো যোগভেদে স্যাৎ মুদ্গরেঽর্গলঘাতয়োঃ" ইতি বিশ্বঃ । "দৈর্ঘ্যে প্রায়ে বিশালশ্চ" ইতি অমরশ্চ । মন্দাক্রান্তা বৃত্তম্ ॥১৫॥

(ঘ) উভাবিতি । স্বস্তি শুভমস্ত্বিতি শেষঃ । উপহরতঃ উপহাররূপেণ দত্তঃ । "স্বস্ত্যাশীঃক্ষেমপুণ্যাদৌ" ইত্যমরঃ । ভবতে ইতি "নমঃ স্বস্তি" ইত্যাদিনা চতুর্থী ।

শূন্যহস্তেন রাজাদিদর্শনং নিষিদ্ধং পুনঃ কিঞ্চিদ্বানি ফলমাহ স্মৃতিঃ—

"রিক্তপাণির্ন পশ্যেত্তু রাজানং দৈবতা গুরুম্ ।
নৈমিত্তিকঞ্চ বৈদ্যঞ্চ ফলেন ফলমাদিশেৎ ॥"

পুরের অর্গলের ন্যায় দীর্ঘবাহু ইনি একাই যে, শ্যামসমুদ্রবেষ্টিত সমগ্রপৃথিবী পালন করিতেছেন, ইহা আশ্চর্য্য নহে। কারণ, দৈত্যদিগের সঙ্গে শত্রুতা উপস্থিত হইলে দেবতারা যুদ্ধে ইঁহার আরোপিতগুণ ধনুতে এবং ইন্দ্রের বজ্রে জয়ের আশা করেন ॥১৬॥

দুই জনই । ( নিকটে যাইয়া ) মহারাজের জয় হউক ।

রাজা । ( আসন হইতে উঠিয়া ) আপনাদিগকে অভিবাদন করিতেছি ।

(ঘ) মুনিকুমারদ্বয় । আপনার মঙ্গল হউক । ( এই বলিয়া কতকগুলি ফল উপহার দিলেন । )

(১)···উপনয়তঃ ।

राजा । सप्रणामं परिगृह्य । आगमनप्रयोजनं श्रोतुमिच्छामि (१) । (द)

उभौ । विदितो भवानिहस्थस्तपस्विनाम् । ते च भवन्तमभ्यर्थयन्ते (२) । (ध)

राजा । किमाज्ञापयन्ति ? ।

उभौ । तत्रभवतः कण्वस्य कुलपतेरसान्निध्यात् रक्षांसि न इष्टिविघ्नमुत्पादयन्ति ; तत् कतिपयदिवसमात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति (३) । (न)

(द) राजेति । सप्रणामं प्रणामं कृत्वेत्यर्थः । परिगृह्य ऋषिकुमाराभ्यामुपहृतानि फलानि गृहीत्वा ।

(ध) उभाविति । भवान् इहस्थः अत्र तपोवन एव तिष्ठतीत्येवंरूपेण तपस्विना विदितः अवगतः । ते च तपस्विनः । अभ्यर्थयन्ते किञ्चिद्विषयं प्रार्थयन्ति ।

विदित इति "ञ्यनुबन्धमतिबुद्धिपूजार्थेभ्यः क्तः" इति वर्त्तमाने क्तप्रत्ययः, तद्योगाच्च तपस्विनामिति "वर्त्तमानाधिकरणार्थयोः क्तेन" इति कर्त्तरि षष्ठी ।

(দ) রাজা। (প্রণামপূর্ব্বক সেগুলি গ্রহণ করিয়া) আপনাদের আগমনের উদ্দেশ্য শুনিতে ইচ্ছা করি।

(ধ) মুনিকুমারদ্বয়। আপনি যে এখানে আছেন, তাহা তপস্বীরা জানিয়াছেন। তাঁহারা আপনার নিকট কোন বিষয় প্রার্থনা করিতেছেন।

রাজা। কি আদেশ করিতেছেন ?।

---

(१)···आज्ञामिच्छामि ।

(२) विदितो भवानाश्रमसदामिहस्थः । तेन भवन्तं प्रार्थयन्ते ।

(३) कण्वस्य महर्षेः । तत् कतिपयरात्रम् ।

राजा। अनुगृहीतोऽस्मि।

विदू। अपवार्य्य। एस दाणिं भअंदो अणुऊलो गलहत्थो (१)। (प)

(प) एष इदानीं भवतः अनुकूलः गलहस्तः।

(न) उभाविति। तत्रभवतः पूजनीयस्य, कुलपतेः प्रागुक्तलक्षणस्य अध्यापकस्य कण्वस्य, असान्निध्यात् सान्निध्याभावेन प्रयाभावादित्यर्थः, रक्षांसि राक्षसाः, नः अस्माकम्, इष्टिविघ्नं यज्ञान्तरायम्। तत् तस्मात्, कतिपयदिवसमात्रं न पुनर्दीर्घकालमिति मात्रपदस्यार्थः ; सारथिरेव द्वितीयो यस्य तेन अन्यान् जनान् विसृज्य केवलेन सारथिनैव सहेत्यर्थः। बहुतरलोकसन्निधाने आश्रमपीडा स्यादिति भावः। सनाथीक्रियताम् प्रभुयुक्तः क्रियताम्। इति अभ्यर्थयन्त इति सम्बन्धः। तथा च कण्वस्य शापादिव भवतः शरात् भीता राक्षसा यज्ञविघ्नकरणाय नागमिष्यन्तीति भावः।

अत्र उपन्यासो नाम प्रतिमुखसन्धेरङ्गम्—"उपन्यासः प्रसादनम्" इति दर्पणलक्षणात्।

(प) विदू इति। अपवार्य्य ऋषिकुमारौ श्रवणं वारयित्वा। तल्लक्षणं यथा दर्पणे—"तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते॥"

गले बलपूर्वकहस्तदानेन प्रेरणं गलहस्तः। तथा च एष भवतो गलहस्तः गलहस्तवत् मुनिभिर्बलपूर्वकौ राक्षसापसारणकार्य्ये नियोग इदानीम् एतत्समयानुसारीत्यर्थः, अनुकूलः कार्य्यसाधकः सङ्गत इति शेषः, शकुन्तलादर्शनादिजनकत्वादित्याशयः।

(ন) মুনিকুমারদ্বয়। 'পূজনীয় কুলপতি কণ্বের অসান্নিধ্যবশতঃ রাক্ষসগণ আমাদের যজ্ঞের বিঘ্ন জন্মাইতেছে ; অতএব আপনি কেবল সারথিকে নিয়া, কয়েকটী দিন মাত্র আমাদের আশ্রমটীকে সনাথ করুন' ইহাই প্রার্থনা করিতেছেন।

রাজা। অনুগৃহীত হইলাম।

(१) एसा दाणिं अणुऊला दे अब्भत्थणा।

রাজা। (স্মিতং কৃত্বা।) রৈবতক! মদ্বচনাদুচ্যতাং সারথিঃ, সবাণকার্ম্মুকং রথমুপস্থাপয়েতি (১)। (ফ)

দৌবা। জং দেবো আণবেদি। ইতি নিষ্ক্রান্তঃ। (ব)

উভৌ। সহর্ষম্।

অনুকারিণি পূর্ব্বেষাং যুক্তরূপমিদং ত্বয়ি।
আপন্নাভয়সত্রেষু দীক্ষিতাঃ খলু পৌরবাঃ ॥১৭॥

(ব) যত্ দেব আজ্ঞাপয়তি।

(ফ) রাজেতি। স্মিতং কৃত্বা, উক্তবিদূষকোক্তিশ্রবণাদেবেতি ভাবঃ। বাণ-কার্ম্মুকাভ্যাং সহেতি সবাণকার্ম্মুকম্। ইতিশব্দস্য উচ্যতামিত্যনেনান্বয়ঃ।

অন্বিতি। পূর্ব্বেষাং পূর্ব্বপুরুষাণাম্, অনুকারিণি অনুকরণকর্ত্তরি ত্বয়ি, ইদম্ অস্মাকং রাক্ষসভয়াৎ ত্রাণস্বীকরণং যুক্তরূপং যোগ্যমেব জাতমিতি শেষঃ। তথা চ পৌরবাঃ পুরুবংশীয়া রাজানঃ, আপন্নানাং বিপন্নজনানাম্ অভয়সত্রেষু সর্ব্বদা অভয়দানেষু, দীক্ষিতাঃ খলু ব্রতিন এব। পৌরবত্বাৎ ত্বয্যপি যুক্তরূপমিদমিত্যাশয়ঃ।

অত্র পরার্দ্ধগতকারণেন পূর্ব্বার্দ্ধগতকার্য্যস্য সমর্থনাদর্থান্তরন্যাসোঽলঙ্কারঃ।

"আপন্ন আপৎপ্রাপ্তে স্যাৎ" ইত্যমরঃ। "সত্রং যজ্ঞে সদাদানাচ্ছাদনারণ্যকৈতবে" ইতি মেদিনী ॥১৭॥

(প) বিদূষক। (রাজার প্রতি চুপি চুপি) বর্ত্তমান সময়ে ইহা তোমার অনুকূল গলাধাক্কা।

(ফ) রাজা। (ঈষৎ হাস্য করিয়া) রৈবতক! আমার আদেশ অনুসারে সারথিকে বল—'বাণ ও ধনুর সহিত রথ উপস্থিত কর।'

(ব) দৌবারিক। মহারাজ যাহা আদেশ করেন (এই বলিয়া চলিয়া গেল।)

(১)·· সবাণাসনং রথম্।

राजा। सप्रणामम्। गच्छतां भवन्तौ ; अहमनुपदमागत एव (१)। (भ)

उभौ। विजयस्व। इति निष्क्रान्तौ।

राजा। माधव्य! अप्यस्ति कुतूहलं शकुन्तलादर्शनं प्रति (२)। (म)

विदू। पढमं अपरिबाधं आसी ; सम्पदं रक्खसवुत्तन्तेण सपरिबाधं (३)। (य)

(य) प्रथममपरिबाधमासीत् ; साम्प्रतं राक्षसवृत्तान्तेन सपरिबाधम्।

---

(भ) राजेति। पदात् भवतोः पदक्षेपात् अनु पश्चादित्यनुपदं भवतोः पश्चात् पश्चादेवेत्यर्थः।

(म) राजेति। अपिशब्दः प्रश्ने।

---

मुनिकुमारद्वय। (आनन्देর সহিত) আপনি পূর্ব্বপুরুষদিগের অনুকরণকারী, সুতরাং আপনাতে ইহা উপযুক্তই হইয়াছে। কারণ, পুরুবংশীয়গণ, বিপন্ন ব্যক্তিদিগকে অভয়-দান-যজ্ঞে চিরকালই দীক্ষিত হইয়া আসিতেছেন ॥১৭॥

(ভ) রাজা। (প্রণামপূর্ব্বক) আপনারা যান ; আমি আপনাদের পিছনে পিছনেই আসিতেছি।

মুনিকুমারদ্বয়। আপনার জয় হউক। (এই বলিয়া চলিয়া গেলেন।)

(ম) রাজা। মাধব্য! শকুন্তলাকে দেখিবার জন্য তোমার কৌতুক আছে কি?।

---

(१) पुरो भवन्तौ। (२) माढव्य! अप्यस्ति शकुन्तलादर्शने कुतूहलम्?।

(३) पढमं सपरिबाहं आसि। दाणिं रक्खसवुत्तन्तेण बिन्दुबि ण अवसेसिदो।

রাজা । মা ভৈষীঃ, ননু মৎসমীপ এব বর্ত্তিষ্যসে (১) । (র)

বিদূ । এস তুহ্ রথ-চক্ক-রক্খীভূদোহ্মি, জই ণ কোবি আঅচ্ছিঅ বিগ্ঘং করেদি (২) । (ল)

প্রবিশ্য দৌবারিকঃ । জঅদু জঅদু ভট্টা । সজ্জো রধো ভত্তুণো বিজঅপ্পআণং অবেক্খদি । এস উণ ণঅরাদো দেবীণং আণত্তিহরো করভও আঅদো (৩) । (ব)

(ল) এষ তব রথচক্ররক্ষীভূতোঽস্মি, যদি ন কোঽপি আগত্য বিঘ্নং করোতি ।

(ব) জয়তু জয়তু ভর্ত্তা । সজ্জো রথঃ ভর্ত্তুর্বিজয়প্রয়াণমপেক্ষতে । এষ পুনর্নগরাৎ দেবীনামাজ্ঞাহরঃ করভক আগতঃ ।

---

(য) বিদূ ইতি । প্রথমং রাক্ষসবৃত্তান্তশ্রবণাৎ পূর্ব্বম্, অপরিবাধ নির্ব্বাধম্, আসীৎ তৎ কুতূহলমিত্যন্বয়ঃ, নিরুপদ্রবত্বাদিত্যাশয়ঃ । সপরিবাধং কুতূহলং বর্ত্তত ইতি শেষঃ, রাক্ষসভয়াদিতি ভাবঃ ।

(র) রাজেতি । ভৈষীরিতি মাযোগে অদ্যতনী । নন্বিতি সম্বোধনে । মৎসমীপবর্ত্তনে তু রাক্ষসভয়াভাব ইত্যাশয়ঃ ।

(ল) বিদূ ইতি । রথচক্রং রথস্য চক্রদ্বয়ং রক্ষতীতি রথচক্ররক্ষী তদ্ভূতোঽস্মি, যুধ্যমানস্য রথিনশ্চক্ররক্ষকস্যাবশ্যকত্বাদিতি ভাবঃ । এতেন গমনানুমতিঃ সূচিতা । বিঘ্নং রথচক্ররক্ষায়া ব্যাঘাতম্ ।

---

(য) বিদূষক । প্রথম অবাধ ছিল, এখন রাক্ষসের বৃত্তান্তে সবাধ হইয়াছে ।

(র) রাজা । ওহে ! ভীত হইওনা, আমার নিকটেই থাকিবে ।

(ল) বিদূষক । এই তোমার রথের চক্ররক্ষক হইলাম, যদি কেহ আসিয়া বিঘ্ন না করে ।

---

(১) কশ্চিৎ এবম্ভূতো নাস্তি । (২) এস রক্খবাদী রক্খিদোহ্মি ।

(৩) সজ্জো রহো ভট্টিণো বিজঅপ্পআণং অবেক্খই ।...

राजा । सादरम् । किमस्माभिः प्रेषितः ? । (श)

दौवा । अथइं । (ष)

राजा । तेन हि प्रवेश्यताम् (१) । (स)

दौवा । तह । इति निष्क्रम्य पुनः करभकेण सह प्रविश्य । करभअ ! एसो भट्टा, उवसप्पदु भवं (२) । (ह)

(ष) अथकिम् ।

(ह) तथा । करभक ! एष भर्त्ता उपसर्पतु भवान् ।

(ब) प्रविश्येति ; भर्त्तुः स्वामिनो भवतः । विजयप्रयाणं विजयाय यात्राम् । नगरात् राजधानीतः, देवीनां भवतो मातॄणाम्, आज्ञामिह्र आदेशग्राही, करभः करि-शावक इव बलवानिति करभकः तदाख्यो दूतः । सञ्ज्ञायां कप्रत्ययः ।

(श) राजेति । सादरम्, मातृभिः प्रेषितत्वादिति भावः ।

(स) राजेति । तेन हि अस्माभिः प्रेषितत्वेनैव हेतुना ।

(ह) दौवेति । तथा प्रविश्यते मयेत्यर्थः ।

(ব) দৌবারিক। (প্রবেশ করিয়া) মহারাজের জয় হউক, জয় হউক। রথ সজ্জিত হইয়া মহারাজের বিজয়যাত্রার অপেক্ষা করিতেছে। এদিকে আবার রাজধানী হইতে করভক, দেবীগণের আদেশ লইয়া এই আসিয়াছে।

(শ) রাজা। (আদরের সহিত) মাতারা পাঠাইয়াছেন কি ?।

(ষ) দৌবারিক। হাঁ।

(স) রাজা। তবে প্রবেশ করাও।

(হ) দৌবারিক। তাহাই। (ইহার পর নির্গত হইয়া পুনরায়

(१) ननु प्रवेश्यताम् ।

(२) एषो भट्टा, उवसप्प ।

करभकः । उपसृत्य प्रणम्य च । जअदु जअदु भट्टा । देवीओ आणवेन्ति (१) । (च)

राजा । किमाज्ञापयन्ति ? । (२)

कर । आआमिणि चउत्थदिअसे पुत्तपिण्डपालणो णाम उववासो भविस्सदि ; तहिं दीहाउणा अवस्सं अह्मे सम्भावइदव्वा त्ति (३) । (क)

(च) जयतु जयतु भर्त्ता । देव्य आज्ञापयन्ति ।

(क) आगामिनि चतुर्थदिवसे पुत्रपिण्डपालनो नाम उपवासो भविष्यति, तस्मिन् दीर्घायुषा अवश्यं वयं सम्भावयितव्या इति ।

(च) करभक इति । देव्यः भवन्मातरः ।

(क) करेति । पुत्रपिण्डानाम् आत्मने पुत्रदातव्यपिण्डानां पालनं रक्षणं यस्मात् सः । आत्मनः पूर्वं पुत्रमरणे आत्ममरणात् परं वा जीवत एव पुत्रस्य मतिवैकल्ये पुत्रदातव्यपिण्डलोपाशङ्का स्यात् तन्निरासार्थोऽयमुपवासस्तत्कालीनयोषित्प्रचलित इति बोध्यम् । दीर्घायुषा त्वया पुत्रेण । सम्भावयितव्या सम्मानयितव्या उपस्थित्या सन्तोषणीया इत्यर्थः ।

করভকের সহিত প্রবেশ করিয়া ) করভক! এই প্রভু রহিয়াছেন, তুমি নিকটে যাও।

(ক) করভক। ( নিকটে যাইয়া প্রণাম করিয়া ) মহারাজের জয় হউক, জয় হউক। দেবীগণ আদেশ করিয়াছেন।

রাজা। কি আদেশ করিয়াছেন ?।

(१) जेदु जेदु भट्टा । देई आणवेइ, आआमिणि चउत्थदिअहे पउणपारणो मे उववासो होहिइ, तहिं दीहाउणा अवस्सं संभाविदव्व त्ति ।

(२) पाठोऽयं पुस्तकान्तरे नास्ति । (३) एष पाठोऽपि पूर्वकरभकवाक्ये संलग्नः ।

রাজা। ইতস্তপস্বিনাং কার্য্যম্, ইতো গুরুজনাজ্ঞা, উভয়মপ্যনতিক্রমণীয়ম্, তৎ কিমত্র প্রতিবিধেয়ম্ (১)। (খ)

বিদূ। ভো! ত্রিশঙ্কুরিব অন্তরা তিষ্ঠ (২)। (গ)

(গ) ভোঃ! ত্রিশঙ্কুরিব অন্তরা তিষ্ঠ।

---

(খ) রাজেতি। ইতঃ অস্মিন্ আশ্রমে। কার্য্যং রাক্ষসবিঘ্ননিবারণম্। অতশ্চাত্র স্থাতব্যমিত্যাশয়ঃ। ইতো নগরে, গুরুজনানাং মাতৄণাম্ আজ্ঞা তব গমনানুমতিঃ। অতশ্চ তত্র গন্তব্যমিতি ভাবঃ। অনতিক্রমণীয়ম্ উভয়পক্ষয়োরপি গুরুত্বাদিতি ভাবঃ। তৎ তস্মাৎ, অত্র সঙ্কটে, কিং প্রতিবিধেয়ং কঃ প্রতীকারঃ কর্ত্তব্যঃ।

(গ) বিদূ ইতি। ত্রিশঙ্কুর্নাম কশ্চিৎ সূর্য্যবংশীয়ো রাজা, স ইব অন্তরা মধ্যে। ত্রিশঙ্কুঃ সশরীর এব স্বর্গং যিয়াসুর্গুরুং বশিষ্ঠমুপাগতস্তেন চ প্রত্যাখ্যাতো গুরুপুত্রান্ যযৌ, তৈশ্চ 'গুরুং বিহায়ান্যানুপাগত ইতি চাণ্ডালো ভব' ইত্যভিশপ্তঃ শাপেন বশিষ্ঠবিদ্বেষিণং বিশ্বামিত্রং শরণমগাৎ। বিশ্বামিত্রস্তু তং যাজ্যত্বেন গৃহীত্বা যাগং বিধায় চ সশরীরমেব তং স্বর্গং প্রেরয়ামাস। অথ তু দেবরাজঃ গুরুদ্রোহী অভিশপ্তশ্চেতি তমধঃ পাতয়ামাস। অধঃ পতংশ্চ ত্রিশঙ্কুঃ 'ন পত' ইতি বিশ্বামিত্রেণাভিহিতঃ স্বর্গমর্ত্ত্যয়োরন্তরাল এব তস্থৌ ইতি রামায়ণবার্ত্তাত্রানুসন্ধেয়া।

রামায়ণে ত্রিশঙ্কুনাম্নঃ কারণাস্তীক্ষং যথা—

---

(ক) করভক। "আগামী চতুর্থ দিবসে 'পুত্রপিণ্ডপালন'নামে উপবাস হইবে, সেই দিন তুমি উপস্থিত হইয়া অবশ্যই আমাদিগকে আনন্দিত করিবে!"

(খ) রাজা। এদিকে তপস্বীদিগের কার্য্য; ওদিকে গুরুজনের আদেশ; দুই-ই অলঙ্ঘনীয়। অতএব এই সঙ্কটে কি প্রতিবিধান করা যায়।

(গ) বিদূষক। ওহে! ত্রিশঙ্কুর ন্যায় মধ্যখানে থাক।

---

(১)···তপস্বিকার্য্যম্।···ইয়মপি। (২)···অন্তরালে।

राजा । सत्यमाकुलीभूतोऽस्मि । (घ)

कृत्ययोर्भिन्नदेशत्वात् द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैलैः स्रोतः स्रोतोवहां यथा ॥१८॥

विचिन्त्य । सखे ! माधव्य ! त्वमप्यम्बाभिः पुत्र इव गृहीतः, स भवानितः प्रतिनिवृत्य तपस्विकार्य्यव्यग्रतामस्माकमावेद्य तत्रभवतीनां पुत्रकार्य्यमनुष्ठातुमर्हति ? (१) । (ङ)

"पितुश्च परिरोषेण गुरोर्दोग्ध्रवधेन च ।
अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः ॥
एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महातपाः ।
त्रिशङ्कुरिति होवाच त्रिशङ्कुरिति स स्मृतः ॥"

(घ) राजेति । आकुलीभूतोऽस्मि व्यग्रीभूतोऽस्मि, कर्त्तव्यविमूढत्वादिति भावः ।

अथ कीदृगाकुल इत्याह कृत्ययोरिति । कृत्ययोः कार्य्ययोः तपस्विनां राक्षसविघ्नापसारणस्य मातॄणां सम्भावनस्य चेत्यर्थः, भिन्नौ परस्परदूरवर्त्तिनावित्यर्थः देशौ आश्रयस्थाने ययोस्तस्य भावस्तस्मात् हेतोः, मे मम मनः, पुरः अग्रतः, शैलैः शिलासमूहैः, प्रतिहतं प्रतिरुद्धम्, स्रोतोवहां नदीनाम्, स्रोतो यथा प्रवाह इव, द्वैधीभवति उभयदिग्गतं भवति । अतएव एकतरनिर्द्धारणाभावात् आकुलीभूतोऽस्मीति भावः ।

अत्र श्रौती उपमा, तथा स्रोतः स्रोत इत्यनयोः पौनरुक्त्यात् प्रथमान्तलुप्तद्वितीयान्ततया तात्पर्य्यमात्रतो भेदाच्च लाटानुप्रासः ; अनयोः संसृष्टिः ॥१८॥

(घ) রাজা। যথার্থই আকুল হইয়া পড়িয়াছি।

প্রস্তরসমূহে সম্মুখভাগ প্রতিহত হইলে নদীর স্রোত যেমন দুই ভাগে বিভক্ত হইয়া চলিতে থাকে, আমার মনও তেমন, দুইটী কার্য্য, দূরবর্ত্তী ভিন্ন ভিন্ন স্থানে বলিয়া দুই দিক চলিতেছে ॥১৮॥

(१) विचिन्त्य । सखे ! त्वमम्बया पुत्र इति प्रतिगृहीतः । अतः भवान्··· तपस्विकार्य्यव्यग्रताम्···पुत्रकृत्यम् ।

विदू । भो ! मा रक्खसभीरुअं मं अवगच्छ (१) । (च)

राजा । स्मितं कृत्वा । भो महाब्राह्मण ! कथमिदं त्वयि सम्भाव्यते ? (२) । (छ)

(च) भोः ! मा राक्षसभीरुकं माम् अवगच्छ ।

(ङ) विचिन्त्येति । गृहीतः ज्ञातः, सततमत्सहचरत्वादिति भावः । अस्माकम् "वाक्यदय" इति बहुवचनात् मम, तपस्विकार्य्ये व्यग्रताम् आसक्तताम्, आवेद्य ज्ञापयित्वा, तत्रभवतीनां पूज्यानां मातॄणाम्, पुत्रकार्य्यमनुष्ठातुमर्हसि ? मत्प्रतिनिधि-भावेनेति भावः ।

(च) विदू इति । राजादेशेनावश्यमेव राजधान्यां गन्तव्यम । तथा च सति राक्षसदर्शनमपि न स्यादित्यतः प्रागावसर आस्पर्द्धते भो इति । न खल्वहं राक्षसभयेन स्वयमेव राजधान्यां गच्छामि, अपि तु भवानेव मां तत्र प्रेषयतीत्याशयः । अहो ! वीरत्वं विदूषकस्य ।

(छ) राजेति । इदानीं राक्षसदर्शनस्यासम्भवत्वादेव तवेयमास्पर्द्धा इति ज्ञातत्वेन राज्ञः स्मितमिति बोध्यम् । महाब्राह्मण ! निकृष्टविप्र ! इदं राक्षसभीरुत्वम्, त्वयि कथं सम्भाव्यते, अपि तु महावीरत्वात् कथमपि नेत्यर्थः । सोल्लुण्ठनोक्तिरियम् । शब्दस्वभावादेव महाब्राह्मणशब्दोऽग्रदारकब्राह्मणरूपं निकृष्टविप्रमभिधत्ते । अत-एवोक्तम्—

"शङ्खे तैले तथा मांसे वैद्ये ज्यौतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"

(ঙ) ( চিন্তা করিয়া ) সখে ! মাধব্য ! মাতৃগণ তোমাকেও পুত্রের ন্যায় জ্ঞান করেন ; সুতরাং তুমি এস্থান হইতে ফিরিয়া যাইয়া, আমি মুনিগণের কার্য্যে ব্যগ্র আছি ইহা জানাইয়া, মাতৃগণের পুত্রের কার্য্য করিতে পার ।

(চ) বিদূষক । ওহে ! আমাকে রাক্ষসভীরু মনে করিও না ।

(१) ण क्खु मं रक्खोभीरुअं गणेहि । (२) एष पाठः क्वचिन्नास्ति ।

विदू। तेण हि राआणुअ विअ गच्छिदुं इच्छेमि (१)। (ज)

राजा। ननु तपोवनोपरोधः परिहरणीय इति सर्वानेवानुयात्रिकांस्त्वयैव सह प्रेषयिष्यामि (२)। (झ)

विदू। सगर्वम्। जुअराओह्मि दाणिं संवुत्तो (३)। (ञ)

राजा। आत्मगतम्। चपलोऽयं ब्राह्मणबटुः कदाचिदिमामस्मत्प्रार्थनामन्तःपुरिकाभ्यो निवेदयेत्। भवत्वेवं तावद्वक्ष्यामि। विदूषकस्य हस्तं गृहीत्वा प्रकाशम्। सखे! माधव्य!

(ज) तेन हि राजानुज इव गन्तुमिच्छामि।

(झ) युवराजोऽस्मि इदानीं संवृत्तः।

(ज) विदू इति। राजानुज इवेति महाडम्बरेणेत्यर्थः।

(झ) राजेति। तपोवनोपरोधः हयलतादिमर्द्दनेन तपोवनक्षतिः, परिहरणीयो वर्जनीयः। अनुयात्रया पश्चाद्गमनेन संसृष्टा इति अनुयात्रिका अनुचरास्तान्। तथा सति तपोवनोपरोधो न स्यादिति भावः।

(ञ) विदू इति। इदानीं सर्वेषामेव राजानुयात्रिकाणां ममानुयात्रिकत्वे, युवराजोऽस्मि संवृत्तः, तथैव गमनाडम्बरस्य भाविवत्वादित्याशयः।

(छ) राजा। (ঈষৎ হাস্য করিয়া) ওহে মহাব্রাহ্মণ! তোমার প্রতি এরূপ সম্ভাবনা করিব কেন?।

(জ) বিদূষক। তাহা হইলে আমি রাজার ছোট ভাইর মত যাইতে ইচ্ছা করি।

(ঝ) রাজা। ওহে! তপোবনের ক্ষতি নিবারণ করিতে হইবে, এই জন্য সমস্ত অনুচরদিগকে তোমার সঙ্গেই পাঠাইব।

(ঞ) বিদূষক। (গর্ব্বের সহিত) এখন আমি যুবরাজ হইলাম।

(१) अह राआणुएण गमव्वं तह गच्छामि।

(२)…पट्ठावइस्सामि। (३) तेण हि…।

ऋषिगौरवादाश्रमपदं प्रविशामि, न खलु सत्यमेव तापसकन्यायामभिलाषो मे। पश्य—(१) (ट)

क्व वयं, क्व परोक्षमन्मथो
मृगशावैः सह वर्द्धितो जनः।
परिहासविजल्पितं सखे!
परमार्थेन न गृह्यतां वचः ॥१८॥

(ट) राजेति। चपलः चञ्चलप्रकृतिः ब्राह्मणवटुः ब्राह्मणबालकः अल्पवयस्कत्वादपि कर्त्तव्याकर्त्तव्यज्ञानहीनो ब्राह्मण इत्यर्थः, इमां शकुन्तलाविषयाम्, अस्मत्प्रार्थनां मम लिप्साम्, अन्तःपरिकाभ्यः अन्तःपुरवासिनीभ्यः प्राक् परिणीताभ्यो मम स्त्रीभ्यः। तथात्वे च तासां मानस्यावश्यम्भावित्वेन महाननर्थो भवेदित्याशयः। एवं वक्ष्यमाणप्रकारम्। ऋषिगौरवात् ऋषीणां गुरुत्वज्ञानेन तदनुरोधस्यावश्यरक्षणीयत्वादित्यर्थः।

अत्र क्रमस्य शकुन्तलावृत्तान्तप्रकाशरूपदोषस्य अपलापाय हस्तधारणेन विदूषकस्य अनुनयकरणात् पर्य्युपासनं नाम प्रतिमुखसन्धेरङ्गम्—"क्रमस्यानुनयः पुनः। स्यात् पर्य्युपासनम्" इति दर्पणलक्षणात्। विपर्य्ययो नाम नाट्यलक्षणञ्च—"विचारस्यान्यथाभावः सन्देहात्तु विपर्य्ययः" इति तल्लक्षणात्।

"बालको माणवो बालः किशोरो वटुरित्यपि" इति शब्दरत्नावली। निवेदयेदिति सम्भावनायां सप्तमी।

(ট) (স্বগত) ক্ষুদ্রব্রাহ্মণ, চঞ্চলস্বভাব; সুতরাং হয় ত আমার এই অভিলাষ কখনও অন্তঃপুরের রমণীদিগের নিকট জানাইয়া দিবে। হউক, এইরূপ বলিব। (বিদূষকের হাত ধরিয়া প্রকাশ্যে) সখে! মাধব্য! মুনিগণের গুরুত্ববোধেই তপোবনে প্রবেশ করিতেছি; কিন্তু বাস্তবিকই তপস্বিকন্যার প্রতি আমার অভিলাষ নাই। দেখ—

(१) चपलोऽयं वटुः। कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत्। भवतु, एवमेव वक्ष्ये। विदूषक···। वयस्य!···आश्रमं गच्छामि। अभिलाषः।

विदू। एव्वं ण्णेदं (१)। (ठ)

(ठ) एवमेतत्।

---

क्वेति। वयं कामकलायामतीवनिपुणा नागरिकजना इत्यर्थः, क्व कुत्र वर्त्तामहे इति शेषः। मृगशावैः हरिणशिशुभिः सह वर्द्धितः काननेन परिपोषितः, अतएव परोक्षः इन्द्रियाणामविषयः सर्वथैवाविदितः मन्मथः कामो येन सः वन्यभावादेकान्त-मुग्ध इत्यर्थः जनः शकुन्तला च क्व कुत्र वर्त्तते। नितान्तविभिन्नप्रकृतिकत्वात् वन्यां प्रति नागरस्याभिलाषः सर्वथैवासम्भव इति भावः। अतएव हे सखे! परिहासेन परिहासकरणाभिप्रायेण विजल्पितम् अनर्थकमभिहितम्, वचः शकुन्तलाविषयकं वाक्यम्, परमार्थेन यथार्थरूपेण, न गृह्यतां नावधार्य्यताम्, परिहासार्थोक्तवाक्यस्य प्रायेणैव मिथ्यात्वादिति भावः।

अत्र वयमित्यस्य परोक्षमन्मथजनस्य च परस्परविरूपस्य संघटनात् विषमालङ्कारः, परोक्षमन्मथत्वं प्रति मृगशावैः सह वर्द्धितत्वं हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गञ्च; अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः।

सुन्दरी वृत्तम्—"अयुजोर्यदि सौ जगौ, युजोः सभरा लगौ यदि सुन्दरी तदा" इति लक्षणात् ॥१९॥

(ठ) विदू इति। एतत् त्वयोक्तम्, एवं परिहासविजल्पितं वच एवेत्यर्थः, अतएव मयापि परमार्थेन नावधार्य्यत इत्याशयः।

---

আমরাই বা কোথায়; আর কামকলা যাহার একেবারে অবিদিত, সেই হরিণশাবকদিগের সহিত বর্দ্ধিত ব্যক্তিই বা কোথায়। অতএব সখে! পরিহাসের জন্য যাহা বলিয়াছি, তাহা সত্য বলিয়া মনে করিও না ॥১৯॥

(ঠ) বিদূষক। ইহা এইরূপই হইবে।

---

(१) अहइं।

রাজা। মাধব্য! ত্বমপি স্বনিয়োগমনুতিষ্ঠ, অহমপি তপোবনরক্ষার্থং তত্রৈব গচ্ছামি (১)। (ড)

ইতি নিষ্ক্রান্তাঃ সর্ব্বে। (ঢ)

## দ্বিতীয়োঽঙ্কঃ ॥০॥

(ড) রাজেতি। স্বস্মিন্ নিয়োগম্ আত্মানং প্রতি সমাদিষ্টং নগরগমনমিত্যর্থঃ।

(ঢ) ইতীতি। ইতি রাজ্ঞ উক্তৌ সত্যাম্। রাজ্ঞঃ কেচিৎ শরীররক্ষিণ আসন্, তৈঃ সহ রাজবিদূষকয়োর্বহুত্বাৎ সর্ব্বশব্দস্য বহুবচনস্য চ উপপত্তির্বোদ্ধব্যা।

ইতি মহামহোপাধ্যায়-ভারতাচার্য্য-শ্রীহরিদাসসিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াম্
অভিজ্ঞানশকুন্তলটীকায়ামভিজ্ঞানকৌমুদ্যাং দ্বিতীয়াঙ্কবিবরণং
সমাপ্তম্ ॥০॥

---

(ড) রাজা। মাধব্য! তুমিও নিজের প্রতি আদেশ পালন কর, আমিও তপোবনরক্ষার জন্য সেইখানেই যাই।

(ঢ) (ইহার পর সকলেই চলিয়া গেল।)

দ্বিতীয় অঙ্ক ॥০॥

---

(১) ক্বচিৎ এষ পাঠো ন দৃশ্যতে।

# তৃতীয়োঽঙ্কঃ।

—০:*:০—

ততঃ প্রবিশতি কুশানাদায় যজমানশিষ্যঃ। (ক)

শিষ্যঃ। বিচিন্ত্য সবিস্ময়ম্। অহো! মহাপ্রভাবো রাজা দুষ্মন্তঃ; যেন প্রবিষ্টমাত্র এবাশ্রমং তত্রভবতি সারথিদ্বিতীয়ে রাজনি নিরুপপ্লবানি নঃ কর্ম্মাণি সংবৃত্তানি (১)। (খ)

কা কথা বাণসন্ধানে জ্যাশব্দেনৈব দূরতঃ।
হুঙ্কারেণেব (২) ধনুষঃ স হি বিঘ্নান্ ব্যপোহতি ॥১॥

(ক) তত ইতি। যজমানো যাগে প্রবৃত্তস্তস্য শিষ্যশ্চেতি সঃ।

(খ) শিষ্য ইতি। মহান্ প্রভাবো দণ্ডজং তেজো যস্য সঃ। যেন হেতুনা, তত্রভবতি মাননীয়ে, সারথিরেব দ্বিতীয়ো যস্য তস্মিন্ অনন্যসহায়ে ইত্যর্থঃ, রাজনি, আশ্রমম্ অস্মাকং তপোবনম্, প্রবিষ্টমাত্রে এব প্রবিষ্টে সত্যেব, নঃ অস্মাকম্, কর্ম্মাণি যাগকার্য্যাণি, নিরুপপ্লবানি অনুপদ্রবাণি, সংবৃত্তানি সঞ্জাতানি।

ননু কথং নিরুপপ্লবানীত্যাহ কেতি। হি যস্মাৎ, বাণসন্ধানে লক্ষ্যং প্রতি ধনুষি

(ক) তদনন্তর কুশ লইয়া যজ্ঞপ্রবৃত্ত কোন মুনিশিষ্যের প্রবেশ।

(খ) শিষ্য। (চিন্তা করিয়া বিস্ময়ের সহিত) ওহে! রাজা দুষ্মন্ত মহাপ্রভাবশালী; যে হেতু কেবল সারথির সহিত সেই রাজা আশ্রমে প্রবিষ্ট হইবামাত্রই আমাদের যজ্ঞকার্য্য নিরুপদ্রব হইয়াছে।

---

(১) শিষ্যঃ। অহো মহানুভাবঃ পার্থিবো দুষ্মন্তঃ। প্রবিষ্টমাত্র এবাশ্রমং তত্রভবতি রাজনি নিরুপদ্রবাণি নঃ কর্ম্মাণি প্রবৃত্তানি ভবন্তি।

(২) হুঙ্কারেণৈব…।

यावदेतान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपाहरामि । परिक्रम्यावलोक्य च । आकाशे । प्रियंवदे ! कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीदलानि नीयन्ते ? (१) । श्रुतिमभिनीय । किं कथयसि "आतपलङ्घनाद्बलवदस्वस्थशरीरा शकुन्तला, तस्याः शरीरनिर्वापणाय" इति ? । प्रियंवदे ! यत्नादुपचर्य्यताम् ; सा हि तत्रभवतः कुलपतेर्द्वितीयमुच्छ्वसितम् । अहमपि तावद्वैतानिकं शान्त्युदकमस्या एव गौतमीहस्ते विसर्जयामि । इति निष्क्रान्तः (२) । (ग)

बाणयोजने, का कथा, अपि तु क्वापि नेत्यर्थः । बाणसन्धानेन तु विघ्नान् व्यपोहत्येवेति भावः । स राजा, धनुषो हुङ्कारेणेव हुमिति शब्देनेव, दूरतः ज्याशब्देनैव, विघ्नान् विघ्नस्वरूपान् राक्षसान्, व्यपोहति निरस्यति । अतो महाप्रभाव एव स राजेति भावः ।

अत्र का कथेति अर्थापत्तिः हुङ्कारेणेवेति गुणोत्प्रेक्षा च, अनयोर्मिथो निरपेक्षतया संसृष्टिः ॥१॥

(ग) यावदिति : यावच्छब्दो वाक्यालङ्कारे । एतान् दर्भान् कुशान्, वेदौ यागाय परिष्कृतभूमौ संस्तरणार्थं पातनार्थम्, ऋत्विग्भ्यो याजकेभ्यः, उपाहरामि समर्पयामि । परिक्रम्य यागस्थाने गमनार्थं पादक्षेपं कृत्वा, अवलोक्य प्रियंवदाया नलिनीदलानि नीयन्ते इति दृष्टा । आकाशे शून्ये रङ्गालये वस्तुतः प्रियंवदया अभावेऽपीत्यर्थः । तथा च "किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।

श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम् ॥"

---

কারণ, বাণসন্ধানের কথা আর কি বলিব ; ধনুর হুঙ্কারের ন্যায় দূর হইতে জ্যাশব্দদ্বারাই তিনি বিঘ্ন দূর করিয়া থাকেন ॥১॥

---

(१)···इमान्···उपनयामि । नलिनीपत्राणि ।

(२) किं ब्रवीषि···अस्वस्था शकुन्तला···। तर्हि त्वरितं गम्यताम् । सखि ! सा खलु भगवतः काश्यपस्य कुलपतेरुच्छ्वसितम् ।·· अहं गौतमीहस्ते विसर्जयिष्यामि ।

কস্য জনস্য নিমিত্তং, উশীরানুলেপনং বিচ্ছীরণমূলকৃতানুলেপনম্, মৃণালবন্তি মৃণালযুক্তানি, নলিনীদলানি পদ্মপত্রাণি। শ্রুতিম্ উৎকর্ণত্বাদিরূপাং শ্রবণভঙ্গীম্। আতপেন রবিকিরণেন লঙ্ঘনাৎ উপবনপরিষ্কারাদৌ প্লবনাৎ শরীরব্যাপনাদিত্যর্থঃ, বলবৎ অত্যন্তম্ অসুস্থং সন্তপ্ততয়া অপ্রকৃতিস্থং শরীরং যস্যাঃ সা। তস্যাঃ শকুন্তলায়াঃ শরীরস্য নির্বাপণায় তাপোপশমায়। ইতি কিং কথয়সীতি পূর্বেণান্বয়ঃ।

"লঙ্ঘনন্তু প্লবনে স্যাৎ ক্রমণে প্লবনেঽপি চ" ইতি মেদিনী। হি যস্মাৎ, সা শকুন্তলা, তত্রভবতঃ পূজনীয়স্য, কুলপতেঃ প্রাগুক্তলক্ষণস্য কণ্বস্য, দ্বিতীয়ম্ উচ্ছ্বসিতং জীবনম্, তথৈব তেন সমাদরকরণাদিতি ভাবঃ। বৈতানিকং যজ্ঞসম্বন্ধীয়ম্, শান্ত্যুদকং তাপশান্তিকরং জলম্, অস্যৈ শকুন্তলায়ৈ এব শকুন্তলার্থমেব, গৌতম্যাঃ তদাখ্যায়াঃ কণ্বস্য ধর্মভগিন্যা হস্তে, বিসর্জয়ামি অন্যেন কেনচিৎ দাপয়ামি। ইতি উক্ত্বা ইতি শেষঃ।

দ্বিতীয়মুচ্ছ্বসিতমিতি শকুন্তলোচ্ছ্বসিতয়োর্ভেদেঽপি অভেদাধ্যবসায়াদতিশয়োক্তি-রলঙ্কারঃ।

"বিতানো যজ্ঞ উল্লোচে বিস্তারে পুনপুংসকম্। ক্লীবং বৃত্তবিশেষে স্যাৎ বিস্তিনী মন্দতুচ্ছয়োঃ॥" ইতি মেদিনী।

---

(গ) বেদির উপরে আস্তরণ করিবার জন্য এই কুশগুলি পুরোহিত-দিগের নিকট সমর্পণ করি। (পাদক্ষেপপূর্ব্বক দেখিয়া শূন্যে) প্রিয়ংবদা! তুমি কাহার জন্য এই বিণ্যার মূলের অনুলেপন এবং মৃণালযুক্ত পদ্মের পাতাগুলি নিয়া যাইতেছ?। (শ্রবণ অভিনয় করিয়া) কি বলিলে? রৌদ্রে পরিশ্রম করায় শকুন্তলার শরীর অত্যন্ত অসুস্থ হইয়াছে; তাহার শরীর শীতল করিবার জন্য। প্রিয়ংবদা! যত্নপূর্ব্বক পরিচর্য্যা কর; কারণ, শকুন্তলা মাননীয় কুলপতি কণ্বের দ্বিতীয় জীবন। আমিও ইহার জন্যই গৌতমীর হাতে যজ্ঞীয় শান্তির জল পাঠাইয়া দিতেছি। (এই বলিয়া চলিয়া গেল।)

## विष्कम्भकः । (घ)

ततः प्रविशति समदनावस्थो राजा (১) । (ङ)

राजा । सचिन्तं निश्वस्य (২) ।

जाने तपसो वीर्य्यं सा बाला परवतीति मे विदितम् ।
न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम् (৩) ॥১॥

(घ) विष्कोति । विष्कम्भाति पूर्वापरम् उपाख्यानं संयोजयति यः प्रबन्धः स विष्कम्भकः । तल्लक्षणन्तु साहित्यदर्पणे यथा—

"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः ।
शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः ॥"

तथा चात्र 'अहो महाप्रभावो राजा' इत्यादिना 'विघ्नान् व्यपोहति' इत्यन्तेन सन्दर्भेण यज्ञायतनात् राक्षसापसारणरूपवृत्तकथांशनिदर्शनम् ; 'प्रियंवदे ! कस्येदम्' इत्यादिना 'विसर्जयामि' इत्यनेन च शकुन्तलासन्तापप्रयुक्तवर्त्तिष्यमाणकथांश-निदर्शनं सूचितमित्यनुसन्धेयम् । स चायं मध्यमपात्रेण यजमानशिष्येण प्रयोजितत्वात् शुद्ध इति बोध्यम् ।

(ङ) तत इति । मदनावस्थया उत्कण्ठादिकामदशया सहेति समदनावस्थः, राजा प्रकरणात् दुष्मन्तः ।

## (ঘ) বিষ্কম্ভক ।

(ঙ) তদনন্তর সকাম অবস্থায় রাজার প্রবেশ ।

রাজা । ( চিন্তার সহিত নিশ্বাস ত্যাগ করিয়া )

---

(১) कामयमानावस्थः । (২) राजा । निश्वस्य ।

(৩)···अलमस्मि ततो हृदयं तथापि नेदं निवर्त्तयितुम् ।

भगवन्! मन्मथ! कुतस्ते कुसुमायुधस्य सतस्तैक्ष्ण्य-मेतत् (१)। स्मृत्वा। आं ज्ञातम् (२)। (च)

नन्वात्मनः कामपीड़ानिवृत्तये रहो वा बलाद्वा शकुन्तलया सह सङ्गम्यतामित्याह जाने इति। तपसो मुनीनां तपस्यायाः, वीर्य्यं सामर्थ्यम्, अहं जाने अवगच्छामि। तथा च रहःसङ्गमे बलात्सङ्गमे वा महर्षिः कण्वस्तदवगत्य मां भस्मीकरिष्यतीति तदुभयविधोऽपि सङ्गमो न सम्भवतीति भावः। अथ तर्हि यथा शकुन्तला तुभ्यमात्मदानं करोति तथा चेष्ट्यतामित्याह सेति। सा बाला शकुन्तला, परवती पराधीना, इति मे विदितं ज्ञातमस्ति। अतस्तस्या आत्मदानमपि न सम्भवतीति भावः। ननु तदा ततो हृदयं निवर्त्त्य सुस्थो भव इत्याह न चेति। निम्नात् गभीरदेशात् सलिलं जलमिव, ततः शकुन्तलातः, मे मम हृदयञ्च कर्त्तृ, न निवर्त्तते न उत्तिष्ठति न प्रत्यावर्त्तते च। अतएव इदानीं का गतिरिति भावः।

अत्र श्रौतोपमालङ्कारः। आर्य्या जातिः ॥१॥

(च) भगवन्निति। हे भगवन्! जगति सर्वत्र समानक्षमताप्रकाशात् महा-माहात्म्यशालिन्! मनो मथ्नातीति हे मन्मथ! कुसुमं पुष्पमेव आयुधमस्त्रं यस्य तादृशस्य सतः, एतत् ईदृशं तैक्ष्ण्यं तीक्ष्णता प्रखरता। तथा च भवतः पुष्परूप-कोमलायुधतया कोमलत्वस्यैव सम्भवे ईदृशी तीक्ष्णता आश्चर्य्यैवेति भावः।

अतएवात्र हेतुविरुद्धगुणोत्पत्तेर्विषमालङ्कारः। तैक्ष्ण्यमिति पदांशगतो दुःश्रवत्व-दोषः 'प्रखरतैषा' इति पाठेन समाधेयः। स्मृत्वा स्मरणभङ्गीमभिनीय। आमिति स्मरणार्थमव्ययम्। ज्ञातं चिन्तया तीक्ष्णताकारणमवगतमित्यर्थः।

"आं ज्ञाने निश्चयस्मृत्योः" इति मेदिनी।

---

আমি তপস্যার শক্তি জানি; আবার সেই বালিকা যে পরাধীনা তাহাও আমার জানা আছে। কিন্তু নিম্নস্থান হইতে জলের ন্যায়, আমার মন শকুন্তলা হইতে নিবৃত্তি পাইতেছে না ॥১॥

(চ) হে মাহাত্ম্যশালী কামদেব! তুমি কুসুমায়ুধ; সুতরাং

---

(१) क्वचिदयं पाठो नास्ति। (२) क्वचिदेष पाठो न दृश्यते।

Public Lil

अद्यापि नूनं हरकोपवह्नि-
स्त्वयि ज्वलत्यौर्व इवाम्बुराशौ ।
त्वमन्यथा मन्मथ ! मद्विधानां
भस्मावशेषः कथमेवमुष्णः (१) ॥२॥

किं ज्ञातमित्याह अद्यापीति । हे मन्मथ ! अम्बुराशौ समुद्रे, और्वो बाड़वानल इव, हरस्य महादेवस्य कोपवह्निः क्रोधोत्थिततृतीयनयनाग्निः, अद्यापि इदानीमपि, त्वयि ज्वलति, इति नूनं निश्चितम् । अन्यथा न ज्वलति चेत् तदेत्यर्थः, हे मन्मथ ! हरेण दग्धीकरणात् भस्मैव अवशेषश्चरमावस्था यस्य स तादृशः त्वम्, मद्विधाना मादृशानां कामातुराणां जनानां सम्बन्धे इति तात्पर्य्यम्, कथम् एवम् इत्थम् उष्णः, अनुभूयसे इति शेषः ।

अत्र श्रौतोपमालङ्कारप्रौढोक्तिभ्यां विच्छित्तिवशात् उष्णत्वरूपसाधनेन मन्मथे वह्नि-ज्वलनात्मकसाध्यस्य ज्ञानादनुमानालङ्कारः, शीतलीभूतभस्मावशेषात् उष्णत्वरूपगुणोत्पत्ते-र्विषमालङ्कारस्य ; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः । न च नूनमित्यस्योत्-प्रेक्षाव्यञ्जकतया उत्प्रेक्षैवेयमिति वाच्यम्, अत्र नूनमित्यस्य निश्चयार्थकत्वात् तथैव चानुभवात् तर्कार्थकत्वस्थल एव चास्योत्प्रेक्षाव्यञ्जकत्वाङ्गीकारात् "उत्प्रेक्षायामनिश्चिततया प्रतीतिः, इह तु निश्चिततयेत्युभयोर्भेदः" इति दर्पणकारोक्तेश्च ।

अत्र स्मृतिर्नाम नाट्यलक्षणम्—"स्मृतिः केनचिदंशेन किञ्चिद्दयतानुभीयते" इति दर्पणलक्षणात् ।

ऊर्वस्य ऋषेरपत्यमिति और्वः । पुरा किल ऊर्वेण ऋषिणा अयोनिजं पुत्रमिच्छता स्वपक्षो निर्मथ्य यः पुरुषो निर्गमितः, समुद्रे वड़वामुखे स्थापितश्च, स एव बाड़वानलः । इति पौराणिकीवार्त्ता । "और्वस्तु बाड़वो वड़वानलः" इत्यमरः ।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥२॥

তোমার এরূপ প্রখরতা আসল কোথা হইতে!। (স্মরণ করিয়া) ও! বুঝিয়াছি।

(१) क्वचित् पुस्तके एष श्लोकोऽपि नास्ति ।

अपि च, त्वया चन्द्रमसा च अतिविश्वसनीयामभिसन्धीयते कामिसार्थः (१) । कुतः—(छ)

तव कुसुमशरत्वं शीतरश्मित्वमिन्दोः
द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैः
त्वमपि कुसुमबाणान् वज्रसारीकरोषि ॥३॥

(छ) इदानीमुपालम्भमारभते अपि चेति । अतिविश्वसनीयाभ्यां कोमलत्वेन लोकैरत्यन्तविश्वास्याभ्यां युवाभ्याम्, कामिसार्थः कामुकसमूहः, अभिसन्धीयते पर प्रखरताप्रकाशात् प्रत्यार्यते ।

"स घसार्थौ तु जन्तुभिः" इत्यमरः । "वञ्चनञ्चाभिसन्धानं व्यलीकञ्च प्रतारणम्" इति हेमचन्द्रः ।

तवेति । तव प्रकरणात् मन्मथस्य, कुसुमानि पुष्पाण्येव शरा यस्य तत्त्वम्, इन्दोश्चन्द्रस्य, शीताः शीतला रश्मयः किरणा यस्य तत्त्वम्, इदं द्वयं मद्विधेषु मादृशेषु कामिजनेषु विषयेषु, अयथार्थं मिथ्याभूतम्, दृश्यते । कथमयथार्थमित्याह विसृजतीति । इन्दुश्चन्द्रः हिमं गर्भे अभ्यन्तरे येषां तैस्तादृशैः, मयूखैः किरणैः, अग्निम्, विसृजति वर्षति ; अत्रापि मद्विधेष्वित्यन्वीयते । मद्विधैस्तथैवानुभवादिति भावः । तथा त्वं मन्मथोऽपि, कुसुमबाणान्, वज्राणामिव सारो बलं येषां ते वज्रसाराः, अवज्रसारान्

সমুদ্রে বড়বানলের ন্যায়, নিশ্চয়ই তোমাতে অদ্যাপি মহাদেবের ক্রোধানল জ্বলিতেছে ; না হইলে, হে কামদেব! তুমি ভস্মাবশিষ্ট হইয়া, আমাদের মত লোকের পক্ষে এরূপ উষ্ণ হইলে কিরূপে ॥২॥

(ছ) আরও, তুমি এবং চন্দ্র এই দুইজন অত্যন্ত বিশ্বাসের পাত্র হইয়া কামী লোকদিগকে প্রতারণা করিয়া থাক। কারণ,

(१) मदनबाधां निरूप्य । भगवन् ! कुसुमायुध ! त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः । कुतः—

अथवा (१) । (ज)

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे ।
यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति (२) ॥४॥

भगवन् ! एवमुपालब्धस्य ते न मां प्रत्यनुक्रोशः (३) । (झ)

वज्रसारान् करोषीति वज्रसारीकरोषि ; मद्विधेष्वित्यनुषङ्गः । मद्विधानामसह्यत्वादित्याशयः । अतएव कुसुमशरत्वेन शीतरश्मित्वेन च अतिविश्वसनीयाभ्यां मद्विधः कामिसार्थः अभिसन्धीयत एवेति समुदायाभिप्रायः ।

अत्र अयथार्थत्वं प्रति पराईवाक्यार्थद्वयस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गम्, हिमगर्भमयूखेभ्यः अग्निविसर्गोत्पत्तेः कुसुमबाणाभ्यां वज्रवत्प्रहारोत्पत्तेश्च विषमालङ्कारद्वयम्, इत्येतेषामङ्गाङ्गिभावेन सङ्करः ।

गुणातिपातो नाम नाट्यलक्षणञ्च—"गुणातिपातः कार्य्यं यद्विपरीतं गुणान् प्रति" इति दर्पणलक्षणात् ।

मालिनी वृत्तम् ॥३॥

(ज) पक्षान्तरमभिधत्ते अथवेति ।

अनिशमिति । मकरकेतुर्मन्मथः, मदिरे मत्तखञ्जनपक्षिद्वयमिव आयते दीर्घे नयने नेत्रद्वयं यस्यास्ताम्, तां शकुन्तलाम्, अधिकृत्य अवलम्ब्य प्रहारे आश्रित्य, यदि मां प्रहरति मदुद्देशेन तां प्रहृत्य तदुद्देशेन यदि माञ्च प्रहरतीत्यर्थः, इति एवं सति, अनिशं सर्वदा, मे मम मनसो रुजं पीड़ाम्, आवहन्नपि जनयन्नपि, अभिमतः अनुकूलत्वेन सम्मतः स्यादिति शेषः, मदुद्देशेन तस्या अपि प्रहारात् तथैव च तदनुरागलाभादिति भावः ।

তোমার কুসুমশরত্ব, আর চন্দ্রের শীতরশ্মিত্ব, এই দুইটী পদার্থ, আমার মত লোকের পক্ষে মিথ্যা দেখিতেছি। কারণ, চন্দ্র হিমগর্ভ কিরণদ্বারা অগ্নিবর্ষণ করেন, আর তুমিও পুষ্পময় বাণগুলিকে বজ্রের ন্যায় তীক্ষ্ণ কর ॥৩॥

(१-२-३) चिह्नितपाठाः पुस्तकान्तरे न दृश्यन्ते ।

वृथैव सङ्कल्पशतैरजस्रम्
अनङ्ग ! नीतोऽसि मयातिवृद्धिम् ।
आकृष्य चापं श्रवणोपकण्ठे
मय्येव युक्तस्तव बाणमोक्षः (१) ॥५॥

अत्र पीडाजनकोऽपि अभिमत इति विरोधाभासोऽलङ्कारः ।

आर्य्या जातिः ॥४॥

(झ) भगवन्निति । एवम् अनेन प्रकारेण प्रतारकत्वेनेत्यर्थः, उपालब्धस्य मयैव तिरस्कृतस्य, ते तव, मां प्रति अनुक्रोशो दया न जायत इति शेषः । तथा च दुःखेन तिरस्कृतो दुःखयिता दुःखितं प्रति दयां करोतीति रीतिस्त्वयि न दृश्यत इति भावः ।

वृथैवेति । हे अनङ्ग ! मया अजस्रं सर्वदा सङ्कल्पशतैः 'प्रियतमया शकुन्तलया सममेवं विचरिष्यामि इत्थञ्च विहरिष्यामि' एवम्भूताभिर्बहुतराशाभिः, त्वं वृथैव अनर्थकमेव, अतिवृद्धिम् अत्यन्तमभ्युदयम् अत्याधिक्यञ्च, नीतः प्रापितोऽसि ; अनङ्गस्य सङ्कल्पजत्वात् सङ्कल्पबाहुल्ये अतिवृद्धेरेव सम्भवादित्याशयः । नन्वतिवर्द्धनस्य कथं वृथात्वमित्याह आकृष्येति । तथा च श्रवणोपकण्ठे कर्णसमीपे आकर्णमित्यर्थः, चापं धनुः, आकृष्य विद्यमानस्येति शेषः तव, मय्येव अतिवर्द्धयितारं मां प्रत्येव, बाणमोक्षः शरनिक्षेपः, युक्त उचितः, "उपकृतं बहु तत्र किमुच्यते" इत्यादिदर्पणोदाहरणवत्

(জ) অথবা, কামদেব যদি আমার উদ্দেশে সেই খঞ্জনদীর্ঘনয়না শকুন্তলাকে প্রহার করিয়া, আমাকে প্রহার করিতেন, তবে সর্ব্বদার জন্য, আমার মনের দুঃখ জন্মাইয়াও আমার অভিমত হইতেন ॥৪॥

(ঝ) হে মহিমান্বিত! এইরূপে তোমার তিরস্কার করিতেছি, তথাপি আমার প্রতি তোমার দয়া হইতেছে না।

(१) अयं श्लोकोऽपि क्वचिन्नास्ति ।

सखेदं परिक्रम्य। क्व नु खलु निरस्तविघ्नैस्तपस्विभिरनुज्ञातः खिन्नमात्मानं विनोदयामि। न च प्रियादर्शनादृते शरणमन्यत्। यावदेनामन्विष्यामि। ऊर्द्ध्वमवलोक्य। इमामुग्रातपां वेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना तत्रभवती शकुन्तला गमयति। भवतु, तत्रैव तावद्गच्छामि। परिक्रम्यावलोक्य च। अनया बालपादपवीथ्या सुतनुरचिरं गतेति तर्कयामि। कुतः—(१) (ञ)

विपरीतलक्षणया कथमपि न युक्त इत्यर्थः; वर्द्धनेन उपकर्त्तारं प्रति तादृशयत्किञ्चित् प्रत्युपकारस्यैव युक्तत्वादिति भावः।

अत्र अतिवर्द्धनात्मककारणकार्य्यस्य वैफल्यात् बाणाघातप्राप्तिरूपस्यानर्थस्य च सम्भवात् विषमालङ्कारः, अतिवर्द्धनस्य वृथात्वं प्रति परार्द्धवाक्यार्थस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गञ्च; अनयोर्मिथो निरपेक्षतया संसृष्टिः।

तथा बाणमोक्षेण विपत्प्राप्त्या विरोधो नाम प्रतिमुखसन्ध्यङ्गम्—"विरोधो व्यसनप्राप्तिः" इति दर्पणलक्षणात्।

आकृष्येत्यनन्तरं विद्यमानस्येत्यध्याहारात् न्यूनपदत्वदोषः? कल्पहानिः।

उपजातिर्वृत्तम् ॥५॥

(ञ) सखेदमिति। सकामपीडमित्यर्थः। निरस्ता मयैव दूरीकृताः विघ्ना

হে কামদেব! সর্ব্বদা শত শত কামনাদ্বারা অনর্থক তোমাকে অত্যন্ত বর্দ্ধিত করিতেছি। কর্ণপর্য্যন্ত ধনু আকর্ষণ করিয়া, আমার প্রতিই তোমার বাণক্ষেপ করা উচিত হইতেছে ॥৫॥

(१) परिक्रम्य। क्व नु खलु संस्थिते कर्म्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि। निश्वस्य। किं नु खलु मे प्रियादर्शनादृते शरणमन्यत्। यावदेनामन्विष्यामि। सूर्य्यमवलोक्य। इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुन्तला गमयति। तत्रैव तावद्गच्छामि।

सम्मीलन्ति न तावद्बन्धनकोषास्तयावचितपुष्पाः ।
क्षीरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः (१) ॥६॥

राक्षसकर्तृकयज्ञव्याघाता येषां तैः तपस्विभिः, अनुज्ञातः यथेष्टविचरणादावनुमतः अहम्, क्व कस्मिन् स्थाने; नु खलु, खिन्नं सन्तप्तम्, आत्मानं मनः, विनोदयामि आश्वासयामि । ननु पवनभ्रमणादिना विनोदयेत्याह न चेति । प्रियायाः शकुन्तलायाः दर्शनादृते साक्षात्कारं विना, अन्यत् किमपि शरणं सन्तापनिवर्त्तकतया रक्षकम् अस्तीति शेषः । एनां शकुन्तलाम् । उग्रं भीषणमत्यन्तमित्यर्थः यथा स्यात्तथा तपति सन्तापं जनयतीति ताम्, वेलां समयं मध्यन्दिनमित्यर्थः । लतावलयानि एषां सन्तीति तेषु लतामण्डपशालिषु तदभ्यन्तरे प्रविश्येति तात्पर्य्यम्, मालिन्याः नद्याः तीरेषु । गमयति अतिवाहयति । सुतनुः सुन्दरदेहा शकुन्तला, अनया दृश्यमानया, बालपादपवीथ्या नूतनतरुश्रेण्या तदन्तर्गतपथेनेत्यर्थः, अचिरम् अनतिपूर्व्वम् ।

अत्र विचारो नाम नाट्यलक्षणम्—"विचारो युक्तिवाक्यैर्यदप्रत्यक्षार्थसाधनम्" इति दर्पणलक्षणात् ।

सम्मीलन्तीति । तया शकुन्तलया, अवचितानि सञ्चितानि पुष्पाणि येषां ते, अमी

(এ) (দুঃখের সহিত পাদক্ষেপ করিয়া) বিঘ্ন দূর হইলে পর, তপস্বীরা আমাকে যাইবার জন্য অনুমতি দিয়াছেন, এখন আমি সন্তপ্ত মনকে কোথায় যাইয়া আশ্বস্ত করি। শকুন্তলার দর্শন ভিন্ন অন্য কিছুই আমার সন্তাপনিবর্ত্তক হইবে না। সুতরাং উঁহাকেই অন্বেষণ করি। (উপরের দিকে চাহিয়া) সেই শকুন্তলা, সখীজনের সহিত, লতামণ্ডপসম্পন্ন মালিনীনদীর তীরে, প্রায়ই এই দারুণরৌদ্রসম্পন্ন সময় অতিবাহিত করিয়া থাকেন। হউক, সেইখানেই যাই। (পাদক্ষেপ করিয়া দেখিয়া) এই ছোট ছোট গাছগুলির ভিতর দিয়া সুন্দরী শীঘ্রই গিয়াছে বলিয়া মনে করি। কারণ—

(१) अयं पाठः क्वचिन्नास्ति ।

स्पर्शं रूपयित्वा । अहो ! प्रवातसुभगोऽयं वनोद्देशः (१) । (ट)

शक्योऽरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैर्निर्दयमालिङ्गितुं पवनः (२) ॥७॥

बन्धनकोषा वृन्तोपरिभागाः, न सम्मीलन्ति इदानीमपि न सङ्कोचं प्राप्नुवन्ति । पुष्पाणां बहुपूर्वं चयने तु सम्मीलन्त्येवेति भावः । अमी किसलयच्छेदाः पल्लवखण्डानि च, क्षीरस्निग्धा निर्यासेन सक्लेदाः दृश्यन्ते । बहुपूर्वं पल्लवच्छेदने तु क्षीरशोषेण रूक्षतैव स्यादिति भावः । तावच्छब्दो वाक्यालङ्कारे ।

अत्र अप्रस्तुतयोरेव बन्धनकोष-किसलयच्छेदयोरेकदर्शनक्रियया सह कर्म्मतया अभिसम्बन्धात् तुल्ययोगितालङ्कारः ; शकुन्तलया अचिरगमनप्रतिपादनकार्य्यं प्रति उक्तविध-कारणद्वयोपन्यासात् समुच्चयश्च ; अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः ।

आर्य्या जातिः ॥६॥

(ट) स्पर्शमिति । त्वचि वायोरनुभवमभिनीयेत्यर्थः । अहो इति हर्षे । प्रवातेन शैत्य-सौगन्ध्य मान्द्यात्मकगुणत्रयशालिना वायुना, अयं वनोद्देशः वनैकदेशः, सुभगो मनोहरः ।

"सुन्दरेऽधिकभाग्ये च दुर्द्दिनेतरवासरे । तुरीयांशे श्रीमति च सुभगः—" इति शब्दार्णवः ।

प्रवातसुभगत्वं समर्थयति शक्य इति । अनङ्गतप्तैः अङ्गैर्ममैव हस्तपदाद्यवयवैः,

তিনি যে বোঁটা হইতে ফুল তুলিয়া নিয়াছেন, সে বোঁটাগুলি এখনও বুজিয়া যায় নাই এবং এই পল্লবখণ্ডগুলিকেও রসাক্ত দেখিতেছি ॥৬॥

(ট) (স্পর্শ অভিনয় করিয়া) ওহে ! উৎকৃষ্ট বায়ু বহিত হইতে থাকায় বনের এই স্থানটী বড়ই মনোহর হইয়াছে ।

(१) परिक्रम्य संस्पर्शं रूपयित्वा ।·· उद्देशः ।

(२) शक्यमरविन्दसुरभिः···। अविरलमालिङ्गितुं···।

विलोक्य । हन्त ! अस्मिन् वेतसलतामण्डपे सन्निहितया शकुन्तलया भवितव्यम् । तथाहि—(१) (ठ)

अभ्युन्नता पुरस्तादवगाढ़ा जघनगौरवात् पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥८॥

अरविन्दैः पद्मैः तत्स्पर्शैरित्यर्थः सुरभिः सौगन्ध्यवान्, तथा मालिन्या नद्यास्तरङ्गाणां कणवाही बिन्दुधारी । अनेन विशेषणद्वयेन वायोः सौगन्ध्यं शैत्यञ्च दर्शितम् । पवनो वायुः, निर्दयं गाढं यथा स्यात्तथा, आलिङ्गितुं शक्यः मया पारयितव्यः । एतेन मान्द्यं सूचितम्, बलवद्वायोः कष्टकरतया आलिङ्गनरुच्यभावात् । अतएव एतद्गोद्देशस्य सुभगत्वमित्याशयः । आर्य्या जातिः ॥७॥

(ठ) विलोक्येति । पदचिह्नावलीं दृष्ट्वेत्यर्थः । हन्तशब्दो हर्षे । हर्षश्च सन्निधाने शकुन्तलास्थित्यनुमानात् । वेतसलतामण्डपे मण्डपाकारताप्राप्तवेतसलतासमूहाभ्यन्तरे, सन्निहितया स्थितया ।

अभ्युन्नतेति । पाण्डवः पाण्डुवर्णाः सिकता बालुका यस्मिन् तत्र, अस्य लतामण्डपस्य द्वारे, पुरस्तात् पदपङ्क्तेरिव अग्रदेशे, अभ्युन्नता गुल्फचिह्नापेक्षया किञ्चिदुन्नता, गुल्फ एव जघनगौरवस्य सञ्चारेण अङ्गुलीषु तत्सञ्चाराभावादिति भावः; तथा पश्चात् पदपङ्क्तेरिव पश्चाद्भागे गुल्फपातस्थाने इत्यर्थः, जघनस्य कटीसम्मुखभागस्य गौरवात् भारात्, जघनभारस्य समसूत्रपातेन गुल्फ एव सञ्चारादित्यर्थः, अवगाढा चिह्नसम्मुखापेक्षया किञ्चिद्गभीरा, अभिनवा सद्योजाता, इदानीमपि बालुकापाताद्यभावादिति भावः, पदपङ्क्तिः पादचिह्नश्रेणी दृश्यते । अन्येषां स्त्रीपुरुषाणामत्रागमना-

পদ্মস্পর্শে সুগন্ধ এবং মালিনীনদীর তরঙ্গকণবাহী এই বায়ুকে, কামসন্তপ্ত অঙ্গদ্বারা গাঢ় আলিঙ্গন করিতে পারিব ॥৭॥

(ঠ) (দেখিয়া) হায়! মণ্ডপাকার এই বেতসকুঞ্জের ভিতরে শকুন্তলা থাকিতে পারেন। কারণ—

(१) परिक्रम्यावलोक्य च । अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे···।

यावद्विटपान्तरेणावलोकयामि। तथा कृत्वा सहर्षम्। अये! लब्धं नेत्रनिर्वाणम्। एषा मनोरथप्रिया मे सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामुपास्यते। भवतु, लताव्यवहितः शृणोमि विस्रब्धकथितान्यासाम्। इति विलोकयन् स्थितः (१)। (ङ)

दर्शनात् अनसूयाप्रियंवदयोश्च तादृशजघनगौरवाभावात् इयं पदपङ्क्तिः शकुन्तलाया एवेति भावः।

चरणस्य गुल्फ इव अङ्गुल्यग्रस्थे अवनभारसञ्चारासम्भवपद्धतिः प्रत्यक्षतया 'अभ्युन्नता पुरस्तात्' इत्यत्र न निर्हेतुत्वदोषः। द्वारदेशस्य सिकतामयत्वाभावे पदचिह्न-पतनासम्भवात् सिकतानाञ्च साधारणमहत्त्वे प्रायेण छायासमानवर्णतया मण्डपस्य च्छायायां पदपङ्क्तिदर्शनासम्भवात् पाण्डुसिकते इति द्वारविशेषणम्, अतो नापि अपुष्टार्थत्वदोषः।

"न च प्रियादर्शनादृते शरणमन्यत्" इत्यारभ्य एतदन्ते सन्दर्भे परिसर्पो नाम प्रतिमुखसन्ध्यङ्गम्। यथा साहित्यदर्पणे—

"दृष्टनष्टानुसरणं परिसर्पश्च कथ्यते।"

आर्या जातिः॥८॥

(ङ) यावदिति। विटपान्तरेण तरुशाखाभ्यन्तरेण। अये इति हर्षे। नेत्र-निर्वाणं दिदृक्षतापाप्तिजनितनेत्रतापानलशान्तिः। मनोरथेन अभिलाषमात्रेणैव न पुनः सङ्गमपर्यन्तेनापीत्यर्थः प्रिया प्रीतिकरा शकुन्तला, कुसुमास्तरणेन पुष्पशय्यया सहेति सकुसुमास्तरणम्, शिलापट्टं प्रस्तरफलकम्, अधिशयाना आश्रित्य पातितदेहा, सखीभ्यामनसूयाप्रियंवदाभ्याम्, उपास्यते परिचर्यते। लतया व्यवहितः अन्तरितदेहः,

ইহার দ্বারে শুভ্র বালুকারাশির উপরে, সম্মুখে উন্নত এবং জঘন-দেশের ভারবশতঃ পশ্চাদ্ভাগে গভীর নূতন পদচিহ্নশ্রেণী দেখিতেছি ॥৮॥

(१)···परिक्रम्य तथा कृत्वा सहर्षम्।···एषा मे मनोरथप्रियतमा सखीभ्या-मन्वास्यते। भवतु, श्रोष्यामि आसां विस्रब्धकथितानि।

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला । (ढ)

**सख्यौ ।** उपवीज्य । **हला सउन्तले ! अवि सुहाअदि दे णलिणीवत्तवादो ? ।** (ण)

(ण) हला शकुन्तले ! अपि सुखयति ते नलिनीपत्रवातः ? ।

आसां शकुन्तलानसूयाप्रियंवदानाम्, विश्रब्धकथितानि स्वैरालापान् । आत्मप्रकाशे तु आलापबन्धो भावगोपनं वा भवेदिति भावः ।

शिलापट्टमिति "आधारोऽधिशीङ्स्थासां कर्म्म" इत्यधिकरणे कर्म्मत्वम् ।

(ढ) तत इति । यथोक्तव्यापारा सखीभ्यां परिचर्य्यमाणा शिलापट्टमधिशयाना च, प्रविशति सभ्यानां दृष्टिगोचरीभवति । एवञ्च तत्स्थले विश धातोः सभ्यदृष्टिगोचरत्वे लक्षणा । अतः शयानायाः स्वयं प्रवेशो नानुपपन्न इति ध्येयम् ।

अत्र शकुन्तलादिभिः सह राज्ञो मेलनात् वर्णसंहारो नाम प्रतिमुखसन्धेरङ्गम्— "चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते" इति भरतलक्षणे "चातुर्वर्ण्योपगमनं पात्राणां मेलनम्" इत्यभिनवगुप्तव्याख्यानात् ।

(ण) सख्याविति । अपिशब्दः प्रश्ने । नलिनीपत्रवातः पद्मलतापत्रचालनजनितवायुः, ते तव, सुखयति सुखं करोति तापं शमयति किमित्यर्थः ।

(ড) এই তরুশাখার ভিতর দিয়া দেখি। (তাহা করিয়া আনন্দের সহিত) ওহে! আমি চোখের শান্তি লাভ করিয়াছি। এই আমার প্রাণের প্রিয়তমা, পুষ্পশয্যাসমন্বিত প্রস্তরফলকের উপরে অবস্থান করিতেছেন, আর সখীরা পরিচর্য্যা করিতেছে। হউক, লতার অন্তরালে থাকিয়া, ইঁহাদের বিশ্রম্ভালাপ শুনি। (এই বলিয়া দর্শন করতঃ দাঁড়াইয়া রহিলেন।)

(ঢ) (তদনন্তর সখীজনের সহিত উক্তবিধ অবস্থায় শকুন্তলার প্রবেশ।)

शकु। सखेदम्। किं वीजअन्ति मं पिअसहीओ (१)। (त)

सख्यौ। सविषादं परस्परमवलोकयतः (२)। (थ)

राजा। बलवदसुस्थशरीरा तत्रभवती दृश्यते। सवितर्कम्। तत् किमयमातपदोषः स्यात्, उत यथा मे मनसि वर्त्तते। साभिलाषं निर्वर्ण्य। अथवा, कृतं सन्देहेन (३)। (ट)

(त) किं वीजयतो मां प्रियसख्यौ।

(त) शकु इति। विफलमिदं वीजनं तापशान्त्यभावादिति भावः। अत्र सख्योरनुनयाग्रहणात् विधूतं नाम प्रतिमुखसन्धेरङ्गम्। यथा दर्पणे—

"कृतस्यानुनयस्यादौ विधूतं त्वपरिग्रहः।"

न चैवम्, "अलं वो अन्ते उर" इत्यादिना शकुन्तलादेव दर्पणे दत्तोदाहरणेन सह विरोध इति वाच्यम्, दर्पणकृतैव क्रमाच्यगर्भसन्ध्यङ्गलक्षणे "अलं वो अन्ते उर" इत्यादितः पूर्ववर्त्तिनः "स्थाने खलु विस्मृतनिमेषेण चक्षुषा" इत्यादिशाकुन्तलप्रबन्धस्यैव लक्ष्यतया उदाहृतात् तस्यैव च भ्रमनिश्चयात्। पूर्वस्य प्रतिमुखसन्धिः परस्य गर्भसन्धिः एवञ्च पूर्वांशस्य गर्भसन्ध्यङ्गत्वे परांशस्य च प्रतिमुखसन्ध्यङ्गत्वे सन्धिसाङ्कर्य्यं स्यादिति सुधीभिर्भाव्यम्।

(थ) सख्याविति। वायुना शान्त्यभावात् अन्तस्ताप एवायम्, तस्य च शान्त्युपायो दुष्कर एवेति सूचनार्थं परस्परावलोकनम्।

(ণ) সখীরা। (বাতাস করিয়া) ওলো শকুন্তলা! পদ্মপাতার বাতাস তোমার শান্তি জন্মাইতেছে ত ?।

(ত) শকুন্তলা। (খেদের সহিত) তোমরা কেন আমাকে বাতাস করিতেছ।

(থ) সখীরা। (বিষাদের সহিত পরস্পর দর্শন করিতে লাগিল।)

(१)···सख्यौ। (२) विषादं नाटयित्वा।

(३) बलवदसुस्थशरीरा शकुन्तला दृश्यते। विचिन्त्य।

स्तनन्यस्तोशीरं प्रशिथिलमृणालैकवलयं
प्रियायाः साबाधं तदपि कमनीयं वपुरिदम् (१)।
समस्तापः कामं मनसिजनिदाघप्रसरयोः
न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥८॥

(द) राजेति। बलवत् अत्यन्तम् अस्वस्थं शरीरं यस्याः सा। आतपदोषः रविकिरणजनितसन्तापः। उत अथवा, यथा मे मनसि वर्त्तते कामसन्ताप एवायमिति यदहं सम्भावयामि, तथैव स्यादित्यर्थः। साभिलाषं शकुन्तलायां सलिप्सम्, निर्वर्ण्य दृष्ट्वा। सन्देहेन अयमातपदोषः कामसन्तापो वा इति संशयेन, कृतम् अलम्।

"कृतं युगेऽलमर्थे च" इति मेदिनी।

ननु सन्देहाभावः कुत इत्याह स्तनेति। स्तनयोः न्यस्तं तापशान्तये दत्तम् उशीरं वीरणमूलकृतानुलेपनं यस्य तत् तादृशम्, तथा प्रशिथिलं शरीरस्य कृशत्वात् श्लथीभूतं मृणालमेव एकं केवलं वलयं यत्र तत् तथोक्तम्, प्रियायाः शकुन्तलायाः, इदं वपुः शरीरम्, आबाधया सम्यक् पीडया सहेति साबाधम्, वर्त्तत इति शेषः, तापशान्त्युपायानुष्ठानादिति भावः; तदपि तथापि, कमनीयं मनोहरम्। तथापि कामग्रीष्मयोस्तापसाम्यमङ्गीकृत्य व्यतिरेकेण कामस्यैवायं ताप इत्यनुमिनोति सम इति। मनसिजनिदाघप्रसरयोः कामप्रादुर्भाव-ग्रीष्मप्रादुर्भावयोः, स तापो दाहः, समः समानः, कामम् इति मयानुमतमङ्गीकृतमित्यर्थः; तु किन्तु, युवतिषु विषये, ग्रीष्मस्य निदाघस्य, एवमित्थम् सुभगं सौन्दर्य्यजनकत्वात् सुन्दरम्, अपराद्धं परस्य तापकष्टजननादपराधः, न भवतीति शेषः। अतः पारिशेष्यात् कामताप एवायमिति निःसन्देह इत्याशयः।

(দ) রাজা। শকুন্তলাকে অত্যন্ত অসুস্থশরীরা দেখিতেছি। (বিতর্কের সহিত) তবে কি ইহা রৌদ্রের দোষ? না, আমার মনে যাহা লইতেছে?। (অভিলাষের সহিত দেখিয়া) অথবা সন্দেহ করিবার প্রয়োজন নাই।

(१)···शिथिलितमृणालैकवलयम्।···किमपि कमनीयम्।

प्रिय॰। जनान्तिकम्। अणसूए! तस्स राएसिणो पढमदंसणादो आरब्भिअ पज्जुस्सुअमणा सउन्तला; ण क्खु से अण्णणिमित्तो आतङ्को भवे (१)। (ध)

(ध) अनसूये! तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्य्युत्सुकमनाः शकुन्तला; न खल्वस्या अन्यनिमित्त आतङ्को भवेत्।

अत्र शकुन्तलादेहस्य सतापत्वनिरूपणकार्य्यं प्रति स्तनन्यस्तोशीरत्वरूपे एकस्मिन् कारणे सत्यपि प्रशिथिलमृणालैकवलयत्वरूपकारणान्तरोपन्यासात् समुच्चयालङ्कारः, तथा सुस्थत्वादिरूपकारणाभावेऽपि कमनीयतारूपकार्य्योत्पत्तेः किं विभावना? किं वा साबाधत्वरूपकारणे सत्यपि कुरूपत्वरूपकार्य्यानुत्पत्तेर्विशेषोक्तिरिति विभावनाविशेषोक्त्योः सन्देहसङ्कर इत्युभयोः परस्परनिरपेक्षतया संसृष्टिः। साक्षात्प्रतिपादकाभावादनुमानालङ्कारस्तु व्यज्यत इति वस्तुनालङ्कारध्वनिः।

"काममसूयानुमते प्रकामेऽनुमतावपि" इति हेमचन्द्रः।

शिखरिणी वृत्तम् ॥८॥

(ध) प्रियमिति। तस्य राजर्षेर्दुष्मन्तस्य। पर्य्युत्सुकमनाः कामेन उत्कण्ठितचित्ता। आतङ्कस्तापः। आर्य्योपान्तमालोच्यैव मयेदं सम्भाव्यत इति भावः।

"रुक्तापशङ्कास्वातङ्कः" इत्यमरः।

স্তনে বিণ্যার মূলের অনুলেপন দেওয়া হইয়াছে, মৃণালের একটী বলয় অত্যন্ত শিথিল হইয়াছে এবং অত্যন্ত সন্তাপ চলিতেছে; তথাপি প্রিয়তমার এই দেহখানি সুন্দর দেখা যাইতেছে। কামাবির্ভাব এবং গ্রীষ্ম—এই উভয়েরই সন্তাপ সমান, ইহা আমি স্বীকার করি, কিন্তু যুবতিগণের প্রতি গ্রীষ্মের এইরূপ সুন্দর অপরাধ হইতে পারে না ॥৮॥

(ধ) প্রিয়ংবদা। ( অনসূয়ার প্রতি চুপি চুপি ) অনসূয়া! সেই

(१)···पज्जुस्सुआ विअ सउन्तला। किं ण क्खु से तण्णिमित्तो अअं आतङ्को भवे।

अन। सहि! मम वि एआरिसी आसङ्का हिअअस्स। भोदु. पुच्छिस्सं दाव णं। प्रकाशम्। सहि! पुच्छिदव्वासि किम्पि। बलीओ क्खु दे अङ्गाणं सन्दावा। (न)

राजा। वक्तव्यमेव (१)। (प)

शशिकरविशदान्यस्यास्तथाहि दुःसहनिदाघशंसीनि।
भिन्नानि श्यामिकया मृणालनिर्म्माणवलयानि (२) ॥१०॥

(न) सखि। ममापि एतादृशी आशङ्का हृदयस्य। भवतु, प्रक्ष्यामि तावदेनाम्। सखि। प्रष्टव्यासि किमपि। बलीयान् खलु ते अङ्गानां सन्तापः।

(न) अनेति। एतदपि जनान्तिकमेवेति बोध्यम्, परत्र प्रकाशमित्यभिधानात्। एतादृशी त्वदुक्तरूपा आशङ्का सन्देहः। खलु यस्मात्। बलीयान् अतीवप्रबलः। अतः प्रष्टव्यासीत्यन्वयः।

(प) राजेति। वक्तव्यमेव प्रष्टव्यमेवेत्यर्थः।

वक्तव्यत्वसाधनायाह शशीति। तथाहि तमेवार्थं जानीहि। "तथेत्यगणपरिपठितो धातुर्गतौ, तस्य हौ प्रयोगः" इति कातन्त्रपरिशिष्टटीकायां गोपीनाथः।

राजर्षির প্রথম দর্শন হইতে আরম্ভ করিয়া, শকুন্তলা উৎকণ্ঠিত চিত্তা হইয়াছেন, ইঁহার এই সন্তাপ অন্য কারণ হইতে হইবে বলিয়া বোধ হয় না।

(ন) অনসূয়া। সখি! আমার মনেরও এইরূপই আশঙ্কা। হউক, ইঁহাকে জিজ্ঞাসা করি। (প্রকাশ্যে) সখি! তোমাকে কোন বিষয় জিজ্ঞাসা করিব; যে হেতু তোমার অঙ্গের সন্তাপ, বড়ই বেশী বলিয়া বোধ হইতেছে।

(প) রাজা। অবশ্যই জিজ্ঞাসা করা উচিত।

(१) क्वचिदयं पाठो नास्ति। (२) कुत्रचिदेष श्लोकोऽपि न दृश्यते।

শকু। পূর্বার্দ্ধেন শয়নাদুত্থায়। হলা! ভণ, জং বত্তুকামাসি (১)। (ফ)

অন। হলা সউন্তলে! অনব্‌ভন্তরা অহ্মে দে মণোগদস্স বুত্তন্তস্স; কিন্তু জাদিসো ইদিহাসকধাণুবন্ধেসুং কামিঅণাণং অবত্থা সুণীঅদি, তাদিসো তুহ ত্তি তক্কেমি।

(ফ) হলা! ভণ, যত্‌ বক্তুকামাসি।

(ব) হলা শকুন্তলে! অনভ্যন্তরা বয়ং তে মনোগতস্য বৃত্তান্তস্য; কিন্তু যাদৃশী ইতিহাসকথানুবন্ধেষু কামিজনানামবস্থা শ্রূয়তে; তাদৃশী তবেতি তর্কয়ামি। ননু শশিকরবত্‌ চন্দ্ররশ্মিবত্‌ বিশদানি স্বভাবত এব ধবলানি, অস্যাঃ শকুন্তলায়াঃ, মৃণালৈর্‌ নির্ম্মাণং যেষাং তানি মৃণালনির্ম্মাণানি তানি চ তানি বলয়ানি চেতি তানি, শ্যামিকয়া স্বস্বদেহগাবতাপজনিতকালিম্না, ভিন্নানি যুক্তানি সন্তি, দুঃসহং নিদাঘং তাপং শংসন্তি সূচয়ন্তীতি তানি তথাভূতানি জাতানীতি শেষঃ। অতো বক্তব্যমেবেতি ভাবঃ।

অত্র শশিকরবিশদানীতি লুপ্তোপমা, তন্মূলকবিচ্ছিত্ত্যা চ শকুন্তলাঙ্গানি তাপবন্তি তজ্জনিতশ্যামিকাশালিমৃণালবলয়বত্ত্বাদিতি জ্ঞানাদনুমানালঙ্কারঃ।

আর্য্যা জাতিঃ ॥১০॥

(ফ) শকু ইতি। পূর্বার্দ্ধেন দেহপূর্বভাগেন, শয়নাত্‌ শয্যাতঃ। কামক্লান্ততয়া সর্বদেহচালনাসামর্থ্যাত্‌ পূর্বার্দ্ধেনেত্যুক্তম্‌। ভণ ব্রূহি। বক্তুং কাম ইচ্ছা যস্যাঃ সা বক্তুকামা। "তুমঃ কামমনসোঃ" ইতি তুমো মলোপঃ।

কারণ, চন্দ্রকিরণের ন্যায় শুভ্রবর্ণ ইহার মৃণালবলয়গুলি, কাল হইয়া, দুঃসহ সন্তাপের সূচনা করিতেছে ॥১০॥

(ক) শকুন্তলা। (দেহের সম্মুখভাগদ্বারা শয্যা হইতে একটু উঠিয়া) ওলো! বল, যাহা বলিতে ইচ্ছা করিয়াছ।

(১)···পূর্বার্দ্ধেন পুষ্পশয্যামুদস্য। হলা! কিং বত্তুকামাসি?।

ता कधेहि किं णिमित्तं दे अअं आआस त्ति। विआरं परमत्थदो अआणिअ अणारम्भो किल पडीआरस्स (१)। (ब)

राजा। अनसूययापि मदीयस्तर्कोऽवगतः (२)। (भ)

---

कथय किं निमित्तं ते अयम् आयास इति। विकारं परमार्थतः अज्ञात्वा अनारम्भः किल प्रतीकारस्य।

---

(ब) अनेति। न लब्धं न प्रविष्टम् अन्तरं मध्यं याभिस्ता अनभिज्ञा इत्यर्थः, त्वया अप्रकाशितत्वादित्यर्थः। इतिहासकथायाः पुरावृत्तोपाख्यानस्य अनुबन्धेषु परम्परासु। तर्कयामि सम्भावयामि। आयासः श्रमः पीड़ेत्यर्थः। परमार्थतो यथार्थरूपेण, विकारं रोगम्। प्रतीकारस्य चिकित्सायाः अनारम्भः अप्रवृत्तिः, रोगं ज्ञात्वैव तच्चिकित्सायामारम्भः सम्भवतीति रोगं कथयेति भावः।

(भ) राजेति। तर्कः सम्भावना। मम यादृशी सम्भावना तादृशीं सम्भावनां कृत्वैव इत्थं पृच्छत इत्यर्थः।

---

(ব) অনসূয়া। শকুন্তলা! আমরা তোমার মনের বৃত্তান্তের ভিতরে প্রবেশ করিতে পারি নাই; কিন্তু তথাপি ঐতিহাসিক উপাখ্যানে কামিলোকের যেরূপ অবস্থা শুনিতে পাই, তোমারও সেইরূপ অবস্থা হইয়াছে ইহা মনে করিতেছি। অতএব বল, তোমার এই পীড়ার কারণ কি। যথার্থরূপে রোগ না জানিয়া প্রতীকার আরম্ভ করিতে পারা যায় না।

(ভ) রাজা। অনসূয়াও, আমার মনের ধারণা অবগত হইয়াছে।

---

(१) अणब्भन्तरा क्खु अम्हे मअणगअस्स वुत्तन्तस्स। किन्तु जारिसी इदिहास-णिबन्धेसु कामअमाणाणं अवत्था सुणीअदि तारिसिं दे पेक्खामि। सन्तावो।

(२) अनसूययाप्यनुगतो मदीयस्तर्कः। नहि स्वाभिप्रायेण मे दर्शनम्।

शकु । बलीओ आआसो, ण सक्कणोमि सहसा णिवेदिदुं (१) । (म)

प्रियं । सुट्ठु क्खु एसा भणादि, किं एदं अत्तणो उवद्दवं णिगूहसि, अणुदिअसं क्खु परिहीअसि । अङ्गेसुं लावस्समई छाआ केवलं तुमं ण मुञ्चदि (२) । (य)

(म) बलीयानायासः, न शक्नोमि सहसा निवेदयितुम् ।

(य) सुष्ठु खल्वेषा भणति, किमितमात्मन उपद्रवं निगूहसि, अनुदिवसं खलु परिहीयसे । अङ्गेषु लावण्यमयी छाया केवलं त्वां न मुञ्चति ।

(म) शकु इति । बलीयान् अतीवप्रबलः, आयासः पीड़ा ; अतएव न शक्नोमीत्यर्थः । किञ्चित्स्वास्थ्योपस्थितौ निवेदयामीति भावः ।

(य) प्रियमिति । एषा शकुन्तला, सुष्ठु युक्तियुक्तत्वात् भद्रम् । उपद्रवं पीड़ाम्, निगूहसि गोपयसि । नैतदुचितमित्याह अन्विति । अनुदिवसं प्रतिदिनम्, परिहीयसे क्रमशः क्षीणदेहा भवसि । छाया कान्तिः । न मुञ्चति न परित्यजति स्वभावसुन्दरत्वादिति भावः ।

"छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्यमरः ।

"मुक्ताफलस्य छायायां तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते ॥" इत्युज्ज्वलनीलमणिः ।

(म) শকুন্তলা। পীড়া অতিপ্রবল হইয়াছে; সুতরাং হঠাৎ বলিতে পারিতেছি না।

(য) প্রিয়ংবদা। শকুন্তলা ভালই বলিতেছে। কেন নিজের

(१) आत्मगतम् । बलव क्खु मे अहिणिवेए मा दाणिं वि सहसा एदाणं ण सक्कणोमि णिवेदिदुं ।

(२) सहि ! सुट्ठु एसा भणइ । किं अत्तणो आतङ्कं उवेक्खसि ।

राजा । अवितथमाह प्रियंवदा । तथाहि—(र)

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा ।
शोच्या च प्रियदर्शना च मदनग्लानेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥११॥

(र) राजेति । अवितथम् अमिथ्या सत्यमित्यर्थः, आह अनुदिवसं खलु परिहीयसे इति ब्रवीति । तत् सत्यत्वं प्रतिपादयितुमाह तथाहीति ।

क्षामेति । आननं शकुन्तलाया वदनम्, क्षामक्षामौ अतीवक्षीणौ कपोलौ गण्डौ यस्य तत् तादृशम्; उरो वक्षःस्थलम्, काठिन्येन मुक्तौ रहितौ स्तनौ यस्य तत् तथोक्तम्; मध्यः कटिदेशः, क्लान्ततरः नितान्तदुर्बलः; अंसौ स्कन्धौ, प्रकामविनतौ अतीवावनतौ; छविर्देहकान्तिः, पाण्डुरा पाण्डुवर्णा; अतएव मदनग्लाना कामप्रादुर्भावक्लान्ता, इयं शकुन्तला; पत्राणां पर्णानाम्, शोषयतीति शोषणस्तेन, मरुता वायुना, स्पृष्टा माधवी लता इव, शोच्या क्षीणत्वादिना शोचनीया च, प्रियं प्रीतिकरं दर्शनं यस्याः सा तादृशी च; आलक्ष्यते दृश्यते । अतः "अणुदिवसं क्खु परिहीअसि । अङ्गेसुं लावण्णमई छाआ केवलं तुमं ण मुञ्चदि" इति प्रियंवदया यदुक्तं तदवितथमेवेति भावः ।

अत्र प्रियंवदोक्तिसमर्थनकार्यं प्रति आननक्षामक्षामकपोलत्वादिबहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः श्रौतोपमा च अनयोर्मिथो निरपेक्षतया संसृष्टिः । तथा एकवचनान्तप्रयोगमध्ये अंसौ इति द्विवचनान्तप्रयोगात् भग्नप्रक्रमता दोषः; स च 'प्रकामविनतः स्कन्धः' इति पाठेन समाधेयः; तथात्वेऽपि "नेत्रं समुन्मीलय" इत्यादिवत् द्वित्वेऽपि जात्यपेक्षया एकवचनोपपत्तिः ।

উপদ্রব গোপন করিতেছ? প্রতিদিন ক্ষীণ হইয়া যাইতেছ, কিন্তু অঙ্গের লাবণ্যময়ী কান্তি কেবল তোমাকে ত্যাগ করিতেছে না।

(র) রাজা। সত্য কথাই বলিয়াছে। কারণ—

শকু। নিশ্বস্য। কস্স বা অস্সস্স কধইস্সং, কিন্তু আআস-হেতুআ বো ভবিস্সং (১)। (ল)

উভে। সহি! অদো জ্জেব ণিব্বন্ধো। সিণিদ্ধজণ-সংবিভত্তং ক্খু দুক্খং সজ্ঝবেঅণং ভোদি (২)। (ব)

(ল) কস্য বা অন্যস্য কথয়িষ্যামি, কিন্তু আয়াসহেতুকা বো ভবিষ্যামি।

(ব) সখি! অতএব নির্বন্ধঃ। স্নিগ্ধজনসংবিভক্তং খলু দুঃখং সহ্যবেদনং ভবতি।

---

আমআমেতি ঘঁধাতোঃ "ঘঁযুবিপচাং মকবাঃ" ইতি মপ্রত্যয়ঃ "প্রকারে গুণবচনস্য" ইতি দ্বির্বচনঞ্চ।

শার্দুলবিক্রীড়িতং বৃত্তম্॥১১॥

(ল) শকু ইতি। অন্যস্য যুবাং বিনা অপরস্য, কস্য জনস্য বা সমীপে কথয়িষ্যামি কস্যাপি নেত্যর্থঃ; মম যুবয়োস্তুল্যাপরবন্ধুজনাভাবাদিতি ভাবঃ। আয়াসহেতুকা পরিশ্রমহেতুভূতা। বো যুষ্মাকম্।

(ব) উভে ইতি। অনন্যগামিত্বং বই ছ এব চনহবন ব্যর্থঃ। অতএব অন্য-

---

শকুন্তলার মুখমণ্ডলের গণ্ডযুগল অতিশয় ক্ষীণ হইয়াছে; বক্ষঃস্থলের স্তন দুইটী অতিশয় কাঠিন্য ত্যাগ করিয়াছে; কটিদেশ অত্যন্ত ক্লান্ত হইয়াছে। স্কন্ধদ্বয় অতিশয় অবনত হইয়াছে এবং দেহের কান্তি পাণ্ডুরবর্ণ হইয়াছে। অতএব পত্রশোষণকারী বায়ুকর্তৃক সংস্পৃষ্ট মাধবী লতার ন্যায়, এই কামপীড়িতা শকুন্তলাকে শোচ্যা অথ চ প্রিয়-দর্শনা বলিয়া লক্ষ্য করিতেছি॥১১॥

(ল) শকুন্তলা। (নিশ্বাস ত্যাগ করিয়া) অন্য কাহার নিকটেই বা বলিব; কিন্তু তোমাদের পরিশ্রমের কারণ হইব।

---

(১) সহি! কস্স। আআসহলিআ দাণিং বো ভবিস্সং।

(২) ক্বচিৎ সহি! ইতি নাস্তি।

राजा। पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम्।
दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रोत्तरश्रवणकातरतां गतोऽस्मि (१) ॥१२॥

स्यान्तिके अकथनीयतया अभिन्नहृदयत्वेन आवयोरन्तिके कथनीयत्वादेव, निर्बन्धः तव दुःखं श्रोतुमावयोराग्रहातिशयः। खलु यस्मात्, स्निग्धजनेषु बन्धुलोकेषु, संविभक्तं सम्यक् विभज्य अर्पितम्, दुःखम्, सह्या सोढुं शक्या वेदना यातना यस्य तत् तादृशं भवति; बहुभिरुह्यमानो भार इवेति भावः। इत्यन्तः प्रतिमुखसन्धिः।

पृष्टेति। समे तुल्ये दुःखसुखे यस्य तेन तादृशेन, जनेन अनेन सखीद्वयेनेत्यर्थः, पृष्टा स्वयातनाप्रकाशाय जिज्ञासिता, इयं बाला अल्पवयाः शकुन्तला, मनोगतम् आधेर्मानसिकपीडाया हेतुं कारणम्, न वक्ष्यति न प्रकाशयिष्यति इति न, सखी-निर्बन्धेन अवश्यमेव वक्ष्यतीत्यर्थः। किन्तु अनया शकुन्तलया, विवृत्य परिवृत्य, सतृष्णं साभिलाषं यथा स्यात्तथा, बहुशो वारं वारम्, दृष्टोऽपि प्रथमदिन एवावलोकितो-ऽपि अहम्, अत्र इदानीम्, उत्तरस्य सखीजिज्ञासाया: प्रतिवाक्यस्य श्रवणाय कातरतामस्थिरताम्, गतोऽस्मि; पूर्वं तथा साभिलाषदर्शनात् किं मामुद्दिश्यैव मन्मथेनाकुलीकरणादियमवस्था? अथवा कारणान्तरादिति सन्देहनिरासाय अधीरी-भूतोऽस्मीति भावः।

अत्र कारणाभावेऽपि कातरतारूपकार्य्योत्पत्तेः किं विभावना, किंवा साभिलाष-बहुतरदर्शनरूपकारणे सत्यपि स्वोद्देश्यककामनिबन्धने तदवस्थानिर्णयरूपतत्कार्य्यानुत्-पत्तेर्विशेषोक्तिरिति सन्देहाद्विभावनाविशेषोक्त्योः सन्देहसङ्करालङ्कारः।

(ব) সখীদ্বয়। সখি! এই জন্যই ত অত্যন্ত আগ্রহ করিতেছি। কারণ, বন্ধুজনের উপর দুঃখ ভাগ করিয়া দিলে, তাহার বেদনা সহ্য হইয়া থাকে।

(१) अत्रान्तरे श्रवणकातरतां।

शकु। जदो पहुदि तवोवणरक्खिदा सो राएसी मम दंसणपधं गदो। इत्यर्द्धोक्ते लज्जां नाटयति (१)। (श)

“काकमयूरौ” इत्यादिवत् “यच्चार्चितं द्वयोः” इत्यस्य व्यभिचारात् दुःखसुखेति दुःखशब्दस्य पूर्वनिपातः।

वसन्ततिलका वृत्तम्।

इत्यादिस्तृतीयाङ्कसमाप्तिपर्य्यन्तो गर्भसन्धिः। तथा चात्र “दृष्टा जनेन” इत्यादिना शकुन्तलाया अनुरागसत्त्वे तत एव तत्प्राप्तौ दुष्मन्तस्य उपायशङ्का; तथा “अवहीरणा-भीरुअं वेवदि हिअअं” इत्यनेन शकुन्तलाया दुष्मन्तप्राप्तौ अपायशङ्का, इत्युभाभ्या-मुभयोः पाक्षिकप्राप्तिसम्भावनाकरणात् प्राप्त्याशा नाम तृतीया कार्य्यावस्था निबद्धा। तथा च दर्पणे—“उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः।”

एवं दुष्मन्तशकुन्तलयोः सम्मेलनमेव फलम्, तस्य च प्रधानोपायः परस्परानुरागः, स च पूर्वं कथञ्चिदुद्भिन्नः, अत्र तु सम्यगेव उद्भिन्नः; तथा “दृष्टा जनेन” इत्यादिना “अवहीरणाभीरुअं वेवदि हिअअं” इत्यनेन च उभयोरेवानुरागस्य सन्देहकृतो ह्रासः; एवमुभयोरेव उभयान्वेषणं स्फुटम्; पुनश्च “ण माणणीएसुं जणेसुं अत्ताणं अवराह-इस्सं” “धिग् व्रीडितोऽस्मि” इत्येताभ्यां ह्रासः, तथैव अन्वेषणञ्च स्पष्टमेवेति। यथा दर्पणे—

“फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः॥”

अस्य च अभूताहरणादीनि त्रयोदशाङ्गानि यथास्थानं निर्दिश्य लक्षणानि वक्ष्यामः॥१२॥

রাজা। যাহাদের সুখ ও দুঃখ সমান, সেই সখীরা জিজ্ঞাসা করিয়াছেন, তাহাতে এই বালিকা যে মনঃপীড়ার কারণ বলিতেছেন না এমন নহে। কিন্তু ইনি ফিরিয়া ফিরিয়া বহুবার আমাকে দেখিয়াছিলেন; সুতরাং এখন উত্তর শুনিবার জন্য অধীরতা প্রাপ্ত হইতেছি॥১২॥

(१) क्वचित्। जत्तो पहुइ मम दंसणपहं आअदो सो तवोवणरक्खिदा राएसी, तदो आरहिअ तग्गदेण अहिलासेण एतदवत्थाम्हि संवुत्ता।

উভে। কধেদু কধেদু পিঅসহী (১)। (খ)

শকু। তদো পহুদি তগ্গদেণ অহিলাসেণ এত্তাবত্থম্হি সংবুত্তা (২)। (স)

উভে। দিট্ঠিআ দে অণুরূএ বরে অহিলাসো ; অধবা সাঅরং উজ্ঝিঅ কহিং মহাণঈএ পবিসিদব্বং (৩)। (হ)

---

(শ) যতঃ প্রভৃতি তপোবনরক্ষিতা স রাজর্ষির্মম দর্শনপথং গতঃ।

(খ) কথয়তু কথয়তু প্রিয়সখী।

(স) ততঃ প্রভৃতি তদ্গতেন অভিলাষেণ এতাবদবস্থাস্মি সংবৃত্তা।

(হ) দিষ্ট্যা তে অনুরূপে বরে অভিলাষঃ। অথবা সাগরম্ উজ্ঝিত্বা কুত্র মহানদ্যা প্রবেষ্টব্যম্।

---

(শ) শকু ইতি। স রাজর্ষির্দুষ্মন্তঃ। 'তদো পহুদি' ইত্যাদি বক্ষ্যমাণাপেক্ষয়া অস্য অর্দ্ধত্বং বোধ্যম্। লজ্জাং নাটয়তি অভিনয়তি, সুরতবিষয়কত্বাদিত্যাশয়ঃ।

(স) শকু ইতি। সা গতস্তদ্গতস্তেন দুষ্মন্তবিষয়কেণেত্যর্থঃ, অভিলাষেণ রন্তুমিচ্ছয়া, এতাবতী অবস্থা দশা যস্যাঃ সা।

অত্র গুপ্তবিষয়স্য প্রকাশনাৎ ক্ষিপ্তির্নাম গর্ভসন্ধ্যঙ্গম্। যথা দর্পণে—

"রহস্যার্থস্য তূদ্ভেদঃ ক্ষিপ্তিঃ স্যাৎ।"

---

(শ) শকুন্তলা। যে অবধি তপোবনরক্ষিতা সেই রাজর্ষি, আমার দৃষ্টিপথে পড়িয়াছেন—( এই অর্দ্ধোক্তির পর লজ্জা অভিনয় করিল। )

(খ) সখীদ্বয়। প্রিয়সখী বল বল।

(স) শকুন্তলা। তদবধি তদ্গত অভিলাষবশতঃ আমি এইরূপ অবস্থায় উপনীত হইয়াছি।

---

(১) ক্বচিদয়ং পাঠো নাস্তি। (২) কুত্রচিদেষ পাঠোঽপি পৃথক্ ন বর্ত্ততে।

(৩) ক্বচিৎ এষ পাঠো নাস্তি।

राजा । सहर्षम् । श्रुतं यच्छ्रोतव्यम् (१) । (ज)

स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः ।
दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य (२) ॥१३॥

(छ) उभे इति । दिष्ट्या भाग्येन । उज्झित्वा परित्यज्य । महानद्या गङ्गया । अत्र दृष्टान्तोऽलङ्कारः ।

(ज) राजेति । यत् श्रोतव्यमासीदित्यर्थः । यच्छब्दस्य उत्तरवाक्यगतत्वात् न तच्छब्दापेक्षा ।

स्मर इति । तपात्यये ग्रीष्मकालावसाने, जीवलोकस्य प्राणिजगतः, अपो बिभर्त्तीति अभ्रं मेघस्तेन तद्व्यापनेनेत्यर्थः श्यामः श्यामवर्णः, दिवस इव, स्मरः काम एव मे तापहेतुः सन्तापजनक आसीत्, इदानीं स स्मर एव पुनर्निर्वापयिता तत्तापनिवर्त्तयिता जातः । तथा च यथा ग्रीष्मकाले दिवसो जनानां सन्तापं जनयति, परन्तु ग्रीष्मकालावसाने वर्षोन्मुखमेघावृतगगनः स एव दिवसः शीतवायुवहनात् तं सन्तापं पुनर्निवर्त्तयति ; तथा कामोऽपि शकुन्तलोद्देशेन मम सन्तापं जनितवान्, पुनर्ममोद्देशेन शकुन्तलामपि सन्ताप्य ममाशापूरणेन तं मे सन्तापं निवर्त्तितवानिति सरलार्थो भावार्थश्च ।

अत्र तापजनकत्व-तापोपशमकत्वयोर्विरूपयोः सङ्घटनया विषमालङ्कारः शीतोपमया संसृज्यते । अभ्रश्यामपदेन सजलमेघसूचनेन शीतलवायुवहनसूचनात् न अपुष्टार्थत्वदोषः ।

"अभ्रं मेघो वारिवाहः" इत्याद्यमरः । आर्य्या जातिः ॥१३॥

(ছ) সখীদ্বয়। ভাগ্যবশতঃ উপযুক্ত বরেই তোমার অভিলাষ জন্মিয়াছে। অথবা সমুদ্র পরিত্যাগ করিয়া মহানদী আর কোথায় প্রবেশ করিবে।

(জ) রাজা। ( আনন্দের সহিত ) যাহা শুনিবার, তাহা শুনিলাম। দিন যেমন গ্রীষ্মকালে লোকের সন্তাপ জন্মায়, আবার গ্রীষ্মকাল অতীত হইলে সেই দিনই মেঘমলিন হইয়া সেই সন্তাপের নিবৃত্তি করে,

(१) क्वचित् यच्छब्दो न दृश्यते । (२) दिवस इवार्द्रश्यामः ।

शकु। ता जइ वो अणुमदं, तदो तधा पउत्तिदव्वं, जधा तस्स राएसिणो अणुकम्पणीआ होमि त्ति। अण्णधा सुमरेध मं (१)। (क)

राजा। अहो! विमर्शच्छेदि वचनम्। एतदेव काम-फलम्, यतफलमन्यत्। एतावदवस्थापि मां सुखयति (२)। (ख)

(क) तद् यदि वामनुमतम्, ततस्तथा प्रवर्त्तितव्यम्, यथा तस्य राजर्षेरनुकम्पनीया भवामीति। अन्यथा स्मरतं माम्।

(क) शकु इति। तत् तस्मात्। वा युवयोः अनुमतं सम्मतं दुष्मन्तं प्रति ममेदमभिलाषकरणमित्यर्थः ततस्तदा, प्रवर्त्तितव्यं यतितव्यम्। अनुकम्पनीया सम्मिलनेन दयापात्रीकरणीया। अन्यथा युवयोर्यत्नाभावेन तस्यानुकम्पनीयत्वाभावे, मां स्मरतं मरणावश्यम्भावात् स्मृतिविषयमेव कुरुतमित्यर्थः।

(ख) राजेति। विमर्शच्छेदि सकलसंशयनिवर्त्तकम्। तथा च किमियं शकुन्तला कण्वादिगुरुजनानपेक्ष्यैव आत्मानं दातुं शक्ष्यति; किंवा मह्यमात्मानं दातुमिच्छन्तीमपि पराधीनतया कण्वादिगुरुजनः अन्यस्मै दास्यति इत्यादिः सर्व एव संशयः, अनेन वचनेन निरस्तः, आत्मदाने गुरुजनानपेक्षत्वसूचनादित्याशयः। एतदेव परस्परं प्रति परस्परासक्तिरूपमेव, कामफलं कामेन जनितम्, अन्यत् क्रियाभूतं परिणयादिकम्. यतफलम् उभयोर्वरकन्यापक्षयोश्चेष्टाजन्यम्. तच्च कामेन न जन्यते

সেইরূপ কামদেবই আমার সন্তাপ জন্মাইয়াছিলেন, আবার তিনিই সেই সন্তাপের নিবৃত্তি করিলেন ॥১৩॥

(ক) শকুন্তলা। তা, যদি তোমাদের সম্মত হয়, তবে সেইভাবে প্রবৃত্ত হইবে, যাহাতে আমি সেই রাজর্ষির দয়ার পাত্র হইতে পারি। না হইলে আমাকে স্মরণ করিবে।

(१) ··अणुमदं तह वट्टह···अण्णहा अवस्सं सिञ्चह मे तिलोदअं।

(२) संशयच्छेदि वचनम् इतिमात्रः पाठः क्वचित्।

प्रियं। जनान्तिकम्। अणसूए! दूरगदो से मणोरहो, अक्खमा इअं कालहरणस्स (१)। (ग)

अन। पिअंवदे! को णु उवाओ भवे, जेण अविलम्बिदं णिहुदञ्च सहीए मणोरहं सम्पादेह्म (२)। (घ)

(ग) अनसूये। दूरगतः अस्या मनोरथः, अक्षमा इयं कालहरणस्य।

अयोग्यत्वादिति भावः। एतावती एतत्पर्य्यन्ता मदाशक्तिप्रदर्शनमात्रपर्य्यन्ता अवस्था यस्याः सा तादृश्यपि मां सुखयति; अधुना सङ्गमाजननेऽपि अनर्थाशङ्का भाविसङ्गम-जननस्यावश्यम्भावादित्यभिप्रायः।

अत्र मार्गो नाम गर्भसन्धेरङ्गम्—"तत्त्वार्थकथनं मार्गः" इति दर्पणलक्षणात्।

(ग) प्रियमिति। अस्याः शकुन्तलायाः, मनोरथः दुष्मन्तेन सह सङ्गमाभिलाषः, दूरगतः नितान्ताधिकीभूत इत्यर्थः; अतएव कालहरणस्य विलम्बस्य करणे अक्षमा।

(খ) রাজা। ভাল! সন্দেহনাশক বাক্য বটে। ইহাই কামের ফল; অন্য যাহা, তাহা চেষ্টার ফল। এইরূপ অবস্থা হইয়াও আমাকে সুখী করিতেছে।

(গ) প্রিয়ংবদা। (অনসূয়ার প্রতি চুপি চুপি) অনসূয়া! শকুন্তলার অভিলাষ দূরে উঠিয়াছে; সুতরাং এ, কালক্ষেপ করিতে অসমর্থ হইতেছে।

(१) · दूरगअमम्महा अक्खमा···। जस्सिं बद्धभावा एसा, सो ललामभूदो पौरवाणं। ता जुत्तं से अहिलासो अहिणन्दिदुं।

(२)···तह जह भणासि। प्रियंवदा। प्रकाशम्। सहि! दिट्ठिआ अणुरूवो दे अहिणिवेसो। साअरं वज्जिअ कहिं वा महाणई ओदरइ। को दाणिं सहआरं अन्तरेण अदिमुत्तलदं पल्लविदं सहइ। राजा। किमत्र चित्रं यदि विशाखे शशाङ्क-लेखामनुवर्त्तेते। अनसूया। को उण उवाओ भवे···।

प्रियं । णिहुदं त्ति चिन्तणीअं, सिग्घं त्ति ण दुक्करं । (ङ)

अन । कधं विअ ? । (च)

प्रियं । णं सो वि राएसी इमस्सिं जणे सिणिद्धदिट्ठिआ सूइदाहिलासो इमेसुं दिअसेसुं पजाअरकिसो विअ लक्खीअदि । (छ)

(घ) प्रियंवदे ! को नु उपायो भवेत्, येन अविलम्बितं निभृतञ्च सख्या मनोरथं सम्पादयावः ।

(ङ) निभृतमिति चिन्तनीयम्, शीघ्रमिति न दुष्करम् ।

(च) कथमिव ? ।

(छ) ननु सोऽपि राजर्षिः अस्मिन् जने स्निग्धदृष्ट्या सूचिताभिलाषः एषु दिवसेषु प्रजागरकृश इव लक्ष्यते ।

(घ) अनेति । निभृतं गुप्तञ्च यथा स्यात्तथा । मनोरथं मनोरथविषयभूतं दुष्यन्तसङ्गमम् ।

(ङ) प्रियमिति । निभृतं गुप्तं गुप्तभावेन सम्मेलनजननम्, चिन्तनीयं दुष्करतया भावनीयम्, ऋषीणामितस्ततः सञ्चरणादिति भावः । शीघ्रं शीघ्रं सम्मेलनघटनम्, न दुष्करम्, दुष्यन्तस्यापि एनां प्रति गुरुतरासक्त्यवगमादित्यभिप्रायः ।

(छ) प्रियमिति । अस्मिन् जने शकुन्तलायाम्, स्निग्धदृष्ट्या सानुरागदृष्टिपातेन,

(ঘ) অনসূয়া । প্রিয়ংবদা ! কি উপায় হইবে, যাহাতে অবিলম্বে অথ চ গোপনে সখার অভিলাষ সম্পাদন করিতে পারি ।

(ঙ) প্রিয়ংবদা । গোপনে ইহাই চিন্তার বিষয়; কিন্তু 'শীঘ্র' ইহা দুষ্কর নহে ।

(চ) অনসূয়া । কি রকম ? ।

রাজা। আত্মানমালোক্য। সত্যমিত্থম্ভূত এবাস্মি। তথাহি—(জ)

অশিশিরতরৈরন্তস্তাপৈর্বিবর্ণমলীমসং
নিশি নিশি ভুজন্যস্তাপাঙ্গপ্রবর্ত্তিভিরশ্রুভিঃ।
অনতিলুলিতজ্যাঘাতাঙ্কান্মুহুর্মণিবন্ধনাৎ
কনকবলয়ং স্রস্তং স্রস্তং ময়া প্রতিসার্য্যতে (১) ॥১৪॥

---

সূচিতঃ অভিলাষো যস্য সঃ। প্রজাগরেণ রাত্রিজাগরণেন কৃশঃ। তথা চ তস্যাপ্যাসক্তি-সত্ত্বাৎ শীঘ্রমিতি ন দুষ্করমিতি ভাবঃ।

(জ) রাজেতি। আত্মানং স্বদেহম্। সত্যমিতি প্রিয়ংবদোক্তস্বীকারায়। ইত্থম্ভূতঃ প্রজাগরকৃশ এব।

অশিশিরেতি। অন্তস্তাপৈঃ অন্তর্গতমদনসন্তাপহেতুভিঃ। হেতুত্বঞ্চৈষামশ্রুপ্রবর্ত্তনং প্রতীতি বোধ্যম্। অশিশিরতরৈরত্যুষ্ণৈঃ, নিশি নিশি রাত্রৌ রাত্রৌ, ভুজে হস্তে ন্যস্তাৎ স্থাপিতাৎ অপাঙ্গাৎ নয়নপ্রান্তাৎ প্রবর্ত্তন্তে নির্গচ্ছন্তীতি তৈঃ, অশ্রুভির্নয়নজলৈঃ, বিবর্ণং কস্মিংশ্চিদংশে বিকৃতবর্ণং কস্মিংশ্চিচ্চ মলীমসং মলিনীভূতম্। উভয়োরপি বিশেষণয়োঃ পরস্য বিশেষ্যত্ববিবক্ষয়া "ভাষ্যং প্রসন্নগম্ভীরম্" ইত্যাদিবৎ কর্ম্মধারয়ঃ। কনকবলয়ং স্বর্ণকটকম্, অনতিলুলিতঃ বলয়াবরণেন অনতিব্যক্তঃ জ্যাঘাতাঙ্কঃ ধনুর্গুণঘর্ষণচিহ্নং যস্মিন্ তস্মাৎ তথোক্তাৎ, মণির্বধ্যতেঽস্মিন্নিতি মণিবন্ধনং হস্তস্য প্রকোষ্ঠদেশস্তস্মাৎ স্রস্তং স্রস্তং স্খলিতং স্খলিতম্, ময়া মুহুর্বারং বারং প্রতিসার্য্যতে

---

(ছ) প্রিয়ংবদা। ওহে! সে রাজর্ষিও, এই ব্যক্তির প্রতি স্নিগ্ধ দৃষ্টিদ্বারা, নিজের অভিলাষ ব্যক্ত করিয়াছেন এবং এই কয় দিনেই তাঁহাকে জাগরণবশতঃ কৃশ বলিয়া লক্ষ্য করিয়াছি।

(জ) রাজা। (আপনার দিকে চাহিয়া) সত্য; আমি এইরূপই ত হইয়াছি। যেহেতু—

---

(১)...অন্তস্তাপাদ্বিবর্ণমণীকৃতং।... ভুজন্যস্তাপাঙ্গপ্রসারিভিঃ...। অনতিলুলিত-জ্যাঘাতাঙ্কং। পুনঃ প্রতিসার্য্যতে।

প্রিয়ং। (বিচিন্ত্য।) হলা! মঅণলেহণং দাণিং সে করীঅদু, অহং তং সুমণোগোবিদং কদুঅ দেবদাসেবাবদেসেণ তস্স রণ্ণো হত্থং পাবইস্সং। (ঞ)

(ঞ) হলা! মদনলেখনমিদানীমস্যাঃ ক্রিয়তাম্, অহং তৎ সুমনোগোপিতং কৃত্বা দেবতাসেবাপদেশেন তস্য রাজ্ঞো হস্তং প্রাপয়িষ্যামি।

স্বস্থানং নীয়তে। পূর্বং শরীরস্য আপেক্ষিকস্থূলতয়া দৃঢ়লগ্নস্য কনকবলয়স্যেদানীং স্রংসনাৎ কৃশ এবাস্মীতি ভাবঃ;

অত্র কৃশাঙ্গত্বাৎ প্রস্তুতেন কার্য্যেণ কনকবলয়স্রংসনেন তৎকারণীভূতং কার্শ্যং প্রত্যায্যত ইতি পর্য্যায়োক্তমলঙ্কারঃ। অশিশিরতরৈরিত্যনেন তাপস্যাধিক্যং ব্যজ্যতে। দিবসে রোদনে পরৈঃ সন্দর্শনেন গাম্ভীর্য্যহান্যা ধীরোদাত্তত্বব্যাঘাত ইতি নিশি নিশীত্যুক্তম্। ভুজন্যস্তাপাঙ্গেত্যনেন চিন্তা সূচ্যতে লোকৈস্তথৈব চিন্তাকরণাৎ। জ্যাঘাতাঙ্কস্য উচ্চত্বেনৈব অতিস্পষ্টত্বং ভবতি, অনতিস্পষ্টত্বে চ অনত্যুচ্চত্বম্; ততশ্চ কনকবলয়স্রংসনে জ্যাঘাতাঙ্কেন ন প্রতিবন্ধ ইতি দর্শিতম্। অতো নাপুষ্টার্থতাদোষঃ।

অত্র কনকবলয়মিতি দর্শনাৎ পুরা অবালকানামপি পুরুষাণামলঙ্কারধারণরীতিরাসীদিতি প্রতীয়তে।

হরিণী বৃত্তম্—"ন-স-ম-র-সলাগৈঃ ষড়্বেদৈর্হয়ৈর্হরিণী মতা" ইতি লক্ষণাৎ ॥১৪

(ঞ) প্রিয়মিতি। বিচিন্ত্য উপায়োদ্ভাবনে ভাবনাং কৃত্বা। হলা ইতি অনসূয়া-

আমি প্রত্যেক রাত্রিতে হাতের উপরে নয়নের প্রান্তদেশ রাখিয়া বসিয়া থাকি; তখন ভিতরের সন্তাপের উষ্ণ অশ্রুজল পতিত হইয়া হাতের সোণার বালাগাছীকে বিবর্ণ এবং মলিন করিয়া থাকে; এদিকে ধনুর গুণ আকর্ষণ করায় মণিবন্ধদেশে চিহ্ন হইয়াছে, বলয় থাকায় সে চিহ্ন ব্যক্ত হয় না; এহেন মণিবন্ধদেশ হইতে সেই সোণার বালা বার বার পড়িয়া যাইতে থাকে, আমি আবার তাহা বার বার সরাইয়া দিয়া থাকি ॥১৪॥

অন। সহি! রোঅদি মে সুউমারো এসো পওওো। কিং বা সউন্তলা ভণাদি ?। (ঞ)

শকু। সহীণিওঁওো বি বিকপ্পীঅদি ? (১)। (ট)

(ঞ) সখি। রোচতে মে এষ প্রযোগঃ। কিং বা শকুন্তলা ভণতি ?।

সম্বোধনম্। অস্যাঃ শকুন্তলায়াঃ সম্বন্ধে, মদনলেখনম্ আত্মনঃ কামাবির্ভাবজ্ঞাপিকা লিপিঃ। সুমনোভিঃ পুষ্পৈঃ গোপিতং কৃত্বা পুষ্পরাশেরভ্যন্তরে স্থাপয়িত্বেত্যর্থঃ, দেবতা-সেবাপদেশেন দেবতাপূজাচ্ছলেন আভিঃ সুমনোভির্দেবতা পূজ্যতামিতি ছলেনেত্যর্থঃ।

অত্র অভূতাহরণং নাম গর্ভসন্ধ্যঙ্গম্। তথা চ দর্পণে—

"তত্র ব্যাজাশ্রয়ং বাক্যমভূতাহরণং মতম্।"

"স্ত্রিয়ঃ সুমনসঃ পুষ্পম্" ইত্যাদ্যমরঃ।

(ঞ) অনেতি। সুকুমারঃ কোমলঃ অপরিশ্রমসাধ্য ইত্যর্থঃ। শকুন্তলায়া অভিসরণে তু পরিশ্রমাৎ কাঠিন্যং স্যাদিতি ভাবঃ। প্রযোগঃ অনুষ্ঠানম্। কিংবেত্যাদিকা তু তস্মাৎ শকুন্তলায়া মতমস্তি ন বেতি জিজ্ঞাসার্থা।

(ট) শকু ইতি। সখ্যোর্নিরতিশয়হিতৈষিণোর্যুবয়োঃ নিয়োগ আদেশোঽপি, বিকল্প্যতে কর্ত্তব্যঃ অকর্ত্তব্যো বা ইতি বিবিচ্যতে ? কাকুবশাৎ কথমপি নেত্যর্থঃ। যুষ্মদুপায়ে সর্বথা মম সম্মতিরস্তীতি ভাবঃ।

অত্র মনোরথো নাম নাট্যলক্ষণম্। যথা দর্পণে—

"মনোরথস্ত্বভিপ্রায়স্যোক্তির্ভঙ্গ্যন্তরেণ যৎ।"

(ঝ) প্রিয়ংবদা। (চিন্তা করিয়া) ওলো! উহার জন্য এখন একখানা কামলিপি রচনা কর, আমি তাহা পুষ্পের ভিতরে গুপ্ত করিয়া, দেবতাপূজার ছলে সেই রাজার হাতে পৌঁছাইয়া দিব।

(ঞ) অনসূয়া। সখি! কোমল এই অনুষ্ঠানটী আমারও অভিমত হয়। অথবা শকুন্তলা কি বলে ?।

(১) কী বিওোসো বিকপ্পীঅই।

प्रियं । तेण हि अत्तणो उवण्णासाणुरूअं चिन्तेहि ललिदपदावलिबन्धं गीदिअं (१) । (ठ)

शकु । चिन्तेमि ; किन्तु अवहीरणाभीरुअं वेवदि मे हिअअं (२) । (ड)

(ट) सखीनियोगोऽपि विकल्प्यते ।

(ठ) तेन हि आत्मन उपन्यासानुरूपां चिन्तय ललितपदावलिबन्धां गीतिकाम् ।

(ड) चिन्तयामि ; किन्तु अवधीरणाभीरुकं वेपते मे हृदयम् ।

(ठ) प्रियमिति । तेन हि आत्मनोऽपि सम्मतत्वेनैव हेतुना । उपन्यासानुरूपां प्रथमकथनयोग्याम्, ललितया कोमलया पदावल्या सुमिङन्तपदश्रेण्या बन्धो रचना यस्यास्ताम् । तथात्वे श्रुतिमधुरतया राज्ञः प्रीत्यतिशयो भवेदिति भावः । गीतिका गीतम् । तदेव राज्ञो हस्तं प्रापयिष्यामीत्याशयः ।

"उपन्यासस्तु वाङ्मुखम्" इत्यमरः ।

(ड) शकु इति । चिन्तयामीति प्रियंवदोक्तिस्वीकारः । अवधीरणाया मय्येव राजकृतावज्ञातः भीरुकं भयशीलम् । वेपते कम्पते । तथा च राजा दुष्मन्तो यदि वनवासिनीमकिञ्चनां मामवज्ञया प्रत्याचष्टे, तदा तादृशलेखने केवलकुलटोचितप्रकाशः स्यादित्यभिप्रायः ।

अत्र अवधीरणाजनितभयादुद्वेगो नाम गर्भसन्ध्यङ्गम् । यथा दर्पणे—

"नृपादिजनिता भीतिरुद्वेगः परिकीर्त्तितः ।"

(ट) শকুন্তলা। সখীর আদেশেও কি মতামত করিব ?।

(ঠ) প্রিয়ংবদা। তাহা হইলে নিজের অবস্থার অনুরূপ এবং সুললিতপদাবলীরচিত একটি গীত চিন্তা কর।

(१)···उवण्णासपुव्वं चिन्तेहि दाव किं वि ललिअपदबन्धणं ।

(२) हला···चइ ।···पुण वेवइ ।

राजा । विहस्य । अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु ! यतोऽवधीरणाम् ।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत् ॥१५॥

अपि च, अयं स यस्मात् प्रणयावधीरणाम्
अशङ्कनीयां करभोरु ! शङ्कसे ।

अयमिति । हे भीरु ! अवज्ञाभयशीले ! यतो यस्मात् जनात्, त्वम् अवधीरणाम् अवज्ञाम्, विशङ्कसे सन्दिह्यसि, अयं स जनः, ते तव, सङ्गमाय सम्मेलनाय उत्सुक उत्कण्ठितः सन्, तिष्ठति । तथा च प्रार्थयिता श्रिया एव प्रार्थी जनः, श्रियं सम्पदम्, लभेत प्राप्नुयात्, वा किंवा, न लभेत इत्यर्थः, किन्तु श्रिया तया सम्पदा, ईप्सित आप्तुमिष्टः अभिलषितो जनः, कथं दुरापो दुर्लभः भवेत्, कथमपि नेत्यर्थः । तथा च मयैव त्वं दुर्लभा, न तु त्वया अहं दुर्लभः, त्वत्सिमयैवोपस्थितत्वादित्याशयः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः अर्थापत्तिश्च, अनयोर्गुण-प्रधानभावेनाङ्गाङ्गिभावात् सङ्करः । तथा श्रियं श्रियेति श्रीशब्दस्य वारद्वयोपादानात् कथितपदतादोषः "रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन्" इति साहित्यदर्पणोदा-हरणवत् ; स च 'तया दुरापः' इति पाठेन समाधेयः ।

वंशस्थविलं वृत्तम्—"वदन्ति वंशस्थविलं जतौ जरौ" इति लक्षणात् ॥१५॥

---

(ভ) শকুন্তলা । চিন্তা ত করিব ; কিন্তু আমার মন অবজ্ঞার ভয়ে কাঁপিতেছে ।

রাজা । (একটু হাসিয়া) হে ভীরু ! তুমি যে লোক হইতে অবজ্ঞার আশঙ্কা করিতেছ, এই সেই লোক তোমার সহিত সম্মিলিত হইবার জন্য উৎকণ্ঠিত হইয়া রহিয়াছে । প্রার্থী ব্যক্তি শ্রী পাইতেও পারে, নাও পাইতে পারে ; কিন্তু শ্রী যাহাকে লাভ করিতে ইচ্ছা করেন, সে ব্যক্তি শ্রীর পক্ষে দুর্লভ হইবে কেন ॥১৫॥

उपस्थितस्त्वां प्रणयोत्सुको जनो
न रत्नमन्विष्यति मृग्यते हि तत् (१) ॥१६॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह अयमिति । करभो हस्तस्य मणिबन्धदेशात् कनिष्ठाङ्गुली-पर्य्यन्ततिर्य्यक्प्रदेशाविव ऊरू यस्यास्तत्सम्बोधनम् । हे करभोरु ! यस्मात् जनात्, अशङ्कनीयाम् असन्देहनीयाम्, प्रणयावधीरणां प्रार्थनावज्ञाम् अवज्ञया प्रार्थना-निरासमित्यर्थः, शङ्कसे सन्दिह्यसि ; सः अयं जनः अहमित्यर्थः, प्रणयोत्सुकः तवैव प्रार्थनोद्युक्तः सन्, त्वाम् उपस्थित आगतः । अतएव अस्मादवज्ञाशङ्का कथमपि न करणीयेति भावः । हि तथाहि, रत्नं मणिः कर्त्तृ, न अन्विष्यति लोकान् न मार्गयति ; किन्तु तत् रत्नमेव, मृग्यते लोकैर्मार्ग्यते ।

अत्रापि पूर्ववदेव अर्थान्तरन्यासोऽलङ्कारः । तथा पूर्ववदेव प्रणयशब्दस्य द्विःपाठात् कथितपदतादोषः, किञ्च चतुर्थपादे कर्त्तृपदानभिधानात् न्यूनपदतादोषश्च, अन्विष्यति इत्यनेन प्रक्रम्य मृग्यत इत्यभिधानात् भग्नप्रक्रमतादोषश्च । तेषां समाधानाय परार्द्धमेवं पठनीयम्—"उपस्थितस्तेऽर्थयिता स्वयं जनान् न याचते रत्नमिदं हि याच्यते ॥" तथा च रत्नं कर्त्तृ जनान् न याचते, इदं रत्नमेव याच्यते तैर्जनैरिति विभक्तिविपरिणामेन याच्यत इत्यस्य कर्त्तृपदप्राप्तिरिति ध्येयम् ।

"प्रणयः प्रेम्णि याच्ञायाम्" इति हेमचन्द्रः । "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः ।

चतुर्थचरणमविकलमेव रघुवंशतृतीयसर्गेऽपि दृश्यते । वंशस्थविलं वृत्तम् ॥१६॥

---

আরও, হে করভোরু! তুমি যে ব্যক্তি হইতে, আশঙ্কার অযোগ্য প্রার্থনাভঙ্গের আশঙ্কা করিতেছ, এই সেই ব্যক্তি তোমারই প্রার্থনার জন্য উৎকণ্ঠিত হইয়া উপস্থিত হইয়াছে। কারণ, রত্ন কাহাকেও অন্বেষণ করে না, রত্নকেই সকলে অন্বেষণ করে ॥১৬॥

---

(१) क्वचिदेष श्लोको न दृश्यते ।

সখ্যৌ। অই অত্তগুণাবমাণিণি! কো ণাম সন্দাব-ণিব্বাণহেতুঅং সারদীঅং জোসুং আদবত্তেণ ণিবারেদি (১)। (ঢ)

শকু। সস্মিতম্। ণিওইদাহ্মি (২)। ইত্যুপবিষ্টা চিন্তয়তি। (ণ)

(ঢ) অয়ি আত্মগুণাবমানিনি! কো নাম সন্তাপনির্বাণহেতুকাং শারদীং জ্যোৎস্নাম্ আতপত্রেণ নিবারয়তি।

(ণ) নিয়োজিতাস্মি।

(ঢ) সখ্যাবিতি। আত্মনো গুণান্ সৌন্দর্য্যাদীনবমন্যতে অবজানাতীতি আত্ম-গুণাবমানিনী তৎসম্বোধনম্। পরমসুন্দরমপ্যাত্মানং প্রতি কুরূপত্বাদিনৈব রাজাবজ্ঞা-শঙ্কাকরণাৎ আত্মনঃ সৌন্দর্য্যাদিগুণান্ প্রত্যেব অবজ্ঞাকরণং সঞ্জাতমিতি ভাবঃ। সন্তাপনির্বাণস্য গ্রীষ্মতাপশান্তেঃ হেতুকাং হেতুভূতাম্, শারদীং শরৎকালীনাম্। এতদ্বিশেষণেন জ্যোৎস্নায়া শৈত্যবৈশদ্যাতিশয়দ্যোতনেন সন্তাপশান্ত্যতিশয়ো দ্যোত্যতে। আতপত্রেণ ছত্রেণ, কো নাম জনঃ, নিবারয়তি অপি তু কোঽপি নেত্যর্থঃ। তথা দুষ্মন্তোঽপি স্বকামসন্তাপনির্বাণহেতুভূতাং পরমসুন্দরীং ত্বাং নাবজ্ঞয়া প্রত্যাখ্যাস্যত ইতি ভাবঃ।

অতএবাত্র সমাদপ্রস্তুতাৎ প্রস্তুতসমপ্রতীতিরূপা অপ্রস্তুতপ্রশংসালঙ্কারঃ।

(ণ) শকু ইতি। স্বপ্রশংসাশ্রবণেন মনোরথপূরণসম্ভবকৌতুকেন চ সস্মিতমিতি বোধ্যম্। নিয়োজিতাস্মি যুবয়োরাদেশেন প্রবর্ত্তিতাস্মি মদনলেখরচনায়ামিতি শেষঃ। চিন্তয়তি মদনলেখমবহায ভাবয়তি।

(ঢ) সখীদ্বয়। ওগো আত্মগুণের অবজ্ঞাকারিণি! কোন্ ব্যক্তি, সন্তাপের শান্তিকারক শারদীয় জ্যোৎস্নাকে ছত্রদ্বারা নিবারণ করে?।

(ণ) শকুন্তলা। (ঈষৎ হাস্য করিয়া) নিযুক্ত হইলাম। (এই বলিয়া উঠিয়া বসিয়া চিন্তা করিতে লাগিল।)

(১) অত্তগুণাবমাণিণি! কো দাণিং সরীরণিব্বাবইত্তিঅং সারদিঅং জোণ্হিং পড়ন্তেণ বারেই। (২) ণিওইদা দাণিং ম্হি।

রাজা। স্থানে খলু বিস্মৃতনিমেষেণ চক্ষুষা প্রিয়ামবলোকয়ামি। যতঃ—(ত)

উন্নমিতৈকভ্রূলতমাননমস্যাঃ পদানি রচয়ন্ত্যাঃ।
পুলকাঞ্চিতেন কথয়তি ময্যনুরাগং কপোলেন (১) ॥১৩॥

শকু। হলা! চিন্তিদা মএ গীদিআ। অসণ্ণিহিদাণি উণ লেহণসাহণাণি (২)। (থ)

(ত) রাজেতি। স্থানে যুক্তম্। বিস্মৃতনিমেষেণ নির্নিমেষেণ। তথা চ নির্নিমেষেণ চক্ষুষা যৎ প্রিয়ামবলোকয়ামি, তৎ যুক্তমেবেত্যর্থঃ। তৎ প্রতিপাদয়িতুমাহ যত ইতি।

"যুক্তে দ্বে সাম্প্রতং স্থানে" ইত্যমরঃ।

উন্নমিতৈকেতি। পদানি মদনলেখপ্রয়োগান্, রচয়ন্ত্যাঃ সংঘটয়ন্ত্যাঃ, অস্যাঃ শকুন্তলায়াঃ, উন্নমিতা উত্তোলিতা একা ভ্রূলতা যস্য তৎ আননং মুখং কর্তৃ, পুলকাঞ্চিতেন রোমাঞ্চব্যাপ্তেন, কপোলেন গণ্ডেন করণেন, ময়ি মদ্বিষয়ে, অনুরাগং কথয়তি কথনবৎ স্পষ্টং সূচয়তি, মদনুরাগবশাদেব পুলকাবির্ভাবাদিতি ভাবঃ।

অত্র রাজ্ঞঃ শকুন্তলায়া ভাবতত্ত্বোপলব্ধেঃ ক্রমো নাম গর্ভসন্ধ্যঙ্গম্—"ভাবতত্ত্বোপলব্ধিস্তু ক্রমঃ স্যাৎ" ইতি দর্পণলক্ষণাৎ। ইদমেব চ তত্রোদাহৃতম্। ব্যতিক্রমদোষসমাধানন্তু পূর্বমেবোক্তম্। আর্য্যা জাতিঃ ॥১৩॥

(ত) রাজা। নির্নিমেষ নয়নে যে প্রিয়তমাকে দেখিতেছি, তাহা উচিতই বটে। কারণ—

ইনি কামলিপির পদ রচনা করিতেছেন, ইঁহার একটী ভ্রূলতা উপরে উঠিয়াছে; এই অবস্থায় ইঁহার মুখখানি, রোমাঞ্চিত গণ্ডদ্বারা আমার প্রতি অনুরাগ প্রকাশ করিতেছে ॥১৩॥

(১) কণ্টকিতেন প্রথয়তি…।

(২) হলা! চিন্তিদং মএ গীদবত্থু। ণহু সণ্ণিহিদাণি উণ…।

প্রিয়ং। ণং ইমস্সিং সুঅোদরসুউমারে ণলিণীবত্তে পদ-চ্ছেদভত্তীএ ণহেহিং আলিহীঅদু (১)। (দ)

শকু। যথোক্তং রূপয়িত্বা। হলা! সুণাধ দাব সঙ্গদত্থা ণ বত্তি (২)। (ধ)

(থ) হলা! চিন্তিতা ময়া গীতিকা। অসন্নিহিতানি পুনঃ লেখনসাধনানি।

(দ) নন্বস্মিন্ শুকোদরসুকুমারে নলিনীপত্রে পদচ্ছেদভক্ত্যা নখৈরালিখ্যতাম্।

(থ) শকু ইতি। চিন্তিতা চিন্তয়িত্বা নিরূপিতা। অসন্নিহিতানি সন্নিধানে অস্থিতানি, লেখনসাধনানি পত্র-মসী-লেখন্যঃ। অতএব কুত্র কেন তাং গীতিকাং লিখামীতি ভাবঃ।

(দ) প্রিয়মিতি। অনুজ্ঞায়াং ননুশব্দঃ। অস্মিন্ তব তাপশান্ত্যর্থমানীতে, শুকোদরবৎ শুকপক্ষিণঃ ক্রোড়দেশবৎ সুকুমারে কোমলে মসৃণে ইত্যর্থঃ। তেন ত্বয়া যথা তথা বা লিখ্যতাং রাজা পঠিতুং শক্ষ্যতীতি ভাবঃ। নলিনীপত্রে পদ্মলতাপত্রে, নখৈর্নখাগ্রভাগৈঃ, পদানাং পাদানাং ছেদস্য অবসানস্য ভক্ত্যা ভাগেন; তথা চ যাবদ্ভাগগ্রহণে পাদাবসানপর্য্যন্তং ধ্রিয়তে তাবদ্ভাগগ্রহণেন লিখ্যতাম্, এবঞ্চ রাজা ত্বা-মবিবেকিনীং বোদ্ধুং ন শক্ষ্যতীতি ভাবার্থঃ সরলার্থশ্চ।

(ধ) শকু ইতি। রূপয়িত্বা অভিনীয় লেখনাভিনয়ং কৃত্বেত্যর্থঃ। সঙ্গতার্থা উচিতার্থা। শৃণুতং যুবামিতি শেষঃ।

(থ) শকুন্তলা। ওলো! আমি গীত চিন্তা করিয়াছি। কিন্তু লিখিবার উপকরণ নিকটে নাই।

(দ) প্রিয়ংবদা। ওহে! শুকপাখীর পেটের মত পালিস এই পদ্মপাতার যে ভাগ লইলে এক একটী চরণ ধরে, সেই ভাগ লইয়া নখ দিয়া লেখ।

(১) ণাম···ণহেহিং ণিক্খিত্তবণ্ণং করেসু।

(২) হলা! সুণাহ দাণিং সংগদত্থং ণবেত্তি।

उभे। अवहिद म्ह। (न)

• शकु। वाचयति। (प)

**तुज्झ ण आणे हिअअं, मम उण मअणो दिवा वि रत्तिं वि।**
**णिक्किव! दावइ बलिअं, तुह हुत्तमणोरहाइं अङ्गाइं (१) ॥१८॥**

(ध) हला! श्रृणुत तावत् सङ्गतार्थां न वेति।

(न) अवहिते स्वः।

तव न जाने हृदयम्, मम पुनर्मदनो दिवापि रात्रिमपि।
निष्कृप! तापयति बलीयः तव हृत्तमनोरथानि अङ्गानि ॥१८॥

(न) उभे इति। अवहिते श्रोतुं कृतमनोयोगे, स्व आवामिति शेषः।

(प) शकु इति। वाचमाचष्ट इति वाचयति पठतीत्यर्थः।

तवेति। हे निष्कृप! निर्दय! राज्ञः प्रजापीड़ानिवृत्तिकरणस्यौचित्यात् अत्र तु भवता प्रजाभूताया एव मे पीडाहत्तानलाप्यनादानादित्याशयः। तव हृदयं न जाने, तव चित्तं मयि सानुरागं निरनुरागं वेति नाहं वेद्मीत्यर्थः, पुनः किन्तु, मदनः कामः, तव हृत्ते मनोरथः अभिलाषो येषां तानि। तथा च यथा अन्यो हस्तस्थं वस्तु स्वेच्छया यथा तथा वा कर्त्तुमर्हति, तथा त्वमपि ममाभिलाषं स्वेच्छया पूरयितु-मपूरयितुं वा शक्नोषीति भावः। मम अङ्गानि, दिवापि दिवसमपि व्याप्य, रात्रिमपि च व्याप्य, बलीयः अत्यन्तमेव, तापयति। अतश्च लोकपालेन त्वया मम तत्तापशान्ति-रवश्यमेव करणीयेत्यभिप्रायः।

दिवा रात्रिमित्युभयत्रापि "अभिविधौ कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया; दिवाशब्दस्य तु अव्ययत्वात्तस्या लोपः।

(ध) শকুন্তলা। (উক্তরূপে লিখিয়া) ওলো! তোমরা শোন, ইহার অর্থ সঙ্গত হইল কি না।

(ন) সখীদ্বয়। মন দিলাম।

(१)⋯मह उण कामो⋯। णिग्घिण! तवइ बलीअं तुइ वुत्तमणोरह⋯।

রাজা। অবসরঃ খল্বয়মাত্মানং দর্শয়িতুম্। শকুন্তলোপ-
গত্য—(১) (ফ)

তপতি তনুগাত্রি! মদনস্ত্বামনিশং মাং পুনর্দহত্যেব।
গ্লপয়তি যথা শশাঙ্কং ন তথাহি কুমুদ্বতীং দিবসঃ ॥১৮॥

ইদং গীতির্নাম ছন্দঃ। যথা শ্রুতবোধে—

"আর্য্যা পূর্ব্বার্দ্ধসমং যস্যা অপরার্দ্ধমপি চ হ সঙ্গতে!।
ছন্দোবিদস্তদানীং গীতিং তামমৃতবাণি! ভাষন্তে॥"

অতএব প্রিয়ংবদয়া "ললিতপদাবলিবন্ধং গীদিঅং" ইতি, শকুন্তলয়া চ "চিন্তিদো মএ গীদিআ" ইত্যভিহিতম্, গানযোগ্যত্বাদস্যাঃ। পিঙ্গলেন তু উদ্গাথেতি নামোক্তম্। যথা—

"পুব্বর্দ্ধে উত্তর্দ্ধে মত্তা তীসন্তি সুহঅ! সংভণিআ।
সো উগ্গাহো বুত্তো পিঙ্গলকই দিট্ঠ সট্ঠি মত্তাঙ্গো॥" ॥১৮॥

(ফ) রাজেতি। অবসরঃ সময়ঃ; তবেতি যুষ্মৎপদেন প্রত্যক্ষবৎ সম্বোদ্ধি শকুন্তলা-
দিতি ভাবঃ।

তপতীতি। তনূনি কৃশানি গাত্রাণি অঙ্গানি যস্যাস্তৎসম্বোধনম্। মদনঃ কামঃ, অনিশং "দিবাবি রত্তিং বি" ইত্যভিহিতত্বাৎ অহর্নিশম্, ত্বাং তপতি সন্তাপয়তি। পুনঃ কিন্তু, মাং দহত্যেব দগ্ধীকরোত্যেব। তথা চ প্রখরতেজসো দুরসহ্যতাপঃ,

(প) শকুন্তলা। (পড়িতে লাগিল)

হে নির্দ্দয়! তোমার মন আমি জানি না; তথাপি আমি তোমার হাতে অভিলাষ সমর্পণ করিয়াছি; এ অবস্থায় কামদেব, দিনেও রাত্রিতেও আমার সমস্ত অঙ্গ অত্যন্ত সন্তপ্ত করিতেছেন॥১৮॥

(ফ) রাজা। আপনাকে দেখাইবার এই অবসর। (হঠাৎ নিকটে যাইয়া)

(১) ক্বচিৎ 'রাজা। শকুন্তলোপসৃত্য' ইতিমাত্রঃ পাঠঃ।

সয্যোগসম্বন্ধজশ্চ দাহঃ। তেন তাপাপেক্ষয়া দাহস্যাধিকযন্ত্রণাকরত্বাৎ ত্বদপেক্ষয়া অহমেবাধিকং ক্লিষ্ট ইত্যাশয়ঃ। ননু স্ত্রীপুংসয়োর্নির্বিশেষোঽয়ং শত্রুঃ কামঃ কথং স্ত্রিয়ং তপতি পুমাংসং দহতীতি একস্যৈকদা বিভিন্নো ব্যাপারঃ সম্ভবতীত্যাহ গ্লপয়তীতি। হি তথাহি, দিবসঃ প্রবর্ত্তমানঃ সূর্য্যকিরণাবচ্ছিন্নঃ কালঃ, যথা যাদৃক্, শশাঙ্কং চন্দ্রম্, গ্লপয়তি মলিনীকরোতি, কুমুদ্বতীং কুমুদিনীম্, তথা তাদৃক্, ন গ্লপয়তীতি সম্বন্ধঃ। তত্তু সর্ব্বেষাং প্রত্যক্ষমেব। ততশ্চ একেনৈব কামেন তব তাপঃ মম চ দাহ ইতি বিভিন্নো ব্যাপারঃ কর্ত্তুং শক্যত এবেত্যভিপ্রায়ঃ।

অত্র তনু-গাত্রেত্যনয়োঃ শব্দয়োঃ পর্য্যায়তয়া আপাততস্তদর্থস্য পুনরুক্ততাপ্রতীতেঃ পরঞ্চ তনুশব্দস্য কৃশার্থতাপ্রত্যয়েন তদপগমাৎ ভিন্নাকারশব্দগতত্বাচ্চ পুনরুক্তবদাভাসোঽলঙ্কারঃ, তপতি দহতীত্যনেকক্রিয়য়োর্মদন ইত্যেককর্ত্তৃকারকত্বাৎ দীপকম্, পূর্ব্বার্দ্ধ-পরার্দ্ধার্থয়োঃ প্রণিধানগম্যসাম্যাৎ দৃষ্টান্তঃ, শশাঙ্ককুমুদ্বত্যোর্লিঙ্গসাম্যেন নায়কনায়িকা-ব্যবহারসমারোপাৎ সমাসোক্তিঃ, গ্লপয়তীত্যেকয়া ক্রিয়য়া শশাঙ্ককুমুদ্বত্যোঃ কর্ম্মতয়াভিসম্বন্ধাৎ তুল্যযোগিতা চ, ইত্যেতেষাং পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ।

দহত্যেব ইত্যেবশব্দেন 'ন তু ত্বামিব কেবলং তপতি' ইতীতরযোগব্যবচ্ছেদকরণান্ন অনিয়মে নিয়মাখ্যদোষঃ।

"শ্লক্ষ্ণং দভ্রং কৃশং তনু" ইত্যমরঃ। "গাত্রং গজাগ্রজঙ্ঘাদৌ জীবমঙ্গে কলেবরে" ইতি মেদিনী।

তপতীতীন্ধসমানার্থতয়া সকর্ম্মকত্বম্। গ্লপয়তীতি গ্লায়ন্তং প্রযুঙ্ক্তে ইতীণি "সন্ধ্যক্ষরান্তানাম্" ইত্যাদিনা ঐকারস্যাকারঃ, "অর্ত্তি-হ্রী" ইত্যাদিনা পকারাগম মানুবন্ধত্বাচ্চ হ্রস্বঃ।

আর্য্যা জাতিঃ ॥১৯॥

---

হে কৃশাঙ্গি! কামদেব, দিবারাত্রি তোমাকে কেবল সন্তপ্ত করিতেছেন, আর আমাকে কিন্তু একেবারে দগ্ধই করিতেছেন। দেখ—দিন, চন্দ্রকে যত মলিন করে, কুমুদিনীকে তত মলিন করে না ॥১৯॥

সখ্যৌ। বিলোক্য সহর্ষমুত্থায়। সাম্প্রদং জধাসমীহিদফলস্স অবিলম্বিণো মণোরহস্স ? (১)। (ব)

শকু। উত্থাতুমিচ্ছতি। (ভ)

রাজা। অলমলমায়াসেন। (ম)

সন্দষ্টকুসুমশয়নান্যাশু বিমর্দিতমৃণালবলয়ানি (২)।
গুরুপরিতাপানি ন তে গাত্রাণ্যুপচারমর্হন্তি ॥২০॥

(ব) স্বাগতং যথাসমীহিতফলস্য অবিলম্বিনো মনোরথস্য ?।

(ব) সখ্যাবিতি। সহসৈব অনায়াসেন প্রার্থিতস্য লাভাৎ সহর্ষমিতি। রাজ্ঞঃ সম্মানপ্রদর্শনার্থঞ্চ উত্থায়েতি। যথাসমীহিতং যথাভিলষিতং ফলং সম্ভাব্যমানং শকুন্তলাসঙ্গমাত্মকং যস্মাৎ তৎ তাদৃশং তস্য, অবিলম্বিনঃ প্রার্থনামাত্রমেবোপস্থিতস্য, মনোরথস্য মনোরথবিষয়ীভূতস্য, ভবত ইত্যর্থঃ, স্বাগতং সুখেনাগমনং কিমু ইতি কাকুবশাৎ প্রশ্নো ব্যজ্যতে।

(ভ) শকু ইতি। উত্থাতুমিচ্ছতি রাজ্ঞঃ সম্মানপ্রদর্শনার্থেত্যাশয়ঃ।

(ম) রাজেতি। অঙ্গসঞ্চালনাদিনা শকুন্তলায়াস্তামুত্থানেচ্ছামনুমায় রাজেদমাহেতি বোধ্যম্। আয়াসেন উত্থানপরিশ্রমেণ। অলমলমিত্যত্যন্তনিষেধে দ্বিরুক্তিঃ।

(ব) সখীদ্বয়। ( রাজাকে দেখিয়া আনন্দের সহিত গাত্রোত্থান করিয়া ) যাহা হইতে অভীষ্ট ফল হইবে, অবিলম্বী সেই অভিলাষের শুভাগমন ত ?।

(ভ) শকুন্তলা। ( গাত্রোত্থান করিতে ইচ্ছা করিল। )

(ম) রাজা। পরিশ্রম করিবার প্রয়োজন নাই, পরিশ্রম করিবার প্রয়োজন নাই।

(১) সখ্যৌ। সহর্ষম্। স্বাগতং অবিলম্বিনো মনোরথস্য।

(২) অত্র ক্লান্তবিসভঙ্গসুরভীণি।

शकु। सव्रीडमात्मगतम्। हिअअ! तधा उत्तम्मिअ दाणिं ण किम्पि पडिवज्जसि (१)। (घ)

(घ) हृदय! तथा उत्ताम्य इदानीं न किमपि प्रतिपद्यसे।

उत्थानाकर्त्तव्यत्वे कारणमाह सन्दष्टेति। सन्दष्टं सम्यग् दष्टवस्तुवत् पार्श्व-परिवर्त्तनादिना विस्रस्तं कुसुमशयनं पुष्पशय्या यैस्तानि, आशु मुहुर्घर्षणात् शीघ्रमेव विमर्द्दितानि भ्रष्टानि मृणालवलयानि तापशान्त्यर्थं पूर्वं धृतानि मृणालकटकानि येषां तानि, अतएव गुरुर्महान् परितापः सर्वतः सन्तापो येषु तानि, ते तव गात्राणि अङ्गानि, न उपचारम् आचारम्, माननीयागन्तुकजनस्य सम्मानप्रदर्शनाय उत्थानव्यवहारमित्यर्थः, अर्हन्ति कर्त्तुं शक्नुवन्ति, असामर्थ्यात् अस्वास्थ्याधिक्यसम्भवाच्च इति भावः।

अत्र उपचारानर्हत्वं प्रति गुरुपरितापत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्ग-मलङ्कारः। तथा सन्दष्टकुसुमशयनत्वादिलिङ्गेन शकुन्तलाङ्गेषु गुरुतापज्ञानादनुमानं नाम गर्भसन्धेरङ्गम्। यथा दर्पणे—"लिङ्गादूहोऽनुमानता।"

आर्य्या जातिः ॥२०॥

(घ) शकु इति। सव्रीडं सलज्जम्। सहस्रैव प्रार्थितस्यापि पुंसो दर्शने नारीणां भयन्तु स्वाभाविकम्। उत्तम्य उत्तान्तं भूत्वा राजार्थमेव अधीरीभूत्वेत्यर्थः, इदानीं प्रार्थितस्यैव तस्य राज्ञ उपस्थितिसमये, किमपि न प्रतिपद्यसे न कर्त्तव्यं निर्द्धारयसि। अतएव अकर्म्मण्यतायाः एव प्रमाणमिति भावः।

যাহার সঞ্চালনে পুষ্পশয্যা আলুলায়িত হইয়াছে এবং মৃণালবলয়-গুলি মর্দ্দিত হইয়াছে, বিশেষতঃ যাহাতে গুরুতর সন্তাপ অনুভূত হইতেছে, আপনার সেই অঙ্গগুলি লোকাচার পালন করিবার যোগ্য নহে ॥২০॥

(ঘ) শকুন্তলা। (লজ্জার সহিত স্বগত) হৃদয়! সেইরূপ উতলা হইয়া এখন কোন কর্ত্তব্যই স্থির করিতেছ না।

(१) क्वचिदयं पाठो न दृश्यते।

অন। ইদো সিলাদলেক্কদেসং অণুগেহ্ণদু মহাভাও (১)। (ৰ)

শকু। কিঞ্চিদপসরতি (২)। (ল)

রাজা। উপবিশ্য। কচ্চিৎ সখীং বো নাতিবাধতে শরীরতাপঃ ? (৩)। (ব)

(ৰ) ইতঃ শিলাতলৈকদেশমনুগৃহ্ণাতু মহাভাগঃ।

(ৰ) অনেতি। ইতঃ অস্মিন্ পার্শ্বে, শিলাতলস্য প্রস্তরপরিভাগস্য একদেশং শকুন্তলা যস্মিন্ন শয়িতা তিষ্ঠতি তদ্ভিন্নাংশমিত্যর্থঃ, অনুগৃহ্ণাতু উপবেশনেন অনুগ্রহপাত্রীকরোতু, মহাভাগো বিশিষ্টভাগ্যশালী ভবান্।

অহো! কামমহিমা, যৎ স্বর্ণসিংহাসনাধ্যুপবেশী রাজা নিরাস্তরণ এব প্রস্তরে উপবিশতি।

(ল) শকু ইতি। অপসরতি রাজ্ঞ উপবেশনস্থানদানায় স্বস্পর্শপরিহারায় চেত্যাশয়ঃ।

(ব) রাজেতি। বো যুষ্মাকম্। নাতিবাধতে নাতিশয়েন পীড়য়তি। তাপত্বাৎ কিঞ্চিদ্বাধত এবেত্যবশ্যমবগতত্বাৎ, অতিপীড়নস্যৈব জিজ্ঞাসা উচিতেতি অতিশব্দপ্রয়োগঃ। কচ্চিৎ কিমিত্যর্থঃ। "কচ্চিৎ কামপ্রবেদনে" ইত্যমরঃ।

(ৰ) অনসূয়া। মহাশয় এই দিকে প্রস্তরখণ্ডের এক পার্শ্বে উপবেশন করিয়া ইহাকে অনুগৃহীত করুন।

(ল) শকুন্তলা। (একটু সরিল।)

(ব) রাজা। (উপবেশন করিয়া) শরীরের সন্তাপ, আপনাদের সখীকে বিশেষ কষ্ট দিতেছে না ত ?।

(১)···দেসং অলঙ্করেড বঅস্সো।

(২) এষ পাঠঃ ক্বচিন্নাস্তি।

(৩) অয়ং পাঠোঽপি কুত্রচিন্ন দৃশ্যতে।

प्रियं। सस्मितम्। दाणिं लद्धोषधो उवसमं गमिस्सदि (१)। (श)

शकु। सलज्जा तिष्ठति (२)। (ष)

प्रियं। महाभाअ! दोसुम्पि वो अस्सोस्साणुराओ पच्चक्खो ; सहीसिणिद्धो उण मं पुणरुत्तवादिणीं करेदि (३)। (स)

(श) इदानीं लब्धौषध उपशमं गमिष्यति।

(स) महाभाग! द्वयोरपि युवयोः अन्योन्यानुरागः प्रत्यक्षः ; सखीस्नेहः पुनर्मां पुनरुक्तवादिनीं करोति।

---

(श) प्रियमिति। आत्मनो वक्तव्यार्थस्यैव कौतुकावहत्वात् सस्मितमिति बोध्यम्। लब्धम् औषधं येन सः, शरीरताप इति सम्बन्धः। तथा च शकुन्तलाया अस्य रोगस्य भवानेवौषधमिति इदानीमपि उपशमस्याभावेऽपि भवतो लाभादचिरादेव उपशमं गमिष्यतीत्याशयः।

अतएवात्र चित्रार्थप्रकाशनादक्षरसंघातो नाम नाट्यलक्षणम्—"वर्णनाक्षरसंघातश्चित्रार्थैरक्षरैर्मितैः" इति दर्पणलक्षणात्।

(ष) शकु इति। आत्मनश्च तापः कामजनित एव, उपस्थितश्च राजा सुरतेनैव तस्य निवर्त्तक इति अपरिचितपूर्वस्य राज्ञः प्रत्यक्षमेव प्रियंवदया उक्तवाक्येन सूचितत्वात् शकुन्तला सलज्जा तिष्ठतीति बोध्यम्।

(स) प्रियमिति। प्रत्यक्षः दृष्टिपातदेहावस्थादिदर्शनात् निःसन्देहमनुभूयमानः। पुनस्तथापि पुनरुक्तं यथा स्यात्तथा वदितुं शीलं यस्यास्ताम्। उक्तस्यार्थस्य पुनरुक्तिर्यथा निरर्था, तथा प्रत्यक्षीभूतस्यार्थस्य मया वाचा प्रकाशो निरर्थक एवेति भावः।

---

(শ) প্রিয়ংবদা। (ঈষৎ হাস্য করিয়া) এখন ঔষধ পাওয়া গিয়াছে, সুতরাং নিবৃত্তি পাইবে।

(ষ) শকুন্তলা। (লজ্জিত হইয়া রহিল।)

---

(१) अयं पाठश्च पुस्तकान्तरे न वर्त्तते। (२)··सलज्जं। (३)···सिणिद्धो मं।

राजा। भद्रे! नैतत् परिहार्य्यम्। विवक्षितं ह्यनुक्तमनुतापं जनयति। (ह)

प्रियं। तेण हि सुणादु अज्जो (१)। (च)

राजा। अवहितोऽस्मि (२)। (क)

प्रियं। अस्समवासिणो जणस्स रस्सा अत्तिहरेण होदव्वं त्ति, णं एसो धम्मो (३)। (ख)

(च) तेन हि शृणोतु आर्य्यः।

(ख) आश्रमवासिनो जनस्य राज्ञा आर्त्तिहरेण भवितव्यम् इति, नन्वेष धर्म्मः।

(ह) राजेति। भद्रे! साधुस्वभावे! एतत् विवक्षितं वाक्यम्, न परिहार्य्यं पुनरुक्ततुल्यतया निरर्थकत्वाशङ्कया न परित्याज्यम्। हि यस्मात्, विवक्षितं वक्तुमिष्टं वक्तुमिच्छया श्रावितं वाक्यमित्यर्थः, अनुक्तं सत्, अनुतापं शुश्रूषोर्मनःकष्टम्, जनयति तस्योदासीनत्वप्रत्यायनात् विपक्षत्वसूचनाद्वेति भावः।

(च) प्रियमिति। तेन हि भवतोऽप्यनुमोदितत्वेनैव हेतुना। आर्य्यो भवान्।

(क) राजेति। अवहितोऽस्मि त्वदुक्तिं श्रोतुं कृतमनोयोगोऽस्मि।

(স) প্রিয়ংবদা। মহাশয়! আপনাদের দুই জনেরই পরস্পর অনুরাগ প্রত্যক্ষ করিতেছি; তথাপি সখীর স্নেহই আমাকে পুনরুক্তবাদিনী করিতেছে।

(হ) রাজা। ভদ্রে! তথাপি আপনি বক্তব্য বিষয় পরিত্যাগ করিবেন না। কারণ, যে বিষয়ে বলিবার ইচ্ছা প্রকাশ করা হয়, তাহা না বলিলে শ্রোতার অনুতাপ জন্মায়।

(ক্ষ) প্রিয়ংবদা। তাহা হইলে, মহাশয় শ্রবণ করুন।

(१) (२) चिह्नितौ पाठौ क्वचिन्न दृश्येते।

(३) आवश्यं विसयवासिणो अत्तिहरेण रस्सा होदव्वं त्ति एसो वो धम्मो।

রাজা। অস্মৎপরং কিন্তৎ? (১)। (গ)

প্রিয়ং। তেণ হি ইঅং ণো পিঅসহী তুমং জ্জেব উদ্দিসিঅ ভঅবদা মঅণেণ ইমং অবত্থন্তরং পাবিদা, তা অরিহসি অব্ভুববত্তীএ জীবিদং সে অবলম্বিদুং (২)। (ঘ)

(ঘ) তেন হি ইয়ং নঃ প্রিয়সখী ত্বামেব উদ্দিশ্য ভগবতা মদনেন ইদমবস্থান্তরং প্রাপিতা; তদর্হসি অভ্যুপপত্ত্যা জীবিতমস্যা অবলম্বয়িতুম্।

---

(খ) প্রিয়মিতি। আর্ত্তিহরেণ পীড়ানাশকেন; রাজ্ঞঃ প্রজাপালনস্য বিহিতত্বাৎ আশ্রমবাসিনোঽপি চ প্রজারূপত্বাদিতি ভাবঃ। নন্বিত্যবধারণে। এষ ধর্ম্ম ইতি বিহিতানুষ্ঠানাদিত্যাশয়ঃ।

(গ) রাজেতি। তৎ আশ্রমবাসিনো জনস্য আর্ত্তিহরণৌচিত্যম্, অস্মৎপরং মদ্বিষয়ং কিম্, ময়া কস্য কা আর্ত্তিহরণীয়েত্যর্থঃ।

(ঘ) প্রিয়মিতি। তেন হি শ্রূয়তামিতি শেষঃ। প্রিয়সখী শকুন্তলা। উদ্দিশ্য লক্ষ্যীকৃত্য। অবস্থান্তরং বিকারবিশেষম্। অভ্যুপপত্ত্যা অনুগ্রহেণ, জীবিতং জীবনম্; অবলম্বয়িতুং ধারয়িতুম্।

"অভ্যুপপত্তিরনুগ্রহঃ" ইত্যমরঃ।

---

(ক) রাজা। মন দিলাম।

(খ) প্রিয়ংবদা। রাজা, তপোবনবাসীর কষ্টনাশক হইবেন, ইহাই ধর্ম্ম।

(গ) রাজা। আমার পরে তাহার কি ?।

(ঘ) প্রিয়ংবদা। তবে শুনুন, ভগবান্ কামদেব, আপনাকে লক্ষ্য করিয়াই, আমাদের এই প্রিয়সখীকে এই অবস্থায় উপস্থাপিত করিয়াছেন; সুতরাং আপনি অনুগ্রহ করিয়া, ইহার জীবন রক্ষা করিতে পারেন।

---

(১) নাস্মাৎ পরম্। (২) ভঅবদা মঅণেণ আবীবিদা।

राजा । भद्रे ! साधारणोऽयं प्रणयः । सर्वथानुगृहीतोऽस्मि । (ङ)

शकु । अनसूयामवलोक्य । हला ! अलं वो अन्तेउरविरहपज्जुस्सुएण राएसिणा उवरुद्धेण (१) । (च)

---

(च) हला ! अलं वाम् अन्तःपुरविरहपर्य्युत्सुकेन राजर्षिणा उपरुद्धेन ।

(ङ) राजेति । अयं प्रणयः इयं याच्ञा, साधारण उभयोरेव समानः । तथा च यथा शकुन्तलाया जीवनं रक्षितुं भवत्या ममानुग्रहः प्रार्थ्यते ; तथा मयापि स्वजीवनं रक्षितुं शकुन्तलाया अनुग्रहः प्रार्थ्यत इति भावः । अनुगृहीतोऽस्मि इदानीं शकुन्तलासमागमसम्भवेन जीवनस्थितिसम्भवादित्याशयः, एतेनात्मनोऽपि शकुन्तलायाः सदृशी दशा व्यज्यते ।

"प्रणयः प्रेम्णि याच्ञायाम्" इत्यादि हेमचन्द्रः ।

(च) शकु इति । राज्ञा सह प्रियंवदाया एवालापकारित्वेन तस्या एवानुरोधौचित्येऽपि सा मुखरा दुर्निवारा चेति नानुरोधं रक्षिष्यतीति विभाव्य अनसूयामेवानुरुणद्धि । राजोपरोधवारणाय च अनसूयाया अनुरोधेन प्रियंवदाया अप्यनुरोधः सूचितः, उभयोस्तुल्यत्वादित्यवधेयम् ।

वां युवयोः, अन्तःपुराणामन्तःपुरस्थरमणीनां विरहेण पर्य्युत्सुक आसक्त्याधिक्यादुत्कण्ठितस्तेन, राजर्षिणा उपरुद्धेन मत्समागमाय अनुरुद्धेन, अलम्, मत्समागमाय ईदृशस्य राज्ञो युवाभ्यां नानुरोधः करणीय इत्यर्थः, इतररमणीषु आसक्तिरेके रमणान्तररमणस्य कादाचित्कतया तज्जीवनस्यैव सर्वथा वैयर्थ्यावश्यम्भावादित्याशयः ।

राज्ञो मनः परीक्षितुम् आत्मनि तस्य प्रतिज्ञाविशेषं प्रवर्त्तयितुश्चेदमभिहितमिति बोध्यम् ।

---

(ঙ) রাজা। ভদ্রে! এই প্রার্থনা উভয়েরই সমান। সর্ব্বপ্রকারে অনুগৃহীত হইলাম।

---

(१) प्रियंवदामवलोक्य । हला ! किं अन्तेउरविरहपज्जुस्सुअ राएसिणा उवरोहेण ।

राजा। इदमनन्यपरायणमन्यथा
हृदयसन्निहिते! हृदयं मम।
यदि समर्थयसे मदिरेक्षणे!
मदनबाणहतोऽपि हतः पुनः (१) ॥२१॥

इदमिति। हृदये सन्निहिता विधात्रैव सम्यगवस्थापिता तत्सम्बोधनम्। एतेनान्तःपुरविरहपर्य्युत्सुकत्वाभावः सूचितः। न अन्या रमणी परम् अयनमाश्रयो यस्य तत् तादृशम् अनन्यरमणीगतमित्यर्थः, इदं मम हृदयम्, यदि, अन्यथा अन्यरमणीपरायणत्वेन, समर्थयसे "अन्तःपुरविरहपर्य्युत्सुकेन" इत्यनेन उपपादयसि, तदा, मदिरे मत्तखञ्जनपक्षिणाविव ईक्षणे चक्षुषी यस्यास्तत्सम्बोधनम्। एतेन परमसुन्दरतया त्वय्येव गुरुतरा आसक्तिरिति व्यज्यते। मदनबाणेन हतोऽपि मारितोऽपि पुनर्हतः भूयस्त्वया मारितः, प्रहृतस्य पुनः प्रहारवत् मदनबाणप्रहारपीड़ितस्य मे आश्वासनेन त्वया नैराश्योत्पादनेन महापीडनादिति भावः।

अत्र अनन्यपरायणत्वं प्रति हृदयसन्निहिते इति पदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः। तेन चात्महृदयस्य शकुन्तलैकतानत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः। हृदयशब्दस्य द्विःपाठेऽपि उद्देश्यप्रतिनिर्द्देश्यविषयत्वान्न कथितपदतादोषः, यच्छब्देन तच्छब्दस्यैव यदीत्यनेन तदेत्यस्य नियमेनोपस्थापितत्वात् न न्यूनपदतादोषश्च। किन्तु हत इत्यस्य विशेष्यीभूतकर्म्मपदस्य अहमित्यस्यानुपादानात् न्यूनपदतादोषः, स च 'मदनबाणहतोऽस्मि' इति पाठेन समाधेयः। किन्तु बहुष्वेव पुस्तकेषु तत्पाठादर्शनात् नासौ धृतः।

द्रुतविलम्बितं वृत्तम्—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥२१॥

(च) শকুন্তলা। (অনসূয়ার দিকে চাহিয়া) অনসূয়া! অন্তঃপুরের বিচ্ছেদে উৎকণ্ঠিত রাজর্ষির অনুরোধ করিবার প্রয়োজন নাই।

রাজা। হে হৃদয়বর্ত্তিনি! অনন্যপরায়ণ আমার এই হৃদয়কে

(१)···मदनबाणहतोऽस्मि हतः पुनः।

अन। बहुवल्लहा क्खु राआणो सुणीअन्ति। ता जधा इअं णो पिअसही बन्धुअणसोअणीआ ण होदि, तधा करिस्सदि (१)। (छ)

(छ) बहुवल्लभाः खलु राजानः श्रूयन्ते। तद्यथा इयं नः प्रियसखी बन्धुजनशोचनीया न भवति ; तथा करिष्यति।

(छ) "हला! अलं वः" इत्यादिना शकुन्तलावाक्येन संस्कृतवक्तव्या राजानमनुरुणद्धि अनेन। बह्व्यो वल्लभा भोग्यत्वेन प्रिया येषां ते। श्रूयन्ते लोकपरम्परयेति शेषः। आत्मनां वनवासित्वेन प्रत्यक्षं राजव्यवहारादर्शनादित्याशयः। तत् तस्मात्। नः अस्माकम्, प्रियसखी शकुन्तला, बन्धुजनानाम् अस्मदादीनाम्, शोचनीया अस्या एव दारुणदुःखप्रवर्त्तन शोकविषया। करिष्यति भवानिति शेषः। तथा च भवान् राजा, तेन च भवतोऽपि बह्व्यो वल्लभाः सन्ति ताश्च चारुतराः चतुराः शिक्षिताश्चेति सम्भाव्यते ; इयं शकुन्तला तु वनवासित्वेन कुरूपा मुग्धा अशिक्षिता चेति पूर्वपरिगृहीतास्वेवादरातिशयेन वस्तुगत्या अस्यामवज्ञैव स्यात्। तेन चास्या 'जीवनमिव व्यर्थं भविते'ति यथा तादृशं न भवति, भवता तथा कर्त्तव्यमिति प्रार्थनेति सरलार्थो भावार्थश्च।

पूर्वशकुन्तलावाक्ये अत्र च अभिप्रेतादरसिद्ध्यर्थं बहुविषयाणां कीर्त्तनात् सिद्धिर्नाम नाट्यलक्षणम्। यथा दर्पणे—

"बहूनां कीर्त्तनं सिद्धिरभिप्रेतार्थसिद्धये।"

যদি অন্যরূপ নিরূপণ কর, হে খঞ্জননয়নে! তাহা হইলে কামবাণাহত হইয়াও আবার হত হইলাম ॥২১॥

(ছ) অনসূয়া। রাজাদের বহুতর প্রিয়তমা থাকে বলিয়া শুনিতে পাই ; অতএব আমাদের এই প্রিয়সখী যাহাতে বন্ধুজনের শোকের বিষয় না হন, তাহা করিবেন।

(१) वअस्स! बहु···।···नह चिन्तेहि।

राजा। भद्रे! किं बहुना?। (ज)

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः।
समुद्ररसना (१) चोर्व्वी सखी च युवयोरियम् ॥२२॥

(ज) राजेति। बहुना प्रचुरेण उक्तेनेति शेषः। बहुशब्दस्य संख्यावाचित्वे नित्यबहुवचनान्तत्वनियमः, प्रचुरार्थवाचित्वे तु सर्वाण्येव वचनानि स्युः विशेष्यानुसारित्वात्। तथा चान्यत्रापि प्रयोगः—“समायाते कान्ते कथमपि च कालेन बहुना” इति शृङ्गारतिलके। “किं बहुना यं कारणोऽपि विश्वकर्म्मेत्युपास्यते” इति न्यायकुसुमाञ्जलौ च।

परीति। परिगृह्यन्त इति परिग्रहा भोग्यपरिणीताः साधारण्य एव, तासां बहुत्वे सत्यपि, नः अस्माकम्, कुलस्य वंशस्य, द्वे द्वौ परिग्रहावित्यर्थः, प्रतिष्ठे इति प्रकृतस्यमानलिङ्गत्वात् द्वे इति स्त्रीत्वम्। प्रतिष्ठे गौरवे गौरवहेतुभूते भविष्यत इति शेषः। के ते द्वे इत्याह समुद्रेति। समुद्र एव रसना काञ्ची यस्याः सा तादृशी, उर्व्वी पृथिवी च, इयं युवयोः सखी शकुन्तला च। अतः सत्यपि परिग्रहबहुत्वे युवयोरियं सख्येव तेषु सर्वथा विशेषादरणीया भविष्यतीति न कियानपि सन्देहो युष्माभिः कर्त्तव्य इति भावः।

अत्र सखी प्रस्तुता उर्व्वी चाप्रस्तुता, अनयोः प्रतिष्ठापदाभिहितगौरवरूपैकगुणसम्बन्धाद्दीपकमलङ्कारः, उर्व्वीति लिङ्गसाम्येन उर्व्व्यां स्त्रीव्यवहारसमारोपात् समासोक्तिश्च; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। न च समुद्रे रसनात्वारोपः शाब्दः उर्व्व्यां स्त्रीत्वारोपश्च आर्थ इत्येकदेशविवर्त्ति रूपकमेवेति वाच्यम्, ईदृश एकमात्रशाब्दरूपणस्थले समासोक्तेरेव मीमांसितत्वात्। तच्च दर्पणे समासोक्तिप्रकरणे द्रष्टव्यम्। समुद्ररसनेति विशेषणेन उर्व्व्याः सम्पूर्णाया एव सूचनेन तवाप्यादरातिशयो व्यज्यत इति नापुष्टार्थत्वदोषः।

(ज) রাজা। ভদ্রে! অধিক বলিয়া কি হইবে।

(১) समुद्ररसना…।

उभे । णिव्वुद म्ह । (झ)

शकु । हर्षं सूचयति (१) । (ञ)

प्रियं । जनान्तिकम् । अणसूए ! पेक्ख पेक्ख मेहवादाहदं विअ गिह्मे मोरीं क्खणे क्खणे पच्चाअदजीविदं पिअसहीं (२) । (ट)

(झ) निर्वृते स्वः ।

अत्र उर्वीसाम्येन शकुन्तलाया उत्कर्षाभिधानात् उदाहरणं नाम गर्भसन्ध्यङ्गम् । यथा दर्पणे—"उदाहरणमुत्कर्षयुक्तं वचनमुच्यते ।"

दाक्षिण्यं नाम नाट्यलक्षणञ्च । यथा तत्रैव—

"दाक्षिण्यं चेष्टया वाचा परचित्तानुवर्त्तनम् ।"

"परिग्रहः कलत्रे च मूलस्वीकारयोरपि" इति शाश्वतः । "प्रतिष्ठा गौरवे स्थितौ" इत्यादि हेमचन्द्रः ॥२२॥

(झ) उभे इति । निर्वृते सुस्थचित्ते, स्व आवामिति शेषः ; सत्यवादिना भवता शकुन्तलायामादरातिशयकरणसूचनेन तद्विषये उद्वेगाभावादिति भावः ।

"सुस्थितत्वे च निर्वृतिः" इति त्रिकाण्डशेषः ।

(ञ) शकु इति । हर्षं सूचयति, आत्मन आशापूरणसम्भवात् मुखप्रफुल्लता-दिनेत्याशयः ।

---

বহুতর স্ত্রী থাকিলেও, আমার বংশের দুইটী মাত্র গৌরবের স্থল হইবে, এক সমুদ্রবেষ্টিত পৃথিবী, আর আপনাদের এই সখী ॥২২॥

(ঝ) সখীদ্বয়। সুস্থ হইলাম।

(ঞ) শকুন্তলা। ( হর্ষ প্রকাশ করিল। )

(१) अयं पाठः क्वचिन्नास्ति ।

(२) इत्यादि सए कीलदि इत्यन्तः पाठः क्वचिन्नास्ति ।

শকু। হলা! মরিসাবেধ লোঅপালং, জং অহ্মেহিং বিস্সদ্ধপলাবিণীহিং উবআরাদিক্কমেণ ভণিদং। (ঠ)

সখ্যৌ। সস্মিতম্। জেণ তং মন্তিদং সো জ্জেব মরিসাবেদু, অসস্স কো অচ্চঅো?। (ড)

(ট) অনসূয়ে! প্রেক্ষস্ব প্রেক্ষস্ব মেঘবাতাহতামিব গ্রীষ্মে ময়ূরীং ক্ষণে ক্ষণে প্রত্যাগতজীবিতাং প্রিয়সখীম্।

(ঠ) হলা! মর্ষয়তং লোকপালম্, যদস্মাভির্বিস্রব্ধপ্রলাপিনীভিঃ উপচারাতিক্রমেণ ভণিতম্।

---

(ট) প্রিয়মিতি। গ্রীষ্মকালে মেঘবাতেন মেঘাগমনকালীনবায়ুনা আহতাং স্পৃষ্টাম্, ময়ূরীমিব, ক্ষণে ক্ষণে পরপরক্ষণে, প্রত্যাগতজীবিতাং প্রত্যাবৃত্তপ্রাণাম্। তথা চ যথা ময়ূরী গ্রীষ্মতাপেন গতপ্রায়প্রাণা সতী প্রিয়তমমেঘবায়ুনা পুনঃ প্রত্যাবৃত্তপ্রাণা ভবতি; তথা ইয়মপি নিকামকামতপ্তা রাজ্ঞ আশ্বাসেন সুরতসুখাশয়া চ ক্রমেণোৎফুল্লা জায়তে ইতি ভাবঃ।

(ঠ) শকু ইতি। লোকপালং নৃপং দুষ্মন্তম্, মর্ষয়তং ক্ষময়তং স্বাপরাধমার্জনং কারয়তামিত্যর্থঃ। নন্বপরাধঃ কঃ, যৎ মর্ষয়াব ইত্যাহ যদিতি। যৎ যস্মাৎ, বিস্রব্ধপ্রলাপিনীভিঃ রাজ্ঞি বিশ্বাসেন অনর্থকস্বচ্ছন্দবাদিনীভিঃ, অস্মাভিঃ, উপচারাতিক্রমেণ কর্ত্তব্য-সম্মান-ব্যবহারপরিত্যাগেন ভণিতমুক্তম্। তথা চেদৃগ্ব্যবহারেণ যোঽপরাধঃ সঞ্জাতঃ, তং মর্ষয়তমিতি ভাবঃ।

---

(ট) প্রিয়ংবদা। (অনসূয়ার প্রতি চুপি চুপি) অনসূয়া! দেখ দেখ, গ্রীষ্মকালে মেঘবায়ুসংস্পৃষ্ট ময়ূরীর ন্যায় ক্ষণে ক্ষণে প্রিয়সখী শকুন্তলার জীবন ফিরিয়া আসিতেছে।

(ঠ) শকুন্তলা। ওলো! রাজার নিকট অপরাধের ক্ষমা প্রার্থনা কর; যে হেতু আমরা ইচ্ছামত আলাপ করিতে থাকিয়া শিষ্টাচার লঙ্ঘন করিয়া অনেক কথা বলিয়াছি।

शकु। अरिहदि क्खु महाराओ इमं विसोढ़ुं। परोक्खं वा ण किं को मन्तेदि। (ढ)

राजा। सस्मितम्। (ण)

अपराधमिमं ततः सहिष्ये
यदि रम्भोरु! तवाङ्गसङ्गमृष्टे।

---

(ड) येन तल्लङ्घितं स एव मर्षयतु, अन्यस्य कः अत्ययः।

(ढ) अर्हति खलु महाराज इमं विसोढुम्। परोक्षं वा न किं को मन्त्रयति।

---

(ड) सख्याविति। सोल्लुण्ठनवाक्यत्वादेव सस्मितमिति। येन जनेन, तत् उपचारातिक्रमेण लङ्घितम् उक्तम्, स एव जनः, मर्षयतु तमपराधं मार्जयतु, अन्यस्य जनस्य, कः अत्ययो दोषः। तथा च त्वयैव अविश्वासवशात् "अलं वो अन्तेउर-विरहपज्जुस्सुएण राएसिणा उवरुद्धेण" इत्यभिहितमित्यपराधः कृतः, अतएव तवैव मर्षणमुचितम्, न पुनरावयोरिति भावः।

(ढ) शकु इति। कौतुकेनोक्ताया अपि सख्युक्तेरौचित्यं सम्भाव्य मर्षयति अर्हतीति। इमम् उपचारातिक्रमेण सख्युक्तिजनितमपराधम्, विसोढुं क्षन्तुम्। तथाहि को जनः, परोक्षमसमक्षम्, किं न मन्त्रयति ब्रवीति। तथा च यथा सज्जनः परोक्षं साधारणजनकृतमपवादं तुच्छजनकृतत्वबुद्ध्या विसोढुमर्हतीत्याशयः।

अतएवात्र परिहारो नाम नाट्यालङ्कारः। तथा च दर्पणे—

"परिहार इति प्रोक्तः कृतानुचितमार्जनम्।"

(ण) राज्ञेति। स्वयं सामोदकौतुकोक्तेरभिधास्यमानत्वात् सस्मितमिति।

---

(ড) সখীদ্বয়। (ঈষৎ হাস্য করিয়া) যে শিষ্টাচার লঙ্ঘন করিয়া বলিয়াছে, সে-ই ক্ষমা প্রার্থনা করুক; অন্যের দোষ কি?।

(ঢ) শকুন্তলা। মহারাজ এই অপরাধ ক্ষমা করুন। পরোক্ষে কে কি না বলে।

कुसुमास्तरणे क्लमापहेऽस्य

स्वजनत्वादनुमन्यसेऽवकाशम् ॥২৩॥

प्रिय'। सोपहासम्। णं एत्तिकेण उण तुट्टो भविस्सदि ?। (ক)

(ক) ननु एतावता पुनस्तुष्टो भविष्यति ?।

---

अर्पेति। रम्भे रम्भास्तम्भाविव ऊरू यस्यास्तत्सम्बोधनम्। यदि तव अङ्गानां सङ्गेन संयोगेन मृष्टे मार्जिते परिशोधिते इत्यर्थः, अतएव क्लमापहे कामतापनाशके, सुरतस्य अचिरभावित्वादिति भावः, अत्र अस्मिन्, कुसुमास्तरणे पुष्पशय्यायाम्, स्वजनत्वात् आत्मीयत्वज्ञानात्, अवकाशं मम अवस्थितिस्थानम्, अनुमन्यसे दातुमनुमतिं करोषि, ततस्तदा, इमम् उपचारातिक्रमेणोत्पादितम् अपराधम्, सहिष्ये क्षमिष्ये। इतरथा नेत्यभिप्रायः।

अत्र कामक्लमापहत्वं प्रति शकुन्तलाङ्गमृष्टपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः। तथा अनेन रतिप्रार्थनासूचनात् प्रार्थना नाम गर्भसन्ध्यङ्गम्। यथा दर्पणे—

"रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत्।"

एवं मनोरथो नाम नाट्यलक्षणञ्च। तथा तत्रैव—

"मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत्।"

उपहासो नाम वृत्तम्—"उपहासमिदं तदाऽपरस्येत् गुरुवर्णः खलु सुन्दरीपदान्ते" इति लक्षणात् ॥২৩॥

(ক) प्रियमिति। भगिनीपतिवत् सख्याः पतित्वादुपहासो न दोषाय। नन्वित्यव-

---

(গ) রাজা। (ঈষৎ হাস্য করিয়া) হে রম্ভোরু! তোমার অঙ্গসংসর্গে পরিশোধিত, কামসন্তাপনাশক এই পুষ্পশয্যাতে যদি আপনার জন বলিয়া একটু স্থান দিবার অনুমতি কর; তবে এই অপরাধ ক্ষমা করিতে পারি ॥২৩॥

শকু। সরোষমিব। বিরম বিরম দুব্বিণীদে!. এতাবদবত্থং গদাএ মএ কীলসি। (থ)

অন। বহিঃ সহর্ষক্ষেপম্। পিঅংবদে! এস তবস্সি-মিত্ত-পোদঝো হদো বদো দিস্সদিট্টী গ়ণ্ণং মাদরং পব্‌ভট্টং অন্নেসদি; তা সংজোজেমি ণং (১)। (ট)

(থ) বিরম বিরম দুর্বিনীতে! এতাবদবস্থা গতয়া ময়া ক্রীড়সি।

চার্থঃ। তথা চ এতাবতা এতন্মাত্রেণ কেবলাবকাশদানানুমতিমাত্রেণেত্যর্থঃ। ভবিষ্যতি ভবানিতি শেষঃ। অত্র কাকুস্বরেণ প্রশ্ন ব্যজ্যতে। সুরতামোদপর্য্যন্ত নাপেক্ষিষ্যতে কিমিত্যাশয়ঃ। অতএব চোপহাসো বাধ্যঃ।

ইষ্টজনালাপক্রিয়াকলাপৈরনসূয়াপেক্ষয়া প্রিয়ংবদৈব মুখরতরা চতুরতরা বুদ্ধিমত্তরা চেতি সমালোচনীয়ম্।

(থ) শকু ইতি। সরোষমিবেতি ইবশব্দেন বস্তুতো ন সরোষম্, কিন্তু সরোষ-ভাবমাত্রম্, ইষ্টজনালাপশ্রবণস্যাভিপ্রেতত্বাদিতি ব্যজ্যতে। দুর্বিনীতে! দুঃশিক্ষিতে! যথাবস্থব্যবহারানর্হত্বাদিত্যাশয়ঃ। এতাবতী ইয়দধিকা নিতান্তপীড়িতরূপা চাসৌ অবস্থা দশা চেতি তাম্, গতয়া প্রাপ্তয়া ময়া করণেন, ক্রীড়সি খেলসি। তথা চ স্বভাবত এব পীড়াক্লিষ্টাহং তদিষ্টজনালাপেন পুনর্মহান্তং ক্লেশমনুভবামীতি তত্তন্মহদনু-চিতমিতি ভাবঃ।

(ত) প্রিয়ংবদা। (উপহাসের সহিত) এইটুকু মাত্রতেই কি হইবেন?।

(থ) শকুন্তলা। (ক্রোধের সহিতই যেন) দুর্বিনীতা! বিরত হও, বিরত হও। আমি এইরূপ অবস্থায় উপনীত হইয়াছি; তথাপি আমাদ্বারা খেলা করিতেছ!।

(১) প্রিয়ংবদা। সহর্ষক্ষেপম্। অণসূএ! অহ এসো হদো দিণদিট্টী তস্সুণো মঅপোঅওো মাঅরং অণ্ণেসই, এহি সংজোএম ণং।

प्रिय०। हला! चवलो क्खु एसो; ण णं संजोजइदुं एआइणी पारेसि, ता अहम्मि सहाअत्तणं करिस्सं। इत्युभे प्रस्थिते (१)। (ध)

(द) प्रियं वदे ! एष तपस्विमृगपोतकः इतस्ततो दत्तदृष्टिः नूनं मातरं प्रभ्रष्टामन्विष्यति, तत् संयोजयामि एनम्।

(ध) हला! चपलः खल्वेषः; न एनं संयोजयितुमेकाकिनी पारयसि, तदहमपि सहायत्वं करिष्यामि।

(द) अनेति। बहिर्दृष्टिक्षेपाभावे मृगपोतावस्थादर्शनासम्भवात् बहिःसदृष्टि-क्षेपमित्युक्तम्। तपस्वी क्षुद्रत्वाद्दयायोग्यः मृगपोतकः क्षुद्रो हरिणशिशुः। नूनं निश्चितम्। प्रभ्रष्टाम् आत्मनो विच्युतां दूरं गतामित्यर्थः। एनं मृगपोतकम्, संयोजयामि मात्रा सहेति शेषः।

"तपस्वी तापसे चानुकम्पार्हे च" इति विश्वः। पोतक इत्यनुकम्पायां कप्रत्ययः।

(ध) प्रियमिति। एष मृगपोतकः, चपलः अस्थिरः। अतएव एनं मृगपोतकम्। पारयसि शक्नोषीत्यर्थः, तवोपस्थितिमात्रमेव वेगेनान्यत्र गमनसम्भवादिति भावः। सहायत्वं मृगपोतधारणे तव साहाय्यम्। प्रस्थिते इत्यादिकर्मणि क्तः। तेन प्रस्थानु-मारभेते इत्यर्थः परत्र निष्क्रान्ते इति पुनर्दर्शनात्।

अत्र वस्तुतो मृगपोतस्य संयोजनापेक्षा नानयोरासीत्, अपि तु शकुन्तलया सह राज्ञो रमणसम्पादनाय तत्स्थानस्य निर्जनत्वं सम्पादयितुमनयोः प्रस्थानमिति बोध्यम्। अतएव पूर्ववाक्यादारभ्य इत्यन्तं अधिबलं नाम गर्भसन्धेरङ्गम्। तथा च दर्पणे—

"अधिबलमभिसन्धिश्छलेन यः।"

(দ) অনসূয়া। (বাহিরে দৃষ্টিক্ষেপের সহিত) প্রিয়ংবদা! তপস্বীদিগের এই হরিণশাবকটী এদিক্ সেদিক্ দৃষ্টিক্ষেপ করিতেছে; সুতরাং নিশ্চয়ই দূরগত মাতাকে অন্বেষণ করিতেছে; অতএব আমি উহাকে সংযোজিত করি।

(१) क्वचिदयं पाठो नास्ति।

শকু। হলা! ইদো অন্নদো ণ বো গন্তুং অণুমন্নে, জদো অসহাইণী হ্মি (১)। (ন)

উভে। সস্মিতম্‌। তুমং দাব অসহাইণী, জাএ পহবীণাহো সমীবে বট্টদি (২)। ইতি নিষ্ক্রান্তে। (প)

(ন) হলা! ইতঃ অন্যতো ন বাং গন্তুমনুমন্যে; যত অসহায়িন্যস্মি।

(প) ত্বং তাবদসহায়িনী, যস্যাঃ পৃথিবীনাথঃ সমীপে বর্ত্ততে।

অহো! মহাকবিশিরোমণিং কালিদাসমন্তরেণ ঈদৃশী সম্ভবপরা পরমচমৎকারিণী চ যোজনা অন্যেষামসম্ভবৈবেতি সমালোচয়ন্তি কাব্যরসিকাঃ।

(ন) শকু ইতি। অন্যতঃ অন্যস্মিন্‌ স্থানে। "সর্ব্ববিভক্তিভ্যস্তস্" ইতি সপ্তম্যাস্তস্‌। সহায়ঃ অস্যা অস্তীতি সহায়িনী ন সহায়িনী অসহায়িনী। ঈদৃশাবস্থায়ামসহায়ভাবেনাবস্থানমযুক্তমিত্যাশয়ঃ।

(প) উভে ইতি। প্রত্যক্ষমিবালোকবাদিত্বাদুপহাসেন স্মিতমিতি বোধ্যম্‌। ত্ব তাবদসহায়িনীতি সোল্লুণ্ঠনোক্তিঃ। পৃথিবীনাথো রাজা দুষ্মন্তঃ, যস্যাঃ সমীপে ইত্যন্বয়ঃ। তথা চ সমীপ এব রাজ্ঞো বর্ত্তমানত্বাত্‌ ত্বং প্রধানতমসহায়বত্যেবেতি যদসহায়িন্যস্মীত্যুক্তম্‌, তদলীকমেবেতি ভাবঃ।

(ধ) প্রিয়ংবদা। ওলো! এ, বড়ই চঞ্চল; সুতরাং তুমি একলা উহাকে সংযোজিত করিতে পারিবে না; অতএব আমিও তোমার সহায়তা করি। (এই বলিয়া দুই জনেই চলিল।)

(ন) শকুন্তলা। ওলো! আমি তোমাদিগকে এখান হইতে অন্য জায়গায় যাইতে অনুমতি দিতেছি না। যে হেতু আমি অসহায়িনী রহিয়াছি।

(১) হলা! অসহায়াস্মি অন্যতরা বো আগচ্ছতু।

(২) পৃথ্বীএ জো সরণং সো তুহ সমীবে বট্টই।

शकु। कधं गदाओ ज्जेव पिअसहीओ (१)। (फ)

राजा। सुन्दरि! अलमावेगेन ; नन्वयमाराधयिता जनस्ते सखीभूमौ वर्त्तते। तदुच्यताम्—(२) (ब)

किं शीकरैः क्लमविमर्द्दिभिरार्द्रवातं
सञ्चालयामि नलिनीदलतालवृन्तम्।
अङ्के निधाय चरणावुत पद्मताम्रौ
संवाहयामि करभोरु! यथासुखं ते (३) ॥२४॥

(फ) कथं गते एव प्रियसख्यौ।

(फ) शकु इति। कथंशब्दः सम्भ्रमे। "कथं प्रश्ने सम्भ्रमे च प्रकारार्थे च सम्भवे" इति विश्वः। सम्भ्रमस्त्वरा व्यस्ततेति यावत्।

(ब) राजेति। आवेगेन त्वरया सख्योः प्रस्थानेन परिचर्य्याया असम्भवाशङ्काजनितव्यस्ततयेत्यर्थः। नन्वित्यनुनये। अयं मत्स्वरूपः, आराधयिता परिचर्य्यया सन्तोषयिता। सखीभूमौ सखीस्थाने। तथा चाहमेव ते यथेच्छं परिचर्य्यां करोमीति नास्ति किञ्चिदावेगकारणमिति भावः। तत् तस्मात्, उच्यतां वक्ष्यमाणमुभ्रमाकल्पद्वयस्य कतरं कल्पं करोमीति कथ्यताम्।

(প) সখীদ্বয়। ( ঈষৎ হাস্যের সহিত ) তুমি হইলে অসহায়িনী, যাহার নিকট স্বয়ং পৃথিবীশ্বর রহিয়াছেন। ( এই বলিয়া চলিয়া গেল। )

(ফ) শকুন্তলা। প্রিয়সখীরা যে গেলই।

(ব) রাজা। সুন্দরি! ব্যস্ততার প্রয়োজন নাই; যে হেতু তোমার পরিচর্য্যাকারী লোক এই, সখীর জায়গায়ই রহিয়াছে। অতএব বল—

(১) কথং গতাঃ এব। (২) জনস্তব সমীপে বর্ত্ততে।

(৩) কিং শীতলৈঃ ক্লমবিনোদিভিরার্দ্রবাতান্ সঞ্চারয়ামি নলিনীদলতালবৃন্তৈঃ। অঙ্কে নিধায় করভোরু! যথাসুখং তে সংবাহয়ামি চরণাবুত পদ্মতাম্রৌ॥

শকু। ণ মাণণীএসু জণেসু অত্তাণং অবরাহইস্সং।

ইত্যবস্থাসদৃশমুত্থায় প্রস্থাতুমিচ্ছতি (১)। (ম)

কিমিতি। করভো মণিবন্ধাদাকনিষ্ঠাঙ্গুলিকরবহির্দেশস্তাবিব ঊরূ যস্যাস্তৎ-সম্বোধনম্। ক্লমং শরীরসন্তাপং বিমর্দয়িতুং বিনাশয়িতুং শীলং যেষাং তৈঃ শীকরৈ-র্জলবিন্দুভিঃ, আর্দ্রং আর্দ্রবৎ শীতলঃ বাতো বায়ুর্যস্য তৎ তাদৃশম্, নলিনীদলং পদ্মলতাপত্রমেব তালবৃন্তং ব্যজনম্, সঞ্চালয়ামি আন্দোলয়ামি কিম্?। উত অথবা, পদ্মবৎ তাম্রৌ তাম্রবর্ণৌ, তে তব চরণৌ, অঙ্কে মদীয়ে ক্রোড়ে, নিধায় সংস্থাপ্য, সুখমনতিক্রম্যেতি যথাসুখং যেন প্রকারেণ তব সুখং স্যাৎ তথেত্যর্থঃ, সংবাহয়ামি মর্দয়ামি। অতো ময়ৈব তব পরিচর্য্যাকরণাৎ সখ্যোরনুপস্থিতাবপি ন তে কাচি-দসুবিধেতি ন তদর্থমাবেগঃ করণীয় ইতি ভাবঃ।

অত্র করভোরু পদ্মতাম্রাবিতি লুপ্তোপমাদ্বয়স্য পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ। পদ্ম-বত্তাম্রতয়া পরমসুন্দরত্বেন চরণয়োরঙ্কে নিধানে ন বিরক্তিঃ, অপি তু মহান্ লাভ এবেতি দ্যোতনার্থং পদ্মতাম্রাবিতি বিশেষণম্, তেন নাপুষ্টার্থত্বদোষঃ। তথা অভীষ্ট-শকুন্তলাস্পর্শার্থম্ অর্থদ্বয়প্রতিপাদনাৎ মালা নাম নাট্যলক্ষণম্। যথা দর্পণে—

"মালা স্যাদ্যদভীষ্টার্থং নৈকার্থপ্রতিপাদনম্।"

নিত্যসমাসবাদিমতে ডিত্থাদিবৎ ব্যজনার্থং তালবৃন্তমিত্যেক এব শব্দঃ, ন পুনস্তালস্য বৃন্তং তালবৃন্তমিত্যবয়বার্থাপেক্ষা। তেন নলিনীদলরূপং তালবৃন্তমিতি ন কাচিদনুপপত্তিঃ। অনিত্যসমাসবাদিমতে তু অবয়বার্থসত্ত্বাৎ স্বর্ণস্য পিত্তলকলস ইত্যাদিবৎ সামানাধিকরণ্যানুপপত্তিরেবেতি ধ্যেয়ম্।

বসন্ততিলকা বৃত্তম্ ॥২৪॥

হে করভোরু! ক্লান্তিনাশক জলবিন্দুদ্বারা যাহার বায়ু শীতল, সেই পদ্মপত্রের ব্যজন সঞ্চালন করিব কি? না, পদ্মের ন্যায় তাম্রবর্ণ চরণযুগল ক্রোড়ে স্থাপন করিয়া তোমার সুখ অনুসারে সংবাহন করিব? ॥২৪॥

(১) ক্বচিৎ জনেষু ইতি নাস্তি।

राजा । अवष्टभ्य । सुन्दरि ! अपरिनिर्वाणो दिवसः, इयञ्च ते शरीरावस्था (१) । (म)

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणा ।
कथमातपे गमिष्यसि परिबाधाकोमलैरङ्गैः (२) ॥२५॥

इति बलान्निवारयति (३) । (य)

(भ) न माननीयेषु जनेषु आत्मानमपराधयिष्यामि ।

(भ) शकु इति । माननीयेषु पूजनीयेषु । अपराधयिष्यामि चरणसंवाहनेन अपराद्धं करिष्यामि । तथा च राजतया प्रतिपालकत्वात् भवान् मम पूजनीय एव, अतएव च भवता द्वारा चरणसंवाहने अपराध एव भवेदिति न तत्सम्मतिं दातुमर्हामीति भावः । अवस्थासदृशं निजदुर्बलदशानुरूपं कष्टेन स्वैरं स्वैरमित्यर्थः ।

(म) राजेति । अवष्टभ्य आश्रित्य शकुन्तलां धृत्वेत्यर्थः । अवपूर्वस्य स्तन्भेः "अवाद्दौर्जित्यनिकटाश्रयेषु" इति षत्वम् । अपरिनिर्वाणः इदानीमपि अनवसितः । अतएव प्रखरातप इत्याशयः । इयञ्च दृश्यमाना अत्यन्तक्लान्तरूपेत्यर्थः ।

ततः किमित्याह उत्सृज्येति । नलिनीदलेन पद्मलतापत्रेण कल्पितं रचितं स्तनयोरावरणं तापशान्त्यर्थमाच्छादनं यस्याः सा तादृशी त्वम्, कुसुमशयनं पुष्पशय्याम्, उत्सृज्य विहाय, परिबाधया विशेषपीडया कोमलैः कोमलत्वेन दुर्बलीभूतैः अङ्गैः

(ভ) শকুন্তলা। আমি পূজনীয় লোকের নিকটে আপনাকে অপরাধী করিতে পারিব না। (এই বলিয়া অবস্থানুসারে চলিয়া যাইতে ইচ্ছা করিল।)

(ম) রাজা। (শকুন্তলাকে ধরিয়া) সুন্দরি! এখনও দিনের অবসান হয় নাই; এদিকে তোমার শরীরের অবস্থাও এই।

(१) अनिर्वाणः… समवस्था । (२)…वरणम्…पेलवैः ।

(३) बलादेनां निवर्तयति ।

শকু। মুঞ্চ মুঞ্চ মং; ণ ক্খু অত্তণো পহবামি। অহবা সহীমেত্তসরণা কিং দাণিং এত্থ করিস্সং (১)। (র)

(র) মুঞ্চ মুঞ্চ মাম্, ন খলু আত্মনঃ প্রভবামি; অথবা সখীমাত্রশরণা কিমিদানীমত্র করিষ্যামি।

চরণাদ্যবয়বৈঃ, আতপে রবিকিরণতাপে, কথং গমিষ্যসি, সামর্থ্যাভাবাৎ কথমপি নেত্যর্থঃ। অতএবাত্রৈব অবতিষ্ঠস্বেতি ভাবঃ।

অত্র অন্যত্র গমনাসম্ভবং প্রতি পরিবাধাকোমলাঙ্গত্বমেব হেতুরিতি পদার্থহেতুকং কাব্যলিঙ্গং তদুত্থাপিতা চার্থাপত্তিরিত্যনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ। হেতুর্নাম নাট্যলক্ষণঞ্চ—"হেতুর্বাক্যং সমাসোক্তমিষ্টকৃদ্ধেতুদর্শনাৎ" ইতি দর্পণলক্ষণাৎ।

আর্য্যা জাতিঃ ॥২৫॥

(য) ইতীতি। নিবারয়তি ধৃত্বা শকুন্তলামিতি শেষঃ।

(র) শকু ইতি। প্রভবামি প্রভুর্ভবামি। তথা চ পরাধীনতয়া আত্মানং প্রত্যপি প্রভুত্বাভাবাৎ ন স্বত এব তবাভিপ্রায়ং পূরয়িতুমর্হামীতি ভাবঃ। ননু তর্হি কথং মদনলেখনপর্য্যন্তানুষ্ঠানমিত্যাহ অথবেতি। সখীমাত্রমেব শরণং নিয়ন্তৃত্বেনাশ্রয়ো যস্যাঃ সা অহম্, অত্র সখ্যোরনুপস্থিতৌ, কিং করিষ্যামি প্রস্থানং বিনেত্যর্থঃ। তথা চ দৈবেনাহমস্বাধীনং কৃতা, তত্র চ কথঞ্চিৎ প্রযোজিকয়োঃ সখ্যোরপ্যনুপস্থিতৌ কথমপি তব মনোরথং ন পূরয়িতুমর্হামীতি প্রস্থানমেব শ্রেয় ইত্যাশয়ঃ।

সুতরাং পদ্মপত্রের দ্বারা তোমার স্তনযুগলের আবরণ করা হইয়াছে; এই অবস্থায় পুষ্পশয্যা পরিত্যাগ করিয়া, পীড়াদুর্ব্বল দেহে তুমি কি করিয়া রৌদ্রে গমন করিবে ॥২৫॥

(য) (এই বলিয়া বলপূর্ব্বক নিবৃত্ত করিলেন।)

(র) শকুন্তলা। ছাড়ুন ছাড়ুন আমাকে; আমি নিজের প্রভু নহি। অথবা সখীরাই আমার আশ্রয়; সুতরাং এখন আমি কি করি।

(১) ইমং পাঠমারভ্য ন কথমাত্মন ইত্যন্তঃ পাঠঃ ক্বচিন্নাস্তি।

রাজা। ধিগ্ ব্রীড়িতোঽস্মি। (ল)

শকু। ণ ক্খু অহং মহারাঅং ভণামি, দেব্বং উবালহামি। (ব)

রাজা। অনুকূলকারি দৈবং কথমুপালভ্যতে। (শ)

শকু। কধং দাণিং ণ উবালহিস্সং, জং মং অত্তণো অণীসং কদুঅ পরগুণেহিং লোহাবেদি। (ষ)

(ব) ন খলু অহং মহারাজং ভণামি, দৈবমুপালভে।

(ষ) কথমিদানীং ন উপালপ্স্যে, যন্মামাত্মনঃ অনীশাং কৃত্বা পরগুণৈর্লোভয়তি।

(ল) রাজেতি। ধিগিত্যাত্মনিন্দায়াম্। তথা চ বিফলমনোরথত্বাদাত্মানং নিন্দামীত্যভিপ্রায়ঃ। ব্রীড়িতোঽস্মি লজ্জাপিতোঽস্মি, শকুন্তলয়া আহূয় প্রত্যাখ্যানাদিতি ভাবঃ।

অত্র আত্মনোঽধিক্ষেপকরণাৎ ক্ষোভো নাম নাট্যালঙ্কারঃ। যথা দর্পণে—

"অধিক্ষেপবচঃকারী ক্ষোভঃ প্রোক্তঃ স এব তু।"

(ব) শকু ইতি। মহারাজং ভবন্তমুদ্দিশ্যেত্যর্থঃ। উপালভে তিরস্করোমি দৈবেন আত্মন্যপি অনীশীকৃতত্বাদিত্যাশয়ঃ।

(শ) রাজেতি। অনুকূলং স্বপরসাধারণস্যৈব সুখকরং রূপগুণাদিকং করোতীতি তৎ, দৈবমদৃষ্টম্। তথা চ উপকারিণ উপালম্ভো নোচিত ইত্যভিপ্রায়ঃ।

(ষ) শকু ইতি। অনীশামপ্রভুম্। লোভয়তি তবৈব পরস্মিন্ লোভং জনয়তি। তথা চ স্বতন্ত্রত্বে লোভে সতি তদিচ্ছাপূরণসম্ভবাৎ স লোভঃ সুখকর এব; অস্বতন্ত্রত্বে

(ল) রাজা। ধিক্, আমাকে লজ্জিত করিল।

(ব) শকুন্তলা। আমি মহারাজকে বলিতেছি না, অদৃষ্টের নিন্দা করিতেছি।

(শ) রাজা। অদৃষ্ট তোমার অনুকূল কার্য্য করিতেছে, অতএব তাহাকে নিন্দা করিতেছ কেন।

राजा । स्वगतम् ।

अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपाः
काङ्क्षन्त्योऽपि व्यतिकरसुखं कातराः स्वाङ्गदाने ।
आबाध्यन्ते न खलु मदनेनैव लब्धान्तरत्वात्
आबाधन्ते मनसिजमपि क्षिप्तकालाः कुमार्यः ॥२६॥

च लोभाभावे उपद्रवाभावात् सुस्थतैव स्यात्, किन्तु दैवेनाहम् अस्वतन्त्रा भवद्गुणे लुब्धा च कृता ; तेन च लोभपूरणासामर्थ्यात् केवलां यातनामेवानुभवामीति दैवोपालम्भकारणमिति भावः ।

शकुन्तलाया अवस्थामवलोक्य राजा स्वगतमालोचयति अपीति । महति औत्सुक्ये रन्तुमाग्रहे सत्यपि, दयितस्य वल्लभपुरुषस्य प्रार्थनासु रमणयाच्ञासु, प्रतीपाः प्रतिकूलाः, व्यतिकरसुखं सङ्गमसुखम्, काङ्क्षन्त्योऽपि अभिलषन्त्योऽपि, स्वाङ्गदाने रमणाय रमणसाधनीभूताङ्गनियोजने, कातरा असमर्था इत्यर्थः, क्षिप्तः रमणं विना अतिवाहितः कालो याभिस्ताः, कुमार्यः कन्याः, लब्धान्तरत्वात् प्राप्तावकाशत्वात् मदनेनैव केवलं कामेनैव, न खलु आबाध्यन्ते परिपीड्यन्ते, अपि तु मनसिजं तं मदनमपि, आबाधन्ते तस्य चरितार्थताया अकरणात् परिपीडयन्ति, ताः कुमार्य एवेति शेषः । तथा च शकुन्तलाया मदनलेखनादिदर्शनात् महदौत्सुक्यमस्तीति प्रतीयते, अथ च मम प्रार्थनायामिदानीं प्रतीपा जाता, तथा मदनलेखनादिदर्शनात् मत्सङ्गमसुखं काङ्क्षतीत्यवगम्यते, अथ च स्वाङ्गनियोगे कातरा भूता, अतएवैनामिदानीं मदनः परिपीडयत्येवेति भावः ।

अतएवात्र अप्रस्तुतकुमारीसामान्याभिधानात् प्रस्तुतशकुन्तलारूपकुमारीविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः, कारणाभावेऽपि प्रतीपत्वरूपकार्य्योत्पत्तेः किं विभावना, उत औत्सुक्यरूपे कारणे सत्यपि दयितप्रार्थनानुकूल्यरूपकार्य्यानुत्पत्तेर्विशेषोक्तिरित्यनयोः

(ঘ) শকুন্তলা। কেন এখন নিন্দা করিব না ; যে আমাকে আপনার উপরে পর্য্যন্ত স্বাধীন না করিয়া, পরের গুণে লুব্ধ করিতেছে।

शकु । गच्छत्येव । (य)

राजा । न कथमात्मनः प्रियं करिष्ये । उपसृत्य पटान्तमवलम्बते । (ह)

सन्देहसङ्करः द्वितीयपादेऽपि तथैव सङ्करः, उभाभ्यां कुमारीमदनाभ्यामेकाबाधनक्रियाकरणादन्योन्यालङ्कारः, तथा मनसिजस्य आबाधनासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरित्येतेषां परस्परनिरपेक्षतया संसृष्टिः ।

एवम् आबाध्यन्ते इति कर्म्मप्रत्ययेन प्रक्रम्य आबाधन्ते इति कर्त्तृप्रत्ययप्रयोगादेकः प्रत्ययविषयो भग्नप्रक्रमतादोषः, मदनेन इत्यभिधाय पुनर्मनसिजमित्यभिधानादपरश्च प्रकृतिविषयो भग्नप्रक्रमतादोषः । अनयोः समाधानाय श्लोक एवं पठनीयः—

अप्यौत्सुक्ये महति दयितप्रार्थनासु प्रतीपा
काङ्क्षिणीश्च व्यतिकरसुखं कातरां स्वाङ्गदाने ।
कामो मात्रं न खलु समयं प्राप्य क्लिश्नाति कन्यां
क्लिश्नात्येषा तमपि विकलं क्षिप्तकाला स्वकार्य्ये ॥

"व्यतिकरः समाख्यातो व्यसनव्यतिषङ्गयोः" इति विश्वः ।

मन्दाक्रान्ता वृत्तम् ॥२६॥

(य) शकु इति । गच्छत्येव न पुनर्दुष्मन्तानुरोधं रक्षतीत्येवशब्दार्थः ।

(ह) राजेति । प्रियं प्रीतिकरं रमणकार्य्यम्, कथं न करिष्ये, अपि तु बलादपि करिष्य एव, बाधाभावादिति भावः । पटान्तं वस्त्राञ्चलम् ।

রাজা। (স্বগত) অত্যন্ত ইচ্ছা থাকিলেও, প্রিয়তমের প্রার্থনায় প্রতিকূল এবং সম্মেলনসুখ কামনা করিলেও, নিজের অঙ্গ সমর্পণে কাতর, এইরূপ কুমারীগণকে সময় পাইয়া কামদেবই যে পীড়িত করেন, তাহা নহে; কুমারীগণ কালক্ষেপ করিয়া সে কামদেবকেও পীড়িত করে ॥২৬॥

(য) শকুন্তলা। (যাইতে লাগিল।)

शकु । पौरव ! रक्ख रक्ख विणअं, इदो तदो इसिओ सञ्चरन्ति (१) । (ख)

राजा । सुन्दरि ! अलं गुरुजनाद्भयेन, न ते विदितधर्म्मा तत्रभवान् कण्वः खेदमुपयास्यति । यतः—(२) (क)

(ख) पौरव । रक्ष रक्ष विनयम्, इतस्ततः ऋषयः सञ्चरन्ति ।

(ख) शकु इति । पुरोरपत्यमिति पौरवः पुरुवंशीयस्तत्सम्बोधनम् । विनयं शिक्षां शिक्षानिबन्धनं शिष्टाचारमित्यर्थः, न पुनर्बलात्कारे प्रवर्त्तस्वेत्याशयः । कथमित्याह इत इति । सञ्चरतामृषीणां मध्ये यदि कश्चिदवलोक्य पित्रे निवेदयेत्तदा महाननर्थो भवेदित्यभिप्रायः ।

"विनया तु बलायां स्त्री शिक्षायां प्रणतौ पुमान्" इति मेदिनी ।

(क) राजेति । विदिता अवगता धर्म्मा लोकाचारा येन सः । बहुव्रीहौ धर्म्मस्य धर्म्मन् आदेशः । तत्रभवान् पूज्यः । ते त्वत्सम्बन्धे, खेदम् अननुमतभर्त्तृगामित्वात् अनुतापम्, न उपयास्यति न प्राप्स्यति, विदितधर्म्मत्वात् गान्धर्वविवाहस्य च धर्म्म-रूपत्वादिति भावः ।

(ঙ) রাজা। নিজের প্রিয়কার্য্য করিব না ?। ( নিকটে যাইয়া বস্ত্রাঞ্চল ধরিলেন। )

(খ) শকুন্তলা। হে পৌরব ! শিষ্টাচার রক্ষা করুন, শিষ্টাচার রক্ষা করুন ; মুনিগণ ইতস্ততঃ বিচরণ করিতেছেন।

(ক) রাজা। সুন্দরি ! গুরুজনের ভয় করিও না ; লোকাচারাভিজ্ঞ পূজনীয় মহর্ষি কণ্ব, তোমার বিষয়ে অনুতাপ ভোগ করিবেন না। কারণ—

(१) पौरव ! रक्ख अविणअं, मअणसन्तत्ता वि णहु अत्तणो पहवामि ।

(२) भीरु ! अलं गुरुजनभयेन । दृष्टा ते विदितधर्म्मा तत्रभवानत्र दोषं न ग्रहीष्यति कुलपतिः । अपि च,

गान्धर्वेण विवाहेन बह्व्योऽथ मुनिकन्यकाः ।
श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः (१) ॥२७॥

दिशोऽवलोक्य । कथं प्रकाशं निर्गतोऽस्मि । शकुन्तलां हित्वा पुनस्तैरेव पदैर्निवर्त्तते (२) । (ख)

गान्धर्वेणेति । बह्व्यः प्रचुराः, मुनिकन्यकाः, गान्धर्वेण कामप्रयुक्तेन 'त्वं मे भार्य्या त्वं मे भर्त्ता' इति परस्परनियमपूर्वकेण विवाहेन, परिणीता बहुभिः पुरुषैः समुदूढाः अथ अनन्तरम्, पितृभिस्तज्जनकादिभिश्च, तास्तद्रूपेण परिणीताः कन्याः, अनुमोदिताः न्याय्यत्वात् अन्योपायाभावाच्च अनुमताः, श्रूयन्ते पुराणेतिहासादिष्विति शेषः ।

अत्र विवाहेनेति प्रक्रम्य परिणीता इत्यभिधानात् प्रकृतिविषयो भग्नप्रक्रमतादोषः, स च 'विवाहिताः श्रूयन्ते ताः' इति पाठेन समाधेयः ।

गान्धर्वविवाहमाह मनुः—"इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥"

बह्व्य इति प्रचुरार्थकबहुशब्दस्य गुणवचनत्वात् "उतो गुणवचनादखरुसंयोगोपधाद्वा" इति ङीप्रत्ययः ॥२७॥

(ख) दिश इति । सर्वा दिश इत्यर्थः । प्रकाशते इति प्रकाशं सर्वदृश्यस्थानम्, निर्गतोऽस्मि शकुन्तलाया अनुसरणादिति शेषः । ऋषिभिर्दर्शने दुरभिसन्धिसन्देहा-दिदमन्याय्यमित्याशयः । हित्वा परित्यज्य, तैरेव यैः पदैर्निर्गतः, तैरेवेत्यर्थः, पदैः स्थानैः ।

বহুতর মুনিকন্যা গান্ধর্ববিবাহে বিবাহিত হইয়াছেন; পরে তাঁহাদের পিতৃগণও তাহা অনুমোদন করিয়াছেন শুনা যায় ॥২৭॥

(খ) (সকল দিক্ দেখিয়া) হায়! প্রকাশ্য স্থানে আসিয়া পড়িয়াছি। (শকুন্তলাকে ত্যাগ করিয়া, আবার সেই স্থানে ফিরিলেন।)

(१)···बह्व्यो राजर्षिकन्यकाः । पितृभिश्चाभिनन्दिताः ।

(२) क्वचिदयं पाठो नास्ति ।

शकु। पदान्तरे प्रतिनिवृत्य साङ्गभङ्गम्। पोरव! अणिच्छापूरओ वि सम्भासणमेत्तपरिचिदो अअं जणो ण विसुमरिदव्वो (१)। (ग)

राजा। सुन्दरि!

त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे।
दिवावसाने छायेव पुरो मूलं वनस्पतेः ॥२८॥

(ग) पौरव! अनिच्छापूरकोऽपि सम्भाषणमात्रपरिचितः अयं जनः न विस्मर्तव्यः।

(ग) शकु इति। पदान्तरे अन्यस्मिन्नेव पदक्षेपे, प्रतिनिवृत्य परिवृत्य राजाभिमुखीभूयेत्यर्थः, अङ्गभङ्गः अस्तीति साङ्गभङ्गं देहोपरिभाग किञ्चिद्वक्रीकृत्येति तात्पर्य्यम्। न इच्छां पूरयतीति अनिच्छापूरकः रमणेन असम्पादिताभिलाषोऽपि, सम्भाषणमात्रेण केवलेन आलापेन न पुनः केनचिद्व्यवहारेणेत्यर्थः परिचितः, अयं मतस्वरूपो जनः, न विस्मर्तव्यः, आत्मन आश्रितवात्सल्यगुणात् मम च आश्रितत्वादित्याशयः। एतेनात्मनो दुर्निवारानुरागो व्यज्यते।

त्वमिति। दिवावसाने दिनशेषभागे, वनस्पतेः वृक्षस्य, छाया, पुरः अग्रदेशे, दूरं गच्छन्त्यपि, मूलं तस्य वनस्पतेरेव मूलदेशमिव, त्वं पुरो दूरं गच्छन्त्यपि, मे मम

(গ) শকুন্তলা। ( অন্য পদক্ষেপ করিবার সময়ে ফিরিয়া অঙ্গভঙ্গীর সহিত ) হে পৌরব! কেবল আলাপে পরিচিত এই ব্যক্তি, আপনার ইচ্ছা পূরণ না করিয়া থাকিলেও, আপনি ইঁহাকে বিস্মৃত হইবেন না।

(१) गान्धर्वेण इत्यादि श्लोकात् परं नेपथ्ये इत्यादितश्च पूर्वं पुस्तकान्तरे ईदृशाः पाठाः—शकुन्तला। मुञ्च दाव मं। भूओवि सहीजणं अणुमाणइस्सं। राजा। भवतु, मोक्ष्यामि। शकुन्तला। कदा?। राजा। अपरिक्षतकोमलस्य यावत् कुसुमस्येव नवस्य षट्पदेन। अधरस्य पिपासता मया ते सदयं सुन्दरि! गृह्यते रसोऽस्य॥ मुखमस्याः समुन्नमयितुमिच्छति। शकुन्तला। परिहरति नाट्येन।

शकु । (स्तोकमन्तरं गत्वा आत्मगतम् ।) हद्धी हद्धी ! इमं सुणिअ णा. मे चलणा पुरमुहा पसरन्ति । भोदु, इमेहिं पज्जन्तकुरु-वएहिं ओवारिदसरीरा भविअ पेक्खिस्सं दाव से भावाणु-बन्धं । (तथा कृत्वा स्थिता ।) (घ)

(घ) हा धिक् हा धिक् ! इदं श्रुत्वा न मे चरणौ पुरोमुखौ प्रसरतः । भवतु, एभिः पर्य्यन्तकुरुवकैः अपवारितशरीरा भूत्वा प्रेक्षिष्ये तावदस्य भावानुबन्धम् ।

हृदयम्, न जहासि सर्वदैव हृदयेऽवस्थानान्न परित्यजसि । अतः कथं मया त्वं विस्मर्त्तव्य इति भावः ।

अत्र पूर्णोपमालङ्कारः । तथा त्वं जहासि छाया तु जहातीति प्रकृतभेदात् "लतेव राजसे तन्वि ।" इति दर्पणोदाहरणवत् भग्नप्रक्रमतादोषः । तत्समाधानाय तु श्लोक एवं पाठ्य.—

गच्छन्त्यापि त्वया दूरं हृदयं मे न हीयते ।
छाययेव दिवांशेषे पुरो मूलं वनस्पतेः ॥

दिवावसान इति तत्प्रथमभागस्याप्युपलक्षणम्, तत्रापि छायायाः पुरोदूरगमनात् । "वनस्पतिस्तरुमात्रे विनापुष्पफलद्रुमे" इति विश्वप्रकाशे वृक्षमात्रेऽपि वनस्पतिपदप्रयोगात् अमरकोषाद्यनुसारेण पुष्पं विना केवलफलशालिवृक्षबोधपरिकल्पनया न अविशेषे विशेषाख्यदोषः ॥२८॥

(घ) शकु इति । स्तोकमल्पम्, अन्तरं व्यवधानम्, गत्वा ; अन्यथा राजा यदि पुनर्धर्षयेतेत्याशयः । श्रुत्वा विद्यमानाया इत्यध्याहारान्नैककर्त्तृकत्वहानिः । पुरोमुखौ सम्मुखाभिमुखौ सन्तौ, प्रसरतश्चलतः, हृदयाकर्षणादिति भावः । पर्य्यन्तकुरुवकैः

রাজা । সুন্দরি !

দিনের শেষভাগে ছায়া যেমন দূরে গমন করিয়াও বৃক্ষের মূল পরিত্যাগ করে না ; সেইরূপ তুমি দূরে গমন করিয়াও, আমার হৃদয় পরিত্যাগ করিতেছ না ॥২৮॥

রাজা। কথমেবং প্রিয়ে! অনুরাগৈকরসং মামুৎসৃজ্য নিরপেক্ষৈব গতাসি। (ঙ)

অনির্দ্দয়োপভোগস্য রূপস্য মৃদুনঃ কথম্।
কঠিনং খলু তে চেতঃ শিরীষস্যেব বন্ধনম্ ॥২৮॥

প্রান্তস্থকুরুবকশাখৈঃ, অপবারিতশরীরা আবৃতদেহা সতী। অস্য রাজ্ঞঃ, ভাবস্য কার্য্যকলাপস্য, অনুবন্ধম্ অনুবৃত্তিম্।

(ঙ) রাজেতি। হে প্রিয়ে! অনুরাগ এব একো রসঃ স্বাদঃ অনুভববিষয়ো যস্য তং ত্বদনুরাগমাত্রমনোবৃত্তিকমিত্যর্থঃ মাম্ উৎসৃজ্য বিহায়, কথম্ এবং নিরপেক্ষৈব ইত্থং নিস্পৃহৈব, গতাসি। এতত্তু মহদনুচিতমিতি ভাবঃ।

অনির্দ্দয়েতি। অনির্দ্দয় অপি তু পরমকোমলত্বাৎ সদয় এব উপভোগঃ সম্ভোগো যস্য তস্য তাদৃশস্য, মৃদুনঃ কোমলস্য, শিরীষস্য শিরীষকুসুমস্য, বন্ধনং বৃন্তমিব, অনির্দ্দয়োপভোগস্য মৃদুনঃ তে তব রূপস্য আকৃতেঃ সম্বন্ধি, চেতশ্চিত্তম্, কথং কঠিনং খলু সুদৃঢমেব।

অত্রাপি পূর্ণোপমালঙ্কারঃ। নির্ন বিদ্যতে দয়া যস্মিন্ স নির্দ্দয়ঃ ন নির্দ্দয়ঃ অনির্দ্দয় ইতি সদয় এব "সম্ভাব্যমাননিষেধনিবর্ত্তনে নঞ্‌দ্বয়ম্" ইতি বামনাভিধানেন অবধারণার্থলাভাৎ সদয়েত্যনুক্তা অনির্দ্দয়েত্যুক্তাবপি নাধিকপদতাদোষঃ, অপি তু গুণ এব "গুণঃ ক্বাপ্যধিকং পদম্" ইত্যত্র "তন্ন ন জানে" ইতি দর্পণোদাহরণবৎ। অনুনয়ো নাম নাট্যলক্ষণঞ্চ। যথা দর্পণে—

(ঘ) শকুন্তলা। (একটু ব্যবধানে যাইয়া স্বগত) হায় হায়! এই কথা শুনিয়া, আমার চরণ আর সম্মুখের দিকে সরিতেছে না। হউক, এই প্রান্তবর্ত্তী কুরুবকশাখায় আবৃতদেহ হইয়া, ইঁহার কার্য্যগুলি দেখি। (তাহা করিয়া থাকিল।)

(ঙ) রাজা। হে প্রিয়ে! আমার অনুরাগ, তোমার প্রতি ধারাবাহীরূপে চলিতেছে, তথাপি আমাকে পরিত্যাগ করিয়া, তুমি একেবারে কোন অপেক্ষা না করিয়াই এইভাবে চলিয়া গেলে?।

शकु। एदं सुणिअ ण मे अत्थि विभवो गच्छिदुं। (च)

राजा। सम्प्रति प्रियाशून्ये किमस्मिन् लतामण्डपे करोमि। अग्रतोऽवलोक्य। हन्त! व्याहतं मे गमनम्। (छ)

मणिबन्धाद्गलितमिदं संक्रान्तोशीरपरिमलं तस्याः।
हृदयस्य निगड़मिव मे मृणालवलयं स्थितं पुरतः॥३०॥

सबहुमानमादत्ते। (ज)

(च) इदं श्रुत्वा न मे अस्ति विभवो गन्तुम्।

"वाक्यैः स्निग्धैरनुनयो भवेदर्थस्य साधनम्।"

"वृन्तं प्रसवबन्धनम्" इत्यमरः॥२९॥

(च) शकु इति। श्रुत्वा वर्त्तमानाया इत्यध्याहारादवापि नैककर्त्तृकत्वहानिः। विभवः सामर्थ्यं नास्ति, प्रत्यनुरागेणाकर्षणादिति भावः।

(छ) राजेति। किं करोमि, अतएव गच्छाम्येवेत्याशयः। हन्तेति हर्षे। व्याहतं सविघ्नीकृतम्।

गमनव्याघातहेतुमाह मणीति। तस्याः शकुन्तलायाः, मणिर्बध्यते अस्मिन्निति मणिबन्धो हस्तस्य वलयधारणदेशस्तस्मात्, गलितं पतितम्, संक्रान्तः संलग्नः उशीरस्य वीरणमूलानुलेपनस्य परिमलो गात्रविमर्द्दजनितमनोहरगन्धो यस्मिन् तत् तादृशम्, तथा मे मम, हृदयस्य गमनप्रवर्त्तकस्य चित्तस्य, निगड़ं बन्धनशृङ्खल इव, इदं दृश्यमानम्, मृणालवलयम्, पुरतः अग्रतः स्थितम्। ततश्च यथा रथचालकस्य अश्वस्य निगड़ितत्वे

কোমল শিরীষকুসুমের বৃন্ত যেমন কঠিন; সেইরূপ কোমল ও গাঢ়ভাবে উপভোগের যোগ্য তোমার এই রূপের হৃদয়, কঠিন হইল কেন॥২৯॥

(চ) শকুন্তলা। ইহা শুনিয়া আমার যাইবার ক্ষমতা নাই।

(ছ) রাজা। এখন এই প্রিয়াশূন্য লতামণ্ডপে কি করিব। (সম্মুখে দৃষ্টিপাত করিয়া) হায়! আমার গমনে বিঘ্ন হইল।

শকু। (হস্তং বিলোক্য।) অম্মো! দোব্বল্লসিঢ়িলদাএ পরিব্ভট্টং এদং মিণালবলঅং ণ মএ পরিণ্ণাদং। (ঝ)

রাজা। (মৃণালবলয়মুরসি নিধায়।) অহো! স্পর্শঃ। (ঞ)

(ঝ) অহো। দৌর্ব্বল্যশিথিলতয়া পরিভ্রষ্টমেতৎ মৃণালবলয়ং ন ময়া পরিজ্ঞাতম্।

---

রথস্য গমনং ব্যাহতং ভবতি, তথৈব মমাপি দেহচালকস্য হৃদয়স্য নিগড়িতত্বাৎ গমনং ব্যাহতমিতি ভাবঃ।

অত্র নিগড়মিবেতি জাত্যুৎপ্রেক্ষালঙ্কারঃ। আর্য্যা জাতিঃ ॥৩০॥

(জ) সেতি। সবহুমানং প্রিয়ায়া বস্তুত্বাদেব অত্যাদরসহিতং যথা স্যাত্তথা, আদত্তে মৃণালবলয়ং গৃহ্ণাতি।

(ঝ) শকু ইতি। অহো ইতি বিস্ময়ে। দৌর্ব্বল্যেন দারুণসন্তাপাৎ শরীরস্য কৃশত্বেন যা শিথিলতা শ্লথতা তয়া, পরিভ্রষ্টং হস্তাৎ পতিতম্। ন পরিজ্ঞাতং ন লক্ষিতম্। স্বহস্তাদেব বলয়ং পতিতম্, কিন্তু তন্ন পরিজ্ঞাতম্, ইদং বিস্ময়কারণমেবেত্যাশয়ঃ।

(ঞ) রাজেতি। উরসি বক্ষসি, নিধায় সংস্থাপ্য। অহো অভূতপূর্ব্বসুখকরত্বাদাশ্চর্য্য ইত্যর্থঃ, স্পর্শঃ মৃণালবলয়স্যেতি শেষঃ।

---

যাহাতে প্রিয়ার অনুলেপনের সৌরভ লাগিয়া রহিয়াছে, সেই মৃণালবলয় প্রিয়তমা শকুন্তলার মণিবন্ধ হইতে নিপতিত হইয়া আমার হৃদয়ের শৃঙ্খলের ন্যায় সম্মুখে রহিয়াছে ॥৩০॥

(জ) (বিশেষ আদরের সহিত গ্রহণ করিলেন।)

(ঝ) শকুন্তলা। (হাত দেখিয়া) ওমা! দৌর্ব্বল্যের শিথিলতাবশতঃ এই মৃণালবলয় পড়িয়া গিয়াছিল; কিন্তু আমি জানিতে পারি নাই।

(ঞ) রাজা। (মৃণালবলয় বক্ষে ধারণ করিয়া) আশ্চর্য্য সংস্পর্শ!

अनेन लीलाभरणेन ते प्रिये !
विहाय कान्तं भुजमत्र तिष्ठता ।
जनः समाश्वासित एष दुःखभाक्
अचेतनेनापि सता, न तु त्वया ॥३१॥

शकु । अदो वरं ण समत्थम्हि विलम्बिदुं । भोदु, एदेण ज्जेव अवदेसेण अत्ताणं दंसइस्सं । इत्युपसर्पति । (ट)

(ट) अतः परं न समर्थास्मि विलम्बितुम् । भवतु, एतेनैव अपदेशेन आत्मानं दर्शयिष्यामि ।

अनेनेति । हे प्रिये ! शकुन्तले ! कान्तं मनोहरम्, भुजं हस्तम्, विहाय परित्यज्य, अत्र स्थाने, तिष्ठता विद्यमानेन, अनेन ते तव लीलाभरणेन विलासालङ्कारेण, अचेतनेन चैतन्यरहितेन सतापि, दुःखभाक् वियोगकष्टशाली, एष मत्स्वरूपो जनः समाश्वासितः आकाङ्क्षितस्पर्शसुखसम्पादनेन सान्त्वितः, तु किन्तु त्वया सचेतनया सत्यापि इत्याशयः, न समाश्वासित इत्यन्वयः । इदन्तु महादुःखकारणं महदाश्चर्य्यञ्चेत्यभिप्रायः ।

अत्र चेतनात्मकहेत्वभावेऽपि आश्वासनरूपकार्य्योत्पत्तेर्विभावना, सचेतनशकुन्तलारूपहेतुसत्त्वेऽपि आश्वासनात्मककार्य्यानुत्पत्तेर्विशेषोक्तिः तथा प्रस्तुतयोरेव मृणालवलय-शकुन्तलयोराश्वासित इत्येकया क्रियया कर्त्तृतयाभिसम्बन्धात्तुल्ययोगिता च इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः ।

वंशस्थविलं वृत्तम् ॥३१॥

(ट) शकु इति । अतः परम् ईदृशविलापश्रवणानन्तरम् एतेनैव मृणालवलय-प्रार्थनात्मकेनैव, अपदेशेन छलेन ।

হে প্রিয়তমে ! তোমার সুন্দর হাতখানি ত্যাগ করিয়া, এইখানে থাকিয়া, তোমার এই বিলাসালঙ্কার অচেতন হইয়াও, এই দুঃখী ব্যক্তিকে আশ্বস্ত করিল ; কিন্তু তুমি করিলে না ।৩১।

राजा। (सहर्षम्।) अये! जीवितेश्वरी मे प्राप्ता। परिदेवनानन्तरं प्रसादेनोपकर्त्तव्योऽस्मि खलु दैवस्य। (ঠ)

पिपासाक्षामकण्ठेन याचितञ्चाम्बु पक्षिणा।
नवमेघोज्झिता चास्य धारा निपतिता मुखे ॥२२॥

(ठ) राजेति। अये इति हर्षे। मे मम जीवितेश्वरी जीवननियन्त्री, उपस्थितौ आश्वासात् जीवनस्थितेः अनुपस्थितौ च नैराश्यात् जीवनास्थितेरित्याशयः। प्राप्ता उपस्थिता। अतएव परिदेवनानन्तरं पूर्वकृतविलापात् परम्, दैवस्य विधेः प्रसादेन अनुग्रहेण उपकर्त्तव्योऽस्मि उपकारयोग्यः कृतोऽस्मि, शकुन्तलायाः पुनरपि उपस्थापनादिति भावः।

अत्र प्रहर्षो नाम नाट्यालङ्कारः—"प्रहर्षः प्रमदाधिक्यम्" इति दर्पणलक्षणात्।

दैवस्येति "वा कर्त्तरि कृत्ये" इति कर्त्तरि षष्ठी।

पिपासेति। पिपासया जलतृष्णया क्षामं क्षीणः कण्ठः स्वरो यस्य तेन, पक्षिणा चातकेन, अम्बु जलञ्च याचितं नवमेघेन उज्झिता उत्सृष्टा धारा वृष्टिजलधारा च, अस्य पक्षिणश्चातकस्य मुखे निपतिता। तथा च यथा तृष्णातुरचातकस्य जलप्रार्थनानन्तरमेव तत्प्राप्तौ महानुच्छ्वासो जायते, ममापि तथैव शकुन्तलादर्शनप्रार्थनानन्तरमेव तद्दर्शनप्राप्तेः महानुच्छ्वासो जात इत्याशयः।

अतएवात्र समादप्रस्तुतात् प्रस्तुतसमप्रतीतेरप्रस्तुतप्रशंसालङ्कारः, चकारद्वयेन याचनपतनक्रिययोर्यौगपद्यसूचनात् क्रियासमुच्चयश्च; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात्

---

(ট) শকুন্তলা। ইহার পর আর বিলম্ব করিতে পারি না। হউক, এই ছলেই আপনাকে দেখাই। (এই বলিয়া নিকটে গেল।)

(ঠ) রাজা। (দেখিয়া আনন্দের সহিত) ওহে! আমার জীবিতেশ্বরী উপস্থিত হইয়াছেন। বিলাপের পর অনুগ্রহ করিয়া বিধাতা আমার উপকার করিয়াছেন।

शकु। (राज्ञः सम्मुखे स्थित्वा।) अज्ज! अद्धपधे सुमरिअ एदस्स हत्थब्भंसिणो मिणालवलअस्स कदे पडिणिवुत्तम्हि, कधिदं मे हिअएण, तए गहिदं त्ति। ता णिक्खिव एदं, मा मं अत्ताणञ्च मुणिअणेसुं पआसइस्सदि। (ड)

(ड) आर्य्य! अर्द्धपथे स्मृत्वा एतस्य हस्तभ्रंशिनो मृणालवलयस्य कृते प्रतिनिवृत्तास्मि; कथितं मे हृदयेन, त्वया गृहीतमिति। तन्निक्षिप एतत्, मा मामात्मानञ्च मुनिजनेषु प्रकाशयिष्यति।

शङ्करः। तथा चातकेनेति पक्षिविशेषे वक्तव्ये पक्षिणीति तत्सामान्याभिधानात् विशेषे अविशेषाख्यदोषः, स च 'चातकेनाम्बु चाथितम्' इति पाठेन समाधेयः।

"स्त्रियेऽपि कण्ठ आख्यातः" इति हारावली।

आमिति "अँ शुचिपचां मकवाः" इति अँधातोः प्रत्ययतकारस्य मकारः॥३२॥

(ड) शकु इति। कृते निमित्ते। कथितं ज्ञापितम्। तत् तस्मात्, एतत् मृणालवलयम्, निक्षिप समर्पय। तथात्वे किं भविष्यतीत्याह मेति। मां शकुन्तलाम्, आत्मानं स्वं दुष्मन्तञ्च, मुनिजनेषु मा न प्रकाशयिष्यति, इदं मृणालवलयं कर्त्तृ इति शेषः। अन्यथा अस्मिन् मृणालवलये तवैव हस्तगते मुनिभिश्च दृष्टे, 'मदीयं वस्तु कथं ते हस्तगतम्' इति सन्देहेन मुनिजनेषु आवयोरहःसम्पर्कः प्रकाशीभविष्यतीति भावः।

চাতক, পিপাসায় ক্ষীণকণ্ঠ হইয়া জলও প্রার্থনা করিল; নবমেঘ-প্রদত্ত জলধারাও ইহার মুখে নিপতিত হইল ॥৩২॥

(ড) শকুন্তলা। (রাজার সম্মুখে থাকিয়া) আর্য্য! অর্দ্ধপথে স্মরণ করিয়া, হস্তচ্যুত এই মৃণালবলয়ের জন্যই আবার ফিরিয়া আসিয়াছি; আমার মন বলিল যে, আপনিই গ্রহণ করিয়াছেন। অতএব উহা নিক্ষেপ করুন; আমাকে এবং নিজেকে মুনিগণের নিকট প্রকাশ করিবেন না।

राजा । एकेनाभिसन्धिना प्रत्यर्पयामि । (ढ)

शकु । केण उण ? । (ण)

राजा । यदीदमहमेव यथास्थानं निवेशयामि । (त)

शकु । आ, का गदी । भोदु एदं दाव । इत्युपसर्पति । (थ)

राजा । इतः शिलापट्टैकदेशं संश्रयावः । इत्युभौ परिक्रम्योपविष्टौ । (द)

(ण) केन पुनः ? ।

(थ) आः, का गतिः । भवतु एतत् तावत् ।

(ढ) राजेति । अभिसन्धिना मया अभिसन्धीयमानेन पणेन ।

(ण) शकु इति । केन अभिसन्धिना ।

(त) राजेति । अहमेव यदि इदं मृणालवलयं यथास्थानं तव हस्ते इत्यर्थः, निवेशयामि स्थापयामि स्थापयितुमनुमतिं लभे इति तात्पर्य्यम् । अयमेव ममाभिसन्धिः ; अन्यथा च न प्रत्यर्पयामीत्याशयः ।

(थ) शकु इति । आ इति क्लेशेन पीडासूचनम्, का गतिः, तव पणपूरणाङ्गीकार-मन्तरेण क उपायः । अतएवाह भवत्विति । एतत् त्वयैव यथास्थानं निवेशनं भवतु इति पणपूरणाङ्गीकारः । उपसर्पति राज्ञः समीपं गच्छति ।

(द) राजेति । इतः अस्मिन् पार्श्वे, शिलापट्टस्य प्रस्तरफलकस्य एकदेशम्, संश्रयाव उपवेशनाय अवलम्बावहे । अन्यथा दण्डायमानस्य निवेशने महत्यसुविधा भवेदिति भावः ।

(ঢ) রাজা । একটী পণদ্বারা প্রত্যর্পণ করিব ।

(ণ) শকুন্তলা । কি পণদ্বারা ? ।

(ত) রাজা । যদি আমিই এটীকে যথাস্থানে পরাইয়া দিই ।

(থ) শকুন্তলা । আঃ, উপায় কি । ইহাই হউক । ( এই বলিয়া নিকটে গেল । )

राजा। शकुन्तलाया हस्तमादाय। अहो स्पर्शः!। (ध)

हरकोपाग्निदग्धस्य दैवेनामृतवर्षिणा।
प्ररोहः सम्भृतो भूयः किंस्वित् कामतरोरयम्? ॥३३॥

शकु। स्पर्शं रूपयित्वा। तुवरदु तुवरदु अज्जउत्तो। (न)

(न) त्वरतां त्वरताम् आर्यपुत्रः।

(ध) राजेति। अहो आश्चर्यः, परमानन्दजनकत्वादित्याशयः।

हरेति। अयं तव हस्तः, हरस्य महादेवस्य कोपाग्निना पार्वतीसन्निधाने सम्मोहन-काले क्रोधजनितवह्निना दग्धस्य भस्मीकृतस्य कामो मदन एव तरुर्दाह्यत्वात् वृक्षस्तस्य, अमृतवर्षिणा जलवर्षिणा सुधादायिना च, दैवेन मेघसमूहेन देवसमूहेन च, भूयः पुनरपि, सम्भृत उत्पादितः, प्ररोहः अङ्कुरः, किं स्वित्, अङ्कुरवत् लोहिततलत्वात् तद्दलवत् कोमलाङ्गुलीमत्त्वाच्चेति भावः।

अत्र कामे तरुत्वारोपः शाब्दः, दैवे मेघत्वारोपश्चार्थ इत्येकदेशविवर्त्ति रूपकम्, शकुन्तलाहस्ते कामतर्वङ्कुरत्वसन्देहात् तन्निराशाभावाच्च शुद्धसन्देहालङ्कारश्च, अनयो-र्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः।

"देवो मेघे सुरे राज्ञि स्यान्नपुंसकमिन्द्रिये।" "अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते।" इत्यादि च मेदिनी। "किंस्वित् प्रश्ने वितर्के च" इति विश्वः।

देवानां समूह इति दैवम् एवमादित्वादण् ॥३३॥

(দ) রাজা। এই দিকে প্রস্তরফলকের এক পার্শ্বে আমরা উপবেশন করি। (এই বলিয়া দুই জনেই পাদক্ষেপ করিয়া উপবেশন করিলেন।)

(ধ) রাজা। (শকুন্তলার হস্ত ধারণ করিয়া) কি আশ্চর্য্য স্পর্শ!।

কামবৃক্ষ, মহাদেবের কোপানলে দগ্ধ হইয়াছিল; তাহার পর বিধাতা অমৃতবর্ষা করিয়া পুনরায় উহার এই অঙ্কুর উৎপাদন করিয়াছেন কি? ॥৩৩॥

राजा। (सहर्षमात्मगतम्।) इदानीमस्मि विश्वसितः; भर्त्तुराभाषणपदमेतत्। (प्रकाशम्।) सुन्दरि! नातिश्लिष्टः सन्धिरस्य मृणालवलयस्य; यदि तेऽभिमतम्, तदन्यथा घटयिष्यामि। (प)

शकु। (स्मितं कृत्वा।) जधा दे रोअदि। (फ)

राजा। (सव्याजं विलम्ब्य प्रतिमोच्य।) सुन्दरि! दृश्यताम्—(ब)

(फ) यथा ते रोचते।

---

(न) शकु इति। स्पर्शं स्पर्शजनितरोमाञ्चादिकम्, रूपयित्वा अभिनीय। आर्य्यः पूज्यः श्वशुर इत्यर्थः तस्य पुत्र इत्यार्य्यपुत्रः, भर्त्तर्य्ये भार्य्याव्यवहृतोऽयं योगरूढः शब्दः। त्वरतां यथास्थाने मृणालवलयनिवेशनायेति तात्पर्य्यम्। विलम्बे यदि कश्चित् पश्येदित्याशयः।

(प) राजेति। विश्वसितः अवश्यमेवेयं मे भार्य्या भविष्यतीत्यर्थं जातविश्वासः। तत्र हेतुमाह भर्त्तुरिति। एतत्, भर्त्तुराभाषणपदं वाचकः शब्दः। "आर्य्यपुत्रेति सम्बोध्यः पतिः पत्नीजनेन वा" इति भरतनाट्यशास्त्रादिति भावः। सन्धिः उभयाग्रसंयोगस्थलम्, नातिश्लिष्टः न सुषमभावेन मिलितः। तत् तदा। अन्यथा अन्यभावेन, घटयिष्यामि योजयिष्यामि।

(फ) शकु इति। नवयत्नातिशयदर्शनात् कौतुकेन स्मितम्। यथा ते रोचते, तथा कुरु इति शेषः।

---

(ন) শকুন্তলা। (স্পর্শজনিত রোমাঞ্চপ্রভৃতি অভিনয় করিয়া) আর্য্যপুত্র! ত্বরা করুন, ত্বরা করুন।

(প) রাজা। (আনন্দের সহিত স্বগত) এখন বিশ্বস্ত হইলাম; কারণ, এই শব্দটী ভর্ত্তার বাচক। (প্রকাশ্যে) সুন্দরি! এই মৃণাল-বলয়ের সন্ধিস্থান ভাল করিয়া লাগে নাই; সুতরাং যদি তোমার মত হয়, তবে অন্যরূপে সংযোজিত করি।

(ফ) শকুন্তলা। (ঈষৎ হাস্য করিয়া) আপনার যেমন অভিরুচি।

অয়ং স তে শ্যামলতামনোহরং
বিশেষশোভার্থমিবোজ্ঝিতাম্বরঃ।
মৃণালরূপেণ নবো নিশাকরঃ
করং সমেত্যোভয়কোটিমাশ্রিতঃ ॥৩৪॥

(ব) রাজেতি। সব্যাজম্ অন্যথাঘটনব্যাজেন সহিতং যথা স্যাত্তথা বিলম্ব্য, প্রতিমোচ্য মৃণালবলয়ং পরিধাপ্য।

অয়মিতি। অয়ং দৃশ্যমানঃ, স প্রসিদ্ধঃ, নবো নবোদিতঃ মৃণালরূপত্বাৎ এককলামাত্রোদিত ইত্যর্থঃ, নিশাকরশ্চন্দ্রঃ, বিশেষশোভার্থমিব আত্মনোঽধিকতরসৌন্দর্য্যসম্পাদনার্থমিব, সুন্দরস্থানগতত্বে সৌন্দর্য্যবৃদ্ধেঃ স্বাভাবিকত্বাদিতি ভাবঃ, উজ্ঝিতং ত্যক্তম্ অম্বরমাকাশং যেন স তথোক্তঃ সন্, শ্যামলতয়া আকাশবদেব শ্যামবর্ণত্বেন মনোহরং কমনীয়ত্বাদধিকতরসুন্দরম্, তে তব করং হস্তম্, মৃণালরূপেণ সমেত্য প্রাপ্য, উভয়কোটিম্ অগ্রদেশদ্বয়ম্, আশ্রিতঃ প্রাপ্তঃ, আকাশে কোটিদ্বয়ং বিভক্তং বর্ত্ততে, তব হস্তে তু সংযুক্তং জাতমিতি ভাবঃ।

অত্র বিশেষশোভার্থমিবেতি ফলোৎপ্রেক্ষা, প্রকৃতমৃণালনিষেধেন নিশাকরস্য স্থাপনাদপহ্নুতিশ্চ; অনয়োর্গুণপ্রধানভাবেনাঙ্গাঙ্গিভাবাৎ সঙ্করঃ।

অত্র শ্যামলতামনোহরং করমিতি দর্শনাৎ শকুন্তলা শ্যামাঙ্গী আসীদিতি প্রতীয়তে। কেচিত্তু শ্যামবর্ণলতাবন্মনোহরমিতি ব্যাচক্ষতে, তন্ন তথাত্বে শ্যামেতি বিশেষণবৈয়র্থ্যম্। শ্যামানামপ্রিয়ঙ্গুলতাবোধকত্বে বক্তব্যে সংজ্ঞাত্বাৎ পুংবদ্ভাবাপ্রসক্তেঃ।

বংশস্থবিলং বৃত্তম্ ॥৩৪॥

(ব) রাজা। (ছলের সহিত বিলম্ব করিয়া, পরিধান করাইয়া) সুন্দরি! দেখ—

একটী মাত্র কলাদ্বারা নবোদিত এই সেই চন্দ্র, বিশেষ সৌন্দর্য্য লাভ করিবার জন্যই যেন আকাশ পরিত্যাগ করিয়া, শ্যামবর্ণতানিবন্ধন মনোহর তোমার হাতখানি পাইয়া, মৃণালরূপে দুই অগ্রভাগের সম্মেলন প্রাপ্ত হইয়াছেন ॥৩৪॥

शकु। ण दाव णं पेक्खामि, पवणकम्पिदकस्सुप्पल-रेणुणा कलुसीकिदा मे दिट्ठी। (भ)

राजा। सस्मितम्। यद्यनुमन्यसे, तदहमेनां वदनमारुतेन विशदां करवाणि। (म)

शकु। तदो अणुकम्पिदा भवेअं; किन्तु उण अहं ण दे वीससेमि। (य)

राजा। मा मैवम्। नवो हि परिजनः सेव्यानामादेशात् परं न वर्त्तते। (र)

(भ) न तावदेनं प्रेक्षे, पवनकम्पितकर्णोत्पलरेणुना कलुषीकृता मे दृष्टिः।

(य) ततः अनुकम्पिता भवेयम्; किन्तु पुनरहं न ते विश्वसिमि।

(भ) शकु इति। एनं मृणालवलयम्। पवनकम्पितयोः वायुसञ्चालितयोः कर्णोत्पलयोः रेणुना परागेण, मे मम दृष्टिः नयनद्वयम्, कलुषीकृता आविलीकृता। अतएव नैनं प्रेक्षे इत्याशयः। "दृग् दृष्टिः" इत्यमरः।

(म) राजेति। कर्त्तव्यस्यैवाकौतुकात् स्मितमिति बोध्यम्। तत् तदा, एनां तव दृष्टिम्, वदनमारुतेन फुत्कारेण, विशदां निर्म्मलाम्।

(य) शकु इति। अनुकम्पिता भवता उपकृतत्वेन अनुगृहीता। ते तव "तस्य चानुकरोति हि" इत्यादिवत् शेषे षष्ठी. त्वां न विश्वसिमीत्यर्थः। यदि त्वं वदनमारुतेन दृष्टिं विशदां कुर्वन् अकस्मात् मम गण्डे चुम्बसीत्येव मे सन्देह इति भावः।

(ভ) শকুন্তলা। আমি ইহা দেখিতে পারিতেছি না। কারণ, বায়ুকম্পিত কর্ণোৎপলের রেণুতে আমার দৃষ্টি, অপরিষ্কার করিয়াছে।

(ম) রাজা। (ঈষৎ হাস্যের সহিত) যদি অনুমতি কর, তবে আমি মুখবায়ুদ্বারা ইহাকে পরিষ্কার করিয়া দিতে পারি।

(য) শকুন্তলা। তাহা হইলে অনুগৃহীত হই বটে; কিন্তু আমি আপনাকে বিশ্বাস করি না।

শকু। অঅং জ্জেব অচ্চাদরো অবিস্সাসজণও। (ল)

রাজা। স্বগতম্। নাহমেবং রমণীয়মাত্মনঃ সেবাবসরং শিথিলয়িষ্যে। মুখমুন্নময়িতুং প্রবৃত্তঃ। (ব)

শকু। প্রতিষেধং রূপয়ন্তী বিরমতি। (শ)

(ল) অয়মেব অত্যাদরঃ অবিশ্বাসজনকঃ।

(র) রাজেতি। মা মৈবং ন খলু ন খলু সত্যং ব্রূহীতি শেষঃ। হি যস্মাৎ। পরিজনঃ সেবকঃ। পরম্ উপরি ন বর্ত্ততে আদেশাতিরিক্তং কার্য্যং ন করোতীত্যর্থঃ। তথা চাহং "তদা অণুকম্পিতা ভবেয়" ইত্যনেন মুখনম্রতয়া আদিষ্টং দৃষ্টিবিশদীকরণং বিনা ন কিঞ্চিদন্যৎ করোমীত্যাশয়ঃ।

(ল) শকু ইতি। অয়মেব "পরিজনঃ" "সেব্যানাম্" "আদেশাৎ" ইতি শব্দ-ত্রয়সূচিতঃ। তথা চ যথা ভবতঃ পরিজনত্বং মম চ সেব্যত্বং মিথ্যাপি ভবতা সত্যবদেব অভিহিতম্, তথা "নবো হি" ইত্যাদি বাক্যমেব মিথ্যৈব সত্যবদেব অভিহিত-মিত্যভিপ্রায়ঃ।

(ব) রাজেতি। রমণীয়ং সুন্দরম্, নির্জ্জনত্বাৎ সম্মতত্বাৎ মহামোদকরত্বা-চ্চেতি ভাবঃ, আত্মনঃ স্বস্য মৎকর্ত্তৃকমিত্যর্থঃ, সেবাবসরং শুশ্রূষাকরণাবকাশম্, শিথিলয়িষ্যে সেবায়া অকরণেন নিষ্ফলীকরিষ্যে ইত্যর্থঃ, ঈদৃশাবসরস্য পুনঃ প্রাপ্তি-সন্দেহাদিতি ভাবঃ।

(র) রাজা। না না, এরূপ বলিও না। কারণ, নূতন সেবক, প্রভুদের আদেশের উপরে যায় না।

(ল) শকুন্তলা। এই বেশী আদরই অবিশ্বাসের কারণ।

(ব) রাজা। (স্বগত) আমি এমন সুন্দর নিজের পরিচর্য্যার সময়টীকে নিষ্ফল করিব না। (শকুন্তলার মুখ উত্তোলন করিতে প্রবৃত্ত হইলেন।)

(শ) শকুন্তলা। (নিবারণ অভিনয় করিয়া বিরত হইল।)

राजा। अयि मदिरेक्षणे! अलमस्मदविनयाशङ्कया। (ष)

शकु। किञ्चिद् दृष्ट्वा व्रीडावनतमुखी तिष्ठति। (स)

राजा। अङ्गुलीभ्यां मुखमुन्नमय्य आत्मगतम्। (ह)

चारुणा स्फुरितेनायमपरिक्षतकोमलः।

पिपासतो ममानुज्ञां ददातीव प्रियाधरः॥२५॥

(श) शकु इति। प्रतिषेधं राजकर्त्तृकमुखोत्तोलननिवारणम्, रूपयन्ती मुखस्यैव तिर्य्यक्कम्पनादिना अभिनयन्ती, विरमति राज्ञः अतिसन्निहिता भवितुं स्थगते।

(ष) राजेति। मदिरे! खञ्जनपक्षिणाविव ईक्षणे लोचने यस्यास्तत्सम्बोधनम्। अस्मत् मम सकाशात्, अविनयाशङ्कया धृष्टताचरणप्रसङ्गेन चुम्बनाशङ्कया अलम्। पूर्वमेव प्रतिश्रुतत्वात् न ते चुम्बनं करिष्यामीति भावः। अस्मदिति "वास्मदश्च" इति पञ्चम्या बहुवचनम्।

(स) शकु इति। किञ्चिद् दृष्ट्वा राज्ञोऽननुन्मदभावं विलोक्य।

(ह) राजेति। अङ्गुलीभ्यां हस्तद्वयस्य अङ्गुष्ठद्वयेन। उन्नमय्य उत्तोल्य।

चारुणेति। अपरिक्षतः केनापि जनेन दन्तैरदष्टपूर्वः, अतएव कोमलः, अयं प्रियायाः शकुन्तलायाः अधर ओष्ठः, चारुणा मनोहरेण, स्फुरितेन मत्स्पर्शजनित-स्पन्दनेन अनुज्ञावाक्योच्चारणप्राक्कालीनकम्पनेन च, पिपासतः पातुमिच्छतः चुम्बितु-मिच्छत इत्यर्थः मम सम्बन्धे, अनुज्ञां चुम्बनानुमतिम्, ददातीव।

अत्र कोमलत्वं प्रति अपरिक्षतपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गं क्रियोत्प्रेक्षा च, अनयोर्मिथो निरपेक्षतया संसृष्टिः। तथा स्पृहा नाम नाट्यालङ्कारश्च। तथा च दर्पणे—"आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा"॥२५॥

---

(ষ) রাজা। হে খঞ্জননয়নে! আমা হইতে অশিষ্ট ব্যবহারের আশঙ্কা করিও না।

(স) শকুন্তলা। (একটু দেখিয়া, লজ্জায় অবনত মুখ হইয়া রহিল।)

(হ) রাজা। (দুইটী অঙ্গুলীদ্বারা শকুন্তলার মুখ উত্তোলন করিয়া স্বগত)

শকু। পরিস্সাণমন্থরো বিঅ অজ্জউত্তো। (ক্ষ)

রাজা। কর্ণোৎপলসন্নিকর্ষাদীক্ষণমূঢ়োঽস্মি। ইতি মুখ-মারুতেন চক্ষুঃ সেবতে। (ক)

শকু। ভোদু, পইদিত্থদংসণাহ্মি সংবুত্তা। লজ্জেমি উণ অণুবআরিণী পিঅআরিণো অজ্জউত্তস্স। (খ)

(ক্ষ) পরিত্রাণমন্থর ইব আর্য্যপুত্রঃ।

(খ) ভবতু, প্রকৃতিস্থদর্শনাস্মি সংবৃত্তা। লজ্জে পুনরনুপকারিণী প্রিয়কারিণ আর্য্যপুত্রস্য।

(ক্ষ) শকু ইতি। পরিত্রাণে মদীয়নয়নাভ্যন্তরপ্রবিষ্টকর্ণোৎপলরেণূনাং সম্যগপসারণে, মন্থরো মন্দঃ অসমর্থ ইত্যর্থঃ, ফুৎকারদানে বিলম্বকরণাদিতি ভাবঃ। চাতুর্য্যাদ্বিবৃতাত্মগতালোচনায়াং কিঞ্চিদ্বিলম্বকরণাৎ শকুন্তলায়া উক্তিরিয়মিতি বোধ্যম্।

(ক) রাজেতি। কর্ণোৎপলয়োঃ সন্নিকর্ষাৎ তব ঈক্ষণয়োরেব সান্নিধ্যাৎ ঈক্ষণে তব নয়ননিরূপণে মূঢ়ঃ অসমর্থঃ। তথা চ কিম্ ঈক্ষণম্, কিং বা কর্ণোৎপলমিতি নিরূপণে প্রথমমশক্ততয়া কিঞ্চিদ্বিলম্বো জাত ইতি ভাবঃ। এতেন ঈক্ষণয়োরুৎপল-সৌসাদৃশ্যং ব্যজ্যতে। মুখমারুতেন ফুৎকারেণ। সেবতে পরিষ্করোতি।

(খ) শকু ইতি। প্রকৃতিস্থং তব ফুৎকারেণ কর্ণোৎপলরেণূনামপগমাৎ স্বভাবস্থং দর্শনং দৃষ্টির্যস্যাঃ সা। অনুপকারিণী অকিঞ্চিৎকরণাৎ, উপকারিণঃ চক্ষুঃপরিষ্করণাদিত্যাশয়ঃ। আর্য্যপুত্রস্য ভবতঃ সম্বন্ধে।

পূর্ব্বে কেহই দন্তক্ষত করে নাই বলিয়া কোমল, প্রিয়তমার এই ওষ্ঠখানি, মনোহর স্পন্দনদ্বারা, পানাভিলাষী আমাকে যেন পান করিবার অনুমতি দিতেছে ॥৩৫॥

(ক্ষ) শকুন্তলা। আর্য্যপুত্র যেন বুঝিতে অসমর্থ হইতেছেন।

(ক) রাজা। কর্ণোৎপল নিকটে থাকায় চোখ চিনিতে পারিতেছি না। (এই বলিয়া মুখবায়ুদ্বারা শকুন্তলার চোখ পরিষ্কার করিয়া দিলেন।)

রাজা। সুন্দরি! কিমন্যৎ। (গ)

ইদমপ্যুপকৃতিপক্ষে সুরভি মুখং তে যদাঘ্রাতম্।
ননু কমলস্য মধুকরঃ সন্তুষ্যতি গন্ধমাত্রেণ ॥৩৬॥

শকু। সস্মিতম্। অসন্তোসে উণ কিং করেদি?। (ঘ)

(ঘ) অসন্তোষে পুনঃ কিং করোতি?।

(গ) রাজেতি। কিমন্যৎ উপকরিষ্যসীতি শেষঃ।

ননু কিং ময়া উপকৃতং যদন্যদুপকর্ত্তব্যং নাস্তীত্যাহ ইদমিতি। যৎ, তে তব, সুরভি মুখং সুগন্ধি বদনম্, আঘ্রাতং নয়নে ফুৎকারদানকালে কৃতগন্ধগ্রহণম্, ইদমাঘ্রাণমপি উপকৃতিপক্ষে ত্বৎকর্ত্তব্যোপকারকল্পে, ময়া স্বীকৃতমিত্যর্থঃ। নন্বিত্যবধারণে। তথাহি মধুকরো ভ্রমরঃ, কমলস্য পদ্মস্য, গন্ধমাত্রেণ কেবলেন গন্ধগ্রহণেনৈব সন্তুষ্যতি। মাত্রশব্দেন মধুপানব্যবচ্ছেদঃ। তথা চ যথা ভ্রমরঃ পদ্মস্য মধুপানং বিনা কেবলগন্ধগ্রহণেনৈব সন্তুষ্যতি তথা অহমপি তব মুখস্য চুম্বনং বিনা কেবলগন্ধগ্রহণেনৈব সন্তুষ্টোঽস্মি; স চ গন্ধস্ত্বয়া নির্বাধমেব দত্ত ইত্যুপকার এব মে কৃতঃ। অতএব চ তে নাস্তি লজ্জাকারণমিতি ভাবঃ।

অতএবাত্র দৃষ্টান্তোঽলঙ্কারঃ। উপগীতির্নাম জাতিঃ। যথা শ্রুতবোধে—

"আর্য্যোত্তরার্দ্ধতুল্যং প্রথমার্দ্ধমপি প্রযুক্তং চেৎ।
কামিনি! তামুপগীতিং প্রকাশয়ন্তে মহাকবয়ঃ॥" ॥৩৬॥

(খ) শকুন্তলা। হউক, আমার দৃষ্টি স্বাভাবিক হইয়াছে। কিন্তু আর্য্যপুত্র এই প্রিয় কার্য্য করিলেন, আর আমি কোন উপকার করিলাম না বলিয়া লজ্জিত হইতেছি।

(গ) রাজা। সুন্দরি! আর কি উপকার করিবে।

ইহাই আমি উপকারের পক্ষে স্বীকার করিয়াছি যে, তোমার সুবাসিত মুখখানির আঘ্রাণ করিয়াছি। দেখ—ভ্রমর, পদ্মের গন্ধমাত্রেই সন্তুষ্ট হইয়া থাকে ॥৩৬॥

राजा । इदम् । इति व्यवसितः । (ङ)

शकु । वक्त्रं ढौकते । (च)

नेपथ्ये । चक्कवाअवहु ! आमन्तेहि सहचरं, णं उवत्थिदा रअणी । (छ)

(घ) शकु इति । स्वयं कौतुकोक्तिः कर्त्तव्यत्वात् स्मितम् । पुनः किन्तु, असन्तोषे गन्धमात्रेण सन्तोषाभावे, किं करोति स मधुकर इति शेषः । एतेन मन्मुखाघ्राणमात्रेण भवतोऽपि सन्तोषाभावे भवतापि किं कर्त्तव्यमिति व्यज्यते ।

(ङ) राजेति । इदं मया क्रियमाणमेतत् चुम्बनम्, मधुकरः कमलस्य मधुपानाय करोतीति शेषः । इति उक्त्वा, व्यवसितः चुम्बितुमुद्यतः, न तु वस्तुत एव चुम्बितवान्, "शयनाधरपानादि" इत्यादिना दर्पणकारादिभिस्तन्निषेधात् "कथमप्युन्नमितं न चुम्बितं तु" इति वक्ष्यमाणाच्चेति बोध्यम् ।

एतेन शकुन्तलया पूर्वं ध्वनितस्याप्यर्थस्य क्रियाद्वारैव राज्ञा उत्तरं दत्तमिति महाकविशिरोमणिना परमचमत्कारितयैवेदं निबद्धमिति समालोचनीयम् ।

(च) शकु इति । वक्त्रं ढौकते राजकर्त्तव्यचुम्बननिवारणाय हस्ताङ्गुलिभिः मुखमावृणोति । "अत्यन्ताभिमतेऽपि वस्तुनि विधिर्योषा निषेधात्मकः" इति न्यायात् अभिमतमपि चुम्बनं मुखावरणेन निषिद्धमित्यवधेयम् ।

यद्यपि "टीकृ ढौकृ शब्दे" इति ढौकधातुः शब्दार्थे पठितः, तथापि "मुहुरङ्गुलिसंवृताधरोष्ठम्" इति वक्ष्यमाणात् धातूनामनेकार्थत्वादत्र आवरणार्थे मन्तव्यः । अतएव सकर्म्मकत्वमपि ।

(ঘ) শকুন্তলা। (ঈষৎ হাস্যের সহিত) ইহাতে সন্তোষ না হইলে কি করে ?।

(ঙ) রাজা। ইহা করে। (এই বলিয়া চুম্বন করিতে প্রবৃত্ত হইলেন। )

(চ) শকুন্তলা। (অঙ্গুলীদ্বারা মুখ আবৃত করিল। )

শকু। কথং দত্ত্বা অবসরম্মম্। অজ্জউত্ত! এসা খু

(ছ) চক্রবাকবধু! আমন্ত্রয়স্ব সহচরম্, ননু উপস্থিতা রজনী।

(ছ) অন্তরালগতা অনসূয়া প্রিয়ংবদা চ দূরাদাগচ্ছন্তীং গৌতমীমবলোক্য দুষ্মন্তমপসারয়িতুং শকুন্তলাং সঙ্কেতয়তি নেপথ্য ইতি। হং চক্রবাকবধু! চক্রবাকভার্য্যে চক্রবাকি! অন্যত্র দুষ্মন্তবধু! শকুন্তলে! সহচরং সহচরত্বেনৈকত্রাবস্থায়িনং চক্রবাকং দুষ্মন্তঞ্চ, সহচরত্বেনাত্যন্তসান্নিহিততয়া সহসা গৌতম্যুপস্থিতৌ গোপয়িতুমশক্যমিতি দুষ্মন্তপক্ষে সহচরপদপ্রয়োগস্যাশয়:, আমন্ত্রয়স্ব সাদরমামন্ত্র্য বিসৃজ, প্রিয়জনস্য প্রস্থানকালে সাদরামন্ত্রণৌচিত্যাদিত্যভিপ্রায়:। ননু কথমামন্ত্র্য বিসৃজামীত্যাহ নন্বিত্যাদি। ননু যস্মাৎ, রজনী চক্রবাকদম্পত্যোর্বিয়োজিকা রাত্রি:, অন্যত্র যুবয়ো: সাহচর্য্যদর্শনে অনর্থঘটিকা গৌতমী, উপস্থিতা। আত্মনোর্বিয়োজিকায়া রাত্রেরুপস্থিতৌ চক্রবাক্যা চক্রবাকস্য প্রস্থানকালীনামন্ত্রণমুচিতমেবেতি একত্রাশয়:; অন্যত্র তু গৌতমী আগত্য যদি সহচরভাবেনৈব দুষ্মন্তং পশ্যেৎ, তদা মহান্তমনর্থং ঘটয়েৎ, অত: প্রাগেবামন্ত্র্য দুষ্মন্তস্য বিসর্জনং শকুন্তলায়া উচিতমিত্যাশয়:।

“পরিণামে দিবসো” “সায়ন্তনে সবনকর্ম্মণি” ইত্যনয়োর্বর্ণ্যমানতয়া তদানীং রজনী আগতপ্রায়েতি সূচয়ন্ত্যা উপস্থিতা রজনীতি।

অত্র দ্ব্যর্থবচনবিন্যাসাৎ উভয়পক্ষেঽপি সুসম্বদ্ধত্বাৎ কাব্যে যোজনযোগ্যত্বাৎ দুষ্মন্তস্যাপসারণাত্মকপ্রধানার্থান্তরসূচনাচ্চ ইদং সাহিত্যদর্পণপরিগণিতং চতুর্থং পতাকাস্থানম্। যথা তত্রৈব—

> “যত্রার্থে চিন্তিতেঽন্যস্মিন্ তল্লিঙ্গোঽন্য: প্রযুজ্যতে।
> আগন্তুকেন ভাবেন পতাকাস্থানকন্তু তৎ ॥
> দ্ব্যর্থো বচনবিন্যাস: সুশ্লিষ্ট: কাব্যযোজিত:।
> প্রধানার্থান্তরাক্ষেপী পতাকাস্থানকং পরম্ ॥”

---

(ছ) নেপথ্যে। হে চক্রবাকবধূ! সাদর সম্ভাষণ করিয়া সহচরকে বিদায় দাও। যে হেতু, রাত্রি উপস্থিত হইয়াছে।

তাদকস্সস্স ধম্মকণীঅসী মম বুত্তন্তোপলম্ভণণিমিত্তং অজ্জা গোদমী আঅচ্ছদি ; তা বিড়বান্তরিদো হোহি (১)। (জ)

রাজা। তথা। ইত্যেকান্তে স্থিতঃ (২)। (ঝ)

ততঃ প্রবিশতি পাত্রহস্তা গৌতমী (৩)। (ঞ)

(জ) আর্য্যপুত্র ! এষা খলু তাতকণ্বস্য ধর্ম্মকনীয়সী মম বৃত্তান্তোপলম্ভন-নিমিত্তম্ আর্য্যা গৌতমী আগচ্ছতি ; তদ্বিটপান্তরিতো ভব।

(জ) শকু ইতি। কর্ণং দত্ত্বা 'চক্রবাকবধু' ইত্যাদি বাক্যং প্রতি কর্ণং সম্প্রেষ্য, সসম্ভ্রমং সত্বরম্। ধর্ম্মকনীয়সী ধর্ম্মতঃ কনিষ্ঠা ভগিনী ন তু বস্তুত এব কনিষ্ঠা ভগিনীত্যাশয়ঃ, গোতমস্যাপত্যং স্ত্রী গৌতমী, মম বৃত্তান্তস্য উপলম্ভননিমিত্তম্ উপলব্ধ্যর্থম্। তত্ তস্মাত্, বিটপৈঃ তরুলতাশাখাভিঃ অন্তরিত আবৃতদেহঃ। অন্যথা সা আগত্য ভবন্তং যদি পশ্যেত্ তদা মহান্তমনর্থং ঘটয়েদিতি ভাবঃ।

অত্র বিদ্রবো নাম গর্ভসন্ধ্যঙ্গম্। তথা চ দর্পণে—

"শঙ্কাভয়ত্রাসকৃতঃ সম্ভ্রমো বিদ্রবো মতঃ।"

(জ) শকুন্তলা। ( কাণ দিয়া ব্যস্ততার সহিত ) আর্য্যপুত্র ! এই পিতা কণ্বের ধর্ম্মতঃ কনিষ্ঠা ভগিনী আর্য্যা গৌতমী আসিতেছেন ; অতএব আপনি তরুশাখায় আবৃত হউন।

(১) শকুন্তলা। সসম্ভ্রমম্। পৌরব ! অবং অবং মম সরীরবুত্তন্তোব-লম্ভস্স অজ্জা গোতমী ইধো এব্ব আঅচ্ছই। দাব বিড়পান্তরিদো হোসু।

(২) রাজা। তথা। আত্মানমাবৃত্য তিষ্ঠতি।

(৩) গৌতমী সখ্যৌ চ। সখ্যৌ। ইদো ইদো অজ্জা গোদমী। গৌতমী। শকুন্তলামুপেত্য। জাদে ! অবি লহুসন্তাপাইং অঙ্গাইং ?। শকুন্তলা। অত্থি মে বিসেসো। গৌতমী। ইমিণা দব্ভোদএণ ণিরাবাহং এব্ব দে সরীরং হোহিই। শিরসি শকুন্তলামভ্যুক্ষ্য। বচ্ছে ! পরিণদো দিবসো, এহু উড়অং এব্ব গচ্ছামো। প্রস্থিতাঃ।

গৌতমী। জাদে! অচ্চাহিদং সুণিঅ আঅদা; এদং শান্তিউদঅং। ইত্যা সমুত্থাপ্য চ। তুধ দেবদাসহাইণী চিট্ঠসি ?। (ট)

শকু। দাণিং জ্জেব অণসূআপিঅংবদাও মালিণীং ওদৈণ্ণাও। (ঠ)

(ট) জাতে! অত্যাহিতং শ্রুত্বা আগতা; এতৎ শান্ত্যুদকম্। ইহ দেবতাসহায়িনী তিষ্ঠসি।

(ঠ) ইদানীমেব অনসূয়াপ্রিয়ংবদে মালিনীমবতীর্ণে।

(ঝ) রাজেতি। তথা তদৈব করোমীত্যর্থঃ। একান্তে রহসি।

(ঞ) ততইতি। পাত্রং জলভাজনং হস্তে যস্যাঃ সা।

(ট) গৌতমীতি। জায়ত ইতি জাতা আত্মজাতুল্যা তৎসম্বোধনম্। অত্যাহিতং তব শরীরসন্তাপজনিতং মহাভয়ম্। আগতা অহমিতি শেষঃ। শান্ত্যুদকম্ অভিমন্ত্রিতং সন্তাপশান্তিকরং জলম্, ময়া ত্বদর্থমানীতমিতি শেষঃ। ইত্যা অত্র কশ্চিৎ শকুন্তলায়াঃ সহায়ো বর্ত্ততে ন বেতি পরীক্ষার্থং সর্বতো বিলোক্য, সমুত্থাপ্য উপবিষ্টাং শকুন্তলাম্ উটজং নেতুং দণ্ডায়মানীকৃত্য। দেবতাসহায়িনী সহচরী যস্যাঃ সা একাকিনীত্যর্থঃ। কাকুস্বরেণ প্রশ্নো ব্যজ্যতে।

"অত্যাহিতং মহাভীতিঃ কর্ম্ম জীবানপেক্ষি চ" ইত্যমরঃ।

(ঝ) রাজা। তাহাই। ( এই বলিয়া গুপ্তস্থানে থাকিলেন। )

(ঞ) তদনন্তর পাত্রহস্তে গৌতমীর প্রবেশ।

(ট) গৌতমী। বৎসে! মহাভয়ের কারণ শুনিয়া আসিয়াছি। এই শান্তির জল। ( দেখিয়া, শকুন্তলাকে উঠাইয়া ) এখানে কেবল দেবতাসহায়ে রহিয়াছিস্।

(ঠ) শকুন্তলা। অনসূয়া আর প্রিয়ংবদা এখনই মালিনীনদীতে গিয়াছে।

গৌতমী। শান্ত্যুদকেন শকুন্তলামভ্যুক্ষ্য। জাদে! ণিরাবাধা মে চিরং জীব। অবি লহুসন্দাবাইং অঙ্গাইং ?। ইতি স্পৃশতি। (ড)

শকু। অজ্জা! অত্থি বিসেসো। (ঢ)

গৌতমী। পরিণাদো দিঅসো; তা এহি উড়অং জ্জেব গচ্ছম্হ। (ণ)

(ড) জাতে! নিরাবাধা মে চিরং জীব। অপি লঘুসন্তাপানি অঙ্গানি ?।

(ঢ) আর্য্যে! অস্তি বিশেষঃ।

(ঠ) শকু ইতি। মালিনীং নদীম্, অবতীর্য্য জলমানেতুং গতে।

(ড) গৌতমীতি। নিরাবাধা এতচ্ছান্ত্যুদকাভ্যুক্ষণাদেব নিষ্পীড়া সতী। মে মৎসম্বন্ধিনী ত্বম্। অপিশব্দঃ প্রশ্নে। লঘুঃ শান্ত্যুদকাভ্যুক্ষণাৎ অল্পীভূতঃ সন্তাপো যেষু তানি তথাবিধানি, জাতানি কিমিতি তাৎপর্য্যম্। ইতি উক্ত্বা স্পৃশতি শকুন্তলায়া অঙ্গানীতি শেষঃ।

অত্র সাম্না জলদানাৎ সগ্রহো নাম গর্ভসন্ধ্যঙ্গম্—"সগ্রহঃ পুনঃ। সামদানার্থ-সম্পন্নঃ" ইতি দর্পণলক্ষণাৎ।

(ঢ) শকু ইতি। বিশেষঃ পূর্ব্বসন্তাপস্য কিঞ্চিদ্বৈষম্যম্ উপশম ইতি যাবৎ, অস্তি ভূতঃ। উৎপত্ত্যাখ্যসত্তার অস্ত্যর্থঃ, অতীতসামীপ্যে চ বর্ত্তমানা।

(ণ) গৌতমীতি। পরিণতঃ অবসিতঃ। উটজমেব পর্ণশালামেব। একাকিন্যা রাত্রাববস্থানস্য অসঙ্গতত্বাদিতি ভাবঃ।

"পর্ণশালোটজোঽস্ত্রিয়াম্" ইত্যমরঃ।

---

(ড) গৌতমী। (শান্তির জলদ্বারা শকুন্তলাকে সিক্ত করিয়া) বৎসে! তুই আমার পীড়াবিহীন হইয়া চিরকাল জীবিত থাক্। তোর শরীরের তাপ কমিয়াছে ত? (এই বলিয়া শকুন্তলার গাত্র স্পর্শ করিলেন।)

(ঢ) শকুন্তলা। কিছু উপশম হইয়াছে।

शकु । कथञ्चिदुत्थाय स्वगतम् । हिअअ ! पढमं सुहोवणदे मणोरहे कालहरणं करेसि ; सम्पदं अणुभव दाव दुक्खं । पदान्तरे प्रतिनिवृत्य प्रकाशम् । लदाघर ! सन्दावहर ! आमन्तेमि तुमं पुणो वि परिभोअत्थं । इति निष्क्रान्ते (१) । (त)

(ण) परिणतो दिवसः ; तदेहि उटजमेव गच्छावः ।

(त) हृदय ! प्रथमं सुखोपनते मनोरथे कालहरणं करोषि, साम्प्रतमनुभव तावत् दुःखम् । लतागृह ! सन्तापहर ! आमन्त्रयामि त्वां पुनरपि परिभोगार्थम् ।

(त) शकु इति । कथञ्चित् अनिच्छावशात् कष्टेनेत्यर्थः । मनोरथे मनोरथविषये प्रियतमे दुष्मन्ते, सुखोपनते दूतीप्रेषणाद्यनुष्ठानाभावात् अनायासेनैवोपस्थिते सति कालहरणं नानाच्छलेन सम्भोगे कालविलम्बम् । साम्प्रतं गौतम्यागमात् सम्भोगासम्भवसमये, दुःखं मदनपीडाजनितकष्टम् । पदान्तरे पदक्षेपान्तरे कतिपयं पदक्षेपं कृत्वा अपरस्मिन् पदक्षेपे कर्त्तव्ये इत्यर्थः, तावत्पर्य्यन्तकरणानन्तरमेव, आमन्त्रणाभावे राजा यदि पुनर्नागच्छेदिति विभाव्येत्याशयः ।

हे लतागृह ! निकुञ्ज ! पक्षे तदभ्यन्तरगत प्रियतम दुष्मन्त ! हे सन्तापहर ! तापनाशक ! एकत्र छायादानात् अपरत्र सम्भोगाशाजननादिति भावः, पुनरपि परिभोगार्थं तवाभ्यन्तरे अवस्थानेन तवैव सम्भोगार्थं पक्षे सुरतसुखभोगार्थञ्च, त्वां लतागृहं दुष्मन्तञ्च, आमन्त्रये सम्भाषे, आह्वये च । एकत्र आश्रयदातुः सम्भाषणमवश्यमेवोचितमिति, अन्यत्र पुनः सम्भोगाय यथा दूतीप्रेषणादि न कर्त्तव्यं स्यात्, एतदाह्वानेन तथा करणीयमित्यभिप्रायः ।

(ণ) গৌতমী। দিন শেষ হইয়া আসিয়াছে ; অতএব আয়, পর্ণশালাতেই যাই ।

(१) शकुन्तला । आत्मगतम् । हिअअ ! पढमं एव्व सुहोवणए मणोरहे कादरभावं ण मुञ्चसि । साणुसअविहडिअस्स कहं दे संपदं सन्दावो । पदान्तरे स्थित्वा प्रकाशम् । लदावलअ ! सन्दावहारअ ! आमन्तेमि तुमं भूओवि परिभोअस्स । दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः ।

राजा। पूर्वस्थानमुपेत्य सनिश्वासम्। अहो! विघ्नवत्यः प्रार्थितार्थ-सिद्धयः। मया हि—(थ)

मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम्।
मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं, न चुम्बितं तु (१) ॥२६॥

अत सहसैव दुष्मन्तस्य गुणवदर्थसम्पत्तेः परमप्रीतिकरत्वाच्च इदं साहित्यदर्पण-परिगणितं प्रथमं पताकास्थानम्। तथा च दर्पणे—

"सहसैवार्थसम्पत्तिः गुणवत्युपचारतः।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम्॥"

इदमस्यध्वनिनिर्म्माणं रमणीनामिव प्राधिकं परमचमत्कारि च। अतएवोक्तं नैषधे—"विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः।"

निष्क्रान्तं गौतमीप्रमुखं कले इति शेषः।

(थ) राजेति। पूर्वस्थानं शिलातलम्। प्रार्थितानाम् अर्थानां विषयाणां सिद्धय, विघ्नवत्यः प्रायेणैव सविघ्नाः। अहो इति विषादे। हि तथाहि।

मुहुरिति। मुहुरिति सर्वत्र सम्बध्यते मुहुर्वारं वारम्, अङ्गुलिभिः संवृतः

(ত) শকুন্তলা। (কষ্টে গাত্রোত্থান করিয়া স্বগত) হে হৃদয়! অভীষ্ট জন অনায়াসে উপস্থিত হইলে প্রথমে কালক্ষেপ করিয়াছ; এখন দুঃখ অনুভব কর। (কতিপয় পদক্ষেপের পর ফিরিয়া প্রকাশ্যে) হে সন্তাপনাশক! লতাগৃহ! আবারও সম্ভোগের জন্য তোমাকে আহ্বান করি। (এই বলিয়া উভয়ে চলিয়া গেল।)

(থ) রাজা। (পূর্ব্বস্থানে আসিয়া নিশ্বাস ত্যাগ করিয়া) হায়! প্রার্থিত বিষয়ের সিদ্ধি, বিঘ্নসঙ্কুলই হইয়া থাকে। কারণ—

(१) न चुम्बितं तत्।

ক্ক নু খলু সম্প্রতি গচ্ছামি। অথবা, ইহৈব প্রিয়াপরি-
ভুক্তে লতামণ্ডপে মুহূর্ত্তং তিষ্ঠামি। সর্ব্বতোঽবলোক্য (১) (দ)

তস্যাঃ পুষ্পময়ী শরীরলুলিতা শয্যা শিলায়ামিয়ং
কান্তো মন্মথলেখ এষ নলিনীপত্রে নখৈরর্পিতঃ।

চুম্বননিবারণায় আবৃতঃ অধরোষ্ঠঃ চুম্বনস্থানত্বাৎ নিম্নোষ্ঠো যস্য তৎ, প্রতিষেধাক্ষরৈশ্চুম্বননিষেধকোচ্চারিতবর্ণৈঃ বিক্লবং বিহ্বলং তথাপি অভিরামং মনোহরম্, তথা অংসে স্কন্ধোপরি বিবর্ত্ততে চুম্বননিবারণায়ৈব পরাবর্ত্তত ইতি অংসবিবর্ত্তি, পক্ষ্মাক্ষি লোমান্বিতয়োঃ সন্তীতি পক্ষ্মলে সুন্দরত্বাৎ প্রশস্তলোমযুক্তে অক্ষিণী চক্ষুষী যস্যাস্তস্যাঃ শকুন্তলায়াঃ, মুখং বদনম্, কথমপি কষ্টেন উন্নমিতং নয়নপরিষ্কারকরণব্যাজেন উত্তোলিতম্, তু কিন্তু, ন চুম্বিতম্। হন্ত! মহানেব মমায়ং প্রমাদোঽভূদিতি ভাবঃ।

অত্র "ওষ্ঠাধরৌ তু রদনচ্ছদৌ দশনবাসসী" ইত্যমরোক্তেঃ "ত্বমতোঽধরবিম্ব ইত্যদঃ পদমস্যা রদনচ্ছদৌ বদন্" ইতি নৈষধোক্তেশ্চ অধরোষ্ঠপদয়োঃ পর্য্যায়তয়া আপাততস্তদর্থস্য পুনরুক্ততাপ্রতীতেঃ কিঞ্চ অধরপদস্য নিম্নার্থকতয়া তৎসমাধানাৎ ভিন্নাকারশব্দগতত্বাচ্চ পুনরুক্তবদাভাসোঽলঙ্কারঃ। তথা পশ্চাত্তাপো নাম নাট্যালঙ্কারশ্চ—"মোহাবধীরিতার্থস্য পশ্চাত্তাপঃ স এব তু" ইতি দর্পণলক্ষণাৎ। উপবৃত্তং নাম বৃত্তম্॥২৬॥

(দ) ক্কেতি। প্রিয়য়া শকুন্তলায় পরিভুক্তে ব্যবহৃতে।

শকুন্তলা অঙ্গুলীদ্বারা বার বার নীচের ওষ্ঠখানি আবৃত করিয়াছিল, নিষেধবাক্য উচ্চারণ করিবার সময়ে মুখমণ্ডল বার বার বিহ্বল অথচ মনোহর হইয়াছিল এবং তাহা বার বার কাঁধের উপরে ফিরিয়া গিয়াছিল, সুনয়না শকুন্তলার এহেন মুখমণ্ডল আমি কোন ক্রমে উত্তোলন করিয়াছিলাম, কিন্তু চুম্বন করি নাই।২৬॥

(দ) এখন কোথায় যাই; অথবা এই প্রিয়াভুক্ত লতামণ্ডপেই কিছু কাল থাকি। (সকল দিকে দৃষ্টিপাত করিয়া)

(১) প্রিয়াপরিভুক্তমুক্তে লতাবলয়ে মুহূর্ত্তং স্থাস্যামি।

हस्ताद्भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहादीशोऽस्मि शून्यादपि (१) ॥३७॥

विचिन्त्य । अहो धिगसम्यक् चेष्टितं प्रियां समासाद्य काल-हरणं कुर्वता मया । तदिदानीम्—(ध)

ननु कथमत्र तिष्ठसीत्याह तस्या इति । तस्याः शकुन्तलायाः, शरीरलुलिता म्लापाम्बुजः पार्श्वपरिवर्त्तनेन देहविमर्द्दिता, इयं दृश्यमाना, शिलायां प्रस्तरखण्डोपरि, पुष्पमयी शय्या, नलिनीपत्रे पद्मलतापत्रे, नखैः अर्पितो दत्तः लिखित इत्यर्थः, कान्तो मनोहरः, एष मन्मथलेखः "तुज्झ ण आणे हिअअं" इत्यादिरूपा मदनसम्बन्धिनी लिपिः एष मन्मथलेखस्तु अक्षरपरिचयाभावादनवधानत्वाद्वा गौतम्या न परिलक्षित इत्यवधेयम । हस्तात् भ्रष्टं पतितम्, इदं बिसाभरणं मृणालवलयम्, सर्वत्र तिष्ठतीति शेषः । इति एतेषु पदार्थेषु, आसज्यमाने प्रियाया वस्तुत्वादेव स्वयमेव सम्बध्यमाने ईक्षणे चक्षुषी यस्य स तथोक्तः अहम्, शून्यात् प्रियारहितादपि, वेतसगृहात्, सहसा निर्गन्तुं न ईशः न समर्थोऽस्मि, एतैः पदार्थैरेवाकर्षणात्, विलम्बे तु उपायाभावात् निर्गन्तुं शक्ष्यामीत्यवेति भावः ।

अत्र निर्गमनाभावं प्रति आसज्यमानेक्षणपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्य-लिङ्गम्, शून्यत्वरूपे कारणे सत्यपि तत्कार्य्यभूतनिर्गमनानुत्पत्तेर्विशेषोक्तिः, अशून्यात् का कथा शून्यादपि इत्यर्थस्यापतनादर्थापत्तिश्च इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः । शार्दूलविक्रीडितं वृत्तम् ॥३७॥

(ध) विचिन्त्येति । वितर्क्येति तात्पर्य्यम । अहो धिक् इति विषादे ।

প্রস্তরখণ্ডের উপরে, শকুন্তলার দেহমর্দ্দিত এই পুষ্পশয্যা রহিয়াছে ; নখদ্বারা পদ্মপত্রে লিখিত মনোহর এই কামলিপি দেখা যাইতেছে এবং শকুন্তলার হস্ত হইতে নিপতিত এই মৃণালবলয় রহিয়াছে ; এই সকল বস্তুতে আমার দৃষ্টি সংসক্ত হওয়ায় আমি এই শূন্য বেতসগৃহ হইতেও হঠাৎ নির্গত হইতে পারিতেছি না ॥৩৭॥

(१) अवसज्जमानेक्षणो···शक्नोमि शून्यादपि ।

रह: प्रत्यासत्तिं यदि सुवदना यास्यति पुन-
र्न कालं हास्यामि, प्रकृतिदुरवापा हि विषया: ।
इति क्लिष्टं विघ्नैर्गणयति च मे मूढ़हृदयं
प्रियाया: प्रत्यक्षं किमपि च तथा कातरमिव (१) ॥३८॥

प्रियां शकुन्तलाम्, समासाद्य प्राप्य, कालहरणं रमणे कालविलम्बम्, कुर्वता मया, असम्यक् चेष्टितम् असङ्गतं कृतम्। विलम्बकरणमेव असङ्गतं कृतम्, सहसैव रमणमुचितमासीदिति भाव:।

अत्र वितर्कबोधकवाक्योपन्यासात् रूपं नाम गर्भसन्धेरङ्गम्—"रूपं वाक्यं वितर्कवत्" इति दर्पणलक्षणात्।

रह इति। सुवदना सुन्दरमुखी शकुन्तला, यदि पुनरपि, रह: निर्जनस्थाने, प्रत्यासत्तिं मम सन्निधानम्, यास्यति प्राप्स्यति, तदा कालं न हास्यामि तादृशरमणावसरं न परित्यक्ष्यामि। हि यस्मात्, विषया भोग्यपदार्था:, प्रकृत्या स्वभावेनैव दुरवापा दुर्लभा:। अतएव प्राप्तिमात्रमेव भोग उचित इत्याशय:। विघ्नै: गौतमीसन्दर्शनाद्यन्तरायै:, क्लिष्टं निश्चितसुखालाभात् दु:खितम्, मे मम मूढ़हृदयं कर्त्तव्यावधारणाक्षमं चित्तं कर्त्तृ, इदानीं प्रियाया अप्राप्तिकाले, इति इत्थम्, गणयति विविनक्ति च; च अथ च, प्रियाया: शकुन्तलाया:, प्रत्यक्षं समक्षम्, तथा तादृक्, किमपि अनिर्वचनीयम्, कातरमिव कर्त्तव्यविह्वलमिव, आसीदिति शेष:; त्वरितरमणप्रवृत्त्यजननादित्यभिप्राय:।

अत्र प्रथमार्द्धे सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास:। यदीत्युक्त्वा तदेत्यनुक्तावपि तस्य स्वभावादेवावगतेर्न न्यूनपदत्वदोष:; "क्वचिन्न दोषो न गुण:" इति साहित्यदर्पणात्।

"विविक्तविजनाच्छन्ननि:शलाकास्तथा रह:। रहश्चोपांशु चालिङ्गे" इत्यमर:। अव्ययत्वादलिङ्गे इत्यर्थ:। शिखरिणी वृत्तम् ॥३८॥

(ধ) (চিন্তা করিয়া) হায়! আমি প্রিয়তমাকে পাইয়া পর কালক্ষেপ করিয়া উপযুক্ত কার্য্য করি নাই। অতএব এখন—

(१) क्वचित् श्लोकोऽयं नास्ति।

নেপথ্যে। ভো ভো রাজন্! (১) (ন)

সায়ন্তনে সবনকর্ম্মণি সম্প্রবৃত্তে
বেদিং হুতাশনবতীং পরিতঃ প্রকীর্ণাঃ।
ছায়াশ্চরন্তি বহুধা ভয়মাদধানাঃ
সন্ধ্যাভ্রকূটকপিশাঃ পিশিতাশনানাম্ (২) ॥৩৮॥

(ন) নেপথ্যে ইতি। তপস্বিনামুক্তিরিয়ম্।

সায়ন্তনে ইতি। সায়ন্তনে সন্ধ্যাকালীনে, সবনকর্ম্মণি যজ্ঞকার্য্যে, সম্প্রবৃত্তে কৃতারম্ভে সতি, হুতাশনবতীং প্রজ্বলিতবহ্নিম্, বেদিং যজ্ঞভূমিম্, পরিতঃ সমন্তাৎ বেদ্যাঃ সর্ব্বাসু দিক্ষু ইত্যর্থঃ প্রকীর্ণাঃ পিশিতাশনৈরেব বিক্ষিপ্তাঃ, বহুধা নানাপ্রকারেণ হুঙ্কার-করণকঙ্কালবর্ষণাদিনা, ভয়ম্, আদধানা জনয়ন্ত্যঃ, সন্ধ্যাভ্রকূটবৎ সন্ধ্যাকালীন-মেঘপুঞ্জবৎ কপিশাঃ কৃষ্ণপীতবর্ণাঃ, পিশিতাশনানাং রাক্ষসানাম্, ছায়াঃ, চরন্তি ইতস্ততো ভ্রমন্তি। অতএব তেষাং বিতাড়নায় সত্বরমাগম্যতামিতি ভাবঃ।

অত্র সন্ধ্যাভ্রকূটকপিশা ইতি সমাসগতা লুপ্তোপমা, তথা পিশ পিশ ইতি ব্যঞ্জনানা-মনেকধা সকৃৎ সাম্যাৎ ছেকানুপ্রাসঃ, পুনস্তালব্যশকারবর্ণোপাদানাৎ বৃত্ত্যনুপ্রাসশ্চ; ইত্যেতেষামেকাশ্রয়ানুপ্রবেশরূপঃ সঙ্করঃ।

"যাবজ্জীবমগ্নিহোত্রং জুহোতি, যদগ্নয়ে চ প্রজাপতয়ে চ সায়ংপ্রাতর্জুহোতি" ইতি শ্রুতেঃ সায়ন্তন ইতি হুতাশনবতীমিত্যনেন ছায়াদর্শনসম্ভব উক্ত ইতি ন অপুষ্টার্থত্বদোষঃ।

সুমুখী শকুন্তলা যদি পুনরায় নির্জ্জন স্থানে নিকটে উপস্থিত হয়, তবে আর কালক্ষেপ করিব না। কারণ, বিষয়সম্ভোগ স্বভাবতই দুর্লভ; বিঘ্নবশতঃ দুঃখিত আমার মূঢ় মন এখন এইরূপ বিবেচনা করিতেছে; অথ চ প্রিয়তমার সমক্ষে তখন যেন অনির্বচনীয় কাতর হইয়াছিল ॥৩৮॥

(ন) নেপথ্যে। মহারাজ! মহারাজ!

(১) আকাশে রাজন্!। (২) পরিতঃ প্রযস্তাঃ।···সন্ধ্যাপয়োদকপিশাঃ।

राजा। (आकर्ण्य सावष्टम्भम्।) भो भोस्तपस्विनः! मा भैष्ट मा भैष्ट, अयमहमागत एव (१)। (इति निष्क्रान्तः।) (प)

## तृतीयोऽङ्कः ॥०॥

"क्रतौ स्नाने च सवनम्" इति त्रिकाण्डशेषः। "अभ्रं मेघो वारिवाहः" इत्यमरः। "कूटोऽस्त्री निश्चले राशौ" इत्यादि मेदिनी।

सायं (काले) भवतीति सायन्तनं "सायं चिरम्" इत्यादिना तनट्। वेदिमिति परित इत्यस्य योगे "तसोभयाभिपरिसर्वैः" इत्यनेन द्वितीया। पिशितं मांसम् अश्नन्तीति पिशिताशना "नन्द्यादेर्युः" इति युप्रत्ययः। वसन्ततिलका वृत्तम् ॥२९॥

(प) राजेति। अवष्टम्भेन और्जित्येन सहेति सावष्टम्भम्। अवपूर्वस्य स्तम्भेः "अवादौर्जित्यनिकटाश्रयेषु" इति षत्वम्। मा भैष्ट राक्षसेभ्यो भयं मा कुरुत। सम्भ्रमे द्विरुक्तिः। "माङ्योगे अद्यतनी" इति माङ्योगे भीधातोरद्यतन्या मध्यमपुरुष-बहुवचनम्। अयमहमागत एव राक्षसताडनार्थेति शेषः। अतएव मा भैष्ट इति भावः।

अत्र त्रोटकं नाम गर्भसन्धेरङ्गम्—"त्रोटकं पुनः। संरब्धवाक्" इति दर्पणलक्षणात्।

इति महामहोपाध्याय भारताचार्य्य श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायाम्
अभिज्ञानशकुन्तलटीकायामभिज्ञानकौमुद्यां तृतीयाङ्कविवरणं
समाप्तम् ॥०॥

---

সন্ধ্যাকালীন যজ্ঞ আরম্ভ হইলে, অগ্নিযুক্ত যজ্ঞবেদির চতুর্দ্দিকে বিক্ষিপ্ত সন্ধ্যাকালের মেঘসমূহের ন্যায় পিঙ্গলবর্ণ ও ভয়জনক রাক্ষসগণের নানাপ্রকার ছায়া বিচরণ করিতেছে ॥২৯॥

(প) রাজা। (শুনিয়া তেজের সহিত) ওহে ওহে তপস্বিগণ! আপনারা ভীত হইবেন না, ভীত হইবেন না; এই আমি আসিয়াছিই। (এই বলিয়া চলিয়া গেলেন।)

## তৃতীয় অঙ্ক ॥০॥

(१) राजा। अयमहमागच्छामि।

# चतुर्थोऽङ्कः ।

—०:*:०—

ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ । (क)

अनसूया । हला पिअंवदे ! जइ वि गन्धव्वेण विवाहविहिणा णिव्वुत्तकल्लाणा पिअसही सउन्तला अणुरूवभत्तिभाइणी संवुत्ता, तहवि मे ण णिव्वुदं हिअअं (१) । (ख)

(ख) हला प्रियंवदे । यद्यपि गान्धर्वेण विवाहविधिना निर्वृत्तकल्याणा प्रियसखी शकुन्तला अनुरूपभर्त्तृभागिनी संवृत्ता, तथापि मे न निर्वृतं हृदयम् ।

---

(क) तत इति । कुसुमावचयम् उद्यानस्थतरुभ्यः पुष्पचयनम् । सख्यौ अनसूयाप्रियंवदे ।

(ख) अनेति । गान्धर्वेण 'त्वं मे भार्य्या, त्वं मे पतिः' इति नियमपूर्वकेण, "गान्धर्वः समयान्मिथः" इति याज्ञवल्क्यवचनात्, विवाहविधिना परिणयव्यापारेण, निर्वृत्तं निष्पन्नं कल्याणं मङ्गलम् अभिप्रेतार्थसिद्धिर्यस्याः सा । अनुरूपं भर्त्तारं भजत इति अनुरूपभर्त्तृभागिनी "युजभज" इत्यादिना घिणुन् । निर्वृतं सुस्थम् ।

एतदारभ्य षष्ठाङ्कसमाप्तिपर्य्यन्तो विमर्षसन्धिः । तथा चात्र शकुन्तलादुष्मन्तयोर्गान्धर्वविवाहनिष्पत्त्या अपायाभावात् निश्चितप्राप्तिरूपा नियताप्तिर्नाम चतुर्थी कार्य्यावस्था निबद्धा । यथा दर्पणे—

"अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ।"

तथा शकुन्तलादुष्मन्तयोः परस्परप्राप्तिरूपं यन्मुख्यफलं तदुपायभूतस्यानुरागस्य

---

(क) তদনন্তর পুষ্পচয়ন অভিনয় করতঃ সখীদ্বয়ের প্রবেশ।

---

(१) पिअंवदे ! जइवि गन्धव्वेण विहिणा णिव्वुत्तकल्लाणा सउन्तला अणुरूवभत्तुगामिणी संवुत्तेति णिव्वुदं मे हिअअं, तहवि एत्तिअं चिन्तणीअं ।

प्रियंवदा। कधं विअ ?। (ग)

अन। अज्ज सो राएसी इट्ठिपरिसमत्तीए इसिहिं विसज्जिदो अत्तणो णअरं पविसिअ अन्तेउरसमागमादो इमं जणं सुमरेदि ण वेत्ति (१)। (घ)

(ग) कथमिव ?।

(घ) अद्य स राजर्षिः इष्टिपरिसमाप्त्या ऋषिभिर्विसर्जितः आत्मनो नगरं प्रविश्य अन्तःपुरसमागमादिमं जनं स्मरति न वेति।

---

गान्धर्वविवाहनिष्पत्त्या गर्भसम्भवेच्छया अधिकोद्भेदः; स च दुर्वासःशापेन तन्निबन्धनविस्मरणेन च सान्तरायश्च। यथा तत्रैव—

"यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः।
शापाद्यः सान्तरायश्च स विमर्ष इति स्मृतः॥"

दर्पणकृतापीदमेवोदाहृतम्। अस्य चापवादादीनि वयोदशाङ्गानि यथास्थानं दर्शयिष्यामः।

(ग) प्रियमिति। निर्वृतिहेतौ सत्यपि कथमिव न निर्वृतमित्यर्थः।

(घ) अद्येति। स राजर्षिर्दुष्मन्तः, इष्टिपरिसमाप्त्या यज्ञसमापनेन हेतुना। विसर्जितः नगरगमनायानुमतः। अन्तःपुरसमागमात् अन्तःपुरस्थरमणीसम्भोगात्, इमं जनं शकुन्तलाम्, स्मरति न वा, इति हेतोः, मम हृदयं न निर्वृतमित्यन्वयः। नागरीसम्भोगसुखलाभे वनेचर्य्या विस्मरणस्यैव सम्भवादित्याशयः।

---

(ख) अनसूया। প্রিয়ংবদা! যদিও গান্ধর্ব্ববিবাহে প্রিয়সখী শকুন্তলার মঙ্গল হইয়াছে এবং সে অনুরূপ ভর্ত্তার হাতে পড়িয়াছে, তথাপি আমার মন সুস্থ হইতেছে না।

(গ) প্রিয়ংবদা। কেন ?।

---

(१) अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिदो अत्तणो णअरं पविसिअ अन्तेउरसमागमी इदोगअं वुत्तन्तं सुमरइ वा ण वत्ति।

प्रिय’ । एत्थ दाव वीसत्था होहि । णहि तादिसा आकिदि-विसेसा गुणविरहिणो होन्ति । एत्तिअं उण चिन्तणीअं, तादो तीत्थजात्तादो पड़िणिउत्तो इमं वुत्तन्तं सुणिअ ण आणे किं पड़िवज्जिस्सदित्ति (१) । (ङ)

(ङ) अत्र तावत् विस्रब्धा भव । नहि तादृशा आकृतिविशेषा गुणविरहिणो भवन्ति । एतावत् पुनश्चिन्तनीयम्, तातस्तीर्थयात्रातः प्रतिनिवृत्तः इमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति ।

(ङ) प्रियमिति । अत्र दुष्मन्तकर्त्तृकशकुन्तलाग्रहणे, विस्रब्धा निःसन्देहा । हि यस्मात्, तादृशा दुष्मन्तसदृशाः, आकृतिविशेषा उत्कृष्टाकारा जनाः, गुणं कृतकार्य्य-स्मरणादिकं धर्म्मं विरहयन्ति त्यजन्तीति तादृशा न भवन्ति । पुनः किन्तु, एतावत् एतत्, चिन्तनीयं संशयनीयम् । तातः कण्वः । इमं वृत्तान्तं दुष्मन्ताय शकुन्तलाया आत्मदानवार्त्ताम् । किं प्रतिपत्स्यते किं मनसि करिष्यति, हृष्टस्तुष्टो वा भविष्य-तीत्यर्थः ।

(घ) অনসূয়া। যজ্ঞ সমাপ্ত হওয়ায় মুনিরা সেই রাজর্ষিকে আজ বিদায় দিয়াছেন; এখন তিনি রাজধানীতে প্রবেশ করিয়া অন্তঃপুর-বাসিনী রমণীগণের সহিত মিলনের পর এই ব্যক্তিকে স্মরণ করেন কি না এই জন্য।

(ঙ) প্রিয়ংবদা। এবিষয়ে তুমি বিশ্বস্ত হও; কারণ, দুষ্মন্তের ন্যায় উৎকৃষ্ট আকৃতির লোক গুণহীন হয় না। তবে ইহা চিন্তা করি যে, পিতা কণ্ব তীর্থযাত্রা হইতে ফিরিয়া আসিয়া এই ঘটনা শুনিয়া, কি মনে করিবেন।

(१) प्रियंवदा । वीसद्धा होसु । ण तादिसा आकिदिविसेसा गुणविरोहिणो होन्ति । तदो दाणिं इमं वुत्तन्तं सुणिअ ण आणे किं पडिवज्जिस्सइ त्ति ।

अन। जधा मं पुच्छसि, तधा अभिमदं तादस्स (१)। (च)

प्रियं। कधं विअ?। (छ)

अन। अणुरूवस्स वरस्स हत्थे कण्णआ पडिवादणीअत्ति अअं दाव पढमो कप्पो। तं जइ देव्वं सम्पादेदि, णं कअत्थो गुरुअणो (२)। (ज)

(च) यथा मां पृच्छसि, तथा अभिमतं तातस्य।

(छ) कथमिव?।

(ज) अनुरूपस्य वरस्य हस्ते कन्यका प्रतिपादनीयेति, अयं तावत् प्रथमः कल्पः। तं यदि दैवं सम्पादयति, ननु कृतार्थो गुरुजनः।

(च) अनेति। यथा मां पृच्छसि 'इमं वृत्तान्तं श्रुत्वा तातः किं प्रतिपत्स्यते' इति जिज्ञाससे, तथा तादृक् वृत्तमेव दुष्मन्तसदृशजनाय आत्मदानमेवेत्यर्थः, तातस्य कण्वस्य अभिमतम्।

(ज) अनेति। प्रतिपादनीया दातव्या, इति प्रथमः कल्प उत्तमः पक्षः। दैवं कर्तृ, तं प्रथमं कल्पम्। ननु निश्चये। तदा गुरुजनस्तातादिः, कृतार्थः दैवेनैव सम्पादितत्वोद्देश्यः। अतस्तातस्य रोषसन्देहो न कर्तव्य इति भावः।

(চ) অনসূয়া। আমার নিকট যে রূপ জিজ্ঞাসা করিতেছ, পিতার সেইরূপই মত।

(ছ) প্রিয়ংবদা। কি রূপ?।

(জ) অনসূয়া। কন্যাকে অনুরূপ বরের হাতে দিতে হইবে ইহাই প্রথম কল্প; তাহা যদি বিধাতা সম্পাদন করিলেন, তবে ত গুরুজন চরিতার্থই হইলেন।

(१) अनसूया। जह अहं देक्खामि तह तस्स अणुमदं होउ।

(२) अनसूया। गुणअणस्स कण्णआ पडिवादणीअ त्ति अअं दाव पढमो संकप्पो। तं जइ देव्वं एव्व संपादेइ, णं अप्पआसेण कअत्थो गुरुअणो।

प्रियं । एवम्मेदं । पुष्पभाजनं विलोक्य । सहि ! अवचिदाइं क्खु बलिकम्मपज्जत्ताइं कुसुमाइं (१) । (झ)

अन । णं सउन्तलाए वि सोहग्गदेवदाओ अच्चिदव्वाओ, ता अवराइं वि अवचिणुह्म (२) । (ञ)

प्रियं । जुज्जदि । इति तदेव कर्म्माभिनयतः (३) । (ट)

(झ) एवमेतत् । सखि ! अवचितानि खलु बलिकर्म्मपर्य्याप्तानि कुसुमानि ।

(ञ) ननु शकुन्तलाया अपि सौभाग्यदेवता अर्च्चितव्याः तदपराण्यपि अवचिनुवः ।

(ट) युज्यते ।

(झ) प्रियमिति । एवमेतत् त्वया यदुक्तं तत् सत्यमेवेत्यर्थः । पुष्पभाजनं हस्तधृतं पुष्पपात्रम्, विलोक्य कियन्ति पुष्पाणि सञ्चितानीति दृष्ट्वा । बलिकर्म्मपर्य्याप्तानि पूजोपहारकार्य्योपयुक्तानि । अत एतदधिकपुष्पचयनप्रयोजनाभावात् इदानीमावयो-र्गमनमेवोचितमिति भावः ।

"कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सितम्" इत्यमरः ।

(ञ) अनेति । नन्विति सम्बोधने । सौभाग्यदेवता भर्त्तृप्रियत्वसम्पादिका देवता मङ्गलचण्डिकाप्रभृतयः । अपराण्यपि पुष्पाणि ।

(ঝ) প্রিয়ংবদা। তাহা সত্য বটে। (পুষ্পপাত্র দেখিয়া) সখি! পূজার উপযুক্ত ফুল তোলা হইয়াছে।

(ঞ) অনসূয়া। শকুন্তলার সৌভাগ্যদেবতারও ত পূজা করিতে হইবে; তা আরও ফুল তুলি।

(ট) প্রিয়ংবদা। সঙ্গত বটে। (এই বলিয়া উভয়ে পুষ্পচয়নই অভিনয় করিতে লাগিল।)

(१) प्रियंवदा । पुष्पभाजनं विलोक्य । सहि ! अवचिचाइं बलिकम्मपज्ज-त्ताइं कुसुमाइं । (२) णं पिअसहीए सउन्तलाए सोहग्गदेवदा अच्चणीआ ।

(३) जुज्जइ । तदेव कर्म्मारभेते ।

नेपथ्ये। अयमहं भोः!। (ठ)

अन। कर्णं दत्त्वा। सहि! अदिधिणा विअ णिवेदिदं (१)। (ड)

प्रियं। णं उडए सण्णिहिदा सउन्तला (२)। (ढ)

अन। आं, अज्ज उण असण्णिहिदा हिअएण। तेण हि भोदु, एत्तिकेहिं कुसुमेहिं पओअणं (३)। इति प्रस्थिते। (ण)

(ड) सखि! अतिथिना इव निवेदितम्।

(ढ) ननु उटजे सन्निहिता शकुन्तला।

(ण) आं, अद्य पुनरसन्निहिता हृदयेन। तेन हि भवतु, एतावद्भिः कुसुमैः प्रयोजनम्।

---

(ट) प्रियमिति। युज्यते त्वदुक्तिरिति शेषः। तदैव पुष्पचयननैव।

(ठ) नेपथ्य इति। दुर्वाससः उक्तिरियम्।

(ड) अनेति। निवेदितं विज्ञापितं निजागमनमिति शेषः। अतएव आवयोरेकतरस्यात्र गमनमावश्यकमित्याशयः।

(ढ) प्रियमिति। उटजे पर्णशालायाम्, सन्निहिता उपस्थिता। अतः सैव अतिथिमभ्यर्थयिष्यतीति नावयोः कस्याश्चिदत्र गमनावश्यकतेति भावः।

(ण) अनेति। आमिति स्मरणार्थमव्ययम्। पुनः किन्तु शरीरेण उटजे

---

(ঠ) নেপথ্যে। ওহে! এই আমি উপস্থিত হইয়াছি।

(ড) অনসূয়া। (কাণ দিয়া) সখি! অতিথি যেন জানাইলেন।

(ঢ) প্রিয়ংবদা। পর্ণশালায় শকুন্তলাই রহিয়াছে।

---

(१)···अदिहिण विअ।

(२) णं उडअसण्णिहिआ सउन्तला। आत्मगतम्। अज्ज उण हिअएण असण्णिआ।

(३) अनसूया। होदु, अलं एत्तिएहिं कुसुमेहिं। प्रस्थिते।

পুনর্নেপথ্যে। আঃ, কথমতিথিং মাং পরিভবসি (১)। (ত)

বিচিন্তয়ন্তী যমনন্যমানসা
তপোনিধিং বেৎসি ন মামুপস্থিতম্ (২)।
স্মরিষ্যতি ত্বাং ন স বোধিতোঽপি সন্
কথাং প্রমত্তঃ প্রথমং কৃতামিব ॥১॥

সন্নিহিতা, কিন্তু হৃদয়েন অসন্নিহিতা, হৃদয়স্য ভর্তৃসমীপে প্রস্থানাদিতি ভাবঃ। তেন হি উটজস্য জনশূন্যত্বেনৈব হেতুনা। প্রয়োজনং ভবতু সিদ্ধং ভবত্বিত্যর্থঃ। প্রস্থিতে প্রস্থাতুমারব্ধে। আদিকর্ম্মণি ক্তঃ।

(ত) পুনরিতি। ইয়মপি নেপথ্যাৎ দুর্বাসস উক্তিঃ। আ ইতি কোপব্যঞ্জকমব্যয়ম্। পরিভবসি বচনোদগ্রণাৎ নাদ্রিয়সে; ইদমত্যন্তমনুচিতমিত্যাশয়ঃ।

"আস্তু স্যাৎ কোপপীডয়োঃ" "অনাদরঃ পরিভবঃ" ইতি চামরঃ।

বিচিন্তয়ন্তীতি। ন বিদ্যতে অন্যস্মিন্ দুষ্মন্তভিন্নে বিষয়ে মানসং মনো যস্যাঃ সা তাদৃশী ত্বম্, যং জনম্, বিচিন্তয়ন্তী বিশেষেণ ভাবয়ন্তী সতী, উপস্থিতং সমক্ষমাগতম্, তপোনিধিং তপসামাধারম্, এতেনাত্মনোঽতিমহত্ত্বম্ অনাদরে দোষাধিক্যঞ্চ ব্যজ্যতে; মা দুর্বাসসম্, ন বেৎসি মহর্ষিত্বেন ন জানাসি, প্রমত্তঃ অনবধানো জনঃ, প্রথমং কৃতামভিহিতাম্, কথাং বাচমিব, স জনঃ বোধিতোঽপি আত্মস্মরণে জনিতবুদ্ধিরপি সন্, ত্বাম্, ন স্মরিষ্যতি। মমানাদরণকরণস্য অয়মেব দণ্ডো ময়া দত্তঃ, যৎস্মরণেন মমাস্মরণং তৎকর্ত্তৃকনিজাস্মরণদণ্ডৌচিত্যাদিতি ভাবঃ।

(ণ) অনসূয়া। ও! আজ সে মনদ্বারা সন্নিহিত নাই। অতএব এইগুলিতেই প্রয়োজন সিদ্ধ হইবে। (এই বলিয়া প্রস্থান করিতে লাগিল।)

(ত) পুনরায় নেপথ্যে। আঃ! আমি অতিথি, আমাকে অনাদর করিতেছিস্।

(১) নেপথ্যে। আঃ, অতিথিপরিভাবিনি!। (২)···তপোধনং বেৎসি।

প্রিয়ং। হদ্ধী হদ্ধী! তং জ্জেব সংবুত্তং, জং মএ চিন্তিদং। কস্সিং পি পূআরিহে অবরদ্ধা সুস্সহিঅআ সউন্তলা (১)। (থ)

(থ) হাধিক্ হাধিক্! তদেব সংবৃত্তম্, যন্ময়া চিন্তিতম্। কস্মিন্নপি পূজার্হে অপরাদ্ধা শূন্যহৃদয়া শকুন্তলা।

অত্র পূর্ণোপমালঙ্কারঃ।

ননু "বিবাহো ভোজনং শাপোৎসর্গৌ মৃত্যু রতং তথা" ইত্যাদিনা দর্পণকারাদিভিঃ শাপনিষেধাৎ কথমত্র কবিনা শাপো নিবদ্ধ ইতি চেন্ন দর্পণকারাদিভিরুক্তবিধবচনেন বিষ্কম্ভকেতরস্থল এব শাপনিবন্ধননিষেধস্যৈবাভিপ্রেতত্বাৎ, অস্য তু বিষ্কম্ভকান্তর্গতত্বাৎ, অন্যথা "শাপাদ্যৈঃ সান্তরায়শ্চ স বিমর্ষ ইতি স্মৃতঃ" ইতি দর্পণকারাদ্যুক্তবিমর্ষসন্ধিলক্ষণস্যৈবাসঙ্গতেরিতি সুধীভির্বিভাবনীয়ম্।

বংশস্থবিলং বৃত্তম্ ॥১॥

(থ) প্রিয়মিতি। হাধিগিতি মহাবিষাদে, তস্যাতিশয়ে দ্বিরুক্তিঃ। সংবৃত্তং সঞ্জাতম্। চিন্তিতমাশঙ্কিতম্। পূজার্হে সম্মানযোগ্যে, কস্মিন্নপি জনে, শূন্যহৃদয়স্য পতিগতত্বাৎ তদ্বিরহিতেব, অতএব অপরাদ্ধা সম্মানাকরণাৎ কৃতাপরাধা। ইদানী কা গতিরিত্যাশয়ঃ।

তুই অনন্য মনে যাহাকে চিন্তা করতঃ, উপস্থিত তপোনিধি আমাকে জানিতে পারিতেছিস্ না; অস্থিরচিত্ত ব্যক্তি যেমন প্রথম উক্ত কথা স্মরণ করে না, সেইরূপ সে ব্যক্তিকে বুঝাইলেও সে তোকে স্মরণ করিবে না ॥১॥

(১) প্রিয়ংবদা। হদ্ধী হদ্ধী, অপ্পিঅং এব্ব সংবুত্তং। কস্সিং বি পূআরিহে অবরদ্ধা সুণ্ণহিঅআ সউন্তলা। (পুরোঽবলোক্য) ণহু জস্সিং কস্সিং বি। এসো দুব্বাসো সুলহকোবো মহেসী। তহ অবিঅ বেঅবলোপ্ফুল্লাএ দুব্বারাএ গইএ পড়িণিউত্তো। কো অণ্ণো হুদবহাদো দহিদুং পহবিস্সদি।

अन। (पुरोऽवलोक्य।) ण क्खु जस्सिं कस्सिं पि, एसो दुव्वासा सुलहकोवो महेसी, तधा सविअ अविरलपादतुवराए गदीए पड़िणिउत्तो। (द)

प्रिय। को अस्सो हुदवहादो पहवदि दहिदुं। ता गच्छ पादेसु पड़िअ णिउत्तावेहि। जाव से अहं पि अग्घोदअं उवकप्पेमि (१)। (ध)

(द) न खलु यस्मिन् कस्मिन्नपि, एष दुर्वासाः सुलभकोपो महर्षिः, तथा शप्त्वा अविरलपादत्वरया गत्या प्रतिनिवृत्तः।

(ध) कोऽन्यो हुतवहात् प्रभवति दग्धुम्। तद्गच्छ, पादयोः पतित्वा निवर्त्तय। यावदस्याहमपि अर्घोदकमुपकल्पयामि।

(द) अनेति। पुरः सम्मुखदेशे, अवलोक्य शापकर्त्तारं दुर्वाससं दृष्ट्वा। यस्मिन् कस्मिन्नपि साधारणजने इत्यर्थः, न खलु शकुन्तला अपराद्धा इति पूर्वेणान्वयः। सुलभः अनायासप्राप्यः सहसैवोत्पादीत्यर्थः कोपो यस्य सः, तथा विचिन्तयन्तीत्यादिरूपेण, शप्त्वा अभिसम्पातं कृत्वा, अविरला घनाः पादाः पादन्यासा यस्यां सा तादृशी त्वरा यस्यां सा तया, गत्या गमनेन, प्रतिनिवृत्तः आश्रमाद्विमुखो भूतः।

(ध) प्रियमिति। हुतवहादग्नेः अन्यः कः पदार्थः, दग्धुं प्रभवति शक्नोति अपि

(থ) প্রিয়ংবদা। হায় হায়! যাহা আমি ভাবিয়াছিলাম, তাহাই হইল। শূন্যহৃদয়া শকুন্তলা, পূজার যোগ্য কোনও ব্যক্তির নিকট অপরাধ করিয়াছে।

(দ) অনসূয়া। (সম্মুখের দিকে দৃষ্টিপাত করিয়া) যে কোন ব্যক্তির নিকটে নহে; ইনি সুলভকোপ মহর্ষি দুর্বাসা, সেইরূপ অভিসম্পাত করিয়া ঘন ঘন পাদক্ষেপে শীঘ্র গতিতে ফিরিয়াছেন।

(१) अनसूया। गच्छ, पादेसु पणमिअ णिवत्तेहि णं जाव। अहं अग्घोदअं उवकप्पेमि।

**অন। তহ।** ইতি নিষ্ক্রান্তা (১)। (ন)

**প্রিয়ং।** পদান্তরে স্খলিতং রূপয়ন্তী। **অম্মো! আবেঅক্খলিদাএ গদীএ পরিব্ভট্টং মে অগ্গহত্থাদো পুপ্ফভাঅণং।** ইতি পুষ্পাবচয়ং রূপয়তি (২)। (প)

(ন) তথা।

(প) অহো! আবেগস্খলিতয়া গত্যা পরিভ্রষ্টং মে অগ্রহস্তাৎ পুষ্পভাজনম্।

---

ন কোঽপি নেত্যর্থঃ। দুর্বাসসমন্তরেণ ঈদৃশং ক্ষুদ্রদোষাৎ দারুণশাপং দাতুমন্যো নার্হতীত্যাশয়ঃ। অতএবাত্র সমাদপ্রস্তুতাৎ প্রস্তুতসমপ্রতীতেরপ্রস্তুতপ্রশংসালঙ্কারঃ। নিবর্ত্তয় দুর্বাসসমিতি শেষঃ। অস্য দুর্বাসসঃ সম্বন্ধে।

(ন) অনেতি। তথা ত্বয়া যদুক্তং তথৈব করোমীত্যর্থঃ।

(প) প্রিয়মিতি। পদান্তরে উদ্গমনায় একপদং ক্ষিপ্ত্বা দ্বিতীয়পদক্ষেপে, স্খলিতং পদোদ্গমনম্, রূপয়ন্তী অভিনয়ন্তী। আবেগেন ত্বরয়া স্খলিতা বিপর্য্যস্তা তয়া। অগ্রহস্তাৎ হস্তাগ্রাৎ।

---

(ধ) প্রিয়ংবদা। অগ্নিভিন্ন কোন্ বস্তু, দগ্ধ করিতে পারে? অতএব যাও, পায়ে পড়িয়া ফিরাও। আমিও তাঁহার জন্য অর্ঘ্য ও পাদোদক সংগ্রহ করি।

(ন) অনসূয়া। তাহাই। (এই বলিয়া চলিয়া গেল।)

(প) প্রিয়ংবদা। (দ্বিতীয় বার পা ফেলিবার সময়ে হুচট্ খাওয়া অভিনয় করিয়া) ওমা! বেগবশতঃ গমন বিপর্য্যস্ত হওয়ায় আমার হস্তাগ্র হইতে পুষ্পপাত্র পড়িয়া গেল। (এই বলিয়া সেই পুষ্পসংগ্রহ অভিনয় করিতে লাগিল।)

---

(১) প্রিয়ংবদা। সহ। নিষ্ক্রান্তা।

(২) অনসূয়া। পদান্তরে স্খলিতং নিরূপ্য। পব্ভট্টং। পুষ্পোচ্চয়ং রূপয়তি।

अन। प्रविश्य। सहि! सरीरी विअ कोवो कस्स अणुणअं सो गेण्हदि। किन्तु, उण सो अणुकम्पिदो मए (१)। (फ)

प्रियं। एदं ज्जेव तस्सिं बहुदरं। ता कधेहि कधं तए पसादिदो ? (२)। (ब)

अन। जदो णिउत्तिदुं ण इच्छदि, तदो पाएसुं पड़िअ विसविदो मए, भअवं पढमं त्ति पेक्खिअ अविसाद-तव-

(फ) सखि! शरीरीव कोपः कस्य अनुनयं स गृह्णाति। किन्तु, पुनः सः अनुकम्पितो मया।

(ब) एतदेव तस्मिन् बहुतरम्। तत् कथय कथं त्वया प्रसादितः।

---

(फ) अनेति। शरीरी मूर्त्तिमान्। कोप इव स दुर्वासाः, कस्य जनस्य, अनुनयम् अवनतभावम्, गृह्णाति अङ्गीकरोति, कस्यापि नेत्यर्थः। तर्हि किं विफलमनोरथा जातासीत्याह किन्त्विति। स दुर्वासाः, मया अनुकम्पितः अनुकम्पां दयां कारितः।

(ब) प्रियमिति। एतदेव अनुकम्पाजननमेव, तस्मिन् दुर्वाससि, बहुतरमधिकं मन्तव्यम्, निवर्त्तनन्त्वशक्यमेवेति भावः। प्रसादितः प्रसादं कारितः।

---

(ক) অনসূয়া। (প্রবেশ করিয়া) সখি! মূর্ত্তিমান্ ক্রোধের ন্যায় তিনি, কাহার অনুনয় গ্রাহ্য করেন; তথাপি আমি তাঁহার দয়া জন্মাইয়াছি।

(ব) প্রিয়ংবদা। তাঁহার নিকট ইহাই বেশী। তা বল দেখি, কি করিয়া তুমি প্রসন্ন করিলে ?।

(१) प्रविश्य प्रियंवदा। सहि! पक्किदिवक्को सो कस्स अणुणअं गेण्हइ। किं वि उण साणुक्कोसो किदो।

(२) अनसूया। संवृतम्। तस्सिं बहु एदं वि। कहेसु।

প্পহাবস্স দুহিদিজণস্স অঅং অবরাহো ভঅদা মরিসিদব্বো ত্তি (১)। (ঝ)

প্রিয়ং। তদো তদো? (২)। (ঞ)

অন। তদো তেণ ভণিদং ণ মে বঅণং অণ্ণধা ভবিদুং অরিহদি। কিন্তু আহরণাহিণ্ণাণদংসণেণ সে সাবো ণিঅত্তিস্সদি ত্তি মন্তঅন্ত জ্জেব অন্তরিদো (৩)। (য)

---

(ঝ) যদা নিবর্ত্তিতুং ন ইচ্ছতি, তদা পাদয়োঃ পতিত্বা বিজ্ঞাপিতো ময়া, ভগবন্! প্রথমমিতি প্রেক্ষ্য অবিজ্ঞাততপঃপ্রভাবস্য দুহিতৃজনস্য অয়মপরাধো ভবতা মর্ষয়িতব্য ইতি।

(ঞ) ততস্ততঃ?।

(ঝ) অনেতি। নিবর্ত্তিতুম্ উটজমাগন্তুম্। প্রথমম্ ইদমাদ্যং শকুন্তলায়া অপরাদ্ধম্, ইতি প্রেক্ষ্য পর্য্যালোচ্য, প্রায়েণ লোকঃ প্রথমং বস্তুস্বভাবমবুদ্ধা অপরাধ্যতি, পরোঽপি তদবিবেকপূর্ব্বকমিতি মত্বা মর্ষয়তীতি লোকব্যবহারদর্শনাদিত্যাশয়ঃ; ন বিজ্ঞাতস্তপঃপ্রভাবো যেন তস্য, দুহিতৃজনস্য আত্মজাতুল্যস্য শকুন্তলায়া ইত্যর্থঃ। মর্ষয়িতব্যঃ ক্ষন্তব্যঃ।

অত্র পরিহারো নাম নাট্যালঙ্কারঃ। যথা দর্পণে—

“পরিহার ইতি প্রোক্তঃ কৃতানুচিতমার্জনম্।”

(ঝ) অনসূয়া। যখন ফিরিতে ইচ্ছা করিলেন না, তখন পায়ের উপর পড়িয়া আমি জানাইলাম—“ভগবন্! ইহা প্রথম অপরাধ এইরূপ মনে করিয়া, তপঃপ্রভাবানভিজ্ঞ কন্যাজনের এই অপরাধ আপনি মার্জ্জনা করুন।”

---

(১) জদা তদা বিণ্ণবিদো মএ ভঅবদা এক্কো অবরাহো। (২) অন। তদো তদো?।

(৩) প্রিয়ংবদা। তদো মে বঅণং অণ্ণহা ভবিদুং ণ অরিহদি। কিন্তু অহিণ্ণাভরণদংসণেণ সাবো ণিবত্তিস্সদি ত্তি মন্তঅন্তো সঅং অন্তরিহিদো।

প্রিয়ং। সক্কং দাণিং সমস্সসিদুং। অত্থি তেণ রাএসিণা সংপত্থিদেণ অত্তণো ণামঙ্কিদং অঙ্গুলীঅঅং সুমরণীঅং ত্তি সউন্তলাএ হত্থে সঅং জ্জেব পরিধাবিদং। এসো জ্জেব তস্সিং সাহীণো উবাও ভবিস্সদি (১)। (র)

(য) ততস্তেন ভণিতম্, ন মে বচনমন্যথা ভবিতুমর্হতি। কিন্তু আভরণাভিজ্ঞানদর্শনেন অস্যাঃ শাপো নিবর্ত্তিষ্যতীতি মন্ত্রয়ন্নেবান্তরিতঃ।

(র) শক্যমিদানীং সমাশ্বসিতুম্। অস্তি তেন রাজর্ষিণা সংপ্রস্থিতেন আত্মনো নামাঙ্কিতমঙ্গুলীয়কং স্মরণীয়মিতি শকুন্তলায়া হস্তে স্বয়মেব পরিধাপিতম্। এষ এব তস্মিন্ স্বাধীন উপায়ো ভবিষ্যতি।

(য) অনেনেতি। তেন দুর্বাসসা। অন্যথা মিথ্যা। অভিজ্ঞায়তে পরিচীয়তে অনেনেতি অভিজ্ঞানং চিহ্নম্, আভরণম্ অলঙ্করণমেব অভিজ্ঞানং তস্য দর্শনেন প্রদর্শনেন অস্যাঃ শকুন্তলায়াঃ। মন্ত্রয়ন্নেব বদন্নেব, অন্তরিতঃ অন্তর্হিতবান্।

(র) প্রিয়মিতি। শক্যমস্মাভিরিতি শেষঃ। রাজর্ষিণা দুষ্মন্তেন, সম্প্রস্থিতেন আদিকর্ম্মণি ক্তপ্রত্যয়াৎ প্রস্থাতুমারভমাণেন সতা, আত্মনো দুষ্মন্তস্যৈব। স্মরণায় হিতং স্মরণীয়ং স্মৃতিজনকমিত্যর্থঃ। তস্মিন্ শাপনিবর্ত্তনে, স্বাধীনঃ অনন্যাপেক্ষঃ।

(ল) প্রিয়ংবদা। তার পর তার পর ?।

(য) অনসূয়া। তার পর তিনি বলিলেন—"আমার বাক্য মিথ্যা হইতে পারে না, তবে অলঙ্কাররূপ চিহ্ন দেখাইলে পর উহার শাপ নিবৃত্তি পাইবে" এই কথা বলিতে বলিতেই অন্তর্হিত হইলেন।

(র) প্রিয়ংবদা। এখন আশ্বস্ত হইতে পারিব। সেই রাজর্ষি, যাইবার সময়, নিজের নামাঙ্কিত একটী অঙ্গুরী, নিজেই শকুন্তলার হাতে স্মরণার্থ পরাইয়া দিয়াছিলেন, তাহা আছে। এই অঙ্গুরী দেখানই শাপনিবৃত্তির স্বাধীন উপায় হইবে।

(১) সণামহে অঙ্কিদং অম্ব পিণদ্ধং তস্সিং সাহীণোবাআ সউন্তলা হোহিই।

অন। সহি! এহি, দেবকজ্জং দাব সে ণিব্বত্তেম্ম।
ইতি পরিক্রামতঃ (১)। (ল)

প্রিয়ং। অবলোক্য। অণসূএ! পেক্খ দাব বামহত্থবিণিহিদবঅণা আলিহিদা বিঅ পিঅসহী তগ্গদাএ চিন্তাএ অত্তাণম্মি ণ বিভাবেদি, কিং উণ আগন্তুঅং (২)। (ব)

অন। হলা! দোসং জ্জেব ণো হিঅএ এসো বুত্তন্তো চিট্ঠদু। রক্খণীআ ক্খু পইদিপেলবা পিঅসহী (৩)। (শ)

(ল) সখি! এহি, দৈবকার্য্যং তাবদস্যা নির্ব্বর্ত্তয়াবঃ।

(ব) অনসূয়ে! প্রেক্ষস্ব তাবৎ, বামহস্তবিনিহিতবদনা আলিখিতেব প্রিয়সখী তদ্গতয়া চিন্তয়া আত্মানমপি ন বিভাবয়তি, কিং পুনরাগন্তুকম।

(ল) অনেতি। অস্যাঃ শকুন্তলায়াঃ, দৈবকার্য্যং মঙ্গলচণ্ডিকাপূজাদিকম্, নির্ব্বর্ত্তয়াবো নিষ্পাদয়াবঃ। পরিক্রামতঃ উটজগমনায় পাদক্ষেপং কুরুতঃ।

(ব) প্রিয়মিতি। বামহস্তে বিনিহিতং স্থাপিতং বদনং যয়া সা, আলিখিতেব নিস্পন্দতয়া চিত্রিতেব, তদ্গতয়া দুষ্মন্তবিষয়িকয়া। বিভাবয়তি অবগচ্ছতি অহগন্তুমর্হতীত্যর্থঃ। আগন্তুকমতিথিম্।

(ল) অনসূয়া। সখি! আইস, শকুন্তলার দেবকার্য্য নির্ব্বাহ করি। (এই বলিয়া পাদক্ষেপ করিতে লাগিল।)

(ব) প্রিয়ংবদা। (দেখিয়া) অনসূয়া! দেখ—প্রিয়সখী শকুন্তলা, বামহস্তের উপরে মুখমণ্ডল রাখিয়া চিত্রিতের ন্যায় রহিয়াছে এবং তদ্গত চিন্তায় আপনাকেও জানিতে পারিতেছে না, আগন্তুককে আর কি জানিবে।

(১) প্রিয়ংবদা। দাব ণিব্বত্তেম। পরিক্রামতঃ।

(২) বামহত্থোবহিদবঅণা অত্তুগদাএ এসা বিভাবেদি।

(৩) অনসূয়া। পিঅংবদে! দুবেণং এব্ব ণো মুহে এসো বুত্তন্তো চিট্ঠদু।

प्रियं। को दाव उस्सोदएण णोमालिअं सिञ्चदि (१)।

इत्युभे निष्क्रान्ते (२)। (ष)

## विष्कम्भकः। (स)

(अ) हला! इयोरेवावयोर्हृदये एष वृत्तान्तस्तिष्ठतु। रक्षणीया खलु प्रकृतिपेलवा प्रियसखी।

(ष) कस्तावदुष्णोदकेन नवमालिकां सिञ्चति।

(अ) अनेति। एष दुर्वाससोऽभिसम्पातविषयकवृत्तान्तः, हृदये तिष्ठतु, पुनः प्रकाशनीय इत्याशयः। कथमित्याह प्रकृत्या स्वभावेनैव पेलवा कोमला, प्रियसखी शकुन्तला, रक्षणीया खलु अवश्यमेव रक्षितव्या। तथा च एतद्वृत्तान्तप्रकाशेन तच्छ्रवणे शकुन्तलाया मरणमेवावश्यम्भावीति भावः।

(ष) प्रियमिति। नवमालिका तदाख्या लताम्। तथा च यथा उष्णोदकेन मूलसेचने नवमालिकाया अवश्यमरणम्, तथा एतद्वृत्तान्तश्रवणे शकुन्तलाया अपि नितान्तनैराश्यादवश्यमेव मरणं भविष्यतीति एष वृत्तान्त आवयोर्द्वयोरेव हृदये तिष्ठत्विति भावः।

अतएवात्र समादप्रस्तुतात् प्रस्तुतसमप्रतीतेरप्रस्तुतप्रशंसालङ्कारः।

उभे अनसूयाप्रियंवदे।

(स) विष्कम्भेति। एतल्लक्षणमुक्तम्। "जइ वि गन्धव्वेण विवाहविहिणा" इत्यादिना वृत्तकथांशानां निदर्शनम्; "आहरणाहिआणदंसणेण से सावो णिउत्तिस्सदि"

(শ) অনসূয়া। ওগো! এই বৃত্তান্ত আমাদের দুই জনের মনেই থাক। কারণ, স্বভাবকোমলা শকুন্তলার জীবন রাখিতে হইবে।

(ষ) প্রিয়ংবদা। কে গরম জল দিয়া নবমালিকা লতাকে, সিক্ত করে?। (এই বলিয়া দুইজনেই চলিয়া গেল।)

(স) বিষ্কম্ভক।

(१) को दाणिं। (२) उभे निष्क्रान्ते।

ततः प्रविशति सुप्तोत्थितः कण्वशिष्यः। (ह)

शिष्यः। वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासात् प्रतिनिवृत्तेन कण्वेन। तत् प्रकाशं निर्गत्यावलोकयामि कियदवशिष्टं रजन्या इति। परिक्रम्यावलोक्य च। हन्त! प्रभाता रजनी। तथाहि—(१) (क्ष)

यात्येकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु ॥२॥

---

इत्यनेन च वर्त्तिष्यमाणकथांशानां निदर्शनं ज्ञेयम्। स चायं शुद्धविष्कम्भकः, मध्यमपात्राभ्यामनमुख्याप्रियंवदाभ्यां प्रयोजितत्वात् "मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात्" इति दर्पणलक्षणात्।

(ह) तत इति। आदौ सुप्तो निद्रितः पश्चादुत्थितो जागरित इति क्रुष्टमदीकृत इत्यादिवत् कर्म्मधारयः। निद्राव्यक्त्याभिनयार्थमेतद्विशेषणम्।

(क्ष) शिष्य इति। प्रवासाद्विदेशात् तीर्थादिति यावत्। वेलायाः होमवेलायाः "अनुदिते जुहोति" इति श्रुतेः अरुणोदयकालस्य उपलक्षणार्थं निरूपणार्थम्। अन्यथा परिश्रान्ततया सूर्य्योदयात् परं निद्राभङ्गे गुरोर्वैधकर्म्मकालातिक्रमे प्रत्यवायः स्यादिति भावः। प्रकाशं गृहात् बहिर्देशम्।

---

(হ) তদনন্তর নিদ্রোত্থিত কোন কণ্বশিষ্যের প্রবেশ।

(ক্ষ) শিষ্য। বিদেশ হইতে প্রত্যাগত পূজনীয় কণ্ব, বেলা ঠিক্ করিবার জন্য আমাকে আদেশ করিয়াছেন। অতএব বাহিরে যাইয়া দেখি—রাত্রির কতটুকু অবশিষ্ট আছে। (পাদক্ষেপ করিয়া দেখিয়া) ও! রাত্রি প্রভাত হইয়াছে। যথা—

---

(१) प्रवासादुपावृत्तेन काश्यपेन। प्रकाशं निर्गतस्तावत्। हन्त! प्रभातम्।

अपि च,

अन्तर्हिते शशिनि सैव कुमुद्वतीयं
दृष्टिं न नन्दयति संस्मरणीयशोभा ।

यातीति । ओषधीनां फलपाकान्तानां व्रीहिशालियवादीनां पतिः पुष्टिकारकश्चन्द्रः, एकत एकस्यां दिशि पश्चिमायां दिशीत्यर्थः, अस्तशिखरं चरमाचलचूडाम्, याति ; तथा अरुणः स्वसारथिः पुरःसरः अग्रगामी यस्य स तादृशः, अर्कः सूर्य्यः, एकतः अन्यस्यां दिशि पूर्वस्यां दिशीत्यर्थः, आविष्कृतः आत्मप्रकाशं कर्त्तुमारभते । इत्थं तेजोद्वयस्य चन्द्रसूर्य्यरूपस्य, युगपदेकदैव, व्यसनोदयाभ्याम् अस्तगमनोदयगमनाभ्यां विपत्सम्पद्भ्याञ्च कर्त्तृभ्याम्, एष लोको जगत्, दशान्तरेषु अवस्थाविशेषेषु, नियम्यत इव स्वस्वदशाप्रदर्शनेन ईश्वरनियमं ज्ञाप्यत इव । अकस्मादेव एकस्मिन्नेव समये कश्चिद्विपद्यते कश्चिद्वा सम्पद्यते ; तेन च विपन्नसम्पन्नाभ्यामकस्मादेव न शोचितव्यं न वा गर्वितव्यमित्युपदिश्यत इवेत्याशयः ।

अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः । ओषधिपतेर्व्यसनम् अर्कस्य उदय इति क्रमिकत्वावगमनात् यथासंख्यालङ्कारस्य, अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः । तथा याति आविष्कृत इति तिङ्क्तप्रत्ययभेदात् भग्नप्रक्रमतादोषः, स च 'आविर्भवत्यपरतोऽरुणसम्मुखोऽर्कः' इति पाठेन समाधेयः । दृष्टान्तो नाम नाट्यलक्षणञ्च । यथा दर्पणे—

"दृष्टान्तो यस्तु पक्षार्थसाधनाय निदर्शनम् ।"

"ओषधिः फलपाकान्ता" "ओषधीशो निशापतिः" इति चामरः ।

आविष्कृत इति आदिकर्म्मणि क्तः कर्त्तरि ।

वसन्ततिलका वृत्तम् ॥२॥

---

চন্দ্র এক দিকে অস্ত যাইতেছেন ; অপর দিকে সূর্য্য, অরুণকে অগ্রবর্ত্তী করিয়া প্রকাশিত হইতেছেন। অতএব একদাই দুইটী তেজের অস্ত ও উদয় যেন এই জগৎকে অবস্থাবিশেষে ঈশ্বরের নিয়ম জানাইতেছে ॥২॥

ইষ্টপ্রবাসজনিতান্যবলাজনেন
দুঃখানি নূনমতিমাত্রদুরুদ্বহানি (১) ॥৩॥

অপি চ, কর্কন্ধূনামুপরি তুহিনং রঞ্জয়ত্যগ্রসন্ধ্যা
দার্ভং মুঞ্চত্যুটজপটলং বীতনিদ্রো ময়ূরঃ।
বেদিপ্রান্তাৎ খুরবিলিখিতাদুত্থিতশ্চৈষ সদ্যঃ
পশ্চাদুচ্চৈর্ভবতি হরিণঃ স্বাঙ্গমায়চ্ছমানঃ (২) ॥৪॥

অন্তর্হিতে। শশিনি চন্দ্রে, অন্তর্হিতে ব্যবহিতে দেশান্তরং গতে চ সতি সংস্মরণীয়া অতীততয়া দর্শনীয়ত্বাসম্ভবাৎ স্মৃতিমাত্রযোগ্যা শোভা সৌন্দর্য্যং যস্যাঃ সা তাদৃশী, সৈব যা পূর্ব্বং দর্শনীয়শোভাসীৎ সৈবেত্যর্থঃ ইয়ং কুমুদ্বতী কুমুদিনী, দৃষ্টিং লোকলোচনম্, ন নন্দয়তি স্বশোভাদ্বারা ন সুখয়তি। তথাহি, নূনং নিশ্চিতমেব অবলাজনেন স্ত্রীলোকেন, ইষ্টস্য বল্লভস্য প্রবাসেন ভিন্নদেশস্থিত্যা বিরহেণ জনিতানি, দুঃখানি, অতিমাত্রমত্যন্তমেব দুরুদ্বহানি কষ্টবহনযোগ্যানি ভবন্তীতি শেষঃ। অতএব শশিনোঽন্তর্ধানাৎ দুঃখেন নষ্টশোভা কুমুদ্বতী দৃষ্টিং ন নন্দয়তীত্যাশয়ঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসঃ, তদুত্থাপিতা চ শশিকুমুদ্বত্যোঃ লিঙ্গসাম্যেন নায়কনায়িকাব্যবহারসমারোপাৎ সমাসোক্তিঃ পদার্থহেতুকং কাব্যলিঙ্গঞ্চ ইত্যেতেষামঙ্গাঙ্গিত্বেন সঙ্করঃ।

"লোচনং নয়নং নেত্রমীক্ষণং চক্ষুরক্ষিণী। দৃক্ দৃষ্টিশ্চ" "নূনং তর্কেঽর্থনিশ্চয়ে" ইতি চামরঃ। বসন্ততিলকা বৃত্তম্ ॥৩॥

আরও, চন্দ্র অস্তমিত হইলে, কুমুদিনীর সে সৌন্দর্য্য এখন স্মরণীয় হইয়া দাঁড়াইয়াছে; সুতরাং এই সেই কুমুদিনী আর নয়ন আনন্দিত করিতেছে না। কারণ, ইষ্টজনের বিরহজনিত দুঃখ, স্ত্রীলোকের পক্ষে নিশ্চয়ই অত্যন্ত দুঃসহ ॥৩॥

(১) কুমুদ্বতী মে। অবলাজনস্য। অতিমাত্রসুদুঃসহানি।

(২) অয়ং শ্লোকঃ কুত্রচিন্ন দৃশ্যতে।

অপি চ, পাদন্যাসং ক্ষিতিধরগুরোর্মূর্দ্ধ্নি কৃত্বা সুমেরোঃ
ক্রান্তং যেন ক্ষপিততমসা মধ্যমং ধাম বিষ্ণোঃ।
সোঽয়ং চন্দ্রঃ পততি গগনাদল্পশেষৈর্ময়ূখৈঃ
অত্যারূঢ়ির্ভবতি মহতামপ্যপভ্রংশনিষ্ঠা (১) ॥৫॥

কর্কন্ধূনামিতি। অপরসন্ধ্যা প্রাথমিকী সন্ধ্যা প্রাতঃসন্ধ্যেতি যাবত্, কর্কন্ধূনাং বদরীপত্রাণাম্, উপরি পতিতং তুহিনং হিমম্, রঞ্জয়তি আত্মনো রক্তবর্ণত্বাত্ আরক্তী-করোতি, বীতা ত্যক্তা নিদ্রা যেন স বীতনিদ্রো ময়ূরঃ, দর্ভৈঃ কুশৈর্নির্ম্মিতমিতি দার্ভম্, উটজস্য পর্ণশালায়াঃ পটলং ছদিঃ, মুঞ্চতি পরিত্যজতি পরিত্যজ্য স্থানান্তরং ব্রজতি। তথা খুরৈঃ বিলিখিতাত্ নিদ্রিতাবস্থায়া কুট্টিতাত্, বেদির্যজ্ঞভূমিঃ, প্রান্তাত্ সমীপদেশাত্, উত্থিত এষ হরিণশ্চ, সদ্যস্তত্ক্ষণম্ উত্থানক্ষণ এবেত্যর্থঃ, স্বাঙ্গং নিজহস্তপদাদ্যবয়বম্, আয়চ্ছমানঃ প্রসারয়ন্ সন্, পশ্চাত্তদনন্তরম্, উচ্চৈর্দণ্ডায়মানো ভবতি। অয়ন্তু প্রায়েণ পশূনাং স্বভাবঃ।

অতএবাত্র পরাঙ্কে স্বভাবোক্তিরলঙ্কারঃ। তথা হরিণ ইত্যন্তেন বাক্যসমাপ্তাবপি পুনর্হরিণ ইত্যস্য বিশেষণতয়া "স্বাঙ্গমায়চ্ছমানঃ" ইত্যস্যোপাদানাত্ সমাপ্তপুনরাত্ততা-দোষঃ, স চ "পশ্চাদুচ্চৈর্ভবতি ততয়ন্ স্বীয়মঙ্গং কুরঙ্গঃ" ইতি পাঠেন সমাধেয়ঃ। ততং বিস্তৃতং কুর্বন্নিতি ততয়ন্।

আয়চ্ছমান ইতি "আঙো যমহনৌ স্বাঙ্গকর্ম্মকৌ চ" ইতি বচনাদিত্বাদাত্মনে-পদবিষয়ে আনশ্। মন্দাক্রান্তা বৃত্তম্ ॥৪॥

আরও, প্রাতঃসন্ধ্যা, বদরীপত্রের উপরে পতিত হিমবিন্দুকে রঞ্জিত করিতেছে; ময়ূর নিদ্রা হইতে উঠিয়া, কুশনির্ম্মিত পর্ণশালার চাল ছাড়িয়া চলিয়া যাইতেছে; আবার এই হরিণটা, খুরসঞ্চালিত যজ্ঞবেদির প্রান্ত হইতে উঠিয়া, তৎক্ষণাৎ নিজের অঙ্গ সকল বর্দ্ধিত করিয়া, তাহার পর দাঁড়াইতেছে ॥৪॥

(১) অয়ং শ্লোকোঽপি কুত্রচিন্নাস্তি।···ক্ষপিততমসা।

अन। अपटीक्षेपेण प्रविश्य। एव्वं णाम विसज्जपरम्मुहस्स

पादैरिति। अपिततमसा विनाशितान्धकारेण निहतशत्रुसैन्येन च, येन चन्द्रेण नवेन महाशक्तिना केनचित् राज्ञा च, क्षितिधरगुरोः पर्वतश्रेष्ठस्य राजश्रेष्ठस्य च, सुमेरोस्तदाख्यपर्वतस्य सुमेरुवत् गौरवितस्य कस्यचित् प्रबलनृपतेश्च, मूर्द्धि उपरिभागे मस्तके च, पादन्यासं किरणस्थापनं पराजयेनावनमनात् चरणविन्यासञ्च, कृत्वा, विष्णोर्वामनरूपिणो नारायणस्य विष्णुवत् प्रभावशालिनो नृपतिविशेषस्य च, मध्यमं धाम मध्यमाक्रमणस्थानमाकाशं राजधानीमध्यवर्त्ति वासभवनञ्च, क्रान्तं साकल्येन अधिकृतम् आक्रम्य जितञ्च, अयं स चन्द्रः, अल्पशेषैरस्तोन्मुखत्वात् अल्पमात्रावशिष्टैः, मयूखैः किरणैः प्रभावनिबन्धनशोभाभिश्च विशिष्टः सन्, गगनात् आकाशात् स्वदेशाच्च, पतति अस्तं याति भ्रश्यति च। तथाहि महतामपि जनानाम्, अत्यारूढिः अत्युन्नतिः, अपभ्रंशः पतनमेव निष्ठा शेषावस्था यस्याः सा तादृशी भवति।

अत्र कार्य्यद्वारा चन्द्रे कस्यचिन्नवप्रबलीभूतस्य राज्ञो व्यवहारसमारोपात् श्लेषभित्तिका समासोक्तिः, सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्च, अनयोर्मिथो नैरपेक्ष्यात् संसृष्टिः।

“पादा रश्म्यङ्घ्रितुर्य्यांशाः” इत्यमरः। क्षितिं धरति धारयति रक्षति चेति भूभृच्छब्दवत् पर्वतनृपत्ययोर्यौगिकः। “गुरुस्त्रिलिङ्गां महति दुर्जरालघुनोरपि” इति त्रिकाण्डशेषः। “मयूखः किरणेऽपि च। ज्वालायामपि शोभायाम्” इति मेदिनी। “निष्ठा क्लेशेऽवसाने च व्यवस्थोत्कर्षयाचने” इति हलायुधः।

मन्दाक्रान्ता वृत्तम् ॥५॥

---

আরও, যিনি অন্ধকার নাশ করিয়া, পর্ব্বতশ্রেষ্ঠ সুমেরুর মস্তকে কিরণ বিন্যস্ত করিয়া, সমস্ত আকাশ অধিকার করিয়াছিলেন, এই সেই চন্দ্র অল্পাবশিষ্ট কিরণে আকাশ হইতে পড়িয়া যাইতেছেন। কারণ, প্রধান লোকেরও অত্যন্ত উন্নতি, অবনতিতে পর্য্যবসিত হয় ॥৫॥

जणस्स ण णिपडिदं, जधा तेण रणा सउन्तलाए अणज्जं आचरिदं त्ति (१)। (क)

शिष्यः। यावदुपस्थितां होमवेलां गुरवे निवेदयामि।

इति निष्क्रान्तः। (ख)

अन (२)। णं पहादा रजणी। ता सिग्धं सअणं

(क) एवं नाम विषयपराङ्मुखस्य जनस्य न निपतितम्, यथा तेन राज्ञा शकुन्तलायामनार्य्यमाचरितमिति।

(क) अनेति। अपटीक्षेपेण "पटीक्षेपो न कर्त्तव्य आर्त्तराजप्रवेशने" इत्यभिधानात् यवनिकाया अनपसारणेन। शकुन्तलाया दुःखेन अनसूयाया आर्त्ततया पटीक्षेपसम्भवे तन्निषेधार्थमुक्तिरियम्। नामशब्दो दुष्मन्तनिन्दायाम्। विषयपराङ्मुखस्य इन्द्रियसुखविमुखस्य, जनस्य शकुन्तलाभिन्नलोकस्य, एवम् इत्थं दुःखम्, न निपतितं कदाचिदपि नोपस्थितम्। तेन दुष्मन्तेन। अनार्य्यम् असाधुजनोचितम्। तदाचरणञ्च परस्तादाविर्भविष्यति।

(ख) शिष्य इति। होमवेलां होमकालम्। गुरवे कण्वाय।

(क) অনসূয়া। (যবনিকা না সরাইয়া প্রবেশ করিয়া) বিষয়-পরাঙ্মুখ লোকের এরূপ কখনও উপস্থিত হয় না; সেই রাজা শকুন্তলার প্রতি যেরূপ অন্যায় আচরণ করিয়াছেন।

(१) जइ वि णाम विसअपरम्मुहस्स जणस्स एदं ण विदिदं, तहवि तेण। पटीक्षेपेण इत्यपि पाठः।

(२) पडिबुद्धावि किं करिस्सं। ण मे उइदेसु वि णिअकरणिज्जेसु हत्थपाआ पसरन्ति। कामो दाणिं सकामो होदु, जेण असच्चसन्धे जणे सुद्धहिअआ सही पदं कारिदा। अहवा दुव्वाससो सावो एसो विआरेदि। अण्णहा तेहमेत्तं। दुक्खसीले! णं सहीगामी दोसोत्ति ववसिदा वि ण पारेमि। इत्थं गए अम्हेहिं किं करणिज्जं।

পরিচ্চস্সামি। অধবা লহু লহু উত্থিদাবি কিং করিস্সং, ণ মে উচিদেসু পহাদকরণীএসু হত্থপাআ প্পসরন্তি। কামো দাণিং সকামো ভোদু। জেণ অসচ্চসন্ধে জণে পিঅসহী সুদ্ধহিঅআ পদং কারিদা। স্মৃত্বা। অধবা ণ তস্স রাএসিণো

(গ) ননু প্রভাতা রজনী। তৎ শীঘ্রং শয়নং পরিত্যক্ষ্যামি। অথবা লঘু লঘু উত্থিতাপি কিং করিষ্যামি। ন মে উচিতেষু প্রভাতকরণীয়েষু হস্তপাদং প্রসরতি। কাম ইদানীং সকামো ভবতু, যেন অসত্যসন্ধে জনে প্রিয়সখী শুদ্ধহৃদয়া পদং কারিতা।

(গ) ননীতি। অবধারণে ননুশব্দঃ, শয্যতে অস্মিন্নিতি শয়নং শয্যা তাম্। লঘু লঘু শীঘ্র শীঘ্রম্। উচিতেষু অভ্যস্তেষু ন্যায্যেষু বা। "অভ্যস্তেঽপ্যুচিতং ন্যায্যম্" ইতি যাদবঃ। প্রভাতকরণীয়েষু প্রাতঃকালকর্ত্তব্যেষু পুষ্পচয়নাদিকার্য্যেষু, হস্তৌ চ পাদৌ চেতি হস্তপাদম্, প্রাণ্যঙ্গত্বাৎ সমাহারৈকত্বং নপুংসকত্বঞ্চ। প্রসরতি প্রচলতি। মনোদুঃখং প্রকাশয়তি কাম ইতি। কামো মদনঃ, সকামঃ সফলকামঃ। যেন কামেন, অসত্যা মিথ্যা সন্ধা প্রতিজ্ঞা যস্য তস্মিন্, জনে দুষ্মন্তে, শুদ্ধহৃদয়া সরলচিত্তা, পরপ্রতারণাদিদোষশূন্যচিত্তেতি যাবৎ, প্রিয়সখী শকুন্তলা, পদং স্থিতিম্। তথা চ কামঃ পরপ্রতারণামেব কাময়তি। এবঞ্চ মিথ্যাপ্রতিজ্ঞে দুষ্মন্তে সরলচিত্তায়াঃ শকুন্তলায়াঃ স্থাপনাৎ তস্যাঃ প্রতারণা সুনিষ্পন্নৈবেতি কামস্য সফলকামত্বমেব জাতমিতি ভাবঃ। "পদং ব্যবসিতত্রাণস্থানলক্ষ্মাঙ্ঘ্রিবস্তুষু" ইত্যমরঃ। স্মৃত্বা দুর্ব্বাসসঃ

(খ) শিষ্য। হোমের সময় উপস্থিত হইয়াছে ইহা গুরুদেবকে জানাই। ( এই বলিয়া চলিয়া গেল। )

(গ) অনসূয়া। রাত্রি প্রভাতই হইয়াছে; সুতরাং সত্বর শয্যা পরিত্যাগ করি। অথবা তাড়াতাড়ি উঠিয়াই বা কি করিব; চির-কালের অভ্যস্ত প্রাতঃকালের কর্ত্তব্য কার্য্যে আমার হাত পা সরিতেছে না। কামদেবের ইচ্ছা এখন সফল হউক; যিনি মিথ্যাবাদী লোকের হাতে সরলচিত্তা প্রিয়সখীকে স্থাপিত করিয়াছেন। ( স্মরণ করিয়া )

अवराहो, दुव्वासासावो क्खु एसो पहवदि। अण्णधा कधं सो राएसो तादिसाइं मन्तिअ एत्तिअस्स कालस्स वात्तामात्तं पि ण विसज्जेदि। (विचिन्त्य।) ता इदो अहिण्णाणं अङ्गुलीअअं से विसज्जेम। अधवा दुक्खसीले तवस्सिजणे को अब्भत्थीअदु। णं सहीगामी दोसो त्ति ववसाइदुं पि ण पारेम्ह।

अथवा न तस्य राजर्षेरपराधः, दुर्वासःशापः खल्वेष प्रभवति। अन्यथा कथं स राजर्षि-स्तादृशानि मन्त्रयित्वा एतावतः कालस्य वार्त्तामात्रमपि न विसर्जयति। तदितोऽभिज्ञान-मङ्गुरीयकं विसर्जयामः। अथवा दुःखशीले तपस्विजने कः अभ्यर्थ्यताम्। ननु सखीगामी दोष इति व्यवसायितुमपि न पारयामः। तातकण्वस्य वा प्रवासप्रतिनिवृत्तस्य

शापवृत्तान्तं विभाव्य। प्रभवति स्वशक्तिं प्रकाशयति। तादृशानि दिनत्रयमध्ये एव लोकप्रेरणशपथादिवाक्यानि, मन्त्रयित्वा उक्त्वा। न विसर्जयति स्वनगरादस्माश्रमे प्रेरयति। अतएव च दुर्वाससः शापप्रभावेणायं तस्य राजर्षेर्विस्मृतिरित्यपराधस्तस्य नास्त्येवेति भावः। विचिन्त्य दुर्वासस एव शापमोचनोपायोक्तिं स्मृत्वा। तत् तस्मात्, इतः आश्रमात् अभिज्ञानं दुष्मन्तप्रदत्तं चिह्नभूतम्, विसर्जयामस्तस्य राज्ञः सकाशे प्रेरयामः। येन, तद्दृष्ट्वा स्मृतिं प्राप्स्यतीति भावः। अङ्गुरीयकप्रेरणासम्भवं दर्शयितुमाह अथवेति। दुःखशीले! तपःक्लेशपरायणे! तपस्विजने तपस्विगणमध्ये, को जनः, अभ्यर्थ्यतां राजसमीपे गमनायास्माभिः प्रार्थ्यताम्, अपि तु कोऽपि नेत्यर्थः, तपो विहाय कोऽपि न गच्छेत्, अतश्च अङ्गुरीयकप्रेरणासम्भव एवेति भावः। सखीगामी शकुन्तलागतो दोषः शकुन्तला कथमस्मानशीले जने आत्मानमर्पितवतीति दोषस्तस्या

অথবা সে রাজর্ষির অপরাধ নাই; এ দুর্ব্বাসার শাপের প্রভাব; না হইলে, সেই রাজর্ষি সেইরূপ কথাবার্ত্তা বলিয়া, এত কালের মধ্যে খবরটীও দিতেছেন না। (চিন্তা করিয়া) অতএব সেই চিহ্নস্বরূপ অঙ্গুরীয়টী এখান হইতে পাঠাইয়া দিব। অথবা দুঃখী তপস্বী জনের জন্য কাহার নিকটই বা প্রার্থনা করি। 'ইহা প্রিয়সখীর দোষ' এরূপ

तादकस्सस्स वा प्पवासपड़िणिउत्तस्स दुस्सन्तपरिणीदं आवस्स-सत्तं सउन्तलं णिवेदिदुं। ता एत्थ दाणिं किं णु क्खु अह्मेहिं करणिज्जं। (ग)

प्रियं। प्रविश्य। अणसूए तुवर तुवर सउन्तलाए पत्थाण-कोदूहलं णिव्वत्तिदुं (१)। (घ)

अन। सविस्मयम्। सहि! कधं विअ ? (२)। (ङ)

दुष्मन्तपरिणीताम् आपन्नसत्त्वां शकुन्तला निवेदयितुम्। तदत्र इदानीं किं नु खलु अस्माभिः करणीयम्।

(घ) अनसूये! त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतूहलं निर्वर्त्तयितुम।

(ङ) सखि! कथमिव ?।

एवेत्यर्थः, इति व्यवसाययितुमपि अवधारयितुमपि, न पारयामः आवयोः सर्वथ्रुतान्तस्यैव प्रत्यक्षत्वादित्याशयः। आपन्नं गर्भं प्राप्तं सत्त्वं जन्तुर्यया ताम्, निवेदयितुमपि न पारयाम इति पूर्वेणान्वयः, तस्यानुमतिमन्तरेण एतत्कार्य्यकरणेन प्रत्युत तत्क्रोधस्यैव सम्भवादित्यभिप्रायः। अत्र विषये।

(घ) प्रियमिति। प्रस्थानकौतूहलं भर्त्तृगृहे गमनकालीनकौतुककरमाङ्गलिका-चारम्, निर्वर्त्तयितुं निष्पादयितुम्।

ধারণা করিতেও পারি না এবং দুষ্মন্তকর্ত্তৃক পরিণীত হইয়া শকুন্তলা যে গর্ভবতী হইয়াছে ইহাও, বিদেশ হইতে প্রত্যাগত পিতা কণ্বের নিকট বলিতে পারিব না। অতএব আমাদের এখন কর্ত্তব্য কি ?।

(ঘ) প্রিয়ংবদা। (প্রবেশ করিয়া) অনসূয়া! শকুন্তলার যাত্রাকালীন কৌতুককর মাঙ্গলিক কার্য্য নির্বাহ করিবার জন্য সত্বর হও সত্বর হও।

(१) प्रविश्य प्रियंवदा। सहर्षम्।...पत्थाणकोदुयं।

(२) अनसूया। सहि! कधं एदं ?।

प्रियं । सुणाहि, दाणिं ज्जेव सुहसुत्तिआपुच्छणणिमित्तं सउन्तलाए सआसं गदह्मि (१) । (च)

अन । तदो तदो । (छ)

प्रियं । तदो णं लज्जावणदमुहीं परिस्सइअ सअं तादकस्सेण एव्वं अहिणन्दिदं, "वच्छे ! दिट्ठिआ धूमोवरुद्धदिट्ठिणो वि जजमाणस्स पावअस्स ज्जेव मुहे आहुदी णिपड़िदा, सुसिस्सपरिदिस्सा विअ विज्जा असोअणीआसि मे संवुत्ता । अज्ज ज्जेव तुमं इसिपरिरक्खिदं करिअ भत्तुणो सआसं विसज्जेमि त्ति (२) । (ज)

(च) शृणु, इदानीमेव सुखसुप्तिकाप्रच्छननिमित्तं शकुन्तलायाः सकाशं गतास्मि ।

(छ) ततस्ततः ? ।

(ज) तत एनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकण्वेन एवमभिनन्दितम्— 'वत्से ! दिष्ट्या धूमोपरुद्धदृष्टेरपि यजमानस्य पावकस्यैव मुखे आहुतिर्निपतिता,

(ङ) अनेति । सविस्मयं सहसा कथमित्थं जातमित्याश्चर्य्येण सहितम् ।

(च) प्रियमिति । सुखसुप्तिका रात्रौ सुखेन निद्रा तस्याः प्रच्छननिमित्तं जिज्ञासार्थम् ।

(ঙ) অনসূয়া। সখি! কি রকম?।

(চ) প্রিয়ংবদা। শোন, এখনই আমি সুখনিদ্রা জিজ্ঞাসা করিবার জন্য শকুন্তলার নিকট গিয়াছি।

(ছ) অনসূয়া। তার পর, তার পর?।

(१) प्रियंवदा । सुणाहि दाणिं सुहसइदपुच्छिआ ।

(२) प्रियंवदा । हाव एण्हं धूमाउलिददिट्ठिणो पि पावए एव्व आहुई पड़िदा । वच्छे ! सुविज्ज ।

अन। सहि! केण उण आचक्खिदो तादकस्सस्स अअं वुत्तन्तो (१)। (झ)

---

सुशिष्यपरिदत्तेव विद्या अशोचनीयासि मे संवृत्ता। अद्यैव त्वाम् ऋषिपरिरक्षितां कृत्वा भर्त्तुः सकाशं विसर्जयामि।

(झ) सखि! केन पुनराख्यातस्तातकाश्यपस्यायं वृत्तान्तः?।

(ज) प्रियमिति। एनां शकुन्तलाम्। परिष्वज्य आलिङ्ग्य। एवं वक्ष्यमाण-प्रकारम्, अभिनन्दितम् आनन्देन प्रशंसितम् इति भावे क्तः। धूमेन उपरुद्धा व्याहता दृष्टिर्दर्शनक्रिया यस्य तस्य तादृशस्यापि यजमानस्य, होमकर्त्तुः, आहुतिः, दिष्ट्या भाग्येन, पावकस्यैव मुखे, न पुनर्भस्मकादावित्यर्थः निपतिता। तथा च तादृशाहुतिवत् तपस्यावरुद्धवरान्वेषणव्यापारस्यापि मे कन्या त्वं भाग्यवशादेव महाप्रभावशालिनो दुष्मन्तस्यैव हस्ते पतितासीति भावः। अतएवात्र समादप्रस्तुतात् प्रस्तुतसमप्रतीते-रप्रस्तुतप्रशंसालङ्कारः, उभयोरानुरूप्येण श्लाघाकरणात् समनामालङ्कारश्च इत्युभयो-रेकाश्रयानुप्रवेशरूपः सङ्करः। अतएव च सुशिष्याय परिदत्ता विद्येव त्वम्, मे अशोच-नीयासि। अत्र श्रौतोपमालङ्कारः। ऋषिभिः सहगामिमुनिभिः परिरक्षिताम्। विसर्जयामि प्रेरयामि।

(झ) अनेति। केन जनेन। आख्यातः कथितः।

---

(জ) প্রিয়ংবদা। তার পর, লজ্জায় অবনতমুখী শকুন্তলাকে আলিঙ্গন করিয়া, স্বয়ং পিতা কণ্বই এইরূপ আদর করিলেন যে, "বৎসে! যাহার দৃষ্টি, ধূমে অবরুদ্ধ হইয়াছে, সে যজমানের আহুতিও, ভাগ্যবশতঃ অগ্নির মুখেই পড়িয়াছে। সুতরাং সুশিষ্যে প্রদত্ত বিদ্যার ন্যায় তুই আমার শোকের অবিষয় হইয়াছিস্। আজই তোকে ঋষি-পরিরক্ষিত করিয়া ভর্ত্তার নিকট পাঠাইব।"

(ঝ) অনসূয়া। সখি! পিতা কণ্বের নিকটে এ বৃত্তান্ত বলিল কে?।

---

(१) अङ्ग केण सुदो तादकस्सवस्स वुत्तन्तो?।

प्रियं। अग्गिसरणं पविट्टस्स किल सरीरं विणा छन्दोमईए वाआए (१)। (ञ)

अन। सविस्मयम्। कधं विअ ? (२)। (ट)

प्रियं। सुणाहि। संस्कृतमाश्रित्य (३) (ठ)

दुष्मन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥६॥

(ञ) अग्निशरणं प्रविष्टस्य किल शरीरं विना छन्दोमय्या वाचा।

(ट) कथमिव।

(ठ) शृणु।

(ञ) प्रियमिति। अग्नेः शरणं गृहं होमगृहमित्यर्थः, प्रविष्टस्य तातकण्वस्येति सम्बन्धः। शरीरं प्रयोक्तृवपुः विना अदृष्टप्रयोक्तृशरीरया दैव्या इत्यर्थः, छन्दोमय्या पद्यरूपया, वाचा वाक्येन आख्यात इत्यन्वयः।

(ठ) प्रियमिति। सञ्जातायाः दैववाण्याः अविकलानुकरणार्थं संस्कृताश्रयणमित्यवधेयम्।

दुष्मन्तेनेति। हे ब्रह्मन्! ब्राह्मण! दुष्मन्तेन राज्ञा, आहितं स्थापितम्, तेजो रेतः, भुवो भूतये पृथिव्याः सम्बन्धे, सर्वप्रकारोन्नतिकारणत्वादिति भावः, दधानां धारयन्तीम्, तनयां कन्यां शकुन्तलाम्, अग्निर्गर्भे अभ्यन्तरे यस्यास्ताम्, शमीं तदाख्यलतामिव, अवेहि अवगच्छ।

(ঞ) প্রিয়ংবদা। তিনি হোমগৃহে প্রবেশ করিলে পর ছন্দোবদ্ধ দৈববাণী বলিয়াছে।

(ট) অনসূয়া। (বিস্ময়ের সহিত) কি রকম ?।

(ঠ) প্রিয়ংবদা। শোন। (সংস্কৃতভাষা অবলম্বন করিয়া)

---

(१) छन्दोमईए वाणिआए। (२) कहेहि।

(३) क्वचित् सुणाहि इति नास्ति।

অন। (প্রিয়ংবদামাশ্লিষ্য।) সহি! পিঅং মে পিঅং। কিন্তু অজ্জ জ্জেব সউন্তলা ণীঅদি ত্তি উক্কণ্ঠাসাহারণং পরিদোষং অণুভবেমি। (ড)

প্রিয়ং। সহি! অহ্মে কধং পি উক্কণ্ঠং বিণোদইস্সামো, সা দাণিং তবস্সিণী ণিব্বুদা হোদু (১)। (ঢ)

(ড) সখি! প্রিয়ং মে প্রিয়ম্। কিন্ত্বদ্যৈব শকুন্তলা নীয়ত ইতি উৎকণ্ঠাসাধারণং পরিতোষমনুভবামি।

(ঢ) সখি! বয়ং কথমপি উৎকণ্ঠাং বিনোদয়িষ্যামঃ, সা ইদানীং তপস্বিনী নির্বৃতা ভবতু।

অত্র শ্রৌতোপমালঙ্কারঃ।

"শুক্রং তেজোরেতসী চ বীজবীর্য্যেন্দ্রিয়াণি চ" ইত্যমরঃ ॥৬॥

(ড) অনেতি। নীয়তে মুনিভিঃ পতিগৃহমিতি শেষঃ। ইতি হেতোঃ, উৎকণ্ঠয়া বিয়োগবশাৎ সাতিশয়বিষাদেন সাধারণং সমানম্, পরিতোষমানন্দম্। তথা চ শীঘ্রভাবি-বিয়োগচিন্তয়া বিষাদ দীনা সখী শকুন্তলা পতিসঙ্গতা সতী শীঘ্রমেব নির্বৃতা ভবিষ্যতীতি বিষাদতুল্যমেব পরিতোষম্, অনুভবামীত্যাশয়ঃ।

"সাধারণন্তু সামান্যম্" ইত্যমরঃ।

(ঢ) প্রিয়মিতি। কথমপি কেনাপি প্রকারেণ তীব্রতপঃপ্রভৃত্যাদিনেতি যাবৎ,

হে ব্রাহ্মণ! অগ্নিগর্ভা শমীলতার ন্যায় আপনার কন্যা, ভূমণ্ডলের মঙ্গলের নিমিত্ত, দুষ্মন্তকর্ত্তৃক স্থাপিত তেজ ধারণ করিতেছে ইহা অবগত হউন ॥৬॥

(ড) অনসূয়া। (প্রিয়ংবদাকে আলিঙ্গন করিয়া) সখি! এই ঘটনা প্রীতিকর, আমার প্রীতিকর বটে। কিন্তু আজই শকুন্তলাকে নিয়া যাইবে এই জন্য উৎকণ্ঠার তুল্যই সন্তোষ অনুভব করিতেছি।

(১) সহি! বঅং দাব উক্কণ্ঠং বিণোদইস্সামো, সা তবস্সিণী।

अन। तेण हि एदस्सिं चूअसाहावलम्बिदे णारिएल-समुग्गए एदण्णिमित्तं ज्जेव मए कालहरणक्खमा केसरगुण्डा णिक्खित्ता चिट्ठदि। ता इमं णलिणीवत्तगदं करेहि। जाव से अहं पि गोरोअणं तित्थमित्तिअं दुव्वाकिसलआइं मङ्गलसमालहणं विरएमि (१)। (ण)

(ण) तेन हि एतस्मिन् चूतशाखावलम्बिते नारिकेलसमुद्गके एतन्निमित्तमेव मया कालहरणक्षमा केसरगुण्डा निक्षिप्ता तिष्ठति। तदिमां नलिनीपत्रगतां कुरु। यावदस्या अहमपि गोरोचनां तीर्थमृत्तिकां दूर्वाकिसलयानि मङ्गलसमालम्भनं विरचयामि।

उत्कण्ठां शकुन्तलाविच्छेदजनितविषादम्, विनोदयिष्यावो निवारयिष्यावः, तथापीति शेषः, तपस्विनी मातापितृहीनतया शोच्या, सा शकुन्तला, निर्वृता पतिसंयोगेन सुखा। तथा च शकुन्तलायाः पतिवियोगदुःखापेक्षया आवयोः शकुन्तलावियोगदुःखं वरमिति भावः।

(ण) अनेति। तेन हि शकुन्तलायाः पतिगृहे गन्तव्यत्वेनैव हेतुना, चूतस्य आम्रवृक्षस्य शाखायामवलम्बिते रज्जुनिबद्धे, नारिकेलस्य समुद्गके सम्पुटके 'खोल' इति प्रसिद्धे, एतन्निमित्तमेव पतिगृहे शकुन्तलाया गमनकाले प्रसाधनार्थमेव कालहरण-क्षमा दीर्घकालस्थायिनी, केसरगुण्डा नागकेसरपुष्पपरागः, निक्षिप्ता अर्पिता। तत् तस्मात्, इमां केसरगुण्डाम्, नलिन्याः पद्मलतायाः पत्रे गतां पातितां प्रसाधनकाले अनायासेनोत्तोलनार्थमिति भावः। दूर्वायाः किसलयानि पल्लवान्, मङ्गलं मङ्गलजनकं समालम्भनमनुलेपनम् उक्तविषयात्मकमनुलेपनमित्यर्थः।

(চ) প্রিয়ংবদা। সখি! আমরা কোন রকমে উৎকণ্ঠার নিবৃত্তি করিব ; তথাপি সেই দুঃখিনী এখন সুস্থ হউক।

(१) णिक्खित्ता मए केसरमालिआ। ता इमं हत्थसंखिदं करेहि। जाव अहं पि से मअलोअणं तित्थमित्तिअं दुव्वाकिसलआणि त्ति मङ्गलसमालम्भणाणि विरएमि।

প্রিয়ংবদা তথা করোতি। অনসূয়া নিষ্ক্রান্তা (১)।

নেপথ্যে। গৌতমি! আদিশ্যন্তাং শার্ঙ্গরব-শারদ্বতমিশ্রাঃ বৎসাং শকুন্তলাং নেতুং সজ্জীভবন্তু ভবন্ত ইতি (২)। (ত)

প্রিয়ং। অণসূএ! তুবর তুবর। এদে ক্খু হত্থিণাউর-গামিণো ইসীও সদ্দাবিঅন্তি (৩)। (থ)

(থ) অনসূয়ে! ত্বরস্ব ত্বরস্ব। এতে খলু হস্তিনাপুরগামিন ঋষয়ঃ শব্দায়ন্তে।

(ত) নেপথ্য ইতি। গৌতমীতি কণ্বস্য ধর্ম্মভগিনীসম্বোধনম্। শার্ঙ্গস্য শৃঙ্গ-নির্ম্মিতস্য ধনুষ ইব রবঃ কণ্ঠধ্বনির্যস্য স শার্ঙ্গরবো নাম শিষ্যবিশেষঃ। শরদ্বান্ নাম কশ্চিন্মুনিস্তদপত্যমিতি শারদ্বতঃ তদাখ্যোঽপি কশ্চিত্ শিষ্যঃ তদুভয়াদ্যা মিশ্রাঃ প্রধানা মুনয়ঃ। নেতুং প্রতিগৃহ্যমিতি শেষঃ। সজ্জীভবন্তু উদ্যতা ভবন্তু ইতি আদিশ্যন্তা-মিত্যন্বয়ঃ।

(ণ) অনসূয়া। তাহা হইলে, এই আমের ডালে ঝুলান নারি-কেলের খোলের ভিতরে আমি এই জন্যই অনেকদিনস্থায়ী নাগকেসর-ফুলের রেণু রাখিয়া দিয়াছি; তা এইগুলি তুমি পদ্মের পাতায় ঢালিয়া রাখ; আমিও উহার জন্য গোরোচনা, তীর্থের মাটী ও দূর্ব্বার আগা দিয়া, মাঙ্গলিক অনুলেপন তৈয়ার করি।

প্রিয়ংবদা তাহাই করিতে লাগিল, অনসূয়া চলিয়া গেল।

(ত) নেপথ্যে। গৌতমি! বৎসা শকুন্তলাকে নিয়া যাইবার জন্য শার্ঙ্গরব ও শারদ্বতমিশ্রপ্রভৃতিকে আদেশ কর যে, তোমরা প্রস্তুত হও।

(১) প্রিয়ংবদা। তহ করীঅদু। প্রিয়ংবদা নাট্যেন সুমনসো গৃহ্ণাতি।

(২) নেপথ্যে। গৌতমি! আদিশ্যন্তাং শার্ঙ্গরবমিশ্রাঃ শকুন্তলানয়নায়।

(৩) প্রিয়ংবদা। কর্ণং দত্ত্বা।

অন। সমালম্ভনহস্তা প্রবিশ্য। সহি! এহি গচ্ছম্হ। ইতি পরিক্রামতঃ (১)। (ট)।

প্রিয়ং (২)। বিলোক্য। এসা সুজ্জোদএ কিদমজ্জণা পড়িচ্ছিদণীবারভাঅণাহিং সোত্থিবাঅণিআহিং তাবসীহিং অহিণন্দীঅমাণা চিট্ঠদি সউন্তলা, তা উবসপ্পম্হ ণং। ইত্যুভে তথা কুরুতঃ (৩)। (ধ)

(ট) সখি! এহি গচ্ছাবঃ।

(ধ) এষা সূর্য্যোদয়ে কৃতমজ্জনা প্রতীষ্টনীবারাভিঃ স্বস্তিবাচনিকাভিঃ তাপসীভিরভিনন্দ্যমানা তিষ্ঠতি শকুন্তলা, তদুপসর্পাব এনাম।

(থ) প্রিয়মিতি। হস্তিনাপুরং গমিষ্যন্তীতি হস্তিনাপুরগামিনঃ। শব্দায়ন্তে শব্দং কুর্ব্বন্তি কোলাহলং কুর্ব্বন্তীত্যর্থঃ। অতএব শকুন্তলাং প্রসাধয়িতুং ত্বরস্বেতি ভাবঃ।

(ট) অনেতি। সমালম্ভনম্ উক্তানুলেপনং হস্তে যস্যাঃ সা।

(ধ) প্রিয়মিতি। সূর্য্যোদয়ে পতিগৃহে গমনানুরোধাৎ সূর্য্যোদয় এবেত্যর্থঃ, কৃতং মজ্জনমবগাহনস্নানং যয়া সা। "অস্নাতস্তু পুমান্নার্হো জপ্যাদিহবনাদিষু" ইতি স্মৃতের্যাত্রাঙ্গকর্ত্তব্যকর্ম্মাধিকারার্থং শরীরসৌন্দর্য্যার্থঞ্চ কৃতমজ্জনেত্যাশয়ঃ। প্রতীষ্টা মঙ্গলার্থং গৃহীতা নীবারা মুনিধান্যতণ্ডুলা যাভিস্তাভিঃ, স্বস্তিবচনেন আশীর্ব্বাদেন সংহৃষ্টা ইতি স্বস্তিবাচনিকাস্তাভিঃ। "ক্বচিদুত্তরপদস্য" ইতি পরপদে দীর্ঘঃ। অভিনন্দ্যমানা আশীর্ব্বাদৈঃ সম্বর্দ্ধ্যমানা। উভে সখ্যৌ, তথা উপসর্পণম্।

(থ) প্রিয়ংবদা। অনসূয়া! ত্বরা কর, ত্বরা কর; হস্তিনাপুরগামী ঋষিরা এই কোলাহল করিতেছেন।

(দ) অনসূয়া। (অনুলেপনহস্তে প্রবেশ করিয়া) সখি! আইস যাই। (এই বলিয়া উভয়ে পাদক্ষেপ করিতে লাগিল।)

(১) পরিক্রামতঃ।

(২)···সুজ্জোদয় এব্ব সিহামজ্জিদা পড়িচ্ছিদণীবারহত্থাহিং উবসপ্পামো ণং। উপসর্পতঃ। (৩)·· যথোদ্দিষ্টব্যাপারা আসনস্থা শকুন্তলা।

[Uttarpara Jaikrishna] Public Li

ततः प्रविशति यथानिर्दिष्टव्यापारा सपरिवारा शकुन्तला। (न)

शकु। भअवदीओ वन्दामि (१)। (प)

गौतमी। जादे! भत्तुणो वहुमाणसुहहेतुअं देवीसद्दं अहिगच्छ (२)। (फ)

(प) भगवतीर्वन्दे।

(फ) जाते! भर्त्तुर्बहुमानसुखहेतुकं देवीशब्दमभिगच्छ।

---

(न) तत इति। यथानिर्द्दिष्टव्यापारा मज्जनाभिनन्दनव्यापारान्विता सपरिवारा तापसीभिः परिवृता।

(प) शकु इति। भगवतीर्युष्मान् तापसीः।

(फ) गौतमीति। जाते! तनये। भर्त्तुर्दुष्मन्तस्य बहुमानः अत्यादरः सर्वप्रकारेण सुखञ्च तयोर्हेतुकं हेतुभूतम्, देवीशब्दम् अभिगच्छ प्राप्नुहि, दुष्मन्तस्य महिष्येव भवेत्यर्थः। "देवी कृताभिषेकायामितरासु च भट्टिनी" इत्यमरः।

(ध) প্রিয়ংবদা। (দেখিয়া) এই শকুন্তলা, সূর্য্যোদয়ের সময় স্নান করিয়া অবস্থান করিতেছে, আর উত্তীধানের পাত্র হাতে করিয়া, আশীর্ব্বাদের নিমিত্ত আগত তাপসীরা উহার সংবর্দ্ধনা করিতেছেন। অতএব উহার নিকটে যাই। (এই বলিয়া উভয়ে শকুন্তলার নিকটে গেল।)

(ন) তদনন্তর নির্দ্দিষ্টরূপে তাপসীগণে পরিবেষ্টিত হইয়া, শকুন্তলার প্রবেশ।

(প) শকুন্তলা। আপনাদিগকে নমস্কার করি।

(ফ) গৌতমী। বৎসে! ভর্ত্তার আদর ও সুখের কারণ দেবীশব্দ লাভ কর।

(१) अयं पाठः क्वचिन्नास्ति।

(२) शकुन्तलां प्रति तापसीनामन्यतमा। बहुमाणसूचअं महादेईसद्दं लहेहि।

तापस्यः। वीरप्पसविणी होहि। इत्याशिषो दत्त्वा गौतमीवर्जं सर्वा निष्क्रान्ताः (१)। (ब)

सख्यौ। उपगम्य। सम्मज्जणं दे भूदं ? (२)। (भ)

शकु। साअदं पिअसहीणं ? इदो णिसीदध (३)। (म)

सख्यौ। उपविश्य। हला ! उज्जुआ दाव होहि, जाव दे मङ्गलसमालहणं करेह्म (४)। (य)

(ब) वीरप्रसविनी भव।

(भ) सम्मज्जनं ते भूतम्।

(म) स्वागतं प्रियसख्योः ? इतो निषीदतम्।

(य) हला ! ऋजुका तावत् भव, यावत्ते मङ्गलसमालम्भनं कुर्वः।

(ब) तापस्य इति। वीरं पुत्रं प्रसोतुं शीलं यस्याः सा वीरप्रसविनी। "प्रजु-सुवोरिन्" इतीन्प्रत्ययः। गौतमीं वर्जयित्वेति गौतमीवर्जम्। कर्म्मण्यम्।

(भ) सख्याविति। सम्मज्जनमवगाहनम्, ते भूतमिति काक्वा प्रश्नो व्यज्यते।

(म) शकु इति। स्वागतं सुखेनागमनं जातं किमिति काकुः। इतः अस्मिन् स्थाने, निषीदतम् उपविशतम।

(ब) তাপসীগণ। বীরপ্রসবিনী হও। (এইভাবে আশীর্ব্বাদ করিয়া গৌতমী ভিন্ন আর সকলেই চলিয়া গেলেন।)

(ভ) সখীদ্বয়। (নিকটে যাইয়া) তোমার স্নান হইয়াছে ?।

(ম) শকুন্তলা। সখীদের শুভাগমন ত ? এইখানে উপবেশন কর।

(१) द्वितीया। वच्छे ! वीरप्पसविणी होहि। तृतीया। वच्छे ! भत्तुणो बहुमदा होहि। आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः।

(२) सख्यौ। उपसृत्य। सहि ! सुहमज्जणं दे होदु। (३) साअदं मे सहीणं।

(४) उभे। मङ्गलपात्राण्यादाय उपविश्य। हला ! सज्जा होहि, जाव मङ्गलसमालम्भणं विरचेम।

শকু। উইদং পি এদং অজ্জ বহুমণিদব্বং, জদো দুল্লহং দাব পুণো মে পিঅসহীমণ্ডণং ভবিস্সদি। ইতি বাষ্পং বিসৃজতি (১)। (র)

সখ্যৌ। সহি! ণ জুত্তং মঙ্গলকালে রোদিদুং।
ইত্যশ্রূণি প্রমৃজ্য নাট্যেন প্রসাধয়তঃ (২)। (ল)

(র) উচিতমপ্যেতত্ অদ্য বহুমন্তব্যম্, যতো দুর্লভং তাবত্ পুনর্মে প্রিয়সখীমণ্ডনং ভবিষ্যতি।

(ল) সখি! ন যুক্তং মঙ্গলকালে রোদিতুম্।

(য) সখ্যাবিতি। হলেতি সম্বোধনে। তাবত্ কালং ব্যাপ্য, ঋজুকা সরলা সরলভাবেন দণ্ডায়মানা ভব, যাবত্ কালং ব্যাপ্য, তে তব মঙ্গলসমালম্ভনং মাঙ্গলিক-গাত্রানুলেপনম্।

(র) শকু ইতি। উচিতমপি চিরাভ্যস্তমপি এতত্ যুষ্মত্কর্তৃকগাত্রানুলেপনম্, অদ্য বহুমন্তব্যম্ অতিশয়েনাদর্তব্যম্। ভবিষ্যতীতি ভাবিবিচ্ছেদাদিতি ভাবঃ। বাষ্পং বিচ্ছেদস্মরণেন শোকোদয়াত্ অশ্রুজলম্।

(ল) সখ্যাবিতি। মঙ্গলকালে পতিগৃহে মাঙ্গলিকযাত্রাকালে, কুলস্ত্রিয়াঃ পতিগৃহগমনং মঙ্গলমেবেতি ভাবঃ। অশ্রূণি শকুন্তলায়া নয়নজলানি। প্রসাধয়তঃ অলঙ্কুরুতঃ।

(য) সখীদ্বয়। (উপবেশন করিয়া) ওলো! সোজা হইয়া দাঁড়াও, তোমার মাঙ্গলিক গাত্রানুলেপন করিব।

(র) শকুন্তলা। ইহা চিরকালের অভ্যস্ত হইলেও, আজ ইহার বিশেষ আদর করিতে হইবে; কারণ, আবার প্রিয়সখীদের হাতে সজ্জিত হওয়া আমার পক্ষে দুর্লভ হইবে। (এই বলিয়া অশ্রু ত্যাগ করিতে লাগিল।)

(১) ইদং বি বহুমন্তব্বং। দুল্লহং দাণিং মে সহীমণ্ডণং হোহিই।

(২) উভে। সহি! উইদং ণ দে।

প্রিয়ং। সহি! আহরণারিহং দে রূঅং অস্সমসুলহেহিং পসাহণেহিং বিপ্পআরীঅদি (১)। (র)

প্রবিশ্য আভরণহস্ত ঋষিকুমারঃ। ইদমলঙ্কারজাতম্, অলঙ্ক্রিয়তামায়ুষ্মতী (২)। (স)

সর্ব্বা বিলোক্য বিস্মিতাঃ। (ষ)

(র) সখি! আভরণার্হং তে রূপম্ আশ্রমসুলভৈঃ প্রসাধনৈঃ বিপ্রকার্য্যতে।

(র) প্রিয়মিতি। আভরণার্হং কটককুণ্ডলাদ্যলঙ্কারযোগ্যম্। রূপমাকৃতিঃ। অতএব আশ্রমে সুলভৈরনায়াসলভ্যৈঃ কুসুমাদিভিঃ প্রসাধনৈরলঙ্কারৈঃ, বিপ্রকার্য্যতে নিন্দ্যতে। ছলা। মনোহরমিদং রূপং তুচ্ছৈঃ পুষ্পাদিভির্ভূষিতমিতি লোকনিন্দা জন্যতে ইত্যর্থঃ।

"নিকারো বিপ্রকারঃ স্যাৎ" ইত্যমরঃ।

(স) প্রবিশ্যেতি। পরিচয়াৎ পূর্ব্বং নামাপরিজ্ঞানেন ঋষিকুমার ইতি সামান্যতো নির্দ্দেশঃ। অলঙ্কারাণাং জাতং সমূহঃ। অলঙ্ক্রিয়তাম্ এতেন ভূষ্যতাম্, আয়ুষ্মতী প্রশস্তায়ুঃশালিনী শকুন্তলা।

(ষ) সর্ব্বা ইতি। বিস্মিতাঃ অলঙ্কারাণাং বহুমূল্যত্বাৎ প্রচুরত্বাৎ হঠাৎ প্রাপ্তত্বাচ্চেতি ভাবঃ।

(ল) সখীদ্বয়। সখি! মঙ্গলের সময় রোদন করা উচিত নহে। (এই বলিয়া, চোখের জল মুছাইয়া, অভিনয়ের ধরণে সাজাইতে লাগিল।)

(ব) প্রিয়ংবদা। সখি! বাস্তবিক অলঙ্কারের যোগ্য তোমার আকৃতি, তপোবনের অনায়াসলভ্য পুষ্পপ্রভৃতি অলঙ্কারে নিন্দিত হইতেছে।

(শ) কোন মুনিকুমার অলঙ্কার হস্তে প্রবেশ করিয়া। এই অলঙ্কারসমূহ; ইহাদ্বারা আয়ুষ্মতী শকুন্তলাকে অলঙ্কৃত কর।

---

(১) আহরণোচিদং রূবং।

(২) প্রবিশ্য উপায়নহস্তৌ ঋষিকুমারকৌ। ইদমলঙ্করণম্, অলঙ্ক্রিয়তামত্রভবতী।

गौतमी। वच्छ ! हारीद ! कुदो इदं आसादिदं ? (१)। (स)

हारी। तातकण्वप्रभावात् (२)। (ह)

गौतमी। किं माणसी सिद्धी। (क्ष)

हारी। न खलु, श्रूयताम्, तत्रभवता कण्वेन वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति। ततश्च—(३) (क)

---

(स) वत्स ! हारीत ! कुत इदमासादितम् ?।

(क्ष) किं मानसी सिद्धिः ?।

---

(स) गौतमीति। आसादितं लब्धम्।

(ह) हारीति। गौतम्या ऋषिकुमारस्य नाम्नः परिचायितत्वात् हारीत इति निर्द्देश्ये संक्षेपार्थं हारीति निर्द्देशः। तातस्य गुरुत्वेन पितृस्थानीयस्य कण्वस्य प्रभावात् शक्तेः, आसादितमित्यन्वयः।

(क्ष) गौतमीति। मनस इयं मानसी तपःप्रभावात् मनःसङ्कल्पमात्रेण अस्यालङ्कारजातस्य किं सिद्धिरित्यर्थः।

(क) हारीति। न खलु मानसी सिद्धिरित्यन्वयः। वनस्पतिभ्यो वृक्षेभ्यः। "वनस्पतिर्द्रुमात्रे" इति विश्वः।

---

(ষ) (সকলে দেখিয়া বিস্ময়াপন্ন হইল।)

(স) গৌতমী। বৎস ! হারীত ! ইহা কোথা হইতে পাইলে ?।

(হ) হারীত। পিতা কণ্বের প্রভাবে।

(ক্ষ) গৌতমী। এগুলি কি কেবল মনের সঙ্কল্পেই জন্মিয়াছে ?।

(ক) হারীত। না, শুনুন, পূজনীয় কণ্ব, "শকুন্তলার জন্য বৃক্ষসমূহ হইতে পুষ্প আনয়ন কর" এইরূপ আমাদিগকে আদেশ করিয়াছিলেন। তাহার পর—

(१) गौतमी। कुदो एदं ?। (२) प्रथमः। तातकाश्यपप्रभावात्।

(३) द्वितीयः। तत्रभवता वयम्। तत इदानीम्।

ক্ষৌমং কেনচিদিন্দুপাণ্ডু তরুণা মাঙ্গল্যমাবিষ্কৃতং
নিষ্ঠ্যূতশ্চরণোপরাগসুভগো লাক্ষারসঃ কেনচিৎ ।
অন্যেভ্যো বনদেবতাকরতলৈরাপর্ব্বভাগোত্থিতৈঃ
দত্তান্যাভরণানি নঃ কিসলয়চ্ছায়াপরিস্পর্দ্ধিভিঃ (১) ॥৭॥

ক্ষৌমমিতি । কেনচিত্ তরুণা, ইন্দুবৎ চন্দ্রবৎ পাণ্ডু শুভ্রম্, মাঙ্গল্যং মঙ্গলায় কর্ম্মণে হিতম্, ক্ষৌমং পট্টবস্ত্রম্, আবিষ্কৃতং স্বদেহাদাবিষ্কৃত্য সমর্পিতম্ । কেনচিৎ অপরেণ তরুণা, চরণয়োরুপরাগে রঞ্জনে সুভগো মনোহরঃ, লাক্ষারসঃ অলক্তকদ্রবঃ, নিষ্ঠ্যূতঃ উদ্গীর্ণঃ বহিষ্কৃত্য দত্তঃ । তথা অন্যেভ্যস্তরুভ্যঃ, আপর্ব্বভাগং মণিবন্ধপর্য্যন্তম্ উত্থিতৈর্বহির্গতৈঃ, কিসলয়ানাং পল্লবানাং ছায়াং কান্তিং পরিস্পর্দ্ধিতুমনুকর্ত্তুং শীলং যেষাং তৈঃ পল্লববৎ পাটলবর্ণৈরিত্যর্থঃ, বনদেবতানাং করতলৈঃ পাণিভিঃ কর্তৃভিঃ, নঃ অস্মাকমন্তিকে আভরণানি নানাবিধালঙ্কারাঃ, দত্তানি শকুন্তলার্থমর্পিতানি ।

অত্র ইন্দুপাণ্ডু ইতি কিসলয়চ্ছায়াপরিস্পর্দ্ধিভিরিতি সমাসগতং লুপ্তোপমাদ্বয়ম্, তয়োশ্চ পরস্পরনিরপেক্ষস্থিতেঃ সংসৃষ্টিঃ । তথা নিরুক্তির্নাম লক্ষণঞ্চ । যথা দর্পণে—

"পূর্ব্বসিদ্ধার্থকথনং নিরুক্তিরিতি কীর্ত্ত্যতে ।"

"সুন্দরেঽধিকভাগ্যে চ দুর্হৃন্নেতরবাসরে । তুরীয়াংশে শ্রীমতি চ সুভগঃ—" ইতি শব্দার্ণবঃ । "ছায়া সূর্য্যপ্রিয়াকান্তিপ্রতিবিম্বমনাতপঃ" ইত্যমরঃ ।

শার্দ্দূলবিক্রীড়িতং বৃত্তম্ ॥৭॥

কোন বৃক্ষ, চন্দ্রের ন্যায় শুভ্রবর্ণ মাঙ্গলিক পট্টবস্ত্র আবিষ্কার করিয়া দিল, কোন বৃক্ষ, চরণ রঞ্জিত করিবার পক্ষে বড়ই সুন্দর অলক্তক নিঃসৃত করিয়া সমর্পণ করিল এবং অন্যান্য বৃক্ষ হইতে, মণিবন্ধদেশ-পর্য্যন্ত উত্থিত পল্লবশোভানুকারী বনদেবতাদিগের হস্ত, আমাদের নিকট নানাবিধ অলঙ্কার দিল ॥৭॥

(১) দত্তান্যাভরণানি । তৎকিসলয়োদ্ভেদপ্রতিদ্বন্দ্বিভিঃ ।

प्रियं। शकुन्तलां विलोक्य। हला! कोडरसम्भवा वि महुअरी पोक्खरमहुं ज्जेव अहिलसदि (१)। (ख)

गौतमी। जादे! इमाए अब्भुववत्तीए सूइदा भत्तुणो गेहे अणुहोदव्वा रामलच्छी। (ग)

शकु। लज्जां नाटयति (२)। (घ)

(ख) हला! कोटरसम्भवापि मधुकरी पुष्करमध्वेव अभिलषति।

(ग) जाते! अनया अभ्युपपत्त्या सूचिता भर्त्तुर्गेहे अनुभवितव्या राजलक्ष्मीः।

(ख) प्रियमिति। कोटरे तरुगात्रस्थविवरे सम्भवतीति सा, मधुकरी भ्रमरी, पुष्करस्य पद्मस्य मधु एव अभिलषति अभिलष्य प्राप्नोति। तथा चेयं शकुन्तला तपोवनजातापि दुष्यन्तवाहिनीभोग्यामलङ्कारान् प्राप्नोति भावः।

अतएवात्र अप्रस्तुतात् समात् प्रस्तुतसमप्रतीतेरप्रस्तुतप्रशंसालङ्कारः।

(ग) गौतमीति। जाते! तनये! अनया वसनभूषणादिदानात् वनदेवतागत-कृतया अभ्युपपत्त्या अनुग्रहेण। राजलक्ष्मी राजमहिष्युपयोगिसम्पत्, अनुभवितव्या सूचिता त्वया शकुन्तलया भोक्तव्यत्वेन ज्ञापिता, उपक्रमे सुखभोगापाते भाविसुखभोगस्य सर्वत्र दर्शनात् उपक्रम एव च वनदेवतादत्तवसनभूषणादिलाभेन शकुन्तलायाः सुख-भोगापातादित्याशयः।

"अभ्युपपत्तिरनुग्रहः" इत्यमरः।

(খ) প্রিয়ংবদা। (শকুন্তলার দিকে চাহিয়া) ওলো! কোটর-জাতা ভ্রমরীও, পদ্মের মধুই চায়।

(গ) গৌতমী। বৎসে! বনদেবতাদের এই অনুগ্রহে ইহাই বুঝা যাইতেছে যে, তুই ভর্তার গৃহে রাজলক্ষ্মী ভোগ করিতে পারিবি।

(ঘ) শকুন্তলা। (লজ্জা অভিনয় করিল।)

---

(१) हला! इमाए इत्यादि परवाक्यम्।

(२) शकुन्तला। व्रीडां रूपयति।

हारी । यावदिमां वनस्पतिसेवामभिषेकार्थं मालिनी-मवतीर्णाय तत्रभवते कण्वाय निवेदयामि । इति निष्क्रान्तः (१) । (ङ)

अन । सहि ! अणणुभूदभूसणो अअं जणो कधं तुमं अलङ्करेदि । चिन्तयित्वा विलोक्य च । चित्तपरिचएण दाणिं दे अङ्गेसु आहरणविणिओअं करेम्ह (२) । (च)

(च) सखि ! अननुभूतभूषणः अयं जनः कथं त्वामलङ्करोति । चित्रपरिचयेन इदानीं ते अङ्गेषु आभरणविनियोगं कुर्वः ।

---

(घ) शकु इति । नाटयति अभिनयति, गुरुजनेन भर्त्तृकथोत्थापने स्त्रीणां लज्जायाः स्वाभाविकत्वादिति भावः ।

(ङ) हारीति । यावच्छब्दो वाक्यालङ्कारे । वनस्पतिसेवां तपोवनतरुसमूह-कृतपरिचर्य्यां वसनभूषणादिदानेन तत्कृतोपकारमित्यर्थः, अभिषेकार्थं स्नानार्थम्, मालिनीं तदाख्यां नदीम् । तथा चैतच्छ्रवणे कण्वस्य महान् सन्तोषो भवेदिति भावः ।

(च) अनेति । अननुभूतानि धारणेन दर्शनेन वा न ज्ञातानि भूषणानि येन सः, कदाचिदपि नाहमलङ्कारान् धृतवती न वा अन्यत्रापि दृष्टवतीत्यर्थः, अयं मत्स्वरूपो जनः, कथमलङ्करोति अलङ्कर्त्तुं शक्नोति, कथमपि नेत्यर्थः, अलङ्कारनिवेशनस्थाना-परिचयादिति भावः । चिन्तयित्वा अलङ्कारार्पणदेशं विभाव्य, विलोक्य चित्रकारेण शकुन्तलायास्तत्तदङ्गं निरूप्य । चित्रपरिचयेन आलिख्यपटे स्त्रियः यत्र यत्राङ्गे यद्-यदाभरणं तिष्ठन्ति, तत्तत्स्मरणेनेत्यर्थः । आभरणविनियोगम् अलङ्कारपरिधापनम् ।

---

(ঙ) হারীত। পূজনীয় কণ্ব, স্নান করিবার জন্য মালিনীনদীতে নামিয়াছেন ; বৃক্ষগণের এই সেবা তাঁহাকে গিয়া জানাই। ( এই বলিয়া চলিয়া গেল। )

---

(१) प्रथमः । गौतम ! एह्येहि, अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः । द्वितीयः । तथा । निष्क्रान्तौ ।

(२) सख्यौ । अए अणवहुत्तभूसणो अअं जणो । चित्तकम्मपरिचएण अङ्गेसु दे ।

शकु । जाणामि वो णिउणत्तणं । (छ)

सख्यौ । नाट्येनालङ्कारान् विनियुञ्जाते (१) । (ज)

तत: प्रविशति स्नानोत्तीर्णः कण्वः (२) । (झ)

कण्वः । विचिन्त्य (३)

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजड़ं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः (४) ॥८॥

इति परिक्रामति ।

(छ) जानामि वां निपुणत्वम् ।

(छ) शकु इति । वां युवयोः । तथा च सर्वेष्वेव विषयेषु युवयोर्नैपुण्य-सत्त्वादवापि तन्नैपुण्यमव्याहतमेवेति भावः ।

(ज) सख्याविति । नाट्येन अभिनयमात्रेण, न पुनर्वास्तविकत्वेनेत्यर्थः । विनि-युञ्जाते परिधापयतः ।

(झ) तत इति । स्नानोत्तीर्णः स्नानात् परं मालिनीनदीत उत्थितः । एतेन आर्द्रदेहत्वं सूचितम् ।

(চ) অনসূয়া । সখি ! এই ব্যক্তি অলঙ্কারের কোন অনুভবই করে নাই ; সুতরাং কি প্রকারে তোমাকে অলঙ্কৃত করিবে । ( চিন্তা করিয়া এবং দেখিয়া ) চিত্রের পরিচয়ে এখন তোমার অঙ্গে অলঙ্কার সন্নিবিষ্ট করিব ।

(ছ) শকুন্তলা । তোমাদের নৈপুণ্য জানি ।

(জ) সখীদ্বয় । ( অভিনয়ের ধরণে অলঙ্কার পরাইতে লাগিল । )

(१) उभे । नाट्येनालङ्कुरुतः । (२) स्नानोत्तीर्णः काश्यपः ।

(३) काश्यपः । (४) अन्तर्वाष्पभरोपरोधि गदितं । तावदीदृशमहो । कथं नु ।

যাস্যতীতি। অদ্য শকুন্তলা যাস্যতি পতিগৃহং গমিষ্যতি, ইতি হেতোঃ, উৎকণ্ঠয়া উন্মনস্কত্বভাবেন, হৃদয়ং মম মনঃ, সংস্পৃষ্টং সম্বদ্ধমাক্রান্তমিতি যাবৎ, কণ্ঠঃ স্বরঃ, স্তম্ভিতানামন্তর্নিরুদ্ধানামপি বাষ্পাণাম্ অশ্রুজলানাং বৃত্ত্যা পুনরাগমেন কলুষঃ অস্বচ্ছঃ অস্পষ্ট ইত্যর্থঃ; তথা দর্শনং দৃষ্টিপাতঃ, চিন্তয়া শকুন্তলাবিয়োগভাবনয়া জড়ং বিষয়পরিচ্ছেদাসমর্থং জাতমিতি শেষঃ। তেন চ, অরণ্যং বনমেব ওকঃ আশ্রয়ো যস্য তস্যাপি সর্বদা বনবাসিনোঽপীত্যর্থঃ মম, স্নেহাৎ শকুন্তলাং প্রতি বাৎসল্যাৎ, ঈদৃশং সাতিশয়মিতি তাৎপর্য্যম্, বৈক্লব্যং বিহ্বলত্বম্, তাবৎ জাতমিতি শেষঃ, অতএব নবৈঃ নূতনৈঃ, তনয়াবিশ্লেষদুঃখৈঃ কন্যাবিয়োগকষ্টৈঃ, গৃহিণো গৃহস্থজনাঃ, কথং ন পীড্যন্তে ক্লিশ্যন্তে, অবশ্যমেব পীড্যন্ত ইত্যর্থঃ। সর্বথা বিষয়পরাঙ্মুখস্য বানপ্রস্থিজনস্য কন্যাবিচ্ছেদদুঃখসম্ভবে বিষয়কূপমগ্নস্য গৃহস্থস্য তাদৃশদুঃখমবশ্যমেব সম্ভবতীতি ভাবঃ।

অত্র বৈক্লব্যং প্রতি উৎকণ্ঠাস্পর্শরূপে একস্মিন্ কারণে সত্যপি কণ্ঠকালুষ্যাদি-কারণান্তরদ্বয়োপন্যাসাৎ সমুচ্চয়োঽলঙ্কারঃ, পরার্দ্ধে অর্থাপত্তিশ্চ, এতেষাং পরস্পর-নিরপেক্ষতয়া সংসৃষ্টিঃ। তথা অরণ্যৌকস ইত্যতঃ পরং স্থিতিযোগ্যস্য অপিশব্দস্য ঈদৃশমিত্যতঃ পরং পাঠাদক্রমতাদোষঃ, স চ 'বৈক্লব্যং বনবাসিনোঽপি মম তৎস্নেহাৎ কিলৈতাদৃশম্' ইতি পাঠেন সমাধেয়ঃ।

"স্বরেঽপি কণ্ঠ আখ্যাতঃ" ইতি হারাবলী। "ওক আশ্রয়মাত্রে স্যান্মন্দিরে চ নপুংসকম্" ইতি মেদিনী। শার্দূলবিক্রীড়িতং বৃত্তম্ ॥৮॥

(ঝ) তদনন্তর স্নানের পর মালিনীনদী হইতে উত্থিত কণ্বের প্রবেশ।

কণ্ব। (চিন্তা করিয়া) আজ শকুন্তলা যাইবে, এই জন্য উৎকণ্ঠা আসিয়া হৃদয় অধিকার করিয়াছে; অশ্রুজল অবরুদ্ধ করি, আবার তাহা আসিয়া কণ্ঠস্বর অস্পষ্ট করিয়া ফেলিতেছে এবং দৃষ্টিশক্তি, চিন্তা-বশতঃ কুণ্ঠিত হইতেছে। আমি বনবাসী; তাহাতে স্নেহবশতঃ আমারই এইরূপ বিহ্বলতা উপস্থিত হইয়াছে; সুতরাং নবীন কন্যা-বিচ্ছেদদুঃখে গৃহীরা পীড়িত না হইবে কেন ॥৮॥

সখ্যৌ। হলা সউন্তলে! অবসিদমণ্ডণাসি, সম্পদং পরিহেহি খোমজুঅলং। (অ)

শকু। উত্থায় নাট্যেন পরিধত্তে। (ট)

গৌতমী। জাদে! এস দে আণন্দ-বাপ্প-পরিবাহিণা লোঅণেণ পরিস্সজন্তো বিঅ গুরু উবট্ঠিদো; তা সমুদাআরং পডিবজ্জস্স (১)। (ঠ)

(অ) হলা শকুন্তলে! অবসিতমণ্ডনাসি, সাম্প্রতং পরিধেহি ক্ষৌমযুগলম্।

(ঠ) জাতে! এষ তে আনন্দবাষ্পপরিবাহিনা লোচনেন পরিষ্বজমান ইব গুরুরুপস্থিতঃ; তৎ সমুদাচারং প্রতিপদ্যস্ব।

(অ) সখ্যাবিতি। অবসিতমণ্ডনা সমাপ্তপ্রসাধনা। ক্ষৌমযুগলং পট্টবস্ত্রদ্বয়ম্। "নৈকবস্ত্রধরস্তথা" ইত্যনেন বৈধকর্ম্মমাত্রে একবস্ত্রধারণনিষেধাৎ যাত্রায়াশ্চ বৈধকর্ম্মরূপত্বাৎ ক্ষৌমযুগলমিত্যুক্তম্।

(ট) শকু ইতি। উপবিষ্টস্য বস্ত্রপরিধানে বিশেষাসুবিধা স্যাদত উক্তমুত্থায়েতি।

(ঠ) গৌতমীতি। আনন্দেন কন্যায়াঃ পতিসংযোগপ্রাপ্তিসম্ভাবনাজনিতসুখেন নির্গতো বাষ্প আনন্দবাষ্পস্তং পরিবহতি ধারয়তীতি তেন। পরিষ্বজমান ইব অতিশয়েন সংযোগাদালিঙ্গন্নিব, গুরুঃ পিতা। সমুদাচারং সমুপযুক্তব্যবহারং চরণবন্দনমিত্যর্থঃ, প্রতিপদ্যস্ব প্রাপ্নুহি কুরু ইতি তাৎপর্য্যম্। অন্যমনস্কতয়া বন্দনবিস্মরণং স্যাদতো গৌতম্যোক্তমিদম্।

( এই বলিয়া পদক্ষেপ করিতে লাগিলেন। )

(অ) সখীদ্বয়। শকুন্তলা! তোমাকে অলঙ্কার পরাণ শেষ হইয়াছে; এখন পট্টবস্ত্র দুইখানি পর।

(ট) শকুন্তলা। ( উঠিয়া অভিনয়ের ধরণে পরিধান করিল। )

(ঠ) গৌতমী। বৎসে! আনন্দাশ্রুবর্ষী নয়নদ্বারা আলিঙ্গন-

(১) আণন্দপরিবাহিণা অস্সুণা। আআরং দাব।

शकु। सव्रीडं वन्दनां करोति (१)। (ङ)

काश्यपः। वत्से!

ययातेरिव शर्म्मिष्ठा भर्त्तुर्बहुमता भव।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि (२) ॥८॥

(ङ) शकु इति। सव्रीडं सलज्जम्। नवीनकुलस्त्रियाः गुरुजनान्तिके पतिविषयकव्यापारमात्रस्यैव लज्जाकरत्वादत्र च पतिगृहे यात्राप्रस्तावात् सव्रीडमित्युक्तम्।

ययातेरिवेति। ययातेः तदाख्यस्य प्रसिद्धस्य राज्ञः, शर्म्मिष्ठा वृषपर्व्वदुहिता इव, त्वं भर्त्तुर्दुष्मन्तस्य, बहुमता अत्यादरविषयभूता भव। तथा सा शर्म्मिष्ठा, पूरुं तदाख्यं पुत्रमिव, त्वमपि सम्राजं भाविमण्डलेश्वरम्, पुत्रम्, अवाप्नुहि लभस्व।

अत्र द्वयोः श्रौतोपमालङ्कारयोः परस्परनिरपेक्षतया संसृष्टिः। तथा शर्म्मिष्ठा ययातेर्बहुमता अभूत्, त्वन्तु भव इति, एवं सा पूरुमवाप्तवती, त्वञ्च पुत्रम् अवाप्नुहि इति विधिभेदात् कालभेदाच्च भग्नप्रक्रमतादोषद्वयम् "चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा" इति दर्पणोदाहृतवत्; तत्समाधानाय चैवं श्लोकः पठनीयः—

ययातेरिव शर्म्मिष्ठा भर्त्तुर्बहुमता सती।
सम्राजं पूरुवत् पुत्रं तत्समा त्वमवाप्नुहि॥

तत्समा शर्म्मिष्ठातुल्या त्वमित्यर्थः। इत्यञ्च आर्थोपमायामुपमानसम्बन्धिक्रियानपेक्षणान्नोक्तदोष इति सुधीभिर्भाव्यम्।

एवमत्र आशीर्नाम नाट्यालङ्कारः—"आशीरिष्टजनाशंसा" इति दर्पणलक्षणात्।

"येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः। शास्ति यश्चाज्ञया राज्ञः स सम्राट्—" इत्यमरः।

করতই যেন তোমার পিতা এই উপস্থিত হইয়াছেন; অতএব উপযুক্ত আচার সম্পাদন কর।

(ঙ) শকুন্তলা। (লজ্জার সহিত নমস্কার করিল।)

(१) सव्रीडम्। ताद! वन्दामि। (२) सुतं त्वमपि।

গৌতমী। জাদে! বরো ক্খু এসো, ণ আসিসো (১)। (ঢ)

কণ্বঃ। বৎসে! ইতঃ সদ্যোহুতানগ্নীন্ প্রদক্ষিণী-কুরুস্ব। (ণ)

সর্বে তথা কারয়িত্বা পরিক্রামন্তি (২)। (ত)

(ঢ) জাতে! বরঃ খল্বেষ, ন আশীঃ।

যযাতিপুত্রানাহ বিষ্ণুপুরাণম্—

"যদুঞ্চ তুর্বসুঞ্চৈব দেবযানী ব্যজীজনত্।
দ্রুহ্যুঞ্চানুঞ্চ পূরুঞ্চ শর্ম্মিষ্ঠা বার্ষপর্বণী॥" ॥৫॥

(ঢ) গৌতমীতি। এষ "যযাতেরিব শর্ম্মিষ্ঠা" ইত্যাদিরূপঃ বরঃ খলু বর এব, মহর্ষেঃ প্রভাবাতিশয়েন বরদানে সমর্থত্বাৎ ত্বাং প্রতি তথা সন্তুষ্টত্বাচ্চেতি ভাবঃ। ন আশীঃ "যযাতেরিব" ইত্যাদি বাক্যং নাশীর্বাদঃ তস্য যেন কেনাপি কর্তুং শক্যত্বেন মহর্ষেস্তত্র প্রবৃত্তৌ বিশেষপ্রয়োজনাভাবাৎ। তেন চৈতৎফলং ত্বমবশ্যমেব প্রাপ্স্যসীত্যাশয়ঃ। ধ্রুবফলকমিষ্টার্থাশংসনং বরঃ, অধ্রুবফলকমিষ্টার্থাশংসনমাশীরিত্যনয়োর্ভেদঃ।

(ণ) কণ্ব ইতি। ইতঃ অস্যাং দিশি। সদ্যোহুতান্ অচিরদত্তাহুতীন্। এতেন হব্যগন্ধৈরিতি বক্ষ্যমাণহব্যগন্ধানাং প্রাচুর্য্যং ব্যজ্যতে।

(ত) সর্বে ইতি। তথা—শকুন্তলাকর্তৃকং প্রদক্ষিণম্। পরিক্রামন্তি পাদ-ক্ষেপং কুর্বন্তি।

---

কণ্ব। বৎসে! শর্ম্মিষ্ঠা যেমন যযাতির অত্যন্ত আদরের পাত্র ছিলেন, তুমিও যেমন ভর্তার অত্যন্ত আদরের পাত্র হও এবং তিনি (শর্ম্মিষ্ঠা) যেমন ভাবী সম্রাট্ পূরুকে পুত্ররূপে পাইয়াছিলেন, তুমিও তেমন ভাবী সম্রাট্ পুত্র লাভ কর ॥৯॥

(ঢ) গৌতমী। বৎসে। ইহা বরই বটে, কিন্তু আশীর্বাদ নহে।

(ণ) কণ্ব। বৎসে! এই দিকে সদ্য আহুত অগ্নিগুলিকে প্রদক্ষিণ কর।

---

(১) ভঅবং! বরো খু। (২) সর্বে পরিক্রামন্তি।

कण्वः । वत्से ! (१)

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धैः
वैतानास्त्वां वह्नयः पावयन्तु ॥१०॥

अमी इति । वेदिं परितः वेद्याः सर्वासु दिक्षु, क्लृप्तानि रचितानि धिष्ण्यानि स्थानानि येषां ते, एतेन सर्वस्यामेव दिशि हव्यगन्धप्राप्तिसम्भवो दर्शितः । समिधः एषां सन्तीति समिद्वन्तः । अनेनाग्नीनां स्थायित्वं सूचितम् । प्रान्तेषु सर्वेषु अग्निसमीपदेशेषु संस्तीर्णा आस्तीर्णा दर्भाः कुशा येषां ते । एतेन प्रान्तदेशानामपि पवित्रतया दुरितनाशकत्वं सूचितम् । तथा हव्यानाम् आहुतानां घृतादिद्रव्याणां गन्धैः, दुरितं पापम्, अपघ्नन्तो नाशयन्तः, अमी दृश्यमानाः, वितानस्य यज्ञस्य इमे इति वैतानाः, वह्नयो दक्षिणाग्निगार्हपत्याहवनीयभेदात् त्रिविधा अग्नयः, त्वां पावयन्तु पवित्रीकुर्वन्तु ।

अत्र विशेषणानां विशेषविशेषाभिप्रायेण प्रयुक्तत्वात् परिकरोऽलङ्कारः । अतएव च नापुष्टार्थत्वदोषः ।

"क्रतुविस्तारयोरस्त्री वितानम्" इत्यमरः ।

वेदिमिति परित इत्यस्य योगे "तसोभयाभिपरिसर्वैः" इत्यनेन द्वितीया ।

अयन्तु ऋक्तन्त्रवेदपाठनिरतकण्वप्रयुक्तो वैदिक एव छन्दोविशेषः । तथा च "अग्नी षोमौ जुषमाणोऽनुशंसे" इत्यादिवत् प्रथमपादस्तृतीयपादश्च ; "अहल्यैनां भुक्तभोगामजीऽस्थ:" इत्यादिवत् द्वितीयपादः, चतुर्थपादस्तु शालिन्या एव "मात्तौ गौ चेच्छालिनी वेदलोकैः" इति लक्षणात् । अतएवेदमुपजातिविशेषं वदन्ति ॥१०॥

(ত) ( শকুন্তলাকে সেইরূপ করাইবার জন্য সকলে পাদক্ষেপ করিতে লাগিল । )

কণ্ব । বৎসে !

(१) काश्यपः । ऋक्छन्दसा आशास्ते ।

শকু। প্রদক্ষিণং করোতি (১)।

কণ্বঃ। বৎসে! প্রতিষ্ঠস্বেদানীম্। সদৃষ্টিক্ষেপম্। ক্ব নু তে শার্ঙ্গরবশারদ্বতমিশ্রাঃ? (২)। (থ)

শিষ্যৌ। প্রবিশ্য। ভগবন্! ইমৌ স্বঃ (৩)। (দ)

কণ্বঃ। বৎসৌ! ভগিন্যাঃ পন্থানমাদেশয়তম্ (৪)। (ধ)

(থ) কণ্ব ইতি। সদৃষ্টিক্ষেপং শার্ঙ্গরবাদীনামন্বেষণার্থং সর্বতো দৃষ্টিং পাতয়িত্বেত্যর্থঃ। তে পূর্বমাদিষ্টাঃ। ক্ব বর্তন্ত ইতি শেষঃ।

(দ) শিষ্যাবিতি। স্বস্তিষ্ঠাবঃ, আবামিতি শেষঃ।

(ধ) কণ্ব ইতি। ভগিন্যাঃ শকুন্তলায়াঃ। যুবাং শিষ্যত্বেন মম পুত্রস্থানীয়ৌ, শকুন্তলা তু কন্যৈবেতি যুষ্মাকং পরস্পরং ভ্রাতৃভগিনীরূপ এব সম্বন্ধ ইতি ভাবঃ। আদেশয়তং যুবামিতি শেষঃ।

বেদির উপর সকল দিকেই এগুলির স্থান কল্পিত হইয়াছে, সমিধ রহিয়াছে, চারি প্রান্তেই কুশ আস্তীর্ণ আছে এবং ইহারা হবির গন্ধে পাপ নাশ করিতেছে, এই ত্রিবিধ যজ্ঞীয় অগ্নি তোমাকে পবিত্র করুক ॥১০॥

শকুন্তলা। ( প্রদক্ষিণ করিল। )

(থ) কণ্ব। বৎসে! এখন প্রস্থান কর। ( দৃষ্টিক্ষেপের সহিত ) সেই শার্ঙ্গরব ও শারদ্বতমিশ্র কোথায়?।

(দ) শিষ্যদ্বয়। ( প্রবেশ করিয়া ) ভগবন্! আমরা এই আছি।

(ধ) কণ্ব। বৎস! তোমরা ভগিনীর পথ দেখাইয়া দাও।

(১) পাঠোঽয়ং ক্বচিন্নাস্তি।

(২) পাঠান্তরম্। প্রতিষ্ঠস্বেদানীম্। ক্ব তে শার্ঙ্গরবমিশ্রাঃ?।

(৩) শিষ্যঃ। ভগবন্! ইমে স্মঃ।

(৪) ভগিন্যাস্তে মার্গমাদেশয়।

शिष्यौ। इत इतो भवती। (न)

सर्वे परिक्रामन्ति। (प)

कण्वः। भो भोः! सन्निहितवनदेवतास्तपोवनतरवः! (१)। (फ)

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् (२) ॥११॥

(न) शिष्याविति। भवती शकुन्तला, इत इतः अनेनानेन पथा, गच्छत्विति शेषः।

(प) सर्व इति। परिक्रामन्ति पादक्षेपं कुर्वन्ति।

(फ) कण्व इति। सन्निहिता अवस्थानेनासन्ना वनदेवता येषु ते तादृशाः ! । तरूणामचेतनतया तत्सम्बोधनस्य निष्फलत्वात् तत्सम्बोधनमुखेन तदधिष्ठात्रीणां वनदेवतानामेवाभिमुख्यार्थमेतद्विशेषणम्। तेन च तरूणामपि कृतज्ञता सम्पन्नेत्यवधेयम्।

पातुमिति। युष्मासु तपोवनतरुषु, असिक्तेषु युष्माकं मूले जलसेकेष्वकृतेषु, या शकुन्तला, प्रथमं जलं पातुं न व्यवस्यति न प्रवर्त्तते, युष्मान् प्रत्यादरातिशयादिति भावः। प्रियं प्रीतिकरं मण्डनं भूषणं यस्याः सा तथोक्तापि, या शकुन्तला, स्नेहेन भवतां तपोवनतरूणाम्, पल्लवं मण्डनभूतं किसलयम्, न आदत्ते न गृह्णाति, युष्माकं वेदनानुभवसम्भवादित्याशयः। तथा वो युष्माकं कुसुमप्रवृत्तिसमये पुष्पोत्पत्तिकाले

(ন) শিষ্যদ্বয়। তুমি এই এই পথে চল।

(প) সকলে। ( পাদক্ষেপ করিতে লাগিল। )

(ফ) কণ্ব। ওহে ওহে! বনদেবতাসমন্বিত তপোবনের বৃক্ষসকল!

---

(१) काश्यपः। भो भोः सन्निहिततपोवनतरवः ! ।

(२) युष्मास्वपीतेषु या। आर्य्ये वः।

आकाशे। (ख)

रम्यान्तरः कमलिनीहरितैः सरोभिः
छायाद्रुमैर्नियमितार्कमरीचितापः।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः (१) ॥१२॥

सर्वे सविस्मयमाकर्णयन्ति।

आदौ युष्मदादीनां सर्वेषामेव पूर्वम्, यस्याः शकुन्तलायाः, उत्सव आनन्दो भवति, युष्मान् प्रति स्नेहाधिक्यादित्यभिप्रायः। सा इयं शकुन्तला, पतिगृहं याति, सर्वैर्युष्माभिः, अनुज्ञायतां तद्गमनमनुमन्यताम् युष्मदनुज्ञाया अभावे स्नेहाकर्षणेन अस्या गमनमेव न सम्भवतीति भावः।

अत्र तरून् प्रति शकुन्तलायाः स्नेहाधिक्यप्रतिपादनकार्य्यं कारणवर्णोपन्यासात् अप्रस्तुतप्रशंसालङ्कारः। तथा व्यवस्यति भवतीति परस्मैपदिक्रियाद्वयस्य मध्ये आदत्ते इत्यात्मनेपदिक्रियाप्रयोगात् भग्नप्रक्रमतादोषः; स च 'गृह्णाति प्रियमण्डनापि न च या स्नेहाद्भवत्पल्लवम्' इति पाठेन समाधेयः।

शार्दूलविक्रीडितं वृत्तम् ॥११॥

(ख) आकाश इति। शून्ये तपोवनतरुस्थितवनदेवतानामुक्तिरियमित्याशयः।

रम्येति। अस्याः शकुन्तलायाः, पन्थाः पतिगृहगमनमार्गः, कमलिनीभिः पद्मलताभिः हरितैः पालाशवर्णैः सरोभिर्वापीभिः, रम्यं मनोहरम् अन्तरं मध्यदेशो यस्य स तादृशः

তোমাদের মূলে জল না দেওয়া হইলে, যে প্রথমে জলপান করিতে প্রবৃত্ত হয় না; অলঙ্কারপ্রিয় হইয়াও যে, স্নেহবশতঃ তোমাদের পল্লব গ্রহণ করে না এবং তোমাদের পুষ্পোৎপত্তির সময়ে সকলের আগে যাহার আমোদ হয়, সেই শকুন্তলা এই পতিগৃহে যাইতেছে; তোমরা সকলেই অনুমতি কর ॥১১॥

(१) अनुमन्यतामित्यादिश्लोकात् परं रम्येत्यादिश्लोकः क्वचित् पठितः।

শাঙ্গ´। কোকিলশব্দং সূচয়িত্বা। **ভগবন্! (১)।** (ভ)

ছায়াপ্রধানা দ্রুমা বৃক্ষাস্তৈঃ, নিয়মিতো নিবারিত অর্কমরীচীনাং রবিকিরণানাং তাপো যত্র সঃ, কুশেশয়রজোভিঃ পদ্মপরাগৈঃ মৃদবঃ সুরভিত্বাৎ কোমলা রেণবঃ বায়ুচালিতাঃ ধূল্যো যত্র স তাদৃশঃ, তথা শান্তঃ অবেগবাহিত্বাৎ সৌম্যঃ অনুকূলঃ পৃষ্ঠতোগামী চ পবনো বায়ুর্যস্মিন্ স তথোক্তশ্চ ভূয়াৎ, অতএব শিবো মঙ্গলকরশ্চ ভূয়াৎ। মধ্যে সরোলাভাৎ পিপাসানিবৃত্তিঃ, ছায়াদ্রুমলাভাৎ তাপাভাবে কষ্টাধিক্যনিবৃত্তিঃ, পদ্মপরাগ-রেণুলাভাদামোদপ্রাপ্তিঃ, শান্তপবনপ্রাপ্তৌ শ্রমাপনোদনম্, পবনস্যানুকূলত্বে চ মঙ্গললাভ ইতি ভাবঃ।

অত্রাপি পথঃ শিবত্বং প্রতি অনেককারণোপন্যাসাৎ সমুচ্চয়োঽলঙ্কারঃ।

কুশে জলে শেতে তিষ্ঠতীতি কুশেশয়ম্। "শয়বাসবাসিষ্বকালাৎ" ইত্যলুক্ সমাসঃ। "কুশেশয়ঞ্চ" ইতি "সহস্রপত্রং কমলং শতপত্রং কুশেশয়ম্" ইতি চামরঃ।

অনুকূলপবনস্য মঙ্গলসূচকত্বমুক্তং ভট্টিটীকায়াম্—

"বামে মধুরবাক্ পক্ষী বৃক্ষঃ পল্লবিতোঽগ্রতঃ।
অনুকূলো বহন্ বায়ুঃ প্রয়াণে শুভদঃ স্মৃতঃ॥"

বসন্ততিলকং বৃত্তম্ ॥১২॥

(ভ) শাঙ্গ´ইতি। সূচয়িত্বা স্বকণ্ঠেনৈব প্রকাশ্য।

(ব) (শূন্যে) পদ্মপাতায় হরিদ্বর্ণ সরোবরসমূহে পথের সমস্ত মধ্যভাগ সুন্দর হউক, ছায়াপ্রধান বটপ্রভৃতি বৃক্ষ, সূর্য্যকিরণের তাপ নিবারণ করুক এবং পদ্মের কোমলরেণুবাহী বায়ু, পৃষ্ঠদিক্ হইতে শান্তভাবে প্রবাহিত হউক; এইভাবে সমস্ত পথটী শকুন্তলার পক্ষে মঙ্গলময় হউক ॥১২॥

(সকলে বিস্ময়ের সহিত শুনিতে লাগিল।)

(ভ) শাঙ্গ´রব। (কোকিলের ন্যায় শব্দ করিয়া) ভগবন্!

(১) কোকিলরবং সূচয়িত্বা।

अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः।
परभृतविरुतं कलं यतः
प्रतिवचनीकृतमेभिरात्मनः (१) ॥१३॥

गौतमी। जादे! णादिजणसिणिद्धाहिं अणुण्णादगमणासि तवोवणदेवदाहिं। ता पणम भअवदीणं (२)। (क)

(क) जाते! ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः। तत् प्रणम भगवतीः।

अनुमतेति। इयं शकुन्तला, वनवासेन तपोवने एकत्रावस्थानेन बन्धवः सञ्जात सौहार्द्दाः, तरुभिर्वृक्षैः, अनुमतम् अनुज्ञातं गमनं भर्त्तृगृहे प्रस्थानं यस्याः सा तथोक्ता जाता। यतो हेतोः, एभिस्तरुभिः, कलं मधुरास्फुटम्, परैः काकैर्भ्रियते परिपाल्यत इति परभृतः कोकिलस्तस्य विरुतं रवः, आत्मनः स्वगणस्य, प्रतिवचनीकृतं भवदनुज्ञाप्रार्थनस्य प्रत्युत्तरीकृतम्, इदानीममीषां मनुष्यवद्वागुच्चारणासम्भवात् अगत्या आकस्मिककोकिलरव एव प्रतिवचनत्वेन मन्तव्य इति भावः।

अत्र परभृतविरुते प्रतिवचनत्वारोपस्य प्रकृतशकुन्तलागमनोपयोगितया परिणामालङ्कारः, स च समानविभक्तिकत्वात् तुल्याधिकरणरूपः।

"वनप्रियः परभृतः कोकिलः पिक इत्यपि" इत्यमरः।

अपरवक्त्रं नाम वृत्तम्—"अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ" इति लक्षणात् ॥१३॥

(क) गौतमीति। ज्ञातिजनवत् स्वजनवत् स्निग्धाभिस्त्वां प्रति स्नेहयुक्ताभिः, तपो-

তপোবনে একত্র বাসনিবন্ধন সঞ্জাতসৌহার্দ্দ বৃক্ষসমূহ, এই শকুন্তলাকে যাইবার অনুমতি দিয়াছে; যে হেতু ইহারা অস্পষ্ট অথচ মধুর কোকিল-শব্দকে আপনাদের প্রত্যুত্তর করিয়াছে ॥১৩॥

(१) कलं यथा एभिरीदृशम्। (२) क्वचित् ता इति नास्ति

शकु । सप्रणामं परिक्रम्य जनान्तिकम् । हला पिअंवदे ! अज्जउत्तदंसणोस्सुआए वि अस्समपदं परिच्चअन्तीए दुक्खदुक्खेण चलणा मे पुरमुहा ण णिवडन्ति (१) । (घ)

प्रियं । ण केवलं तुमं ज्जेव तवोवणविरहकादरा, तुए उवट्ठिदविओअस्स तवोवणस्स वि अवत्थं पेक्ख दाव (२) । (ङ)

(घ) हला प्रियंवदे ! आर्यपुत्रदर्शनोत्सुकाया अपि आश्रमपदं परित्यजन्त्या दुःखदुःखेन चरणौ मे पुरोमुखौ न निपततः ।

(ङ) न केवलं त्वमेव तपोवनविरहकातरा ; त्वयोपस्थितवियोगस्य तपोवनस्यापि अवस्थां प्रेक्षस्व तावत् ।

वनदेवताभिः, अनुज्ञातं गमनं यस्याः सा तादृशी असि । तत्तस्मात्, भगवतीर्माहात्म्यवतीर्वनदेवताः ।

"स्निग्धस्तु वत्सले वाच्यः स्नेहयुक्तजने भवेत्" इति शब्दरत्नावली ।

(घ) शकु इति । सप्रणामं वनदेवताभ्यां नमस्कारपूर्वकम्, परिक्रम्य सम्मुखे कियन्तं पदक्षेपं कृत्वा, जनान्तिकं केवलं सख्योरेवान्तिके मृदु मृदु इत्यर्थः, गुरुजनान्तिके पतिकथोत्थानस्य लज्जाकरत्वादिति भावः । जनान्तिकलक्षणं प्रागुक्तम् । आश्रमपदं तपोवनम् । दुःखदुःखेन नितान्तदुःखेन हेतुना, पुरोमुखौ सम्मुखौ सन्तौ ।

(গ) গৌতমী । বৎসে ! স্বজনের ন্যায় স্নেহসম্পন্ন বনদেবতারা তোমার গমনে অনুমতি দিয়াছেন । অতএব ইঁহাদিগকে নমস্কার কর ।

(ঘ) শকুন্তলা । ( নমস্কার করিয়া পাদক্ষেপপূর্ব্বক প্রিয়ংবদার নিকট চুপি চুপি ) আমি আর্য্যপুত্রের দর্শনের নিমিত্ত উৎকণ্ঠিত হইয়াছি, তথাপি তপোবন পরিত্যাগ করিতেছি বলিয়া আমার চরণ-যুগল সম্মুখের দিকে পড়িতেছে না ।

(१) णं अज्जउत्त···अस्समं···दुक्खेण मे चलणा पुरदो पवट्टन्ति ।

(२) ण केवलं तवोवणविरहकादरा सही एव्व । समवत्था दीसइ ।

উগ্গিলিদদব্ভকবলা মই পরিচ্চত্তণচ্চণা মোরী।

ওসরিঅপাণ্ডুপত্তা মুঅন্তি অস্সূ বিঅ লদাও ॥১৪॥

শকু। স্মৃত্বা। তাদ! লদাবহিণীং দাব মাহবীং আমন্ত-ইস্সং (১)। (ল)

উদ্গীর্ণদর্ভকবলা মৃগী পরিত্যক্তনর্ত্তনা ময়ূরী।

অপসৃতপাণ্ডুপত্রা মুঞ্চন্তি অশ্রু ইব লতাঃ ॥১৪॥

(র) প্রিয়মিতি। ত্বয়া সহ উপস্থিতো বিয়োগো যস্য তস্য।

উদ্গীর্ণেতি। মৃগী হরিণী, উদ্গীর্ণঃ গ্রাসাৎ মুখতো নির্গমিতঃ দর্ভকবলঃ কুশগ্রাসো যয়া সা, ময়ূরী পরিত্যক্তং নর্ত্তনং নৃত্যং যয়া সা; তথা অপসৃতানি পতিতানি পাণ্ডূনি পক্কতয়া পাণ্ডুবর্ণানি পত্রাণি যাসাং তাস্তথাবিধাঃ লতাঃ, অশ্রু নয়নজলম্, মুঞ্চন্তি তব বিরহশোকোদয়াৎ পাতয়ন্তীব। অতএব তব বিরহেণ তপোবনমপি কাতরং জাতমিতি ভাবঃ।

অত্র তপোবনবিরহকাতরত্বপ্রতিপাদনকার্য্যং প্রতি কারণত্রয়োপন্যাসাৎ সমুচ্চয়োঽলঙ্কারঃ, তথা পাণ্ডুপত্রপতনে অশ্রুপাতনত্বসম্ভাবনাকরণাৎ ক্রিয়োৎপ্রেক্ষা; উদ্গীর্ণদর্ভকবলত্বাদিকার্য্যেণ মৃগীপ্রভৃতিষু ভগিনীব্যবহারসমারোপাৎ সমাসোক্তিশ্চ, ইত্যেতেষাং পরস্পর-নিরপেক্ষতয়া সংসৃষ্টিঃ। তথা মইমোরী ইতি একবচনান্তপ্রয়োগেণ প্রক্রম্য লদাও ইতি বহুবচনোপন্যাসাৎ ভগ্নপ্রক্রমতাদোষঃ; স চ 'পরিচ্চঅদি অস্সু বিঅ লদা' ইতি পাঠেন সমাধেয়ঃ। আর্য্যা জাতিঃ ॥১৪॥

(র) প্রিয়ংবদা। কেবল তুমিই তপোবনের বিরহে কাতর হও নাই; তোমার সহিত বিরহ উপস্থিত হওয়ায় তপোবনেরও অবস্থা দেখ—

হরিণী মুখ হইতে কুশগ্রাস উদ্গিরণ করিয়া ফেলিতেছে; ময়ূরী নৃত্য ত্যাগ করিয়াছে এবং লতাগুলি, পাণ্ডুবর্ণ পত্র পতিত হইতে থাকায় যেন অশ্রু বিসর্জ্জন করিতেছে ॥১৪॥

(১) লদাবহিণিঅং বণজোসিণিং দাব আমন্তইস্সং।

कण्वः। वत्से! अवैमि ते तस्यां सौहार्द्दम्। इयं सा दक्षिणे पश्य (१)। (व)

शकु। (उपेत्य लतामालिङ्ग्य) लदावहिणि! पच्चालिङ्गस्स मं साहामएहिं बाहुहिं। अज्ज पहुदि दूरवत्तिणी क्खु दे भविस्सं। ताद! अहं विअ इअं तुए चिन्तणीआ (२)। (श)

(ल) तात! लताभगिनीं तावत् माधवीमामन्त्रयिष्ये।

(श) लताभगिनि! प्रत्यालिङ्ग मां शाखामयैर्बाहुभिः। अद्य प्रभृति दूरवर्त्तिनी खलु ते भविष्यामि। तात! अहमिव इयं त्वया चिन्तनीया।

(ल) शकु इति। श्रुत्वा नयनाश्रुमोचनादिना श्रुतमभिनीय। लता चासौ भगिनी चेति तां माधवीलताख्यां भगिनीमित्यर्थः, आमन्त्रयामि गमनकालीनं सम्भाषणं करोमीति प्रार्थना।

(व) कण्व इति। तस्यां माधव्याम्, ते तव, सौहार्द्दं पूर्वोत्पन्नस्नेहम्, अवैमि अवगत एवास्मि। सा माधवी, दक्षिणे दिग्विभागे वर्त्तते इति पश्येत्यर्थः।

(श) शकु इति। लतां प्रकृतां माधवीम्। शाखामयैर्विटपरूपैः। अत्र परम्परितरूपकमलङ्कारः। चिन्तनीया सस्नेहं द्रष्टव्या, मत्समानपालित्वादित्याशयः।

(ল) শকুন্তলা। ( স্মরণ করিয়া ) পিতঃ! লতাভগিনী মাধবীর সম্ভাষণ করি।

(ব) কণ্ব। বৎসে! তাহার প্রতি তোমার সৌহার্দ্দ আমি জানি; এই সে দক্ষিণদিকে রহিয়াছে, দেখ।

(শ) শকুন্তলা। ( নিকটে যাইয়া মাধবীলতাকে আলিঙ্গন করিয়া ) লতাভগিনি! শাখারূপ বাহুদ্বারা আমাকে প্রত্যালিঙ্গন কর; যে

(१) काश्यपः। अवैमि ते तस्यां सोदर्य्यास्नेहम्। इयं तावद् दक्षिणेन।

(२) शकुन्तला। लतामुपेत्य। वणज्जोसिणि चूदसंगदावि मं पच्चालिङ्ग इदोगदाहिं साहाबाहाहिं। अज्ज पहुदि दूरपरिवट्टिणी दे भविस्सं।

কণ্বঃ। বৎসে!

সঙ্কল্পিতং প্রথমমেব মযা ত্বদর্থং
ভর্ত্তারমাত্মসদৃশং সুকৃতৈর্গতাসি।
অস্যাস্তু সম্প্রতি বরং ত্বয়ি বীতচিন্তঃ
কান্তং সমীপসহকারমিমং করিষ্যে (১) ॥১৫॥

তদিতঃ প্রস্থানং প্রতিপদ্যস্ব (২)। (ষ)

মাধবীলতাবরমঙ্গীকরোতি সঙ্কল্পিতমিতি। মযা প্রথমমেব তব বিবাহাৎ পূর্ব্বমেব, ত্বদর্থং সঙ্কল্পিতং মনসা বিভাবিতম্, আত্মসদৃশং স্বানুরূপম্, ভর্ত্তারম্, সুকৃতৈঃ সৌন্দর্য্যাদিভিঃ, গতাসি প্রাপ্তাসি। অতএব সম্প্রতি, ত্বয়ি ত্বদ্বিষয়ে, বীতা ত্যক্তা চিন্তা বরসংগ্রহভাবনা যেন স তাদৃশোঽহম্, কান্তং মনোহরম্, ইমং দৃশ্যমানম্, সমীপবর্ত্তী সহকারঃ সমীপসহকারস্তং নিকটবর্ত্তিনমাম্রতরুম্, অস্যা মাধবীলতায়াঃ, বরং বরস্বরূপম্, করিষ্যে সংযোজনাদিনা কল্পয়িষ্য। অতএব ত্বৎপ্রার্থিতাং মাধবীচিন্তামবশ্যমেব করিষ্যামীতি ভাবঃ।

অত্র সহকারে বরত্বারোপঃ শ্রৌতঃ, মাধবীলতায়াং কন্যাত্বারোপস্তু আর্থ ইত্যেকদেশবিবর্ত্তিরূপকমলঙ্কারঃ।

বসন্ততিলকা বৃত্তম্ ॥১৫॥

হেতু আজ অবধি আমি তোমাদের দূরবর্ত্তিনী হইব। পিতঃ! আপনি ইহাকে আমারই ন্যায় চিন্তা করিবেন।

কণ্ব। বৎসে! আমি প্রথমেই তোমার জন্য যাহা মনে মনে কল্পনা করিয়াছিলাম, তুমি নিজ গুণে সেই আত্মসদৃশ পতি লাভ করিয়াছ। এখন তোমার বিষয়ে নিশ্চিন্ত হইয়াছি, তাই নিকটবর্ত্তী এই সুন্দর আম্রবৃক্ষটীকে এই মাধবীলতার বর করিব।১৫॥

(১) মযা বরার্থং সুকৃতৈর্গতা ত্বম্। চূতেন সংশ্রিতবতী নবমালিকেয়ং অস্যামহং ত্বয়ি চ সম্প্রতি বীতচিন্তঃ। (২) ইতঃ পন্থানং প্রতিপদ্যস্ব।

शकु। सख्यावुपेत्य। हला! एसा दोण्णं पि वो हत्थे णिक्खेवो (१)। (ङ)

सख्यौ। अअं जणो दाणिं कस्स हत्थे समप्पिदो। इति वाष्पं विसृजतः (२)। (च)

कण्वः। अनसूये! प्रियंवदे! अलं रुदितेन। ननु भवतीभ्यामेव शाकुन्तला स्थिरीकर्त्तव्या (३)। इति सर्वे परिक्रामन्ति। (छ)

(ङ) हला! एषा द्वयोरपि वां हस्ते निक्षेपः।

(च) अयं जनः इदानीं कस्य हस्ते समर्पितः?।

---

(घ) तदिति। तत् तस्मात् माधवीलतायाः अपि उपायकरणेन तवोद्वेगाभावादित्यर्थः। इत आश्रमात्, प्रस्थीयते अनेनेति प्रस्थानं पन्थास्तत् हस्तिनापुरगमनमार्गमिति तात्पर्य्यम्, प्रतिपद्यस्व प्राप्नुहि।

(ङ) शकु इति। एषा माधवीलता। निक्षेपो निक्षेपभावेन स्थापिता। इतः परं युवाभ्यामेवास्या रक्षणावेक्षणादिकं कर्त्तव्यमित्याशयः।

(च) सख्याविति। अयम् अनसूयारूपः प्रियंवदारूपश्च जनः, द्वयोरेव वक्तृत्वात्। रक्षिकायास्तवाभावे रक्षकहीने एवावां स्व इति भावः।

(छ) कण्व इति। रुदितेन रोदनेन। नन्वित्यवधारणे। भवतीभ्यां युवाभ्याम्

(ঘ) অতএব এখান হইতে পথে উপস্থিত হও।

(ঙ) শকুন্তলা। ( সখীদ্বয়ের নিকট যাইয়া ) ওলো! এই মাধবীলতা তোমাদের দুইজনের হাতে গচ্ছিত থাকিল।

(চ) সখীদ্বয়। এই ব্যক্তিকে এখন কাহার হাতে সমর্পণ করিলে? ( এই বলিয়া অশ্রু বিসর্জ্জন করিতে লাগিল। )

(१) शकुन्तला। सख्यौ प्रति। (२) उभे। जणो कस्स।

(३) काश्यपः। अनसूये! अलं रुदित्वा।

शकु। विलोक्य। तात! एसा उडजपज्जन्तचारिणी गब्भ-भारमन्थरा मिअवहू जदा सुहप्पसवा भविस्सदि, तदा मे कम्पि पिअणिवेदअं विसज्जइस्ससि, मा एदं विसुमरिस्ससि (१)। (क)

कण्वः। वत्से! नेदं विस्मरिष्यामि (२)।

(क) तात! एषा उटजपर्य्यन्तचारिणी गर्भभारमन्थरा मृगवधूः यदा सुखप्रसवा भविष्यति, तदा मे कमपि प्रियनिवेदकं विसर्ज्जयिष्यसि, मा इदं विस्मरिष्यसि।

---

शकुन्तलास्थाने युवामेव मया स्थापनीये इत्यर्थः। परिक्रामन्ति हस्तिनापुरदिग्गामिनि पथि पादक्षेपं कुर्व्वन्ति।

(क) शकु इति। उटजस्य पर्णशालायाः पर्य्यन्तं प्रान्तभागे चरतीति सा, गर्भभारेण मन्थरा मन्दगमना, सुखेन अनायासेन प्रसवो यस्याः सा तादृशी। मे मम समीपे। प्रियनिवेदकं प्रीतिकरतद्विषयज्ञापकं पुरुषम्, विसर्ज्जयिष्यसि प्रेरयिष्यसि। एतेन मृगवधूं प्रति आदरातिशयो व्यज्यते।

---

(ক্ষ) কণ্ব। অনসূয়া! প্রিয়ংবদা! রোদন করিও না। আমি তোমাদিগকেই শকুন্তলা স্থির করিব। (ইহার পর সকলে পাদক্ষেপ করিতে লাগিল।)

(ক) শকুন্তলা। (দেখিয়া) পিতঃ! গর্ভভারে অলসা এই হরিণী, পর্ণশালার প্রান্তপর্য্যন্ত আসিয়াছে, ইহার যখন অনায়াসে প্রসব হইবে, তখন প্রিয়নিবেদনকারী কোন ব্যক্তিকে আমার নিকট পাঠাইবেন; ইহা বিস্মৃত হইবেন না।

কণ্ব। বৎসে! ইহা বিস্মৃত হইব না।

(१) शकुन्तला। अणहप्पसवा होइ, तदा मे कं वि पिअणिवेदइत्तिअं विसज्जइस्सदि।

(२) शकुन्तला। गतिभङ्गं रूपयित्वा। अम्मो! को णु क्खु एसो णिवसणे मे सज्जइ। इति परावर्त्तते।

शकु। गतिभेदं रूपयित्वा। अम्मो! को णु क्खु एसो पदक्कन्तो विअ मे पुणो पुणो वसणन्ते सज्जदि। इति परावृत्यावलोकयति। (ख)

कण्वः। वत्से!

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥१६॥

(ख) अहो! को नु खलु एष पदाक्रान्त इव मे पुनः पुनर्वसनान्ते सजति?।

(ख) शकु इति। गतिभेदं गमनस्य प्रकारविशेषं मृगस्य वसनान्ते लग्नत्वात् कियद्दूरबाधं गमनमित्यर्थः, रूपयित्वा अभिनीय। पदाक्रान्त इव न पुरादिवत् पादे चलसंलग्न इव। वसनान्ते वस्त्राञ्चले, सजति लगति। परावृत्य घूर्णित्वा।

यस्येति। त्वया, कुशानां सूचिभिः सूचिवत् तीक्ष्णाग्रदेशैः, विद्धे भक्षणकाले क्षतविक्षतीकृते, यस्य मृगस्य मुखे, व्रणविरोपणं क्षतनाशकम्, इङ्गुदीनां तदाख्यानां फलानां तैलम्, न्यषिच्यत निषिक्तं सिक्तमित्यर्थः। एतेन मृगे शकुन्तलायाः स्नेहातिशयो व्यज्यते। श्यामाकानां तदाख्यानां धान्यानां मुष्टिभिः मुष्टिमुष्टिपरिमितश्यामाकधान्यदानैरित्यर्थः परिवर्द्धितकः सर्वतोभावेन वृद्धिं प्रापितः, अतएव पुत्रकृतकः कृत्रिमपुत्रकः, अयं स मृगः, ते तव, पदवीं भर्तृगृहगमनपथम्, न जहाति न परित्यजति, पूर्वोपकारस्मरणेन कृतज्ञतया भाविविच्छेदाशङ्कया विह्वलत्वादिति भावः।

अत्र पुत्रकृतक इति निरङ्गं केवलरूपकमलङ्कारः।

"कृतकः स्यात् पुमान् कृष्णखर्परे चाप्यसम्भवे। पुत्रभेदे कृत्रिमे त्रिषु।" इति शब्दार्णवः।

(খ) শকুন্তলা। ( গমনের ব্যাঘাত অভিনয় করিয়া ) ওমা! এ কে আমার চরণ যেন আক্রমণ করিয়া বার বার বস্ত্রাঞ্চলে লগ্ন হইতেছে। ( এই বলিয়া ফিরিয়া দেখিল। )

शकु। वच्छ! किं मं सहवासपरिच्चाइणीं अणुवन्धेसि, णं अचिरप्पसूदोवरदाए जणणीए विणा जधा मए वड्ढिदो सि, तधा दाणिं पि मए विरहिदं तादो तुमं चिन्तइस्सदि। ता णिवत्तस्स। इति रुदती प्रस्थिता (१)। (ग)

---

(ग) वत्स! किं मां सहवासपरित्यागिनीम् अनुबध्नासि, ननु अचिरप्रसूतोपरतया जनन्या विना यथा मया वर्द्धितोऽसि, तथा इदानीमपि मया विरहितं तातस्त्वां चिन्तयिष्यति। तन्निवर्त्तस्व।

---

व्रणं मध्यविलं क्षतं विरोपयति मांसपूरणेन पूरयतीति व्रणविरोपणम्, नन्द्यादित्वात् रोपयतेर्ल्युप्रत्ययः। परिवर्द्धितक इति अनुकम्पायां कप्रत्ययः।

वसन्ततिलका वृत्तम् ॥१६॥

(ग) शकु इति। सहवासम् एकत्रावस्थानं परित्यक्तुं शीलं यस्यास्तां तथोक्तां माम्, किं कथम्, अनुबध्नासि अनुगच्छसि, नास्ति ते अनुगमनकारणमित्यर्थः। ननु तवाभावे मम पर्य्यवेक्षकाभावादस्त्येवानुगमनकारणमित्यत आह नन्विति। अवधारणे ननुशब्दः। अचिरं प्रसूतं यया सा अचिरप्रसूता पश्चात् उपरता मृता चेति सा तया। विरहितं भर्त्तृगृहगमनेन परित्यक्तम्। तातः कण्वः। चिन्तयिष्यति रक्षणावेक्षण-विषये भावयिष्यति। तत् तस्मात् आत्मनो रक्षणावेक्षणविषये भावनाशून्यत्वादित्यर्थः। प्रस्थिता प्रस्थातुमारभते।

---

কণ্ব। বৎসে! যাহার মুখ, কুশের আগায় ক্ষত হইলে, তুমি ক্ষতনিবারক ইঙ্গুদীতৈল সেই মুখে দিতে এবং প্রতিদিন মুষ্টিপরিমিত শ্যামাঘাস দিয়া যাহাকে পরিবর্দ্ধিত করিয়াছিলে, তোমার সেই কৃত্রিম পুত্র এই হরিণটী তোমার পথ ছাড়িতেছে না ॥১৬॥

(গ) শকুন্তলা। বৎস! আমি তোমাদের সহিত একত্র বাস পরিত্যাগ করিয়া যাইতেছি ; সুতরাং তুমি আমার অনুগমন করিতেছ

(१) अणुसरसि। विणा विवड्ढिदो एव्व। दाणिं वि। णिवत्तेहि दाव।

कण्वः। वत्से! अलं रुदितेन, स्थिरा भव, इतः पन्थानमालोकय (१)। (घ)

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया शिथिलानुबन्धम् (२)।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥१३॥

(घ) कण्व इति। रुदितेन विच्छेदवशात् रोदनेन। इतः सम्मुखे।

उत्पक्ष्मणोरिति। उद्गतानि पक्ष्माणि लोमानि, ययोस्तयोः, नयनयोश्चक्षुषोः, उपरुद्धा निवारिता वृत्तिर्दर्शनशक्तिर्येन तं तादृशम्, वाष्पम् अश्रु, स्थिरतया आत्मनो धैर्य्येण, शिथिलो न्यूनीभूतः अनुबन्ध उत्पत्तिर्यस्य तत् तादृशं कुरु। कथमित्याह अलक्षितो नयनयोरुपरुद्धवृत्तिकतया न दृष्टः नतोन्नतो नीचोच्चः भूमिभागो यस्मिन् तस्मिन् तादृशे, मार्गे पथि, ते तव पदानि पदन्यासाः, खलु निश्चितमेव विषमीभवन्ति असमाना भवन्ति स्खलन्तीत्यर्थः। यात्राकाले तत् स्खलनमङ्गलसूचकं क्वचिद्दनाशनकञ्च भवेदतः पथो दर्शनाय दर्शनविघातकं वाष्पं निवारयेति भावः।

अत्र पूर्वार्द्धवाक्यार्थं प्रति परार्द्धवाक्यार्थस्य हेतुतया वाक्यार्थहेतुकं काव्यलिङ्गम्, पदानां विषमीभवनं प्रति नतोन्नतभूमिभागस्य अलक्षितत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्गान्तरञ्च; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। तथा प्रधानस्य

কেন? প্রসব করিয়াই তোমার মাতা মরিয়া গেলে পর তাহাকে ছাড়া আমি যেমন তোমাকে বড় করিয়াছি, তেমন এখন আমাকে ছাড়াও পিতাই তোমার চিন্তা করিবেন। অতএব নিবৃত্ত হও। (এই বলিয়া রোদন করিতে করিতে চলিল।)

(ঘ) কণ্ব। বৎসে! রোদন করিও না, স্থির হও; এই দিকে পথ দেখ।

---

(१) क्वचिदयं पाठो नास्ति। (२) विरतानुबन्धम्।

शिष्यौ। भगवन्! ओदकान्तं स्निग्धोऽनुगम्यत इति श्रूयते। तदिदं सरसीतीरम्, अत्र नः सन्दिश्य प्रतिगन्तुमर्हसि (१)। (ङ)

कण्वः। तेन हीमां क्षीरिवृक्षच्छायामाश्रयामः (२)। (च)

---

बाष्पशैथिल्यस्य समासे गुणीभावात् विधेयाविमर्शदोषः, स च 'बाष्पं स्वधैर्य्यवशतो विनिवारय त्वम्' इति पाठेन समाधेयः।

वसन्ततिलका वृत्तम् ॥१७॥

(ङ) शिष्याविति। आ उदकान्तं ओदकान्तं स्वभावस्थितजलसमीपपर्य्यन्तमिति तात्पर्य्यम्। तेन गृहद्वारस्थितकुम्भाभ्यन्तरगतजलसमीपे अनुगन्तुं निवृत्तिः, तज्जलस्योत्तोलनस्थितत्वेन स्वभावस्थितत्वाभावादित्यवधेयम्। स्निग्धः स्नेहपात्रीभूतो जनः, अनुगम्यते स्नेहकर्त्तृजनैरिति शेषः। सरसीतीरं स्वभावस्थितजलस्य समीपदेश इत्याशयः। नः अस्माकमन्तिके, सन्दिश्य दुष्मन्तसमीपवक्तव्यवाचिकमुपदिश्य।

"ओदकान्तं प्रियं प्रोथमनुव्रजेत्" इति श्रुतिः।

(च) कण्व इति। क्षीरिवृक्षस्य वटादेः कस्यचित् वृक्षस्य।

তোমার নয়নের লোমগুলি উঁচু হইয়াছে, অশ্রু আসিয়া সেই নয়নযুগলের দৃষ্টি লোপ করিতেছে, অতএব ধৈর্য্য অবলম্বন করিয়া সে অশ্রু নিবৃত্তি কর। কারণ, এই জায়গাগুলি উঁচু-নীচু, তাহা দেখিতেও পাইতেছ না; সুতরাং এই পথে তোমার পদক্ষেপ সমান হইতেছে না ॥১৭॥

(ঙ) শিষ্যদ্বয়। ভগবন্! জলপর্য্যন্ত প্রিয়জনের অনুগমন করিতে হয় ইহা শুনিয়াছি। অতএব এই সরোবরের তীর, এইখানে আপনি আমাদের নিকট সংবাদ বলিয়া যাইতে পারেন।

---

(१) शार्ङ्गरवः। भगवन्! उदकान्तं स्निग्धो जनोऽनुगन्तव्यः। अत्र सन्दिश्य।

(२) क्षीरिच्छायाम्, क्षीरवृक्षच्छायाम्।

सर्वे तथा नाटयन्ति (१)। (छ)

कण्वः। किन्नु खलु तत्रभवतो दुष्मन्तस्य युक्तरूपं सन्देष्टव्यम्। इति चिन्तयति (२)। (ज)

अन। सहि! अस्समपदे ण अत्थि को वि चित्तवन्तो, जो तए विरहिज्जन्तो ण ताम्मदि। पेक्ख दाव (३)। (झ)

(झ) सखि! आश्रमपदे नास्ति कोऽपि चित्तवान्, यस्त्वया विरह्यमाणो न ताम्यति। प्रेक्षस्व तावत्।

"न्यग्रोधोदुम्बराश्वत्थ-पारिश-प्लक्ष-पादपाः।
पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम्॥"

इति राजनिर्घण्टोक्त-वटादि पञ्चकस्यैव क्षीरिवृक्षत्वात्। आश्रयामः सन्देशे विलम्ब-सम्भवात् तथात्वे च अनातपदेशाश्रयस्यावश्यकत्वादिति भावः।

(छ) सर्वे इति। तथा क्षीरिवृक्षच्छायाश्रयणम्।

(ज) कण्व इति। तत्रभवतो राजत्वेन माननीयस्य, दुष्मन्तस्य समीपे। सन्देष्टव्यं वाचिकभावेन प्रेषणीयम्।

(झ) अनेति। चित्तवान् मनःशाली चेतनः पदार्थ इत्यर्थः। विरह्यमाणः त्यज्यमानः, न ताम्यति न खिद्यति।

(চ) কণ্ব। তাহা হইলে, এই ক্ষীরিবৃক্ষের ছায়া আশ্রয় করি।

(ছ) ( সকলে তাহাই করিলেন। )

(জ) কণ্ব। মাননীয় দুষ্মন্তের নিকটে সঙ্গতরূপ কোন্ সংবাদ পাঠান যাইতে পারে। ( এই বলিয়া চিন্তা করিতে লাগিলেন। )

(१) सर्वे परिक्रम्य स्थिताः।

(२) काश्यपः। आत्मगतम्। युक्तरूपमस्माभिः सन्देष्टव्यम्। चिन्तयति।

(३) शकुन्तला। जनान्तिकम्। हला! पेक्ख, णलिणीपत्तन्तरिदं वि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि। दुक्करं अहं करेमि। अनसूया। सहि! मा एव्वं मन्तेहि।

पुड़इणि-वत्तन्तरिअं वाहरिओ वि ण हु वाहरेइ पिअं ।
मुह उव्वूढ़मिणालो तइ दिट्ठिं देइ चक्काओ (१) ॥१८॥

पुटकिनीपत्रान्तरितां व्याहृतोऽपि न खलु व्याहरति प्रियाम् ।
मुख उद्व्यूढमृणालस्त्वयि दृष्टिं ददाति चक्रवाकः ॥१८॥

पुटकिनीति । व्याहृतोऽपि प्रियया आलपितोऽपि, चक्रवाकस्तदाख्यः पक्षी, पुटकं कलिकासम्पुटमस्या अस्तीति पुटकिनी पद्मिनी पद्मलतेति यावत् तस्याः पत्रेण अन्तरिताम् अभ्यन्तरीकृताम् आवृतदेहामित्यर्थः, प्रियां चक्रवाकीम्, न खलु व्याहरति न तु प्रत्यालपति, त्वद्गतचित्तत्वेन प्रियाव्याहाराश्रवणात् पुटकिनीपत्रान्तरितत्वेन तस्या अदर्शनाच्चेति भावः । तथा मुखे वदने, उद्व्यूढम् उत्तोल्य भक्षणाय धृतं मृणालं येन स तादृशः सन्नपि, त्वयि शकुन्तलायाम्, दृष्टिं ददाति, न तु त्वद्गतचित्तत्वात् मुखधृतमपि तन्मृणालं भक्षयतीत्यर्थः । अतएव पक्षिमात्रस्य अविशिष्टचेतनस्य चक्रवाकस्यापि ईदृगवस्थाया जायमानत्वात् विशिष्टचेतनस्य तु मनुष्यस्य त्वद्विरहहेतुकः खेदो जात एवेति "अत्थमपदे णत्थि" इत्याद्युक्तं सत्यमेवेत्याशयः ।

अत्र "त्वयि दृष्टिं ददाति" इत्यनेन "न तु तन्मृणालं भक्षयति" इति मृणालभक्षण-व्यपोहनादार्थी परिसंख्यालङ्कारः । पुटकिनीपत्रान्तरितामित्यनेन चक्रवाक्या अदृश्यत्वं सूचितमिति नापुष्टार्थत्वदोषः ।

"नालीकिनी पुटकिनी विषनालिश्च पद्मिनी" इत्युत्पलिनी । आर्य्या जातिः ॥१८॥

---

(ঝ) অনসূয়া। সখি! তপোবনে এমন কোন হৃদয়বান্ প্রাণী নাই, যে তোমার বিরহে খিন্ন না হইতেছে। দেখ—

চক্রবাকী আলাপ করিলেও চক্রবাক, সেই পদ্মপত্রাবৃতদেহ চক্রবাকীর সহিত আলাপ করিতেছে না; কিন্তু মুখে মৃণাল ধারণ করিয়াই তোমার প্রতি দৃষ্টিপাত করিতেছে ॥১৮॥

---

(१) एदावि पिएण विणा गमेइ रअणिं विसाअदीहअरं ।
गरुअं वि विरहदुक्खं आसाबन्धो सहावेइ ॥

कण्वः । वत्स ! शार्ङ्गरव ! इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्याभिधातव्यः (१) । (ञ)

शार्ङ्ग । आज्ञापयतु भवान् । (ट)

कण्वः ।

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मनः
त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्याधीनमतः परं न खलु तत् स्त्रीबन्धुभिर्याच्यते (२) ॥१८॥

(ञ) कण्व इति । शकुन्तलां पुरस्कृत्य अग्रे स्थापयित्वा, मद्वचनात् स राजा दुष्मन्तः, इति वक्ष्यमाणमभिधातव्यो वक्तव्यः ।

(ट) शार्ङ्गेति । आज्ञापयतु वक्तव्यं ब्रवीतु । गौरवाद्वचने आज्ञोक्तिरिति बोध्यम् ।

अस्मानिति । अस्मान्, संयमस्तप एव धनं येषां तान् तथाभूतान्, साधु सम्यक्, विचिन्त्य मनसा पर्य्यालोच्य । एतेन कन्यायाः पितृगृहात् प्रचुरतरधनोपहारप्राप्तौ तस्यामादरातिशयो यत् सर्वत्र प्रचलितस्तदत्र न सम्भवति ; किन्तु सामान्यप्रतिपत्तिपूर्वकादर्शने तादृशानामस्माकमाक्रोशात् तवानिष्टं भविष्यतीति सूचितम् । आत्मनः स्वस्य, उच्चैः कुलञ्च महान्तं वंशञ्च विचिन्त्य । महाकुलप्रसूता हि जनाः प्रायेण सर्वत्रैव समदर्शिनो भवन्ति । तेनापीयं त्वया सामान्यप्रतिपत्तिपूर्वकमेव द्रष्टव्येत्यभिप्रायः ; तथा त्वयि, अस्याः शकुन्तलायाः, तां स्वयमेवानुभूतपूर्वाम्, कथमपि केनापि प्रकारेण, बान्धवैः पित्रादिबन्धुजनैः कृतेति बान्धवकृता न बान्धवकृता अबान्धवकृता शकुन्तला

(ঞ) কণ্ব। বৎস! শার্ঙ্গরব! তুমি আমার আদেশ অনুসারে শকুন্তলাকে সম্মুখে রাখিয়া সেই রাজাকে বলিবে।

(ট) শার্ঙ্গরব। আপনি আদেশ করুন।

(१) काश्यपः । शार्ङ्गरव !···वक्तव्यः ।

(२) भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः ।

शार्ङ्ग°। गृहीतोऽयं सन्देशः (१)। (ठ)

स्वयमेव विहितेत्यर्थः ताम्, स्नेहप्रवृत्तिम् अनुरागोत्पत्तिञ्च विचिन्त्य। कन्याया बन्धुजनकृते हि वरानुरागे तस्या गुणवत्त्वे आदरः, दोषवत्त्वे चावज्ञा सम्भवति, किन्तु कन्यया स्वयमेवानुरज्य वरवासनापूरणादिना तदुपकारे कृते स चेत् सामान्यप्रतिपत्तिपूर्वकपर्यन्तं तां न पश्यति, तर्हि महत्येव कृतघ्नता स्यादतोऽपीयं सामान्यप्रतिपत्तिपूर्वकमेव द्रष्टव्येत्याशयः। त्वया इयं शकुन्तला, दारेषु गृहीतासु ग्रहीष्यमाणासु च भार्यासु मध्ये, सामान्यप्रतिपत्तिपूर्वकं अपरा भार्या यथा इयं शकुन्तलापि तथैवेति समानताज्ञानपूर्वकमेव, द्रष्टा द्रष्टव्या; न पुनस्ताभ्योऽधमत्वेन द्रष्टव्येति भावः। अतः परं सामान्यप्रतिपत्तिपूर्वकदर्शनादधिकम् अन्याभ्योऽधिकादरणीयत्वेन दर्शनमित्यर्थः, भाग्याधीनं कन्याया भाग्यप्रयुक्तमेव, भवति, न तु तद्बन्धुजनप्रार्थनामात्रेणेत्यभिप्रायः। अतएव स्त्रीबन्धुभिः कन्यानां पित्रादिबान्धवजनैः, तत् दारेषु मध्ये आधिक्येन दर्शनम्, न खलु याच्यते प्रार्थ्यते। अतएव मयापि तन्न प्रार्थ्यत इत्याशयः।

अत्र विचिन्त्येत्येकया क्रियया अस्मानित्यादीनां त्रयाणामेवाप्रस्तुतानां कर्मतयाभिसम्बन्धात् तुल्ययोगिता, याचनाभावं प्रति भाग्याधीनपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, स्त्रीबन्धुभिरित्यप्रस्तुतात् सामान्यात् शकुन्तलाबन्धुना मयेति प्रस्तुतविशेषप्रतीतेरप्रस्तुतप्रशंसा चालङ्कारः, तेषाञ्च परस्परनिरपेक्षतया संसृष्टिः।

"प्रतिपत्तिस्तु गौरवे। प्राप्तौ प्रवृत्तौ प्रागल्भ्ये बोधे" इति हेमचन्द्रः।

शार्दूलविक्रीडितं वृत्तम् ॥१९॥

কণ্ব। আমাদের কেবল তপস্যাই ধন, নিজের বংশও উচ্চ এবং তোমার প্রতি শকুন্তলার যে অনুরাগ জন্মিয়াছে, তাহাও উহার কোন বন্ধুজনই কোন রকমেই ঘটাইয়া দেয় নাই, এই সমস্ত ভাল করিয়া বিবেচনা করিয়া, তুমি এই শকুন্তলাকে ভার্য্যাবর্গের মধ্যে সমান জ্ঞানে দেখিবে; ইহা অপেক্ষা অধিক আদর পাওয়া ভাগ্যের অধীন; সুতরাং তাহা স্ত্রীলোকের বন্ধুরা প্রার্থনা করে না ॥১৯॥

(१) शार्ङ्गरवः। सुगृहीतः सन्देशः।

কণ্বঃ। (শকুন্তলাং বিলোক্য।) বৎসে! ত্বমিদানীমনুশাসনীয়াসি। বনৌকসোঽপি বয়ং লৌকিকজ্ঞা এব (১)। (ড)

শার্ঙ্গ। ভগবন্! ন খলু কশ্চিদবিষয়ো নাম ধীমতাম্ (২)। (ঢ)

কণ্বঃ। সা ত্বমিতঃ পতিগৃহং প্রাপ্য (৩) (ণ)

(ঠ) শার্ঙ্গেতি। সন্দেশো বাচিকম্, গৃহীতঃ দুষ্মন্তসমীপেঽভিধানায় অবলম্বিতঃ।

(ড) কণ্ব ইতি। ইদানীং গার্হস্থ্যপ্রবেশসময়ে, অনুশাসনীয়া গার্হস্থ্যবিষয়ে উপদেশনীয়া। ইতঃ পূর্বং কৌমার্য্যাবস্থায়াং গার্হস্থ্যবিষয়ে অনুশাসনীয়া নাসীরিতীদানীংপদপ্রয়োগস্যাভিপ্রায়ঃ। ননু বনবাসী ভবান্ কথং লোকসমাজাচারমুপদেষ্টুং শক্নুয়াদিত্যাহ বনৌকসোঽপীতি। বনমোক আশ্রয়ো যেষাং তে তথোক্তা অপি বয়ম্, লৌকিকং গৃহস্থলোকসমাজাচারং জানন্তীতি তে তাদৃশা এব, বৃদ্ধানুমানাৎ লোকমুখে শ্রবণাচ্চেতি ভাবঃ।

(ঢ) শার্ঙ্গেতি। ধীমতাং বুদ্ধিমতাং জনানাম্, কশ্চিদপি পদার্থঃ ন খলু অবিষয়ো নৈব ধিয়ামগোচরঃ, ইতি নাম সম্ভাবয়ামীত্যর্থঃ। অতো বনবাসিত্বেঽপি ধীমত্তয়া, গৃহস্থলোকাচারস্যাপ্যভিজ্ঞত্বাৎ যথেষ্টং ভবানুপদেষ্টুমর্হতীত্যাশয়ঃ।

---

(ঠ) শার্ঙ্গরব। এ খবর মনে রাখিলাম।

(ড) কণ্ব। (শকুন্তলার প্রতি দৃষ্টিপাত করিয়া) বৎসে! তোমাকে এখন উপদেশ দিতে হইবে; আমরা বনবাসী হইলেও গৃহস্থলোকের আচার জানি।

(ঢ) শার্ঙ্গরব। ভগবন্! বুদ্ধিমান্‌গণের কোন বিষয়ই বুদ্ধির অগোচর নহে।

(ণ) কণ্ব। সেই তুমি এস্থান হইতে পতিগৃহে যাইয়া—

---

(১) কাশ্যপঃ। বনৌকসোঽপি সন্তো লৌকিকজ্ঞা বয়ম্।

(২) শার্ঙ্গরবঃ। ন খলু ধীমতাং কশ্চিদবিষয়ো নাম। (৩) পতিকুলং।

शुश्रूषस्व गुरून्, कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः (१) ॥२०॥

(ख) कण्व इति। सा अनुशासनीया त्वम्, इतस्तपोवनात्, पतिगृहं प्राप्य, गुरून् शुश्रूषस्व इत्यादिश्लोकस्थक्रियाभिरन्वयः।

शुश्रूषस्वेति। गुरून् श्वश्रूश्वशुरादिगुरुजनान् शुश्रूषस्व परिचर; सपत्नीजने प्रियसखीवृत्तिं प्रियसखीवद्व्यवहारं कुरु; विप्रकृतापि भर्त्रैव अवमानितापि, रोषणतया तं प्रति क्रोधशीलतया, प्रतीपं प्रातिकूल्यम्, मास्म गमः न प्राप्नुहि; परिजने दासदास्यादिपरिवारकवर्गे, भूयिष्ठं बहुलं यथा स्यात्तथा, दक्षिणा उदारा भव; तथा भोगेषु सुखेषु, अनुत्सेकिनी अगर्विता भव। एवमित्थम्भूताः, युवतयः स्त्रियः, गृहिणीपदं गृहकर्त्रीस्थानं यान्ति प्राप्नुवन्ति; किन्तु वामा उक्तस्वभावविपरीता युवतयः, कुलस्य सजातीयगणस्य, आधयो मनोव्यथाः मनोव्यथाजनिका इत्यर्थः। अत उक्तरूपविपरीता मा भवेति भावः।

अत्र अन्यस्य वृत्तिं कथमन्यः करोतीति वस्तुसम्बन्धोऽसम्भवन् प्रियसखीवृत्तिवत् वृत्तिमिति सादृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना, "यान्त्येवं गृहिणीपदं युवतयः" इति सामान्येन प्रथमपादत्रयगतविशेषसमर्थनादर्थान्तरन्यासः, एवं युवतयो वामाश्च युवतय इति विरूपयोः सङ्घटनया विषमालङ्कारः, तथा कार्य्यभूतेन आधिना सह कारणभूताया वामाया अभेदेनाभिधानात् हेतुर्नामालङ्कारश्च इत्येतेषां मिथो निरपेक्षतया संसृष्टिः। तथा उपदिष्टं नाम नाट्यलक्षणञ्च। यथा दर्पणे—

"उपदिष्टं मनोहारि वाक्यं शास्त्रानुसारतः।"

"निकारो विप्रकारः स्यात्" इत्यमरः। "प्रतीपोऽन्यः पराङ्मुखे। ना शान्तनौ क्लीवलिङ्गं वामे" इति शब्दार्णवः। "प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृता"

---

(१) भाग्येष्वनुत्सेकिनी।

গোতমী বা কিং মন্যতে (১)। (ত)

গোতমী। এত্তিও ক্খু বহূজণে উবদেসো। জাদে! এদং ক্খু হিঅএ করেহি, মা বিসুমরিস্সসি (২)। (থ)

---

(থ) এতাবান্ খলু বধূজনে উপদেশঃ। জাতে! এতৎ খলু হৃদয়ে কুরু, মা বিস্মরিষ্যসি।

---

ইতি ভাগুরিঃ। “কুলং জনপদে গোত্রে সজাতীয়গণেষ্বপি। ভবনে চ তনৌ ক্লীবং কণ্টকার্য্যোষধৌ কুলী॥” ইতি মেদিনী।

শুশ্রূষস্বেতি “স্মৃ-দৃশৌ চ সনন্তৌ তু কথাদৌ শ্রুবনাঙ্‌প্রতি।” ইত্যাদিনা কথাদিত্বাদাত্মনেপদম্। রোষণেতি “ক্রুধিমণ্ডিচলিশব্দার্থেভ্যো যুঃ” ইতি ক্রুধ্যর্থাৎ রুষধাতোর্যুঃ। শার্দ্দূলবিক্রীড়িতং বৃত্তম্॥২০॥

(ত) গোতমীতি। কিং মন্যতে এতদুপদেশবিষয়ে কিং মনসি করোতি। তদভিদধাত্বিতি ভাবঃ।

(থ) গোতমীতি। এতাবান্ এতৎপর্য্যন্ত এব। হৃদয়ে কুরু মনসি রক্ষ।

গুরুজনবর্গের শুশ্রূষা করিবে, সপত্নীগণের প্রতি প্রিয়সখীর ব্যবহার করিবে, ভর্ত্তা অপমান করিলেও ক্রুদ্ধ হইয়া তাঁহার প্রতিকূলাচরণ করিবে না, দাস-দাসীপ্রভৃতি পরিজনের প্রতি অত্যন্ত উদারপ্রকৃতি হইবে এবং ভোগে গর্বিতা হইবে না; এইরূপ স্ত্রীলোকেরাই গৃহিণীর পদ পাইয়া থাকে; আর ইহার বিপরীতস্বভাব স্ত্রীলোকেরা বংশের মনোদুঃখ জন্মায়॥২০॥

(ত) গোতমী বা কি মনে করেন?।

(থ) গোতমী। বধূজনের প্রতি এই উপদেশই উপযুক্ত। বৎসে! ইহা মনে রাখিও, বিস্মৃত হইও না।

---

(১) কথং বা গোতমী মন্যতে।

(২) জাদে! এদং ক্খু সব্বং ধারেহি।

कण्वः । वत्से ! एहि परिष्वजस्व मां सखीजनञ्च (१) । (द)

शकु । ताद ! इदो ज्जेव किं पिअसहीओ णिवत्तिस्सन्ति (२) । (ध)

कण्वः । वत्से ! इमे अपि प्रदेये, तन्न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी गमिष्यति (३) । (न)

शकु । पितुरङ्कमाश्लिष्य । कधं दाणिं तादस्स अङ्कादो परिब्भट्टा मलअपव्वदादो उम्मूलिदा चन्दणलदा विअ देसन्तरे जीविदं धारइस्सं (४) । (प)

(ध) तात ! इत एव किं प्रियसख्यौ निवर्त्तिष्येते ? ।

(प) कथमिदानीं तातस्य अङ्कात् परिभ्रष्टा मलयपर्वतादुन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि ।

(द) कण्व इति । परिष्वजस्व आलिङ्ग । प्रस्थानकाले उचितत्वादित्याशयः ।

(ध) शकु इति । निवर्त्तिष्येते आश्रमं प्रति गमिष्यतः ।

(न) कण्व इति । इमे अनसूयाप्रियंवदे अपि, प्रदेये पात्रसात्कर्त्तव्ये अनूढे इत्यर्थः, तत्तस्मात् अनूढाया वयस्याया निःसम्पर्कस्य ते गमनायुक्तत्वादित्यर्थः । गौतमी गमिष्यति । तेन च केवलपुरुषैः सह गमनदोषो नाशङ्कनीय इति भावः ।

(प) शकु इति । अङ्कं क्रोड़म्, आश्लिष्य आलिङ्ग्य । युवत्या भर्तृभिन्नस्य

(द) কণ্ব। বৎসে ! আয়, আমাকে এবং সখীজনকে আলিঙ্গন কর।

(ধ) শকুন্তলা। পিতঃ ! প্রিয়সখীরা কি এখান হইতেই ফিরিবে ?।

(ন) কণ্ব। বৎসে ! ইহাদিগকেও দান করিতে হইবে, অতএব ইহাদের সেখানে যাওয়া উচিত নহে ; তোর সঙ্গে গৌতমী যাইবেন।

(१) वत्से ! परिष्वजस्व । (२) किं प्रियंवदामिश्रा सखी ।

(३) न युक्तं गौतमी यास्यति । (४) पितरमाश्लिष्य । मलयतरुन्मूलिदा ।

कण्वः। वत्से! किमेवं कातरासि?।

अभिजनवतो भर्त्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैरस्य प्रतिक्षणमाकुला (१)।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से! शुचं गणयिष्यसि ॥२१॥

---

पुरुषस्य वक्षस्यालिङ्गनमसङ्गतमिति अङ्गमित्युक्तम्, सन्तानस्य च जनकजनन्योरङ्कस्यैवाश्रयणीयतया अङ्कान्तरानुक्तिरित्यवधेयम्। जीवितं जीवनम्।

अभीति। हे वत्से! त्वम्, अभिजनः प्राशस्त्येन कुलमस्यास्तीति अभिजनवान् उत्तमकुलोत्पन्न इत्यर्थस्तस्य, भर्त्तुर्दुष्मन्तस्य, श्लाघ्ये गौरवास्पदे, गृहिणीपदे गृहकर्त्रीस्थाने स्थिता, तथा विभवेन धनसम्पत्त्या गुरूणि नानाविधत्वाद्बहुतरत्वाच्च महान्ति तैः, अस्य भर्त्तुः, कृत्यैः परिजनपरिपालनादिभिर्व्यापारैः, प्रतिक्षणं सर्वदा, आकुला व्यग्रा च सती, अचिरात् शीघ्रमेव, प्राची पूर्वा दिक्, अर्कं सूर्यमिव, पावनं पवित्रताजनकम्, एकत्र "पवित्रताकारणाय तस्मै शुद्धात्मने नमः" इति विष्णुपुराणात् अन्यत्र नानासत्कार्य्याणां प्रवर्त्तयिष्यमाणत्वादिति भावः, तनयं पुत्रम्, प्रसूय च, मम विरहजां एतद्विच्छेदजाताम्, शुचं शोकम्, न गणयिष्यसि नानुभविष्यसि; नानाकार्य्यचिन्तया पुत्रस्वभावदर्शनामोदेन च सर्वदैव मनसः पूर्णत्वात्। अतः किमेवं कातरासीति भावः।

अत्र श्रौती पूर्णोपमालङ्कारः। सादृश्यस्य प्रसवपर्य्यन्त एव समाप्त्या "लतेव राजसे तन्वि!" इत्यादिवदनुपपत्त्यभावात् पुरुषभेदेऽपि न भग्नप्रक्रमतादोषः।

---

(প) শকুন্তলা। (পিতার ক্রোড় আলিঙ্গন করিয়া) মলয়পর্ব্বত হইতে উন্মূলিত চন্দনলতার ন্যায় আমি পিতার ক্রোড় হইতে বিচ্যুত হইয়া, এখন দেশান্তরে কি করিয়া জীবন ধারণ করিব।

কণ্ব। বৎসে! কেন এরূপ কাতর হইতেছিস্।

---

(१) कार्य्यैस्तस्य।

শকু। পিতুঃ পাদয়োঃ পতিত্বা। তাদ! বন্দামি (১)। (ফ)

কণ্বঃ। বৎসে! যদহমিচ্ছামি, তদস্তু তে (২)। (ব)

শকু। সখ্যাবুপগম্য। সহীও! এধ, দুবে বি মং সমং জ্জেব পরিস্সজধ (৩)। (ভ)

(ফ) তাত! বন্দে।

(ভ) সখ্যৌ। এতম্, দ্বে অপি মাং সমমেব পরিষ্বজেথাম্।

"অভিজনান্বয়ৌ" "বংশ-ঐ-বিভবা অপি" ইতি অমরঃ। "গৌরবিতাত্মাত্মার্থমিষ্যাঃ শ্লাঘ্যাস্তরমভবন্মুখাঃ" ইতি ত্রিকাণ্ডশেষঃ।

অভিজনবত ইতি প্রশংসায়াং মতুপ্রত্যয়ঃ। হরিণী বৃত্তম্ ॥২১॥

(ব) কণ্ব ইতি। এতেন সর্ববিষয়মঙ্গলস্যৈব প্রাপ্তত্বাৎ মহত্যেবাশীঃ সূচিতা।

(ভ) শকু ইতি। সখ্যাবুপগম্য অনসূয়াপ্রিয়ংবদয়োঃ সমীপং গত্বা। এতম্ আগচ্ছতম্। সমং যুগপদেব, পরিষ্বজেথাম্ আলিঙ্গতম্।

বৎসে! সংকুলোৎপন্ন ভর্ত্তার শ্লাঘ্য গৃহিণীপদে থাকিয়া, বিপুল-সম্পত্তিনিবন্ধন গুরুতর ভর্ত্তৃকার্য্যে সর্ব্বদা ব্যগ্র হইয়া, পূর্ব্বদিক্ যেমন সূর্য্যকে প্রসব করে, সেইরূপ অচিরকালমধ্যে পবিত্র পুত্র প্রসব করিয়া, আমার বিরহজাত শোক মনেও করিবে না ॥২১॥

(ফ) শকুন্তলা। (পিতার চরণে পতিত হইয়া) পিতঃ! নমস্কার করি।

(ব) কণ্ব। বৎসে! আমি যাহা ইচ্ছা করি, তোমার তাহা হউক।

(ভ) শকুন্তলা। (সখীদের নিকটে যাইয়া) সখীরা! আইস, তোমরা দুইজনেই আমাকে যুগপৎ আলিঙ্গন কর।

(১) শকুন্তলা। পিতুঃ পাদয়োঃ পততি।

(২) কাশ্যপঃ। যদিচ্ছামি তে তদস্তু। (৩) শকুন্তলা। হলা। দুবে বি।

সখ্যৌ। তথা কৃত্বা। সহি! জই ণাম সো রাএসী পচ্চহি-ণ্ণাণমন্থরো ভবে, তদো সে ইমং অত্তণো ণামধেঅঙ্কিদং অঙ্গুলিঅঅং দংসইস্সসি (১)। (ম)

শকু। ইমিণা বো সন্দেসেণ কম্পিদং মে হিঅঅং (২)। (য)

সখ্যৌ। সহি! মা ভাআহি। সিণেহো পাব-মাসঙ্কদি (৩)। (র)

(ম) সখি! যদি নাম স রাজর্ষিঃ প্রত্যভিজ্ঞানমন্থরো ভবেৎ, তদা অস্য ইদমাত্মনো নামধেয়াঙ্কিতমঙ্গুরীয়কং দর্শয়িষ্যসি।

(য) অনেন বাং সন্দেশেন কম্পিতং মে হৃদয়ম্।

(র) সখি। মা বিভীহি। স্নেহঃ পাপমাশঙ্কতে।

(ম) সখ্যাবিতি। স রাজর্ষির্দুষ্মন্তঃ, প্রত্যভিজ্ঞানে তব পরিচয়ে মন্থরো মন্দঃ অসমর্থ ইত্যর্থঃ। অস্য সমীপে, আত্মনস্তস্যৈব রাজ্ঞঃ, নামধেয়াঙ্কিতম্ উৎকীর্ণ-নামাক্ষরম্।

(য) শকু ইতি। বাং যুবয়োঃ সন্দেশেন বাচিকেন বাচকীকৃত্য উপদেশেনেত্যর্থঃ। কম্পিতমিতি তৎকর্তৃকবিস্মরণাশঙ্কাবশাদিতি ভাবঃ।

(র) সখ্যাবিতি। মা বিভীহি ভীতা মা ভব। স্নেহঃ প্রণয়ঃ, পাপং পাপ-

(ম) সখীদ্বয়। (তাহা করিয়া) সখি! যদি সেই রাজর্ষি তোমাকে চিনিতে অসমর্থ হন, তবে তাঁহাকে নিজের নামাঙ্কিত এই অঙ্গুরী দেখাইবে।

(য) শকুন্তলা। তোমাদের এই খবরে আমার হৃদয় কম্পিত হইল।

(১) সো রাআ মন্থরো হোই দংসেহু। (২) সন্দেসেণ আকম্পিঅ ম্হি।

(৩) সিণেহো পাবসঙ্কী।

শার্ঙ্গ। ভগবন্! দূরমধিরূঢ়ঃ সবিতা; তত্ত্বরয়াত্র-ভবতীম্ (১)। (ল)

শকু। ভূয়ঃ পিতুরঙ্কমাশ্লিষ্য আশ্রমাভিমুখীভূয় চ। তাদ! কদা ণু ক্খু, ভূয়ো তবোবণং পেক্খিস্সং (২)। (ব)

কণ্বঃ। বৎসে! (৩)

ভূত্বা চিরায় সদিগন্তমহীসপত্নী
দৌষ্মন্তিমপ্রতিরথং তনয়ং প্রসূয়।

(ব) তাত! কদা নু খলু ভূয়স্তপোবনং প্রেক্ষিষ্যে।

---

জনিতমমঙ্গলম্। তথা চ স্নেহস্যৈষ স্বভাবঃ, যৎ স স্নিগ্ধজনস্য অমঙ্গলাশঙ্কামেব জনয়তি। তেন স্নিগ্ধায়াস্তব তাদৃশমমঙ্গলমাশঙ্ক্যৈবেদমভিহিতম্, ন পুনর্বস্তুত এব তস্য রাজ্ঞঃ প্রত্যভিজ্ঞানমন্থরতা ভবেদিতি ভাবঃ। বিভীহীতি ভীধাতোর্হৌ প্রয়োগঃ।

(ল) শার্ঙ্গেতি। সবিতা সূর্য্যঃ, দূরম্ উদয়াচলাদাকাশস্য অধিকং দেশম্, অধিরূঢ় আরূঢ়ঃ। তত্তস্মাৎ, অত্রভবতীং গুরুকন্যাত্বেন মাননীয়াং শকুন্তলাম্, ত্বরয় গন্তুং সত্বরীকুরু। অন্যথা আতপেন নিতরাং কষ্টং ভবিষ্যতীতি ভাবঃ।

(ব) শকু ইতি। ভূয়ঃ পুনরপি। প্রেক্ষিষ্যে দ্রক্ষ্যামি।

---

(র) সখীদ্বয়। সখি! ভীত হইও না; স্নেহ অমঙ্গল আশঙ্কা করিয়া থাকে।

(ল) শার্ঙ্গরব। ভগবন্! সূর্য্য উদয়াচল হইতে অনেক দূরে উঠিয়াছেন, অতএব শকুন্তলাকে সত্বর করুন।

(ব) শকুন্তলা। (পুনরায় পিতার ক্রোড় আলিঙ্গন করিয়া, আশ্রমের অভিমুখ হইয়া) পিতঃ! আবার কবে তপোবন দেখিব।

---

(১) শার্ঙ্গরবঃ। যুগান্তরমারূঢ়ঃ সবিতা। ত্বরতাং ভবতী।

(২) শকুন্তলা। আশ্রমাভিমুখী স্থিত্বা। তাদ! কদা ণু ভূয়ো তবোবণং পেক্খিস্সং। (৩) শ্রূয়তাম্।

तत्सन्निवेशितधुरेण सहैव भर्त्रा
शान्त्यै करिष्यसि पदं पुनराश्रमेऽस्मिन् (१) ॥२२॥

गौतमी। जादे! परिहीअदि दे गमणवेला, ता णिवत्ता-

भूत्वेति। चिराय अतिदीर्घकालं यावत्, दिगन्तैः सहेति सदिगन्ता सम्पूर्णेत्यर्थः या मही पृथिवी तस्याः सपत्नी समानभर्तृका भूत्वा। दुष्मन्तस्य चिराय समग्रपृथिवीश्वरत्वे शकुन्तलायाश्च तावत्कालं तत्पत्नीत्वे एतत्सिद्धिरित्यवधेयम्। न विद्यते प्रतिरथः स्वसमानयोद्धा यस्य तं तादृशम्, दुष्मन्तस्यापत्यमिति दौष्मन्तिस्तम्, तनयं पुत्रम्, प्रसूय उत्पाद्य, तस्मिन् तनये सन्निवेशिता संस्थापिता धूः साम्राज्यभारो येन तेन तादृशेन, भर्त्रा पत्या दुष्मन्तेन सहैव, न पुनर्भवत्या एकाकिनीत्याशयः, अस्मिन् आश्रमे तपोवने, शान्त्यै शान्तिलाभाय मुक्तिलाभायेत्यर्थः पुनः पदं स्थितिम्, करिष्यसि; इदानीं विच्छेदेऽपि पुनर्दीर्घकालमत्रावस्थानसम्भवान्नात्यन्तविषादः कर्त्तव्य इति भावः।

अत्र सपत्नीत्यनेन मह्यामपि पत्नीत्वारोपो व्यज्यत इति वस्तुना रूपकालङ्कारध्वनिः।

"पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः।

प्रसवात् प्राक् किञ्चित् परमेव वा अप्रतिरथत्वासम्भवेऽपि "भाविनि भूतवदुपचारः" इति न्यायादुपपत्तिः "धूरनक्षस्य च" इति राजादित्वादत्प्रत्यये तत्सन्निवेशितधुरेणेति सिद्धम्।

"पुत्रेषु दारान्निक्षिप्य वनं गच्छेत् सहैव वा" इति स्मृतेः भर्त्रा सहैवेत्युक्तम्।

वसन्ततिलका वृत्तम् ॥२२॥

কণ্ব। বৎসে! অতিদীর্ঘকাল যাবৎ সমগ্র পৃথিবীর সপত্নী হইয়া, দুষ্মন্তের ঔরসজাত অপ্রতিদ্বন্দ্বী পুত্র প্রসব করিয়া, সেই পুত্রের উপরে রাজ্যভার সমর্পণকারী ভর্ত্তার সঙ্গেই মুক্তিলাভের নিমিত্ত পুনরায় এই আশ্রমে অবস্থান করিবে ॥২২॥

(१) चतुरन्तमहीसपत्नी तनयं निवेश्य। भर्त्रा तदर्पितकुटुम्बभरेण सार्द्धं शान्ते।

বেহি পিদরং। অধবা চিরেণ বি এসা ণ ণিউত্তিস্সদি, তা ণিউত্তদু ভবং (১)। (শ)

কণ্বঃ। বৎসে! উপরুধ্যতে মে তপোঽনুষ্ঠানম্। (ষ)

শকু। তবস্সরণবাবারেণ ণিরুক্কণ্ঠো তাদো, অহং উণ উক্কণ্ঠাভাইণী সংবুত্তা (২)। (স)

(শ) জাতে! পরিহীয়তে তে গমনবেলা, তন্নিবর্ত্তয় পিতরম্। অথবা চিরেণাপি এষা ন নিবর্ত্তিষ্যতে, তন্নিবর্ত্ততাং ভবান্।

(স) তপশ্চরণব্যাপারেণ নিরুৎকণ্ঠস্তাতঃ, অহং পুনরুৎকণ্ঠাভাগিনী সংবৃত্তা।

(শ) গৌতমীতি। পরিহীয়তে ঈদৃশালোচনেন পরিত্যজ্যতে, অত্যেতীতি তাৎপর্য্যম্। শকুন্তলাকর্ত্তৃকং নিবর্ত্তনমসম্ভবমাশঙ্ক্যাহ অথবেতি। এষা শকুন্তলা ন নিবর্ত্তিষ্যতে ঈদৃশনিষ্প্রয়োজনকথোপকথনাদিতি শেষঃ।

(ষ) কণ্ব ইতি। উপরুধ্যতে ঈদৃশবিলম্বেন ব্যাহন্যতে। তন্মাং বিসর্জয়েত্যাশয়ঃ।

(স) শকু ইতি। তপশ্চরণব্যাপারেণ অনবরততপোঽনুষ্ঠানকার্য্যেণ নিরুৎকণ্ঠো মদ্বিরহনিবন্ধনবিষাদহীনঃ; পুনঃ কিন্তু, উৎকণ্ঠাভাগিনী তপোবৎ অবশ্যকর্ত্তব্যকার্য্যাভাবাৎ তাতবিরহনিবন্ধনবিষাদশালিনী। তথা চ বিরহে উভয়োঃ সমানদুঃখস্যৌচিত্যেঽপি মমৈব দুঃখভোগসম্ভবাদহং নিবর্ত্তয়িতুং নিবর্ত্তিতুং বা নোৎসহে ইতি ভাবঃ।

---

(শ) গৌতমী। বৎসে! তোমার গমনের সময় অতীত হইতেছে, অতএব পিতাকে ফিরাও। অথবা, এ দীর্ঘকালেও নিবৃত্তি পাইবে না, অতএব আপনিই ফিরুন।

(ষ) কণ্ব। বৎসে! আমার তপস্যার ব্যাঘাত হইতেছে।

---

(১)···চিরেণ বি পুণো পুণো এসা এব্বং মন্তইস্সদি, ণিবত্তদু ভবং।

(২) ভূয়ঃ পিতরমাশ্লিষ্য। তবস্সরণপীড়িদং তাদসরীরং। তা মা অদিমেত্তং মম কিদে উক্কণ্ঠিদং।

कण्वः । वत्से ! मामेवं जडीकरोषि । निःश्वस्य (१) (ह)
अपयास्यति मे शोकः, कथं नु वत्से ! त्वया रचितपूर्वम् ।
उटजद्वारविरूढं नीवारबलिं विलोकयतः (२) ॥२३॥

(ह) कण्व इति । एवम् इत्थम्भूतेन वात्सल्यप्रकाशेन आलापेन च, जडीकरोषि सर्वकार्य्याक्षमीकरोषि ।

इदानीं निरुत्कण्ठत्वात इत्युक्तं प्रतिवदति अपेति । नु हे वत्से ! त्वया रचितपूर्वं पक्षिणां भक्षणाय रोपितपूर्वम्, उटजद्वारे पर्णशालायाः सम्मुखे विरूढम् अङ्कुरितम्, नीवारबलिं तृणधान्यरूपमुपहारम्, विलोकयतः पश्यतः, मे मम, शोकः त्वद्विरहनिबन्धनविषादः, कथम् अपयास्यति निवर्त्तिष्यते, अपि तु कथमपि नेत्यर्थः, तन्नीवारबलेरेव तव स्मारकत्वात् अभावकाले आत्मीयजनस्मरणस्यैव च शोकपदार्थत्वादिति भावः ।

अत्र नीवारबलिविलोकनमेव शोकानपगमनं प्रति हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, तदनुप्राणिता चार्थापत्तिः, इत्युभयोरङ्गाङ्गिभावेन सङ्करः । तथा 'अपयास्यति मे शोकः कथम्' इत्यनेन वाक्यसमाप्तावपि पुनस्तदन्तर्गतस्य मे इत्यस्य विशेषणतया त्वया रचितपूर्वमित्यारभ्य द्वितीयार्द्धस्य पुनरात्तत्वात् समाप्तपुनरात्ततादोषः ; स च "निवर्त्तिष्यते शोकः" इति प्रथमचरणपाठेन "नीवारबलिं पश्यतो मे" इति चतुर्थचरणपाठेन च समाधेयः । तादृशपाठे तु मे इति विशेषस्यापि पुनरात्तत्वान्नोक्तदोषः, समाप्तवाक्यान्तर्गतस्य कस्यचिद्विशेषणतयैव पुनरुपादाने तद्दोषाङ्गीकारात् । आर्य्या जातिः ॥२३॥

(স) শকুন্তলা। তপস্যার ব্যগ্রতাবশতঃ পিতার উৎকণ্ঠা নাই, কিন্তু আমিই উৎকণ্ঠাভাগিনী হইলাম।

(হ) কণ্ব। বৎসে! এইরূপ কথা বলিয়া আমাকে একেবারে জড় করিয়া ফেলিতেছ। ( নিশ্বাস ত্যাগ করিয়া )

বৎসে! পর্ণশালার দ্বারে তুমি রোপণ করিয়াছিলে, তাহা এখন

(१) काश्यपः । सनिःश्वासम् ।

(२) शममेष्यति मम शोकः··· । उटजद्वारि विरूढं ।

গচ্ছ, শিবাস্তে সন্তু পন্থানঃ। (ঘ)

ইতি নিষ্ক্রান্তাঃ শকুন্তলয়া সহ গৌতমী-শার্ঙ্গরব-শারদ্বতমিশ্রাঃ। (১)

সখ্যৌ। চিরং বিচিন্ত্য সকরুণম্। হদ্ধী হদ্ধী! অন্তরিদা সউন্তলা বণরাইহিং (২)। (ক)

কণ্বঃ। সনিঃশ্বাসম্। অনসূয়ে! প্রিয়ংবদে! গতাবাং সহচরী; নিগৃহ্য শোকাবেগং মামনুগচ্ছতম্। সর্বে প্রস্থিতাঃ (৩)। (খ)

(ক) হা ধিক্ হা ধিক্! অন্তরিতা শকুন্তলা বনরাজিভিঃ।

(ঘ) গচ্ছেতি। শিবা মঙ্গলকরা ইত্যর্থঃ।

(ক) সখ্যাবিতি। বনানাং রাজিভিঃ শ্রেণীভিঃ, অন্তরিতা তিরোহিতা। অতএব চ শোকাৎ সকরুণমিত্যুক্তম্।

অঙ্কুরিত হইয়াছে, পশু-পক্ষিগণের খাদ্য সেই উড়ীধানগুলি দেখিবার সময়ে আমার শোক কি প্রকারে যাইবে ॥২৩॥

(ঘ) যাও, তোমার পথ মঙ্গলময় হউক।

( ইহার পরে শকুন্তলার সহিত গৌতমী, শার্ঙ্গরব ও শারদ্বতমিশ্র প্রস্থান করিলেন। )

(ক) সখীদ্বয়। ( বহুকাল চিন্তা করিয়া শোকের সহিত ) হায়! হায়! শকুন্তলা বনশ্রেণীতে অন্তরিত হইয়া গেল।

(খ) কণ্ব। ( নিশ্বাস ত্যাগ করিয়া ) অনসূয়া! প্রিয়ংবদা!

(১) নিষ্ক্রান্তা শকুন্তলা সহযায়িনশ্চ।

(২) সখ্যৌ। শকুন্তলাং বিলোক্য। হন্ত হন্ত! অন্তর্হিতা শকুন্তলা বনরাজিভিঃ।

(৩) কাশ্যপঃ। সনিঃশ্বাসম্। অনসূয়ে! গতবতী বাং সহধর্মচারিণী, নিগৃহ্য শোকমনুগচ্ছ মাম্। প্রস্থিতাঃ।

उभे। तात! सउन्तलाविरहिदं सुण्णं विअ तवोवणं पविसम्ह। (ग)

कण्वः। स्नेहप्रवृत्तिरेवंदर्शिनी। सविमर्शं परिक्रम्य। हन्त भोः! शकुन्तलां पतिगृहे विसृज्य लब्धमिदानीं स्वास्थ्यम्। कुतः (१) (घ)

(ग) तात! शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः।

(ख) कण्व इति। वां युवयोः सहचरी शकुन्तला। अतएव निगृह्य अवरुध्य। सर्वे कण्वादयः, प्रस्थिताः पर्णशालां प्रति प्रस्थातुमारभन्ते।

(ग) उभे इति। शून्यमिव जनपूर्णत्वेऽपि शून्यवत्प्रतीयमानम्।

(घ) कण्व इति। स्नेहप्रवृत्तिर्वात्सल्यप्रवाहः, एवंदर्शिनी इत्थंप्रत्यायिनी स्निग्ध-जनाभावे निरवच्छिन्नतत्स्नेहप्रवाह एव जनपूर्णत्वेऽपि तत्स्थानस्य शून्यताप्रत्यायक इति रीतेः सार्वजनीनत्वात् नात्र किञ्चिदाश्चर्यमिति भावः। सविमर्शं सवितर्कम्, परिक्रम्य गृहं प्रति कियन्तं पदक्षेपं कृत्वा। हन्तेति हर्षे। विसृज्य सम्प्रेष्य। स्वास्थ्यं प्रकृतिस्थता। तत्कारणमाह कुत इति।

"प्रवृत्तिः कथिता वृत्तौ प्रवाहोदन्तयोरपि।" इति विश्वः। "वितर्कः स्यादूहनं परामर्शो विमर्शनम्। अध्याहारस्तर्क ऊहः" इति हेमचन्द्रः।

তোমাদের সহচরী চলিয়া গিয়াছে; শোকের আবেগ দমন করিয়া, আমার পিছনে আইস। ( সকলে প্রস্থান করিল। )

(গ) সখীদ্বয়। পিতঃ! শকুন্তলা না থাকায় শূন্য তপোবনে যেন প্রবেশ করিতেছি।

(ঘ) কণ্ব। স্নেহপ্রবাহই এইরূপ মনে করাইতেছে। ( বিতর্কের সহিত পদক্ষেপ করিয়া ) ওহে! শকুন্তলাকে পতিগৃহে পাঠাইয়া দিয়া এখন স্বাস্থ্য লাভ করিলাম। কারণ,

(१) काश्यपः। शकुन्तलां विसृज्य।

অর্থো হি কন্যা পরকীয় এব
তামদ্য সম্প্রেষ্য পরিগ্রহীতুঃ।
জাতোঽস্মি সদ্যো বিশদান্তরাত্মা
চিরস্য নিক্ষেপমিবার্পয়িত্বা (১) ॥২৪॥

ইতি নিষ্ক্রান্তাঃ সর্বে।

## চতুর্থোঽঙ্কঃ ॥০॥

অর্থ ইতি। কন্যা অর্থঃ কন্যারূপং ধনম্‌, পরকীয় এব, হি সর্বথা অন্যদীয় এব, অল্পকালং পিতুঃ অধিককালন্তু বরস্য স্বত্ববত্ত্বাৎ “অধিকেন ব্যপদেশা ভবন্তী”তি ন্যায়াদিতি ভাবঃ। অদ্য তাং কন্যাম্‌, পরিগ্রহীতুঃ পরিণেতুর্দুষ্মন্তস্য সমীপে, সম্প্রেষ্য বিসৃজ্য, চিরস্য নিক্ষেপং চিরকালন্যাসীকৃতং ধনম্‌, অর্পয়িত্বা ইব প্রত্যর্প্য ইব, সদ্যস্তৎক্ষণাৎ, বিশদান্তরাত্মা প্রসন্নচিত্তঃ, জাতোঽস্মি ; উভয়ত্রাপি দায়িত্বব্যপগমাদিতি ভাবঃ।

অত্র শ্রৌতোপমালঙ্কারঃ। এবশব্দস্য স্থিতৌ পুনর্হিশব্দস্য উপাদানেঽপি “যঃ কৌমারহরঃ স এব হি বরঃ” ইত্যাদিবৎ ‘এব’ ‘হি’ ইতি শব্দদ্বয়েনৈব অত্যন্তাবধারণসূচনাৎ ন নিরর্থকত্বদোষঃ।

ইন্দ্রবজ্রোপেন্দ্রবজ্রয়োর্মেলনাদুপজাতির্বৃত্তম্‌ ॥২৪॥

ইতি মহামহোপাধ্যায়-ভারতাচার্য্য শ্রীহরিদাসসিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াম্‌
অভিজ্ঞানশকুন্তলটীকায়ামভিজ্ঞানকৌমুদ্যাং চতুর্থাঙ্কবিবরণং সমাপ্তম্‌ ॥০॥

---

কন্যারূপ ধন পরেরই ; তাহা আজ পরিগ্রহীতার নিকট পাঠাইয়া, চিরকালের গচ্ছিত বস্তু ফিরাইয়া দেওয়ার পরে যেমন, সেরূপ সদ্যই প্রসন্নচিত্ত হইলাম ॥২৪॥

( ইহার পরে সকলে চলিয়া গেল। )

## চতুর্থ অঙ্ক ॥০॥

(১) জাতো মমায়ং বিশদঃ প্রকামং প্রত্যর্পিতন্যাস ইবান্তরাত্মা।

# पञ्चमोऽङ्कः ।

—०:*:०—

ततः प्रविशति कञ्चुकी (१)। (क)

कञ्चुकी। अहोबत! कीदृशीं वयोऽवस्थामापन्नोऽस्मि (२)। (ख)

आचार इत्यधिकृतेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनाय (३) ॥१॥

(क) तत इति। कञ्चुकं वस्त्रनिर्म्मितदेहावरणमस्यास्तीति कञ्चुकी। स चान्तःपुरचारी गुणवान् वृद्धो ब्राह्मण इत्यालङ्कारिकसङ्केतः। यथा भरतः—

"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते।
जरावैक्लव्ययुक्तेन विशेद्गात्रेण कञ्चुकी ॥"

(ख) कञ्चुकीति। अहो इत्याश्चर्य्ये, बत इति खेदे। वयसः अवस्थां कालकृत-वैषम्यम्, आपन्नः प्राप्तः। ईदृशीं वयोऽवस्थामवलोक्य युगपद्विस्मयो दुःखञ्च जायत इत्याशयः।

(क) তদনন্তর কঞ্চুকীর প্রবেশ।

(খ) কঞ্চুকী। হায়! কি রকম বয়সের অবস্থা প্রাপ্ত হইলাম!!

(१) कस्मिंश्चित् पुस्तके परवर्त्तिनो राजविदूषकयोः प्रवेशादारभ्य "भाविस्थिराणि जननान्तरसौहृदानि" इत्यन्तसन्दर्भः प्रथममेवात्र लिखितः। (२) अहो नु खलु ईदृशी-मवस्थां प्रतिपन्नोऽस्मि। (३) आचार इत्यवहितेन···अवलम्बनार्था।

यावदभ्यन्तरगताय देवाय स्वमनुष्ठेयमकालक्षेपार्हं निवेदयामि। (कौकमन्तरं गत्वा।) किं पुनस्तत्?। (विचिन्त्य।) आं ज्ञातम्, कण्वशिष्यास्तपस्विनो देवं द्रष्टुमिच्छन्ति। भोः! चित्रमेतत् (१)। (ग)

तदेव व्यनक्ति आचार इति। राज्ञः अवरोधगृहेषु अन्तःपुरभवनेषु, अधिकृतेन अध्यक्षतया नियुक्तेन तत्परिरक्षकेणेत्यर्थः मया, आचार इति कञ्चुकिनां वेत्रयष्टिधारणमेव व्यवहार इति हेतोः, न पुनरिदानीमिव देहदौर्बल्येन प्रयोजनवशादिति भावः, या वेत्रयष्टिः गृहीता पूर्वं धृता, बहुतिथे अत्यधिके काले गते पूर्णवार्द्धक्य एवागते सतीत्यर्थः, सैव वेत्रयष्टिः, प्रस्थाने स्थानान्तरप्राप्तिकाले विक्लवा देहदौर्बल्यात् वातरोगागमाच्च विह्वला गतिः पादक्षेपो यस्य तस्य मम, अवलम्बनाय आश्रयाय जाता। तथा चेदानीं देहदुर्बलतावशात् यष्टिं विना चलितुमेव न शक्नोमि। तेन च पूर्वं या वेत्रयष्टिर्विनाप्रयोजनं धृता, इदानीन्तु सैव महाप्रयोजनार्थी जाता इत्यतो विस्मयः, नितान्तदुर्बलतया परनिर्भरकरणाच्च दुःखमिति भावः।

अत्र वेत्रयष्टिः पूर्वमाचारमात्रगोचर आसीत् इदानीन्तु अवलम्बनगोचर एव जातेति एकस्या एव वेत्रयष्टेरनेकगोचरत्वात् विशेषालङ्कारः।

बहूनां पूरण इति बहुतिथः "आख्यातास्च तमादयः" इति पूरणार्थे तिथप्रत्ययः।

वसन्ततिलका वृत्तम् ॥१॥

(ग) यावदिति। यावदिति वाक्यालङ्कारे। अभ्यन्तरगताय अन्तःपुरवर्त्तिने, देवाय राज्ञे, स्वं स्वीयं तदीयमिति यावत्, अनुष्ठेयं कर्त्तव्यं सन्दर्शनदानमित्यर्थः

আমি, রাজার অন্তঃপুরের গৃহগুলিতে অধ্যক্ষরূপে নিযুক্ত হইয়া 'কঞ্চুকীদের বেত্রযষ্টিই ধারণ করিতে হয়' এই ব্যবহারবশতই যে বেত্রযষ্টি ধারণ করিয়াছিলাম, বহুকাল অতীত হওয়ায় সেই বেত্রযষ্টিই আমার এখন অবলম্বনের উপায় হইয়া দাঁড়াইয়াছে; কারণ, চলিবার সময়ে বর্ত্তমানে আমার পদক্ষেপ, বিহ্বল হইয়া থাকে ॥১॥

---

(१) यावदित्यादिपाठः क्वचिन्नास्ति।

ক্ষণাৎ প্রবোধমায়াতি লঙ্ঘ্যতে তমসা পুনঃ।
নির্ব্বাস্যতঃ প্রদীপস্য শিখেব জরতো মতিঃ (১) ॥২॥

পরিক্রম্যাবলোক্য চ। এষ দেবঃ—

প্রজাঃ প্রজাঃ স্বা ইব তন্ত্রয়িত্বা
নিষেবতে শ্রান্তমনা বিবিক্তম্।

অকালক্ষেপার্হং বিলম্বাযোগ্যম্। স্তোকমন্তরং কিয়দ্দূরম্। কিং পুনস্তৎ, যন্নিবেদয়ামীত্যর্থঃ। এতেন বিস্মৃতির্দ্যোতিতা। বিচিন্ত্য স্মৃত্বা স্মৃতিমভিনীয়েতি তাৎপর্য্যম্। আমিতি স্মৃতিদ্যোতকমব্যয়ম্। স্মাতং স্মৃতম্। কিং স্মৃতমিত্যাহ কণ্বেতি। ভো ইতি বিষাদে। এতৎ হঠাদ্বিস্মরণং হঠাচ্চ স্মরণম্, চিত্রমাশ্চর্য্যম্।

"ভোস্তু সম্বোধনবিষাদয়োঃ" ইতি মেদিনী।

ক্ষণাদিতি। নির্ব্বাস্যতো নির্ব্বাণং প্রাপ্স্যতঃ অচিরং মরিষ্যতশ্চ, প্রদীপস্য, শিখা ইব, জরতো বৃদ্ধজনস্য, মতির্বুদ্ধিঃ, ক্ষণাৎ প্রবোধম্ উন্মেষম্ দীপ্তিঞ্চ, আয়াতি প্রাপ্নোতি ক্ষণাদেব চ পুনস্তমসা উন্মেষনিবারকেণ তমোগুণেন অন্ধকারেণ চ, লঙ্ঘ্যতে আক্রম্যতে। এতদেব চিত্রমিত্যাশয়ঃ।

অত্র শ্রৌতী পূর্ণোপমালঙ্কারঃ ॥২॥

(গ) রাজা অন্তঃপুরে গিয়াছেন, বিলম্বের অযোগ্য তাঁহার কোন কর্ত্তব্য কার্য্য উপস্থিত হইয়াছে, তাঁহাকে জানাই। (একটু দূরে যাইয়া) তাহা জানি কি? (স্মরণ করিয়া) ও! মনে পড়িয়াছে; তপস্বী কণ্বশিষ্যগণ মহারাজকে দেখিতে ইচ্ছা করেন। হায়! ইহা আশ্চর্য্য বটে।

যে দীপ নিবিয়া যাইবে, তাহার শিখার ন্যায় বৃদ্ধের বুদ্ধি, ক্ষণকালের মধ্যে উন্মেষ লাভ করে, আবার অন্ধকারে আক্রমণ করে ॥২॥

(পাদক্ষেপ করিয়া, দেখিয়া) এই রাজা—

(১) অয়ং শ্লোকোঽপি কুত্রচিন্ন দৃশ্যতে।

যূথানি সঞ্চার্য্য রবিপ্রতপ্তঃ
শীতং গুহাস্থানমিব দ্বিপেন্দ্রঃ (১) ॥৩॥

ভোঃ! সত্যং ধর্ম্মকার্য্যমনতিপাত্যং দেবস্য, তথাপি শঙ্কিত-বানস্মি ইদানীমেব ধর্ম্মাসনাদুত্থিতায় দেবায় কণ্বশিষ্যাগমনং নিবেদয়িতুম্। অথবা কুতো বিশ্রামো লোকপালানাম্। তথাহি—(২) (ঘ)

প্রজা ইতি। যূথানি হস্তিসমূহান্, সঞ্চার্য্য যথাস্থানে পরিচাল্য, রবিণা সূর্য্যেণ প্রতপ্তঃ সন্তপ্তো দ্বিপেন্দ্রো হস্তিশ্রেষ্ঠঃ, শীতং শীতলম্, গুহাস্থানং গহ্বরদেশমিব, এষ দেবো রাজা দুষ্মন্তঃ, স্বাঃ স্বকীয়াঃ, প্রজাঃ সন্তানানিব, বাৎসল্যবিষয়া ইতি ভাবঃ, প্রজাঃ স্বাধিকারবাসিনো জনান্, তন্ত্রয়িত্বা শাসনেন ন্যায্যপথে স্থাপয়িত্বা, শান্তং পরিশ্রান্তং মনো যস্য স শান্তমনাঃ সন্, বিবিক্তং নির্জনস্থানম্, নিষেবতে আশ্রয়তি, শ্রমাপনোদনার্থমিতি ভাবঃ।

অত্র প্রথমে পাদে যমকং শ্রৌতোপমা চ, দ্বিতীয়ার্দ্ধে চাপরা শ্রৌতোপমা, ইত্যেতেষাং পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ।

“প্রজা স্যাৎ সন্ততৌ জনে” ইত্যমরঃ। “তন্ত্রি কুটুম্বধারণে” ধারণঞ্চ ন্যায্যপথ-স্থাপনম্, “সংস্থা তু মর্য্যাদা ধারণা স্থিতিঃ” ইত্যমরকোষাৎ। “বিবিক্তৌ পূতবিজনৌ” ইতি চামরঃ। ইন্দ্রবজ্রোপেন্দ্রবজ্রয়োর্মেলনাদুপজাতির্বৃত্তম্ ॥৩॥

---

হস্তিগণকে যথাস্থানে সঞ্চালিত করিয়া, সূর্য্যের কিরণে সন্তপ্ত হইয়া, হস্তিশ্রেষ্ঠ যেমন শীতল পর্ব্বতগুহা আশ্রয় করে, সেইরূপ ইনি নিজের সন্তানের ন্যায় প্রজাবর্গকে ন্যায্যপথে চালাইয়া, পরিশ্রান্তচিত্ত হইয়া, নির্জ্জন স্থান আশ্রয় করিয়াছেন ॥৩॥

---

(১) শীতং দিবা স্থানমিব।

(২) ভোঃ! কামং তথাপীদানীমেব ধর্ম্মাসনাদুত্থিতায় পুনরুপরোধকারি কণ্বশিষ্যাগমনমস্মৈ নোৎসহে নিবেদয়িতুম্। অথবা অবিশ্রমো লোকতন্ত্রাধিকারঃ।

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति ।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म्म एषः ॥४॥

इति परिक्रामति । (ङ)

(घ) भो इति । दैवस्य राज्ञो दुष्मन्तस्य, धर्म्मकार्य्यं यत् किमपि धर्म्मसम्बन्धि कर्म्म, अनतिपात्यम् अनतिक्रमणीयम्, सत्यम् इति स्वीकरोमीत्यर्थः । धर्म्मासनात् धर्म्मपरिचालनासनात् विचारासनादिति तात्पर्य्यम्. उत्थिताय उत्थानानन्तरमारब्ध-विश्रामायेत्यर्थः । शङ्कितवान् आतङ्कः । तथा च प्रचुरतरविचारकरणेन दारुण-परिश्रमानन्तरं केवलमारब्धविश्रामः पुनरपि परिश्रमविषयमाकर्ण्य यदि मां प्रति कुप्ये-दित्यत इत्याशयः । लोकपालानां नृपतीनाम् ।

"सत्यं प्रश्नेऽभ्युपगमे" इति मेदिनी ।

भानुरिति । भानुः सूर्य्यः, सकृत् जीवने एकवारमात्रं युक्ता जगत्पर्य्यटनाय रथे निबद्धाः तुरङ्गा अश्वा येन स तादृश एव ; न तु कदाचिदपि तुरङ्गान् विमोच्य विश्राम्य-तीति भावः । गन्धवहो वायुः, रात्रिन्दिवम् अहोरात्रमेव, प्रयाति प्रवहति, न पुनः कदाचिदपि ततो विरमतीत्यभिप्रायः । तथा शेषः अनन्तनागः, सदैव, आहितो धृतः भूमिभारो येन स तथाभूतः, न तु क्वचिदपि तां भूमिमपास्य कियन्तं विश्रामं करोतीत्याशयः । षष्ठांशः प्रजानिर्म्मितशस्यादीनां षष्ठो भाग एव वृत्तिर्जीविका यस्य तस्य तथोक्तस्यापि राज्ञोऽपीत्यर्थः, एषः अविरतपरिश्रमरूपः, धर्म्म आचारः । एवञ्च राज्ञो विश्रामाभावादकुतोभयेनैव कण्वशिष्यागमनं निवेदयितुमर्हामीति भावः ।

---

(ঘ) ওহে! রাজা নিশ্চয়ই ধর্ম্মকার্য্যের অতিক্রম করিবেন না; তথাপি এখনই ধর্ম্মাসন হইতে উঠিয়া গিয়াছেন ; সুতরাং এখনই আবার কণ্বশিষ্যগণের আগমন জানাইতে আশঙ্কিত হইতেছি। অথবা, রাজাদের বিশ্রাম হইবে কোথা হইতে। কারণ,

ततः प्रविशति राजा विदूषको विभवतश्च परीवारः (१) । (च)

राजा । अधिकारखेदं निरूप्य । सर्वः प्रार्थितमधिगम्य सुखी सम्पद्यते जन्तुः ; राज्ञान्तु चरितार्थता दुःखोत्तरैव । कुतः (२) (छ)

अत्र अविरतपरिश्रमरूपस्य एकस्यैव धर्मस्य विभिन्नवाक्यैः पृथक् पृथक् निर्द्देशात् "विमल एव रविर्विशदः शशी" इत्यादिदर्पणोदाहरणवत् मालारूपा प्रतिवस्तूपमा ; एवशब्दाभ्यां कादाचित्कतुरङ्गमोचनादिधर्मव्यपोहनात् शाब्दपरिसंख्याद्वयश्च, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः । सकृद्युक्ततुरङ्गादिशब्दैर्विच्छित्तिविशेषजननान्नानवीकृतत्व-दोष इति सप्तमपरिच्छेदे दर्पणकृतामाशयः ।

रात्रिश्च दिवा चेति द्वन्द्वे "धेन्वनडुहादयश्च" इति निपातनात् रात्रिन्दिवमिति सिद्धम् ।

इन्द्रवज्रा वृत्तम्—"स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति लक्षणात् ॥४॥

(ङ) इतीति । परिक्रामति राज्ञोऽन्तिकं गन्तुं पादक्षेपं करोति ।

(च) तत इति । परीवारो मन्त्रिप्रभृतिपरिजनः, विभवतः सम्पत्त्यनुसारेण अभिनेतृगणस्य यावत् सम्भवति तावत्संख्यकः परिजन इत्यर्थः ।

परीवार इति "ह्रस्वस्य दीर्घता" इति परिरिकारस्य दीर्घता ।

(छ) राजेति । अधिकारखेदं स्वकर्त्तव्यनिबन्धनं विषादम्, निरूप्य अभिनीय । सर्वो जन्तुः प्राणी, प्रार्थितम् आकाङ्क्षितम्, अधिगम्य प्राप्य, सुखी सम्पद्यते भवति ।

সূর্য্য, নিজের রথে একবারমাত্র অশ্ব বন্ধন করিয়াছেন; বায়ু দিবারাত্র প্রবাহিত হইতেছেন; অনন্তদেব সর্ব্বদাই পৃথিবীর ভার বহন করিতেছেন; আর করগ্রাহী রাজাদেরও এই ধর্ম্ম ॥৪॥

(ঙ) (এই বলিয়া পদক্ষেপ করিতে লাগিলেন।)

(চ) তদনন্তর রাজা, বিদূষক ও সম্ভবতঃ পরিজনবর্গের প্রবেশ।

(१) ततः प्रविशत्यासनस्थो राजा विदूषकश्च ।

(२) राजा । परिक्रामति । अधिकारखेदं निरूप्य । सर्वः प्रार्थितमर्थम् ।

ঔৎসুক্যমাত্রমবসাদয়তি প্রতিষ্ঠা
ক্লিশ্নাতি লব্ধপরিপালনবৃত্তিরেব ।
নাতিশ্রমাপনয়নায় যথা শ্রমায়
রাজ্যং স্বহস্তধৃতদণ্ডমিবাতপত্রম্ (১) ॥৫॥

তু কিন্তু, রাজ্ঞাং চরিতার্থতা প্রার্থিতরাজ্যলাভেন কৃতকার্য্যতা, দুঃখমেব উত্তরং চরমং ফলং যস্যা সা তাদৃশী এব । অতঃ প্রাণ্যন্তরেভ্যো নিকৃষ্টা এব রাজান ইতি ভাবঃ । তৎ সমর্থয়িতুমাহ কুত ইতি ।

"প্রাণী তু চেতনো জন্মী জন্তুজন্যুশরীরিণঃ" ইত্যমরঃ ।

ঔৎসুক্যেতি । প্রতিষ্ঠা প্রার্থিতরাজ্যলাভনিষ্পত্তিঃ, ঔৎসুক্যমাত্রং তদ্রাজ্যলিপ্সানিবন্ধনাং কেবলামুৎকণ্ঠাম্, অবসাদয়তি নিবর্ত্তয়তি । তথা চ ঈপ্সিতস্য রাজ্যাদিপ্রাপ্তিঃ তৎপ্রাপ্ত্যাশানিবন্ধনং পূর্ব্বজাতমুৎকণ্ঠামাত্রং নিবর্ত্তয়তি ; কিন্তু তস্য সুশৃঙ্খলাস্থাপনায় ব্যাপারবহুলব্যাপৃততয়া ন কাঞ্চিদপি শান্তিং জনয়তীতি মাত্রপদস্যার্থো ভাবার্থঃ সরলার্থশ্চ । তথা লব্ধস্য রাজ্যাদেঃ পরিপালনবৃত্তিরেব শাসনব্যাপার এব, ক্লিশ্নাতি রাজানং পীড়য়তি ; সর্ব্বদৈব নানাকার্য্যব্যাপৃততয়া কাদাচিৎকশান্তেরপ্যভাবাদিতি ভাবঃ । অতঃ স্বেন হস্তেন ধৃতো দণ্ডো যস্য তৎ তাদৃশম্, আতপত্রং ছত্রমিব, রাজ্যং কর্ত্তৃ, শ্রমায় যথা ভবতি, তথা অতিশ্রমাপনয়নায় শ্রমস্যাত্যন্তদূরীকরণায় ন ভবতি, যাবৎপরিমাণেন শ্রমং জনয়তি, তাবৎপরিমাণেন শ্রমং ন নাশয়তীত্যর্থঃ ।

অত্র পরার্দ্ধবাক্যার্থং প্রতি পূর্ব্বার্দ্ধবাক্যার্থদ্বয়ং হেতুরিতি বাক্যার্থহেতুকং কাব্যলিঙ্গং শ্রৌতোপমা চ, অনয়োর্মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ ।

"প্রতিষ্ঠা স্থানমাত্রকে । গৌরবে যাগনিষ্পত্তি-চতুরক্ষরপদ্যয়োঃ ।" ইতি বিশ্বঃ ।

বসন্ততিলকা বৃত্তম্ ॥৫॥

(ছ) রাজা । (নিজের কার্য্যবশতঃ বিষাদ অভিনয় করিয়া) সকল প্রাণীই প্রার্থিত বস্তু লাভ করিয়া সুখী হয় ; কিন্তু রাজাদের কৃতকার্য্যতার পরেও দুঃখ । কেন ? ।

(১) নাতঃ শ্রমাপনয়নায় ।

नेपथ्ये वैतालिकौ । जयति जयति देवः (१) । (ञ)

एकः (२) । (ट)

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् ॥६॥

(ञ) नेपथ्य इति । वैतालिकौ रात्रिशेषे बोधकरौ स्तुतिपाठकौ । "वैतालिका बोधकराः" इत्यमरः ।

(ट) एक इति । वैतालिकयोरेकतर इत्यर्थः ।

स्वसुखेति । प्रतिदिनं सर्वदैवेति तात्पर्य्यम्, त्वम्, स्वसुखे आत्मसुखानुभवे निरभिलाषो निःस्पृहः सन्, लोकहेतोः प्रजानां सुखसाधनार्थम्, खिद्यसे परिश्राम्यसि । अथवा ते तव सृष्टिर्विधातृकर्त्तृकनिर्म्माणम्, एवंविधैव केवलपरार्थपरैव, वर्त्तत इति शेषः । हि तथाहि, पादपो वृक्षः, मूर्द्ध्ना आत्मनो मस्तकेन, तीव्रं भयङ्करम्, उष्णम् आतपम्, अनुभवति स्वयं प्रत्यक्षीकरोति ; किन्तु छायया, संश्रितानाम् आत्मानमाश्रितानां जनानाम्, परितापं रविकिरणसन्तापम्, शमयति निवारयति । यथा पादपो निजमस्तकेन तीव्रमातपतापमनुभवन् छायया आश्रिततापं निवारयति ; तथा त्वमपि स्वयं खिद्यमानः सामदानादिभिः परखेदं निवारयसीति भावः ।

अत एवात्र दृष्टान्तोऽलङ्कारः । तथा "तद्गच्छ सिद्ध्यै कुरु देवकार्य्यम्" इति

---

নূতন রাজ্যলাভপ্রভৃতি, কেবল উৎকণ্ঠা নিবৃত্তি করে ; আবার লব্ধ রাজ্যের পরিপালনব্যাপারেই ক্লেশ জন্মায় । অতএব স্বহস্তধৃত ছত্রের ন্যায় রাজত্ব, যতটা শ্রম জন্মায়, ততটা পরিশ্রম নষ্ট করে না ॥৫॥

(ঞ) নেপথ্যে দুইজন স্তুতিপাঠক । মহারাজের জয় হউক মহারাজের জয় হউক ।

(১) বিজয়তাং দেবঃ । (২) প্রথমঃ ।

দ্বিতীয়ঃ। নিয়ময়সি বিমার্গপ্রস্থিতানাত্তদণ্ডঃ
প্রশময়সি বিবাদং কল্পসে রক্ষণায়।
অতনুষু বিভবেষু জ্ঞাতয়ঃ সংবিভক্তা-
স্ত্বয়ি তু পরিসমাপ্তং বন্ধুকৃত্যং জনানাম্ (১) ॥৭॥

দর্পণোদাহৃতবৎ 'মূর্দ্ধ্নি' ইত্যত্র পদাংশগতো দুঃশ্রবত্বদোষঃ; স তু 'অনুভবতি হি শাখী মস্তকেনোগ্রমুষ্ণম্' ইতি পাঠেন সমাধেয়ঃ।

মালিনী বৃত্তম্ ॥৬॥

নিয়মেতি। ত্বম্ আত্তদণ্ডো ধৃতরাজদণ্ডঃ সন্, বিমার্গপ্রস্থিতান্ বিপথগামিনো জনান্, নিয়ময়সি বিমার্গান্নিবর্ত্তয়সি; বিবাদং প্রজানাং পরস্পরবিরোধম্, প্রশময়সি সদ্বিচারেণ নিবারয়সি; তথা রক্ষণায় বিপদ্ভ্যঃ প্রজানাং পরিপালনায়, কল্পসে শক্নোষি; তথা জ্ঞাতয়ো প্রজানাং ভ্রাত্রাদিদায়াদাঃ, অতনুষু অনল্পেষু প্রচুরেষ্বিত্যর্থঃ বিভবেষু ধনেষু সংবিভক্তাঃ সম্যক্ বিভজ্য ত্বয়া বিবাদান্নিবর্ত্তিতাঃ। তুশব্দোঽবধারণে। অতএব জনানাং প্রজানাম্, বন্ধুকৃত্যং সুহৃৎকার্য্যম্, ত্বয়ি তু ত্বয্যেব, পরিসমাপ্তং নিষ্পন্নম্; সর্ব্বথৈব হিতসাধনাদিতি ভাবঃ।

অত্র নিয়ময়সীত্যাদিক্রিয়াত্রয়স্য ত্বমিত্যেককর্তৃকারকত্বাৎ দীপকমলঙ্কারঃ; চতুর্থ-চরণার্থং প্রতি পূর্ব্বচরণত্রয়গতবাক্যার্থা হেতব ইতি বাক্যার্থহেতুকং কাব্যলিঙ্গঞ্চ; অনয়োঃ পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ। তথা নিয়ময়সীত্যাদিপরস্মৈপদিক্রিয়য়া প্রক্রম্য কল্পসে ইত্যাত্মনেপদিক্রিয়াভিধানাৎ কর্তৃবাচ্যপ্রত্যয়েন প্রক্রম্য সংবিভক্তা ইতি কর্ম্মবাচ্য-প্রত্যয়াভিধানাচ্চ ভগ্নপ্রক্রমতাদোষদ্বয়ম্, 'কল্পসে রক্ষণায়' ইত্যত্র 'রক্ষসি ত্বং বিপদ্ভ্যঃ'

এক স্তুতিপাঠক। আপনি নিজের সুখে নিঃস্পৃহ হইয়া সাধারণ লোকের সুখের জন্য সর্ব্বদা পরিশ্রম করিয়া থাকেন। অথবা আপনার সৃষ্টিই এইরূপ পরের জন্য। কারণ, বৃক্ষ নিজের মস্তকে অত্যন্ত রৌদ্র ভোগ করে, অথ চ ছায়াদ্বারা আশ্রিতলোকের সন্তাপ শান্তি করে ॥৬॥

(১) জ্ঞাতয়ঃ সন্তু নাম···বন্ধুকৃত্যং প্রজানাম্।

রাজা। আকর্ণ্য সাশ্চর্য্যম্। এতেন কার্য্যানুশাসনপরিশ্রান্তাঃ পুনর্নবীকৃতাঃ স্মঃ (১)। (ঞ)

বিদূ। বিহস্য। ভো! গোবিন্দারঅত্তি ভণিদস্স বিসভস্স কিং পরিস্সমো ণস্সদি? (২)। (ট)

(ট) ভোঃ! গোবৃন্দারকেতি ভণিতস্য বৃষভস্য কিং পরিশ্রমো নশ্যতি?।

ইতি পাঠেন 'স্থিরয়সি বহুবস্তু বান্ধবান্ সংবিভজ্য' ইতি পাঠেন চ সমাধেয়ঃ। অল্পধনে নাতিদুষ্করত্বাৎ প্রায়েণৈব যাদৃশমধ্যস্থেন বিভাগসম্পাদনদর্শনাৎ তব বিভাজকস্য নাতিদক্ষত্বম্, নানাবিধবহুধনবিভাগস্য তু মহাদুষ্করত্বাত্তব বিভাজকস্য মহাদক্ষত্বমেবেতি সূচয়িতুম্ অতনুষ্বিতি বিশেষণমিতি নাপুষ্টার্থত্বদোষঃ।

মালিনী বৃত্তম্ ॥৭॥

(ঞ) রাজেতি। সাশ্চর্য্যং বিরতহৃদয়স্য সহসৈব ভদ্যমানুশ্রবাৎ সবিস্ময়ম্। এতেন বৈতালিকবাক্যেন, কার্য্যানুশাসনেন রাজকর্ম্মচারিষু কর্ত্তব্যোপদেশেন পরিশ্রান্তাঃ পরিশ্রমেণ বিরতোদ্যমা অপি বয়মিত্যর্থঃ, পুনর্নবীকৃতাঃ পুনর্নবোদ্যমীকৃতাঃ। অতএব সাধূক্তং বৈতালিকাভ্যামিতি ভাবঃ।

দ্বিতীয় স্তুতিপাঠক। আপনি রাজদণ্ড ধারণ করিয়া, বিপথগামী লোকদিগকে নিয়মিত করেন, প্রজাগণের পরস্পর বিবাদ মিটাইয়া থাকেন, জনসাধারণকে রক্ষা করেন এবং প্রচুর ধনসম্পত্তি থাকিলে তাহা জ্ঞাতিদিগকে বিভক্ত করিয়া দেন; সুতরাং লোকের বন্ধুর কার্য্য আপনাতেই নিষ্পন্ন হয় ॥৭॥

(ঞ) রাজা। (শুনিয়া আশ্চর্য্যের সহিত) কার্য্যের উপদেশ দিতে থাকায় আমি পরিশ্রান্ত হইলেও, এই উক্তিতে পুনরায় নবোদ্যমীকৃত হইলাম।

(১) রাজা। এতে ক্লান্তমনসঃ পুনর্নবীকৃতাঃ স্মঃ। পরিক্রামতি।

(২) কস্মিংশ্চিৎ পুস্তকে অয়ং পাঠো ন দৃশ্যতে।

राजा । सस्मितम् । ननु क्रियतामासनपरिग्रहः (१) । (ठ)

उभावुपविष्टौ, परिजनश्च यथास्थानं स्थितः । (ड)

नेपथ्ये वीणाशब्दः ।

विदू । कर्णं दत्त्वा । भो वअस्स ! सङ्गीदसालब्भन्तरे कण्णं देहि, तालल‌असुद्धाए वीणाए सरसंजोओ सुणीअदि । जाणे तत्थभोदी हंसवदी वण्णपरिचअं करेदि त्ति (२) । (ढ)

---

(ढ) भो वयस्य ! सङ्गीतशालाभ्यन्तरे कर्णं देहि, तालल‌यशुद्धाया वीणायाः स्वरसंयोगः श्रूयते । जाने तत्रभवती हंसवती वर्णपरिचयं करोतीति ।

---

(ट) विदू इति । विदूषकस्य स्वभावस्य कौतुककरत्वात् मन्दहास्यं कृत्वा । गवां वृन्दारकः श्रेष्ठ इति गोवृन्दारकः, इति इत्थं भणितस्य प्रशंसितस्य वृषभस्य, किं परिश्रमो नश्यति कुतोऽपि नेत्यर्थः । अतएव च वैतालिकाभ्यां प्रशंसितस्य भवतोऽपि परिश्रमो न नष्ट इत्याशयः । एतेन राज्ञो वृषभत्वसूचनात् कौतुकं सूचितम् ।

(ठ) राजेति । सस्मितम् उक्तकौतुकवाक्यश्रवणादेव समन्दहास्यम् । अनुज्ञायां ननुशब्दः । आसनपरिग्रहः आसने उपवेशनमित्यर्थः ।

(ड) उभाविति । राजविदूषकावित्यर्थः ।

(ট) বিদূষক। ( হাস্য করিয়া ) ওহে! গোশ্রেষ্ঠ বলিলে কি বৃষের পরিশ্রম নষ্ট হয় ?।

(ঠ) রাজা। ( ঈষৎ হাস্য করিয়া ) ওহে! তুমি আসন গ্রহণ কর।

(ড) ( রাজা ও বিদূষক উপবেশন করিলেন, পরিজনবর্গও যথাস্থানে বসিল। )

নেপথ্যে বীণার ধ্বনি হইতে লাগিল।

---

(१) क्वचिदेष पाठोऽपि नास्ति ।

(२) अवधानं देहि । कालविसुद्धाए गीदीए सरसंजोओ सुणीअदि । जाणामि ।

রাজা। তূষ্ণীম্ভব, যাবদাকর্ণয়ামি। (ণ)

কঞ্চুকী। বিলোক্য। অন্যাসক্তো দেবঃ, তদবসরং প্রতিপালয়ামি। ইত্যেকান্তে স্থিতঃ (১)। (ত)

নেপথ্যে গীয়তে (২)। *

অহিণব-মহু-লোহ-ভাবিদো
তহ পরিচুম্বিঅ চূঅমঞ্জরিং।

---

(ঢ) বিদূ ইতি। দেহি নিয়োজয়। তালঃ কালক্রিয়ামানম্, লয়ঃ গানবাদ্যয়োঃ সাম্যং তাভ্যাং শুদ্ধায়া নির্দোষায়াঃ, স্বরসংযোগঃ স্বরসম্বন্ধঃ। জানে মন্যে, তত্রভবতী রাজরমণীত্বাৎ মাননীয়া, হংসবতী নাম কাচিৎ রাজ্ঞী, বর্ণপরিচয়ং গীতাক্ষরাভ্যাসং 'স-ঋ গ ম'-শিক্ষামিত্যর্থঃ।

(ণ) রাজেতি। তূষ্ণীম্ভব নীরবো ভব, যাবৎ কালং ব্যাপ্য। অন্যথা তবালাপস্বরেণ গীতস্বরতিরোধানাদাকর্ণয়িতুং ন শক্নোমীতি ভাবঃ।

(ত) কঞ্চুকীতি। বিলোক্য—রাজানং গানে দত্তাবধানমবগম্য। অন্যস্মিন্ বিষয়ে আসক্তো দত্তাবধানঃ। তস্মাৎ। প্রতিপালয়ামি প্রতীক্ষে। একান্তে একস্মিন্ পার্শ্বে।

* নেপথ্য ইতি। গীয়তে হংসবত্যেতি বোধ্যম্।

অহিণবেতি। হে মধুকর! ভ্রমর! অভিনব মধুগন্ধমধুরসুরতসুখকর! দুষ্মন্ত!

(ঢ) বিদূষক। (কাণ দিয়া) বয়স্য! সঙ্গীতশালার ভিতরে কাণ দাও; তাল-লয়শুদ্ধ বীণার স্বর শুনা যাইতেছে, সুতরাং বোধ হয় মাননীয়া হংসবতী 'স-ঋ-গ-ম' সাধিতেছেন।

(ণ) রাজা। চুপ কর, যাবৎ শুনি।

(ত) কঞ্চুকী। (দেখিয়া) রাজা অন্য বিষয়ে আসক্ত রহিয়াছেন, অতএব অবসর প্রতীক্ষা করি। (এই বলিয়া একপ্রান্তে রহিলেন।)

* নেপথ্যে গান করিতে লাগিল।

---

(১) ক্বচিদয়ং পাঠো নাস্তি। (২) আকাশে গীয়তে।

कमलवसदिमेत्तणिव्वुदो
महुअर ! विम्हरिदोसि णं कहं (१) ॥८॥

अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो मधुकर ! विस्मृतोऽसि एनां कथम् ॥८॥

अभिनवस्य नूतनोत्पन्नस्य, अतएवात्यन्तसुस्वादस्येति भावः, मधुनो रसस्य लोभेन भावितो वासितः समन्वित इति यावत्, अन्यत्र अभिनवस्य रमणीजनस्य मधुनो मधुवत्परममनोहर-सुरतसुखस्य लोभेन भावितो वासितः समन्वितः सन्, तथा तेन प्रकारेण अत्यन्तरूपेणेत्यर्थः चूतमञ्जरीम् आम्रवल्लरीम्, परिचुम्ब्य मधुपानाय मुखसंयोगपात्रीकृत्य, अन्यत्र चूत-मञ्जरीवत् परमलोभनीयां तरुणीम्, परिचुम्ब्य गाढालिङ्गनादिभोगविषयीकृत्य, अधुना कमले पद्मे वसतिमात्रेण केवलावस्थानेन परिणतप्रायतया तादृशमध्वभावात् न तु मधुपानेनापीति मात्रपदस्यार्थः, निर्वृतः सुस्थः सन्, अन्यत्र कमले कमलवत् सुदृश्यमात्रे प्रौढप्रायत्वात् सुरसहीने अन्यराज्ञीजने वसतिमात्रेण केवलावस्थानेन न तु तादृशामोद-करणेनेत्यर्थः, निर्वृतः अगत्या सुस्थः सन्, एनां चूतमञ्जरीम्, अन्यत्र परिचुम्बितपूर्वां हंसवतीं शकुन्तलाञ्च, कथं विस्मृतोऽसि, सुखकरवस्तुनः सर्वदैव स्मरणौचित्यात् इदं तव विस्मरणं महदेवानुचितमिति भावः ।

अत्रार्थद्वयस्य प्राकरणिकत्वाभावान्न श्लेषः, अपि तु शब्दशक्तिमूलो वस्तुध्वनिः, तथा प्रच्छेदकाख्यं लास्याङ्गमिदम् । यथा दर्पणे—

"अन्यासक्तं पतिं मत्वा प्रेमविच्छेदमन्युना ।
वीणापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः ॥"

तथा राज्ञः सहसैव हंसवतीरूपार्थसम्पत्तिः, तेन च सभ्यानामपि तथैवार्थसम्पत्तिः ; परञ्च शकुन्तलाप्रत्यये पूर्वापेक्षया उपचारातिशयेन तद्रूपार्थसम्पत्तेर्गुणवत्त्वादिदं दर्पणोक्तं प्रथमं पताकास्थानम् । यथा तत्रैव—

"सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥"

(१) अहिणवमहुलोलुवो तुमं ।

রাজা। অহো! রাগপরিবাহিণী গীতিঃ।' (থ)

বিদূ। ভো বঅস্স! কিং দাব সে গীদিআএ অবি গহীদো ভবদা অক্খরত্থো (১)। (দ)

রাজা। সস্মিতম্। সকৃত্কৃতপ্রণয়োঽয়ং জন ইত্যক্ষরার্থঃ। তদহং দেবীং হংসবতীমন্তরেণ উপালম্ভনমাগতোঽস্মি। সখে!

(দ) ভো বয়স্য! কিং তাবদস্যা গীতিকায়া অপি গৃহীতো ভবতা অক্ষরার্থঃ।

"ভাবিতং বাসিতে প্রাপ্তে" ইতি মেদিনী।

বিস্মৃত ইত্যাদিকর্ম্মণি কর্ত্তরি ক্তঃ।

অপরবক্ত্রং নাম বৃত্তম্—"অযুজি ননরলা গুরুঃ সমে তদপরবক্ত্রমিদং নজৌ জরৌ" ইতি লক্ষণাৎ ॥৮॥

(থ) রাজেতি। অহো আশ্চর্য্যং। রাগমনুরাগং পরিবহতি প্রবাহবদবিচ্ছিন্নভাবেন স্রবতীতি রাগপরিবাহিণী, গীতির্গানম্, ইদং গানং প্রবাহভাবেনানুরাগং ব্যনক্তীত্যর্থঃ।

(দ) বিদূ ইতি। গীতিকায়া গানস্য। অক্ষরার্থঃ অক্ষরপ্রতিপাদ্যো ব্যঙ্গ্যার্থঃ, অপি গৃহীতঃ কিমবগতঃ। অক্ষরং বর্ণঃ।

হে ভ্রমর! তুমি নূতন মধুর লোভে আকৃষ্ট হইয়া, সেইভাবে আম্রমঞ্জরীকে চুম্বন করিয়া, এখন কেবল পদ্মে বাস করায় সন্তুষ্ট হইয়া, সে আম্রমঞ্জরীকে বিস্মৃত হইলে কেন।৮॥

(থ) রাজা। কি আশ্চর্য্য! গানটী যে একেবারে অনুরাগের প্রবাহ চালাইয়া দিল।

(দ) বিদূষক। বয়স্য! তুমি এই গীতের অর্থ বুঝিতে পারিয়াছ ত?।

(১) বিদূষকঃ। কিং দাব গীদীএ অবগদো অক্খরত্থো।

माधव्य ! मद्वचनादुच्यतां देवी हंसवती, सम्यगुपालब्धो-ऽस्मीति (१)। (ध)

विदू। जं भवं आणवेदि। उत्थाय। भो वअस्स ! गहीदो तुए परकीएहिं हत्थेहिं सिहण्डए अच्छभल्लो, ता वीदराअस्स असरणस्स णत्थि मे मोक्खो (२)। (न)

(न) भो वयस्य ! गृहीतस्त्वया परकीयाभ्यां हस्ताभ्यां शिखण्डके अच्छभल्लः। तद्वीतरागस्य अशरणस्य नास्ति मे मोक्षः।

(ध) राजेति। अल्पमतेर्विदूषकस्यापि अवगतौ आत्मनोऽवगतेः सर्वथा सिद्धत्वेऽपि पुनः प्रश्नकरणात् कौतुकेन स्मितमिति बोध्यम्। सकृदेकवारं कृतः प्रणयी यस्मिन् स तादृशः, अयं हंसवतीरूपो जनः, इति इत्थम् अक्षरार्थः अक्षरप्रतिपाद्यो व्यङ्ग्यार्थः। इदन्तु विदूषकप्रश्नस्योत्तरम्। अन्तरेण विना परित्यज्य स्थित इत्यर्थः, उपालम्भनम् उक्तरूपं तिरस्कारम्, आगतः प्राप्तः। उपालब्धस्तिरस्कृतः। एतेनात्मनो दक्षिण-नायकत्वं सूचितम्। यथा दर्पणे—

"एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः।"

(न) विदू इति। परकीयाभ्याम् अन्यजनसम्बन्धिभ्याम्, हस्ताभ्यां कराभ्याम्,

(ধ) রাজা। ( ঈষৎ হাস্যের সহিত ) এই ব্যক্তির সহিত একবার-মাত্র প্রণয় করা হইয়াছিল, ইহাই এই গানের অর্থ। অতএব আমি রাণী হংসবতীকে ছাড়িয়া এই তিরস্কার প্রাপ্ত হইলাম। বয়স্য ! মাধব্য ! আমার বাক্যানুসারে রাণী হংসবতীকে বল—ঠিক্ তিরস্কৃত হইয়াছি।

---

(१) राजा। स्मितं कृत्वा। जनः। तदस्या देवीं वसुमतीमन्तरेण मद्दुपा-लम्भनं गतोऽस्मि। सखे ! माधव्य ! उच्यतां हंसपदिका निपुणमुपालब्धोऽस्मीति।

(२) वअस्स ! गहीदस्स तए सिहण्डए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो।

राजा। सखे! गच्छ, नागरिकवृत्त्या सान्त्वयैनाम् (१)। (प)

विदू। का गई। इति निष्क्रान्तः। (फ)

(फ) का गतिः।

---

शिखण्डके शिखायाम्, अच्छभल्लो भाल्लूकः, गृहीतो धृतः। तथा च शिखायां भाल्लूकग्रहणे तदीयनखानां मुक्तत्वादतिशयेनैव ग्रहीतुर्देहविदारणसम्भावनेति बोध्यम्। इत्थञ्च यथा परद्वारा शिखायां भाल्लूकधारणे तस्य परस्यैव महाविपत्सम्भावना, स्वयन्तु निर्विपदेव तिष्ठति, तथा मद्द्वारा हंसवतीसान्त्वने ममैव महाविपत्सम्भावना, भवांस्तु निर्विपदेव स्थास्यतीति भावः। अतएवात्र असम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारः। वीतरागस्य ईदृशकार्य्यप्रवृत्त्या परित्यक्तजीवनानुरागस्य, अशरणस्य रक्षकहीनस्य मे मम, मोक्षः हंसवतीसकाशादव्याहतिर्नास्ति, अच्छभल्लवत् हंसवती व्यवहारेणैव मे अवसान-सम्भावनेति भावः।

(प) राजेति। नागरिकस्य नगरवासिनो जनस्य वृत्त्या व्यवहारेण चातुर्य्येणेत्यर्थः। नगरवासिनो हि स्वभावत एव चतुरा भवन्ति। एनां हंसवतीम्, सान्त्वय प्रसादय।

(फ) विदू इति। का गतिः अगतौ क उपायः। तेनावश्यमेव गन्तव्यमिति भावः। अत्रेदमालोचनीयम्—विदूषकमपसारयता कविना परस्तात् शकुन्तलाप्रत्याख्यानमुपपादितम्। अन्यथा तत्र सन्निहितो विदूषकः पूर्वजल्पनया सम्भाव्यमानं शकुन्तला-परिणयमवश्यमेव स्मारयेत् तथा च सति तत् प्रत्याख्यानं न स्यादिति।

---

(ন) বিদূষক। তুমি যাহা আদেশ কর। (উঠিয়া) বয়স্য! তুমি পরের হাত দিয়া ভালূকের মাথা ধরিলে। তা জীবনের আশাশূন্য এবং রক্ষকহীন আমার অব্যাহতি নাই।

(প) রাজা। সখে! যাও, চাতুর্য্যবৃত্তিদ্বারা ইহাকে শান্ত কর।

(ফ) বিদূষক। উপায় কি। (এই বলিয়া চলিয়া গেল।)

---

(१) राजा। गच्छ संज्ञापयैनाम्।

राजा । (स्वगतम्) किन्नु खलु गीतमेवंविधमाकर्ण्य इष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि । अथवा—(१) (ब)

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्य्युत्सुको भवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि (२) ॥८॥

(ब) राजेति । इष्टजनस्य प्रियजनस्य विरहात् ऋतेऽपि विनापि, बलवदत्यन्तम् । इष्टजनस्य विरहं विनापि आत्मनो बलवदुत्कण्ठां समर्थयितुमाह अथवेति ।

रम्याणीति । सुखितोऽपि प्रियजनसंयोगेन सञ्जातसुखोऽपि, जन्तुः प्राणी, रम्याणि सुन्दराणि वस्तूनि वीक्ष्य, मधुरान् सुश्रव्यान् शब्दांश्च निशम्य श्रुत्वा, यत् पर्य्युत्सुक इष्टजनविरहाभावेऽपि उत्कण्ठितो भवति, तत् नूनं निश्चितमेव, चेतसा मनसा, अबोधपूर्वम् अननुभवपूर्वकम् । यथा कथञ्चिदनुभूतस्यैव पदार्थस्य तदननुभवकाले चित्ते उपस्थितिर्हि स्मरणम् ; तदनुभवपूर्वकत्वञ्चात्र नास्ति जन्मान्तरगतत्वादिति भावः । भावस्थिराणि स्वभावत एवाक्षयाणि, जननान्तरसौहृदानि पूर्वजन्मगतप्रणयान्, स्मरति स्वभावादेवानुध्यायति स जन्तुरित्यन्वयः । अतएव इयं गायिका या काचिद्भवतु, मा भवतु चेष्टजनविरहः ; तथापि एतद्गायिकया सह जन्मान्तरे मम किञ्चित् सौहार्द्दमासीत्, तद्वशादेवेयमुत्कण्ठा जातेत्याशयः ।

अतएवात्र अप्रस्तुतात् जन्तुसामान्यात् प्रस्तुतस्य आत्मरूपस्य जन्तुविशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, बोधरूपकारणाभावेऽपि स्मरणरूपकार्य्योत्पत्तेर्विभावना च अनयोरङ्गाङ्गिभावेन सङ्करः । तथा रम्याणीति नपुंसकलिङ्गेन प्रक्रम्य मधुरानिति पुंलिङ्गप्रयोगात् भग्नप्रक्रमतादोषः, स च 'रम्यान् समीक्ष्य' इति पाठेन समाधेयः ।

(ব) রাজা। (স্বগত) ইষ্টজনের বিচ্ছেদ না থাকিলেও, এইরূপ গান শুনিয়া আমি, অত্যন্ত উৎকণ্ঠিত হইলাম কেন ?। অথবা—

(१) राजा । आत्मगतं गीतमाकर्ण्य । (२) पर्य्युत्सुकीभवति ।

ইত্যস্মৃতিনিমিত্তমুন্মনস্কত্বং রূপয়তি (১)। (ভ)

কঞ্চুকী। উপসৃত্য। জয়তি জয়তি দেবঃ। এতে খলু হিমগিরেরুপত্যকারণ্যবাসিনঃ কণ্বসন্দেশমাদায় সস্ত্রীকাস্তপস্বিনঃ সম্প্রাপ্তাঃ। শ্রুত্বা দেবঃ প্রমাণম্ (২)। (ম)

"ভাবঃ সত্তাস্বভাবাভিপ্রায়চেষ্টাত্মজন্মসু" ইত্যমরঃ।

সুখমস্য সঞ্জাতমিতি সুখিতঃ তারকাদিত্বাদিতচ্ প্রত্যয়ঃ।

বসন্ততিলকা বৃত্তম্ ॥৯॥

(ভ) ইতীতি। উন্মনস্কত্বমুৎকণ্ঠাম্, রূপয়তি অভিনয়তি।

(ম) কঞ্চুকীতি। উপত্যকায়ামাসন্নভূমৌ যদরণ্যং তত্র বসন্তীতি তে। কণ্বস্য মহর্ষেঃ সন্দেশং বাচিকম্। সম্প্রাপ্তা উপস্থিতাঃ। দেবো রাজা ভবান্, প্রমাণং কর্ত্তব্যনিশ্চেতা যৎ কর্ত্তব্যং মন্যতে তৎ কর্ত্তুমর্হতীত্যর্থঃ।

"উপত্যকাদ্রেরাসন্না" ইতি "প্রমাণং হেতুমর্য্যাদাশাস্ত্রেয়ত্তাপ্রমাতৃষু" ইতি চামরঃ।

সুখী প্রাণীও, রম্য বস্তু দেখিয়া এবং মধুর শব্দ শুনিয়া যে উৎকণ্ঠিত হয়, সে নিশ্চয়ই, স্বভাবতই স্থায়ী জন্মান্তরের সৌহার্দ্দকে অননুভবপূর্ব্বক মনে মনে স্মরণ করে ॥৯॥

(ভ) (এই বলিয়া, অস্মরণনিবন্ধন উন্মনস্কতা অভিনয় করিতে লাগিলেন।)

(ম) কঞ্চুকী। (নিকটে যাইয়া) মহারাজের জয় হউক, মহারাজের জয় হউক। হিমালয়ের নিকটস্থ-বনবাসী, স্ত্রীলোকের সহিত এই মুনিগণ, মহর্ষি কণ্বের কোন সংবাদ লইয়া, উপস্থিত হইয়াছেন। শুনিয়া, মহারাজের যাহা বিবেচনা হয়, তাহা করুন।

(১) পর্য্যাকুলস্তিষ্ঠতি।

(২) উপগম্য। জয়তু দেবঃ। হিমবতো গিরেঃ···কাশ্যপসন্দেশমাদায়।

राजा। (सविस्मयम्।) किं कण्वसन्देशहारिणः सस्त्रीकास्तपस्विनः ? (१)। (य)

कञ्चुकी। अथकिम्। (र)

राजा। तेन हि विज्ञाप्यतां मद्वचनादुपाध्यायः सोमरातः, अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमप्येतांस्तपस्विदर्शनोचितप्रदेशे प्रतिपालयामि (२)। (ल)

(य) राजेति। विस्मयेन सस्त्रीका इति श्रवणादाश्चर्य्येण सहेति सविस्मयम्। कण्वसन्देशहारिणः महर्षेः कण्वस्य संवादवाहिनः।

(र) कञ्चुकीति। अथकिमित्येकमेव स्वीकारार्थमव्ययम्। तथा च हारावली—

"अङ्गीकारेऽपि चाथकिम्।"

(ल) राजेति। उपाध्याय आत्मनोऽध्यापकः, सोमाय एनं रायात् देयादिति सोमरातः तदाख्यः पुरोहितः। एक एव जनः अध्यापकः पुरोहितश्चासीदिति बोध्यम्। सोमरात इति सोमोपपदे राधातोः "तिक्कृतौ संज्ञायामाशिषि" इति क्तप्रत्ययः। आश्रमवासिनस्तपस्विनः, श्रौतेन वेदोक्तेन, विधिना विधानेन, सत्कृत्य सम्मान्य। एतान् तपस्विनः। प्रतिपालयामि प्रतीक्षे।

"विधिर्विधाने दैवे च" इत्यमरः।

(य) রাজা। ( বিস্ময়ের সহিত ) কি কণ্বের বার্ত্তাবাহী স্ত্রীলোকের সহিত তপস্বীরা!।

(র) কঞ্চুকী। হাঁ।

(ল) রাজা। তাহা হইলে আমার বাক্যানুসারে অধ্যাপক সোমরাতকে জানান, বেদবিধানে এই তপোবনবাসীদিগকে সম্মানিত

(१) राजा। सादरम्। किं काश्यपसन्देशहारिणः ?।

(२) अर्हतीति। अहमपि अत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि।

কঞ্চুকী। যথাজ্ঞাপয়তি দেবঃ। ইতি নিষ্ক্রান্তঃ।

রাজা। উত্থায়। বেত্রবতি! অগ্নিশরণমার্গমাদেশয়। (ব)

প্রতীহারী। ইদো ইদো এদু দেবো। পরিক্রম্য। এসো অহিণব-সম্মজ্জণরমণীঅো সণ্ণিহিদহোমধেণু অগ্গিসরণালিন্দো; তা আরোহদু দেবো (১)। (শ)

(শ) ইত ইত এতু দেবঃ। এষঃ অভিনবসম্মার্জনরমণীয়ঃ সন্নিহিতহোমধেনুঃ অগ্নিশরণালিন্দঃ; তদারোহতু দেবঃ।

---

(ব) রাজেতি। বেত্রং যষ্টিরূপমস্যা অস্তীতি বেত্রবতী প্রতীহারী, তস্যাঃ সম্বোধনম্। অগ্নের্হোমীয়বহ্নেঃ শরণং গৃহং হোমগৃহমিত্যর্থঃ তস্য মার্গং পন্থানম্, আদেশয় প্রদর্শয়। এতেন রাজ্ঞ ইয়ন্তি গৃহাণ্যাসন্, যেন সর্বেষাং প্রবেশপথমপি রাজা ন স্মর্তুমশক্নোদিতি সূচিতম্।

"শরণং গৃহরক্ষিত্রোঃ" ইত্যমরঃ।

(শ) প্রতীতি। ইত ইতঃ অনেনানেন পথা। পরিক্রম্য হোমগৃহে গমনায় পাদক্ষেপং কৃত্বা। অভিনবেন সদ্যঃকৃতেন সম্মার্জনেন পরিষ্কারেণ রমণীয়ঃ, সন্নিহিতা সংস্থাপিতা হোমধেনুর্হোমীয়ঘৃতসম্পাদিকা ধেনুর্যত্র সঃ, অগ্নিশরণালিন্দঃ হোমগৃহস্য বহির্দ্বারপ্রকোষ্ঠম্।

"প্রঘাণপ্রঘণালিন্দা বহির্দ্বারপ্রকোষ্ঠকে" ইত্যমরঃ।

---

করিয়া তিনি নিজেই প্রবেশ করান। আমিও, তপস্বীদিগের সঙ্গে সাক্ষাৎ করিবার উপযুক্ত স্থানে যাইয়া, ইঁহাদের প্রতীক্ষা করি।

কঞ্চুকী। মহারাজ যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেলেন।)

(ব) রাজা। (উঠিয়া) বেত্রবতি! হোমগৃহের পথ দেখাও।

(শ) প্রতীহারী। মহারাজ এই এই পথে আসুন। (পাদক্ষেপ

---

(১) ইদো ইদো দেবো। ইতঃ পরং বহুদূরং পুনঃ সম্মজ্জণঅঅেিথী।

राजा । (आरुह्य परिजनांसावलम्बी तिष्ठन् ।) वेत्रवति ! किमुद्दिश्य तत्रभवता कण्वेन मत्सकाशमृषयः प्रेषिताः ? (१) । (ख)

किं तावद्व्रतिनामुपोढ़तपसां विघ्नैस्तपो दूषितं ?
धर्म्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ? ।
आहोस्वित् प्रसवो ममापरिचितैर्विष्टम्भितो वीरुधा-
मित्यारूढ़बहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥१०॥

(ख) राजेति । परिजनस्य कस्यचित् परिचारकस्य अंसावलम्बी स्कन्धे स्थापितहस्तः । ऋषीणामुपस्थितिसमये उपवेशनमशक्तम्, अथ च आरोहणपरिश्रान्तो राजा निरवलम्बनो दीर्घकालं दण्डायमानीभवितुं नार्हतीति परिजनांसावलम्बनम् ।

किमिति । विघ्नैरन्तरायभूतै राक्षसादिभिः, उपोढं गृहीतं तपो वैधकर्म्मभूतं कर्म्म यैस्तेषाम्, व्रतिनां चातुर्म्मास्यादिनियमवतां तापसानाम्, तत् तपः, किं तावत् दूषितं किं व्याहतम् । तत्प्रतीकारप्रार्थनया किमागता इति भावः । उत अथवा केनचित्, जनेन धर्म्मारण्यचरेषु तपोवनविहारिषु, प्राणिषु हरिणादिजन्तुषु किम् असच्चेष्टितम्, इत्यादिना अत्याचारः कृतः । तन्निवारणार्थं किमागता इत्याशयः आहोस्वित् अथवा, ममापरिचितैरप्राप्तमत्परिचयैर्जनैः, वीरुधां लतानाम्, प्रसवः फलम्, विष्टम्भितः पुष्पनाशादिना उत्पत्तौ प्रतिबद्धः किम् । तत्प्रतिकारार्थमुपस्थिताः किमित्यभिप्रायः । इति अनेन प्रकारेण, आरूढा उपस्थिता बहवः प्रतर्का वितर्का यस्मिन् तत् तादृशम्,

---

করিয়া ) এই হোমগৃহের বহির্দ্বারপ্রকোষ্ঠ, সদ্য প্রক্ষালন করায় এই স্থান মনোহর হইয়াছে এবং ইহার নিকটে হোমধেনু রহিয়াছে । অতএব মহারাজ আরোহণ করুন ।

(খ) রাজা । ( আরোহণ করিয়া, কোন পরিজনের স্কন্ধধারণ-পূর্ব্বক অবস্থান করতঃ ) বেত্রবতি ! পূজনীয় মহর্ষি কণ্ব, কি মনে করিয়া আমার নিকট তপস্বীদিগকে পাঠাইলেন ।

---

(१) भगवता काश्यपेन प्रेषिताः स्युः ।

प्रती। देवस्स भुअदण्डणिव्वुदे अस्समपदे कुदो एवं; किन्तु सुचरिताहिणन्दिणो इसीओ देवं सभाजइदुं आअदे त्ति तक्केमि (१)। (स)

(स) देवस्य भुजदण्डनिर्वृते आश्रमपदे कुत एवम्; किन्तु सुचरिताभिनन्दिन ऋषयः देवं सभाजयितुमागता इति तर्कयामि।

---

मे मम मनः, अपरिच्छेदेन एकतरनिश्चयाभावेन आकुलं तन्निश्चयार्थं विह्वलं जातमिति शेषः।

अत्र अपरिच्छेदाकुलत्वं प्रति आरूढबहुप्रतर्कपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः।

"तपसी वैधर्मे शस्त्रकल्पम्" इति प्रायश्चित्ततत्त्वे स्मार्त्तः। "प्राप्य्युत्पादे फले पुष्पे प्रसवो गर्भमोचने" इति "लता प्रतानिनी वीरुत्" इति चामरः। "विष्टम्भः प्रतिबन्धे स्यात् प्रबन्धे चामरस्य च" इति मेदिनी।

शार्दूलविक्रीडितं वृत्तम् ॥१०॥

(च) प्रतीति। भुजदण्डेन निर्वृते सुस्थीकृते, आश्रमपदे तपोवने, एवं भवद्वितर्कितरूपमसदाचरणम्, कुतो भवितुमर्हति कुतोऽपि नेत्यर्थः। सुचरितेन देवस्यैव सद्व्यवहारेण अभिनन्दन्ति सन्तुष्यन्ति ये ते। देवं राजानं भवन्तम्, सभाजयितुं प्रीणयितुम्।

---

তপঃপ্রবৃত্ত ব্রতীদিগের তপস্যা, বিঘ্নে দূষিত হইয়াছে কি? অথবা তপোবনচারী প্রাণিগণের প্রতি কেহ অন্যায় আচরণ করিয়াছে? কিংবা যাহারা আমার পরিচয় পায় নাই, এইরূপ কোন লোকেরা তপোবনের লতার ফল নষ্ট করিয়াছে, আমার মনে এইরূপ বহুতর তর্ক উপস্থিত হইতেছে, কিন্তু নির্ণয় করিতে না পারায় আমার মন আকুল হইয়াছে ॥১০॥

---

(१) प्रतीहारी। सुचरिताभिनन्दिनो ऋषयः।

ততঃ প্রবিশতো গৌতমীসহিতৌ শকুন্তলামাদায় কণ্বশিষ্যৌ পুরতশ্চৈষাং পুরোহিত-কঞ্চুকিনৌ (১)। (ছ)

কঞ্চুকী। ইত ইতো ভবন্তঃ। (জ)

শার্ঙ্গরবঃ। সখে! শারদ্বত!

মহাভাগঃ কামং নরপতিরভিন্নস্থিতিরসৌ
ন কশ্চিদ্বর্ণানামপথমপকৃষ্টোঽপি ভজতে।
তথাপীদং শশ্বৎপরিচিতবিবিক্তেন মনসা
জনাকীর্ণং মন্যে হুতবহপরীতং গৃহমিব (২) ॥১১॥

---

(ছ) তত ইতি। পুরতঃ অগ্রতঃ স্ত্রীপুংসয়োঃ পুংসঃ প্রাধান্যবিবক্ষয়া এষামিত্যস্য পুংস্ত্বম্।

(জ) কঞ্চুকীতি। ইত ইতঃ অনেনানেন পথা, ভবন্ত আগচ্ছন্তু ইতি শেষঃ। অত্রাপি উক্তরীত্যা ভবন্ত ইত্যস্য পুংস্ত্বম্।

মহাভাগ ইতি। অসৌ মহান্ ভাগো ভাগ্যং যস্য স মহাভাগঃ, অতএব নরপতিঃ রাজা দুষ্মন্তঃ, কামং যথেষ্টমেব, ন ভিন্না ন লঙ্ঘিতা স্থিতির্লোকমর্য্যাদা যেন স

---

(স) প্রতীহারী। মহারাজের বাহুবলে সুস্থীকৃত তপোবনে এরূপ হইবে কি করিয়া; তবে আমি মনে করি মহারাজের সদ্ব্যবহারে আনন্দিত হইয়া মুনিগণ মহারাজের সংবর্দ্ধনা করিবার জন্য আসিয়াছেন।

(হ) (তদনন্তর শকুন্তলাকে লইয়া, গৌতমীর সঙ্গে কণ্বশিষ্যদ্বয়ের এবং ইঁহাদের অগ্রে অগ্রে পুরোহিত ও কঞ্চুকীর প্রবেশ।)

(ক্ষ) কঞ্চুকী। আপনারা এই এই পথে আসুন।

শার্ঙ্গরব। সখে! শারদ্বত!

---

(১) ততঃ প্রবিশন্তি গৌতমীসহিতাঃ শকুন্তলাং পুরস্কৃত্য মুনয়ঃ পুরতশ্চৈষাং কঞ্চুকী পুরোহিতশ্চ। (২) অভিন্নস্থিতিরসৌ।

शारद्वतः। शार्ङ्गरव! स्थाने खलु पुरप्रवेशात्तवेदृशः संवेगः। अहन्तु (१) (क)

तादृशः। अतएवास्मादृशाकं नास्ति भयमिति भावः। तथा वर्णानां ब्राह्मणादीनां मध्ये, कश्चिदपकृष्टोऽपि उत्कृष्टे का कथा, जात्या कर्म्मणा वा निकृष्टोऽपि जनः, अपथम् असन्मार्गं मर्य्यादालङ्घनादिकम्, न भजते राजभयान्नाश्रयति। तेन प्रजाभ्यः कर्म्मचारिभ्यो वापि नास्ति भयमित्याशयः। तथापि राजप्रजयोरीदृक् साधुत्वे सत्यपि, शश्वत् सर्वदा, परिचितमभ्यस्तं विविक्तं विजनस्थानं तदवस्थानं येन तादृशेन मनसा, इदं जनाकीर्णं लोकपूर्णम्, गृहं राजभवनम्, हुतवहेन अग्निना परीतं व्याप्तमिव, मन्ये सम्भावयामि। इदन्त्वमङ्गलसूचकमित्यभिप्रायः।

अत्र हेतुं विनापि राजगृहस्य हुतवहपरीतत्वप्रकारकमननरूपकार्य्योत्पत्तेः किं विभावना, उत प्रथमार्द्धप्रतिपादिते राजप्रजयोः साधुत्वरूपे कारणे सत्यपि आस्वासरूपतत्-कार्य्यानुत्पत्तेर्विशेषोक्तिरित्युभयोः सन्देहसङ्करः, अपकृष्टोऽपीत्यत्र अर्थापत्तिः, हुतवह-परीतमिवेति वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा च इत्येतेषां गुणप्रधानभावेनावस्थिति-भावात् समुदायेऽपि पुनः सङ्करः। इदं राजगृहं हुतवहपरीतं गृहमिव इति व्याख्याने तु श्रौतोपमेति बोध्यम्। परिचितविविक्तेन मनसेति उत्प्रेक्षाया निमित्तमिति नापुष्टार्थत्वदोषः।

"भाग्या रूपार्द्धके भागैकदेशयोः" इति हेमचन्द्रः। "संस्था तु मर्य्यादा धारणा स्थितिः" इत्यमरः।

शिखरिणी वृत्तम् ॥११॥

---

মহাভাগ্যবান্ এই রাজা, ইচ্ছানুসারে কাহারও মর্য্যাদা নষ্ট করেন না এবং ইঁহার কর্ম্মচারী বা প্রজা চারি বর্ণের মধ্যে কোন নিকৃষ্ট লোকও অসৎপথ আশ্রয় করে না; তথাপি আমি, চিরকাল নির্জ্জন স্থানে থাকা অভ্যস্ত বলিয়া মনে মনে, এই রাজবাড়ীটাকে যেন জনাকীর্ণ এবং অগ্নিবেষ্টিত বলিয়া ধারণা করিতেছি ॥১১॥

---

(१) शारद्वतः। जाने भवान् पुरप्रवेशादित्थम्भूतः संवृत्तः।

**अभ्यक्तमिव स्नातः, शुचिरशुचिमिव, प्रबुद्ध इव सुप्तम् ।**
**बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ॥१२॥**

(क) शारदेति । संवेग उद्वेगः, स्थाने खलु युक्त एव, ममाप्युद्वेगाविर्भावात् "प्रायेण समानाः सहचरा भवन्ति" इति न्यायादिति भावः । अहमित्यस्य श्लोकस्थस्नात इत्यादिभिः प्रथमान्तैः पदैः सहान्वयः ।

"युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः ।

अभ्यक्तमिति । स्नातः कृतस्नानः अहम्, इह राजधान्याम्, सुखसङ्गिनं स्नानादेव प्राप्तशुद्धिसुखं जनम्, अभ्यक्तं तैलाक्तदेहमिव अवैमि अवगच्छामि ; यात्रादिप्रथमावस्थायां तैलाक्तदेहदर्शनममङ्गलसूचकमिति कवेरभिप्रायः । शुचिः हरिस्मरणादिना पवित्रः अहम्, इह सुखसङ्गिनं हरिस्मरणादिनैव पवित्रताशालिनं जनम्, अशुचिमिव अवैमि, चाण्डालाद्यशुचिजनो हि अन्याय्यकार्य्यस्य प्रतिवादं कर्त्तुं नार्हतीति कवेराशयः । प्रबुद्धो जागरितः अहम्, इह सुखसङ्गिनं जागरितत्वेनानुभूयमानसुखम्, जनम्, सुप्तं निद्रितमिव अवैमि ; सुप्तो हि जनो न्याय्यान्याय्यं विवेक्तुं न शक्नोतीति कवेर्भावः । तथा स्वैरा स्वच्छन्दा स्वेच्छाप्रवृत्ता गतिर्यस्य स तादृशोऽहम्, इह सुखसङ्गिनं मुक्तभावेनावस्थानात् सुखासक्तमपि जनम्, बद्धमिव कुत्रचित् संयतमिव, अवैमि ; गत्वा हस्तादिभिरपि दुष्कार्य्यस्य बाधाप्रदानस्याकरिष्यमाणत्वादिति कवेराशयः । एतेन श्लोकद्वयेन वक्ष्यमाणशकुन्तलावाक्येन च कविना दुष्मन्तेन करिष्यमाणं शकुन्तला-प्रत्याख्यानरूपममङ्गलं स्वनाटकपाठकवृन्देषु सूचितम् । तत्र चासौ अभ्यक्तादिवत् सम्भाव्यमाना राजधानीस्था जना एव सूचकाः । अहमित्यस्य विशेषणतया स्नात इत्यादिपदोपादानन्तु अभ्यक्तादिजनैः सह वक्तुः सम्पूर्णवैपरीत्यसूचनार्थम् । तेन च व्याख्यान्तराणि चिन्तनीयानि, अस्य दुर्निमित्तसूचनप्रकरणत्वात् "दुर्निमित्तमभिनीय" इत्यनुपदमेव स्पष्टं तदभिधानात् तत्तद्व्याख्यान्तरेषु तु तत्सूचनासम्भवादिति सुधीभिर्विवेचनीयम् ।

---

(क) শারদ্বত। শার্ঙ্গরব ! রাজবাড়ীতে প্রবেশ করায় তোমার এরূপ উদ্বেগ হওয়া সঙ্গত বটে। আমি কিন্তু—

पुरोधाः । अतएव भवद्विधा महान्तः (१) । (ख)

शकु । दुर्निमित्तमभिनीय । अम्मो ! किं मे वामेदरं णअणं विप्फुरदि (२) । (ग)

अत्र अशुचिमिवेति गुणोत्प्रेक्षा, अन्यास्तिस्रः क्रियोत्प्रेक्षाः, तथा अवैमीत्येकया क्रियया अभ्यक्तमित्यादीनां चतुर्णां कर्मतयाभिसम्बन्धात्तुल्ययोगिता ; इत्येतेषां मिथो निरपेक्षतया संसृष्टिः ।

अभ्यङ्गमाह शुद्धितत्त्वधृतमायुर्वेदवचनम्—

"मूर्द्ध्नि दत्तं यदा तैलं भवेत् सर्वाङ्गसङ्गतम् ।
स्रोतोभिस्तर्पयेद्गात्रम् अभ्यङ्गः स उदाहृतः ॥"

"मन्दस्वच्छन्दयोः स्वैरम्" इत्यमरः । आर्य्या जातिः ॥१२॥

(ख) पुरोधा इति । अतएव ईदृशं भाविनं विषयं मन्तुं शक्तत्वादेव, भवद्विधा मुनयः, महान्तो मानवान्तरेभ्यः प्रधानाः ; अपरैस्तदशक्तत्वादिति भावः ।

(ग) शकु इति । दुर्निमित्तमशुभलक्षणम्, अभिनीय दक्षिणनयनस्पन्दनेन सूचयित्वा । वामेतरत् दक्षिणम् । विस्फुरति विशेषेण स्पन्दते । स्त्रीणां दक्षिणाक्षिस्पन्दनं बन्धुविच्छेदं सूचयति । यथा गर्गः—

"दक्षिणचक्षुःस्पन्दनं बन्धुदर्शनमर्थलाभं वा ; वामचक्षुःस्पन्दनं बन्धुविच्छेदं धनहानिं वा ।" सूचयतीति पूर्वेण सम्बन्धः । परश्चाह—

"स्त्रीणामेतत् फलमविकलं दक्षिणे वैपरीत्यम् ।"

अतएव शकुन्तलाया बन्धुना पत्या सह भावी दीर्घविच्छेदः ।

স্নাত হইয়া এই সুখী লোকগুলিকে যেন তৈলাভ্যক্তের ন্যায়, পবিত্র হইয়া এই লোকগুলিকে যেন অপবিত্রের ন্যায়, জাগরিত হইয়া এই লোকগুলিকে যেন নিদ্রিতের ন্যায় এবং স্বেচ্ছাগামী হইয়া এই লোকগুলিকে যেন বদ্ধের ন্যায় মনে করিতেছি ॥১২॥

(१) कुत्रचिदयं पाठो नास्ति । (२) निमित्तं सूचयित्वा ।

गौतमी। जादे! पड़िहदं अमङ्गलं, सुहाइं दे होन्तु (१)। (घ)

इति परिक्रामन्ति (२)। (ङ)

पुरोधाः (३)। राजानं निर्द्दिश्य। भो भोस्तपस्विनः! असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनः प्रतिपालयति वः, पश्यतैनम्। (च)

(ग) अहो! किं मे वामेतरन् नयनं विस्फुरति।

(घ) जाते! प्रतिहतममङ्गलम्, सुखानि ते भवन्तु।

(घ) गौतमीति। हे जाते! वत्से! अमङ्गलं दक्षिणाक्षिस्पन्दनसूचितमशुभम्, प्रतिहतं निरस्तम्, भवत्विति शेषः। प्रत्युत सुखानि मङ्गलरूपाणीत्याशयः भवन्त्वित्याशीर्वादः।

(ङ) इतीति। इति एतदुक्त्वा परमित्यर्थः, परिक्रामन्ति राजान्तिकं अनु सर्वे पादक्षेपं कुर्वन्ति।

(च) पुरोधा इति। निर्द्दिश्य अङ्गुल्या दर्शयित्वा। अत्रभवान् राजत्वेन सर्वमान्यः, वर्णा ब्राह्मणादयः आश्रमाश्च ब्रह्मचर्यादयस्तेषामुभयेषामपि, रक्षिता यथा-

---

(খ) পুরোহিত। এইজন্যই আপনারা প্রধান।

(গ) শকুন্তলা। (দুর্লক্ষণ অভিনয় করিয়া) ও মা! আমার দক্ষিণ নয়ন স্পন্দিত হইতেছে কেন?।

(ঘ) গৌতমী। বৎসে! তোমার অমঙ্গল বিনষ্ট এবং নানাবিধ সুখ উৎপন্ন হউক।

(ঙ) (ইহার পর সকলে পাদক্ষেপ করিতে লাগিলেন।)

---

(१) सुहाइं दे भत्तुकुलदेवदाओ वितरन्तु।

(२) परिक्रामति। (३) पुरोहितः।

शार्ङ्ग। भो महात्मन्! काममेतदभिनन्दनीयम्; तथापि वयमत्र मध्यस्थाः (१)। (छ)

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥१३॥

नियमं पालयिता राजा दुष्मन्त इत्यर्थः, प्रागेव भवतामुपस्थितेः पूर्वमेव, मुक्तं त्यक्तमासनं येन सः, वो युष्मान्, प्रतिपालयति प्रतीक्षते। एनं राजानम्।

(छ) शार्ङ्गेति। एतत् राज्ञ आचरणम् अस्माकमुपस्थितेः प्रागेव गात्रोत्थानमित्यर्थः, कामं यथेष्टमेव, अभिनन्दनीयं प्रशंसनीयम्; तथापि अभिनन्दनीयत्वेऽपि, अत्राभिनन्दने, वयं मध्यस्था उदासीनाः प्रवृत्तिविहीना इत्यर्थः, राज्ञ एतदनौद्धत्यस्य स्वाभाविकत्वात् वह्नेरुष्णताया इव स्वाभाविकधर्मस्य प्रशंसानर्हत्वादिति भावः।

राज्ञो दुष्मन्तस्यैतन्नम्रत्वमपि स्वाभाविकमेवेति प्रतिपादयितुमाह भवन्तीति। तरवो वृक्षाः, फलानामुद्गमैः उत्पत्तिभिः, नम्रास्तत्फलभरेण नमनशीला भवन्ति; घना मेघाः, नवाम्बुभिर्नूतनजलसञ्चयैः दूरविलम्बिनः अत्यन्तलम्बिता उच्चाकाशादतीवानता इत्यर्थः, भवन्ति; तथा सत्पुरुषाः, समृद्धिभिर्धनादिसम्पद्भिः, अनुद्धता औद्धत्येन गर्वेण हीना नम्रा इति तात्पर्यम्, भवन्ति। तथा च परोपकारिणां जनानाम्, एष

---

(চ) পুরোহিত। ( রাজাকে দেখিয়া ) তপস্বিগণ! বর্ণ ও আশ্রমসমূহের রক্ষক মাননীয় মহারাজ, আপনাদের আসিবার পূর্ব্বেই আসন পরিত্যাগ করিয়া, আপনাদের প্রতীক্ষা করিতেছেন। ইঁহাকে দর্শন করুন।

(ছ) শার্ঙ্গরব। মহাত্মন্! রাজার এই ব্যবহারের যথেষ্ট প্রশংসা করা উচিত; তথাপি আমরা এবিষয়ে উদাসীন। ( কারণ, )

---

(१) शार्ङ्गरवः। भो महाब्राह्मण!।

प्रती। देव! पसण्णमुहा इसीओ दीसन्ति (१)। (ज)

राजा। शकुन्तलां निर्वर्ण्य। अये! अत्र—(२) (झ)

(ज) देव! प्रसन्नमुखा ऋषयो दृश्यन्ते।

---

एव नम्रत्वरूप एव स्वभावः। अतएव तरुघनवत् सर्वथा परोपकारिणः सत्पुरुष-विशेषस्य राज्ञो दुष्मन्तस्य च एतन्नम्रत्वं स्वभाव एवेति भावः।

अतएवात्र अप्रस्तुतात् सत्पुरुषसामान्यात् प्रस्तुतस्य दुष्मन्तरूपसत्पुरुषविशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, विशेषपर्य्यवसितस्य च तस्य चतुर्थचरणार्थरूपेण सामान्येन समर्थनादर्थान्तरन्यासः; अनयोः प्रथममङ्गाङ्गिभावेन सङ्करः; परञ्च अप्रस्तुतानामिव तरु घन सत्पुरुषाणां भवन्तीतिक्रियारूपैकधर्म्माभिसम्बन्धात्तुल्ययोगिता, तथा नम्रत्वरूपैक-धर्म्मस्यैव नम्र-दूरविलम्ब्यनुद्धतपदैः पृथक् निर्द्देशात् "विमल एव रविर्विशदः शशी" इत्यादिदर्पणोदाहरणवत् मालारूपा प्रतिवस्तूपमा; इति प्रागुक्तसङ्करेण सह समुदाये परस्परनिरपेक्षतया संसृष्टिः। संसृष्टिसङ्करयोरपि पुनः संसृष्टिसङ्करौ सम्भवत इति प्रदर्शितमस्माभिः साहित्यदर्पणटीकायां तत्प्रकरणे।

वंशस्थविलं वृत्तम् ॥१३॥

(ज) प्रतीति। प्रसन्नम् उद्वेगेनाकलुषितं मुखं येषां ते। अतएव "किं तावद्व्रतिनाम्" इत्यादिना भवता यद्वितर्कितं तस्य न किञ्चिदपीति भावः।

(झ) राजेति। निर्वर्ण्य दृष्ट्वा। अये इति सम्भ्रमे। अत्र स्थाने। "निर्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः।

---

ফল জন্মিলে, বৃক্ষ অবনত হয় এবং নূতন জল সঞ্চিত হইলে, মেঘ অত্যন্ত ঝুলিয়া পড়ে; এইরূপ সৎপুরুষগণ সমৃদ্ধি হইলে নম্রই হইয়া থাকেন। কারণ, পরোপকারীদিগের স্বভাবই এই ॥১৩॥

(জ) প্রতীহারী। মহারাজ! মুনিগণকে প্রসন্নবদন দেখা যাইতেছে।

(ঝ) রাজা। ( শকুন্তলাকে দেখিয়া ) ওহে! এখানে—

---

(१) देव! पसण्णमुहवण्णा दीसन्ति। जाणामि वीसद्धकज्जाओ इसीओ।

(२) राजा। शकुन्तलां दृष्ट्वा। अथात्रभवती।

কেয়মবগুণ্ঠনবতী (১) নাতিপরিস্ফুটশরীরলাবণ্যা।
মধ্যে তপোধনানাং কিসলয়মিব পাণ্ডুপত্রাণাম্ ॥১৪॥

প্রতী। ভট্টা! কুদূহলগব্ভো পড়িহদো ণ মে তক্কো পসরদি। দংসণীআ উণ সে আকিদী লক্খীঅদি (২)। (অ)

কেয়মিতি। পাণ্ডূনি পক্কতয়া পাণ্ডুবর্ণানি যানি পত্রাণি তেষাং মধ্যে। এতেন তপোধনানামপি পরিণতবয়স্কতয়া পাণ্ডুত্বং সূচিতম্। কিসলয়ং পল্লবমিব; তপোধনানামৃষীণাং মধ্যে, অবগুণ্ঠনবতী বসনেন মস্তকাচ্ছাদনশালিনী, নাতিপরিস্ফুটং বসনেন গাত্রাবরণাদেব নাতিস্পষ্টীভূতং শরীরস্য লাবণ্যং যস্যাঃ সা তাদৃশী, ইয়ং নারী কা?।

অত্র শ্রৌতোপমালঙ্কারঃ।

"মুক্তাফলস্য ছায়ায়াং তরলত্বমিবান্তরা।
প্রতিভাতি যদঙ্গেষু তল্লাবণ্যমিহোচ্যতে ॥" ইত্যুজ্জ্বলনীলমণিঃ।

যে তু ব্রুবতে "ভারতে যবনরাজত্বপ্রবৃত্তেঃ পূর্বমবগুণ্ঠনরীতির্নাসীৎ; পরঞ্চ লম্পট-যবনপুরুষভয়াদার্য্যরমণীনামবরোধপ্রথা অবগুণ্ঠনপ্রথা চ প্রবৃত্তে"তি তেষাময়মেব শ্লোকো মুখপিধাতা। ন চ কালিদাসকাল এবৈষা রীতিরুৎপন্নেত্যপি বক্তব্যম্, তদানীমুৎপত্তৌ কারণাভাবাৎ ততো বহুপূর্বমপি স্মৃতিশাস্ত্রে অবগুণ্ঠনপ্রস্তাবদর্শনাৎ। যথা তিথিতত্ত্বে অঙ্গিরাঃ—

"শ্বশুরস্যাগ্রতো যস্যাশ্চিরঃপ্রচ্ছাদনক্রিয়া।
পূর্বদর্শনে সা কার্য্যা মাতুরপ্যুদয়ার্থিভিঃ ॥"

অন্তঃপুরিকাদিশব্দদর্শনাদেব অবরোধপ্রথাপি চিরন্তনীতি মন্তব্যম্।

আর্য্যা জাতিঃ ॥১৪॥

এই অবগুণ্ঠনবতী রমণী কে? ইঁহার শরীরের লাবণ্য অতি-পরিস্ফুট হইতেছে না; তপস্বিগণের মধ্যে ইঁহাকে, পাণ্ডুবর্ণ পত্রের মধ্যে নবপল্লবের ন্যায় দেখা যাইতেছে ॥১৪॥

(১) কা স্বিদবগুণ্ঠনবতী।

(২) প্রতীহারী। দেব! পড়িহ্মী।

राजा। भवतु, अनिर्वर्ण्यं खलु परकलत्रम् (१)। (ट)

शकु। उरसि हस्तं दत्त्वा स्वगतम्। हिअअ! किं एव्वं वेवसि। अज्जउत्तस्स तादिसभावाणुबन्धं सुमरिअ धीरत्तणं दाव अवलम्बस्स (२)। (ठ)

(ञ) भर्त्तः! कुतूहलगर्भः प्रतिहतो न मे तर्कः प्रसरति। दर्शनीया पुनरस्या आकृतिर्लक्ष्यते।

(ठ) हृदय! किमेवं वेपसे? आर्य्यपुत्रस्य तादृशभावानुबन्धं स्मृत्वा धीरत्वं तावदवलम्बस्व।

(ञ) प्रतीति। भर्त्तः! स्वामिन्! कुतूहलमकस्मात् रमणीदर्शनजनितं कौतुकं गर्भे अभ्यन्तरे यस्य स तादृशः, मे मम तर्को विचारः इयं का भवितुमर्हतीत्यनुसन्धानम्, प्रतिहतः कुतूहलेनैव निवारितः सन्, न प्रसरति न प्रसारं लभते न निरूपयितुमर्हतीत्यर्थः। अतएव भवत उत्तरं दातुं न शक्नोमीति भावः। पुनः किन्तु। दर्शनीया सुदृश्येत्यर्थः, अतो नेयं सामान्येत्याशयः।

(ट) राजेति। भवतु इयं नारी या काचिद्भवत्वित्यर्थः। परकलत्रं परकीयस्त्री, अनिर्वर्ण्यं खलु अनवलोकनीयमेव ; "परदारान् न वीक्षेत" इति विष्णुसूत्रादिति भावः।

(ठ) शकु इति। यो यस्मै सान्त्वनां ददाति, सति सम्भवे स तं स्पृष्ट्वैव ददातीति लोकव्यवहारादाह-उरसीत्यादि। उरसि वक्षसि। वेपसे कम्पसे। आर्य्यः पूज्यः

(ঞ) প্রতীহারী। মহারাজ! কৌতুকগর্ভ আমার বিচারশক্তি, প্রতিহত হইয়া কিছু নিরূপণ করিতে পারিতেছে না। কিন্তু ইহার আকৃতি মনোহর বলিয়া লক্ষ্য করিতেছি।

(ট) রাজা। হউক, পরস্ত্রী দেখা উচিত নহে।

(१) अनिर्वर्णनीयं परकलत्रम्।

(२) शकुन्तला। हस्तमुरसि कृत्वा आत्मगतम्। अन्यउत्तस्स भावं जाणिअ धीरं दाव होहि।

পুরোধাঃ। পুরো গত্বা। স্বস্তি দেবায়। দেব! এতে খলু বিধিবদর্চ্চিতাস্তপস্বিনঃ; কশ্চিদেতেষু উপাধ্যায়সন্দেশোঽস্তি, তং দেবঃ শ্রোতুমর্হতি (১)। (ড)

রাজা। অবহিতোঽস্মি। (ঢ)

---

শ্বশুর ইতি তাৎপর্য্যম্, তস্য পুত্রো ভর্ত্তা, তস্য দুষ্মন্তস্যেত্যর্থঃ; তাদৃশভাবানুবন্ধং পূর্ব্বানুভূত-মদনুরাগপ্রবাহম্। ধীরত্বং ধৈর্য্যম্। তথা চ তাদৃশাবিচ্ছিন্নানুরাগকারী জনো বিনা বিশেষহেতুং ন কদাচিদিমত্তুঁ বিরক্তুং বার্হতীতি ন কিঞ্চিৎ সন্দেহকারণমস্তীতি ভাবঃ।

"ভাবঃ সত্তাস্বভাবাভিপ্রায়চেষ্টাত্মজন্মসু। ক্রিয়ালীলাপদার্থেষু বিভূতিবুধজন্তুষু রত্যাদৌ" ইতি মেদিনী।

(ড) পুরোধা ইতি। পুরস্তপস্বিনামগ্রতঃ। যো যং কিঞ্চিদ্বদতি, স তদভিমুখঃ সন্নেব বদতীতি লোকব্যবহারাৎ রাজাভিমুখীভবনার্থং পুরো গত্বেত্যুক্তম্। স্বস্তি মঙ্গলম্, অস্ত্বিতি শেষঃ। বিধিবৎ যথাশাস্ত্রম্, অর্চ্চিতাঃ পাদ্যাদিভিঃ সৎকৃতাঃ। অতএবৈষাং সৎকারাবশেষো নাস্তীত্যাশয়ঃ। এতেষু তপস্বিষু, কশ্চিৎ উপাধ্যায়স্য এষামেবাধ্যাপকস্য কণ্বস্য সন্দেশো বাচিকম্।

"স্বস্ত্যাশীঃক্ষেমপুণ্যাদৌ" ইত্যমরঃ।

(ঢ) রাজেতি। অবহিতঃ তং সন্দেশং শ্রোতুং কৃতমনোযোগঃ।

---

(ঠ) শকুন্তলা। (বুকে হাত দিয়া স্বগত) হৃদয়! কেন তুমি এরূপ কাঁপিতেছ? আর্য্যপুত্রের সেইরূপ অবিচ্ছিন্ন অনুরাগ স্মরণ করিয়া ধৈর্য্য অবলম্বন কর।

(ড) পুরোহিত। (সম্মুখে যাইয়া) মহারাজের মঙ্গল হউক। মহারাজ! যথাবিধানে এই তপস্বিগণের পূজা করা হইয়াছে; ইঁহাদের অধ্যাপকের কোন খবর আছে; তাহা আপনি শুনিতে পারেন।

(ঢ) রাজা। মনোযোগী হইলাম।

---

(১) পুরোহিতঃ। এতে বিধিবৎ। কশ্চিদেষামুপাধ্যায়সন্দেশঃ।

शिष्यौ । हस्तमुद्यम्य । भो राजन् ! विजयतां भवान् (१) । (ण)

राजा । सर्वानभिवादये वः (२) । (त)

शिष्यौ । स्वस्ति देवाय (३) । (थ)

राजा । अपि निर्विघ्नं तपः ? (४) । (द)

शिष्यौ । कुतो धर्म्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्म्मांशौ कथमाविर्भविष्यति ॥१५॥

(ण) शिष्याविति । आशीर्वादे हस्तोत्तोलनस्य व्यवहारादाह हस्तमुद्यम्येति । उद्यम्य उत्तोल्य ।

(त) राजेति । वो युष्मान्, अभिवादये नमस्करोमि ।

(थ) शिष्याविति । स्वस्ति मङ्गलम्, भवत्विति शेषः ।

(द) राजेति । अपिशब्दः प्रश्ने । युष्माकं तपो निर्विघ्नं सम्पद्यते किमित्यर्थः ।

कुत इति । त्वयि रक्षितरि परिपालयितरि सति, सतां सज्जनानाम्, धर्म्मक्रियाणां यज्ञादीनाम्, विघ्नो व्याघातः कुतो भवितुमर्हतीति शेषः कुतोऽपि नेति तात्पर्य्यम् । तथा च घर्म्मा उष्णा अंशवः किरणा यस्य तस्मिन् सूर्य्ये, तपति जगत् सन्तापयति सम्पूर्ण-मुदयमाने सति, तमः अन्धकारः, कथमाविर्भविष्यति, अपि तु कथमपि नेत्यर्थः । अतो निर्विघ्नमेवास्माकं तप इत्याशयः ।

अत्र यथा सूर्य्ये तपति सति नान्धकाराविर्भावः, तथा त्वयि रक्षितरि सत्यपि न

(ণ) শিষ্যদ্বয়। (হস্ত উত্তোলন করিয়া) মহারাজ! আপনার জয় হউক।

(ত) রাজা। আপনাদের সকলকেই নমস্কার করি।

(থ) শিষ্যদ্বয়। আপনার মঙ্গল হউক।

(দ) রাজা। আপনাদের তপস্যার কোন বিঘ্ন নাই ত ?।

(१) ऋषयः । विजयस्व राजन् ! । (२) अभिवादये ।

(३) ऋषयः । दृष्टेन युज्यस्व । (४) अपि निर्विघ्नतपसो मुनयः ! ।

রাজা। আত্মগতম্। সর্ব্বথা অর্থবান্ খলু মে রাজশব্দঃ। প্রকাশম্। তত্রভবান্ কুশলী কণ্বঃ? (১)। (ধ)

শার্ঙ্গ°। রাজন্! স্বাধীনকুশলাঃ সিদ্ধিমন্তঃ। স ভবন্তমনাময়প্রশ্নপূর্ব্বকমিদমাহ। (ন)

ধর্ম্মক্রিয়াবিঘ্ন ইতি প্রতিবিম্বনাৎ দৃষ্টান্তোঽলঙ্কারঃ, পূর্ব্বার্দ্ধপরার্দ্ধয়োরর্থোপনিবন্ধশ্চ, ইত্যেতেষাং পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ। উদাহরণং নাম নাট্যলক্ষণঞ্চ। যথা দর্পণে—

"যত্র তুল্যার্থযুক্তেন বাক্যেনাভিপ্রদর্শনাৎ।
সাধ্যতেঽভিমতশ্চার্থস্তদুদাহরণং মতম্॥"

"উষ্ণোঽপি ধর্ম্মঃ" ইত্যমরঃ ॥১৫॥

(ধ) রাজেতি। রাজশব্দঃ রাজেত্যানুপূর্ব্বীকো বর্ণসমূহঃ, সর্ব্বথা অর্থবান্ সর্ব্বথৈব প্রকারেণ সার্থকঃ। তথা চ রঞ্জয়তি প্রজা ইতি রাজা। অতএবোক্তং রঘুবংশে—"রাজা প্রকৃতিরঞ্জনাৎ" ইতি। এবঞ্চ ময়ৈব পরিপালনেন অনুরঞ্জিতাঃ খল্বেতাঃ প্রজাঃ সন্তুষ্যন্ত্য এব এবং ব্রুবন্তীত্যাশয়ঃ। তত্রভবান্ মহর্ষিত্বেন পূজ্যঃ, কুশলী মঙ্গলবানিতি কাক্বা প্রশ্নো ব্যজ্যতে।

(ন) শার্ঙ্গেতি। সিদ্ধিমন্তো যোগেনাণিমাদিসিদ্ধাঃ পুরুষাঃ, স্বাধীনম্ আত্মায়ত্তমিব কুশলং যেষাং তে তাদৃশাঃ। তথা চ যোগসিদ্ধাঃ পুরুষাঃ স্বেচ্ছয়ৈব কুশলমকুশলং বা কর্ত্তুমর্হন্তি। তেন চ কুশলস্যেষ্টত্বাৎ যোগসিদ্ধঃ কণ্বঃ কুশলী এবেতি

শিষ্যদ্বয়। আপনি রক্ষক থাকিতে, সাধুজনের ধর্ম্মকার্য্যের বিঘ্ন হইবে কেন! সূর্য্য সম্পূর্ণ উদয় পাইলে অন্ধকার আবির্ভূত হইবে কিরূপে? ॥১৫॥

(ধ) রাজা। (স্বগত) আমার রাজা-নাম, সর্ব্বপ্রকারেই সার্থক। (প্রকাশ্যে) পূজনীয় মহর্ষি কণ্বের মঙ্গল ত?।

(১) রাজা। অর্থবান্ খলু মে রাজশব্দঃ। অথ ভগবান্ লোকানুগ্রহায় কুশলী কাশ্যপঃ?।

রাজা। 'কিমাজ্ঞাপয়তি ভগবান্?। (প)

শার্ঙ্গ। যন্মিথঃসময়াদিমাং মদীয়াং দুহিতরং ভবানুপ-যেমে (১); তন্ময়া প্রীতিমতা যুবয়োরনুজ্ঞাতম্। কুতঃ—(ফ)

---

ভাবঃ। স কণ্বঃ। অনাময়প্রশ্নপূর্ব্বকং তব কিমারোগ্যং বর্ত্ততে ইতি জিজ্ঞাসা-পূর্ব্বকম্, ইদং বক্ষ্যমাণম্।

ব্রাহ্মণং প্রতি কুশলপ্রশ্নঃ, ক্ষত্রিয়ং প্রতি চানাময়প্রশ্নঃ শাস্ত্রীয়ঃ। যথা মনুঃ—

"ব্রাহ্মণং কুশলং পৃচ্ছেৎ ক্ষত্রবন্ধুমনাময়ম্।
বৈশ্যং ক্ষেমং সমাগম্য শূদ্রমারোগ্যমেব চ॥"

অতএব হি পূর্ব্বং কণ্বং ব্রাহ্মণং প্রতি কুশলীতি রাজ্ঞঃ প্রশ্নঃ।

(প) রাজেতি। কিমাহ ইতি বক্তব্যে কিমাজ্ঞাপয়তীত্যভিধানেন মহাগৌরবং দ্যোতিতম্।

(ফ) শার্ঙ্গেতি। মিথঃসময়াৎ 'ত্বং মে ভার্য্যা' 'ত্বং মে ভর্ত্তা' ইতি পরস্পরং শপথং কৃত্বেত্যর্থঃ, "গান্ধর্ব্বঃ সময়ান্মিথঃ" ইতি যাজ্ঞবল্ক্যবচনাৎ। উপযেমে পরিণীতবান্। প্রীতিমতা পরস্পরযোগ্যত্বাৎ সন্তোষবতা ময়া যুবয়োস্তৎ উপযমনম্, অনুজ্ঞাতম্ অনুমোদিতম্।

"সময়াঃ শপথাচারকালসিদ্ধান্তসংবিদঃ" ইত্যমরঃ।

উপযেমে ইতি "উদ্বাহে উপযমঃ" ইতি রুচাদিত্বাদাত্মনেপদম্।

ননু ভবদভিপ্রায়মপরিজ্ঞায় বিবাহকরণাৎ অপ্রীতিস্থলে কথং ভবতঃ প্রীতিরিত্যাহ কুত ইতি।

---

(ন) শার্ঙ্গরব। মহারাজ! সিদ্ধপুরুষদিগের মঙ্গল, তাঁহাদের নিজেদের অধীন। তিনি আরোগ্য জিজ্ঞাসা করিয়া, আপনাকে এই কথা বলিয়াছেন।

(প) রাজা। ভগবান্ কণ্ব কি আদেশ করিয়াছেন?।

---

(১) উপায়ংস্ত।

ত্বমর্হতামগ্রসরঃ স্মৃতোঽসি নঃ (১)
শকুন্তলা মূর্ত্তিমতীব সৎক্রিয়া।
সমানয়ংস্তুল্যগুণং বধূবরং
চিরস্য বাচ্যং ন গতঃ প্রজাপতিঃ ॥১৬॥

ত্বমিতি। ত্বম্, অর্হতাং প্রশংসাভাজনানাং জনানাম্, অগ্রসরঃ অগ্রবর্ত্তী প্রধান ইতি যাবৎ, নঃ অস্মাকং স্মৃতঃ সম্মতঃ অসি ; তথা শকুন্তলা চ, মূর্ত্তিমতী দেহধারিণী, সৎক্রিয়া যাগাদিপ্রশস্তক্রিয়েব নঃ স্মৃতেত্যন্বয়ঃ। অত উভয়োস্তুল্যগুণত্বমিত্যাশয়ঃ। তুল্যা গুণাঃ শৌচাচারাদয়ো যস্য তৎ তাদৃশম্, বধূর্নবোঢা চ বরো বোঢা চেতি তৎ বধূবরম্, সমানয়ন্ একীকুর্ব্বন্ বিবাহেন "অস্থিভিরস্থীনি" ইত্যাদিশ্রুতেঃ একশরীরী-কুর্ব্বন্, প্রজাপতির্বিধাতা, চিরস্য চিরকালাগতম্, বাচ্যং নিন্দাম্ 'অযোগ্যযোজী বিধাতা' ইতি লোকাপবাদমিত্যর্থঃ, ন গতঃ অত্র ন প্রাপ্তঃ, তুল্যগুণত্বেন পরস্পরযোগ্যত্বাদিতি ভাবঃ।

অত্র বরকন্যয়োরানুরূপ্যেণ শ্লাঘাপ্রতীতেঃ সমং নামালঙ্কারঃ, বাচ্যা ভাবাভিমানিনী ক্রিয়োৎপ্রেক্ষা পদার্থহেতুকং কাব্যলিঙ্গঞ্চ, ইত্যেতেষাং গুণপ্রধানভাবেনাঙ্গাঙ্গিভাবাৎ সঙ্করঃ।

অর্হতামিতি "অর্হঃ প্রশংসায়াম্" ইত্যর্হতেঃ শতৃঙ্। স্মৃত ইতি "আগুবন্ধ-মতিবুদ্ধিপূজার্থেভ্যঃ" ইতি মত্যর্থাৎ স্মরতেঃ কর্ত্তরি ক্তঃ। ন ইতি "বর্ত্তমানাধি-করণয়োঃ শৌবে" ইতি কর্ত্তরি ষষ্ঠী। সমানং কুর্ব্বন্নিতি সমানয়ন্ সমানশব্দাৎ "ইন্ কারিতং ধাত্বর্থে" ইতীন্। ননু "অন্তর্নির্বিষ্টকর্ম্মকধাতোরকর্ম্মকত্বম্" ইত্যুক্তেঃ সমানয়ন্নিত্যস্য অন্তর্নির্বিষ্টকর্ম্মকতয়া বধূবরমিত্যস্য কথং কর্ম্মত্বমিতি চেন্ন তত্রানু-শাসনে কর্ম্মপদস্য প্রাধান্যেন বিধেয়কর্ম্মপরত্বাৎ উদ্দেশ্যকর্ম্মস্থিতৌ বাধকাভাবাৎ অত্র তু বধূবরমিত্যস্য উদ্দেশ্যকর্ম্মত্বাৎ। অন্যত্রাপ্যেবং প্রয়োগো দৃশ্যতে। যথা

(ফ) শার্ঙ্গরব। পরস্পর শপথ করিয়া, আপনি আমার এই কন্যাকে যে বিবাহ করিয়াছেন, আমি আপনাদের উপরে সন্তুষ্ট হইয়া তাহাতে অনুমোদন করিয়াছি। কারণ—

(১) প্রাগ্রহরঃ স্মৃতোঽসি ন।

तदिदानीमापन्नसत्त्वेयं गृह्यतां सहधर्म्मचरणायेति (१)। (ब)

गौतमी। भद्दमुह! किम्पि वत्तुकामम्हि, ण मे वअणावसरो अत्थि (२)। (भ)

(भ) भद्रमुख! किमपि वक्तुकामास्मि, न मे वचनावसरोऽस्ति।

नैषधे—"कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति।" वधूवरमिति समाहारद्वन्द्व एकवद्भावः।

"समानाः सत्समैके स्युः" इत्यमरः।

वंशस्थविलं वृत्तम् ॥१६॥

(ब) तदिति। तस्मात् विधात्रैव पतिपत्नीत्वेन युवयोरेकीकृतत्वादित्यर्थः। इदानीम्, आपन्नम् उदरे प्राप्तं सत्त्वं जन्तुर्यया सा आपन्नसत्त्वा गर्भवती, इयं शकुन्तला, सहधर्म्मचरणाय "सपत्नीको धर्म्ममाचरेत्" इति आम्नात् मिलित्वा धर्म्मकार्य्यकरणाय, गृह्यताम्, इति इत्यन्तम्, इदमाहेति पूर्वेणान्वयः।

"आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी।" इत्यमरः।

(भ) गौतमीति। भद्राणां श्रेष्ठानां जनानां मुखः प्रधान इति भद्रमुखस्तत्सम्बोधनम्। वचनावसर उक्त्यवकाशः, नास्ति; युवाभ्यामेवाविरतालपनादिति भावः।

"मुखमाद्ये प्रधाने च" इत्यमरः।

---

আপনি প্রশংসনীয় লোকদের অগ্রগণ্য ইহা আমাদের অভিমত; আবার শকুন্তলাও মূর্ত্তিমতী সৎক্রিয়ার ন্যায়। অতএব প্রজাপতি, সমানগুণসম্পন্ন বধূ ও বরকে একত্র করিয়া, চিরকালের নিন্দা প্রাপ্ত হন নাই ॥১৬॥

(ব) অতএব এখন এই গর্ভবতী পত্নীকে, মিলিত হইয়া ধর্ম্মকার্য্য করিবার জন্য গ্রহণ করুন।

(ভ) গৌতমী। হে ভদ্রপ্রধান! আমি কিছু বলিতে ইচ্ছা করি; কিন্তু আমার বাক্যের অবসর হইতেছে না।

(१) क्वचिदियमिति नास्ति। (२) गौतमी। अज्ज अत्थि। कहं त्ति।

राजा । आर्य्ये ! कथ्यताम् (१) । (म)

गौतमी ।

णावेक्खिदो गुरुअणो इमिए ण तुए वि पुच्छिदो बन्धू ।
एक्कक्कस्स अ चरिए भणादु किं एक्क एक्कस्सिं (२) ॥१७॥

शकु । आत्मगतम् । किस्स क्खु अज्जउत्तो भणिस्सदि (३) । (य)

नापेक्षितो गुरुजनः अनया, न त्वयापि पृष्टो बन्धुः ।
एकैकस्य च चरिते भणतु किमेक एकस्मिन् ॥१७॥

(म) राजेति । आर्य्ये ! माननीये ! ।

नेति । अनया शकुन्तलया, गुरुजनः पित्रादिः, न अपेक्षितः दुष्मन्ताय आत्मानं प्रदातुमनुमतिग्रहणाय नान्विष्टः ; त्वयापि दुष्मन्तेन, बन्धुः स्वजनः, न पृष्टः 'शकुन्तलां विवहामि न वा' इति न जिज्ञासितः । अतएव एकस्मिन् बन्धुजनानपेक्षणात्मके अविभिन्नरूपे, एकैकस्य युवयोरुभयोरेवेत्यर्थः, चरिते अभिप्रायाचरणे, एकः अन्यो जनः, किं भणतु 'पतिः पत्नीं पत्नी पतिं गृह्णातु' इत्यादि किं वदतु, अपि तु परस्परमिलनायत्त-त्वात् न किञ्चिद्भणत्वित्यर्थः । तेन यथेयमनुरागवशादेवागता, तथा त्वमप्यनुराग-वशादेवैनां गृह्णीष्वेति न कस्यचिदप्यनुरोधापेक्षास्तीति भावः ।

अत्र किं भणतु अपि तु किमपि नेत्यर्थान्तरस्यापतनादर्थापत्तिरलङ्कारः ।

"एके मुख्यान्यकेवलाः" इत्यमरः । आर्य्या जातिः ॥१७॥

(ম) রাজা। আর্য্যে! বলুন।

গৌতমী। এ ( শকুন্তলা ) গুরুজনের অপেক্ষা করে নাই ; আপনিও বন্ধুজনকে জিজ্ঞাসা করেন নাই। অতএব আপনাদের দুই জনেরই এক রকম কার্য্যে অন্যে কি বলিবে ? ॥১৭॥

(१) कुत्रचिदेष पाठो न वर्त्तते ।

(२) एक्कक्कोव्वं चरिए भणामि किं एक्कमेक्कस्स । (३) भणइ ।

राजा। साशङ्कमाकर्ण्य। अये! किमिदमुपन्यस्तम्? (१)। (र)

शकु। आत्मगतम्। हद्धी हद्धी! सावलेवो से वअणावक्खेवो (२)। (ल)

(य) किन्नु खलु आर्य्यपुत्रो भणिष्यति।

(ल) हा धिक् हा धिक्! सावलेपः अस्य वचनावक्षेपः।

(य) शकु इति। सोत्कण्ठा साशङ्का चोक्तिरियमिति बोध्यम्।

(र) राजेति। परस्त्रिया गृहीतुमशक्यत्वात् तद्ग्रहणाय च महर्षेरैवानुरोधापातात् तत्प्रत्याख्याने च महाविपत्सम्भवादाशङ्का तया सहेति साशङ्कम्। अये इति सम्भ्रमे। किमुपन्यस्तं भवद्भिः किमिदं वक्तुमारब्धम्। एतत्प्रस्तावगन्धमपि नाहं जानामीत्याशयः। केचित्तु किमिदमुपन्यस्तम् उपकथात्मकोपन्यासरूपेण किमिदमभिहितमित्यर्थमाचक्षते।

"उपन्यासस्तु वाङ्मुखम्" इत्यमरः।

(ल) शकु इति। हाधिगित्येकमेव विषादार्थकमव्ययम्, तस्यातिशये द्विरुक्तिः। अस्य राज्ञो दुष्मन्तस्य, वचनावक्षेप एतद्वाक्यप्रयोगः, सावलेपः सगर्वः। तथा च महामाननीयेन मुनिजनेन सह विनयेनैवालापे कर्त्तव्ये 'अये! किमिदमुपन्यस्तम्' इति वचनोच्चारणभङ्ग्या गर्व एव प्रतीयते। तेन च गर्वेण मुनिवाक्यप्रत्याख्यानमपि सम्भाव्यत इति भावः।

"अवलेपस्तु गर्वे स्याल्लेपने भूषणेऽपि च।" इति मेदिनी।

(য) শকুন্তলা। (স্বগত) আর্য্যপুত্র কি বলেন!।

(র) রাজা। (আশঙ্কার সহিত শুনিয়া) ওহে! আপনারা এ কি বলিতে আরম্ভ করিয়াছেন।

(ল) শকুন্তলা। (স্বগত) হায়! হায়! ইহার বাক্যবিন্যাসে যে গর্ব্ব লক্ষ্য করিতেছি।

(१) राजा। किमिदमुपन्यस्तम्। (२) यावती खलु वचनीवचायी।

शार्ङ्ग। किं नाम, किमिदमुपन्यस्तमिति। ननु भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः (१)। (ब)

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा (२) प्रमदा स्वबन्धुभिः ॥१८॥

(ब) शार्ङ्गेति। नामेति प्राकाश्ये। किं प्रकाश्योक्तमित्यर्थः। किमिद-मुपन्यस्तम्, इति किम् उक्तमिति तात्पर्य्यम्। सत्यमियं मया परिणीता, तथापि सर्वप्रकाररागरहितानामूर्द्ध्वरेतसां मुनीनामाश्रमे अस्या अवस्थाने न काचिदाशङ्केति किमिदमुपन्यस्तं 'इयं गृह्यताम्' इत्यादिकं किं वक्तुमारब्धमिति राज्ञोऽभिप्रायं सम्भाव्याह नन्वित्यादि। नन्विति विशेषामन्त्रणे। सुतरामस्मदादिभ्योऽतिशयेन, लोकवृत्तान्तेषु निष्णाता अभिज्ञाः।

"प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः" इत्यमरः।

नन्वत्र तादृशः को नाम लोकवृत्तान्त इत्याह सतीमिति। जनो लोकः, ज्ञातिकुलं पितृगृहम् एकं केवलं संश्रयते अवस्थानायावलम्बत इति ताम्, भर्त्ता अस्या अस्तीति सा भर्तृमती तां सधवाम्, सतीमपि केवलपतिरतामपि प्रमदाम्, अन्यथा अन्यप्रकारेण व्यभिचारित्वेनेत्यर्थः, आशङ्कते अवश्याश्रयणीयभर्तृगृहानाश्रयादाशङ्कते। अतः कारणात्, स्वबन्धुभिः प्रमदाया एव पित्रादिबन्धुजनैः, प्रिया अप्रिया वा परिणेतुरेवेति तात्पर्य्यम्, प्रमदा युवतिः; परिणेतुं पत्युः, समीपे स्थितेति शेषः, इष्यते। अयमेव

(ब) শার্ঙ্গরব। "এ কি বলিতে আরম্ভ করিয়াছেন" এ কথা বলিলেন কেন। আপনারাই যে আমাদের অপেক্ষা লোকের খবর বেশী জানেন।

(१) शार्ङ्गरवः। कथमिदं नाम। भवन्त एव सुतरां। (२) तदप्रियापि प्रमदा।

राजा। किमत्रभवती मया परिणीतपूर्वा ? (१)। (श)

शकु। सविषादमात्मगतम्। हिअअ! संपदं संवुत्ता दे आसङ्का (२)। (ष)

लोकवृत्तान्तः, अत्र च भवन्त एव विशेषेणाभिज्ञाः। अतएव चेयं भवतः समीपमानीतेति भावः।

अत्र अप्रस्तुतात् प्रमदासामान्यात् प्रस्तुतस्य शकुन्तलारूपप्रमदाविशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, असत्यां का कथा सतीमपीति अर्थान्तरापतनादर्थापत्तिश्च, अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। स्थितेति पदानुक्तावपि तस्य सामर्थ्यादेवावगतेर्न्न्यूनपदतादोषः, "क्वचिन्न दोषो न गुणः" इति साहित्यदर्पणात्।

तथा उक्तस्य विषयस्य उपालम्भरूपेण बहुधा उत्कीर्त्तनात् अर्थविशेषणं नाम नाट्यालङ्कारः। यथा तत्रैव—

"उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा।
उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम्॥"

"ज्ञातिः सगोत्रे पितरि।" "कुलं जनपदे गृहे। सजातीयगणे गोत्रे देहेऽपि कथितं कुलम्॥" इति च विश्वः। "प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृता" इति भागुरिः। वंशस्थविलं वृत्तम्॥१८॥

(श) राजेति। अत्रभवती मुनिकन्यात्वेन माननीया शकुन्तला, परिणीतपूर्वा पूर्वं परिणीता किम्?। कथमन्यथा भवन्त एवं ब्रुवन्तीति भावः।

সধবা স্ত্রী সতী হইয়াও, যদি কেবলই পিতৃগৃহে থাকে, তবে লোকে তাহাকে অন্যরূপ আশঙ্কা করে; এই জন্য, সে প্রিয়াই হউক, বা অপ্রিয়াই হউক, তাহাকে স্বামীর নিকটে রাখাই, তাহার আত্মীয়েরা ইচ্ছা করেন ॥১৮॥

(শ) রাজা। আমি কি ইঁহাকে পূর্ব্বে বিবাহ করিয়াছিলাম ?।

---

(१) किमत्रभवती। (२) हिअअ! संपदिआ दाणिं दे आसङ्का।

শার্ঙ্গ ।

কিং কৃতকার্য্যদ্বেষাৎ ধর্ম্মং প্রতি বিমুখতোচিতা রাজ্ঞঃ ।

রাজা । কুতোঽয়মসৎকল্পনাপ্রসঙ্গঃ (১) । (ঙ)

শার্ঙ্গ । সক্রোধম্ ।

মূর্চ্ছন্ত্যমী বিকারাঃ, প্রায়েণৈশ্বর্য্যমত্তানাম্ (২) ॥১৮॥

(ঘ) হৃদয় ! সাম্প্রতং সংবৃত্তা তে আশঙ্কা ।

(ঘ) শকু ইতি । আশঙ্কা প্রত্যাখ্যানভয়ম্, সংবৃত্তা উপস্থিতা, সন্দেহে একতর-নিশ্চয়স্যাবশ্যকত্বাৎ অপরিণীতত্বনিশ্চয়ে চ প্রত্যাখ্যানস্যৈব নিশ্চয়াদিত্যাশয়ঃ ।

কিমিতি । একস্য শ্লোকস্য প্রথমার্দ্ধমিদম্, পরার্দ্ধঞ্চ রাজবাক্যানন্তরং বক্ষ্যতে । কৃতে স্বয়মেব বিহিতে, কার্য্যে শকুন্তলায়াঃ পরিণয়ব্যাপারে, দ্বেষাৎ কেনাপি কারণেন 'নৈতদ্ভদ্রং কৃতম্' ইতি বিদ্বেষোৎপত্তের্হেতোঃ, ধর্ম্মং প্রতি, রাজ্ঞো ধর্ম্মনিয়ন্তুরিত্যাশয়ঃ কিং বিমুখতা পরাঙ্মুখতা, উচিতা সঙ্গতা, কথমপি নেত্যর্থঃ । যঃ খলু রাজা তস্য ধর্ম্মং প্রতি সর্ব্বদৈবোন্মুখত্বমেবোচিতম্ । তেন ইষ্টত্বেন কৃতস্য শকুন্তলাপরিণয়-কার্য্যস্য কুতোঽপি কারণাৎ পুনর্দ্বিষ্টত্ববুদ্ধ্যা তদনঙ্গীকারে শকুন্তলায়াঃ সর্ব্বথা গত্যন্তরা-ভাবাৎ ধর্ম্মং প্রতি বিমুখত্বমেব স্যাৎ সা চ রাজ্ঞস্তব নিতরামনুচিতেতি ভাবঃ ।

অত্র রাজ্ঞো দোষাভিধানাৎ অপবাদো নাম বিমর্শসন্ধ্যঙ্গম্ । যথা দর্পণে—

"দোষপ্রখ্যাপবাদঃ স্যাৎ ।"

(ঙ) রাজেতি । অসতী অসাধুভূতা যা কল্পনা মম ধর্ম্মং প্রতি বিমুখত্বোদ্ভাবনা

(ঘ) শকুন্তলা ; ( বিষাদের সহিত স্বগত ) হৃদয় ! এখন তোমার আশঙ্কা উপস্থিত হইল ।

শার্ঙ্গরব । কৃতকার্য্যের প্রতি বিদ্বেষবশতঃ ধর্ম্মের প্রতি বিমুখ হওয়া কি রাজার উচিত ? ।

(ঙ) রাজা । এই অসৎ কল্পনার প্রসঙ্গ আসিল কোথা হইতে ? ।

(১) কল্পনাপ্রশ্নঃ । (২) ঐশ্বর্য্যমত্তেষু ।

রাজা। বিশেষেণাধিক্ষিপ্তোঽস্মি। (হ)

গৌতমী। শকুন্তলাং প্রতি। জাদে! মুহুত্তঅং মা লজ্জ,

তস্যাঃ প্রসঙ্গঃ সম্ভাবনা কুতঃ, অপি তু কুতোঽপি নেত্যর্থঃ, সর্ব্বদৈব ধর্ম্মং প্রতি উন্মুখত্বা-দিত্যাশয়ঃ।

মূর্চ্ছন্তীতি। ঐশ্বর্য্যমত্তানাং ধনমদেন মত্তানাং জনানাম্, প্রায়েণ বাহুল্যেনৈব, অমী ইত্যম্ভূতাঃ, বিকারাঃ স্বভাবপরিবৃত্তয়ঃ, মূর্চ্ছন্তি উচ্ছ্রয়ং প্রাপ্নুবন্তি বর্দ্ধন্ত ইত্যর্থঃ। তথা চ যাবত্কালং জনা নির্ধনা অল্পধনা বা তিষ্ঠন্তি, তাবদেব তে কৃতকার্য্যমঙ্গীকুর্ব্বন্তি সত্যঞ্চ পালয়ন্তি; যদৈব ধনং বিবর্দ্ধতে, তদৈব তন্মদেন মত্তাঃ সন্তস্ত এব জনাঃ বিদ্বিষন্তঃ কৃতকার্য্যং ন স্বীকুর্ব্বন্তি সত্যঞ্চ পরিহরন্তি; প্রায়েণৈব ইত্থং স্বভাবপরিবৃত্তয়ঃ পরিদৃশ্যন্তে, ভবতোঽপ্যেবমেব স্বভাবপরিবৃত্তির্বৃদ্ধিং প্রাপ্তা; কথমন্যথা শকুন্তলায়াঃ পরিণয় এব সন্দেহাবিষ্কার ইতি ভাবঃ।

অতএবাত্র অপ্রস্তুতাদৈশ্বর্য্যমত্তসামান্যাৎ প্রস্তুতস্য ঐশ্বর্য্যমত্তবিশেষস্য দুষ্মন্তস্য প্রতীতেরপ্রস্তুতপ্রশংসালঙ্কারঃ। রোষভাষণাৎ সম্ফেটো নাম বিমর্শসন্ধেরঙ্গঞ্চ—"সম্ফেটো রোষভাষণম্" ইতি দর্পণলক্ষণাৎ;

"স্বরূপাদন্যথাত্বং বিকারঃ" ইতি শ্রীপতিঃ। আর্য্যা জাতিঃ॥১৯॥

(হ) রাজেতি। বিশেষেণ আধিক্যেন, অধিক্ষিপ্তো ভবতা ভর্ৎসিতঃ।

"অধিক্ষিপ্তো নিন্দিতভর্ৎসিতৌ" ইতি হেমচন্দ্রঃ।

অত্র মুনিশিষ্যসম্মানরক্ষার্থং তত্কৃততিরস্কারজনিতাপমানসহনাৎ ছাদনং নাম বিমর্শসন্ধেরঙ্গম্। যথা দর্পণে—"তদাহুশ্ছাদনং পুনঃ। কার্য্যার্থমপমানাদেঃ সহনং খলু যদ্ভবেৎ।"

---

শার্ঙ্গরব। (ক্রোধের সহিত) ধনমদে মত্ত লোকদিগের প্রায়ই এই জাতীয় বিকার বৃদ্ধি পাইয়া থাকে॥১৯॥

(হ) রাজা। বিশেষভাবে তিরস্কৃত হইলাম।

(ক্ষ) গৌতমী। (শকুন্তলার প্রতি) বৎসে! একটুকাল লজ্জা

अवणइस्सं दाव दे अवगुण्ठणं, तदो भट्टा तुमं अहिजाणिस्सदि। इति तथा करोति (१)। (च)

राजा। शकुन्तलां निर्वर्ण्य स्वगतम्।

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेत्यध्यवस्यन्।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् (२) ॥२०॥

(च) जाते! मुहूर्त्तकं मा लज्जस्व, अपनेष्यामि तावत्ते अवगुण्ठनम्, ततो भर्त्ता त्वामभिज्ञास्यति।

(च) गौतमीति। मुहूर्त्तकं कियन्तं कालमित्यर्थः। अवगुण्ठनं मुखावरणम्, अपनेष्यामि अपसारयिष्यामि। भर्त्ता राजा, अभिज्ञास्यति ज्ञातामेव पुनर्ज्ञास्यति मुखदर्शनात् सैवेयमिति परिच्छेत्स्यतीत्यर्थः। तथा करोति अवगुण्ठनमपनयति।

"अनुभूतस्य पुनरनुभवः प्रत्यभिज्ञा:" इति गुरवः।

इदमिति। एवम् अनेन प्रकारेण आत्मेच्छयैवेत्यर्थः, उपनतं मम समीपे उपस्थितम्, अक्लिष्टा अमलिना कान्तिः शोभा यस्य तत्, इदं रूपम् इयं स्त्रीमूर्त्तिः, प्रथमं परिगृहीतं मया परिणीतं स्यात् न वा इति विषये अध्यवस्यन् एकतरं निश्चिन्वन् अहम्, निशान्ते रात्रिशेषे, अन्तरभ्यन्तरे तुषारो हिमं यस्य तदन्तस्तुषारम्। एतेन रूपमपि अन्तःसत्त्वमिति सूचितम्। कुन्दं तदाख्यं पुष्पमिव, सपदि हठात्, भोक्तुमपि न खलु शक्नोमि, स्वकीयत्वपरकीयत्वयोः सन्देहस्यानिरासात् परकीयाभोगे प्रत्यवायसम्भवात्, भ्रमरपक्षे अन्तस्तुषारतया आकृतिवैषम्येण स्वरूपस्यानिर्णयादिति

করিস্ না; আমি তোর ঘোমটা সরাইয়া ফেলি; তার পর রাজা তোকে চিনিতে পারিবেন। ( এই বলিয়া তাহাই করিলেন। )

(१) मा लज्जस्व…। (२) स्यान्नवेति व्यवस्यन्। भ्रमर इव विभाते न च खलु परिभोक्तुं नैव शक्नोमि हातुम्।

इति विचारयन् स्थितः। (क)

**प्रती। स्वगतम्। अम्मो! धम्मावेक्खिणो भट्टिणो। ईदिसं णाम सुहोवणदं इत्थीरअणं पेक्खिअ को अण्णो विआरेदि (१)। (ख)**

(ख) अहो! धर्म्मापेक्षिणो भर्त्तारः। ईदृशं नाम सुखोपनतं स्त्रीरत्नं प्रेक्ष्य कोऽन्यो विचारयति।

---

भावः। *सपदि भोक्तुं परित्यक्तुमपि न शक्नोमि, आत्मनैव परिगृहीताया निर्दोषायाः परित्यागे गुरुतरपापसम्भवात्, भ्रमरपक्षे पूर्वं दृष्टत्वादेव दर्शनेन उत्कटमधुलोभस्यैव जागरूकत्वादित्याशयः।

अत्र श्रौतोपमालङ्कारः। तथा भ्रमरः शक्नोति अहन्तु शक्नोमीति पुरुषभेदात् "लतेव राजसे तन्वि!" इति दर्पणोदाहरणवत् भग्नप्रक्रमतादोषः, स च 'नापि भोक्तुं समर्थः' इति पाठेन समाधेयः।

मालिनी वृत्तम् ॥२०॥

(क) इतीति। विचारयन् शकुन्तला परिणीता नवेति वितर्कयन्।

(ख) प्रतीति। अहोशब्दो विस्मये। भर्त्तारो राजानः, धर्म्मम् अवेक्षन्ते रक्षणीय-

রাজা। (শকুন্তলাকে দেখিয়া স্বগত) যাহার ভিতরে শিশিরবিন্দু পড়িয়া থাকে, সেইরূপ কুন্দপুষ্পকে রাত্রিশেষে ভ্রমর যেমন ভোগ করিতেও পারে না, পরিত্যাগ করিতেও পারে না; আমিও তেমন অক্ষতসৌন্দর্য্য এই রূপখানি আপনার ইচ্ছায় উপস্থিত হইয়াছে, কিন্তু ইহাকে প্রথম গ্রহণ করিয়াছিলাম কি না এই সন্দেহ করিয়া, হঠাৎ ভোগ করিতেও পারিতেছি না, হঠাৎ ত্যাগ করিতেও পারিতেছি না ॥২০॥

(ক) (মনে মনে এইরূপ তর্ক করতঃ নীরব রহিলেন।)

---

(१) प्रतीहारी। अहो! धम्मावेक्खिदा भट्टुणो। एरिसं णाम सुहोवणअं रूवं देक्खिअ।

शार्ङ्ग° । किं नाम, किमिदमुपन्यस्तमिति । ननु भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः (१) । (व)

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्त्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा (२) प्रमदा स्वबन्धुभिः ॥१८॥

(व) शार्ङ्गेति । नामेति प्राकाश्ये । किं प्रकाश्योक्तमित्यर्थः । किमिदमुपन्यस्तम्, इति किम् उक्तमिति तात्पर्य्यम् । सत्यमियं मया परिणीता, तथापि सर्वप्रकाररागरहितानामूर्द्ध्वरेतसां मुनीनामाश्रमे अस्या अवस्थाने न काचिदाशङ्केति किमिदमुपन्यस्तं 'इयं गृह्यताम्' इत्यादिकं किं वक्तुमारब्धमिति राज्ञोऽभिप्रायं समाख्याह नन्वित्यादि । नन्विति विशेषामन्त्रणे । सुतरामस्मदादिभ्योऽतिशयेन, लोकवृत्तान्तेषु निष्णाता अभिज्ञाः ।

"प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः" इत्यमरः ।

नन्वत्र तादृशः को नाम लोकवृत्तान्त इत्याह सतीमिति । जनो लोकः, ज्ञातिकुलं पितृगृहम् एकं केवलं संश्रयते अवस्थानायावलम्बते इति ताम्, भर्त्ता अस्या अस्तीति सा भर्त्तृमती तां सधवाम्, सतीमपि केवलपतिरतामपि प्रमदाम्, अन्यथा अन्यप्रकारेण व्यभिचारित्वेनेत्यर्थः, आशङ्कते अवश्याश्रयणीयभर्त्तृगृहानाश्रयादाशङ्कते । अतः कारणात्, स्वबन्धुभिः प्रमदाया एव पित्रादिबन्धुजनैः, प्रिया अप्रिया वा परिणेतुरेवेति तात्पर्य्यम्, प्रमदा युवतिः; परिणेतुः पत्युः, समीपे स्थितेति शेषः, इष्यते । अयमेव

(ব) শার্ঙ্গরব। "এ কি বলিতে আরম্ভ করিয়াছেন" এ কথা বলিলেন কেন। আপনারাই যে আমাদের অপেক্ষা লোকের খবর বেশী জানেন।

(१) शार्ङ्गरवः । कथमिदं नाम । भवन्त एव सुतरां । (२) तदप्रियापि प्रमदा ।

রাজা। কিমত্রভবতী ময়া পরিণীতপূর্ব্বা ? (১)। (শ)

শকু। সবিষাদমাত্মগতম্। হিঅঅ! সংপদং সংবুত্তা দে আসঙ্কা (২)। (ষ)

লোকবৃত্তান্তাঃ, অত্র চ ভবন্ত এব বিশেষেণাভিজ্ঞাঃ। অতএব চেয়ং ভবতঃ সমীপমানীতেতি ভাবঃ।

অত্র অপ্রস্তুতাৎ প্রমদাসামান্যাৎ প্রস্তুতস্য শকুন্তলারূপপ্রমদাবিশেষস্য প্রতীতেরপ্রস্তুতপ্রশংসালঙ্কারঃ, অসত্যাং কা কথা সতীমপীতি অর্থান্তরাপতনাদর্থাপত্তিশ্চ, অনয়োর্গুণপ্রধানভাবেনাঙ্গাঙ্গিভাবাৎ সঙ্করঃ। স্থিতেতি পদানুক্তাবপি তস্য সামর্থ্যাদেবাবগতের্ন ন্যূনপদতাদোষঃ, "ক্বচিন্ন দোষো ন গুণঃ" ইতি সাহিত্যদর্পণাৎ।

তথা উক্তস্য বিষয়স্য উপালম্ভরূপেণ বহুধা উৎকীর্ত্তনাৎ অর্থবিশেষণং নাম নাট্যালঙ্কারঃ। যথা তত্রৈব—

"উক্তস্যার্থস্য যত্তু স্যাদুৎকীর্ত্তনমনেকধা।
উপালম্ভস্বরূপেণ তৎ স্যাদর্থবিশেষণম্॥"

"জ্ঞাতিঃ সগোত্রে পিতরি।" "কুলং জনপদে গৃহে। সজাতীয়গণে গোত্রে দেহেঽপি কথিতং কুলম্॥" ইতি চ বিশ্বঃ। "প্রমদা চেতি বিজ্ঞেয়া যুবতিশ্চ তথা স্মৃতা" ইতি ভাগুরিঃ। বংশস্থবিলং বৃত্তম্॥১৮॥

(শ) রাজেতি। অত্রভবতী মুনিকন্যাত্বেন মাননীয়া শকুন্তলা, পরিণীতপূর্ব্বা পূর্ব্বং পরিণীতা কিম্ ?। কথমন্যথা ভবন্ত এবং ব্রুবন্তীতি ভাবঃ।

সধবা স্ত্রী সতী হইয়াও, যদি কেবলই পিতৃগৃহে থাকে, তবে লোকে তাহাকে অন্যরূপ আশঙ্কা করে; এই জন্য, সে প্রিয়াই হউক, বা অপ্রিয়াই হউক, তাহাকে স্বামীর নিকটে রাখাই, তাহার আত্মীয়েরা ইচ্ছা করেন ॥১৮॥

(শ) রাজা। আমি কি ইহাকে পূর্ব্বে বিবাহ করিয়াছিলাম ?।

---

(১) কিম্বাত্রভবতী। (২) হিঅঅ! সংপড়িদা দাণিং দে আসঙ্কা।

शार्ङ्ग ।
किं कृतकार्य्यद्वेषात् धर्म्मं प्रति विमुखतोचिता राज्ञः ।
राजा । कुतोऽयमसत्कल्पनाप्रसङ्गः (१) । (स)
शार्ङ्ग । सक्रोधम् ।
मूर्च्छन्त्यमी विकाराः, प्रायेणैश्वर्य्यमत्तानाम् (२) ॥१८॥

(ष) हृदय ! साम्प्रतं संवृत्ता ते आशङ्का ।

(ष) शकु इति । आशङ्का प्रत्याख्यानभयम्, संवृत्ता उपस्थिता, सन्देहे एकतर-निश्चयस्यावश्यकत्वात् अपरिणीतत्वनिश्चये च प्रत्याख्यानस्यैव निश्चयादित्याशयः ।

किमिति । एकस्य श्लोकस्य प्रथमार्द्धमिदम्, परार्द्धञ्च राजवाक्यानन्तरं वक्ष्यते । कृते स्वयमेव विहिते, कार्य्ये शकुन्तलायाः परिणयव्यापारे, द्वेषात् केनापि कारणेन 'न तद्भद्रं कृतम्' इति विद्वेषोत्पत्तेर्हेतोः, धर्म्मं प्रति, राज्ञो धर्म्मनियन्तुरेवेत्याशयः किं विमुखता पराङ्मुखता, उचिता सङ्गता, कथमपि नेत्यर्थः । यः खलु राजा तस्य धर्म्मं प्रति सर्वदैवोन्मुखत्वमेवोचितम् । तेन इष्टत्वेन कृतस्य शकुन्तलापरिणय-कार्य्यस्य कुतोऽपि कारणात् पुनर्द्विष्टत्वबुद्ध्या तदनङ्गीकारे शकुन्तलायाः सर्वथा गत्यन्तरा-भावात् धर्म्मं प्रति विमुखतैव स्यात् सा च राज्ञस्तव नितरामनुचितेति भावः ।

अत्र राज्ञो दोषाभिधानात् अपवादो नाम विमर्शसन्धेरङ्गम् । यथा दर्पणे—
"दोषप्रख्यापवादः स्यात् ।"

(स) राजेति । असती असाधुभूता या कल्पना मम धर्म्मं प्रति विमुखत्वोद्भावना

(ष) শকুন্তলা। (বিষাদের সহিত স্বগত) হৃদয়! এখন তোমার আশঙ্কা উপস্থিত হইল।

শার্ঙ্গরব। কৃতকার্য্যের প্রতি বিদ্বেষবশতঃ ধর্ম্মের প্রতি বিমুখ হওয়া কি রাজার উচিত?।

(স) রাজা। এই অসৎ কল্পনার প্রসঙ্গ আসিল কোথা হইতে?।

(१) कल्पनाप्रश्नः । (२) ऐश्वर्य्यमत्तेषु ।

राजा। विशेषेणाधिक्षिप्तोऽस्मि। (ह)

गौतमी। शकुन्तलां प्रति। जाते! मुहूर्त्तं मा लज्ज,

तस्याः प्रसङ्गः सम्भावना कुतः, अपि तु कुतोऽपि नेत्यर्थः, सर्व्वदैव धर्म्मं प्रति उन्मुखत्वादित्याशयः।

मूर्च्छन्तीति। ऐश्वर्य्यमत्तानां धनमदेन मत्तानां जनानाम्, प्रायेण बाहुल्येनैव, अमी इत्थम्भूताः, विकाराः स्वभावपरिवृत्तयः, मूर्च्छन्ति उच्छ्रयं प्राप्नुवन्ति वर्द्धन्त इत्यर्थः। तथा च यावत्कालं जना निर्धना अल्पधना वा तिष्ठन्ति, तावदेव ते कृतकार्य्यमङ्गीकुर्व्वन्ति सत्यञ्च पालयन्ति; यदैव धनं विवर्द्धते, तदैव तन्मदेन मत्ताः सन्तस्त एव जनाः विद्विषन्तः कृतकार्य्यं न स्वीकुर्व्वन्ति सत्यञ्च परिहरन्ति; प्रायेणैव इत्थं स्वभावपरिवृत्तयः परिदृश्यन्ते, भवतोऽप्येवमेव स्वभावपरिवृत्तिर्वृद्धिं प्राप्ता; कथमन्यथा शकुन्तलायाः परिणय एव सन्देहाविष्कार इति भावः।

अतएवात्र अप्रस्तुतादैश्वर्य्यमत्तसामान्यात् प्रस्तुतस्य ऐश्वर्य्यमत्तविशेषस्य दुष्मन्तस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः। रोषभाषणात् सम्फेटो नाम विमर्शसन्धेरङ्गञ्च—"सम्फेटो रोषभाषणम्" इति दर्पणलक्षणात्।

"स्वरूपादन्यथात्वं विकारः" इति श्रीपतिः। आर्य्या जातिः॥१९॥

(ह) राजेति। विशेषेण आधिक्येन, अधिक्षिप्तो भवता भर्त्सितः।

"अधिक्षिप्तो निहितभर्त्सितौ" इति हेमचन्द्रः।

अत्र मुनिशिष्यसम्मानरक्षार्थं तत्कृततिरस्कारजनितापमानसहनात् छादनं नाम विमर्शसन्धेरङ्गम्। यथा दर्पणे—"तदाहुश्छादनं पुनः। कार्य्यार्थमपमानादेः सहनं खलु यद्भवेत्।"

শার্ঙ্গরব। (ক্রোধের সহিত) ধনমদে মত্ত লোকদিগের প্রায়ই এই জাতীয় বিকার বৃদ্ধি পাইয়া থাকে॥১৯॥

(হ) রাজা। বিশেষভাবে তিরস্কৃত হইলাম।

(ক্ষ) গৌতমী। (শকুন্তলার প্রতি) বৎসে! একটুকাল লজ্জা

अवणइस्सं दाव दे अवगुण्ठणं, तदो भट्टा तुमं अहिजाणिस्सदि। इति तथा करोति (१)। (च)

राजा। शकुन्तलां निर्वर्ण्य स्वगतम्।

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेत्यध्यवस्यन्।
भ्रमर इव निशान्ते कुन्दमन्तस्तुषारं
न खलु सपदि भोक्तुं नापि शक्नोमि मोक्तुम् (२) ॥२०॥

(च) जाते! मुहूर्त्तकं मा लज्जस्व, अपनेष्यामि तावत्ते अवगुण्ठनम्, ततो भर्त्ता त्वामभिज्ञास्यति।

(च) गौतमीति। मुहूर्त्तकं कियन्तं कालमित्यर्थः। अवगुण्ठनं मुखावरणम्, अपनेष्यामि अपसारयिष्यामि। भर्त्ता राजा, अभिज्ञास्यति ज्ञातामेव पुनर्ज्ञास्यति मुखदर्शनात् सैवेयमिति परिचेष्यतीत्यर्थः। तथा करोति अवगुण्ठनमपनयति।

"अनुभूतस्य पुनरनुभवः प्रत्यभिज्ञा:" इति गुरवः।

इदमिति। एवम् अनेन प्रकारेण आत्मोत्कर्षेणेत्यर्थः, उपनतं मम समीपे उपस्थितम्, अक्लिष्टा अमलिना कान्तिः शोभा यस्य तत्, इदं रूपम् इयं स्त्रीमूर्त्तिः, प्रथमं परिगृहीतं मया परिणीतं स्यात् न वा इति विषये अध्यवस्यन् एकतरं निश्चिन्वन् अहम्, निशान्ते रात्रिशेषे, अन्तरभ्यन्तरे तुषारो हिमं यस्य तदन्तस्तुषारम्। एतेन रूपमपि अन्तःसत्त्वमिति सूचितम्। कुन्दं तदाख्यं पुष्पमिव, सपदि झटात्, भोक्तुमपि न खलु शक्नोमि, स्वकीयत्वपरकीयत्वयोः सन्देहस्यानिरासात् परकीयाभोगे प्रत्यवायसम्भवात्, भ्रमरपक्षे अन्तस्तुषारतया आकृतिवैषम्येण स्वरूपस्यानिर्णयादिति

---

করিস্ না; আমি তোর ঘোমটা সরাইয়া ফেলি; তার পর রাজা তোকে চিনিতে পারিবেন। ( এই বলিয়া তাহাই করিলেন। )

---

(१) मा लज्जस्व···। (२) स्यान्नवेति व्यवस्यन्। भ्रमर इव विभाते न च खलु परिभोक्तुं नैव शक्नोमि हातुम्।

ইতি বিচারয়ন্ স্থিতঃ। (ক)

**প্রতী। স্বগতম্। অম্মো! ধম্মাবেক্খিণো ভট্টিণো। ঈদিসং ণাম সুহোবণদং ইত্থীরঅণং পেক্খিঅ কো অণ্ণো বিআরেদি (১)। (খ)**

(খ) অহো! ধর্ম্মাপেক্ষিণো ভর্ত্তারঃ। ঈদৃশং নাম সুখোপনতং স্ত্রীরত্নং প্রেক্ষ্য কোঽন্যো বিচারয়তি।

ভাবঃ। সপদি ভোক্তুং পরিত্যক্তুমপি ন শক্নোমি, আত্মনৈব পরিগৃহীতায়া নির্দ্দোষায়াঃ পরিত্যাগে গুরুতরপাপসম্ভবাৎ, ভ্রমরপক্ষে পূর্ব্বদৃষ্টবদেব দর্শনেন উৎকটমধুলোভস্যৈব জাগরূকত্বাদিত্যাশয়ঃ।

অত্র শ্রৌতোপমালঙ্কারঃ। তথা ভ্রমরঃ শক্নোতি অহন্তু শক্নোমীতি পুরুষভেদাৎ “লতেব রাজসে তন্বি!” ইতি দর্পণোদাহরণবৎ ভগ্নপ্রক্রমতাদোষঃ, স চ ‘নাপি ভোক্তুং সমর্থঃ’ ইতি পাঠেন সমাধেয়ঃ।

মালিনী বৃত্তম্ ॥২০॥

(ক) ইতীতি। বিচারয়ন্ শকুন্তলা পরিণীতা নবেতি বিতর্কয়ন্।

(খ) প্রতীতি। অহোশব্দো বিস্ময়ে। ভর্ত্তারো রাজানঃ, ধর্ম্মম্ অবেক্ষন্তে রক্ষণীয়-

রাজা। (শকুন্তলাকে দেখিয়া স্বগত) যাহার ভিতরে শিশিরবিন্দু পড়িয়া থাকে, সেইরূপ কুন্দপুষ্পকে রাত্রিশেষে ভ্রমর যেমন ভোগ করিতেও পারে না, পরিত্যাগ করিতেও পারে না; আমিও তেমন অক্ষতসৌন্দর্য্য এই রূপখানি আপনার ইচ্ছায় উপস্থিত হইয়াছে, কিন্তু ইহাকে প্রথম গ্রহণ করিয়াছিলাম কি না এই সন্দেহ করিয়া, হঠাৎ ভোগ করিতেও পারিতেছি না, হঠাৎ ত্যাগ করিতেও পারিতেছি না ॥২০॥

(ক) (মনে মনে এইরূপ তর্ক করতঃ নীরব রহিলেন।)

(১) প্রতীহারী। অহো! ধম্মাবেক্খিদা ভত্তুণো। এরিসং ণাম সুহোবণদং রূবং দেক্খিঅ।

शार्ङ्ग° । भो राजन् ! किमिति जोषमास्यते ? । (ग)

राजा । भोस्तपस्विनः ! चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि, तत् कथमिमामभिव्यक्तसत्त्वलक्षणामात्मानमक्षत्रियं मन्यमानः प्रतिपत्स्ये (१) । (घ)

त्वेन पश्यन्तीति धर्म्मावेक्षिणः धर्म्मरक्षिण इत्यर्थः । अत्र अन्ययेति पूरणीयम् । ईदृशं परमसुन्दरमित्याशयः, सुखेन अनायासेन उपनतमुपस्थितम्, आयासोपस्थाप्ये कथञ्चिद्विचारः सम्भवतीति भावः । अन्यः भर्त्तृभिन्नो जनः, विचारयति गृह्णामि न वेति वितर्कयति, कोऽपि नेत्यर्थः ।

प्रतीहार्य्या खल्विदमात्मनो जातिव्यक्त्यनुरूपमेवाभिहितमित्यालोचनीयम् ।

(ग) शार्ङ्गेति । केवलमेवात्मनो विहितवचनस्याभिधीयमानत्वादनादरसम्बोधने भोःशब्दः । परवाच्येवम् । जोषं तूष्णीं नीरवमिति यावत्, आस्यते उपविश्यते । इदमुपनतमित्यादिः स्वगतमालोचनादिदमुक्तम् ।

"तूष्णीमर्थे सुखे जोषम्" इत्यमरः ।

(घ) राजेति । अत्रभवत्याः मुनिकन्यात्वेन माननीयायाः शकुन्तलायाः, स्वीकरणं विवाहात् भार्य्यात्वेन ग्रहणम्, न खलु स्मरामि । अथ अपरिणीता अपि राज्ञां भोग्याः स्त्रियः सन्तीति श्रूयते तद्रूपेणेयं गृह्यतामित्याह तदिति । आत्मानम्, अक्षत्रियं क्षत्रियजातीतरम्, मन्यमानः । तथा च क्षत्रियाः खलु धर्म्मरक्षकाः । एवञ्च अभिव्यक्तसत्त्वलक्षणत्वेन परदारत्वात् तद्ग्रहणे च धर्म्मध्वंसात् आत्मानः क्षत्रियेतरत्वमेव स्यादिति

(খ) প্রতীহারী । ( স্বগত ) হায় ! রাজার কি আশ্চর্য্য ধর্ম্মাপেক্ষী ; না হইলে, অনায়াসে উপস্থিত এইরূপ স্ত্রীরত্ন দেখিয়া, অন্য কোন্ ব্যক্তি ইতস্ততঃ করে ? ।

(গ) শাঙ্গর্রব । রাজা ! আপনি নীরব হইয়া রহিলেন কেন ? ।

(१) भोस्तपोधनाः ! अभिव्यक्तसत्त्वलक्षणां प्रति आत्मानं क्षत्रियमाशङ्कमानः प्रतिपत्स्ये ।

শকু। স্বগতম্। হদ্ধী হদ্ধী! কধং পরিণএ জ্জেব সন্দেহো। ভগ্গা দাণিং দূরারোহিণী আসালদা (১)। (ঙ)

শার্ঙ্গ। মা তাবত্—(চ)

কৃতাবমর্শামনুমন্যমানঃ (২)
সুতাং ত্বয়া নাম মুনির্বিমান্যঃ।

(ঙ) হা ধিক্ হা ধিক্! কথং পরিণয় এব সন্দেহঃ। ভগ্না ইদানীং দূরারোহিণী আশালতা।

---

ভাবঃ। অভিব্যক্তং স্পষ্টীভূতং সত্ত্বলক্ষণং গর্ভচিহ্নং যস্যাস্তাম্। প্রতিপৎস্যে গ্রহীষ্যামি, কথমপি নেত্যর্থঃ।

(ঙ) শকু ইতি। হাধিগিত্যেকমেব মহাবিষাদসূচকমব্যয়ং তস্যাতিশয়ে দ্বিরুক্তিঃ। পরিণয়ে এব অতিস্ফুটব্যাপারে গান্ধর্ববিবাহে এব, সন্দেহো বিস্মৃতিবশাদিতি ভাবঃ। দূরমত্যুচ্চম্ আরোহতীতি দূরারোহিণী বহুবিস্তৃতেত্যর্থঃ, আশৈব লতা সা, ভগ্না ছিন্না, পরিণয় এব সন্দেহেন প্রত্যাখ্যানস্যৈবাবশ্যম্ভাবাৎ অন্যত্র চ তাদৃশাশাপূরণা-সম্ভবাদিতি ভাবঃ।

(চ) শার্ঙ্গেতি। অবধারণে তাবচ্ছব্দঃ। বারণে চ মাশব্দঃ, অন্বয়শ্চাস্য শ্লোকস্থেন বিমান্য ইত্যনেন। "যাবত্তাবচ্চ সাকল্যেঽবধৌ মানেঽবধারণে" ইত্যমরঃ।

---

(ঘ) রাজা। ওহে তপস্বিগণ! আমি চিন্তা করিয়াও, ইহার পাণিগ্রহণ স্মরণ করিতে পারিতেছি না; সুতরাং আপনাকে অক্ষত্রিয় স্বীকার করিয়া, এক ব্যক্তগর্ভলক্ষণা রমণীকে কি করিয়া গ্রহণ করি।

(ঙ) শকুন্তলা। (স্বগত) হায়! হায়! বিবাহেই সন্দেহ হইল। অতি দূরে উত্থিত আমার আশালতা এখন ছিন্ন হইল।

---

(১) শকুন্তলা। অপবার্য্য। অজ্জউত্তস্স পরিণএ এব্বং সন্দেহো। কুদো দাণিং মে দূরারোহিণী…। (২) কৃতাভিমর্শাম্।

मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन ॥२१॥

कृतेति । कृतस्त्वयैव विहितः अवमर्शः स्पर्शः स्पर्शात्मकं सुरतं यस्यास्ताम्, सुतां कन्यां शकुन्तलाम्, अनुमन्यमानः रोषम् असम्मतिं वा अकृत्वा प्रत्युत अनुमोदमानः, मुनिः कण्वः, त्वया मा तावत् विमान्यः तत्प्रत्याख्यानेन नैव अवमाननीयः । किञ्च येन मुनिना, मुष्टं चोरितम्, स्वं स्वकीयम्, अर्थं धनं पुनः प्राप्तमित्यर्थः, प्रतिग्राहयता स्वीकारयता सता, दस्युस्तस्कर इव, पात्रीकृतः सम्प्रदानीकृतः असि । तथा च त्वं मुनेरनुमतिमगृहीत्वैव तदीयकन्यां शकुन्तलां गान्धर्वविधानेन निर्जने परिणीतवान्, परन्तु मुनिस्तज्ज्ञात्वा आत्मानुमत्यभावेऽपि रोषमकृत्वा, प्रत्युत प्रीत्या तादृशपरिणयानुमोदनमेव कृतवान्, ईदृशावस्थायां तादृशसरलचेता मुनिस्तदनुरोधप्रत्याख्यानेन कथमपि नावमाननीयः । किञ्च चौरेण कस्यचित् किञ्चिद्धनं चोरितम्, धनस्वामिना तु पुनस्तद्धनं प्राप्य यथा तस्मै चौरायैव दीयते, तथा, त्वया रहसि गृहीतामात्मकन्यां पुनः प्राप्य यः खलु मुनिः पुनस्तुभ्यमेव दानार्थं प्रेरितवान्, ईदृशो महात्मा मुनिस्त्वया तद्दान-प्रत्याख्यानेन कुतोऽपि नावमाननीयः, प्रत्युत सादरमेव तद्ग्रहणेन सम्माननीय एव ; अन्यथा कृतघ्नता स्यादिति सरलार्थो भावार्थश्च ।

अत्र श्रौतीपमालङ्कारः । तेन च दुष्मन्तस्य चौरवन्निकृष्टत्वं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः । तथा चौरः पात्रीकृतः अस्ति, त्वन्तु असीति पुरुषभेदाद्भग्नप्रक्रमतादोषः, स च 'येन प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिव प्रमृष्टम्' इति पाठेन परिहार्यः । एवञ्च प्रक्रमस्य आरम्भरूपत्वादारम्भस्य चोक्तेरेव विवक्षणात् प्रदर्शितपाठे च असी-त्यस्यानुक्तत्वात् न तद्दोषावसर इति सुधीभिर्भाव्यम् ।

मुष्टमिति "मुष स्तेये" इत्यस्य क्तप्रत्यये प्रयोगः ।

हन्त ! "ते हि नो दिवसा गताः" भारतब्राह्मणानाम् ; यत्र हि तपस्वी ब्राह्मणः सम्राजमेव सम्राजं भर्त्सयन् नावमानितः ।

उपजातिर्वृत्तम् ॥२१॥

(চ) শার্ঙ্গরব। আপনি কন্যার সংস্পর্শ করিয়াছেন, মহর্ষি

शार। शार्ङ्गरव! विरम त्वमिदानीम्। शकुन्तले! वक्तव्यमुक्तमस्माभिः, सोऽयमत्रभवानेवमाह, दीयतामस्मै प्रत्यय-प्रतिवचनम्। (छ)

शकु। स्वगतम्। इमं अवत्थन्तरं गदे तादिसे अणुराए किंवा सुमराविदेण। अधवा अत्ता दाणिं मे सोधणीओ होदु त्ति किञ्चि वदिस्सं। प्रकाशम्। अज्जउत्त!। इत्यर्द्धोक्ते।

(ज) इदमवस्थान्तरं गते तादृशेऽनुरागे किंवा स्मारितेन। अथवा आत्मेदानीं शोधनीयो भवतु, इति किञ्चिद्वदिष्यामि। आर्य्यपुत्र!। अथवा संशयित इदानीमेव

(छ) शा रेति। यत् वक्तव्यं तदुक्तमित्यर्थः। अत्रभवान् राजत्वेन माननीयः सः अयं दुष्मन्तः, आह ब्रवीति। प्रत्ययाय प्रतिवचनं विश्वासकरमुत्तरमित्यर्थः। इदानीं त्वदुक्तिमात्रमेव आशास्य नमिति भावः।

(ज) शकु इति। तादृशे पूर्वानुभूते सुमहतीत्यर्थः, अनुरागे मां प्रति राज्ञः प्रणये, इदम् अवस्थान्तरं लोपदशाम्, गते प्राप्ते सति, स्मारितेन आवयोर्गान्धर्वविवाह-स्मरणजननेन, किंवा फलम्, न किञ्चिदपीत्यर्थः अनुरागाभावे केवलस्मृतेरकिञ्चित्-करत्वादिति भावः। शोधनीयः निष्पापीकर्त्तव्य, मतृकृतेन विश्वासजनकोत्तरेणापि

তাহাতে অনুমোদন করিয়াছেন ; এ অবস্থায় আপনি তাঁহাকে অপমানিত করিবেন না। নিজের ধন চুরি করিয়া নিয়াছিল, সেই ধন পাইয়া পুনরায় সেই চোরকেই যেমন সেই ধন গ্রহণ করান হয়, সেইরূপ আপনি নিজের কন্যাকে অসমক্ষে গ্রহণ করিয়াছেন, তাহাকে পাইয়া পুনরায় গ্রহণ করিবার জন্য যিনি আপনাকেই পাত্র করিয়াছেন। ২১॥

(ছ) শারদ্বতমিশ্র। শার্ঙ্গরব! তুমি এখন বিরত হও। শকুন্তলা! আমাদের যাহা বক্তব্য, তাহা বলা হইয়াছে ; তাহাতে মাননীয় এই রাজা এইরূপ বলিতেছেন ; অতএব তুমি ইঁহার বিশ্বাস-জনক উত্তর দাও।

अथवा संसइदो दाणिं एसो समुदाचारो। पोरव! जुत्तं णाम तुह पुरा अस्समपदे सवभावुत्ताणहिअअं इमं जणं तधा समअपुव्वअं सम्भाविअ सम्पदं ईदिसेहिं अक्खरेहिं पच्चाक्खादुं (१)। (ज)

समुदाचारः। पौरव! युक्तं नाम तव पुरा आश्रमपदे सद्भावोत्तानहृदयमिमं जनं तथा समयपूर्वकं सम्भाव्य साम्प्रतमीदृशैरक्षरैः प्रत्याख्यातुम्।

राज्ञा प्रत्याख्याने दारुणदुःखसम्भवात् तेनैव च पापक्षयस्य भावित्वात् "प्रारब्धकर्म्मणां भोगादेव क्षयः" इत्यभियुक्तोक्तत्वादित्याशयः। 'आर्य्यपुत्र! शृणु' इति पदद्वयात्मक-वाक्यस्य आर्य्यपुत्र इत्येकस्मिन् पदे उच्चारिते तद्वाक्यस्यार्द्धमेव उक्तं स्यादत उक्तम् इत्यर्द्धोक्ते इति। इदानीं परिणयस्यैव विस्मरणकाले, एष आर्य्यपुत्रपदप्रयोज्यः, समुदाचारो व्यवहारः संशयितः प्रत्याख्यानसम्भवेन तत्सम्बन्धस्य संसम्भवात् संशयापन्नः। अतएव निःसंशयपदेन सम्बोधयति पौरवेति। हे पौरव! पुरुवंशोत्पन्न! आश्रमपदे तपोवनस्थाने, सद्भावेन तव सद्व्यवहारेण उत्तानं बहुतरसुखाशाजननात् उच्चीभूतं हृदयं वक्षो यस्य तं तादृशम्, इमं जनं मामित्यर्थः, तथा पूर्व्वानुभूतरूपेण, समयपूर्व्वकं "परिग्रहबहुत्वेऽपि" इत्यादिशपथपूर्व्वकम्, सम्भाव्य आश्वास्य, साम्प्रतम् ईदृशैः "न खलु चिन्तयन्नपि स्वीकरणमत्रभवत्याः स्मरामि" इत्यादिरूपैः, अक्षरैर्वर्णैः, प्रत्याख्यातुं निराकर्त्तुम्, तव युक्तमुचितं नाम "उपकृतं बहु तत्र किमुच्यते" इत्यादिदर्पणोदाहरणवत् विपरीतलक्षणया अतीवायुक्तमित्यर्थः; तव मिथ्यावादित्वप्रतारकत्वादिबहुतरदोषापातादिति भावः। नामशब्दः कुत्सायाम्।

(জ) শকুন্তলা। (স্বগত) সেইরূপ অনুরাগ এই অবস্থান্তর প্রাপ্ত হইয়াছে; ইহাতে স্মরণ করাইয়াই বা ফল কি। অথবা আমার আত্মা এখন সংশোধিত হউক, এই জন্য কিছু বলিব। (প্রকাশ্যে)

(१) शकुन्तला। अपवार्य्य। अता दाणिं मे सोअणीओ णि ववसिअं एदं। संसए परिणए वा एसो समुदाआरो। सब्भावुत्ताणहिअअं पत्थारिअ।

राजा। (कर्णौ पिधाय।) शान्तं शान्तम् (१)। (झ)

व्यपदेशमाविलयितुं समीहसे माञ्च नाम पातयितुम्।
कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च (२) ॥२२॥

(झ) राजेति। पिधाय पाणिभ्यामावृत्य; मिथ्योक्तिं सम्भाव्य तच्छ्रवणे पापसम्भवादिति भावः। शान्तं शान्तम् ईदृश्योक्तेर्निवर्त्तस्व निवर्त्तस्व। शान्तमिति वारणार्थमव्ययम्।

व्यपेति। कूलङ्कषा वेगेन तीरभङ्गकारिणी, लाक्षणया कुलस्त्रीनियमभङ्गकारिणीति च गम्यते; सिन्धुर्नदी, प्रसन्नं निर्म्मलम्, ओघं जलप्रवाहम्, तटतरुञ्च तीरस्थितवृक्षञ्च इव, प्रसन्नम्, व्यपदिश्यते लोकसमाजे उल्लिख्यते अनेनेति व्यपदेशः कुलं तम्, आविलयितुं परस्त्रीरूपस्यात्मनः संसर्गेण कलुषीकर्त्तुं भज्यमानतीरमृत्तिकासंसर्गेण आविलीकर्त्तुञ्च, मां पातयितुञ्च परस्त्रीरूपस्यात्मनः संसर्गद्वारा पातित्यजनकपापास्पदीकर्त्तुञ्च, समीहसे आत्मनो ग्राहणेन वेगेन च चेष्टसे; इदन्तु महदनुचितमसम्भवञ्चेति भावः।

अत्र श्रौती पूर्णोपमालङ्कारः, प्रसन्नं व्यपदेशमोघञ्च आविलयितुं माञ्च तटतरुञ्च पातयितुमिति उद्दिष्टानां क्रमेणान्वयाद् यथासङ्ख्यमलङ्कारश्च, अनयोर्मिथो निरपेक्षतया संसृष्टिः। तथा सिन्धुः समीहते त्वन्तु समीहसे इति पुरुषभेदात् पूर्ववदेव भग्नप्रक्रमता-दोषः, सोऽपि च समीहते इति पाठेनैव समाधेयः। समीहसे इति पाठे त्वमितिवत् समीहते इति पाठेऽपि भवतीति कर्त्तृपदान्वयादुपपत्तिः।

"देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः।

আর্য্যপুত্র! (এই অর্দ্ধোক্তির পর) অথবা এই ব্যবহার এখন সংশয়াপন্ন হইয়াছে। পৌরব! পূর্ব্বে আশ্রমে আপনার অত্যন্ত সদ্ব্যবহারে উচ্চ আশাপূর্ণহৃদয় এই ব্যক্তিকে সেইরূপ শপথপূর্ব্বক আশ্বস্ত করিয়া, এখন এইরূপ বাক্যে প্রত্যাখ্যান করা আপনার উচিতই হইতেছে।

(ঝ) রাজা। (কর্ণদ্বয় আবৃত করিয়া) থাম থাম।

---

(१) शान्तं पापम्। (२) किमीहसे जनमिमञ्च। प्रसन्नमम्भः।

শকু। ভোদু, জই পরমত্থদো পরপরিগ্গহসঙ্কিণা তুএ এব্বং পউত্তং, তা অহিণ্ণাণেণ কেণ বি তুহ আসঙ্কং অবণইস্সং (১)। (ঞ)

রাজা। প্রথমঃ কল্পঃ (২)। (ট)

(ঞ) ভবতু, যদি পরমার্থতঃ পরপরিগ্রহশঙ্কিনা ত্বয়া এবং প্রবৃত্তম্, তদভিজ্ঞানেন কেনাপি তব আশঙ্কামপনেষ্যামি।

“সমানযংস্তুল্যগুণং বধূবরম্” ইত্যত্রেবানাপি ব্যপদেশমিত্যস্য উদ্দেশ্যতয়া আবিলয়িতুমিতি ক্রিয়ায়া এব কর্ম্মত্বোপপত্তিঃ। যুক্তিস্তু তত্রৈবোক্তা। সিন্ধোরচেতনত্বেন সমীহায়া অসম্ভবাৎ তদন্বয়পক্ষে সমীহসে ইত্যত্র ব্যাপারে লক্ষণা রথো গচ্ছতীত্যাদিবৎ। কূলং কষতীতি কূলঙ্কষা “সর্ব্বকূলাভ্রকরীষেষু কষঃ” ইতি খপ্রত্যয়ঃ। আর্য্যা জাতিঃ ॥২২॥

(ঞ) শকু ইতি। ভবতু মদ্বাক্যনিবৃত্তিরিতি শেষঃ। পরমার্থতো যথার্থতঃ, ন তু ছলত ইত্যাশয়ঃ, পরপরিগ্রহশঙ্কিনা পরস্ত্রীসংশয়িনা। প্রবৃত্তমুপক্রান্তম্, তত্ তদা, অভিজ্ঞায়তে অনেনেতি অভিজ্ঞানং চিহ্নং তেন। আশঙ্কাং মৎপরিণয়সন্দেহম্, অপনেষ্যামি দূরীকরিষ্যামি।

“পরিগ্রহঃ কলত্রে চ মূলস্বীকারয়োরপি” ইতি মেদিনী।

তীরভঙ্গকারিণী নদী যেমন নির্ম্মল জলপ্রবাহকে পঙ্কিল করিতে এবং তীরস্থিত বৃক্ষকে নিপাতিত করিতে চেষ্টা করে, তুমিও সেইরূপ আমার বংশকে কলঙ্কিত করিতে এবং আমাকে পতিত করিতে চেষ্টা করিতেছ ॥২২॥

(ঞ) শকুন্তলা। হউক, যদি আপনি বস্তুতই পরস্ত্রী সংশয় করিয়া এইরূপ আরম্ভ করিয়া থাকেন, তবে কোন চিহ্নদ্বারা আপনার সংশয় দূর করিব।

(১) অহিণ্ণাণেণ তুহ আসঙ্কং। (২) উদারঃ কল্পঃ।

शकु । मुद्रास्थानं परामृश्य । हद्धी हद्धी ! अङ्गुलीअअसुण्णा मे अङ्गुली । इति सविषादं गौतमीमुखमीक्षते । (ठ)

गौतमी । णूणं दे सक्कावदारे सचीतीत्थोदअं वन्दमाणाए पब्भट्टं अङ्गुलीअअं (१) । (ड)

(ठ) हा धिक् हा धिक् । अङ्गुरीयकशून्या मे अङ्गुली ।

(ड) नूनं शक्रावतारे शचीतीर्थोदकं वन्दमानायाः प्रभ्रष्टमङ्गुरीयकम् ।

(ट) राजेति । प्रथमः कल्पः अभिज्ञानप्रदर्शनं ममाशङ्कापनयने मुख्यो हेतुरित्यर्थः ।

(ठ) शकु इति । मुद्रास्थानं अङ्गुरीयकधारणस्थानम्, परामृश्य परामर्शेन ज्ञात्वा । गौतमीमुखदर्शनं ततोऽङ्गुरीयकापगमकारणज्ञानार्थम् ।

(ड) गौतमीति । शक्रः अवतरत्यस्मिन्निति शक्रावतारः तदाख्यो गङ्गातीरवर्त्ती कश्चिद्ग्रामः तत्र, शचीतीर्थस्य शचीनिर्म्मितघट्टस्य उदकं गङ्गाजलं वन्दमानाया अवगाहनानन्तरमष्टाङ्गं प्रणमन्त्याः, ते तव अङ्गुरीयकं प्रभ्रष्टम् अङ्गुलीतो विच्युतम्, इति नूनं निश्चितम् । तथा च राज्ञः स्थूलाङ्गुलीपरिमाणेन निर्म्मितस्य अङ्गुरीयकस्य शकुन्तलायाः कृशाङ्गुल्यां स्वभावत एव शिथिलत्वात् अष्टाङ्गं प्रणम्य हठादुत्थानवेलाया-मधोमुखसरलाङ्गुलीकहस्ते सञ्चालनोपस्थितेश्च तत्पतनं सम्भवपरमेव ।

(ট) রাজা। উত্তম কল্প।

(ঠ) শকুন্তলা। ( অঙ্গুরীয়ক ধারণের স্থানে হস্তামর্শন করিয়া ) হায় হায় ! আমার অঙ্গুলী যে অঙ্গুরীশূন্য। ( এই বলিয়া বিষাদের সহিত গৌতমীর মুখের প্রতি চাহিল। )

(ড) গৌতমী। নিশ্চয়ই শক্রাবতারগ্রামে শচীতীর্থের জলকে নমস্কার করিবার সময়ে তোমার অঙ্গুরী পড়িয়া গিয়াছে।

(१) शक्कावआरब्भन्तरे सचीतित्थसलिलं ।

राजा। सस्मितम्। इदं तावत् प्रत्युत्पन्नमतित्वं स्त्रीणाम् (१)। (ढ)

शकु। एत्थ दाव विहिणा दंसिदं पहुत्तणं। अवरं दे कधइस्सं (२)। (ण)

राजा। श्रोतव्यमिदानीं संवृत्तम् (३)। (त)

शकु। णं एक्कदिअहे वेदसलदामण्डवे णलिणीवत्त-भाअणगदं उदअं तुह हत्थे सण्णिहिदं आसी (४)। (थ)

(ण) अत्र तावत् विधिना दर्शितं प्रभुत्वम्। अपरं ते कथयिष्यामि।

---

(ढ) राजेति। हठादेव युक्तियुक्तोत्तरप्रयोजकबुद्धिदर्शनेन आश्चर्यवशात् सस्मितमिति बोध्यम्। इदम् अङ्गुरीयकपतनविषयकोत्तरप्रयोजकम्, प्रतिविषयमुत्पन्ना प्रत्युत्पन्ना मतिर्यासां तासां भावः प्रत्युत्पन्नमतित्वम्। प्रत्युत्पन्नमतिप्रयुक्तमेवेदमुत्तरं न तु वास्तवमिति भावः।

(ण) शकु इति। अत्र साक्षादभिज्ञानदर्शने, विधिना प्रतिकूलदैवेन, प्रभुत्वम् अभिज्ञानहरणात्मिका क्षमता। अपरमभिज्ञानम्।

(त) राजेति। आदावभिज्ञानं द्रष्टव्यमासीत्, इदानीमभिज्ञानं श्रोतव्यं संवृत्तम्, कथयिष्यामीत्यनेन वाक्यात्मकस्यैवाभिज्ञानस्य प्रकाशादिति भावः। द्रष्टव्यात् श्रोतव्यस्य दुर्बलतया सोल्लुण्ठनोक्तिरियम्।

---

(ঢ) রাজা। (ঈষৎ হাস্যের সহিত) ইহা স্ত্রীলোকদিগের প্রত্যুৎপন্নমতিত্ব।

(ণ) শকুন্তলা। এ বিষয়ে বিধাতা প্রভুত্ব দেখাইলেন। অন্য কোন বিষয় আপনাকে বলিব।

---

(१) इदं तत् प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते। (२)···कहिस्सं।

(३) श्रोतव्यमिदानीम्।

(४) शकुन्तला। णं एक्कस्सिं दिअसे णोमालिआमण्डवे।

राजा। शृणुमस्तावत्। (द)

शकु। तक्खणं सो मे पुत्तकिदओ दीहापङ्गो णाम मिअपोदओ उवट्ठिदो। तदो तुए अअं दाव पढमं पिअदु त्ति अणुकम्पिणा उवच्छन्दिदो उदएण। ण उण सो अपरिचिदस्स दे हत्थादो उदअं उवगतो पादुं। पच्चा तस्सिं ज्जेव उदए मए गहिदे किदो तेण पणओ। एत्थन्तरे विहसिअ तुए भणिदं, सव्वो सगन्धे वीससदि, जदो दुवे वि तुम्हे आरण्णआओ त्ति (१)। (ध)

(थ) ननु एकदिवसे वेतसलतामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत्।

(ध) तत्क्षणं स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः। ततस्त्वया अयं तावत् प्रथमं पिबत्विति अनुकम्पिना उपच्छन्दित उदकेन। न पुनः सः अपरिचितस्य ते हस्तादुदकमुपगतः पातुम्। ततस्तस्मिन्नेवोदके मया गृहीते कृतस्तेनाप्रणयः। अत्रान्तरे विहस्य त्वया भणितम्, सर्वः स्वगणे विश्वसिति, यतो द्वे एव युवामारण्यके इति।

(थ) शकु इति। नलिनीपत्रं पद्मलतापत्रमेव भाजनं तत्र गतं स्थितम्। सन्निहितं सम्यक् स्थापितम्।

(द) राजेति। तावत् सर्वमेव तव वाक्यं शृणुमः, न पुनरन्यत् किञ्चित् भावयाम इत्यर्थः। अतो विवक्षितं सर्वमेव ब्रूहीत्याशयः।

(त) রাজা। এখন শ্রোতব্য হইয়া দাঁড়াইল।

(থ) শকুন্তলা। একদিন বেত্রলতামণ্ডপে আপনার হাতে পদ্ম-পাতার পাত্রে জল ছিল।

(দ) রাজা। সমস্তই শুনিতেছি।

(१) ण उण्णादे अपरिचआदो हत्थब्भासं उवणओ। पच्छा तस्सिं एव्व मए गहिए सलिले णेण किदो पणओ। तदा तुमं इत्थं पहसिओ सि, सव्वो सगन्धेसु।

राजा। आभिस्तावदात्मकार्य्यप्रवर्त्तिनीभिर्मधुराभिरनृतवाग्भिराकृष्यन्ते विषयिणः (१)। (न)

(ध) अत्र इति। पुत्रकृतकः कृत्रिमपुत्रभूतः, दीर्घौ अपाङ्गौ नेत्रप्रान्तौ यस्य सः मृगपोतको हरिणशिशुः। अनुकम्पिना दयाशालिना त्वया। अयं मृगपोतकः। उदकेन तेन जलेन, उपच्छन्दितः पानाय अभ्यर्थितः। उदकं पातुं न उपगत इत्यन्वयः। तेन मृगपोतकेन। प्रणयः पानाय प्रार्थना। स्वगणे आत्मीयवर्गे। युवां त्वञ्च मृगपोतकश्चेत्यर्थः, आरण्यकौ वनवासिनौ; उभयोरेवैकारण्यवासात् त्वमस्यात्मीयेति भावः। इति भणितमित्यन्वयः।

अत्र अतीतकार्य्याणां संगृहीतत्वादादानं नाम विमर्शसन्ध्यङ्गम्—"कार्य्यसंग्रह आदानम्" इति दर्पणलक्षणात्। उत्कीर्त्तनं नाम नाट्यालङ्कारश्च। तथा तत्रैव—

"भूतकार्य्याख्यानमुत्कीर्त्तनं मतम्।"

"प्रणयः प्रेम्णि विस्रम्भे याच्ञाप्रसरयोरपि।" इति मेदिनी।

(न) राजेति। आत्मकार्य्ये प्रवर्त्तयितुं पुरुषान् व्यापारयितुं शीलं यासां ताभिः, मधुराभिः प्रीतिकरीभिः, आभिः ईदृशीभिरित्यर्थः, अनृतवाग्भिर्मिथ्यावाक्यैः, विषयिण इन्द्रियार्थासक्ताः पुरुषाः, आकृष्यन्ते आकृष्य स्ववशं नीयन्ते; अत ईदृश्यो वाच एव पुरुषाणां सर्व्वानर्थमूलानि इति भावः।

---

(ধ) শকুন্তলা। সেই সময়ে আমার কৃত্রিমপুত্র দীর্ঘাপাঙ্গনামে সেই হরিণশিশুটী উপস্থিত হইল; তাহার পর "এ প্রথম্ পান করুক" এই কথা বলিয়া আপনি দয়াবশতঃ জলপান করিবার জন্ত তাহার অভ্যর্থনা করিলেন; কিন্তু অপরিচিত বলিয়া আপনার হাত হইতে সে জল পান করিতে গেল না। তার পর, সেই জলই আমি গ্রহণ করিলে, সে তাহা পান করিবার জন্য প্রার্থনা করিল। এই সময়ে আপনি হাস্য করিয়া বলিলেন—"সকলেই আত্মীয়বর্গে বিশ্বাস করিয়া থাকে; যে হেতু, তোমরা দুইজনই বনচর।"

---

(१) एवमादिभिरात्मकार्य्यनिर्वर्त्तिनीनामनृतमयवाङ्मधुभिराकृष्यन्ते विषयिणः।

गौतमी । महाभाअ ! णारिहसि एव्वं मन्तिदुं । तवोवणसंवड्ढिदो क्खु अअं जणो अणभिण्णो कइदवस्स । (प)

राजा । अयि तापसवृद्धे ! (फ)

स्त्रीणामशिक्षितपटुत्वममानुषीणां
संदृश्यते, किमुत याः परिबोधवत्यः ।
प्रागन्तरीक्षगमनात् स्वमपत्यजात-
मन्यद्विजैः परभृताः किल पोषयन्ति (१) ॥२३॥

(प) महाभाग ! नार्हसि एवं मन्त्रयितुम । तपोवनसंवर्द्धितः खल्वयं जनः अनभिज्ञः कैतवस्य ।

(प) गौतमीति । एवं मन्त्रयितुम् इत्थं वक्तुम् । तत्र कारणमाह—अयं जनः शकुन्तला खलु, तपोवने कैतवादिशून्ये आश्रमे संवर्द्धितः अतएव कैतवस्य कपट-व्यवहारस्य अनभिज्ञः । अतएवास्य पूर्वोक्तिजातं न मिथ्येत्याशयः ।

(फ) राजेति । तापसी चासौ वृद्धा चेति तापसवृद्धा तत्सम्बोधनम् ।

स्त्रीणामिति । अमानुषीणां मानुषीभिन्नानामपि, स्त्रीणां स्त्रीजातेः, अशिक्षितपटुत्वम् अनुपदिष्टनैपुण्यं स्वाभाविकचातुर्य्यमित्यर्थः, संदृश्यते याः परिबोधवत्यः सर्वतो-

(ন) রাজা। স্ত্রীলোকেরা নিজের কার্য্যে প্রবৃত্ত করাইবার উপযোগী এই জাতীয় মিথ্যা মধুর বাক্যে বিষয়ী লোককে আকর্ষণ করিয়া থাকে।

(প) গৌতমী। মহাশয়! আপনি এরূপ বলিতে পারেন না। কারণ, এই ব্যক্তি তপোবনে বর্দ্ধিত হইয়াছে; সুতরাং কপটতা জানে না।

(ফ) রাজা। ওহে বৃদ্ধতাপসি!

(১) অমানুষীষু প্রতিবোধবত্যঃ অন্যৈর্দ্বিজৈঃ খলু।

शकु। सरोषम्। अणज्ज! अत्तणो हिअआणुमाणेण किल सव्वं पेक्खसि। को णाम अण्णो धम्मकञ्चुअव्ववदेसिणो तिणच्छण्णकूवोवमस्स तुह अणुआरी भविस्सदि (१)। (ब)

(ब) अनार्य्य! आत्मनो हृदयानुमानेन किल सर्वं प्रेक्षसे। को नाम अन्यो धर्मकञ्चुकव्यपदेशिनस्तृणच्छन्नकूपोपमस्य तव अनुकारी भविष्यति।

भावेन ज्ञानशालिन्यः मानुष्य इत्यर्थः, अशिक्षितपटुत्वे ताः किमुत वक्तव्या इति तात्पर्य्यम्। तथाहि परैः काकैः भृता बाल्यकाले पोषिता इति परभृताः कोकिला अन्तरीक्षगमनात् अपत्यजातस्यैव आकाशगमनशक्त्याविर्भावात्, प्राक् पूर्वम्, स्वं स्वकीयम्, अपत्यजातं सन्तानसमूहम्, अन्यद्विजैरपरपक्षिभिः, पोषयन्ति वृद्धिं नयन्ति। किलेति लोकवार्त्तायाम्। तेन पक्षिणीरूपायाः कोकिलाया ईदृशचातुर्य्यदर्शनात् मानुषीरूपायाः शकुन्तलायास्तपोवनवर्द्धितत्वेऽपि सङ्कृतानृतवादित्वरूपं पटुत्वं भविष्यतीत्यर्थे कः सन्देह इति भावः।

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः पूर्वार्द्धे अर्थापत्तिश्च, अनयोर्गुण-प्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। तथा काकैरेव कोकिलशावकपोषणदर्शनात् अन्यैश्चादर्शनात् काकैरिति पक्षिविशेषे वक्तव्ये अन्यद्विजैरिति पक्षिसामान्याभिधानात् विशेषे अविशेषाख्यदोषः, 'काकैः पिकाः किल रहः परिपोषयन्ति' इति पाठेनासौ परिहरणीयः।

"दन्तविप्राण्डजा द्विजाः" "वनप्रियः परभृतः कोकिलः पिक इत्यपि" इति चामरः।

वसन्ततिलका वृत्तम् ॥२२॥

পশু-পক্ষিপ্রভৃতি মনুষ্যভিন্ন স্ত্রীজাতিরও স্বাভাবিক চাতুর্য্য দেখা যায়; সুতরাং সকল বিষয়ে বুদ্ধিশালিনী মনুষ্যজাতীয় স্ত্রীর কথা আর কি বলিব। কোকিলপক্ষিণীগণ, উড়িবার শক্তি জন্মিবার পূর্ব্বে আপনাদের সন্তানগুলিকে, অন্য পক্ষীদ্বারা পরিপোষণ করিয়া থাকে ॥২৩॥

(१) धम्मकञ्चुअप्पवेसिणो अणुकिदं पडिवज्जिस्सदि।

राजा। (आत्मगतम्।) वनवासादविभ्रमः पुनरत्रभवत्याः कोपो लक्ष्यते। तथाहि—(१) (भ)

(ब) शकु इति। अनार्य्ये! अभद्र! हे निकृष्ट! इति यावत्, हृदयानुमानेन आत्मनो हृदयं यथा कपटतापूर्णम् अन्येषां हृदयमपि तथैव इत्यनुमानेनेत्यर्थः, सर्वं जनम्, प्रेक्षसे कपटतापूर्णहृदयं मन्यसे। अतएव स्त्रीणामित्यादिना, शुद्धहृदयां मामपि कैतविनीमुक्तवानिति भावः। अन्यो जनः, धर्म्म एव कञ्चुको बहिरङ्गावरणं यस्य स चासौ व्यपदेशः अन्तश्छलमस्यास्तीति व्यपदेशी चेति तस्य बहिर्धर्म्मावरणेनावृतस्य अन्तस्तु परप्रतारणादिपापशालिन इत्यर्थः, अतएव तृणैश्छन्न आवृतमुखो यः कूपः स एवोपमा यस्य तस्य तव, अनुकारी सदृशकार्य्यविधायी भविष्यति अपि तु कोऽपि नेत्यर्थः। "यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति न्यायात् सर्व एव राज्ञोऽनुकरणं कुर्वन्ति, तव तु परप्रतारकत्वान्न कोऽप्यनुकरणं करिष्यतीति भावः।

अत्र क्रोधावेगेन महागुरोः पत्युर्मर्य्यादालङ्घनात् द्रवो नाम विमर्शसन्ध्यङ्गम्—"द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा" इति दर्पणलक्षणात्।

(भ) राजेति। पुनः किन्तु अत्रभवत्याः शकुन्तलायाः, कोपः वनवासात् आबाल्याद्वनवासेन अविदितनागररमणीस्वभावादित्यर्थः, अविभ्रमः कुटिलदृष्टिपातादिविलासविहीनः। अतएव नागररमणीस्वभावमात्रवेदिना मया अपूर्व एवायं कोपो दृश्यत इति भावः। तदविभ्रमत्वं दर्शयितुमाह तथाहीति।

(ব) শকুন্তলা। (ক্রোধের সহিত) অভদ্র! তুমি আপনার চিত্তের অনুমানে সকল লোককে দেখ। তোমার বাহিরে ধর্ম্মের আবরণ, আর হৃদয় কপটতাপূর্ণ; সুতরাং তুমি তৃণাচ্ছাদিত কূপের তুল্য; অতএব অন্য কোন্ ব্যক্তি তোমার অনুকরণ করিবে?।

(ভ) রাজা। (স্বগত) বনবাসবশতঃ ইহার কিন্তু কোপে কোন বিলাসের চিহ্ন দেখা যাইতেছে না। যথা—

---

(१) सन्दिग्धबुद्धिं मां कुर्वन् अकैतव इवास्याः कोपो लक्ष्यते। तथाह्यनया।

न तिर्य्यगवलोकितं भवति चक्षुरालोहितं
वचोऽतिपरुषाक्षरं न च पदेषु सङ्गच्छते ।
हिमार्त्त इव वेपते सकल एव बिम्बाधरः
प्रकामविनते भ्रुवौ युगपदेव भेदं गते (१) ॥२४॥

नेति । अवभवत्या इति गद्यस्थं पदमत्रापि सम्बन्धनीयम् । तेन अवभवत्याः शकुन्तलायाः, अवलोकितं दृष्टिः, न तिर्य्यक् न तिर्य्यक्प्रसृतं भवति ; नागररमण्याः कोपे तु तद्दृष्टिः तिर्य्यक्प्रसृतैव स्यादिति भावः, चक्षुः, आलोहितं सम्पूर्णरक्तवर्णं भवति ; नागररमण्यास्तु न तथेत्याशयः ; वचः अनार्य्य इत्यादि वाक्यम्, अतिपरुषाणि नितान्तनिष्ठुराणि अक्षराणि वर्णा यस्य तत् तादृशम् ; च किन्तु, पदेषु लक्ष्येषु अर्थासु, न सङ्गच्छते मिथ्यात्वान्न युज्यते, नागररमणीमुखात्तु ईदृशं परुषाक्षरं वच एव न निर्गच्छति, सत्यत्वाल्लक्ष्येषु च सङ्गच्छत इत्यभिप्रायः । हिमार्त्त इव तुषारेण पीडित इव सन्, सकल एव सम्पूर्णावयव एव न पुनर्नागररमणीवत् ओष्ठोपरिभागमात्रमिति एवशब्दस्यार्थो भावार्थश्च, बिम्बाधरः बिम्बफलवत् रक्तवर्णोष्ठः, वेपते कम्पते । तथा प्रकामविनते पर्य्याप्तावनते, भ्रुवौ भ्रूयुगलम्, युगपदेव एकदैव, भेदं भङ्गं वक्रतामिति यावत्, गते प्राप्ते ; नागररमण्याः कोपे तु तदीयभ्रूयुगलं क्रमिकमेव भेदं गच्छति, न तु युगपदिति भावः ।

अत्र कोपस्य अविभ्रमत्वप्रतिपादनकार्य्यं प्रति अतिर्य्यगवलोकनादिबहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः, हिमार्त्त इवेति क्रियोत्प्रेक्षा बिम्बाधर इति च लुप्तोपमा, इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः ; तेन च नागररमणीकोपसम्बन्धी व्यतिरेको व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ।

"पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः ।

पृथ्वी वृत्तम्—"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति लक्षणात् ॥२४॥

চক্ষু আরক্তবর্ণ হইয়াছে, কিন্তু পার্শ্বের দিক্ দৃষ্টি চলিতেছে না ;

(१) क्वचिदेष श्लोको नास्ति ।

अपि च सन्दिग्धबुद्धिं मामधिकृत्य अकैतव इवास्याः कोपः सम्भाव्यते। तथाह्यनया—(म)

मय्येवमस्मरणदारुणचित्तवृत्तौ
वृत्तं रहःप्रणयमप्रतिपद्यमाने।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य (१) ॥२५॥

(म) अपि चेति। सन्दिग्धा परिणये संशयापन्ना बुद्धिर्यस्य तम्। अधिकृत्य विषयीकृत्य विद्यमानायाः इत्यध्याहारान्निकर्तृकत्वहानिः, अस्याः शकुन्तलायाः, कोपः, अकैतव इव छलरहित इव। अनया शकुन्तलया स्त्रीकस्थाया भग्नमिति क्रियायाः कर्त्तृपदमेतत्।

मय्येवमिति। एवम् अनेन प्रकारेण, अस्मरणेन भूतपूर्ववृत्तान्तानामस्मृत्या दारुणा चित्तवृत्तिर्यस्य तस्मिन् तथोक्ते मयि, रहो निर्जनस्थाने, वृत्तं सञ्जातम्, प्रणयं प्रणय-घटितपरिणयादिकम्, अप्रतिपद्यमाने अस्वीकुर्वति सति, अतिरुषा नितान्तक्रोधेन, अतिलोहिते अत्यन्तरक्तवर्णे अक्षिणी नेत्रद्वयं यस्यास्तया, अनया शकुन्तलया, कुटिलयो-र्वक्रयोः, भ्रुवोः, भेदात् द्वैधीकरणात् स्मरस्य मामुद्दिश्य प्रहर्त्तुः कामदेवस्य, शरासनं धनुः, भग्नमिव, यथा पुनः प्रहारसम्भावना न स्यादिति भावः।

अत्र मानाभिमानिनी वाच्या क्रियोत्प्रेक्षालङ्कारः।

रह इत्यव्ययम् "रहस्योपांशु चालिङ्गे" इत्यमरकोषात्। वसन्ततिलका वृत्तम् ॥२५॥

বাক্যের অক্ষরগুলি অতিনিষ্ঠুর, তাহা কিন্তু আমার উপরে সঙ্গত হইতেছে না; সম্পূর্ণ অধরবিম্বই হিমপীড়িত হইয়াই যেন কাঁপিতেছে এবং অত্যন্ত অবনত ভ্রূযুগল, এক সময়েই বক্রতা প্রাপ্ত হইয়াছে ॥২৪॥

(ম) আরও, আমার বুদ্ধি সংশয়াপন্ন হওয়ায় আমাকে লক্ষ্য করিয়া ইহার ক্রোধ যেন কপটতাবিহীন বলিয়া মনে করিতেছি। যথা:—

(१) मय्येव विस्मरणदारुणचित्तवृत्तौ।

প্রকাশম্। ভদ্রে! প্রথিতং দুষ্মন্তস্য চরিতম্, প্রজাস্বপীদং ন দৃশ্যতে (১)। (য)

শকু।

তুম্মে জ্জেব পমাণং জাণধ ধম্মত্থিদিং অ লোঅস্স।
লজ্জাবিণিজ্জিদাও জাণন্তি ণ কিম্পি মহিলাও (২) ॥২৬॥

যূয়মেব প্রমাণং জানীথ ধর্ম্মস্থিতিঞ্চ লোকস্য।
লজ্জাবিনির্জ্জিতা জানন্তি ন কিমপি মহিলাঃ ॥২৬॥

(য) প্রকাশমিতি। প্রথিতং সর্ব্বতয়া প্রসিদ্ধম্; অতো লোকনিয়ন্ত্রা রাজ্ঞা দুষ্মন্তেন পরস্ত্রী সংগ্রহীতুং ন শক্যত ইত্যাশয়ঃ। কিঞ্চ, ইদং পরস্ত্রীগ্রহণম্, প্রজাস্বপি ন দৃশ্যতে; অতস্তৎপ্রজানিয়ন্তুঃ রাজ্ঞো মম ইদং কুনীতিঃপি ন সম্ভবতীতি ভাবঃ।

যূয়মিতি। যূয়ং লোকনিয়ন্তারো রাজান এব, প্রমাণং পুণ্যপাপজ্ঞাপকং শাস্ত্রম্, লোকস্য ধর্ম্মস্থিতিং ধর্ম্মমর্য্যাদাঞ্চ জানীথ। কিন্তু লজ্জয়া বিনির্জ্জিতাঃ পরাভূতাঃ, মহিলাঃ স্ত্রিয়ঃ, কিমপি ন জানন্তি জানন্ত্যোঽপি লজ্জাভিভবাদেব কিমপি বক্তুং ন শক্নুবন্তীত্যর্থঃ। তথা চ অহমপি প্রমাণং ধর্ম্মস্থিতিঞ্চ জানামি, এবঞ্চ যথা

স্মরণ না হওয়ায় আমার মনোবৃত্তি, উহার পক্ষে দারুণ হইয়া দাঁড়াইয়াছে এবং নির্জনে যে প্রণয় জন্মিয়াছিল, তাহা আমি স্বীকার করিতেছি না; সুতরাং আমার প্রতি ক্রোধবশতঃ আরক্তনয়না এই রমণী, বক্র ভ্রূযুগলের দৈর্ঘ্যবশতঃ, কামদেবের ধনু যেন ভাঙ্গিয়া ফেলিয়াছে ॥২৫॥

(য) (প্রকাশ্যে) ভদ্রে! দুষ্মন্তের চরিত্র, লোকে প্রসিদ্ধই আছে; কিন্তু এ কার্য্য, প্রজাদের মধ্যেও দেখা যায় না।

(১) পুরোহিতঃ। ভদ্রে! অবিতম্, তথাপীদং ন লক্ষয়ে।

(২) ক্বচিৎ পদ্যমিদং নাস্তি।

सुट्ठु दाव अत्तच्छन्दाणुचारिणी गणिआ समुवट्ठिदा (१)। (र)

गौतमी। जादे! इमस्स पुरुवंसपच्चएण मुहमहुणो हिअअविसस्स हत्थं समुवगदासि (२)। (ल)

शकु। पटान्तेन मुखमाच्छाद्य रोदिति (३)। (व)

(र) सुष्ठु तावदात्मच्छन्दानुचारिणी गणिका समुपस्थिता।

(ल) जाते! अस्य पुरुवंशप्रत्ययेन मुखमधोः हृदयविषस्य हस्तं समुपगतासि।

परस्त्रीग्रहणं गुरुतरं पापम्, तथा आत्मस्त्रीपरित्यागोऽपीति जानन्नपि लज्जावशादेव तदक्तुं न शक्नोमीति भावः।

अत्र जानन्तीत्येकया क्रियया प्रमाणधर्मस्थैर्य्यो: कर्मतयाभिसम्बन्धात् तुल्ययोगिता, अप्रस्तुतात् महिलासामान्यात् प्रस्तुतस्य शकुन्तलारूपमहिलाविशेषस्य प्रतीतेरप्रस्तुतप्रशंसा च, अनयोः परस्परनिरपेक्षतया संसृष्टिः।

आर्य्या जातिः ॥२६॥

(र) सुष्ठु इति। सुष्ठु भद्रं तव मननमित्यर्थः। आत्मनश्छन्देन अभिप्रायेण अनुचरतीति सा स्वेच्छाचारिणीति तात्पर्य्यम्, गणिका वेश्या। अहमिति शेषः। साक्षोपोक्तिरियम्। तेन च "उपकृतं बहु तत्र किमुच्यते" इत्यादिदर्पणोदाहरणवत् विपरीतलक्षणया नियतगुरुजनमतानुचारिणी परमपतिव्रतैवाहं तथापि तदन्यथा मननात् त्वमतीव निर्बोधः प्रतारको वेति भावः।

শকুন্তলা। আপনারাই শাস্ত্র এবং লোকের ধর্ম্মের মর্য্যাদা জানেন; কিন্তু লজ্জাভিভূত স্ত্রীলোকেরা কিছুই জানে না ॥২৬॥

(র) ভাল, স্বেচ্ছাচারিণী বেশ্যা উপস্থিত হইয়াছে!।

(१) शकुन्तला। सुट्ठु दाव अत्तच्छन्दचारिणी किद म्हि, जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअअट्ठिअविसस्स हत्थभासं उवगदा। पटान्तेन मुखमावृत्य रोदिति। (२—३) क्वचिदिमौ पाठौ न स्तः।

শার্ঙ্গ। ইত্থমপ্রতিহতং চাপল্যং দহতি (১)। (শ)
অতঃ পরীক্ষ্য কর্ত্তব্যং বিশেষাৎ সঙ্গতং রহঃ।
অজ্ঞাতহৃদয়েষ্বেবং বৈরীভবতি সৌহৃদম্ ॥২৩॥

(ল) গৌতমীতি। পুরুবংশপ্রত্যয়েন পুরুবংশোৎপন্নত্ববিশ্বাসেন, মুখে মধু মধুবৎ মধুরং বচনং যস্য তস্য, হৃদয়ে বিষং বিষবৎ পরঘাতিকরো ভাবো যস্য তস্য মহাপ্রতারকস্যেত্যর্থঃ, অস্য দুষ্মন্তস্য, হস্তং সমুপগতাসি পরিণয়াদধীনতা প্রাপ্তাসি। সানুতাপোক্তিরিয়ম্।

(ব) শকু ইতি। পটান্তেন বস্ত্রাঞ্চলেন।

(শ) শার্ঙ্গেতি। ইত্থমীদৃশম্, ন প্রতিহতং গুরুজনভয়াদিনা ন ব্যাহতমিতি অপ্রতিহতম্, চাপল্যং চঞ্চলতা চাপল্যপ্রযুক্তম্ এবমজ্ঞাতকুলশীলেষু কন্যায়া আত্মদানমিত্যর্থঃ, দহতি আত্মীয়জনমনুতপ্তং করোতি।

অত ইতি। অতঃ কারণাৎ উক্তচাপল্যস্য দাহকত্বাদিত্যর্থঃ, বিশেষাৎ কুলশীলাদিবিশেষবিশেষভাবমাশ্রিত্য, পরীক্ষ্য সাধুতয়া অবধার্য্য, রহো নির্জনস্থানে, সঙ্গতং পুরুষেণ সহ গান্ধর্ববিধিনা সম্মিলনম্, কর্ত্তব্যং কন্যয়েতি শেষঃ। কুত ইত্যাহ ন জ্ঞাতং সদসত্তয়া নাবগতং হৃদয়ং মনো যেষাং তেষু তাদৃশেষু পুরুষেষু, সৌহৃদং প্রণয়ঃ, এবম্ এতদ্বৃত্তান্ত ইব, বৈরীভবতি বৈরস্বরূপং জায়তে।

(ল) গৌতমী। বৎসে! ইঁহার মুখে মধু, আর হৃদয়ে বিষ; তুমি কিন্তু পুরুবংশীয় বিশ্বাসে ইঁহার হস্তগত হইয়াছ।

(ব) শকুন্তলা। (বস্ত্রাঞ্চলদ্বারা মুখ আবৃত করিয়া রোদন করিতে লাগিল।)

(শ) শার্ঙ্গরব। এইরূপ অনিবারিত চপলতা আত্মীয়জনকে দগ্ধ করে।

অতএব বিশেষরূপে পরীক্ষা করিয়া, নির্জন-সম্মিলন করা উচিত।

(১) শার্ঙ্গরবঃ। ইত্থমাত্মকৃতং পরিহৃতং চাপল্যং দহতি

राजा। अयि भोः! किमत्रभवतीप्रत्ययादेवास्मानसम्भृतदोषैरधिक्षिपन्ति भवन्तः (१)। (ष)

शार्ङ्ग°। (सासूयम्।) श्रुतं भवद्भिरधरोत्तरम्?। (स)

आजन्मनः शाठ्यमशिक्षितो यः
तस्याप्रमाणं वचनं जनस्य।
पराभिसन्धानमधीयते यैः
विद्येति ते सन्तु किलामवाचः ॥२८॥

अत्र पूर्वार्द्धार्थं प्रति परार्द्धगतवाक्यार्थस्य हेतुतया वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। अवैरं वैरं भवतीति वैरीभवति अभूततद्भावे च्विप्रत्ययः ॥२७॥

(ष) राजेति। अयीत्यनुनयसूचकमव्ययम्। अत्रभवत्या मान्यायाः शकुन्तलायाः, प्रत्ययादेव विश्वासादेव, न पुनः प्रमाणान्तरस्याप्यपेक्षणादित्येवशब्दार्थः, असम्भृतदोषैरकृतदोषैः, अस्मान् "वास्मदस्य" इति बहुवचनात् मामित्यर्थः, अधिक्षिपन्ति प्रतारकत्वेन निन्दन्ति। वस्तुतः अन्यदारा गर्भमुत्पाद्य मयि तदुत्पादकत्वारोपणादियं शकुन्तलैव प्रतारिकेति भावः।

(स) शार्ङ्गेति। भवद्भिः पुरोहितादिसभ्यगणैः अधरोत्तरं निकृष्टं प्रतिवचनम्, श्रुतं किमिति काकुः।

"अधरस्तु पुमानोष्ठे हीनेऽनूर्द्धे च वाच्यवत्" इति मेदिनी।

---

কারণ, অজ্ঞাতহৃদয় ব্যক্তির সহিত সৌহার্দ্দ করিলে, তাহা এইরূপ শত্রুতাতেই পরিণত হয় ॥২৭॥

(ষ) রাজা। মহাশয়! আমি কোন দোষ করি নাই, তথাপি আপনারা ইঁহার বিশ্বাসেই আমাকে নিন্দা করিতেছেন কেন?।

(স) শার্ঙ্গরব। (অসূয়ার সহিত) আপনারা নিকৃষ্ট উত্তর শুনিলেন?।

---

(१) अस्मान् संयुतदोषाक्षरैः क्षिपथ।

राजा। अहो सत्यवादिनः! अभ्युपगतं तावदस्माभिः एवंविधा एव वयम्, किं पुनरिमामभिसन्धाय लभ्यते (१)। (छ)

अधरोत्तरत्वं प्रतिपादयितुमाह आजन्मन इति। यो जनः, आजन्मनो जन्मावधि, शाठ्यं शठतां परप्रतारणामिति यावत्, अशिक्षितः केनापि नाध्यापितः, तस्य जनस्य शकुन्तलाया इत्यर्थः, वचनं वाक्यम्, अप्रमाणं प्रमाज्ञानजनकं न निश्चयकारणं नेत्यर्थः। किन्तु यैर्जनैः, विद्या इति कृत्वा विद्यात्वेन विभाव्येति तात्पर्य्यम्, परेषां जनानाम्, अभिसन्धानं प्रतारणा, अधीयते शिक्ष्यते, ते जनाः, किल आप्ताः प्रत्ययिता विश्वासयोग्या वाचो वाक्यानि येषां ते तादृशाः सन्तु भवन्तु। सोल्लुण्ठनोक्तिरियम्। तथा च आजन्मवनवासिन्यै शकुन्तलायै प्रतारणाशिक्षा केनापि न दत्ता; अतएव तस्या वचनमेव प्रमाणम्। किन्तु भवन्तो विद्यारूपेण प्रतारणां शिक्षन्ते, तेन च भवतां वचनं कुतोऽपि न प्रमाणम्। अतएव शकुन्तलैव सत्यं वदति न पुनर्भवानिति भावः।

अत्र तस्य जनस्य वचनमप्रमाणम्, अपि तु कथमपि न इति, तथा ते आप्तवाचः सन्तु, अपि तु कुतोऽपि न इति चार्थान्तरद्वयापतनादर्थापत्तिद्वयं तयोश्च मिथो निरपेक्षतया संसृष्टिः। तथा अशिक्षितं इत्यत्र प्रधानस्य नञर्थस्य समासे गुणीभावात् विधेयाविमर्श-दोषः, स च 'शाठ्यं न जन्मावधि शिक्षितो यः' इति पाठेन समाधेयः।

"वञ्चनञ्चाभिसन्धानं व्यलीकञ्च प्रतारणम्" इति हेमचन्द्रः। "आप्तः प्रत्ययितस्त्रिषु" इत्यमरः।

उपजातिर्वृत्तम् ॥२८॥

(छ) राजेति। अहो सत्यवादिन इत्यपि सोल्लुण्ठनं सम्बोधनमिति बोध्यम्। वयम्, एवंविधा एव भवदुक्तप्रकारा एव परप्रतारणापरायणा एवेत्यर्थः, इति तावदस्माभिः अभ्युपगतं स्वीकृतम्। पुनः किन्तु, इमां तपस्विनीं शकुन्तलाम्, अभिसन्धाय प्रतार्य्य,

---

যাহাকে জন্ম হইতেই কেহ শঠতা শিখায় নাই, সেই ব্যক্তির বাক্য হইল অপ্রমাণ, আর যাঁহারা বিদ্যা মনে করিয়া, পরপ্রতারণা শিখিয়াছেন, তাঁহারা হউন সত্যবাদী! ॥২৮॥

---

(१) भोः! सत्यवादिन्! अभ्युपागतं तावदस्माभिरेवं। किं पुनः।

शार्ङ्ग° । विनिपातः । (क्ष)

राजा । विनिपातः पौरवैर्लभ्यत इत्यश्रद्धेयमेतत् (१) । (क)

किं फलम्, लभ्यते, अपि तु किमपि नेत्यर्थः । तथा च ये परान् प्रतारयन्ति, ते किञ्चित् फलमुद्दिश्यैव प्रतारयन्ति ; एवञ्च निरीहायाः शकुन्तलायाः प्रतारणे कस्यापि फलस्य लाभासम्भवात् प्रतारणाया अप्यसम्भव एवेति भावः ।

(क्ष) शार्ङ्गेति । विनिपातो निपातः विध्वंस इति यावत्, इमामभिसन्धाय लभ्यत इत्यन्वयः । तथा च निरीहायाः शकुन्तलायाः प्रतारणात् तत्पापेनात्मनो निपात एव भविष्यतीति भावः ।

"विनिपातो निपाते स्यात् दैवादिव्यसने पुमान्" इति मेदिनी ।

पूर्ववाक्यमारभ्य एतदन्तसन्दर्भे अक्षमा नाम नाट्यालङ्कारः । यथा दर्पणे—

"अक्षमा सा परिभवः स्वल्पोऽपि नाभिसह्यते ।"

(क) राजेति । पौरवैः महापुण्येनैव पुरुवंशोत्पन्नैः विनिपातो लभ्यते इत्येतत् अश्रद्धेयम् अविश्वास्यम् । तथा च महापुण्येनैव पुरुवंशे जन्म लभ्यते । एवञ्च निरीहजनं प्रतारयतापि पुरुवंशजातेन जनेन विनिपातो न लभ्यत एव तत्-प्रतारणाजनितपापापेक्षया स्वोत्पत्तिप्रयोजकपुण्यस्यैव बलवत्त्वात् तस्यैव च विनिपात-निवर्त्तकत्वादित्याशयः ।

अत्र गुरुभूतस्य पूर्वपुरुषस्य पुरोः कीर्त्तनात् प्रसङ्गो नाम विमर्शसन्धेरङ्गम्—"प्रसङ्गो गुरुकीर्त्तनम्" इति दर्पणलक्षणात् ।

---

(হ) রাজা। ওহে সত্যবাদিগণ! আমি না হয় স্বীকার করিলাম যে, আমরা এইরূপই ( পরপ্রতারক ); কিন্তু এই অবলাকে প্রতারিত করিয়া কি ফল লাভ করা যাইতে পারে ?।

(ক্ষ) শার্ঙ্গরব। নিপাত।

(ক) রাজা। পুরুবংশীয়েরা নিপাত পাইবে একথা বিশ্বাস করা যায় না।

---

(१) राजा । विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत् ।

শার্ঙ্গ। ভো রাজন্! কিমত্রোত্তরৈঃ। অনুষ্ঠিতো গুরু-নিয়োগঃ, সম্প্রতি প্রতিনিবর্ত্তামহে বয়ম্ (১)। (খ)

তদেষা ভবতঃ পত্নী ত্যজ বৈনাং গৃহাণ বা।
উপপন্না হি দারেষু প্রভুতা সর্বতোমুখী (২) ॥২৮॥

গৌতমি! গচ্ছাগ্রতঃ। ইতি সর্বে প্রস্থিতাঃ (৩)। (গ)

(খ) শার্ঙ্গেতি। অত্র ভবদ্বচনবিষয়ে, উত্তরৈঃ অস্মাকং প্রতিবচনৈঃ, কিং ফলম্, অপি তু কিমপি নেত্যর্থঃ। অতস্তস্মাদ্বিরম্যত ইতি ভাবঃ। গুরোঃ কণ্বস্য নিয়োগ আদেশঃ, অনুষ্ঠিতঃ অস্মাভিঃ সম্পাদিতঃ। প্রতিনিবর্ত্তামহে আশ্রমং প্রতিগচ্ছামঃ।

তদিতি। এষা শকুন্তলা, ভবতঃ পত্নী, গান্ধর্বেণ বিবাহবিধিনা পরিণীতত্বাদিতি ভাবঃ। তত্তস্মাৎ, এনাং শকুন্তলাম্, ত্যজ বা গৃহাণ বা। হি যস্মাৎ, উপযন্তুঃ পরিণেতুঃ, দারেষু ভার্য্যায়াম্, সর্বতোমুখী সর্বপ্রকারা, প্রভুতা ক্ষমতা বর্ত্তত ইতি শেষঃ।

অত্র সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ ॥২৯॥

(গ) গৌতমীতি। অগ্রতঃ সর্বপুরতঃ। প্রস্থিতাঃ প্রস্থাতুমারভন্ত।

(খ) শার্ঙ্গরব। রাজা! এবিষয়ে উত্তর দিয়া কি হইবে। আমরা গুরুর আদেশ পালন করিয়াছি, এখন ফিরিয়া যাইতেছি।

অতএব এই আপনার পত্নী; আপনি ইঁহাকে ত্যাগ করিতেও পারেন, গ্রহণ করিতেও পারেন। কারণ, ভার্য্যার প্রতি ভর্ত্তার সর্বপ্রকার প্রভুত্ব রহিয়াছে ॥২৯॥

(গ) গৌতমি! আগে চলুন। (এই বলিয়া প্রস্থান করিতে লাগিলেন।)

(১). শারদ্বতঃ। শার্ঙ্গরব! কিমুত্তরেণ। অনুষ্ঠিতো গুরোঃ সন্দেশঃ প্রতি-নিবর্ত্তামহে বয়ম্। রাজানং প্রতি।

(২) ভবতঃ কান্তা। উপপন্না হি দারেষু।

(৩) অগ্রতঃ। প্রস্থিতাঃ।

শকু। অহং দাণিং ইমিণা কিদবেণ বিপ্পলদ্ধা, তুহ্মে বিং মং পরিচ্চঅধ। ইত্যনুপ্রস্থিতা (১)। (ঘ)

গৌতমী। স্থিত্বা পরিবৃত্যাবলোক্য চ। বচ্ছ! সঙ্গরব! অণুগচ্ছদি ণো করুণপরিদেবিণী সউন্তলা, পচ্চাদেসপরুসে ভত্তরি কিং করেদু তবস্সিণী (২)। (ঙ)

(ঘ) অহমিদানীমনেন কিতবেন বিপ্রলব্ধা, যূয়মপি মাং পরিত্যজথ।

(ঙ) বৎস! শার্ঙ্গরব! অনুগচ্ছতি নঃ করুণপরিদেবিনী শকুন্তলা, প্রত্যাদেশপরুষে ভর্ত্তরি কিং করোতু তপস্বিনী।

(ঘ) শকু ইতি। কিতবেন ধূর্ত্তেন রাজ্ঞা, বিপ্রলব্ধা প্রতারিতা; নানাবিধপ্রলোভনেন মাং গান্ধর্ববিধিনা পরিণীয় ইদানীং প্রত্যাখ্যাতবানিত্যাশয়ঃ। পরিত্যজথ এবঞ্চ সত্যহং জগত্যাং নিরাশ্রয়ৈব ভবিষ্যামীতি ভাবঃ। মহাবিষাদোক্তিরিয়ম্। অনুপ্রস্থিতা শার্ঙ্গরবাদীনাং পশ্চাৎ পশ্চাৎ গচ্ছতি।

অত্র খেদো নাম বিমর্শসন্ধেরঙ্গম্। যথা দর্পণে—

"মনশ্চেষ্টাসমুৎপন্নঃ শ্রমঃ খেদ ইতি স্মৃতঃ।"

(ঙ) গৌতমীতি। করুণং শোকোদ্দীপকং যথা স্যাৎ তথা পরিদেব্যতি বিলপতীতি সা, নঃ অস্মান্। প্রত্যাদেশেন প্রত্যাখ্যানেন পরুষে নিষ্ঠুরে বিষয়ে। তপস্বিনী দীনা, কিম্ অস্মাকমনুগমনাদন্যৎ কিমিত্যর্থঃ। এতেন স্বানুগমনানুমোদনপ্রার্থনা সূচিতা।

(ঘ) শকুন্তলা। এই কপটী আমাকে এখন প্রতারিত করিল এবং আপনারাও আমাকে পরিত্যাগ করুন। (এই বলিয়া পিছনে যাইতে লাগিল।)

(ঙ) গৌতমী। (দাঁড়াইয়া ফিরিয়া দেখিয়া) বৎস! শার্ঙ্গরব! শকুন্তলা করুণ বিলাপ করতঃ আমাদের পিছনে আসিতেছে; এই

(১) শকুন্তলা। কহং বিপ্পলদ্ধ ম্হি। অনুপ্রতিষ্ঠতে। (২) গৌতমী। স্থিত্বা। অণুগচ্ছই ইঅং বচ্ছ্ণী। ভত্তুণো কিংবা মে পুত্তিআ।

শাঙ্গ´। সরোষং প্রতিনিবৃত্য। আঃ পুরোভাগিনি! কিমিদং স্বাতন্ত্র্যমবলম্বসে (১)। (চ)

শকু। ভীতা বেপতে। (ছ)

শাঙ্গ´। শকুন্তলে! শৃণোতু ভবতী (২)।

যদি যথা বদতি ক্ষিতিপস্তথা
ত্বমসি, কিং পুনরুৎকুলয়া ত্বয়া (৩)।

(চ) শাঙ্গ´েতি। আঃ ইতি কোপসূচকমব্যয়ম্। পুরো দোষাণামগ্রদেশং ভজত ইতি পুরোভাগিনী "যুজভজ—" ইত্যাদিনা ঘিণিন্, কেবলদোষশালিনীত্যর্থঃ তৎসম্বোধনম্। অস্মিন্ ব্যাপারে তব কেবলং দোষ এব বর্ত্ততে, ন পুনঃ কশ্চিদপি গুণ ইত্যাশয়ঃ। স্বাতন্ত্র্যং স্বাধীনতাম্। অস্মাকমনুমতিমন্তরেণানুগমনারম্ভাদিতি ভাবঃ।

"দোষৈকদৃক্ পুরোভাগী" ইত্যমরঃ। স্ত্রীণাং চিরমস্বাতন্ত্র্যমাহ স্মৃতিঃ—

"পিতা রক্ষতি কৌমারে ভর্ত্তা রক্ষতি যৌবনে।
পুত্রশ্চ স্থবিরে রক্ষেন্ন স্ত্রী স্বাতন্ত্র্যমর্হতি ॥"

অত্র দ্যুতির্নাম বিমর্শসন্ধ্যঙ্গম্। তথা চ দর্পণে—

"তর্জনোদ্বেজনে প্রোক্তা দ্যুতিঃ।"

(ছ) শকু ইতি। বেপতে কম্পতে।

অনাথা, প্রত্যাখ্যাননিবন্ধন নিষ্ঠুর ভর্ত্তার নিকট আর কি করিতে পারে?।

(চ) শাঙ্গ´রব। (ক্রোধের সহিত ফিরিয়া) আঃ কেবল দোষ-কারিণি! তুমি এই স্বতন্ত্রতা অবলম্বন করিতেছ না কি?।

(ছ) শকুন্তলা। (ভীত হইয়া কাঁপিতে লাগিল।)

শাঙ্গ´রব। শকুন্তলা! তুমি শোন।

(১) শাঙ্গ´রবঃ। সক্রোধম্। কিং পুরোভাগে স্বাতন্ত্র্যম্।

(২) শাঙ্গ´রবঃ। শকুন্তলে!। (৩) পিতুরুৎকুলয়া।

अथ तु वेत्सि शुचि व्रतमात्मनः
पतिगृहे तव दास्यमपि क्षमम् ॥३०॥

तिष्ठ, साधयामो वयम् । (ज)

यदीति । क्षितिपो राजा प्रकरणात् दुष्मन्तः, यथा वदति न खल्वियं मया परिणीतेति यत् ब्रवीति, यदि त्वं तथा असि अनेनापरिणीतैवासि, अथ च गर्भवती जातेत्याशयः । तदा उत्सृष्टं कुलं कौलिकधर्म्मो यया तया त्वया किं प्रयोजनम्, अपि तु किमपि नेत्यर्थः । दुष्मन्तो न ते परिणेता, अन्योऽपि न श्रूयते, अथ च त्वं गर्भवती जाता ; एवञ्च त्वं व्यभिचारिण्येवासि ; अतएव च त्वया पापीयस्या न किञ्चिदस्माकं प्रयोजनमिति त्वं यथेष्टमेव यत्र तत्र गन्तुमर्हसि, न पुनरस्माननुगच्छेति भावः । अथ तु पक्षान्तरे । आत्मनो व्रतं नियममाचरणमित्यर्थः, शुचि पवित्रं पुरुषान्तरसंसर्गाभावात् निर्द्दोषमिति तात्पर्य्यम्, वेत्सि जानासि, तदा पतिगृहे अस्मिन् दुष्मन्तभवने, दास्यमपि परिणयसन्देहेन पत्नीत्वेनाग्रहणात् दासीभावेऽपि, तव क्षमं युक्तम्, लोकापवादाभावादिति भावः ।

अत्र प्रथमार्द्धे यकाराणामसकृत्साम्यात् वृत्त्यनुप्रासोऽलङ्कारः । तथा 'यदि तथा त्वमसि' इति वाक्यमध्ये 'यथा वदति क्षितिपः' इति वाक्यान्तरस्य प्रवेशाद्गर्भिततादोषः, स तु 'वदति यन्नृपतिर्नु चेत्तथा' इति प्रथमचरणपाठेन समाधेयः । प्रथमार्द्धे परार्द्धे च तदाशब्दद्वयस्यानुपादानेऽपि सामर्थ्यादेव तदवगतेर्न्न्यूनपदतादोषद्वयम्, "क्वचिन्न दोषो न गुणः" इति साहित्यदर्पणात् ।

"क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु" इत्यनेकार्थः ।

द्रुतविलम्बितं वृत्तम्—"द्रुतविलम्बितमाह नभौ भरौ" इति लक्षणात् ॥३०॥

(ज) अतएवाह तिष्ठेति । दास्यकरणार्थमपि त्वमत्रैव वर्त्तस्वेत्यर्थः, वयं

রাজা যেরূপ বলিতেছেন, তুমি যদি সেইরূপই হও ; তবে তুমি কুলনাশিনী ; তোমাদ্বারা কি হইবে ; আর যদি তুমি আপনার ব্যবহারকে পবিত্র বলিয়া মনে কর, তবে পতিগৃহে দাস্যবৃত্তি করাও তোমার উচিত ।৩০॥

राजा। भोस्तपस्विन्! किमत्रभवतीं विप्रलभसे?। कुतः—(झ)

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥२१॥

साधयाम आश्रमं गच्छामः, अस्माकमत्र स्थितौ प्रयोजनाभावादिति भावः। "प्रायेण वर्त्तमानकः साधिर्गमेः स्थाने प्रयुज्यते" इति साहित्यदर्पणात् साधयाम इति गमेः स्थाने प्रयोगः।

अत्र स्वव्यापारोपसंहारप्रदर्शनात् प्ररोचना नाम विमर्शसन्ध्यङ्गम्—"प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी" इति दर्पणलक्षणात्।

(झ) राजेति। अत्रभवतीं मुनिकन्यात्वेन माननीयां शकुन्तलाम्, किं कथम्, विप्रलभसे विरहयसि परित्यज्य गच्छसि, कथमपि नाहमेनां ग्रहीष्यामीति भावः। अत्र शकुन्तलामवस्थाप्य गमने अवश्यमेव राजा ग्रहीष्यतीति विभाव्य मुनिभिरेवमाचर्य्येत इति मत्वा राज्ञ उक्तिरियमिति बोध्यम्।

कुमुदानीति। शशाङ्कश्चन्द्रः, कुमुदानि कैरवाण्येव बोधयति प्रकाशयति, न पुनः पङ्कजानीति एवशब्दार्थः, तथा सविता सूर्य्यः, पङ्कजानि पद्मान्येव बोधयति, न पुनः कुमुदानीति एवशब्दार्थः। हि यस्मात्, वशिनाम् इन्द्रियदमनशीलानां जनानाम्, वृत्तिः प्रवृत्तिः, परपरिग्रहस्य परकलत्रस्य संश्लेषे सम्पर्के पराङ्मुखी विमुखी असम्बद्धा भवतीति शेषः, अतएव ममापि प्रवृत्तिः शकुन्तलासंश्लेषे पराङ्मुखीति भावः।

अत्र एवशब्दद्वयस्य इतरयोगव्यवच्छेद एव मुख्योऽर्थः। तेन अप्रस्तुतात् शशाङ्ककर्त्तृकपङ्कजाबोधनात् सवितृकर्त्तृककुमुदाबोधनाच्च समात् प्रस्तुतस्य दुष्मन्तकर्त्तृकस्य शकुन्तलाया अस्पर्शनस्य समस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, बोधयतीत्येकया क्रियया

(জ) অতএব তুমি থাক, আমরা যাই।

(ঝ) রাজা। ওহে তপস্বী! আপনি ইঁহাকে ত্যাগ করিয়া যাইতেছেন কেন?। কারণ,

শার্ঙ্গ । রাজন্ ! অথ পূর্ব্ববৃত্তং ব্যাসঙ্গাদ্বিস্মৃতং ভবেৎ, তদা কথমধর্ম্মভীরোর্দারপরিত্যাগঃ ? (১) । (ঞ)

রাজা । ভবন্তমেবাত্র গুরুলাঘবং পৃচ্ছামি । (ট)

মূঢ়ঃ স্যামহমেষা বা বদেন্মিথ্যেতি সংশয়ে ।
দারত্যাগী ভবাম্যাহো পরস্ত্রীস্পর্শপাংশুলঃ ॥৩২॥

অপ্রস্তুতয়োরেব শশাঙ্কসবিত্রোঃ কর্ত্তৃতয়াভিসম্বন্ধাৎ তুল্যযোগিতা, সামান্যেন বিশেষ-সমর্থনরূপোঽর্থান্তরন্যাসশ্চ, ইত্যেতেষামঙ্গাঙ্গিভাবেন সঙ্করঃ ।

"পরিগ্রহঃ কলত্রে চ মূল্যস্বীকারয়োরপি" ইতি মেদিনী । আর্য্যা জাতিঃ ॥৩১॥

(ঞ) শার্ঙ্গেতি । অথেতি প্রশ্নে । ব্যাসঙ্গাৎ বহুতরকার্য্যেষু বিশেষাসক্তত্বাৎ পূর্ব্ববৃত্তম্ অতীতঘটনা শকুন্তলায়াঃ পরিণয়নমিত্যর্থঃ, বিস্মৃতং ভবেদিতি সম্ভাবনায়াং বিধিলিঙ্ । অধর্ম্মভীরোর্ভবত ইতি তাৎপর্য্যম্ । "পতিতাঽত্যাগ্যপতিতত্যাগিনশ্চ পতিতাঃ" ইতি গৌতমবচনেন অপতিতদারত্যাগেন মহানধর্ম্ম এবেতি ভাবঃ ।

অত্র উৎপ্রাসনং নাম নাট্যালঙ্কারঃ—"উৎপ্রাসনন্তূপহাসো যোঽসাধৌ সাধুমানিনি" ইতি দর্পণলক্ষণাৎ ।

(ট) রাজেতি । অত্র বিষয়ে । গুরুলঘুভাব ইতি গুরুলাঘবম্, সুপাঞ্চাল-মিত্যাদিবদুত্তরপদস্য বৃদ্ধিঃ । পৃচ্ছতের্দ্বিকর্ম্মকত্বাৎ ভবন্তমিত্যস্যাপি কর্ম্মত্বম্ ।

---

চন্দ্র কুমুদকেই প্রস্ফুটিত করেন, আবার সূর্য্য পদ্মকেই প্রকাশিত করিয়া থাকেন । কারণ, ইন্দ্রিয়দমনশীল ব্যক্তিদিগের প্রবৃত্তি, পরস্ত্রী-সংস্পর্শে পরাঙ্মুখীই হইয়া থাকে ॥৩১॥

(ঞ) শার্ঙ্গরব । রাজা ! নানা কার্য্যে মনোনিবেশ করিতে হয় বলিয়া যদি আপনি পূর্ব্বের ঘটনা বিস্মৃত হইয়া থাকেন, তবে পাপ-ভীরুর পত্নীপরিত্যাগ হইতেছে কেন ? ।

(ট) রাজা । আপনাকেই এবিষয়ে গুরু-লাঘব জিজ্ঞাসা করিতেছি ।

---

(১) শার্ঙ্গরবঃ । যদা তু পূর্ব্ববৃত্তমন্যসঙ্গাদ্বিস্মৃতো ভবান্, তদা কথমধর্ম্মভীরুঃ ।

पुरोधाः (१)। विचार्य्य। यदि तावदेवं क्रियताम्। (ठ)

राजा। अनुशास्तु मां गुरुः (२)। (ड)

पुरोधाः। अत्रभवती तावदाप्रसवादस्मद्गृहे तिष्ठतु। (ढ)

प्रश्नं विवृण्वन्नाह मूढ इति। अहं मूढो विचित्ततापन्नः कार्य्यान्तरव्यासङ्गेन विस्मृतपरिणयवृत्तान्त इत्यर्थः, स्यां भवेयम्; वा अथवा एषा शकुन्तला मिथ्या वदेत्, इति संशये विषये, अहं दारत्यागी मूढत्वे सति पत्नीपरित्यागी भवामि; आहो अथवा शकुन्तलावाक्यस्य मिथ्यात्वे परस्त्रीस्पर्शेन पांशुलः कलङ्कितो भवामि, पत्नीपरित्यागपाप-परस्त्रीग्रहणपापयोर्मध्ये कतरद्गुरुतरमिति भवन्तमेव पृच्छामीत्यर्थः। लोभप्रकाशेन कलङ्काधिक्यात् परस्त्रीग्रहणापेक्षया दारत्याग एव श्रेयानिति तु मम मतमित्याशयः।

"आहो उताहो किमुत विकल्पे किं किमुत च" इत्यमरः। "पांशुलः पुंश्चले शम्भोः खट्वाङ्गे स्यात्सतीभुवोः" इति मेदिनी ॥३२॥

(ठ) पुरोधा इति। यदि तावत् तथा संशयापन्नोऽसीत्यर्थः, तदा एवम् अनुपद-मुच्यमानम्, क्रियताम्।

(ड) राजेति। गुरुः गुरुभूतः पुरोहितो भवान्, अनुशास्तु उपदिशतु, कर्त्तव्य-मिति शेषः।

(ढ) पुरोधा इति। अत्रभवती मुनिकन्यात्वेन मान्या शकुन्तला, आप्रसवात् प्रसवपर्य्यन्तम्।

---

আমিও বিস্মৃত হইতে পারি, অথবা ইনিও মিথ্যা বলিতে পারেন; এইরূপ সংশয়স্থলে আমি কি দারত্যাগী হই, কিংবা পরস্ত্রীস্পর্শবশতঃ কলঙ্কিত হই? ॥৩২॥

(ঠ) পুরোহিত। (বিবেচনা করিয়া) যদি সংশয়াপন্নই হইয়া থাকেন তবে এইরূপ করুন।

(ড) রাজা। গুরুজন আমাকে উপদেশ দিন।

(ঢ) পুরোহিত। প্রসব হওয়া পর্য্যন্ত ইনি আমার বাড়ীতে থাকুন।

---

(१) पुरोहितः। (२) राजा। मां भवान्।

राजा । कुत इदम् (१) । (ग)

पुरोधाः । त्वं साधुनैमित्तिकैरुपदिष्टपूर्वः प्रथममेव चक्रवर्त्तिनं पुत्रं जनयिष्यसीति । स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, ततोऽभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्य्यये त्वस्याः पितुः समीपगमनं स्थितमेव (२) । (त)

(ग) राजेति । इदम् आप्रसवाद्मद्गृहे अवस्थानम् ।

(त) पुरोधा इति । निमित्तं शुभाशुभचिह्नं जानन्तीति नैमित्तिकाः सामुद्रिकाभिज्ञाः, साधवः अप्रतारकाश्च ते नैमित्तिकाश्चेति ते तथोक्तास्तैः । चक्रवर्त्तिनं सार्वभौमलक्षणोपेतम् । इति उपदिष्टपूर्वं इत्यन्वयः । मुनिदौहित्रत्वांशे सन्देहाभावात् मुनिदौहित्रपदम् । तल्लक्षणोपपन्नः चरणतलादौ पद्मचक्रादिचक्रवर्त्तिचिह्नविशिष्टः । ततस्तदा, एनां शकुन्तलाम्, अभिनन्द्य प्रशस्य, शुद्धान्तमन्तःपुरम् । साधुनैमित्तिकोपदिष्टप्रकारेण चक्रवर्त्तिलक्षणोपपन्नस्य तत्पुत्रस्य आत्मजातत्वनिश्चयात्, तथा च सति शकुन्तलाया अपि स्वपरिणीतत्वनिश्चयादिति भावः । विपर्य्यये अन्यथाभावे तत्पुत्रस्य चक्रवर्त्तिलक्षणाभावे इत्यर्थः, अस्याः शकुन्तलायाः ।

चक्रवर्त्तिचिह्नमाह सामुद्रिकम्—

"यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् ॥"

---

(গ) রাজা। ইহা কিসের জন্য ?।

(ত) পুরোহিত। সৎপ্রকৃতি সামুদ্রিকগণ আপনাকে পূর্ব্বেই বলিয়াছেন যে, আপনি প্রথমেই চক্রবর্ত্তী পুত্র জন্মাইবেন; সেই মুনিদৌহিত্র যদি চক্রবর্ত্তি-লক্ষণাক্রান্ত হয়, তবে ইহাকে আদর করিয়া

---

(१) क्वचिदयं पाठः पृथङ्नास्ति ;

(२) पुरोहितः । अत्रभवती तावत् तिष्ठतु । कुत इदमुच्यते इति चेत् त्वं साधुभिरुद्दिष्टः प्रथममेव । विपर्य्यये तु पितुरस्याः समीपनयनमवस्थितमेव ।

राजा । यथा गुरुभ्यो रोचते । (थ)

पुरोधाः । उत्थाय । वत्से ! इत इतोऽनुगच्छ माम् (१) । (द)

शकु । भअवदि ! वसुन्धरे ! देहि मे अन्तरं ।

इति सह पुरोधसा गौतमीतपस्विभिश्च रुदती निष्क्रान्ता (२) । (ध)

राजा । शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति । (न)

(ध) भगवति ! वसुन्धरे ! देहि मे अन्तरम् ।

(थ) राजेति । यथा रोचते तथा करोत्विति शेषः ।

(द) पुरोधा इति । इत इतः अनेनानेन पथा ।

(ध) शकु इति । अन्तरम् अवस्थानाय अवकाशम् ।

अत्र प्रथमनीप्सितस्य राजकर्त्तृकात्मग्रहणस्य पश्चादीप्सितस्य कण्वशिष्यानुगमनस्य उभयोरपि प्रतीघातात् प्रतिषेधो नाम विमर्शसन्धेरङ्गम्—"ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते" इति दर्पणलक्षणात् ।

(न) राजेति । शापेन प्रागुक्तेन दुर्वाससोऽभिसम्पातेन व्यवहिता अन्तरिता स्मृतिर्यस्य सः, शकुन्तलागतमेव शकुन्तलाविषयमेव, चिन्तयति नयनोन्मीलनादिना चिन्तामभिनयति ।

অন্তঃপুরে প্রবেশ করাইবেন; আর তাহা না হইলে, ইহার পিতার নিকটে যাওয়া ত আছেই ।

(থ) রাজা । গুরুজনের যাহা অভিরুচি ।

(দ) পুরোহিত । ( উঠিয়া ) বৎসে! এই এই পথে আমার পিছনে পিছনে আইস ।

(ধ) শকুন্তলা । মাহাত্ম্যবতি ! বসুন্ধরে ! আমাকে স্থান দাও । ( এই বলিয়া কাঁদিতে কাঁদিতে পুরোহিত, গৌতমী ও তপস্বিগণের সহিত চলিয়া গেল । )

(१) पुरोहितः । वत्से ! अनुगच्छ माम् । (२) शकुन्तला । भगवति ! वसुमति ! देहि मे विवरं । रुदती प्रस्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च ।

নেপথ্যে। আশ্চর্য্যমাশ্চর্য্যম্। (প)

রাজা। কর্ণং দত্ত্বা। কিন্নু খলু স্যাৎ?। (ফ)

পুরোধাঃ। প্রবিশ্য সবিস্ময়ম্। দেব! অদ্ভুতং খলু সংবৃত্তম্। (ব)

রাজা। কিমিব?।

পুরোধাঃ। দেব! পরাবৃত্তেষু কণ্বশিষ্যেষু—(ভ)

সা নিন্দন্তী স্বানি ভাগ্যানি বালা
বাহূৎক্ষেপং রোদিতুঞ্চ প্রবৃত্তা।

(প) নেপথ্য ইতি। পুরোহিতাদিকৃতিরিয়ম্।

(ফ) রাজেতি। কর্ণং দত্ত্বা শ্রবণেন্দ্রিয়মবহিতীকৃত্য। স্যাদিতি সম্ভাবনায়াং বিধিলিঙ্।

(ব) পুরোধা ইতি। সংবৃত্তং সঞ্জাতম্।

(ভ) পুরোধা ইতি। কণ্বশিষ্যেষু শার্ঙ্গরবাদিষু, পরাবৃত্তেষু রাজভবনাভিমুখ্যান্নিবৃত্তেষু প্রস্থিতেষু সৎস্বিত্যর্থঃ। শ্লোকস্থক্রিয়য়া বাক্যসমাপনম্।

সেতি। সা বালা শকুন্তলা, স্বানি স্বকীয়ানি, ভাগ্যানি অদৃষ্টানি নিন্দন্তী সতী, বাহূ ভুজদ্বয়ম্ উৎক্ষিপ্য উত্তোল্য ইতি বাহূৎক্ষেপম্, রোদিতুং প্রবৃত্তা আরব্ধবতী। রাজবাক্যানন্তরং পরাবৃত্তং দ্রষ্টব্যম্।

(ন) রাজা। (দুর্ব্বাসার শাপে লুপ্তস্মৃতি অবস্থায় শকুন্তলার বিষয়ই চিন্তা করিতে লাগিলেন।)

(প) নেপথ্যে। আশ্চর্য্য! আশ্চর্য্য!।

(ফ) রাজা। (কাণ দিয়া) কি হইয়াছে?।

(ব) পুরোহিত। (প্রবেশ করিয়া বিস্ময়ের সহিত) রাজা! আশ্চর্য্য ঘটনা ঘটিয়াছে।

রাজা। কি রকম?।

राजा। ततः किम्? (१)। (म)

पुरोधाः। स्त्रीसंस्थानञ्चाप्सरस्तीर्थमारात्
उत्क्षिप्याङ्के ज्योतिरेनां तिरोऽभूत् (२) ॥३२॥

सर्वे। विस्मयं रूपयन्ति। (य)

बाहूत्क्षेपमिति बाहूपपदात् उत्क्षिपतेः "स्वाङ्गेऽध्रुवे" इति णमुल्। बाहुद्वयोत्तोलनं शोकाकुलरोदनस्वभावः।

(म) राजेति। ततः किं जातमिति प्रश्नः।

स्त्रीति। स्त्रियाः संस्थानमिव संस्थानमाकृतिर्यस्य तत्, अप्सरोवत् तीर्थं दर्शनं यस्य तत्, ज्योतिः कश्चित् तेजःपुञ्जः, एनां शकुन्तलाम्, अङ्के क्रोडे, उत्क्षिप्य उत्तोल्य, आरात् अस्माकं समीप एव, तिरोऽभूत् अन्तर्हितमभूत्; इदमेवाद्भुतं सञ्जातमिति भावः।

अत्र पूर्वार्द्धपरार्द्धयोश्चकारद्वयेन प्रवृत्तितिरोभवनरूपयोः क्रिययोर्यौगपद्यं सूच्यत इति क्रियासमुच्चयोऽलङ्कारः।

"संस्थानमाकृतौ मृत्यौ सन्निवेशे चतुष्पथे" इति मेदिनी। "तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः। ऋषिजुष्टे जले मन्त्रिण्युपाये स्त्रीरजस्यपि॥ योनौ पात्रे दर्शने च" इति हेमचन्द्रः। "आराद्दूरसमीपयोः" इत्यमरः।

शालिनी वृत्तम्—"मात्तौ गौ चेच्छालिनी वेदलोकैः" इति लक्षणात् ॥३२॥

(ভ) পুরোহিত। রাজা! কণ্বের শিষ্যগণ ফিরিয়া গেলে—

সেই বালিকা, নিজের ভাগ্যের নিন্দা করতঃ, বাহু উত্তোলন করিয়া কাঁদিতে লাগিল।

(ম) রাজা। তার পর কি হইল?।

পুরোহিত। তার পর, স্ত্রীলোকের ন্যায় আকৃতি এবং অপ্সরার ন্যায় সুন্দর একটী তেজঃপুঞ্জ আসিয়া আমাদের নিকট হইতে সেই বালিকাকে কোলে তুলিয়া অন্তর্হিত হইল ॥৩৩॥

(१) किञ्च। (२) उत्क्षिप्यैनां ज्योतिरेकं जगाम।

রাজা। ভগবন্! প্রাগেবাস্মাভিরেষোঽর্থঃ প্রত্যাদিষ্টঃ, কিং মৃষা তর্কেণান্বিষ্যতে, বিশ্রাম্যতু ভবান্। (র)

পুরোধাঃ। বিজয়স্ব। ইতি নিষ্ক্রান্তঃ। (ল)

রাজা। বেত্রবতি! পর্য্যাকুলোঽস্মি, শয়নীয়গৃহমার্গমাদেশয়। (ব)

প্রতী। ইদো ইদো দেবো। (শ)

(শ) ইত ইতঃ দেবঃ।

---

(য) সর্ব্ব ইতি। রূপয়ন্তি নয়নবিস্ফারাদিনা অভিনয়ন্তি।

(র) রাজেতি। অর্থঃ শকুন্তলাত্মকং বস্তু, প্রত্যাদিষ্টঃ প্রত্যাখ্যাতঃ। তর্কেণ ষা কা ইতি বিচারেণ, মৃষা মিথ্যা, কিমন্বিষ্যতে অনুসন্ধীয়তে, প্রত্যাখ্যাতবস্তুনিরূপণস্য নিষ্ফলত্বাদিতি ভাবঃ।

(ল) পুরোধা ইতি। বিজয়স্ব উৎকর্ষেণ বর্ত্তস্ব "বিপরাভ্যাং জিঃ" ইত্যাত্মনেপদম্।

(ব) রাজেতি। বেত্রবতীতি নাম্না প্রতীহার্য্যাঃ সম্বোধনম্। পর্য্যাকুলঃ এতাবত্তর্কবিতর্ককরণাৎ পরিশ্রমেণ বিহ্বলঃ। শয্যতে অস্মিন্নিতি শয়নীয়ং যদ্‌গৃহং তস্য মার্গং পন্থানম্, আদেশয় দর্শয়। ইদানীং বিশ্রমিতুমিচ্ছামীতি ভাবঃ।

(শ) প্রতীতি। ইত ইতঃ অনেনানেন পথা, দেব আগচ্ছত্বিতি শেষঃ।

---

(য) সকলে। ( বিস্ময় অভিনয় করিতে লাগিল। )

(র) রাজা। ভগবন্! এ বিষয় আমি পূর্ব্বেই প্রত্যাখ্যান করিয়াছি; সুতরাং তর্ক-বিতর্ক করিয়া মিথ্যা অনুসন্ধান করায় ফল কি? আপনি বিশ্রাম করুন।

(ল) পুরোহিত। আপনার জয় হউক। ( এই বলিয়া চলিয়া গেলেন। )

(ব) রাজা। বেত্রবতি! বড়ই আকুল হইয়াছি; সুতরাং শয়নগৃহের পথ দেখাও।

রাজা। পরিক্রম্য স্বগতম্ (১)।

**কামং প্রত্যাদিষ্টাং স্মরামি ন পরিগ্রহং মুনেস্তনয়াম্।**
**বলবত্তু দূয়মানং প্রত্যায়য়তীব মাং হৃদয়ম্ (২) ॥২৪॥**

ইতি নিষ্ক্রান্তাঃ সর্বে। (ষ)

## পঞ্চমোঽঙ্কঃ ॥০॥

কামমিতি। প্রত্যাদিষ্টাম্ ইদানীমেব প্রত্যাখ্যাতাম্, মুনেঃ কণ্বস্য তনয়াং শকুন্তলাম্, পরিগ্রহং কলত্রম্, কামং পর্য্যাপ্তম্, ন স্মরামি পত্নীত্বেন দৃঢং ন স্মরামীত্যর্থঃ। তু কিন্তু, বলবৎ অত্যন্তমেব, দূয়মানম্ উপতপ্যমানম্, হৃদয়ং মম মনঃ কর্ত্তৃ, প্রত্যায়য়তীব পরিগ্রহতয়া বিশ্বাসয়তীব।

অত্র কারণাভাবেঽপি দূয়মানত্বরূপকার্য্যোৎপত্তের্বিভাবনালঙ্কারঃ।

"কামং প্রকামং পর্য্যাপ্তং নিকামেষ্টং যথেপ্সিতম্" "বলবৎ সুষ্ঠু কিমুত স্বত্যতীব চ নির্ভরে" ইতি চামরঃ। "পরিগ্রহঃ কলত্রে চ মূলস্বীকারয়োরপি" ইতি মেদিনী।

দূয়মানমিতি "টুদু উপতাপে" ইত্যস্য প্রয়োগঃ। আর্য্যা জাতিঃ ॥২৪॥

(ষ) ইতীতি। সভাসদ্ভিঃ সহ রাজ্ঞো বহুত্বাৎ বহুবচনং সর্বশব্দস্য উপপদ্যতে।

ইতি মহামহোপাধ্যায়-ভারতাচার্য্য শ্রীহরিদাসসিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াম্
অভিজ্ঞানশকুন্তলটীকায়ামভিজ্ঞানকৌমুদ্যাং পঞ্চমাঙ্কবিবরণং সমাপ্তম্ ॥০॥

---

(শ) প্রতীহারী। মহারাজ এই এই পথে আসুন।

রাজা। (পাদক্ষেপ করিয়া স্বগত)

প্রত্যাখ্যাত মুনিকন্যাকে কিছুতেই ভার্য্যা বলিয়া স্মরণ করিতে পারিতেছি না; অথ চ অত্যন্ত সন্তপ্ত হৃদয়, তাহাকে যেন আমার ভার্য্যা বলিয়াই আমাকে বিশ্বাস করাইতেছে।২৪॥

(ষ) (ইহার পর সকলেই চলিয়া গেল।)

**পঞ্চম অঙ্ক ॥০॥**

---

(১) ক্বচিদয়ং পাঠো ন দৃশ্যতে। (২) মে হৃদয়ম্।

# পঞ্চমাঙ্কাংশোঽঙ্কাবতারঃ।

—০:*:০—

ততঃ প্রবিশতি নাগরকশ্যালঃ পশ্চাদ্বাহুবদ্ধং পুরুষমাদায় রক্ষিণৌ চ (১)। (ক)

**রক্ষিণৌ।** পুরুষং তাডয়িত্বা। **অলে কুম্ভিলআ! কধেহি কহিং তুএ এশে মহামণিভাশুলে উক্কিণ্ণণামক্খলে লাঅকীএ অঙ্গুলীঅএ শমাশাদিদে (২)। (খ)**

(খ) অরে কুম্ভিলক! কথয় কুত্র ত্বয়া এতন্মহামণিভাস্বরমুৎকীর্ণনামাক্ষরং রাজকীয়মঙ্গুরীয়কং সমাসাদিতম্।

(ক) তত ইতি। নগরং রাজধানীং রক্ষতীতি নাগরঃ, ততঃ স্বার্থে কপ্রত্যয় ইতি নাগরকঃ নগরস্য প্রধানরক্ষকঃ স চাসৌ শ্যালঃ প্রকরণাৎ রাজশ্যালকশ্চেতি নাগরকশ্যালঃ। রাজশ্যালকস্যোপস্থাপনম্ অবাধেনান্তঃপুরপ্রবেশপ্রতিপাদনার্থম্, তচ্চ পশ্চাৎ স্ফুটীভবিষ্যতি। রক্ষিণৌ সামান্যপ্রহরিণৌ।

(খ) রক্ষিণাবিতি। কুম্ভিলশ্চৌরঃ কুৎসায়াং কপ্রত্যয়ঃ, তৎসম্বোধনম্। মহামণিনা মহামূল্যরত্নেন ভাস্বরমুজ্জ্বলম্, উৎকীর্ণানি অস্ত্রেণ ক্ষুণ্ণানি নামাক্ষরাণি রাজ্ঞ এব নামবর্ণা যস্মিন্ তৎ। সমাসাদিতং প্রাপ্তম্।

"কুম্ভিলঃ শ্যালকে চৌরে শ্লোকচ্ছায়াহরে ঝষে" ইতি বিশ্বঃ।

(ক) তদনন্তর রাজার শ্যালকের এবং পশ্চাদ্বাহুবদ্ধ একটা পুরুষকে নিয়া দুইজন রক্ষীর প্রবেশ।

(খ) রক্ষিদ্বয়। (পুরুষটাকে প্রহার করিয়া) ওরে চোর! বল দেখি মহারত্ন-সমুজ্জ্বল এবং খোদিত রাজার নামযুক্ত এই রাজকীয় অঙ্গুরী তুই কোথায় পাইলি।

---

(১) ততঃ নাগরিকঃ শ্যালঃ পশ্চাদ্বদ্ধপুরুষমাদায়।

(২) এশে মণিবন্ধণুক্কিণ্ণণামহেএ।

পুরুষ: । ভীতিনাটিতকেন । পসীদন্তু পসীদন্তু মে ভাবমিস্সে । ণ হগ্গে ঈদিসস্স অকজ্জস্স কালকে (১) । (গ)

একঃ । কিস্‌ ক্খু সোহণে বম্মণেত্তি কদুঅ লজ্জা দে পরিগ্গহে দিস্নে ? । (ঘ)

পুরুষ: । সুণুধ দাব, হগ্গে ক্খু সক্কাবদালবাসী ধীবলে (২) । (ঙ)

(গ) প্রসীদন্তু প্রসীদন্তু মে ভাবমিশ্রা: । নাহমীদৃশস্য অকার্য্যস্য কারক: ।

(ঘ) কিম্‌ খলু শোভনো ব্রাহ্মণোঽসীতি কৃত্বা রাজ্ঞা তে পরিগ্রহো দত্ত: ? ।

(ঙ) শৃণুত তাবত্, অহং খলু শক্রাবতারবাসী ধীবর: ।

(গ) পুরুষ ইতি । ভীতির্যস্য নাটিতকেন নাটনেন, দয়ার্থে কপ্রত্যয়: বিহ্বলত্বাদিনা ভয়াভিনয়েনেত্যর্থ: । ভাবেষু বিদ্বত্সু মিশ্রা গৌরবিতা: ।

"ভাবো বিদ্বান্" ইত্যমর: । "গৌরবিতাস্তত্রৈমিশ্রা: স্যাচ্চার্য্যবসবস্নু খা:" ইতি বিকাণ্ডশেষ: ।

(ঘ) এক ইতি । রক্ষিণোর্মধ্যে এক: কশ্চিদিত্যর্থ: । শোভনো বিদ্যাসদাচারাদিনা উত্কৃষ্ট: । ইতি কৃত্বা মনসি কৃত্বা । প্রতিগৃহ্যত ইতি প্রতিগ্রহ: প্রতিগ্রাহ্যভূত: অঙ্গুরীয়কপদার্থ: ।

(ঙ) পুরুষ ইতি । শক্রাবতারে তদাখ্যে গ্রামে বসতীতি স: ।

(গ) পুরুষ । ( ভয় অভিনয় করিয়া ) মহাশয়রা আমার প্রতি প্রসন্ন হউন প্রসন্ন হউন । আমি এরূপ অকার্য্যের কর্ত্তা নহি ।

(ঘ) এক জন রক্ষী । তবে কি তুই উৎকৃষ্ট ব্রাহ্মণ বলিয়া, রাজা তোকে দান করিয়াছেন ? ।

(ঙ) পুরুষ । শুনুন, আমি শক্রাবতারগ্রামবাসী ধীবর ।

(১) পসীদন্তু ভাবমিস্সা । অহকে ণ এরিসকম্মকালী ।

(২) সুণাহ দাণিং অহকে সক্কাবদালব্‌ভন্তলবাসী ধীবলে ।

द्वितीयः। अले पाअच्चले! किं तुमं अम्हेहिं वसदिं जादिं च पुच्छीअसि (१)। (च)

नाग। सूअअ! कधेदु सव्वं अणुक्कमेण, मा अन्तरा पडिवन्धेअ (२)। (छ)

उभौ। जं आवुत्ते आणवेदि। लवेहि ले! (३)। (ज)

(च) अरे पाटच्चर! किं त्वमस्माभिर्वसतिं जातिञ्च पृच्छ्यसे?।

(छ) सूचक! कथयतु सर्वमनुक्रमेण, मा अन्तरा प्रतिबधान।

(ज) यदावुत्त आज्ञापयति। लप रे।

(च) द्वितीय इति। प्रहरिणोर्मध्ये अपर इत्यर्थः। पाटयं चरतीति पाटच्चर-श्चौरः, तत्सम्बोधनम्। वसतिं वासस्थानम्। किं पृच्छ्यसे, येन तदुल्लिखसीति भावः।

"चौरैकागारिकस्तेनदस्युतस्करमोषकाः। प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः॥" इत्यमरः।

"कर्म्मण्यप्रधाने दुहादिभ्यः" इति त्वमित्यस्य उक्तता।

(छ) नागेति। सूचयति ज्ञापयति चौरादीनिति सूचकः, तत्सम्बोधनम्। अनुक्रमेण क्रमशः। अन्तरा वाक्यमध्ये, मा प्रतिबधान न बाधां कुरु।

(ज) उभाविति। रक्षिणौ द्वावेवेत्यर्थः। आवुत्तो भगिनीपतिः। एतेन रक्षिणौ परस्परं भ्रातरौ, नागरिकश्च तयोर्भगिनीपतिरिति सूचितम्। लप ब्रूहि।

(চ) দ্বিতীয় রক্ষী। ওরে চোর! আমরা কি তোকে বাসস্থানের ও জাতির কথা জিজ্ঞাসা করিয়াছি?।

(ছ) রাজশ্যালক। সূচক! ক্রমে সকল বলুক, মধ্যে বাধা দিও না।

(জ) রক্ষিদ্বয়। ভগিনীপতি যাহা আদেশ করেন। বল রে!।

(१)···पारच्चाला! किं अम्हेहिं जादी पुच्छिदे।

(२)···मा णं···। (३)···कहेहि।

धीवरः। सो हग्गे जाल-वलिश-प्पहुदिहिं मच्छबन्धणो वाएहिं कुडुम्बभलणं कलेमि (१)। (झ)

नाग। विहस्य। विसुद्धो दाणिं से आजीवो (२)। (ञ)

धीवरः। भट्टके! मा एव्वं भण (३)। (ट)

शहजे किल जे विणिन्दिदे णहु शे कम्म विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकम्पामिदुकेवि शोत्तिए ॥१॥

(झ) सोऽहं जालवड़िशप्रभृतिभिर्मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।

(ञ) विशुद्ध इदानीमस्य आजीवः।

(ट) भर्त्तः! मा एवं भण।

सहजं किल यद्विनिन्दितं न तु तत् कर्म्म विवर्जनीयकम्।
पशुमारणकर्म्मदारुणः अनुकम्पामृदुकोऽपि श्रोत्रियः ॥१॥

(झ) धीवर इति। जालवड़िशे स्वनामख्याते मत्स्यबन्धनोपायौ। मत्स्यबन्धनोपायैः मत्स्यधारणसाधनैः, कुटुम्बभरणं पोष्यवर्गपोषणम्।

(ञ) नागेति। आजीवो जीविकानिर्वाहोपायः, विशुद्धो निर्द्दोषः। सोल्लुण्ठनोक्तिरियम्। तेन विपरीतलक्षणया घृणितहिंसात्मकत्वात् कदर्य्यः परित्याज्यश्चायमिति भावः।

(ट) धीवर इति। मैवं भण नेत्थं ब्रूहि।

कथमेवं न भणामीत्याह सहजमिति। विनिन्दितं लोकगर्हितमपि, यत् कर्म्म

(ঝ) ধীবর। সেই আমি, জাল ও বড়িশপ্রভৃতি মৎস্য ধরিবার উপকরণদ্বারা পোষ্যবর্গের পোষণ করিয়া থাকি।

(ঞ) রাজশ্যালক। (হাস্য করিয়া) ইহার জীবিকার উপায় ত ভাল!।

(ট) ধীবর। হুজুর! এরূপ বলিবেন না। কারণ—

(१)···अहके जालुग्गालादीहिं···। (२)···दाणिं आजीवः। (३)···भट्टा!।

नाग। तदो तदो। (ठ)

धीवरः। एक्कश्शिं दिअशे मए लोहिदमच्छके पाविदे, तदो खण्डशो कप्पिदे। जाव तश्श उदलब्भन्तले पेक्खामि,

(ठ) ततस्ततः? ।

सहजं स्वाभाविकं कुलक्रमागतमित्यर्थः, तत् किल कर्म्म, न तु विवर्जनीयकं न खलु परित्याज्यम्। तथा च अनुकम्पया सर्वभूतेषु दयया मृदुकोऽपि कोमलोऽपि श्रोत्रियो वेदज्ञो ब्राह्मणः, पशुमारणकर्म्मणा यज्ञे पशुहत्याकार्य्येण दारुणो निष्ठुरो भवति। एवञ्च यथा दयार्द्रचित्तेन श्रोत्रियेण हिंसात्मकतया निन्दितमपि पशुहत्याकर्म्म कुलक्रमागततया यज्ञादावनुष्ठीयते; तथा मयापि लोकनिन्दितमपि मत्स्यमारणं कर्म्म कुलक्रमागततया अनुष्ठीयते; अत उक्तुलुण्ठनविषयत्वाभावात् मैवं भणति भावः।

अतएवात्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, मृदोः श्रोत्रियात् दारुणत्व-रूप विरुद्धगुणोत्पत्त्या विषमालङ्कारश्च; अनयोश्चाप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः।

एतन्मूलीभूतं प्रमाणं यथा शुद्धितत्त्वधृतम्—

"देशानुशिष्टं कुलधर्म्ममग्र्यं स्वगोत्रधर्म्मं नहि सन्त्यजेच्च।"

गीतायाञ्च—"सहजं कर्म्म कौन्तेय! सदोषमपि न त्यजेत्।
सर्व्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥"

श्रोत्रियमाह देवलः—"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित्॥"

यज्ञादौ पशुहिंसामाह श्रुतिः—"अग्निषोमीयं पशुमालभेत॥"

सुन्दरी वृत्तम्॥१॥

---

নিন্দিত হইলেও যে কার্য্য যাহার কুলক্রমাগত, তাহা তাহার পরিত্যাজ্য নহে। দয়াবশতঃ কোমল হইলেও, বেদজ্ঞ ব্রাহ্মণ যজ্ঞে পশুহত্যাকার্য্যে নিষ্ঠুর হইয়া থাকেন॥১॥

(ঠ) রাজশ্যালক। তার পর? তার পর?।

दाव एशे महालअणभाशुले अङ्गुलीअए पेक्खिदे, पच्चा इध विक्कअत्थं दंशअन्ते ज्जेव गहिदे भाविमिश्शेहिं। एत्तिके दाव एदश्श आगमे। अध मं मालेध कुट्टेध वा (१)। (ड)

नाग। अङ्गुरीयकमाघ्राय। जालुअ! मच्छोदलब्भन्तल-गदेत्ति णत्थि सन्देहो, जदो अअं आमिसगन्धो वाअदि। आगमो दाणिं एदस्स एसो विमरिसिदव्वो, ता एध लाअउलं ज्जेव गच्छम्ह (२)। (ढ)

(ड) एकस्मिन् दिवसे मया रोहितमत्स्यकः प्राप्तः, ततः खण्डशः कल्पितः। यावत् तस्य उदराभ्यन्तरे प्रेक्षे, तावदेतन्महारत्नभासुरम् अङ्गुरीयकं प्रेक्षितम्, पश्चादिह विक्रयार्थं दर्शयन्नेव गृहीतो भावमिश्रैः। एतावान् तावदेतस्य आगमः। अथ मां मारयत कुट्टयत वा।

(ढ) धीवर इति। खण्डशः कल्पितः अल्पक्रेतृभ्यो विक्रयार्थं खण्डखण्डः कृतः। प्रेक्षे दृष्टिपातं करोमि। भावमिश्रैर्विहृत्प्रधानैर्भवद्भिः। एतस्य अङ्गुरीयकस्य, आगमो मदन्तिकागमनवृत्तान्तः। अथ एतच्छ्रवणानन्तरम्, मारयत ताड़यत, कुट्टयत कर्त्तयत।

(ড) ধীবর। তার পর, এক দিন আমি রোহিত মাছ পাইলাম, তার পর খণ্ড খণ্ড করিলাম; তার পর যেই পেটের ভিতরে চাহিয়াছি, সেই দেখি এই মহারত্ন-সমুজ্জ্বল আংটী। তার পর বিক্রয়ের জন্য এইখানে

(१) पुरुषः। एकस्मिं दिवसे खण्डसो लोहिअमच्छे मए कप्पिदे जाव तस्स उदलब्भन्तले एदं लदणभासुलं अङ्गुलीअअं देक्खिअं। पच्छा अहके से विक्कआअ दंसअन्तो गहिदे भावमिस्सेहिं। मालेह वा मुञ्चेह वा अअं से आअमवुत्तन्तो।

(२) जाणुअ! विस्सगन्धि गोहादी मच्छवन्धो एव्व णिस्संसअं। अङ्गुलीअ-अदंसणं से विमरिसिदव्वं। राअउलं एव गच्छामो।

रक्षिणौ। धीवरं प्रति। गच्छ ले गण्ठिच्छेदअ! गच्छ।
इति परिक्रामन्ति (१)। (ण)

नाग। सूअअ! इध गोउलदुआले अप्पमत्ता पड़िपालेध मं, जाव लाअउलं पविसिअ णिक्कमामि (२)। (त)

(ढ) जालुक! मत्स्योदराभ्यन्तरगतमिति नास्ति सन्देहः, यतः अयमामिषगन्धो वाति। आगम इदानीमेतस्यैव विमर्ष्टव्यः. तदेत राजकुलमेव गच्छामः।

(ण) गच्छ रे ग्रन्थिच्छेदक! गच्छ।

(ढ) नागेति। अङ्गुरीयकाघ्राणं मत्स्यगन्धं आगच्छति न वेति परीक्षार्थम्। इति विषये। आमिषगन्धः मत्स्यमांसगन्धः, वाति घ्राणविषयीभवति। एतस्य अङ्गुरीयकस्य, एष एतत्पुरुषीयः, आगमः प्राप्तिवृत्तान्तः, विमर्ष्टव्यः विवेक्तव्यः विचार्य्य द्रष्टव्य इत्यर्थः, तत् तस्मात्, एत आगच्छत।

(ण) रक्षिणाविति। ग्रन्थिं वस्त्रादिग्रन्थिं छिनत्ति तद्गतद्रव्यापहरणाय कृन्ततीति ग्रन्थिच्छेदकश्चौरः। तत्सम्बोधनम्। गच्छ चल अस्माभिः सह राजकुलमिति शेषः। परिक्रामन्ति सर्वं राजकुलं गन्तुं पादक्षेपं कुर्वन्ति।

দেখাইবামাত্রই মহাশয়রা আমাকে ধরিয়াছেন। ইহার আসিবার বৃত্তান্ত এই পর্যান্ত। এখন আমাকে প্রহারই করুন বা কাটিয়াই ফেলুন।

(ঢ) রাজশ্যালক। ( অঙ্গুরীর ঘ্রাণ লইয়া ) জালুক! মৎস্যের উদরের ভিতরে যে গিয়াছিল, এবিষয়ে সন্দেহ নাই; যে হেতু এই আমিষের গন্ধ আসিতেছে। অতএব এখন ইহার এই প্রাপ্তিবৃত্তান্তের বিবেচনা করিতে হইবে। অতএব আইস, রাজবাড়ীই যাই।

(ণ) রক্ষিদ্বয়। ( ধীবরের প্রতি ) চল্ রে গাঁইটকাটা চল্। (ইহার পর সকলে পদক্ষেপ করিতে লাগিল )

---

(१) रक्षिणौ। तह।

(२) श्यालः। गच्छ अत्री गण्ठिभेदक!। सर्वं परिक्रामन्ति।

...Krishna Public Li

উভৌ। পবিশদু আবুত্তে সামিপ্পসাদত্থং (১)। (থ)

নাগ। পরিক্রম্য নিষ্ক্রান্তঃ (২)। (দ)

সূচকঃ। জালুঅ! চিলাঅদি ক্খু আবুত্তে। (ধ)

(ত) সূচক! ইহ গোপুরদ্বারে অপ্রমত্তৌ প্রতিপালয়তং মাম্, যাবৎ রাজকুলং প্রবিশ্য নিষ্ক্রামামি।

(থ) প্রবিশতু আবুত্তঃ স্বামিপ্রসাদার্থম্।

(ধ) জালুক। চিরয়তি খল্বাবুত্তঃ।

(ত) নাগেতি। গোপুরদ্বারে পুরদ্বারে, অপ্রমত্তৌ সাবধানৌ সন্তৌ, অন্যথা যদয়ং ধীবরঃ পলায়েতেতি ভাবঃ। প্রতিপালয়তং যুবাং প্রতীক্ষেথাম্।

"পুরদ্বারেঽপি গোপুরম্" ইতি রত্নকোষঃ।

(থ) উভাবিতি। আবুত্তো ভগিনীপতিঃ, স্বামিনো রাজ্ঞঃ প্রসাদার্থং প্রসন্নতা-লাভার্থম্। ধীবরধারণে স্বামী সন্তুষ্যত্বেবেতি ভাবঃ।

(দ) নাগেতি। পরিক্রম্য রাজপুরপ্রবেশায় পাদক্ষেপং কৃত্বা।

(ধ) সূচক ইতি। চিরয়তি বিলম্বতে। সবিরাগোক্তিরিয়ম্।

(ত) রাজশ্যালক। সূচক! এই বাড়ীর দ্বারে সাবধান হইয়া আমার প্রতীক্ষা কর, যাবৎ আমি রাজবাড়ীর ভিতরে যাইয়া, ফিরিয়া আসি।

(থ) রক্ষিদ্বয়। রাজার সন্তোষ জন্মাইবার জন্য ভগিনীপতি প্রবেশ করুন।

(দ) রাজশ্যালক। ( পাদক্ষেপ করিয়া চলিয়া গেলেন। )

(ধ) সূচক। জালুক! ভগিনীপতি বড় বিলম্ব করিতেছেন।

(১) শ্যালঃ। সূঅঅ! ইমং পুরদুআরে অপ্পমত্তা পড়িবালেহ, জাব ইমং অঙ্গুলীঅঅং জহাগমণং ভট্টিণো ণিবেদিঅ তদো সাসণং পড়িচ্ছিঅ ণিক্কমামি।

(২) উভৌ। পবিসদু আবুত্তে সামিপ্পসাদস্স। নিষ্ক্রান্তঃ শ্যালঃ।

जालुकः । णं अवशलोवशप्पणीआ लाआणो होन्ति । (न)

सूचकः । फुलन्ति मे अग्गहत्था इमं गण्ठिच्छेदअं वावादिदुं (१) । (प)

धीवरः । णालिहदि भावे अआलणमालके भविदुं (२) । (फ)

जालुकः । विलोक्य । एशे अह्माणं इश्शले पत्ते गेह्णिअ लाअशाशणं आअच्छदि । शम्पदं एशे शउलाणं मुहं पेक्खदु, अहवा गिद्धशिआलाणं वली होदु (३) । (ब)

---

(न) ननु अवसरोपसर्पणीया राजानो भवन्ति ।

(प) स्फुरतो मे अग्रहस्तौ इमं ग्रन्थिच्छेदकं व्यापादयितुम् ।

(फ) नार्हति भावः अकारणमारको भवितुम् ।

---

(न) जालुक इति । अवसरेण राज्ञामिवावकाशेन उपसर्पणीया उपगम्याः । तथा च प्रायेणैव राजानः कार्य्यव्यासक्तास्तिष्ठन्ति, तदा च तैः सहालापो न सम्भवति, तेन चावसरः प्रतीक्षणीयस्ततश्चायं विलम्ब इति भावः ।

(प) सूचक इति । अग्रहस्तौ हस्तयोरग्रभागौ, स्फुरतः सञ्चलतः ।

(फ) धीवर इति । भावो विद्वान् भवान्, अकारणमारको विना कारणं हन्ता । तस्यान्याय्यत्वात् भावत्वव्याघातकत्वाच्चेति भावः ।

---

(ন) জালুক । ওরে ! অবসরক্রমে রাজাদের নিকট যাইতে হয় ।

(প) সূচক । এই গাঁইটকাটাকে হত্যা করিবার জন্য আমার হাতের আগা লাফাইতেছে ।

(ফ) ধীবর । মহাশয় অকারণ-হত্যাকারী হইতে পারেন না ।

---

(१) प्रथमः । जालुअ ! फुलन्ति मे हत्था इमस्स वहस्स सुमणो पिणद्धुं । पुरुषं णिहिंसति । (२) पुरुषः ।···अआलवो मालवो···।

(३)···अह्माणं शामी पत्तहत्थे लाअशाशणं परिच्छिअ इदोमुहे दिक्खीअइ । गिद्धवली हुविश्शशि शुणो मुहं वा देक्खिश्शशि ।

নাগ। প্রবিশ্য। সিগ্ঘং সিগ্ঘং এদং। ইত্যর্দ্ধোক্তে (১)। (ভ)
ধীবরঃ। হা হদোম্হি। ইতি বিষাদং নাটয়তি। (২)। (ম)

---

(ব) এষঃ অস্মাকমীশ্বরঃ। পত্রং গৃহীত্বা রাজশাসনমাগচ্ছতি সাম্প্রতমেষ স্বকুল্যানাং মুখং প্রেক্ষতাম্, অথবা গৃধ্রশৃগালানাং বলির্ভবতু।

(ভ) শীঘ্রং শীঘ্রমেতম্।

(ম) হা হতোঽস্মি।

---

(ব) জালুক ইতি। ঈশ্বরঃ প্রভুর্নাগরিকশ্যালঃ, রাজশাসনং রাজাদেশম্, পত্রং গৃহীত্বা লেখয়িত্বা পত্রলিখিতং রাজশাসনমাদায়েত্যর্থঃ। এষ ধীবরঃ, স্বকুল্যানাং জ্ঞাত্যাদীনাম্, মুখং প্রেক্ষতাম্, মোচনেন স্বগৃহগমনাৎ, বলিরুপহারঃ খাদ্য ইতি যাবৎ ভবতু ব্যাপাদনাদিতি ভাবঃ।

(ভ) নাগেতি। শীঘ্রং শীঘ্রমেতং মুঞ্চতং জালোপজীবিনম্ ইতি বাক্যস্য শীঘ্রং শীঘ্রমেতমিত্যংশঃ অর্দ্ধমেব স্যাদেত উক্তম্ ইত্যর্দ্ধোক্তে ইতি।

(ম) ধীবর ইতি। এতং ব্যাপাদয়তমিতি বক্ষ্যতীতি মত্বা ধীবরস্যোক্তিরিয়ং বিষাদ-নাটনঞ্চেতি বোধ্যম্।

---

(ব) জালুক। (দেখিয়া) এই আমাদের প্রভু, পত্রে রাজার আদেশ লইয়া আসিতেছেন। এখন এ, স্ববংশীয়দের মুখই দেখুক, কিংবা শিয়াল-শকুনের খাদ্যই হউক।

(ভ) রাজশ্যালক। (প্রবেশ করিয়া) সত্বর সত্বর ইহাকে—(এই অর্দ্ধোক্তির পর)

(ম) ধীবর। হায়! মরিয়াছি। (এই বলিয়া বিষাদের অভিনয় করিল।)

---

(১) পুস্তকান্তরে এষ পাঠো নাস্তি।

(২) অয়ং পাঠোঽপি ন দৃশ্যতে।

नाग। मुञ्चध जालोवजीविणं। उववस्रो से अङ्गुलि-
अस्स आगमे, अम्हसामिणा जाव कधिदं (१)। (य)

सूचक:। जहा आणवेदि आवुत्ते (२)। जमवसदिं गदुअ
पड़िणिउत्तो क्खु एसो। इति धीवरं बन्धनान्मोचयति (३)। (र)

धीवर:। भट्टके! अम्मदं तुह केलके मे जीविदे।
इति पादयो: पतति (४)। (ल)

(य) मुञ्चत जालोपजीविनम्। उपपन्न: अस्य अङ्गुलीयकस्य आगम:, अस्मत्-
स्वामिना यावत् कथितम्।

(र) यथा आज्ञापयति आवुत्त:। यमवसतिं गत्वा प्रतिनिवृत्त: खल्वेष:।

(य) नागेति। जालोपजीविनं धीवरम्। यावत् यस्मात् आगम: प्राप्तिवृत्तान्त:,
उपपन्न: सङ्गत:, इति अस्मत्स्वामिना राज्ञा दुष्मन्तेन कथितमतो मुञ्चतमित्यर्थ:।

(र) सूचक इति। यमवसतिं यमालयम्। यमवसतिं गत्वा पुन: प्रतिनिवृत्तस्य
यथा सौभाग्यं मन्यते, तथा अस्यापि प्राणदण्डसम्भवे मुक्तिलाभात् सौभाग्यं मन्यत
इत्याशय:।

(য) রাজশ্যালক। জালোপজীবিকে ছাড়িয়া দাও। এই অঙ্গুরীয়
প্রাপ্তিবৃত্তান্ত খাটিয়াছে, ইহা আমাদের প্রভু বলিয়াছেন।

(র) সূচক। ভগিনীপতি যাহা আদেশ করেন। এ বেটা যমের
বাড়ী যাইয়া, ফিরিয়া আসিল। (এই বলিয়া ধীবরকে বন্ধন হইতে
মুক্ত করিল।)

(१) प्रविश्य श्याल:। सूअअ! मुञ्चीअउ एसो जालोवजीवी। उववस्रो
किल से अङ्गुलीअअस्स आअमो।

(२) सूचक:। जह आवुत्तो भणाइ।

(३) द्वितीय:। एसो जमसदणं पविसिअ पड़िणिउत्तो। इति पुरुषं विमुक्त-
बन्धनं करोति। (४) पुरुष:। श्यालं प्रणम्य। भट्टा! अह केलिसो मे आजीवे।

নাগ। উট্ঠেহি, এসে ভট্টিণা অঙ্গুলীঅ-মুল্ল-সম্মিদে পারিদোসিএ দে প্পসাদীকিদে, তা গেণ্হ এদং। ইতি ধীবরায় কটকং দদাতি (১)। (ব)

ধীবর:। সহর্ষং সপ্রণামঞ্চ প্রতিগৃহ্য। অণুগ্গহীদোম্হি (২)। (শ)

(ল) ভর্ত্ত:! সাম্প্রতং তব ক্রীতকং মে জীবিতম্।

(ব) উত্তিষ্ঠ, এতৎ ভর্ত্রা অঙ্গুরীয়মূল্যসম্মিতং পারিতোষিকন্তে প্রসাদীকৃতম্, তৎ গৃহাণ ইদম্।

(শ) অনুগৃহীতোঽস্মি।

(ল) ধীবর ইতি। ভর্ত্তরিতি নাগরিকসম্বোধনম্। ক্রীতকং ক্রীতস্বরূপম্।

(ব) নাগেতি। ভর্ত্তা রাজা। অঙ্গুরীয়কমূল্যেন সম্মিতং পরিমিতম্ অঙ্গুরীয়ক-মূল্যতুল্যমূল্যকমিত্যর্থ:, মৎস্যোদরগতং অঙ্গুরীয়কং নিধিবৎ উপাদাতুরেব স্বত্বোদয়াৎ তদগ্রহণেন তত্তুল্যমূল্যকদ্রব্যান্তরদানস্যৌচিত্যাদিত্যাশয়:। প্রসাদীকৃতং প্রসন্নতয়া দত্তম্। কটকং বলয়ম্।

(শ) ধীবর ইতি। অনুগৃহীতোঽস্মি, এতল্লাভাদিতি ভাব:।

(ল) ধীবর। হুজুর! আমার জীবন এখন আপনার কেনা হইল। (এই বলিয়া পায়ের উপর পড়িল।)

(ব) রাজশ্যালক। উঠ, মহারাজ অনুগ্রহ করিয়া অঙ্গুরীর মূল্যের সমান এই পারিতোষিক তোমাকে দিয়াছেন; অতএব ইহা গ্রহণ কর। ( এই বলিয়া, ধীবরকে বলয় দান করিলেন। )

(শ) ধীবর। ( আনন্দ ও প্রণামের সহিত গ্রহণ করিয়া ) অনুগৃহীত হইলাম।

(১) শ্যাল:। এসো ভট্টিণা···সম্মিদো পসাদো বি দাবিদো। পুরুষায়ার্থং দদাতি।

(২) পুরুষ:। সপ্রণামং পরিগৃহ্য। ভট্টকেণ অণুগহিদম্হি।

জালুকঃ। এসো ক্খু রণ্ণা তধা অণুগ্গহীদে, জধা সুলাদো ওদালিঅ হত্থিক্খন্ধে সমারোবিদে (১)। (ষ)

সূচকঃ। আবুত্ত! পালিতোসিএণ জাণামি মহালিহল-দণেণ অঙ্গুলীঅএণ সামিণো বহুমদেণ হোদব্বং (২)। (স)

নাগ। ণ তস্সিং ভট্টিণো মহালিহলদণং ত্তি কদুঅ পরিদোসো। এত্তি উণ তক্কেমি (৩)। (হ)

(ষ) এষ খলু রাজ্ঞা তথা অনুগৃহীতঃ, যথা শূলাদবতার্য্য হস্তিস্কন্ধে সমারোপিতঃ।

(স) আবুত্ত! পারিতোষিকেণ জানামি মহার্হরত্নেন অঙ্গুরীয়কেণ স্বামিনো বহুমতেন ভবিতব্যম্।

(হ) ন তস্মিন্ ভর্ত্তুর্মহার্হরত্নমিতি কৃত্বা পরিতোষঃ। এতৎ পুনস্তর্কয়ামি।

(ষ) জালুক ইতি। এষ ধীবরঃ। সমারোপিত উত্থাপিতঃ।

(স) সূচক ইতি। পারিতোষিকেণ ধীবরায় পারিতোষিকদানেন, জানামি মন্যে; মহার্হরত্নেন মহামূল্যমণিসত্ত্বেন হেতুনা, স্বামিনো রাজ্ঞঃ, বহুমতেন অত্যাদৃতেন।

---

(ষ) জালুক। মহারাজ ইহার প্রতি সেইরূপ অনুগ্রহ করিয়াছেন, যে রূপ শূল হইতে নামাইয়া হাতীর ঘাড়ে চড়ান হয়।

(স) সূচক। ভগিনীপতি! পারিতোষিকে বুঝিতেছি যে, মহামূল্য-রত্নসমন্বিত অঙ্গুরীটী মহারাজের বিশেষ আদরের বস্তু হইবে।

(১) সূচকঃ। এসো ণাম অণুগ্গহে জে সূলাদো অবদালিঅ হত্থিক্খন্ধে পড়িট্ঠাবিদে।

(২) জালুকঃ। আবুত্ত! পলিদোসো কহেই তেণ অঙ্গুলীঅএণ ভট্টিণো সম্মদেণ হোদব্বং।

(৩) শ্যালঃ। ণ তস্সিং মহারুহং রদণং ভট্টিণো বহুমদং ত্তি তক্কেমি। তস্স দংসণেণ ভট্টিণো অহিমদো জণো সুমরাবিদো। মুহুত্তঅং পকিদিগম্ভীরোঽবি পজ্জুস্সুঅ-অণো আসি।

উভৌ। কিং উণ (১)। (ঘ)

নাগ। তস্স দংসণেণ ভট্টিণা কোবি অহিমদো জণো সুমরিদোত্তি, জদো মুহুত্তঅং পইদিগম্ভীরোবি পজ্জুস্সুঅমণা আসী। (ক)

সূচকঃ। তোসিদে শোইদে অ দাণিং ভট্টা আবুত্তেণ (২)। (খ)

(ঘ) কিং পুনঃ?।

(ক) তস্য দর্শনেন ভর্ত্তা কোঽপ্যভিমতো জনঃ স্মৃত ইতি, যতো মুহূর্ত্তং প্রকৃতিগম্ভীরোঽপি পর্য্যুৎসুকমনা আসীৎ।

(ছ) নাগেতি। তস্মিন্ অঙ্গুরীয়কে, মহার্হরত্ন মহামূল্যমণিরস্তি ইতি কৃত্বা, ন পরিতোষঃ। তর্হি কিমিত্যাহ এতদিতি।

(ঘ) উভাবিতি। কিং পুনস্তর্কয়সীতি শেষঃ।

(ক) নাগেতি। তস্য অঙ্গুরীয়কস্য, ভর্ত্তা রাজা। প্রকৃতিগম্ভীরোঽপি স্বভাবধীরোঽপি, মুহূর্ত্তং কিয়ৎক্ষণং যাবৎ, পর্য্যুৎসুকমনা উৎকণ্ঠিতচিত্তঃ।

(খ) সূচক ইতি। আবুত্তেন ভগিনীপতিনা ভবতা, ইদানীং ভর্ত্তা রাজা, তোষিতঃ বিঘটিতাঙ্গুরীয়কদানেন সন্তোষং নীতঃ, শোচিতশ্চ অভিমতজনস্মারণেন শোকং প্রাপিতশ্চ।

(ছ) রাজশ্যালক। সেই আংটীতে মহামূল্য রত্ন আছে বলিয়া, মহারাজের সন্তোষ হয় নাই; কিন্তু আমি ইহা মনে করি।

(ঘ) রক্ষিদ্বয়। কি?।

(ক) রাজশ্যালক। সেই অঙ্গুরীদর্শনে মহারাজের কোন অভিমত লোক মনে পড়িয়াছে; যে হেতু তিনি স্বভাবগম্ভীর হইয়াও কিছুকালের জন্য উৎকণ্ঠিতচিত্ত হইয়াছিলেন।

(খ) সূচক। ভগিনীপতি বর্ত্তমানে রাজাকে সন্তুষ্ট ও দুঃখিত দুই রকমই করিয়াছেন।

(১) ক্বচিদিয়মুক্তির্নাস্তি। (২) সূচকঃ। শোচিদং আম আবুত্তেণ।

जालुकः। णं भणेमि इमस्स मच्छअत्तुणो किदे। इति धीवर-मसूयया पश्यति (१)। (ग)

धीवरः। भट्टालके! इदो अद्धं तुम्हाणम्पि सुलामुल्लं होदु (२)। (घ)

जालुकः। धीवल! महत्तले सम्पदं अम्हाणं पिअवअ-

(ख) तोषितः श्चिरस्येदानीं भर्त्ता आवुत्तेन।

(ग) ननु भणामि अस्य मत्स्यशत्रोः कृते।

(घ) भट्टारक! इतः अर्द्धं युष्माकमपि सुरामूल्यं भवतु।

(ग) जालुक इति। नन्विति सूचकसम्बोधने। मत्स्यशत्रोर्धीवरस्य, कृते निमित्ते धीवरनिमित्तकमेवेत्यर्थः, भर्त्ता शोचित इत्यन्वयः। तथा च धीवरो यदि अङ्गुरीयकं न प्राप्नुयात् प्राप्य वा न दर्शयेत् न दद्याद्वा, तदा आवुत्तो राज्ञे तद्दर्शयितुं न शक्नुयात्, तथा च सति राजा अभिमतजनं न स्मरेत् ततश्च तस्य शोको न स्यादिति भावः। असूयया भ्रुकुटीभङ्ग्या दोषारोपणेन इयमुक्तिः इयञ्च सासूयदृष्टिः आत्मोत्कर्षज्ञापनेन धीवर-लब्धपारितोषिकस्य किञ्चिदंशमादातुमिति बोध्यम्।

"अर्थे कृतेऽव्ययं तावत् तादर्थ्ये वर्त्तते इदम्" इति कोषसारः।

(घ) धीवर इति। जालुकाभिप्रायं बुद्ध्वाह भट्टेति। हे भट्टारक! प्रभो! इतः अस्य पारितोषिकस्य। सुरामूल्यं मद्यक्रयणमूल्यम् अस्य अर्द्धं युष्मभ्यमपि दातु-मिच्छामीत्यर्थः।

(গ) জালুক। ওহে! আমি বলি—এই মৎস্য-শত্রুর জন্য। (এই বলিয়া অসূয়ার ভাবে ধীবরের প্রতি চাহিল।)

(ঘ) ধীবর। হুজুর! ইহার অর্দ্ধ, তোমাদেরও মদের মূল্য হউক।

(१) जालुकः। णं भणाहि, इमस्स कए मच्छिआभत्तुणोत्ति। पुरुषमसूयया पश्यति।

(२) पुरुषः।···तुम्हाणं सुमणोमुल्लं होउ। जालुकः। एत्तके जुज्जइ।

श्शके शंवुत्ते शि, कादम्बलीशक्खिके क्खु पढमं शोहिदे इच्छी-अदि। ता एहि, शुण्डिआलअं ज्जेव गच्छह्म (१)। (ङ)

इति निष्क्रान्ताः सर्वे।

## अङ्कावतारः (२)। (च)

(ङ) धीवर! महत्तरः साम्प्रतमस्माकं प्रियवयस्यः संवृत्तोऽसि, कादम्बरीसाक्षिकं खलु प्रथमसौहृदमिष्यते, तदेहि शौण्डिकालयमेव गच्छामः।

---

(ङ) जालुक इति। उत्कोचदानाङ्गीकारमाकर्ण्य सन्तोषादाह महेति। साम्प्रतमुत्कोचदानाङ्गीकारात् परम्। महत्तरः अतीवप्रधानः। कादम्बरी मदिरा साक्षिणी यस्य तत्तादृशम् इष्यते। शौण्डिकालयं मद्यविक्रयिणो गृहम्।

(च) अङ्केति। अङ्कः अङ्कान्तरमवतरत्यस्मिन् अङ्कमङ्कान्तरमवतारयतीति वा अङ्कावतारः अर्थोपक्षेपकविशेषः। तथा च दर्पणे—

"अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ।
चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि॥
अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः।
यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः॥"

तद्वृत्तिश्च—"यथा अभिज्ञाने पञ्चमाङ्के पात्रैः सूचितः। षष्ठाङ्कस्तदङ्कस्याङ्गविशेष इवावतीर्णः।" एतदङ्कवृत्तान्तोपजीवित्वात् षष्ठाङ्कस्येति भावः।

(ঙ) জালুক। ধীবর! তুমি এখন আমাদের প্রধান প্রিয়সুহৃদ হইলে; লোকে মদ্যকে প্রথমসৌহার্দ্দের সাক্ষী বলিয়া ইচ্ছা করিয়া থাকে। সুতরাং আইস শুঁড়ির বাড়ীই যাই।

(ইহার পর সকলে চলিয়া গেল।)

(চ) অঙ্কাবতার সমাপ্ত ॥০॥

---

(१) श्यालः। धीवर! महत्तरो तुमं पिअवअस्सो दाणिं मे संवुत्तो।··· सोण्डिआपणं···। (२) प्रवेशकः।

## षष्ठोऽङ्कः।

—०:*:०—

ततः प्रविशत्याकाशयानेन मिश्रकेशी (१)। (क)

मिश्र। णिव्वत्तिदं मए पज्जाअणिव्वत्तणिज्जं अच्छरात्तित्थसन्दिट्ठं, ता जाव साहुजणस्स अहिसेअकालो भवे दाव सम्पदं इमस्स राएसिणो वुत्तन्तं पच्चक्खीकरिस्सं। णं मेणआ-

(ख) निर्वर्त्तितं मया पर्य्यायनिर्वर्त्तनीयमप्सरस्तीर्थसन्दिष्टम्, तद्यावत् साधुजनस्याभिषेककालो भवेत्, तावत् साम्प्रतमस्य राजर्षेर्वृत्तान्तं प्रत्यक्षीकरिष्यामि। ननु

(क) तत इति। मिश्राः सम्मिलिता अतीवघनाः केशा यस्याः सा मिश्रकेशी तदाख्या काचिदप्सराः। आकाशयानेन विमानेन।

(ख) निर्वेति। अप्सरस्तीर्थैः रम्भादिभिरप्सरोश्रेणिभिः सन्दिष्टमभिहितम्, पर्य्यायेण क्रमेण निर्वर्त्तनीयम् अस्माभिरप्सरोगणैरेव सम्पादनीयं कुवेरस्य परिचर्य्यात्मकं कर्म्मेत्यर्थः, मया निर्वर्त्तितं सम्पादितम्। तीर्थमित्युपक्रम्य "योनौ पात्रे दर्शने च" इति हेमचन्द्रः। साधुजनस्य देवलोके वार्द्धुषिकरूपस्य कुवेरस्य, अभिषेककालः स्नानसमयो भवेत्। राजर्षेर्दुष्मन्तस्य। कुवेरस्य स्नानसमयोपस्थितौ तु मयापि तत्रैव गन्तव्यमिति भावः।

"साधुर्जिने मुनौ वार्द्धुषिके सज्जनरम्ययोः" इत्यपि हेमचन्द्रः।

(क) তদনন্তর বিমানে মিশ্রকেশীর প্রবেশ।

(খ) মিশ্রকেশী। ক্রমশঃ সম্পাদন করিবার জন্য, অপ্সরাদিগের প্রতি যে সংবাদ ছিল, তাহা আমি সম্পাদন করিয়াছি। অতএব যে পর্য্যন্ত কুবেরের স্নানের সময় উপস্থিত হয়, তাহার মধ্যে এই রাজর্ষির বৃত্তান্ত প্রত্যক্ষ করিব। মেনকার সম্বন্ধে শকুন্তলা এখন আমার

(१) ततः···सानुमती नामाप्सराः।

सम्बन्धेण सरीरभूदा दाणिं मे सउन्तला, तए अ दुहिदु-णिमित्तं सन्दिट्ठपूव्वह्मि। समन्तादवलोक्य। किन्नु क्खु उवत्थि-दुस्सवेवि दिअहे णिरुस्सवारम्भं विअ एदं राअउलं दीसदि। अत्थि मे विहवो ‹सव्वं पणिधाणेण जाणिदुं, किन्तु सहीए मए आदरो माणइदव्वो। भोदु, इमाणं ज्जेव उज्जाण-वालआणं पास्सपरिवत्तिणी भविअ तिरक्करिणीए विज्जाए पच्छुसा उवलहिस्सं। इति नाट्येनावतीर्य स्थिता (१)। (ख)

मेनकासम्बन्धेन शरीरभूतेदानीं मे शकुन्तला, तया च दुहितृनिमित्तं सन्दिष्टपूर्वास्मि। किन्नु खलु उपस्थितोत्सवेऽपि दिवसे निरुत्सवारम्भमिव इदं राजकुलं दृश्यते। अस्ति

मेनकायाः- सम्बन्धेन कन्यात्वसम्बन्धेन हेतुना, शकुन्तला मे मम शरीरभूता देह-स्वरूपा, मेनकाया मातृत्वसखीत्वात् तत्कन्यायाः शकुन्तलायाश्च मम भगिनीरूपत्वात् प्रिय-सखित्वाच्चेति भावः। तया च मेनकया, दुहितृनिमित्तं कन्याशकुन्तलार्थम्, पूर्वं सन्दिष्टेति सन्दिष्टपूर्वा 'शकुन्तलानिमित्तं दुष्मन्तः किं करोतीति तत्सन्निधौ गत्वा त्वया ज्ञातव्यम्' इत्युक्तपूर्वेत्यर्थः।

समन्तात् सर्वासु दिक्षु। उपस्थित उत्सव उत्सवनियमो यत्र तस्मिन्। निर्नं विद्यते उत्सवारम्भो यस्मिन् तत् तादृशम्। राजकुलं राजभवनम्। सर्वं वृत्तान्तम्,

শরীরস্বরূপ হইয়াছে; অথ চ কন্যার নিমিত্ত পূর্বে মেনকা আমাকে সংবাদ দিয়াছেন। (সকল দিক্ দৃষ্টিপাত করিয়া) যে দিন উৎসবের নিয়ম ছিল, সে দিনও এই রাজভবন নিরুৎসব দেখিতেছি কেন?

(১) सानुमती। चिव्वणिवं मए पज्जाअविव्वत्तणिज्जं अच्छराणित्थसखिजणं जाव साहुंजणस्स अहिसेअकालो त्ति। सपदं इमस्स राएसिणो उदन्तं पच्चक्खी-करिस्सं।...णिमित्तं आदिट्ठपुव्वह्मि।... किण्णु क्खु उस्सवे वि णिरुस्सवारम्भं। सव्वं परिण्णादुं।...

ततः प्रविशति चूताङ्कुरमालोकयन्ती चेटी तत्पृष्ठेऽपरा च (१)। (ग)

**प्रथमा। कधं उवत्थिदो महुमासो। (घ)**

मे विभवः सर्वं प्रणिधानेन ज्ञातुम्। किन्तु सख्या मया आदरो मानयितव्यः। भवतु, एषामेवोद्यानपालकानां पार्श्वपरिवर्तिनी भूत्वा तिरस्करिण्या विद्यया प्रच्छन्ना उपलप्स्ये।

(घ) कथमुपस्थितो मधुमासः।

प्रणिधानेन ध्यानेन, ज्ञातुम्, मे मम विभवः शक्तिरस्ति। तर्हि कथमेतावानागमन-परिश्रम इत्याह किन्त्विति। सख्याः शकुन्तलायाः, आदरः प्रत्यक्षतो राजवृत्तान्तदर्शनाय आदरेण कृतोऽनुरोधः, मया मानयितव्यः सम्मानेन रक्षणीयः। तथा च यत्र कुत्रापि स्थित्वा ध्यानेन सर्वमवगन्तुं शक्तापि शकुन्तलायाः सादरानुरोधादेव एतावन्तमागमन-परिश्रममहमङ्गीकृतवतीति सरलार्थः। तिरस्करिण्या अदृश्यताजनिकया, विद्यया मन्त्रेण, प्रच्छन्ना अदृश्यदेहा, सती, उपलप्स्ये राजवृत्तान्तं ज्ञास्यामि। नाट्येन अभिनयेन।

(ग) तत इति। चूताङ्कुरमाम्रमुकुलम्। चेटी काचित् दासी, तस्याः पृष्ठे पश्चाद्भागे, अपरा चेटी च, प्रविशतीत्यन्वयः।

(घ) प्रथमेति। कथमिति हर्षे। मधुमासो वसन्तमासश्चैत्र इति यावत्।

"कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे। प्रश्ने सम्भावनायाञ्च" इति मेदिनी।

ধ্যানে সমস্ত জানিবার ক্ষমতাই আমার আছে; কিন্তু সখীর সাদর অনুরোধ রাখিতে হইবে। হউক, এই উদ্যানপালকদিগের পার্শ্ববর্ত্তিনী হইয়া, তিরস্করিণী বিদ্যাদ্বারা গুপ্ত থাকিয়া, রাজার বৃত্তান্ত জানিব। ( এই বলিয়া অভিনয়ের ধরণে নামিয়া থাকিল। )

(গ) তাহার পর আমের মুকুল দেখিতে দেখিতে একটী দাসী এবং তাহার পিছনে আর একটী দাসীর প্রবেশ।

(ঘ) প্রথমা দাসী। আঁা! চৈত্রমাস উপস্থিত হইয়াছে।

(१) चेटी अपरा च पृष्ठतस्तस्याः।

আতম্মহরিঅবৈণ্ট' উস্সসিঅ' বিঅ বসন্তমাসস্স।
দিট্ঠ' চূঅঙ্কুরঅ' ছণমঙ্গল' ণিঅচ্ছামি (১) ॥১॥

দ্বিতীয়া। পরহুদিএ! কি' এদ' এআইণী মন্তেসি। (ঙ)

আতাম্রহরিতবৃন্তং উচ্ছ্বসিতমিব বসন্তমাসস্য।
দৃষ্টং চূতাঙ্কুরকং ক্ষণমঙ্গল্যং নিয়চ্ছামি ॥১॥

(ঙ) পরভৃতিকে! কিমেতদেকাকিনী মন্ত্রয়সে।

আতাম্রেতি। আতাম্রাণি ঈষত্তাম্রবর্ণানি হরিতানি পালাশবর্ণানি চ বৃন্তানি যস্য তৎ, ক্ষণমঙ্গলায় উৎসবরূপমঙ্গলকার্য্যায় হিতমিতি ক্ষণমঙ্গল্যম্, বসন্তমাস-জ্ঞাপকত্বাৎ তদুৎসবসম্পাদকত্বাচ্চেতি ভাবঃ, দৃষ্টমবলোকিতমিমম্, চূতাঙ্কুরকম্ আম্রমুকুলম্, বসন্তমাসস্য চৈত্রমাসস্য, উচ্ছ্বসিতং জীবিতমিব, নিয়চ্ছামি নিশ্চিনোমি সম্ভাবয়ামীত্যর্থঃ, বসন্তমাসসত্তাসূচকত্বাদিত্যাশয়ঃ।

অত্র বাচ্যা ভাবাভিমানিনী ক্রিয়োৎপ্রেক্ষালঙ্কারঃ।

"নির্ব্যাপারস্থিতৌ কালবিশেষোৎসবয়োঃ ক্ষণঃ" ইত্যমরঃ। "নিয়মঃ স্যাৎ প্রতিজ্ঞায়াং নিশ্চয়ে যন্ত্রণে ব্রতে" ইতি হেমচন্দ্রঃ। আর্য্যা জাতিঃ ॥১॥

(ঙ) দ্বিতীয়েতি। পরৈঃ ভ্রিয়তে ইতি পরভৃতিঃ ততঃ সংজ্ঞায়াং কপ্রত্যয়াৎ পরভৃতিকেতি প্রথমদাস্যা নাম, তেন চ সম্বোধনম্। তন্নাম্না কোকিলা চ গম্যতে। মন্ত্রয়সে গুপ্তং ভাষসে।

যাহার বৃন্ত ঈষৎ তাম্র ও হরিতবর্ণ এবং যে উৎসবরূপ মঙ্গলকার্য্য সম্পাদন করিয়া থাকে, দৃশ্যমান সেই আম্রমুকুলকে চৈত্রমাসের জীবনের ন্যায় মনে করিতেছি ॥১॥

(ঙ) দ্বিতীয়া দাসী। পরভৃতিকা! তুই একাকিনী এই কি বলিতেছিস? ।

(১) প্রথমা। আতম্রহরিঅপণ্ডুর! বসন্তমাসস্স জীঅসব্বস্স!।
দিট্ঠো সি চূঅকোরঅ! উদুমঙ্গল! তুমং পসাএমি ॥

प्रथमा। महुअरिए! चूअकलिअं पेक्खिअ उम्मत्तिआ क्खु परहुदिआ होदि। (च)

द्वितीया। सहर्षं त्वरया उपगम्य। कधं उवत्थिदो महु-मासो!। (छ)

प्रथमा। महुअरिए! तवावि एसो कालो मदविब्भ-मुग्गीदाणं (१)। (ज)

(च) मधुकरिके! चूतकलिकां प्रेक्ष्य उन्मत्ता खलु परभृतिका भवति।

(छ) कथमुपस्थितो मधुमासः।

(ज) मधुकरिके! तवापि एष कालो मदविभ्रमोद्गीतानाम्।

(च) प्रथमेति। मधु मधुवत् मधुरं वचनं पुष्परसञ्च करोति वदति सञ्चिनोति चेति मधुकरी, ततोऽपि च संज्ञायां कप्रत्ययात् मधुकरिकेति द्वितीयदास्या नाम, तेनापि च सम्बोधनम्। तन्नाम्ना भ्रमरी च गम्यते। चूतकलिकाम् आम्रमुकुलम्। पर-भृतिका तदाख्या दासी, अहमित्याशयः, कोकिला च उन्मत्ता वसन्तकालाविर्भावेन कामाविर्भावात् वसन्तकालाविर्भावाच्चेति भावः।

"वनप्रियः परभृतः कोकिलः पिक इत्यपि" इत्यमरः।

(छ) द्वितीयेति। अत्रापि कथंशब्दो हर्षे।

(ज) प्रथमेति। हे मधुकरिके! तदाख्यदासि! भ्रमरि! च। कालो वसन्ताख्यः, मदविभ्रमेण मत्तताविलासेन उद्गीतानामुच्चैःस्वरेण गानानाम्। एतेन मधुकरिकाया वासन्ती गीतिः प्रचलितेति निर्व्वाध्यामयेदमुक्तमिति बोध्यम्।

(চ) প্রথমা দাসী। মধুকরিকা! পরভৃতিকা আমের কলিকা দেখিয়া উন্মত্ত হইয়া থাকে।

(ছ) দ্বিতীয়া দাসী। (আনন্দের সহিত তাড়াতাড়ি নিকটে যাইয়া) ও! চৈত্রমাস উপস্থিত হইয়াছে।

(१)···तव दाणिं···मदविब्भमगीदाणं।

द्वितीया। सहि! अवलम्बस्स मं, जाव अग्गपदे परिट्ठिदा भविअ चूअप्पसवं गेह्णिअ सम्पादेमि कामदेवस्स अच्चणं (१)। (झ)

प्रथमा। जइ एव्वं, ता ममावि अद्धं अच्चणफलस्स। (ञ)

द्वितीया। सहि! अभणिदे वि एदं सम्पज्जइ एव्व। जदो एक्कं ज्जेव णो एदं सरीरं द्विधा भिन्नं पजावइणा। सखीमवलम्ब्य चूतप्रसवं गृहीत्वा। अम्महे! अप्पवुद्धोवि चूअप्पसवो

(झ) सखि! अवलम्बस्व माम्, यावदग्रपदे परिस्थिता भूत्वा चूतप्रसवं गृहीत्वा सम्पादयामि कामदेवस्य अर्चनम्।

(ञ) यदि एवम्, तन्ममाप्यर्द्धमर्च्चनफलस्य।

(ट) सखि! अभणितेऽपि एतत् सम्पद्यत एव। यत एकमेव नौ एतत् शरीरं

---

(झ) द्वितीयेति। अवलम्बस्व यथा न पतामि तथा धारय। अग्रपदे पदाग्रस्थाङ्गुलीमात्रे। चूतप्रसवमाम्रपुष्पम्।

"स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः।

(ञ) प्रथमेति। यदि एवं मम धारणेन त्वया चूतप्रसवग्रहणं कर्त्तव्यम्, तत् तदा, अर्च्चनफलस्य तच्चूतप्रसवद्वारा पूजनफलस्य अर्द्धं ममापि भवेत्। यदि तदनुमन्यसे, तदा त्वामहमवलम्बे इति भावः।

---

(জ) প্রথমা দাসী। মধুকরিকা! মত্ততাবশতঃ তোরও উচ্চস্বরে গান করিবার এই সময়।

(ঝ) দ্বিতীয়া দাসী। সখি! আমাকে ধর, যাবৎ আমি পায়ের আগায় দাঁড়াইয়া, আমের কলিকা লইয়া, কামদেবের পূজা সম্পন্ন করি।

(ঞ) প্রথমা দাসী। যদি এইরূপ হয়, তবে আমারও পূজাফলের অর্দ্ধ হইবে ত?।

---

(१)···अग्गपाअट्ठिआ···कामदेवअच्चणं करेमि।

বন্ধণভঙ্গসুরহী রাঅদি। কপোতহস্তং কৃত্বা। ণমো ভঅবদে মঅরদ্ধআঅ (১)। (ট)

**অবিহসি মে চূঅঙ্কুর! দিণ্ণো কামস্স গহিদচাবস্স।**
**পহিঅজণজুঅইলক্খো পঞ্চব্ভহিও সরো হোদু (২) ॥২॥**

দ্বিধা ভিন্নং প্রজাপতিনা। অহো! অপ্রবুদ্ধোঽপি চূতপ্রসবো বন্ধনভঙ্গসুরভী রাজতে। নমো ভগবতে মকরধ্বজায়।

(ট) দ্বিতীয়েতি। অমণিতেতি ময়া অননুমতেঽপীত্যর্থঃ, এতৎ অর্ঘনফলস্য তবার্জনম্, সম্পদ্যত এব জায়ত এব, নৌ আবয়োঃ। প্রজাপতিনা বিধাত্রা। ভিন্নং বিভক্তম্। তথা চ আবয়োঃকশরীরেব হৃদয়স্যাভিন্নত্বিকতয়া আত্মনোঽপ্যভিন্নত্বমেব সম্ভাব্যতে, কেবলং শরীরমাত্রতো ভেদঃ। তেন মৎকৃতস্যাপি ত্বৎকৃতত্বেন অর্ঘনফলস্যার্জং তবাপি স্যাদেবেতি ভাবঃ। অপ্রবুদ্ধোঽপি অবিকসিতোঽপি। বন্ধনভঙ্গেন বৃন্তাবচ্ছেদেন সুরভিঃ সুগন্ধিঃ। কপোতহস্তং হস্তয়োঃ কপোতাকারমঞ্জলিম্। কপোতহস্তলক্ষণমুক্তং সঙ্গীতরত্নাকরে—

"কপোতোঽসৌ করৌ যত্র শ্লিষ্টমূলাগ্রপার্শ্বকৌ।"

মকরো মীনবিশেষঃ ধ্বজো যস্য তস্মৈ কামদেবায়।

(ট) দ্বিতীয়া দাসী। সখি! না বলিলেও ইহা হইবেই। যেহেতু বিধাতা আমাদের একই শরীরকে দুইভাগে বিভক্ত করিয়াছেন। (সখীকে ধরিয়া, আমের কলিকা লইয়া) ওহে! বিকসিত না হইলেও আমের কলিকা, বোঁটা ভাঙ্গামাত্র সুগন্ধি হইয়াছে। (অঞ্জলি বন্ধন করিয়া) ভগবান্ কামদেবকে নমস্কার করি।

(১)…অভণিদে বি এদং সম্পজ্জই, জদো একং এব্ব ণো জীবিদং দুহাহিদং সরীরং। সহীমবলম্ব্য স্থিতা চূতাঙ্কুরং গৃহ্ণতী।… সুরহী রাঅদি।

(২) তুমং সি মএ চূঅঙ্কুর! দিণ্ণো কামস্স গহিঅধণুস্স।…পঞ্চব্ভহিও সরো হোহি।

কঞ্চুকী। প্রবিশ্য সক্রোধম্। মা তাবদনাত্মজ্ঞে! দেবেন প্রতিষিদ্ধেঽপি মধূত্সবে চূতকলিকাভঙ্গমারভসে (১)। (ঠ)

অর্হসি মে চূতাঙ্কুর! দত্তঃ কামস্য গৃহীতচাপস্য।
পথিকজনযুবতিলক্ষ্যঃ পঞ্চাভ্যধিকঃ শরো ভবিতুম্ ॥২॥

অর্হসীতি। হে চূতাঙ্কুর! আম্রমুকুল! দত্তো ময়া কামদেবায় উত্সৃষ্টস্ত্বম্, পথিকজনানাং বিরহিলোকানাং যুবতয় এব লক্ষ্যাণি শরব্যাণি যস্য স তথোক্তঃ বিরহিযুবতিতাড়য়িতেত্যর্থঃ, পঞ্চানাং সম্মোহনাদীনাং পঞ্চসংখ্যকানাং শরাণাম্ অন্তরিতঃ অন্তর্গতঃ, গৃহীতচাপস্য ধৃতধনুষঃ কামস্য শরো ভবিতুমর্হসি, তথাপি চূতজাতিত্বাদিত্যাশয়ঃ। তথা চোক্তমমরকোষটীকায়াং রঘুনাথেন—

"সম্মোহনোন্মাদনৌ চ শোষণস্তাপনস্তথা।
স্তম্ভনশ্চেতি কামস্য পঞ্চ বাণাঃ প্রকীর্ত্তিতাঃ ॥"
"অরবিন্দমশোকঞ্চ চূতঞ্চ নবমল্লিকা।
নীলোত্পলঞ্চ পঞ্চৈতে পঞ্চবাণস্য সায়কাঃ ॥"

আর্য্যা জাতিঃ ॥২॥

(ঠ) কঞ্চুকীতি। মা তাবদেবং কুরুতেত্যর্থঃ। আত্মানং ন জানাতীতি অনাত্মজ্ঞা তত্সম্বোধনম্। তথা চ তুচ্ছং দাসীমাত্রমাত্মানং যদি জানীথাঃ, তদা কথমপি রাজাজ্ঞালঙ্ঘনং ন কুর্য্যা ইতি ভাবঃ। দেবেন রাজ্ঞা। মধূত্সবে চৈত্রমাসীয়োত্সবে। অত্র কাকুবশেন চূতকলিকাভঙ্গস্য অন্যায্যত্বং ব্যজ্যতে।

হে আম্রমুকুল! আমি তোমাকে দান করিলাম; তুমি ধনুর্দ্ধারী কামদেবের পাঁচের অন্তর্গত বাণ হইতে পার, বিরহীদিগের যুবতীরমণীগণ তোমার লক্ষ্য হইবে ॥২॥

(ঠ) কঞ্চুকী। (প্রবেশ করিয়া ক্রোধের সহিত।) ওরে আত্মজ্ঞানহীনারা? এরূপ করিস্ না; মহারাজ বসন্তোৎসব নিষেধ করিয়াছেন, আর তোরা আমের কলিকা ভাঙ্গিতে আরম্ভ করিয়াছিস।

(১) প্রবিশ্যাপটীক্ষেপেণ কুপিতঃ কঞ্চুকী।…বসন্তোত্সবে ত্বমাম্রকলিকাভঙ্গম্…।

उभे । भीते । पसीददु पसीददु अज्जो, अगहिदत्था अह्मे (१) । (ड)

कञ्चुकी । हं, न किल श्रुतं भवतीभ्यां यद्वासन्तैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिश्च । तथाहि—(२) (ढ)

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं कुरुवकं तत् कोरकावस्थया ।
कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् ॥३॥

(ड) प्रसीदतु प्रसीदतु आर्य्यः, अगृहीतार्थे आवाम् ।

(ड) उभे इति । भीते सख्यौ मुखमालिन्यादिना भयमभिनयन्त्यावित्यर्थः । अगृहीतः अनवगतः अर्थः राजकर्त्तृकमधूत्सवनिषेधरूपो विषयो याभ्यां ते । तथा च अज्ञाताचरणेन अपराधाल्पत्वात् तं मर्षयत्वित्याशयः ।

(ढ) कञ्चुकीति । हम् इति प्रश्ने । वासन्तैर्वसन्तकालीनैः तदाश्रयिभिः वासन्ततरुवासिभिः पक्ष्यादिभिश्च देवस्य राज्ञः, शासनं मधूत्सवनिषेधादेशः, प्रमाणीकृतमङ्गीकृतं पालितमित्यर्थः । तत् पालनं दर्शयितुमाह तथाहीति ।

(ড) দাসীদ্বয় । ( ভীত হইয়া ) আর্য্য ! প্রসন্ন হউন, প্রসন্ন হউন ; আমরা এবিষয় জানি না ।

(ঢ) কঞ্চুকী । ও ! তোরা শুনিস্ নাই যে, বসন্তকালের বৃক্ষসমূহ, বা তদবস্থিত পক্ষিপ্রভৃতি সকলেই মহারাজের আদেশ পালন করিয়াছে । দেখ—

(१) उभे । भीते ! पसीदउ अज्जो । अगहीदत्था वअं ।

(२) कञ्चुकी । न किल श्रुतं युवाभ्यां यत् वासन्तिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पक्षिभिश्च । तथाहि ।

मिश्र । णत्थि एत्थ सन्देहो, महाप्पहावो क्खु राएसी (१) । (ख)

चूतानामिति । चिरनिर्गतापि बहुपूर्वं बहिर्गतापि, चूतानामाम्राणां कलिका स्वं स्वकीयं स्वधारणीयमित्यर्थः, रजः परागम्, न बध्नाति न धारयति । तथा च सर्वत्र निर्गमानन्तरमेव कलिका परागं धत्ते अत्र तु चिरनिर्गतापि सा राजशासनादेव परागं न धत्त इत्यभिप्रायः यदपि कुरुबकं कुरुबकमुकुलम्, सन्नद्धं बहिर्भूतम्, तदपि कोरकावस्थया कलिकारूपेणैव स्थितम्, राजशासनात् न पुनर्विकसितमिति भावः । तथा शिशिरे शीतकाले, गतेऽपि अतीतेऽपि, पुमांसश्च ते कोकिलाश्चेति पुंस्कोकिलास्तेषाम्, रुतं शब्दः, कण्ठेषु स्खलितं विच्युतम् आविर्भावकाले कण्ठेष्वेव विलग्नमित्यर्थः । स्मरोऽपि अन्यत्र का कथा स्वयं कामदेवोऽपि, चकितो भीतः सन्, तूणात् तूणीरात् अर्द्धकृष्टमर्द्धमुत्तोलितम्, शरं बाणम्, संहरति पुनर्यथास्थानं स्थापयति, शङ्के इत्यहं सम्भावयामि । तेन च अचेतनैर्वृक्षैरविशिष्टचेतनैः पक्ष्यादिभिः देवैश्च राजशासनं पाल्यते, युवाभ्यान्तु न श्रुतमपीति कथं मङ्क्कृत इति भावः ।

अत्र "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः । उत्प्रेक्षावाचकाः" इति दर्पणाभिधानेन शङ्के इति पदसत्त्वात् वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः । सर्वेषामेव पुरुषजातीयानां स्त्रीजात्यपेक्षया मदाधिक्यात् अत्रापि पुंस्कोकिलानां रुत एव रुतसम्भवे राजशासनादेव तन्निवारणमिति ज्ञापनार्थं कोकिलानां पुंस्त्वेन विशेषणमिति न अपुष्टार्थत्वदोषः ।

शार्दूलविक्रीडितं वृत्तम् ॥२॥

আমের মুকুল, বহুকাল নির্গত হইয়াও আপনার পরাগ ধারণ করিতেছে না; কুরুবকের যে মুকুল বাহির হইয়াছিল, তাহা কলিকা অবস্থাতেই রহিয়া গিয়াছে এবং শীতকাল অতীত হইলেও, পুরুষজাতীয় কোকিলগণের রব অন্তর্হিত হইয়াছে। সুতরাং আমি মনে করি— কামদেবও ভীত হইয়া, তূণ হইতে অর্দ্ধ আকৃষ্ট শর উপসংহার করিতেছেন ।৩॥

---

(१) उभे । णत्थि सन्देहो··· ।

प्रथमा। अज्ज! कदिचिदिअसाइं मित्तावसुणा रट्ठिएण भट्टिणो पादमूलं पेसिदा अह्मे इध पमदवणे चित्तकम्म अप्पिदुं। ता आगन्तुअदाए ण सुदपुव्वो अह्मेहिं एसो वुत्तन्तो (१)। (ङ)

(ख) नात्यत्र सन्देहः, महाप्रभावः खलु राजर्षिः।

(ङ) आर्य्य! कतिचिद्दिवसानि मित्रावसुना राष्ट्रियेण भर्त्तुः पादमूलं प्रेषिते आवाम् इह प्रमदवने चित्रकर्म्म अर्पयितुम्, तदागन्तुकतया न श्रुतपूर्व आवाभ्यामेष वृत्तान्तः।

(ख) मिश्रेति। अत्र च तत्कलिकादिभिः राजशासनप्रमाणीकरणे तत्र हेतुमाह महेत्यादि। खलु यस्मात्।

उत्तररामचरिते सीतायाः इव अस्या मिश्रकेश्या अपि प्रभावेण देहस्यादृश्यत्वात् वाक्यस्यापि अन्यैरश्राव्यत्वमिति बोध्यम्। एवं परत्रापि।

(ङ) प्रथमेति। चित्रकर्म्म अर्पयितुं पटे इति शेषः, पटे चित्रं कारयितुमित्यर्थः, राष्ट्रियेण राज्ञः श्यालकेन, मित्रावसुना तदाख्येन केनचित् जनेन, कतिचित् दिवसानि यावत्, भर्त्तुर्दुष्मन्तस्य, पादमूलं चरणान्तिकम्, आवां प्रेषिते। तत् तस्मात्, आगन्तुकतया अचिरागततया। एष वृत्तान्तः वसन्तोत्सवनिषेधवार्त्ता।

"राजश्यालस्तु राष्ट्रियः" इत्यमरः। "मूलमाद्ये शिफायां स्यात् भे निकुञ्जेऽन्तिकेऽपि च" इति विश्वः।

(খ) মিশ্রকেশী। এবিষয়ে সন্দেহ নাই; কারণ, রাজর্ষির প্রভাব অত্যন্ত বেশী।

(ঙ) প্রথম দাসী। আর্য্য! কয়েক দিন হইল রাজার শ্যালক মিত্রাবসু এই প্রমদবনে চিত্রকার্য্য করাইবার জন্য, আমাদিগকে রাজার

(१) प्रथमा। अज्ज! कइ दिअसाइं अह्माणं मित्तावसूणा रट्ठिएण भट्टिणो पादमूलं पेसिदाणं। एत्थ अ णो पमदवणस्स पालणकम्म समप्पिअं।…

কঞ্চুকী। তেন হি ন পুনরেবং প্রবর্ত্তিতব্যম্ (১)। (থ)

উভে। সকৌতূহলম্। অজ্জ! জই ইমিণা জণেণ সোদব্বং, তা কধেদু অজ্জো কিং ণিমিত্তং ভট্টিণা বসন্তুচ্ছবো পড়িসিদ্ধোত্তি (২)। (দ)

মিশ্র। উচ্ছবপ্পিআ ক্খু রাআণো হোন্তি, তা এত্থ গুরুণা কারণেণ হোদব্বং (৩)। (ধ)

(দ) আর্য্য! যদ্যনেন জনেন শ্রোতব্যম্, তৎ কথয়তু আর্য্যঃ কিং নিমিত্তং ভর্ত্রা বসন্তোৎসবঃ প্রতিষিদ্ধ ইতি।

(ধ) উৎসবপ্রিয়াঃ খলু রাজানো ভবন্তি, তদত্র গুরুণা কারণেন ভবিতব্যম্।

(থ) কঞ্চুকীতি। এবং চূতকলিকাভঙ্গাদ্যুৎসবাঙ্গানুষ্ঠানে।

(দ) উভে ইতি। অনেন জনেন মযৈত্যর্থঃ। আর্য্যো মান্যো ভবান্। ভর্ত্রা রাজ্ঞা দুষ্মন্তেন।

(ধ) মিশ্রেতি। তৎ তস্মাৎ, অত্র প্রিয়স্যাপি উৎসবস্য প্রতিষেধে, গুরুণা মহতা।

নিকট পাঠাইয়া দিয়াছেন। অতএব আমরা শীঘ্র আসিয়াছি বলিয়া এ বৃত্তান্ত শুনিতে পাই নাই।

(থ) কঞ্চুকী। তাহা হইলে, এ কার্য্যে আর প্রবৃত্ত হইও না।

(দ) দাসীদ্বয়। (কৌতুকের সহিত) আর্য্য! এই ব্যক্তির যদি শুনিবার যোগ্য হয়, তবে বলুন দেখি—রাজা কি জন্য বসন্তোৎসব নিষেধ করিয়াছেন।

(ধ) মিশ্রকেশী। রাজারা উৎসবপ্রিয় হইয়া থাকেন; এবিষয়ে গুরুতর কারণই হইবে।

(১) ভবতু। ন পুনঃ···। (২)···কোতূহলং ণো···।

(৩) সানুমতী।···ক্খু মণুস্সা। গুরুণা···।

कञ्चुकी । स्वगतम् । बहुलीभूतोऽयमर्थः, तत् किं न कथ्यते । प्रकाशम् । अस्ति भवत्योः कर्णपथमायातं शकुन्तला-प्रत्यादेशकौलीनम् ? (१) । (न)

उभे । अज्ज ! सुदं रट्ठिअमुहादो अङ्गुलीअदंसणं जाव । (प)

कञ्चुकी । तेन हि स्वल्पं कथयितव्यम् । यदैवाङ्गुरीय-दर्शनादनुस्मृतं देवेन सत्यमूढ़पूर्वा रहसि मया तत्रभवती शकुन्तला मोहात् प्रत्यादिष्टेति, तदा प्रभृत्येव पश्चात्ताप-मुपगतो देवः । तथाहि—(२) (फ)

(प) आर्य्य ! श्रुतं राष्ट्रियमुखात् अङ्गुरीयकदर्शनं यावत् ।

(न) कञ्चुकीति । अयमर्थः वसन्तोत्सवप्रतिषेधस्य कारणरूपो विषयः, बहुली-भूतः प्रायेण राज्यमध्यप्रकाशात् विस्तृतीभूतः, तत् तस्मात्, किं न कथ्यते तदुत्सव-प्रतिषेधकारणमिति शेषः । शकुन्तलायाः प्रत्यादेशस्य प्रत्याख्यानस्य कौलीनं लोकवादः, भवत्योः कर्णपथमायातं प्राप्तमस्ति । अत्र काकुवशात् प्रश्नो गम्यते ।

"स्यात् कौलीनं लोकवादे" इत्यमरः ।

(प) उभे इति । राष्ट्रियस्य राजश्यालस्य मित्रावसोर्मुखात् ।

(न) কঞ্চুকী। (স্বগত) এ বিষয়, বিস্তৃতই হইয়া পড়িয়াছে, তবে আর না বলিব কেন। (প্রকাশ্যে) শকুন্তলাপ্রত্যাখ্যানের প্রবাদ, তোমাদের কাণে আসিয়াছে ?।

(প) দাসীদ্বয়। আর্য্য ! আমরা রাজশ্যালকের মুখে অঙ্গুরী দর্শনপর্য্যন্ত শুনিয়াছি।

(१) कञ्चुकी । बहुलीभूतमेतत् किं न कथ्यते । किमत्रभवत्योः कर्णपथं नायातं··· । (२) कञ्चुकी । अल्पं । यदैव खलु स्वाङ्गुलीयकदर्शनात् ।

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते,
शय्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः (१) ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीड़ावनम्रश्चिरम् ॥४॥

(फ) कञ्चुकीति । रहसि निर्जनस्थाने, ऊढ़पूर्वा गान्धर्वविधानेन परिणीत-पूर्वा, किन्तु मोहात् चित्तविभ्रमात्, प्रत्यादिष्टा प्रत्याख्याता, इति देवेन राज्ञा, यदैवानुस्मृतमित्यन्वयः । पश्चात्तापमनुतापम् ; उपगतः प्राप्तः ।

रम्यमिति । देव इति गद्यस्थं कर्त्तृपदमत्र सम्बध्यते । तेन देवो राजा, रम्यं चन्द्रचन्दनादिकं मनोहरं वस्तु, द्वेष्टि नाद्रियते ; सहचारिण्या विरहेण तादृशवस्तुनः सुखदायकत्वाभावादिति भावः । यथा पुरा पूर्ववदित्यर्थः, प्रकृतिभिरमात्यैः, प्रत्यहं न सेव्यते राजकार्य्यसम्पादनार्थं नोपास्यते राजकार्य्यं न पश्यतीत्यर्थः । उत्सृष्टा निद्रा येन स उन्निद्रो जागरित एव, शय्याया उपान्तयोः प्रान्तदेशयोः विवर्त्तनैः पार्श्वद्वारा गमनागमनैः, क्षपा रात्रीः, विगमयति अतिवाहयति । तथा यदा दाक्षिण्येन सकल-वनितासु समानानुरागित्वेन हेतुना, अन्तःपुरेभ्यः अन्तःपुरवासिनीभ्यः स्त्रीभ्यः, उचितां योग्याम्, वाचं वाक्यम्, ददाति अर्पयति अन्तःपुरवासिनीभिः स्त्रीभिः सह उपयुक्तमाला-पतीत्यर्थः, तदा गोत्रेषु नामसु, स्खलितः प्रभ्रष्टः कमलानाम्नि उच्चारयितव्ये शकुन्तला-नामोच्चारितवान् सन्नित्यर्थः, चिरं बहुकालं व्याप्य, व्रीडया लज्जया अवनम्रः अवनत-मुखश्च भवति । शकुन्तलाप्रत्याख्यानजनितानुतापेन सतततत्स्मरणादेवामी भावा राज्ञ इति भावः ।

(ফ) কঞ্চুকী। তাহা হইলে অল্পই বলিতে হইবে। অঙ্গুরী দর্শন করিয়া যখনই রাজা স্মরণ করিলেন যে, 'আমি সত্যই নির্জনে শকুন্তলাকে পূর্ব্বে বিবাহ করিয়াছিলাম এবং মোহবশতঃ তাহাকে প্রত্যাখ্যান করিয়াছি' তদবধি রাজা অনুতাপ ভোগ করিতেছেন। দেখ—

(१) शय्याप्रान्तविवर्त्तनैः…।

মিশ্র। প্রিয়ং মে প্রিয়ং (১)। (ব)

কঞ্চুকী। অস্মাৎ প্রভবতো বৈমনস্যাদুৎসবঃ প্রত্যাখ্যাতঃ। (ভ)

(ব) প্রিয়ং মে প্রিয়ম্।

অত্র অনুতাপপ্রাপ্তিপ্রতিপাদনকার্য্যং প্রতি বহুতরকারণোপন্যাসাৎ সমুচ্চয়োঽলঙ্কারঃ। তথা দ্বেষ্টীত্যাদিকর্তৃবাচ্যপরস্মৈপদান্তক্রিয়াসমূহমধ্যে সেব্যত ইতি কর্ম্মবাচ্যাত্মনেপদান্তক্রিয়োপন্যাসাৎ ভগ্নপ্রক্রমতাদোষঃ, রূঢ়িপ্রয়োজনাভাবেঽপি অন্তঃপুরশব্দেন তৎস্থস্ত্রীষু লক্ষণাকরণাৎ নেয়ার্থত্বদোষশ্চ, 'রম্যং দ্বেষ্টি, যথা পুরা স্ববিষয়ান্ নো পশ্যতি প্রত্যহম্' ইতি প্রথমচরণপাঠেন অন্তঃপুরেভ্য ইত্যত্র 'সীমন্তিনীভ্যঃ' ইতি পাঠেন চ তয়োঃ সমাধানং বিধেয়ম্।

"প্রকৃতিঃ সহজে যোনাবমাত্যে পরমাত্মনি" ইতি বিশ্বঃ। "এষু ত্বনেকমহিলাসু সমরাগো দক্ষিণঃ কথিতঃ" ইতি সাহিত্যদর্পণঃ। "গোত্রং নাম্নি তথান্বয়ে" ইতি হলায়ুধঃ।

শার্দ্দূলবিক্রীড়িতং বৃত্তম্ ॥৪॥

(ব) মিশ্রেতি। প্রিয়ং প্রীতিকরম্, ইদং বচনমিতি শেষঃ; শকুন্তলাং প্রতি রাজ্ঞোঽনুরাগসূচকত্বাদিতি ভাবঃ।

রম্য বস্তুর প্রতি বিদ্বেষ করিতেছেন; পূর্ব্বের ন্যায় কর্ম্মচারীকর্ত্তৃক সেবিত হইতেছেন না; জাগরিত থাকিয়াই শয্যার এ-পাশ ও-পাশ করিয়া রাত্রি অতিবাহিত করিতেছেন; আর যখন অন্তঃপুরের রমণীদিগের নিকট, নিজের দাক্ষিণ্যবশতঃ উপযুক্ত উত্তর দেন, তখন কাহারও নাম বলিতে শকুন্তলানাম বলিয়া বহুকাল যাবৎ লজ্জায় অবনত হইয়া থাকেন ॥৪॥

(ব) মিশ্রকেশী। প্রীতিকর, আমার প্রীতিকর বটে।

---

(১) সানুমতী। প্রিয়ং মে।

उभे । जुज्जदि । (म)

नेपथ्ये । एदु एदु भवं । (य)

कञ्चुकी । कर्णं दत्त्वा । अये ! इत एवाभिवर्त्तते देवः, तद्गच्छतं स्वकर्म्मानुष्ठानाय (१) । (र)

उभे । तह । इति निष्क्रान्ते । (ल)

(म) युज्यते ।

(य) एतु एतु भवान् ।

(ल) तथा ।

---

(भ) कञ्चुकीति । प्रभवतः प्रभावविशिष्टात् अतीवप्रबलात्, वैमनस्यात् व्याकुलमनस्कत्वात् ।

(म) उभे इति । युज्यते उत्सवप्रत्याख्यानमिति शेषः, सति शोके उत्सवानुष्ठानस्य तदुद्दीपकत्वादिति भावः ।

(य) नेपथ्य इति । विदूषकस्योक्तिरियम् ।

(र) कञ्चुकीति । कर्णं दत्त्वा कर्णप्रेरणेन नेपथ्योक्तिं श्रुत्वेत्यर्थः । स्वकर्म्मानुष्ठानाय निजकर्म्मकरणाय, गच्छतं युवामिति शेषः, राजान्तिकेऽवस्थानस्यानावश्यकत्वात् प्रत्युत विरक्तिकरत्वाच्चेति भावः ।

(ल) उभे इति । तथा गच्छाव एवेत्यर्थः ।

---

(ভ) কঞ্চুকী। মনের এই গুরুতর ব্যাকুলতাবশতঃ বসন্তোৎসব নিষেধ করিয়াছেন।

(ম) দাসীদ্বয়। হইতে পারে।

(য) নেপথ্যে। আসুন আসুন আপনি।

(র) কঞ্চুকী। ( কাণ দিয়া ) ওহে ! রাজা এই দিকেই আসিতেছেন, অতএব নিজের কার্য্য করিবার জন্য তোমরা যাও।

---

(१) देवः, स्वकर्म्मानुष्ठीयताम् ।

ততঃ প্রবিশতি পশ্চাত্তাপসদৃশবেশো রাজা বিদূষকঃ প্রতীহারী চ। (ব)

কঞ্চুকী। রাজানং বিলোক্য। অহো! সর্বাস্ববস্থাসু রামণীয়কমাকৃতিবিশেষাণাম্। তথাহ্যেবং বৈমনস্যপরীতোঽপি প্রিয়দর্শনো দেবঃ। য এষঃ—(১) (শ)

প্রত্যাদিষ্টবিশেষমণ্ডনবিধির্বামপ্রকোষ্ঠে শ্লথং
বিভ্রৎ কাঞ্চনমেকমেব বলয়ং শ্বাসোপরক্তাধরঃ।
চিন্তাজাগরণপ্রতাম্রনয়নস্তেজোগুণৈরাত্মনঃ
সংস্কারোল্লিখিতো মহামণিরিব ক্ষীণোঽপি নালক্ষ্যতে (২) ॥৫॥

(ব) তত ইতি। পশ্চাত্তাপসদৃশবেশঃ অনুতাপোপযুক্তবেশঃ বিকলদেহো নাতিপরিচ্ছদবাংশ্চেতি তাৎপর্য্যম্।

(শ) কঞ্চুকীতি। আকৃতিবিশেষাণাং রূপবিশেষাণাম, সর্বাসু আনন্দিতাসু বিষণ্ণাসু বা অবস্থাসু, রামণীয়কং সৌন্দর্য্যম্। এবম্ ঈদৃশেন বৈমনস্যেন অনুতাপান্মনোব্যাকুলতয়া পরীতো যুক্তোঽপি, প্রিয়ং সৌন্দর্য্যাৎ প্রীতিকরং দর্শনং যস্য সঃ।

প্রত্যাদিষ্টেতি। প্রত্যাদিষ্টো নিরাকৃতঃ বিশেষমণ্ডনবিধিঃ আধিক্যেনালঙ্করণকার্য্যং যেন সঃ, বামপ্রকোষ্ঠে বামমণিবন্ধে, শ্লথং পশ্চাত্তাপেন কৃশত্বাৎ শিথিলম্, একমেব কাঞ্চনস্য স্বর্ণস্যেদমিতি কাঞ্চনম্, বলয়ং কটকম, বিভ্রৎ ধারয়ন্। শ্বাসৈর্নিশ্বাসৈঃ

(ল) দাসীদ্বয়। তাহাই। ( এই বলিয়া চলিয়া গেল। )

(ব) তদনন্তর অনুতাপের উপযুক্তবেশে রাজার এবং বিদূষক ও প্রতীহারীর প্রবেশ।

(শ) কঞ্চুকী। ( রাজাকে দেখিয়া ) কি আশ্চর্য্য! আকৃতিবিশেষের সকল অবস্থাতেই সৌন্দর্য্য থাকে। দেখ—এইরূপ আকুলতাযুক্ত হইলেও রাজার দর্শন প্রীতিকর। যে ইনি—

(১)···রমণীয়ত্বম্···। এবমুৎসুকোঽপি প্রিয়দর্শনো দেবঃ। তথাহি।

(২)···বামপ্রকোষ্ঠার্পিতম্···শ্বাসোপরক্তাধরঃ।···প্রতান্তনয়নস্তেজোগুণাদাত্মনঃ···।

**মিশ্র।** রাজানং বিলোক্য। **ঠাণে ক্খু পচ্চাদেসবিমাণিদা বি ইমস্স কিদে সউন্তলা কিলিম্মদি (১)। (ঘ)**

**রাজা।** ধ্যানমন্দং পরিক্রম্য। (ঙ)

---

(ঘ) স্থানে খলু প্রত্যাদেশবিমানিতাপি অস্য কৃতে শকুন্তলা ক্লিশ্যতি।

---

অপরক্তঃ অপগতরাগো মলিন ইতি যাবৎ অধরো যস্য সঃ। এতেনানুতাপাৎ শ্বাসানাং দীর্ঘত্বমুষ্ণত্বঞ্চ ব্যজ্যতে। চিন্তয়া শকুন্তলাধ্যানেন যৎ জাগরণং তেন প্রতান্তে প্রকর্ষেণ তাম্রবর্ণে নয়নে যস্য সঃ, সংস্কারেণ শানঘর্ষণাদিনা মলদূরীকরণেন উল্লিখিতস্তনুকৃতঃ, মহামণির্মহামূল্যরত্নমিব, ক্ষীণোঽপি, অনুতাপাৎ কৃশোঽপি অন্যত্র ঘর্ষণাৎ স্বয়ং গতোঽপি, আত্মনঃ স্বস্য, তেজোগুণৈঃ প্রভাবগুণৈঃ উজ্জ্বলতাগুণৈশ্চ, নালক্ষ্যতে ক্ষীণতয়া ন বুধ্যতে।

অত্র শ্রৌতোপমালঙ্কারঃ। শার্দূলবিক্রীড়িতং বৃত্তম্॥৫॥

(ঘ) মিশ্রেতি। প্রত্যাদেশেন প্রত্যাখ্যানেন বিমানিতা অপমানিতাপি শকুন্তলা, অস্য দুষ্মন্তস্য কৃতে নিমিত্তে, যৎ ক্লিশ্যতি বিরহক্লেশমনুভবতি, তৎ স্থানে খলু যুক্তমেব। প্রত্যাখ্যানাপমানেন বিরাগসম্ভবেঽপি অস্য অলৌকিকসৌন্দর্য্যরূপাদিবানুরাগদার্ঢ্যাৎ বিরহ-ক্লেশানুভবঃ সম্ভবত্যেবেতি ভাবঃ।

---

বিশেষরূপে অলঙ্কার ধারণ পরিত্যাগ করিয়াছেন, কেবল বাম মণি-বন্ধে একটীমাত্র শিথিল স্বর্ণবলয় ধারণ করিতেছেন, নিশ্বাসে ওষ্ঠ-যুগল মলিন করিয়াছে এবং চিন্তাবশতঃ জাগরণে নয়নযুগল তাম্রবর্ণ হইয়াছে, তথাপি পরিমার্জিত মহামণির ন্যায় ক্ষীণ হইলেও নিজের তেজের গুণে তাহা লক্ষ্য করা যাইতেছে না॥৫॥

(ঘ) মিশ্রকেশী। (রাজাকে দেখিয়া) প্রত্যাখ্যান করায় অপমানিত হইয়াও শকুন্তলা যে ইঁহার জন্য ক্লেশ ভোগ করিতেছে, তাহা সঙ্গতই বটে।

---

(১) সানুমতী। রাজানং দৃষ্ট্বা।...কিলিম্মই।

প্রথমং সারঙ্গাক্ষ্যা প্রিয়য়া প্রতিবোধ্যমানমপি সুপ্তম্ ।
অনুশয়দুঃখায়েদং হতহৃদয়ং সম্প্রতি বিবুদ্ধম্ ॥৬॥

মিশ্র । ণং ঈদিসাইং তবস্সিণীএ ভাঅধেআইং । (ছ)

বিদূ । অপবার্য্য । হুং, ভূও বি লঙ্ঘিদো এসো সউন্তলা-বাদেণ । ণ আণে কধং চিকিচ্ছিদব্বো ভবিস্সদি (১) । (জ)

(ছ) নন্বীদৃশানি তপস্বিন্যা ভাগধেয়ানি ।

(ঙ) রাজেতি । ধ্যানেন শকুন্তলাচিন্তয়া মন্দমল্পমল্পম্, পরিক্রম্য পাদক্ষেপং কৃত্বা ।

প্রথমমিতি । সারঙ্গস্য হরিণস্য অক্ষিণী ইব অক্ষিণী চক্ষুষী যস্যাস্তয়া, প্রিয়য়া শকুন্তলয়া, প্রথমং প্রতিবোধ্যমানমপি পরিণয়স্মরণায় বিবিধভাবেন জ্ঞাপ্যমানমপি, সুপ্তং নিদ্রিতং নিদ্রিতবদবিদিতসর্ব্ববৃত্তান্তম্ ইদং মদীয়ম্, হতহৃদয়ং দগ্ধচিত্তম্, অনুশয়দুঃখায় চিরমনুতাপদুঃখানুভবায়, সম্প্রতি বিবুদ্ধং জাগরিতং জাগরিতবদ্বিদিতসর্ব্ববৃত্তান্তং জাতমিতি শেষঃ । সম্প্রত্যপি বিবোধাভাবে নেদমনুশয়দুঃখং সম্ভাব্যেতি ভাবঃ ।

অত্র সারঙ্গাক্ষ্যেতি লুপ্তোপমালঙ্কারঃ ।

“চাতকে হরিণে পুংসি সারঙ্গঃ শবলে ত্রিষু” ইতি “অথানুশয়ো দীর্ঘদ্বেষানুতাপয়োঃ” ইতি চামরঃ । আর্য্যা জাতিঃ ॥৬॥

(ছ) মিশ্রেতি । তপস্বিন্যাঃ শোচ্যায়াঃ শকুন্তলায়াঃ, ভাগধেয়ানি ভাগ্যানি, ঈদৃশানি ননু এবম্ভূতান্যেব দুষ্মন্তহৃদয়স্য প্রথমং বিস্মৃতিজনকানি পরঞ্চ প্রবোধোৎপাদকানীত্যর্থঃ । তেন তব দুষ্মন্তস্য নৈষ দোষঃ, কিন্তু শকুন্তলাভাগধেয়ানামেবেত্যাশয়ঃ ।

(ঙ) রাজা । ( চিন্তাবশতঃ অল্প অল্প পাদক্ষেপ করিয়া ) প্রথমে হরিণনয়না প্রিয়তমা শকুন্তলা, পরিণয় স্মরণ করাইবার জন্য নানাপ্রকার বুঝাইতে থাকিলেও, এই পোড়া মন ঘুমাইয়া ছিল, আর এখন অনুতাপের দুঃখ ভোগ করিবার জন্য জাগিয়াছে ॥৬॥

(ছ) মিশ্রকেশী । দীনা শকুন্তলার ভাগ্যই এইরূপ ।

(১) বিদূ ।···সউন্তলাবাদিণা ।···

कञ्चुकी। उपसृत्य। जयति जयति देवः। देव! प्रत्यवेक्षिताः प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि देवः (१)। (क)

राजा। वेत्रवति! मद्वचनादमात्यपिशुनं ब्रूहि, अद्य चिरप्रबोधान्न सम्भावितमस्माभिर्धर्मासनमध्यासितुम्, यत् प्रत्यवेक्षितमार्य्येण पौरकार्य्यं तत् पत्रमारोप्य प्रस्थाप्यतामिति (२)। (ख)

(ক) हुं, भूयोऽपि लङ्घित एष शकुन्तलावातेन। न जाने कथं चिकित्सितव्यो भविष्यति।

(ক) विदू इति। हुमिति वितर्के। शकुन्तलावातेन शकुन्तलाविषयकवायुरोगेण, एष दुष्मन्तः, भूयः पुनरपि, लङ्घित आक्रान्तः।

(क) कञ्चुकीति। प्रत्यवेक्षिता सर्व एव राज्ञ उत्सवनिषेधादेशं पालयन्ति न वेति परीक्षणार्थं पर्य्यवेक्षिताः। यथाकामं यथाभिलाषम्, विनोदस्थानानि विरहवेदनापनोदनोपयुक्तदेशान्, अध्यास्ताम् उपविशतु।

(ख) राजेत। वेत्रवतीति प्रतीहारीसम्बोधनम्। अमात्यो मन्त्री चासौ पिशुनस्तदाख्यश्चेति तम्। चिरप्रबोधात् रात्रौ बहुकालजागरणात्, अस्माभिः "वाक्यदर्श"

(ক) বিদূষক। (আপনি আপনি চুপি চুপি) হুঁ! শকুন্তলাবায়ু, আবারও ইহাকে আক্রমণ করিল। জানি না, কি প্রকারে প্রতীকার করা যাইবে।

(ক) কঞ্চুকী। (নিকটে যাইয়া) মহারাজের জয় হউক, জয় হউক। প্রমদবনের সকল স্থান দেখিয়াছি। এখন ইচ্ছানুসারে চিত্তবিনোদনস্থানে উপবেশন করিতে পারেন।

(१) कञ्चुकी। उपगम्य। जयतु देवः। महाराज!···स्थानानि महाराजः।

(२)···अमात्यमार्य्यपिशुनम्। तत् पत्रमारोप्य दीयतामिति।

प्रती । जं देवो आणवेदि । इति निष्क्रान्ता । (ग)

राजा । पार्वतायन । त्वमपि स्वनियोगमशून्यं कुरु (१) । (घ)

कञ्चुकी । यदाज्ञापयति देवः । इति निष्क्रान्तः ।

विदू । किदं भअदा णिम्मक्खिअं, सम्पदं सिसिर-विच्छेअरमणीए इमस्सिं पमदवणुद्देसे अत्ताणं विणोदेह्नि (२) । (ङ)

(ग) यद्देव आज्ञापयति ।

इति बहुवचनात् सर्वेत्यर्थः, धर्म्मासनं विचारासनम्, अध्यासितुमुपवेष्टुम्, न सम्भावितं चिरजागरणेनैव असुस्थदेहचित्तत्वात् न सम्भावना कृता । अतएव आर्य्येण मान्येन पिशुनेन भवता । प्रत्यवेक्षितं पर्य्यालोचितम् । पत्रमारोप्य पत्रे लिखित्वा, तत् प्रस्थाप्यतां प्रेष्यताम्, इति ब्रूहीत्यन्वयः ।

(घ) राजेति । पर्वतस्यापत्यमिति पार्वतायनः । एतच्च कञ्चुकिनो नाम्ना सम्बोधनम् । स्वनियोगम् आत्मानं प्रति समादेशम्, अशून्यम् अनुष्ठितम्, कुरु, स्वस्थानमन्तःपुरमेव गच्छेत्यर्थः ।

(ख) রাজা। বেত্রবতি! আমার কথানুসারে মন্ত্রী পিশুনকে বল যে, রাত্রিতে বহুসময় জাগরণ করায় আজ ধর্ম্মাসনে বসিবার সম্ভাবনা করি না। অতএব আপনি যে পৌরকার্য্য পর্য্যালোচনা করিয়াছেন, তাহা পত্রে লিখিয়া পাঠাইয়া দিন।

(গ) প্রতীহারী। মহারাজ যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল।)

(ঘ) রাজা। পার্বতায়ন! তুমিও নিজের আদেশ পালন কর।

কঞ্চুকী। মহারাজ যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল।)

(१) वातायन !···। (२)···शिशिरातपच्छेअरमणीए···अत्ताणं रमइस्सं ।

রাজা। (নিশ্বস্য।) বয়স্য! যদুচ্যতে রন্ধ্রোপপাতিনোঽনর্থা ইতি তদব্যভিচারি। পশ্য—(১) (চ).

মুনিসুতাপ্রণয়স্মৃতিরোধিনা
মম চ মুক্তমিদং তমসা মনঃ।
মনসিজেন সখে! প্রহরিষ্যতা
ধনুষি চূতশরশ্চ নিবেশিতঃ ॥৬॥

(ঙ) কৃতং ভবতা নির্মক্ষিকম্, সাম্প্রতং শিশিরবিচ্ছেদরমণীয়ে অস্মিন্ প্রমদবনোদ্দেশে আত্মানং বিনোদয়।

---

(ঙ) বিদূষক ইতি। মক্ষিকাণামপ্যভাব ইতি নির্মক্ষিকং নির্জনমিতি তাৎপর্য্যম্। শিশিরবিচ্ছেদেন শীতকালাপগমেন রমণীয়ে মনোহরে, প্রমদবনস্য উদ্দেশে কস্মিংশ্চিৎ স্থানে। বিনোদয় আনন্দয়।

(চ) রাজেতি। অনর্থা অনিষ্টানি, রন্ধ্রেণ ছিদ্রেণ উপযুক্তাবকাশেন উপপতন্তি উপস্থিতা ভবন্তীতি রন্ধ্রোপপাতিনঃ, ইতি যদুচ্যতে লোকৈরিতি শেষঃ, তদব্যভিচারি নিয়তম্।

মুনীতি। মুনিসুতায়াঃ শকুন্তলায়াঃ প্রণয়স্য প্রেম্ণঃ স্মৃতিং রুণদ্ধি ব্যাহন্তীতি তেন, তমসা তমোগুণজনিতমোহেন, ইদং মম মনঃ, মুক্তঞ্চ পরিত্যক্তঞ্চ; হে সখে! প্রহরিষ্যতা প্রহারং করিষ্যতা, মনসিজেন মদনেন, ধনুষি, চূতশর আম্রমুকুলাত্মকো বাণঃ, নিবেশিতো মাং প্রতি নিক্ষেপার্থং স্থাপিতশ্চ। তথা চ কামঃ প্রহর্ত্তুমিচ্ছন্নপি

---

(ঙ) বিদূষক। মক্ষিকাটীর পর্য্যন্ত অভাব করিয়াছ; এখন শীতকাল অতীত হওয়ায় মনোহর এই প্রমদবনের কোন স্থানে বসিয়া আত্মবিনোদন কর।

(চ) রাজা। (নিশ্বাস ত্যাগ করিয়া) বয়স্য! লোকে যে বলে, "বিপদ ফাঁক পাইয়া উপস্থিত হয়" তাহা ধ্রুবসত্য। দেখ—

---

(১) তদব্যভিচারি বচঃ। কুতঃ।

उपस्थितस्मृतिरङ्गुलिमुद्रया
प्रियतमामनिमित्तनिराकृताम् ।
अनुशयादनुरोदिमि चोत्सुकः
सुरभिमाससुखं समुपैति च (१) ॥८॥

इयन्तं कालं यावत् तदवसरं न लेभे, किन्तु यदैव मम मनो मोहमुक्तं जातं शकुन्तला-स्मृतिश्चोपस्थिता, तादृशमवसरं प्राप्यैवासौ प्रहर्त्तुं प्रवृत्तः ; अतएव "रन्ध्रोपपातिनोऽनर्थाः" इति वचो मय्यपि अव्यभिचारीति भावः ।

अत्र पूर्वार्द्धपरार्द्धयोश्चकारद्वयं मोचननिवेशनक्रिययोर्यौगपद्यं सूचयति ; अत्र च कामकर्त्तृकचूतशरनिवेशनं प्रति तमसा मनोमोहमोचनमेव कारणम्, यौगपद्येन च तयोः पौर्वापर्य्यविपर्य्ययादतिशयोक्तिः, तन्मूलश्चायं क्रियासमुच्चयोऽलङ्कारः । तथा चोक्तं दर्पणकारैः—"एते हि गुणक्रियायौगपद्यं समुच्चयप्रकारा नियमेन कार्य्यकारण-कालनियमविपर्य्ययरूपातिशयोक्तिमूलाः ।" द्रुतविलम्बितं वृत्तम् ॥७॥

उपेति । अङ्गुलीमुद्रया मन्नामाक्षरयुक्ताङ्गुरीयकदर्शनेन, उपस्थिता उपस्थापिता स्मृतिः शकुन्तलास्मरणं यस्य स तादृशोऽहम्, उत्सुक उत्कण्ठितः सन्, अनिमित्त-निराकृताम् अकारणप्रत्यादिष्टाम्, प्रियतमां शकुन्तलाम्, अनु लक्ष्यीकृत्य, अनुशयात् रोदिमि च, सुरभिमासस्य वसन्तमासस्य चैत्रस्य सुखं चैत्रमासोपस्थितिनिबन्धन आमोद इत्यर्थः, समुपैति च उपस्थितो भवति च । तथा च विरहावसरं प्राप्य निरतिशय-सम्भोगसुखसम्पादकचैत्रमासागमादनर्थो रन्ध्रोपपातिन इति वचसः अव्यभिचारित्वमिति भावः । ग्रहणीरोगवतः पलान्नप्राप्तिरिव विरहिणः सम्भोगसुखसम्पादकचैत्रमासप्राप्तिरनर्थ एवेति बोध्यम् ।

---

মুনিকন্যা শকুন্তলার প্রণয়স্মৃতিনাশক মোহ, আমার এই মনকেও ছাড়িয়া দিল ; সখে! প্রহারকারী কামদেবও ধনুতে চূতশর যোজিত করিলেন ॥৭॥

---

(१) अयं श्लोकः कुत्रचित् पुस्तके न दृश्यते ।

विदू। भो वअस्स! चिट्ठ दाव इमिणा दण्डकट्ठेण कन्दप्पवाणं णासेमि। इति दण्डकाष्ठमुद्यम्य चूताङ्कुरं ताड़यितु- मिच्छति (१)। (छ)

राजा। सस्मितम्। भवतु, दृष्टं ब्रह्मवर्च्चसम्। सखे! क्कोदानीमुपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विनोदयामि? (२)। (ज)

---

(छ) भो वयस्य! तिष्ठ तावत् अनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयामि।

---

अत्रापि रोदनं प्रति सुरभिमाससुखागमस्य कारणत्वेऽपि पूर्ववत्कारद्वयेन तयो- र्यौगपद्यसूचनाद्धेत्वतिशयोक्तिमूल एव समुच्चयोऽलङ्कारः।

"अङ्गुरीयकमूर्म्मिका। साक्षराङ्गुलिमुद्रा स्यात्" इत्यमरः।

द्रुतविलम्बितं वृत्तम्॥८॥

(छ) विदू इति। दण्डकाष्ठेन काष्ठनिर्म्मितदण्डेन, कन्दर्पबाणं कन्दर्पबाण- भूतमाम्रमुकुलम्।

(ज) राजेति। अकिञ्चित्करस्य चूताङ्कुरस्य निपातोद्यमदर्शनात् विस्मयेन

---

নামাঙ্কিত অঙ্গুরী, আমার স্মৃতি জন্মাইয়া দিয়াছে, তাহাতে বুঝিয়াছি যে, বিনা কারণে প্রিয়তমাকে প্রত্যাখ্যান করিয়াছি; সুতরাং তাহাকে লক্ষ্য করিয়া, উৎকণ্ঠিত হইয়া, অনুতাপবশতঃ রোদনও করিতেছি; এদিকে চৈত্রমাসের আমোদও উপস্থিত হইয়াছে ॥৮॥

(ছ) বিদূষক। বয়স্য! একটু থাম, এই দণ্ড দিয়া কামের বাণ ধ্বংস করিয়া দি। (এই বলিয়া দণ্ড তুলিয়া, আমের মুকুল তাড়ন করিতে ইচ্ছা করিল।)

---

(१) विदूषकः। चिट्ठ जाव···णासइस्सं।

(२) राजा।···क्कोपविष्टः···दृष्टिं विलोभयामि।

विदू। णं भवदा आसन्नपरिचारिआ लिविअरी मेहाविणी आदिट्ठा माहवीलदाहरए इमं वेलं अदिवाहिस्सं तहिं चित्तफलए मे सहत्थलिहिदं तत्थभोदीए सउन्तलाए पड़िकिदिं आणेहि त्ति (१)। (झ)

(झ) ननु भवता आसन्नपरिचारिका लिपिकरी मेधाविनी आदिष्टा माधवीलतागृहे इमां वेलामतिवाहयिष्यामि, तस्मिन् चित्रफलके मे स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिमानयेति।

---

राज्ञः स्मितमिति वाच्यम्। भवतु अस्तीयमस्य निष्पत्तिरिति शेषः। ब्रह्मणो वर्च्च इति ब्रह्मवर्च्चसं ब्रह्मतेजः, दृष्टमन्यत्र प्रत्यक्षीकृतमिति सोल्लुण्ठनोक्तिः। क्व कस्मिन् स्थाने। प्रियायाः शकुन्तलायाः। दृष्टिं नयनम्, विनोदयामि आश्वासयामि।

ब्रह्मवर्च्चसमिति "ब्रह्महस्तिराजपल्येभ्यो वर्च्चस" इति राजादित्वादच्।

(झ) विदू इति। नन्विति सम्बोधने। आसन्नपरिचारिका सर्व्वदा सन्निहिता किङ्करी, लिपिकरी चित्रकर्म्मकारिणी, मेधाविनी स्मृतिशक्तिशालिनी। अतएव तस्या विस्मरणासम्भव इति भावः। स्वहस्तेन लिखितां चित्रिताम्। प्रतिकृतिं प्रतिमूर्त्तिम्। इति आदिष्टेत्यन्वयः।

---

(জ) রাজা। (ঈষৎ হাস্য করিয়া) হউক, ব্রাহ্মণের তেজ দেখিয়াছি। সখে! এখন কোথায় বসিয়া, প্রিয়তমার কিছু অনুকরণ করে, এইরূপ লতাতে নয়ন আশ্বস্ত করি?।

(ঝ) বিদূষক। সর্ব্বদাই তোমার নিকটে থাকিয়া যে পরিচর্য্যা করিয়া থাকে এবং যাহার বেশ্ স্মৃতিশক্তি আছে, সেই চিত্রকারিণীকে তুমিই আদেশ করিয়াছ যে, আমি এই সময়টা মাধবীলতাগৃহে অতিবাহিত করিব; সেইখানে, চিত্রফলকে আমার হস্তচিত্রিত প্রিয়তমা শকুন্তলার প্রতিমূর্ত্তি নিয়া আসিবি।

---

(१) विदूषकः।···परिचारिआ चदुरिआ भवदा संदिट्ठा माहवीमण्डवे।

রাজা । ঈদৃশমেব হৃদয়াশ্বাসনম্ । তত্তদেবাদেশয় মাধবীলতাগৃহম্ (১) । (ঞ)

বিদূ । ইদো ইদো এদু ভবং । ইত্যুভৌ পরিক্রামতঃ । (ট)

মিশ্র । অনুগচ্ছতি ।

বিদূ । এসো মণিসিলাবট্টসণাহো মাহবীলদামণ্ডবো বিবিত্তদাএ উবহাররমণীজ্জদাএ ণিসগ্গমাহুদেণ অ সাঅদেণ বিঅ পড়িচ্ছদি তুমং ; তা পবিসিঅ ণিসীদদু ভবং (২) । (ঠ)

(ট) ইত ইত এতু ভবান্ ।

(ঠ) এষ মণিশিলাপট্টসনাথো মাধবীলতামণ্ডপো বিবিক্ততয়া উপহাররমণীয়তয়া নিসর্গমাহৃতেন চ স্বাগতেনেব প্রতীচ্ছতি ত্বাম্ ; তৎ প্রবিশ্য নিষীদতু ভবান্ ।

(ঞ) রাজেতি । ঈদৃশমেব চিত্রদর্শনজন্যমেব, হৃদয়স্য বিয়োগবিধুরস্য চিত্তস্য আশ্বাসনং কর্ত্তব্যমিতি শেষঃ, গত্যন্তরাভাবাদিতি ভাবঃ । আদেশয় তৎপথপ্রদর্শনেন ব্রূহীত্যর্থঃ । ইদমেবোক্তমভিযুক্তৈঃ—

"বিয়োগাবস্থাসু প্রিয়জনসদৃক্ষানুভবনং
ততশ্চিত্রং কর্ম্ম স্বপনসময়ে দর্শনমপি ।
তদঙ্গস্পৃষ্টানামুপগতবতাং স্পর্শনমপি
প্রতীকারঃ কামব্যথিতমনসাং কোঽপি গদিতঃ ॥"

(ট) বিদূ ইতি । ইত ইতঃ অনেনানেন পথা ।

(ঞ) রাজা । এইরূপই মনের আশ্বাস করিতে হইবে । অতএব সেই মাধবীলতার ঘরই দেখাইয়া দাও ।

(ট) বিদূষক । তুমি এই এই পথে আইস । (ইহার পর দুই জনেই পদক্ষেপ করিতে লাগিলেন ।)

(১) রাজা । ঈদৃশং হৃদয়বিনোদস্থানম্ । তৎ তমেব মার্গমাদেশয় ।

(২)···মাহবীমণ্ডবো···রমণীঅদাএ বিঅ সঅং···বিঅণী···।

উভৌ। প্রবিশ্যোপবিষ্টৌ (১)।

মিশ্র। লদাসংস্সিদা পেক্খিস্সং দাব পিঅসহীএ পড়িকিদিং, তদো সে ভত্তুণো বহুমদং অণুরাঅং ণিবেদইস্সং।
ইতি তথা কৃত্বা স্থিতা (২)। (ড)

(ড) লতাসংশ্রিতা প্রেক্ষিষ্যে তাবৎ প্রিয়সখ্যাঃ প্রতিকৃতিম্, ততঃ অস্যা ভর্ত্তুর্বহুমতম্ অনুরাগং নিবেদয়িষ্যামি।

(ঠ) বিদূ ইতি। মণিরূপা শিলা প্রস্তরঃ তন্নির্ম্মিতঃ পট্টঃ পীঠং মণিশিলাপট্টকেন সনাথো যুক্তঃ। বিবিক্ততয়া নির্জ্জনতয়া উপহারেণ পুষ্পাদিনিক্ষেপেণ যা রমণীয়তা তয়া, নিসর্গমারুতেন স্বভাববাহিবায়ুনা চ, স্বাগতেনেব কুশলপ্রশ্নেনেব, ত্বাম্, প্রতীচ্ছতি প্রতিগৃহ্ণাতি, প্রিয়ঃ প্রিয়ান্তরমিবেতি ভাবঃ। তৎ তস্মাৎ। নিষীদতু উপবিশতু।

অত্র নিসর্গমারুতস্য মৃদুশব্দে স্বাগতপ্রশ্নশব্দত্বসম্ভাবনাকরণাৎ গুণোৎপ্রেক্ষালঙ্কারঃ।
"পট্টস্তুল্যবৎ পীঠং রাজাদেঃ আসনান্তরে" ইত্যাদি হেমচন্দ্রঃ।

(ড) মিশ্রেতি। লতাসংশ্রিতা লতাবলম্বিনী। তিরস্করিণীবিদ্যাবলম্বনেন পূর্বত এবাদৃশ্যত্বে স্থিতেঽপি পুনর্লতাবলম্বনং দৈবস্য কিঞ্চিন্নির্ভরেণ শ্রমলাঘবার্থমিতি বোধ্যম্। প্রিয়সখ্যাঃ শকুন্তলায়াঃ, প্রতিকৃতিং রাজচিত্রিতপ্রতিমূর্ত্তিম্। অস্যাঃ শকুন্তলায়াঃ সমীপে। বহুমতমত্যাদৃতম্। তথা কৃত্বা লতাসংশ্রয়ণং কৃত্বা।

মিশ্রকেশী। ( তাঁহাদের পিছনে পিছনে গেল। )

(ঠ) বিদূষক। এই মণিময়শীলা-পিঠযুক্ত মাধবীলতামণ্ডপ, নির্জ্জনতাবশতঃ পুষ্পাদি নিক্ষিপ্ত থাকায় এবং স্বাভাবিক বায়ু বহিতে থাকায় তোমাকে যেন স্বাগত-সম্ভাষণদ্বারা গ্রহণ করিতেছে; অতএব তুমি প্রবেশ করিয়া উপবেশন কর।

( দুই জনেই প্রবেশ করিয়া উপবেশন করিলেন। )

(ড) মিশ্রকেশী। লতাবলম্বনে থাকিয়া, প্রিয়সখীর প্রতিমূর্ত্তি

(১) উভৌ। প্রবেশং কৃত্বা উপবিষ্টৌ। (২) দাব সহীএ…।

রাজা। নিশ্বস্য। সখে! সর্বমিদানীং স্মরামি শকুন্তলায়াঃ প্রথমদর্শনবৃত্তান্তম্, যং কিল কথিতবানস্মি ভবতে। স ভবান্ প্রত্যাদেশসময়ে মৎসমীপগতো নাসীৎ, কিন্তু পূর্বমপি ন ত্বয়া কদাচিৎ সঙ্কীর্ত্তিতং তত্রভবত্যা নামাদিকম্। কচ্চিদহমিব বিস্মৃতবাংস্ত্বমপি (১)। (ঢ)

মিশ্র। অদো জ্জেব মহীবদিহিং খণম্মি সহিঅআও সহাআও ণ বিরহিদব্বাও (২)। (ণ)

(ণ) অতএব মহীপতিভিঃ ক্ষণমপি সহৃদয়াঃ সহায়া ন বিরহিতব্যাঃ।

(ঢ) রাজেতি। কথিতবানিতি দ্বিতীয়াঙ্কে গতমেতৎ। প্রত্যাদেশসময়ে শকুন্তলায়াঃ প্রত্যাখ্যানকালে। পূর্বং মৎসমীপে শকুন্তলায়া উপস্থিতেঃ প্রাক্। তত্রভবত্যাঃ শকুন্তলায়াঃ, সঙ্কীর্ত্তিতমুল্লিখিতম্। বিস্মৃতবানিতি কচ্চিৎ বেদিতুমিচ্ছামি।

"কচ্চিৎ কামপ্রবেদনে" ইত্যমরঃ।

(ণ) মিশ্রেতি। অতএব সহায়ভূতস্য বিদূষকস্য অসমীপগততয়া শকুন্তলায়াঃ প্রত্যাখ্যানাদেব, মহীপতীভিঃ রাজভিঃ, সহৃদয়াঃ প্রশস্তমনস্কাঃ। ক্ষণমপি ন বিরহিতব্যা ন দূরে রক্ষিতব্যাঃ, ইষ্টানিষ্টসম্ভবাদিতি ভাবঃ।

দেখি; তাহার পরে ভর্ত্তার আদর ও অনুরাগ, তাহার নিকট জানাইব। ( এই বলিয়া সেইরূপ করিয়া থাকিল।)

(ঢ) রাজা। ( নিশ্বাস ত্যাগ করিয়া ) সখে! শকুন্তলার প্রথম দর্শনের সমস্ত বৃত্তান্তই এখন স্মরণ করিতেছি, যাহা তোমাকে বলিয়াছিলাম। প্রত্যাখ্যানের সময়ে তুমি আমার নিকটে ছিলে না এবং পূর্ব্বেও কখনও তাহার নামাদি উল্লেখ কর নাই; সুতরাং তুমিও কি আমারই মত বিস্মৃত হইয়াছিলে?।

(১) রাজা। সর্বম্···বৃত্তান্তং কথিতবানস্মি ভবতে চ।···প্রত্যাদেশবেলায়াং। তত্রভবত্যা নাম।···বিস্মৃতবানসি ত্বম্। (২) ক্বচিৎ অয়ং পাঠো ন দৃশ্যতে।

विदू। ण विसुमरामि, किन्तु सव्वं कहिअ अवसाणे उण तुए भणिदं परिहासविअप्पिओ एसो ण भूदत्थोत्ति, मएवि मन्दबुद्धिणा तधा ज्जेव गहिदं। अधवा भविदव्वदा क्खु एत्थ बलवदी (১)। (ত)

मिश्र। एवम्णेदं (২)। (থ)

(ত) न विस्मरामि, किन्तु सर्वं कथयित्वा अवसाने पुनस्त्वया भणितं परिहासविजल्पित एषः, न भूतार्थ इति, मयापि मन्दबुद्धिना तथैव गृहीतम्। अथवा भवितव्यता खल्वत्र बलवती।

(থ) एवमेतत्।

(ত) विदू इति। सर्वं शकुन्तलाहत्तान्तम्। परिहासेन विजल्पितः अनर्थकमुक्तः, एष शकुन्तलाहत्तान्तः, न भूतार्थो न यथार्थः, इति भणितमित्यन्वयः, "परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः।" इत्यनेनेति भावः। मन्दबुद्धिनेति स्वयं परीक्षाया अकरणादित्याशयः। तथैव अयथार्थत्वेनैव, गृहीतमवगतम्। ननु तथापि परिहासविजल्पितत्वरूपेणापि कदाचित्तव सङ्कीर्त्तनमुचितमासीदित्याह अथवेति। भवितव्यता अवश्यम्भाविता नियतिरित्यर्थः, अत्र जगति। प्रबलनियतिवशाद्दैवेदृशी घटना जातेति भावः।

(ণ) মিশ্রকেশী। এই জন্যই, ক্ষণকালও প্রশস্তচিত্ত সহায়দিগকে ছাড়িয়া রাজাদের থাকা উচিত নহে।

(ত) বিদূষক। আমি বিস্মৃত হই নাই; কিন্তু তুমি সমস্ত বলিয়া আবার শেষে বলিয়াছিলে যে "এ সমস্ত পরিহাসের কল্পনা করিলাম, কিন্তু বাস্তবিক নহে।" মন্দবুদ্ধি আমিও তাহাই ধারণা করিয়াছিলাম। অথবা এই জগতে নিয়তিই প্রবল।

(১) उण तुए···णावबुद्धं। मए वि मिप्पिण्डबुद्धिणा···।

(২) सानुमती। एव्वं एदं।

রাজা। অর্দ্ধং ধ্যাত্বা। সখে! পরিত্রায়স্ব মাম্ (১)। (দ)

বিদূ। ভো বঅস্স! কিং এদং তুহ উববণ্ণং?। ণ কদাবি সপ্পুরিসা সোঅচিত্তা হোন্তি। ণং পবাদেবি ণিক্কম্পা-জ্জেব গিরিঅো (২)। (ধ)

(ধ) ভো বয়স্য! কিমেতত্তব উপপন্নম্?। ন কদাপি সৎপুরুষাঃ শোকচিত্তা ভবন্তি। ননু প্রবাতেঽপি নিষ্কম্পা এব গিরয়ঃ।

(থ) মিশ্রেতি। এবমেতৎ, এতদ্বিদূষকোক্তমেবং সত্যমিত্যর্থঃ।

(দ) রাজেতি। ধ্যাত্বা শকুন্তলাবিষয়কব্যাপারং বিভাব্য। পরিত্রায়স্ব অনুতাপ-দুঃখানলাদিতি শেষঃ।

(ধ) বিদূ ইতি। এতৎ বিয়োগবেদনাক্রান্তাকুলত্বম্, কিং তব উপপন্নং সঙ্গতম্? অপি তু কথমপি নেত্যর্থঃ। তত্র কারণমাহ নেতি। শোকশ্চিত্তে যেষাং তে, সৎপুরুষাণাং চিত্তে শোক এবাবির্ভবিতুং নার্হতীত্যর্থঃ। ননু যস্মাৎ, প্রবাতেঽপি প্রবলবায়াবপি, গিরয়ঃ পর্ব্বতাঃ, নিষ্কম্পা এব, তিষ্ঠন্তীতি শেষঃ। তদ্বৎ সৎপুরুষা অপি অশোক-কাতরা এব বর্ত্তন্ত ইতি ভাবঃ।

অত্র দৃষ্টান্তোঽলঙ্কারঃ। অতএব শ্লেষো নাম নাট্যলক্ষণমপি—"স শ্লেষো ভণ্যতে বাক্যং যৎ সাদৃশ্যপুরঃসরম্" ইতি দর্পণলক্ষণাৎ।

(থ) মিশ্রকেশী। ইহা এইরূপ বটে।

(দ) রাজা। (কিছুকাল চিন্তা করিয়া) সখে! আমাকে রক্ষা কর।

(ধ) বিদূষক। বয়স্য! ইহা কি তোমার সঙ্গত হইতেছে? সৎপুরুষগণ কখনও শোককাতর হন না। দেখ—প্রবল বায়ুর মধ্যেও, পর্ব্বত নিষ্কম্পই থাকে।

(১) রাজা। ধ্যাত্বা। সখি! ত্রায়স্ব মাম্।

(২)…ভো! কিং এদং। অণুববণ্ণং ক্খু, এরিসং তুহ। কদাবি সপ্পুরিসা সোঅবত্তব্বা ণ হোন্তি। ণং পবাদে বি ণিক্কম্পা গিরীঅো।

राजा। वयस्य! निराकरणविक्लवायास्ते सख्यास्तामवस्थामनुस्मृत्य बलवदशरणोऽस्मि। सा हि—(१) (न)

इतः प्रत्यादिष्टा स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।
पुनर्दृष्टिं वाष्पप्रकरकलुषामर्पितवती (२)
मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम् ॥८॥

(न) राजेति। निराकरणेन प्रत्याख्यानेन विक्लवाया उपायाभावचिन्तया विह्वलायाः, ते तव, सख्याः शकुन्तलायाः, मम सखित्वेन मत्पक्षा अपि ते सखित्वमिति भावः, तां निराकरणकालीनाम्, अवस्थां दशाम्, अनुस्मृत्य चिन्तयित्वा, बलवदत्यन्तमेव, अशरणो दुःखाक्रमणात् रक्षकहीनः। हि यस्मात्, सा शकुन्तला। श्लोकस्थाया अर्पितवतीति क्रियायाः कर्त्तृपदमेतत्।

"बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे" इति "शरणं गृहरक्षित्रोः" इति चामरः।

इत इति। इतो मदन्तिकात्, प्रत्यादिष्टा प्रत्याख्याता, स्वजनं शार्ङ्गरवप्रभृतिमात्मीयलोकम्, अनुगन्तुम् अन्योपायाभावादनुसर्त्तुं व्यवसिता प्रवृत्ता, परञ्च गुरुसमे गुरुजनतुल्ये वयसा ज्येष्ठतया पितुः शिष्यतया च अग्रजवन्माननीये इत्यर्थः, अतएव च तद्वाक्यस्यालङ्घनीयतया स्थितेत्याशयः, गुरोः पितुः शिष्ये शार्ङ्गरवे, 'तिष्ठ' इति शब्दम् उच्चैरात्कोशात् तारस्वरेण वदति सति, स्थिता निवृत्तगमना, सा शकुन्तला, क्रूरे निष्ठुरे मयि, वाष्पप्रकरेण अश्रुजलसमूहेन कलुषामाविलाम्, दृष्टिं दर्शनम्, पुनर्यत्, अर्पित-

(न) রাজা। বয়স্য! তোমার সখী যখন প্রত্যাখ্যানবশতঃ আকুল হইয়া পড়িয়াছিল, তখন তাহার সেই অবস্থা স্মরণ করিয়া, আমি অত্যন্ত রক্ষকহীন হইয়াছি। কারণ,

(१) विक्लवायाः प्रियायाः समवस्थाम्।

(२) इतः प्रत्यादेशात्। मुहुस्तिष्ठेत्युच्चैः। वाष्पप्रसरकलुषाम्।

মিশ্র। অম্মহে! ঈদিসী পরবসদা ইমস্স মম্পি সন্দাবেদি (১)। (প)

বিদূ। ভো! অত্থি মে তক্কো, কেণ উণ তত্তভোদী আআসসঞ্চারিণা ণীদেত্তি। (ফ)

(প) অহো! ঈদৃশী পরবশতা অস্য মামপি সন্তাপয়তি।

(ফ) ভোঃ! অস্তি মে তর্কঃ, কেন পুনস্তত্রভবতী আকাশসঞ্চারিণা নীতেতি।

বতী নিক্ষিপ্তবতী, সবিষং বিষাক্তম্, শল্যং শলাকা অস্ত্রবিশেষো বা তদিব, মাং দহতি সন্তাপয়তি ; তদানীং তস্যা উপায়াভাবজ্ঞানাদিতি ভাবঃ।

অত্র সবিষং শল্যমিবেতি শ্রৌতোপমালঙ্কারঃ।

হন্ত! পরমরমণীয়ং পদ্যমিদমিতি ঘোষয়ন্তি কাব্যরসিকাঃ।

"শলাকায়ুধয়োঃ শল্যম্" ইতি হলায়ুধঃ। শিখরিণী বৃত্তম্ ॥৫॥

(প) মিশ্রেতি। অস্য দুষ্মন্তস্য, পরবশতা শোকাধীনতা।

(ফ) বিদূ ইতি। তর্কো বিচারঃ। আকাশসঞ্চারিণা খেচরেণ, তত্রভবতী শকুন্তলা। পূর্বম্ আকাশচারিণা কেনচিৎ নীতেতি মাতৃস্বসৃবচনাদিদমুক্তম্।

সে আমার নিকট হইতে প্রত্যাখ্যাত হইয়া, আত্মীয়জনের অনুগমন করিতে প্রবৃত্ত হইল; তখন পিতার তুল্য পিতৃশিষ্য শার্ঙ্গরব 'থাম' এইকথা উচ্চস্বরে বলিলে, সে থামিয়া, নিষ্ঠুরপ্রকৃতি আমার প্রতি পুনরায় অশ্রুকলুষিত যে দৃষ্টি নিক্ষেপ করিয়াছিল, বিষাক্ত শল্যের ন্যায় তাহা আমাকে দগ্ধ করিতেছে॥৯॥

(প) মিশ্রকেশী। ওমা! ইহার এই শোককাতরতা আমাকেও যে সন্তপ্ত করিতেছে।

(ফ) বিদূষক। ওহে! এবিষয়ে আমার তর্ক আছে। কোন্ আকাশচর তাঁহাকে নিয়া গেল?।

---

(১) সানুমতী। অম্মহে! এরিসী স্বকজ্জপরদা ইমস্স সন্তাবেণ অহং রমামি।

রাজা। বয়স্য! কঃ পতিব্রতাং তামন্যঃ পরামষ্টুমুৎসহতে। মেনকা কিল সখ্যাস্তে জন্মপ্রতিষ্ঠেতি তৎসখীজনাদস্মি শ্রুতবান্; তৎসহচরীভিস্তয়া বা নীতেতি হৃদয়মাশঙ্কতে (১)। (ব)

মিশ্র। সম্মোহে বি বিম্হঅণীও ক্খু ইমস্স পড়িবোধো (২)। (ভ)

(ভ) সম্মোহেঽপি বিস্ময়নীয়ঃ খল্বস্য প্রতিবোধঃ।

(ব) রাজেতি। অন্যো রিরংসুর্লম্পটঃ, পরামষ্টুং স্প্রষ্টুম্, উৎসহতে শক্নোতি অপি তু কোঽপি নেত্যর্থঃ, বিপক্ষেণ পতিব্রতাতেজসঃ অসহ্যত্বাদিতি ভাবঃ। মেনকা তদাখ্যা কাচিদপ্সরাঃ, তে তব সখ্যাঃ শকুন্তলায়াঃ, জন্মপ্রতিষ্ঠা জন্মস্থানং জননীত্যর্থঃ, ইতি তস্যাঃ শকুন্তলায়াঃ, সখীজনাৎ প্রিয়ংবদামুখাৎ। তস্যা মেনকায়াঃ সহচরীভিঃ উর্বশীপ্রভৃতিভিঃ, তয়া মেনকয়া বা। আশঙ্কতে সম্ভাবয়তি।

(ভ) মিশ্রেতি। সম্মোহেঽপি চিত্তবৈকল্যে স্থিতেঽপি। বিস্ময়নীয় আশ্চর্যজনকঃ "ক্রত্যয়ুক্তোঽন্যত্রাপি" ইতি কর্ত্তব্যনীয়ঃ, প্রতিবোধঃ অনুভবঃ। যথাবদবধারণাদিতি ভাবঃ।

---

(ব) রাজা। বয়স্য! অন্য কোন্ ব্যক্তি, সেই পতিব্রতাকে স্পর্শ করিতে পারে? মেনকা তোমার সখীর জন্মদায়িনী, ইহা আমি শকুন্তলার সখীদের নিকট শুনিয়াছি। অতএব আমার মন এই আশঙ্কা করিতেছে যে, সেই মেনকার সহচরীদের মধ্যে কেহ, কিংবা সেই মেনকাই শকুন্তলাকে নিয়াছেন।

(১)···পতিদেবতাম্···উৎসহেত। জন্মপ্রতিষ্ঠেতি শ্রুতবানস্মি। তৎসহচারিণীভিঃ সখী তে হৃতেতি হৃদয়ম্···।

(২) সানুমতী। সম্মোহো ক্খু বিম্হঅণিজ্জো স পড়িবোহো।

বিদূ। ভো! জই এব্বং, তা সমস্সসদু ভবং; অত্থি ক্খু সমাগমো কালেণ তত্থভোদিএ (১)। (ম)

রাজা। কথমিব ?। (য)

বিদূ। ণ ক্খু মাদাপিদরা ভত্তিবিওঅদুক্খিদং দুহিদরং চিরং পেক্খিদুং পারেন্তি (২)। (র)

(ম) ভো! যদ্যেবম্, তত্ সমাশ্বসিতু ভবান্; অস্তি খলু সমাগমঃ কালেন তত্রভবত্যাঃ।

(র) ন খলু মাতাপিতরৌ ভর্তৃবিয়োগদুঃখিতাং দুহিতরং চিরং প্রেক্ষিতুং পারয়তঃ।

(ম) বিদূ ইতি। এবং যদি মেনকয়া তত্সহচরীভির্বা শকুন্তলা নীতা চেত্, তত্ তদা। খলু যস্মাত্, তত্রভবত্যাঃ শকুন্তলায়াঃ, সমাগমঃ সম্মেলনম্।

(য) রাজেতি। অত্রেবশব্দঃ সম্ভাবনায়াম্। তথা চ শকুন্তলায়াঃ পুনঃ সমাগমং কথং কেন প্রকারেণ সম্ভাবয়সীত্যর্থঃ।

(র) বিদূ ইতি। ন পারয়তো ন শক্নুতঃ। এবঞ্চ মেনকয়া তত্সহচারিণীভির্বা সা নীতাপি পুনঃ প্রেষয়িষ্যত এবেতি কালেন তত্সমাগমসম্ভাবনাস্ত্যেবেতি ভাবঃ।

অত্র প্রস্তুতশকুন্তলাসমাগমবিষয়েণ তর্কণাত্ তুল্যতর্কো নাম নাট্যলক্ষণম্। তথা চ দর্পণে—

"তুল্যতর্কো যদর্থেন তর্কঃ প্রকৃতিগামিনা।"

(ভ) মিশ্রকেশী। চিত্তবৈকল্যের সময়েও, ইঁহার এই প্রকৃত ধারণা বিস্ময়জনক বটে।

(ম) বিদূষক। ওহে! যদি এইরূপই হইয়া থাকে, তবে তুমি আশ্বস্ত হও। কারণ, কালে তাঁহার সহিত সম্মেলন হইবে।

(য) রাজা। কি প্রকারে ?।

(র) বিদূষক। মাতা ও পিতা, পতিবিয়োগে দুঃখিত কন্যাকে দীর্ঘকাল দেখিতে পারেন না।

(১)…জই এব্বং অত্থি ক্খু…। (২)…দুহিদরং দেক্খিদুং…।

राजा। वयस्य!

स्वप्नो नु माया नु मतिभ्रमो नु
क्लृप्तं नु तावत् फलमेव पुण्यैः।
असन्निवृत्त्यै तदतीतमेव
मनोरथानामतटप्रपातः (१) ॥१०॥

स्वप्न इति। अत्र नुशब्दाः प्रश्ने। तत् शकुन्तलया सह सम्मेलनम्, स्वप्नो नु निद्रितावस्थायामनुभवमात्रं किम्, तद्दैव क्षणभङ्गुरत्वात् अधुना स्मृतिमात्रगोचरत्वाच्चेति भावः। माया नु ऐन्द्रजालिकव्यापारः किम्, तद्दैव मिथ्यात्वप्रतीतेरित्याशयः। मतिभ्रमो नु यत्किञ्चित् सुखे अतुलनीयशकुन्तलासम्मेलनसुखत्वेन बुद्धिविभ्रमः किम्, रज्जौ सर्पभ्रमवत् क्षणमात्रस्थायित्वात् ज्ञानान्तरबाधितत्वाच्चेत्यभिप्रायः। पुण्यैः पूर्वजन्मार्जितधर्म्मैः, तावदेव तत्परिमितमेव अत्यल्पकाललभ्यशकुन्तलासम्मेलनसुखरूपमेवेत्यर्थः फलम्, क्लृप्तं नु उत्पादितं किम्, अधिककालं तदलाभादित्याशयः। ननु तादृशपुण्यान्तरेण तत्पुण्यावशेषेण वा पुनस्तत्सम्मेलनसम्भव एवास्तीत्याह—तत् शकुन्तलासम्मेलनसुखम्, असन्निवृत्त्यै अपुनरागमाय, अतीतमेव गतमेव तत् सुखं न पुनरावर्त्तिष्यत इत्यर्थः, इदानीमीदृशशोकोपस्थितिदर्शनेन तादृशपुण्यान्तराभावस्य तत्पुण्यावशेषाभावस्य च नितरामेवानुमानादिति भावः। नन्विदानीन्तनशोकस्य कारणान्तरेणाप्युत्पादनसम्भवात् असद्धेतुतया एतदनुमानस्यायथार्थत्वात् तादृशसुखस्य पुनःप्राप्त्याशाकरणे का बाधेत्याह मनोरथानां पुनः शकुन्तलासम्मेलनसुखाभिलाषाणाम्, अतटात् भृगोरुच्चदेशादिति यावत् प्रपातः पतनमेव भवति। तथा च यथा जन उच्चदेशात् पतित्वा म्रियते, तथा अभिलाषप्रवाहोऽपि शकुन्तलासम्मेलनसुखरूपोच्चविषयात् पतित्वा विनश्यतीति तदाशाकरणं निरर्थकमेवेति भावः।

अत्र तात्त्विके शकुन्तलासम्मेलने स्वाप्निकत्वादिसंशयात् तन्निरासाभावाच्च शुद्धसन्देहोऽलङ्कारः, तथा "प्रपातस्त्वतटो भृगुः" इत्यमरकोषप्रामाण्यादापाततः अतटप्रपातशब्दयोः

---

(१)…क्लिष्टं नु तावत् फलमेव पुण्यम्। असन्निवृत्तौ तदतीव मन्ये, असन्निवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाता, मनोरथानामतटप्रपातम्।

विदू। भो! मा एव्वं। णं अङ्गुलीअअं ज्जेव एत्थणिदंसणं। अवस्सम्भाविणो अचिन्तणीअसमागमा होन्ति (१)। (ल)

(ल) भो! मैवम्। नन्वङ्गुरीयकमेवात्र निदर्शनम्। अवश्यम्भाविनः अचिन्तनीयसमागमा भवन्ति।

पर्य्यायतया पुनरुक्तताप्रतीतेः परञ्च प्रपातः पतनमित्यर्थकतया तन्निरासात् भिन्नाकार-शब्दगतत्वाच्च पुनरुक्तवदाभासोऽलङ्कारश्च, अनयोः परस्परनिरपेक्षतया संसृष्टिः। विदूषकस्य वाक्ये निश्चयाभावात् संशयो नाम नाट्यलक्षणञ्च—"संशयोऽज्ञाततत्त्वस्य वाक्ये स्यादयदनिश्चयः" इति दर्पणलक्षणात्।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥१०॥

(ल) विदू इति। मैवं ब्रूहीति शेषः। ननु यस्मात्। अत्र असम्भवलाभविषये, निदर्शनं दृष्टान्तः। तथा च मत्स्योदरगतस्य अङ्गुरीयकस्य पुनर्लाभः असम्भव एवासीत्, किन्तु दैवेन स घटित इत्याशयः। इत्थञ्च अवश्यम्भाविनो विषयाः, अचिन्तनीयः चिन्तया निर्द्धारयितुमशक्यः समागमः सम्मेलनं येषां ते तादृशा भवन्ति। अतएव शकुन्तला-सम्मेलने मा नैराश्यं गम इति भावः।

अत्र राज्ञः स्वास्थ्यरूपार्थसिद्धये उक्तरूपहेतोरुपन्यासादुपपत्तिर्नाम नाट्यालङ्कारः। यथा दर्पणे—

"उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये।"

রাজা। সখে! সেই যে শকুন্তলার সম্মেলন হইয়াছিল, তাহা কি স্বপ্ন? না মায়া? না বুদ্ধির ভ্রম? কিংবা পূর্ব্বজন্মার্জ্জিত পুণ্যে সেইটুকু মাত্রই ফল জন্মাইয়াছিল?। সে সম্মেলনসুখ চলিয়াই গিয়াছে আর ফিরিয়া আসিবে না। অতএব এখন সে বিষয়ে যে সমস্ত আশা হইতেছে, সে সমস্ত আশার উচ্চদেশ হইতে পতনই হইতেছে ॥১০॥

(१) विदूषकः। मा एव्वं। अवस्संभाई अचिन्तणिज्जसमाअमी होइ।

राजा । अङ्गुरीयकं विलोक्य । अये ! इदं तदसुलभस्थान-भ्रंशि शोचनीयम् (१) । (व)

तव सुचरितमङ्गुरीय ! नूनं
प्रतनु कृशेन विभाव्यते फलेन ।
अरुणनखमनोहरासु तस्या-
श्च्युतमसि लब्धपदं यदङ्गुलीषु (२) ॥११॥

(व) राजेति । अये इति विषादे । इदमङ्गुरीयकम्, तत् शकुन्तलाया अङ्गुली-रूपं यत् असुलभं स्थानं तस्मात् भ्रश्यति पततीति तत्तथोक्तम्, अतएव शोचनीयं शोकयोग्यम् ।

शोकप्रकारमेवाह तवेति । हे अङ्गुरीय ! कृशेन क्षुद्रेण फलेन क्षुद्रफलदर्शने-नेत्यर्थः, तव सुचरितं तत्फलकारणीभूतं सुकृतमपि, नूनं निश्चितमेव, प्रतनु क्षुद्रम्, इति विभाव्यते मया सम्भाव्यते । यद्यस्मात्, अरुणैर्नखैः मनोहरासु तस्याः शकुन्तलाया अङ्गुलीषु, लब्धं पदं स्थानं येन तत् तादृशं सत्, च्युतं ततः पतितमसि । सुचरिताधिक्ये तवावस्थानमपि दीर्घकालमासीदित्याशयः ।

अत्र कविप्रौढोक्तिवशाद्विच्छित्त्या अल्पफलरूपसाधनेन सुचरिताल्पत्वरूपसाध्यस्य ज्ञानादनुमानालङ्कारः, तथा प्रस्तुते अङ्गुरीयके कार्य्यद्वारा अप्रस्तुतस्य स्वल्पपुण्यस्य स्वर्गच्युतस्य जनस्य व्यवहारसमारोपात् समासोक्तिश्च, अनयोर्गुणप्रधानभावेनाङ्गाङ्गि-भावात् सङ्करः ।

---

(ল) বিদূষক। বয়স্য! এরূপ বলিও না; দেখ অঙ্গুরীই এ বিষয়ে দৃষ্টান্ত। যাহা অবশ্যই হইবে, তাহার সম্মেলনও অচিন্তনীয়-ভাবেই হইয়া থাকে।

(ব) রাজা। ( অঙ্গুরী দেখিয়া ) ওহে! এই অঙ্গুরী, সেই দুর্লভ স্থান হইতে পড়িয়া গিয়াছিল বলিয়া, শোকের বিষয় হইয়াছে।

---

(१)…इदं तावत्…। (२)…प्रतनु ममैव विभाव्यते फलेन ।…नखमनोरमासु…।

মিশ্র। জই অণ্ণহত্থগদং ভবে, তদো সচ্চং সোঅণীঅং ভবে। সহি! দূরং বট্টসি, একাইণী জ্জেব কণ্ণসুহাইং অণুভবেমি (১)। (শ)

বিদূ। ভো! ইঅং ণামমুদ্দা কেণ উদ্দেসেণ ভঅদা তত্থভোদীএ হত্থসংসগ্গং পাবিদা (২)। (ষ)

(শ) যদি অন্যহস্তগতং ভবেৎ, ততঃ সত্যং শোচনীয়ং ভবেৎ। সখি! দূরং বর্ত্তসে, একাকিন্যেব কর্ণসুখানি অনুভবামি।

শকুন্তলয়া কৌতুকবশাদিচ্ছানুসারেণ কদাচিদেকস্যা কদাচিচ্চাপরস্যামঙ্গুল্যাং তদঙ্গুরীয়কং নিবিশিতমিতি সূচনার্থম অঙ্গুলীম্বিতি বহুবচনমুপাত্তম্।

“স্তোকাল্পক্ষুদ্রকাঃ সূক্ষ্মং শ্লক্ষ্ণং দভ্রং কৃশং তনু” ইত্যমরঃ।

পুষ্পিতাগ্রা বৃত্তম্—“অযুজি নযুগরেফতো যকারো যুজি চ নজৌ জরগাশ্চ পুষ্পিতাগ্রা” ইতি লক্ষণাৎ ॥১১॥

(শ) মিশ্রেতি। যদীতি যথা শকুন্তলাঙ্গুলীরূপোত্তমস্থানাৎ চ্যুতম্, তথৈব দুষ্মন্তাঙ্গুলীরূপোত্তমস্থানে পুনরারূঢ়মিতি নাঙ্গুরীয়কস্যেদানীং শোচনীয়তেত্যাশয়ঃ। সখীতি শকুন্তলায়াঃ সম্বোধনম্। প্রিয়সখীং শকুন্তলাং প্রতি নিরতিশয়ানুরাগদ্যোতকতয়া অমীষাং রাজবাক্যানাং কর্ণসুখকরত্বমিতি ভাবঃ।

হে অঙ্গুরী! অল্প ফল দেখিয়া, তোমার পুণ্য যে নিশ্চয়ই অল্প, তাহা অনুমান করিতেছি; যেহেতু তুমি, রক্তবর্ণ নখদ্বারা সুন্দর শকুন্তলার অঙ্গুলীতে স্থান পাইয়া, আবার পড়িয়া গিয়াছ ॥১১॥

(শ) মিশ্রকেশী। যদি অন্যের হাতে যাইত, তবে নিশ্চয়ই শোকের বিষয় হইত। সখি! দূরে রহিয়াছ; আমি একলাই কাণের সুখ অনুভব করিতেছি।

(১) সানুমতী। জই অণ্ণহত্থগদং হোত, সচ্চং এব্ব সোঅণিজ্জং হোত।

(২)···হত্থব্ভাসং···।

মিশ্র। মম বি কোদূহলেণ বাবারিদো এসো (১)। (স)

রাজা। বয়স্য! শ্রূয়তাম্, তদা স্বনগরায় তপোবনাৎ প্রস্থিতং মাং প্রিয়া সবাষ্পমাহ স্ম কিয়চ্চিরেণার্য্যপুত্রঃ পুনরস্মাকং স্মরিষ্যতীতি (২)। (হ)

(ষ) ভোঃ! ইয়ং নামমুদ্রা কেন উদ্দেশেন ভবতা তত্রভবত্যা হস্তসমর্গং প্রাপিতা?।

(স) মমাপি কৌতূহলেন ব্যাপারিত এষঃ।

(ষ) বিদূষকেতি। নামমুদ্রা মুদ্রাবিন্যস্তনামাক্ষরযুক্তমঙ্গুরীয়কম্, অথবা পত্রাদৌ স্বনামাক্ষরবিন্যাসকারিমুদ্রান্বিতমঙ্গুরীয়কম্।

এতেন ইদানীমিব তদানীমপি পত্রাদৌ মুদ্রয়া নামাক্ষরবিন্যসনরীতিরাসীদিতি প্রতীয়তে।

(স) মিশ্রেতি। অত্রাপিশব্দঃ প্রশ্নে। কৌতূহলেন নামমুদ্রাপণকারণশ্রবণেচ্ছয়া, এষ রাজবয়স্যঃ, অপি ব্যাপারিতঃ এতৎপ্রশ্নকরণে কিং নিযুক্তঃ, কথমন্যথা মম কৌতূহলোৎপত্তিমাত্রমেবায়ং পৃচ্ছতীতি ভাবঃ।

অত্র ভিন্নাধিকরণয়োঃ কৌতূহলব্যাপারণয়োঃ কারণকার্য্যভাবাদসঙ্গতিরলঙ্কারঃ।

(হ) রাজেতি। প্রিয়া শকুন্তলা। কিয়চ্চিরেণ কিয়দ্বিলম্বেন। অস্মাকং মামিত্যর্থঃ। "অস্মদশ্চ" ইতি বহুবচনম্, "স্মৃত্যর্থকর্ম্মণি" ইতি ষষ্ঠী।

(ষ) বিদূষক। ওহে! নামাঙ্কিত এই আংটী, কি উদ্দেশে তুমি তাঁহার হাতে দিয়াছিলে?।

(স) মিশ্রকেশী। আমার কৌতূহলও, এই বিষয় জিজ্ঞাসা করিতে ইহাকে প্রবৃত্ত করিয়াছে।

(হ) রাজা। সখে! শোন; সেই সময়ে আমি তপোবন হইতে প্রস্থান করিতেছিলাম, তখন প্রিয়তমা সাশ্রুনেত্রে আমাকে বলিলেন—"আর্য্যপুত্র কত কাল পরে আবার আমাকে স্মরণ করিবেন?"।

(১)···বাবারিদো এসো। (২) রাজা। শ্রূয়তাম্—স্বনগরায় প্রস্থিতম্ আহ কিয়চ্চিরেণার্য্যপুত্রঃ প্রতিপত্তিং দাস্যতীতি।

विदू। तदो तदो। (घ)

राजा। अथैनां मुद्रामङ्गुल्यां निवेशयता मया प्रत्यभिहिता (१)। (क)

विदू। किं त्ति (२)। (ख)

राजा। एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि यावदन्तम्।
तावत् प्रिये! मदवरोधनिदेशवर्त्ती (३)
नेता जनस्तव समीपमुपैष्यतीति ॥१२॥

(घ) ततस्ततः।

(ख) किमिति?।

---

(क) राजेति। अथ शकुन्तलायास्तादृशप्रश्नात् परम्, एनां मुद्रां स्वाक्षराङ्गुरीयकम्, अङ्गुल्यां शकुन्तलाया इति शेषः, निवेशयता परिधापयता, प्रत्यभिहिता प्रत्युत्तरविषयीकृता।

(ख) विदू इति। किमित्थं कमेवाव्ययं प्रश्ने, किं प्रत्यभिहितेत्यर्थः।

एकैकमिति। हे प्रिये! अत्र तपोवने, स्थितैव त्वमिति शेषः, दिवसे दिवसे प्रतिदिनम्, मदीयम् एकैकं नामाक्षरं दुष्मन्तेति मद्वाचकस्य शब्दस्य स्वरात्मकं वर्णम् एकैकस्मिन् दिवसे दुष्मन्त इति शब्दस्य एकैकं स्वरवर्णमित्यर्थः, गणय, यावत् यदा,

---

(ঘ) বিদূষক। তার পর? তার পর?।

(ক) রাজা। তার পর, আমি এই নামাঙ্কিত অঙ্গুরী, তাঁহার অঙ্গুলিতে পরাইতে পরাইতে প্রত্যুত্তর করিয়াছিলাম।

(খ) বিদূষক। কি প্রত্যুত্তর করিয়াছিলে?।

---

(१) राजा। पश्चादिमां मुद्रां तदङ्गुली …। (२) क्वचिदयं पाठो नास्ति।

(३) मदवरोधगृहप्रवेशम् …।

**তচ্চ দারুণাত্মনা ময়া মোহান্নানুষ্ঠিতম্ । (গ)**

**মিশ্র । রমণীও ক্খু অবহী বিহিণা বিসংবাদিদো । (ঘ)**

(ঘ) রমণীয়ঃ খল্ববধির্বিধিনা বিসংবাদিতঃ ।

---

অন্ত্যং শেষমক্ষরম্, গচ্ছসি "প্রযোগতশ্চ" ইতি ভবিষ্যতি বর্ত্তমানা, তেন গণনয়া প্রাপ্স্যসীতি তাৎপর্য্যম্, তাবৎ তদা, মদবরোধস্য মমান্তঃপুরস্য তৎসম্বন্ধীত্যর্থঃ, নির্দ্দেশে আদেশে বর্ত্তত ইতি নির্দ্দেশবর্ত্তী, নেতা মদন্তঃপুরং প্রাপয়িতা জনঃ, তব সমীপম্, উপৈষ্যতি ত্বাং নেতুমাগমিষ্যতি, ইতি প্রত্যভিহিতেত্যন্বয়ঃ । অতএব নোৎকণ্ঠিতা ভবেতি ভাবঃ ।

অত্র নামাক্ষরগণনোপদেশভঙ্গ্যা 'অদ্যাবধিতৃতীয়দিবসে ত্বাং নেতুং মমান্তঃপুরস্থো লোক আগমিষ্যতি' ইতি গম্যার্থস্য স্পষ্টসূচনাৎ পর্য্যায়োক্তমলঙ্কারঃ । তথা চ দর্পণে—

"পর্য্যায়োক্তং যদা ভঙ্গ্যা গম্যমেবাভিধীয়তে ।"

"ন ক্ষরতি ন চলতীতি প্রধানত্বাদক্ষরং স্বর উচ্যতে" ইতি কাতন্ত্রবৃত্তৌ দুর্গসিংহঃ ।

বসন্ততিলকা বৃত্তম্ ॥১২॥

(গ) তচ্চেতি । দারুণাত্মনা শকুন্তলায়া নিরতিশয়যাতনাহেতুত্বাৎ ভয়ঙ্কর-স্বভাবেন । মোহাৎ চিত্তবৈকল্যাৎ বিস্মরণাদিত্যর্থঃ, তচ্চ আনয়নং নানুষ্ঠিতং ন কৃতম্ ।

(ঘ) মিশ্রেতি । রমণীয়ঃ সুন্দরদাম্পত্যসুখজননোপযোগিত্বাৎ সুন্দরঃ, অবধিঃ

রাজা । প্রিয়ে ! এই তপোবনে থাকিয়াই তুমি, এক এক দিনে আমার নামের এক একটী অক্ষর গণনা কর, যাবৎ শেষ অক্ষরে যাইবে, তাহার মধ্যেই আমার আজ্ঞাধীন অন্তঃপুরস্থ কোন লোক, তোমাকে নিয়া যাইবার জন্য, তোমার নিকট আসিবে ॥১২॥

(গ) দারুণস্বভাব আমি, বিস্মৃতিবশতঃ তাহা করি নাই ।

(ঘ) মিশ্রকেশী । বিধাতা, ইঁহাদের সুন্দর সময়টীকে বিপরীত করিয়া দিয়াছেন ।

বিদূ। ভো! কধং লোহিদমচ্ছস্স বড়িসং বিঅ মুহপ্পবিট্ঠং এদং আসী? (১)। (ঙ)

রাজা। শচীতীর্থে সলিলং বন্দমানায়াস্তে সখ্যা হস্তাদ্গঙ্গাস্রোতসি পরিভ্রষ্টম্ (২)। (চ)

বিদূ। জুজ্জদি। (ছ)

(ঙ) ভো! কথং রোহিতমৎস্যস্য বড়িশমিব মুখপ্রবিষ্টমেতদাসীৎ?।

(ছ) যুজ্যতে।

---

কালঃ, বিধিনা দৈবেন, বিসংবাদিতঃ বিপরীতীকৃতঃ কুৎসিতীকৃত ইত্যর্থঃ, সুখং জনয়িতব্য দুঃখজননাদিতি ভাবঃ।

"অবধিঃ সীমকালয়োঃ" ইতি ত্রিকাণ্ডশেষঃ।

(ঙ) বিদূ ইতি। বড়িশং স্বনামখ্যাতং মৎস্যধারণাস্ত্রম্। এতদঙ্গুরীয়কম্।

"বড়িশং মৎস্যবেধনম্" ইত্যমরঃ।

(চ) রাজেতি। শচীতীর্থে গঙ্গাতীরবর্ত্তিশক্রাবতারাখ্যগ্রামস্য শচীনির্ম্মিতঘট্টে, সলিলং গঙ্গাজলম্, বন্দমানায়া অবগাহনানন্তরমষ্টাঙ্গং প্রণমন্ত্যাঃ, তে তব সখ্যাঃ শকুন্তলায়াঃ। পরিভ্রষ্টং পতিতম্, অঙ্গুরীয়কমিতি শেষঃ। তচ্চ খাদ্যবিশেষাশঙ্কয়া রোহিতমৎস্যেন ভক্ষিতমিত্যাশয়ঃ।

(ছ) বিদূ ইতি। যুজ্যতে শকুন্তলায়া হস্তাদঙ্গুরীয়কপরিভ্রংশনমিতি শেষঃ,

---

(ঙ) বিদূষক। সখে! বড়িশের ন্যায় এই অঙ্গুরী, রোহিতমৎস্যের উদরে প্রবেশ করিল কি প্রকারে?।

(চ) রাজা। তোমার সখী যখন শচীতীর্থে অবগাহন করিয়া সাষ্টাঙ্গে গঙ্গাকে নমস্কার করিতেছিল, তখন তাহার হাত হইতে গঙ্গার স্রোতে পড়িয়া গিয়াছিল।

---

(১) বিদূষকঃ। কহং ধীবলকপ্পিঅস্স লোহিঅমচ্ছস্স উদলব্ভন্তলে আসি।

(২) রাজা। শচীতীর্থং বন্দমানায়াঃ···।

मिश्र। अदो क्खु तवस्सिणीए सउन्तलाए अधम्मभीरुणो एदस्स राएसिणो परिणए सन्देहो जादो। अधवा ण ईदिसो अणुराओ अहिण्णाणं अवेक्खदि। ता कधं विअ एदं। (ज)

राजा। उपालप्स्ये तावदिदमङ्गुरीयकम्। (झ)

विदू। सस्मितम्। भो! अहं पि दाव एदं दण्डकट्ठं उवालहिस्सं। कधं उज्जुअस्स मे कुडिलं तुमं सि त्ति (१)। (ञ)

(ज) अतः खलु तपस्विन्याः शकुन्तलाया अधर्म्मभीरोरस्य राजर्षेः परिणये सन्देहो जातः। अथवा नेदृशोऽनुरागः अभिज्ञानमपेक्षते। कथमिवैतत्।

(ञ) भोः। अहमपि तावदेतत् दण्डकाष्ठमुपालप्स्ये। कथम् ऋजुकस्य मे कुटिलं त्वमसीति।

तदङ्गुरीयकस्य पुरुषाङ्गुलीप्रमाणेन निर्म्मिततया शकुन्तलाङ्गुल्या श्लथत्वादित्याशयः। अथवा अनेन हेतुना अङ्गुरीयकस्य रोहितमत्स्योदरगमनं सञ्जात इत्यर्थः।

(ज) मिश्रेति। अतः खलु अङ्गुरीयकपरिभ्रंशादेव, तपस्विन्याः शोच्यायाः शकुन्तलायाः परिणये इत्यन्वयः। ईदृशः अतुलनीयः। अभिज्ञानं चिह्नम्, नापेक्षते, तदनुरागेणैव स्मरणसम्भवादिति भावः। तत् तदा, एतत् विस्मरणम्। मिश्रकेश्या दुर्व्वाससः शापानवगमादिदमुक्तमिति बोध्यम्।

(झ) राजेति। उपालप्स्ये तिरस्करिष्यामि, नानाविडम्बनाकरणादित्याशयः।

---

(ছ) বিদূষক। হইতে পারে।

(জ) মিশ্রকেশী। এই জন্যই, অধর্ম্মভীরু এই রাজর্ষির দীনা শকুন্তলার বিবাহেরই সন্দেহ জন্মিয়াছিল। অথবা এইরূপ অনুরাগ, চিহ্নের অপেক্ষা করে না। অতএব এ বিস্মরণ হইল কি প্রকারে ?।

(ঝ) রাজা। আমি এই অঙ্গুরীকে তিরস্কার কবিব।

---

(१) विदूषकः। आत्मगतम्। गहीदो णेण पन्था उम्मत्तआणं।

राजा। तदश्रुत्वैव (१) (ट)

कथं नु तं कोमलबन्धुराङ्गुलिं
करं विहायासि निमग्नमम्भसि।
अथवा अचेतनं नाम गुणं न वीक्षते
मयैव कस्मादवधोरिता प्रिया ॥१३॥

(ञ) विदू इति। स्वयमुच्यमानस्य हास्यकरत्वं विभाव्य स्मितमिति बोध्यम्। एतन्मदीयम्, दण्डकाष्ठं लगुडम्। कीदृशमुपालप्स्ये इत्याह कथमिति। हे दण्डकाष्ठ! ऋजुकस्य सरलस्य मे मम मत्सम्बन्धीत्यर्थः, त्वम्, कथं कुटिलं वक्रमसि, इति इत्थम्, उपालप्स्ये इत्यन्वयः। तथा च यथा मम दण्डस्य तादृशोपालम्भनेऽपि कुटिलतात्यागो न स्यात् तथा तवाङ्गुरीयकोपालम्भनेऽपि तत्कृतविडम्बनादोषहानिर्न स्यादेवेति तदुपालम्भो निष्फलत्वाद्विस्मयकर एवेति भावः।

(ट) राजेति। तत् पूर्वोक्तं विदूषकवाक्यम्, अश्रुत्वैव वदतीति शेषः शकुन्तला-सक्तस्य मनसः अङ्गुरीयकतिरस्कारकरणप्रवणत्वादित्याशयः। अयन्तु विदूषकवाक्यस्य उत्तरादाने हेतुरुक्त इति बोध्यम्।

कथमिति। हे अङ्गुरीयक! कोमला मृदुलाः बन्धुरा उन्नतावनताश्च अङ्गुलयो यस्य तम्। इदं बन्धुरत्वन्तु अङ्गुलीनामग्रावच्छेद एव, अन्यथा सौन्दर्यहानिरेव स्यादिति बोध्यम्। तं शकुन्तलायाः अङ्गभूतम्, करं हस्तम्, विहाय परित्यज्य, अम्भसि गङ्गाजले, कथं नु केन हेतुना, निमग्नमसि।

स्वयमेव निमज्जनं समर्थयन्नाह अथवेति। अचेतनं वस्तु कर्त्तृ, गुणं पदार्थ-

---

(ঞ) বিদূষক। (ঈষৎ হাস্য করিয়া) ওহে! আমিও এই দণ্ডকাষ্ঠকে তিরস্কার করিব। হে দণ্ডকাষ্ঠ! আমি সরল, অথ চ তুমি আমার হইয়া, বক্র হইলে কেন।

(ট) রাজা। (তাহা না শুনিয়াই)

---

(१) अयं पाठः पुस्तकान्तरे नास्ति।

মিশ্র। সঅং জ্জেব পড়িবণ্ণো জং অহ্মি বত্তুকামা (১)। (ঠ)

বিদূ। ভো! সব্বধা অহং বুভুক্খাএ মারিদব্বো (২)। (ড)

(ঠ) স্বয়মেব প্রতিপন্নঃ, যদস্মি বক্তুকামা।

(ড) ভোঃ। সর্ব্বথা অহং বুভুক্ষয়া মারয়িতব্যঃ।

---

বিশেষস্য উৎকর্ষম্, ন বীক্ষতে নালোচয়তি অনালোচ্যৈব কার্য্যং করোতীত্যর্থঃ। নাম সম্ভাবনায়াম্। অতএব অচেতনমেবাঙ্গুরীয়কং শকুন্তলাহস্তস্যোৎকর্ষমনালোচ্য জলে নিমগ্নমিতি ভাবঃ। কিন্তু ময়ৈব সচেতনেনৈবেত্যাশয়ঃ, প্রিয়া শকুন্তলা, কস্মাৎ হেতোঃ, অবধীরিতা প্রত্যাখ্যাতা। অঙ্গুরীয়কত্যাগে তদচেতনত্বমেব সমর্থকমস্তি, সচেতনমৎকর্ত্তৃকপ্রত্যাখ্যানে তু কিঞ্চিদপি সমর্থকং নাস্তীতি অঙ্গুরীয়কাদধম এবাহমিত্যভিপ্রায়ঃ।

অত্র তৃতীয়পাদেন পূর্ব্বার্দ্ধসমর্থনাৎ সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাসোঽলঙ্কারঃ। চতুর্থপাদেন তু অঙ্গুরীয়কাদাত্মনোঽধমত্বং ব্যজ্যত ইতি বস্তুনা ব্যতিরেকালঙ্কারধ্বনিঃ।

"বন্ধুরন্তূন্নতানতম্" ইত্যমরঃ।

বংশস্থবিলং বৃত্তম্ ॥১২॥

(ঠ) মিশ্রেতি। যৎ অচেতনস্য গুণাদর্শিত্বম্, তৎ স্বয়মেব প্রষ্টা রাজা, প্রতিপন্নঃ অঙ্গীকৃতবান্। অতএব ন পুনর্মম তদ্বক্তব্যমস্তীতি ভাবঃ।

---

হে অঙ্গুরীয়ক! যাহার আঙ্গুলগুলি কোমল এবং উচু-নীচু, সেই হাতখানি পরিত্যাগ করিয়া, তুমি জলে মগ্ন হইয়াছিলে কেন? অথবা অচেতন পদার্থ, গুণ দেখিতে পায় না; কিন্তু আমিই বা কেন প্রিয়তমাকে প্রত্যাখ্যান করিলাম ॥১৩॥

(ঠ) মিশ্রকেশী। আমি যাহা বলিতে ইচ্ছা করিয়াছিলাম, তাহা নিজেই স্বীকার করিলেন।

---

(১) অয়ং পাঠোঽপি ক্বচিন্ন দৃশ্যতে।

(২) বিদূষকঃ। আত্মগতম্। কহং বুহুক্খাএ খাদব্বো ম্হি।

राजा । अनादृत्य । प्रिये ! अकारणपरित्यागादनुशयदग्ध-हृदयस्तावदनुकम्प्यतामयं जनः पुनर्दर्शनेन (१) । (ढ)

प्रविश्य चित्रफलकहस्ता चेटी । भट्टा ! इअं चित्तगदा भट्टिणी ।
इति चित्रफलकं दर्शयति (२) । (ण)

(ण) भर्त्तः ! इयं चित्रगता भट्टिनी ।

---

(ड) विदू इति । सर्वथा बाढं सत्यमेवेत्यर्थः, बुभुक्षया क्षुधया, नाशयितव्यो विनाशयितव्यः । अतएव इदानीमेतदालोचनं विहाय गृहं चल इत्याशयः ।

"सर्वथा हेतुबाढयोः" इति मेदिनी ।

(ढ) राजेति । अनादृत्य उक्तविदूषकवाक्यं तुच्छबुद्ध्या अवज्ञाय । अनुशयेन अनुतापेन दग्धं हृदयं यस्य स तादृशः, अयं सन्निकर्षी जन, पुनर्दर्शनेन पुनर्दर्शन-दानेन, अनुकम्प्यतां दयापात्रीक्रियताम् ।

अत्र आक्रन्दो नाम नाट्यालङ्कारः—"आक्रन्दः प्रलपितं शुचा" इति दर्पणलक्षणात् ।

(ण) प्रविश्येति । चित्रफलकम् आलेख्यपट्टं हस्ते यस्याः सा तथोक्ता, चेटी दासी । हे भर्त्तः ! स्वामिन् ! चित्रगता आलेख्यपट्टस्था, भट्टिनी अकृताभिषेका भवतः पत्नी तत्प्रतिमूर्त्तिरित्यर्थः ।

(ড) বিদূষক। ওহে! ক্ষুধা আমাকে নিশ্চয়ই মারিয়া ফেলিবে।

(ঢ) রাজা। (সে কথা গ্রাহ্য না করিয়া) প্রিয়ে! বিনা কারণে পরিত্যাগ করায়, অনুতাপে আমার হৃদয় দগ্ধ হইতেছে; অতএব পুনরায় দর্শন দিয়া, এই ব্যক্তির প্রতি দয়া কর।

(ণ) চিত্রফলকহস্তে দাসী প্রবেশ করিয়া। মহারাজ! এই চিত্রস্থ মহারাণী। (এই বলিয়া চিত্রফলক দেখাইল।)

---

(१) राजा । अकारणपरित्यक्तः । अनुशयतप्तहृदयः ।

(२) प्रविश्यापटीक्षेपेण···।

राजा। (विलोक्य।) अहो रूपमालेख्यगताया अपि प्रियायाः। तथाहि—(त)

दीर्घापाङ्गविसारिनेत्रयुगलं लीलाञ्चितभ्रूलतं
दन्तान्तःपरिकीर्णहासकिरणज्योत्स्नाविलिप्ताधरम्।
कर्कन्धूद्युतिपाटलोष्ठरुचिरं तस्यास्तदेतन्मुखं
चित्रेऽप्यालपतीव विभ्रमलसत् प्रोद्भिन्नकान्तिद्रवम् (१) ॥१४॥

(त) राजेति। आलेख्यगताया अपि चित्रस्थाया अपि, प्रियायाः शकुन्तलायाः, अहो आश्चर्यं रूपम्।

दीर्घेति। दीर्घाभ्याम् अपाङ्गाभ्यां नेत्रप्रान्तद्वयेन विसारि विस्तृतं नेत्रयुगलं यत्र तत् तादृशम्, लीलया विलासेन अञ्चिते शोभाप्राप्ते भ्रूलते लतातुल्यभ्रूद्वयं यत्र तत्, दन्तानामन्तरभ्यन्तरेषु परिकीर्णा इतस्ततो विक्षिप्ता हासकिरणाः। स्मितदीप्तयः ज्योत्स्ना इव ताभिर्विलिप्तौ व्याप्तौ अधरौ ओष्ठौ यस्मिन् तत् तथोक्तम्, कर्कन्धूद्युतिवत् पक्वबदरीफलविशेषप्रभावत् पाटलाभ्यां स्वभावत एव श्वेतरक्ताभ्याम् ओष्ठाभ्यां रुचिरं सुन्दरम्, विभ्रमेण विलासेन लसत् शोभमानम्, प्रोद्भिन्ना आविर्भूता कान्तिः शोभाविशेषो येभ्यस्ते प्रोद्भिन्नकान्तयः तादृशा द्रवा जलानि घर्म्मजलबिन्दवो यस्मिन् तत् तादृशम्, एतत् दृश्यमानम्, तस्याः शकुन्तलायाः, तत् पूर्वप्रत्यक्षीकृतम्, मुखं कर्त्तृ, चित्रे चित्रगतमपि सत्, आलपतीव मामाभाषत इव, हासेन किञ्चिद्विवृतौष्ठत्वादिति भावः।

अत्र हासकिरणज्योत्स्नेत्येका लुप्तोपमा, कर्कन्धूद्युतिपाटलेति चापरा लुप्तोपमा ताभ्यां सङ्कीर्णा वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः। उत्पत्तिप्रभृतीत्यैव पाटलवर्णमेकजातीयं बदरीफलमस्ति, पाटलेत्युपमेयसामर्थ्येन तस्यैव ग्रहणान्न उपमानगतन्यूनपदत्वदोषः।

"कर्कन्धूर्बदरी कोली कोलं कुवलफेनिले" इत्यमरः। शार्दूलविक्रीडितं वृत्तम् ॥१४॥

(ত) রাজা। (দেখিয়া) প্রিয়তমা চিত্রগতা হইলেও উহার রূপ কি আশ্চর্য্য!। দেখ—

(१) कुत्रचिदयं श्लोको नास्ति।

বিদূ। বিলোক্য। সাহু বঅস্স! সাহু, জং তএ মহুরো ভট্টিণীএ দংসিদো ভাবাণুপ্পবেসো, খলদি বিঅ মে দিট্টী ণিহুদপ্পদেসেসুং। কিং বহুণা, সত্তাণুপ্পবেসসঙ্কাএ আলবণকোদূহলং মে জণঅদি (১)। (থ)

(থ) সাধু বয়স্য! সাধু, যৎ ত্বয়া মধুরো ভট্টিন্যা দর্শিতো ভাবানুপ্রবেশঃ, স্খলতীব মে দৃষ্টির্নিভৃতপ্রদেশেষু। কিং বহুনা, সত্ত্বানুপ্রবেশশঙ্কয়া আলপনকৌতূহলং মে জনয়তি।

(থ) বিদূ ইতি। যৎ যস্মাৎ। মধুরো দৃষ্টিপ্রীতিকরঃ, ভট্টিন্যাঃ শকুন্তলায়াঃ, ভাবানুপ্রবেশঃ চিত্রে চেষ্টাসন্নিবেশঃ, দর্শিতঃ প্রকটিতঃ, অতএব মে মম দৃষ্টিঃ, নিভৃতপ্রদেশেষু স্তনাদিগুপ্তস্থানেষু, স্খলতীব ধারারূপেণ সঞ্চলতীব, অবিকলত্বাদিতি ভাবঃ। কিং বহুনা উক্তেনেতি শেষঃ। সত্ত্বানুপ্রবেশশঙ্কয়া প্রাণসন্নিবেশসম্ভাবনয়া অস্যাং মূর্ত্তৌ প্রাণাঃ সন্তীতি সম্ভাবনয়েত্যর্থঃ।

"ভাবঃ সত্তাস্বভাবাভিপ্রায়চেষ্টাত্মজন্মসু" ইতি "দ্রব্যাসুব্যবসায়েষু সত্ত্বমস্ত্রী তু জন্তুষু" ইতি চামরঃ।

প্রান্তযুগল বিস্তৃত হওয়ায় নয়নযুগলও বিস্তৃত, ভ্রূলতা দুইটী বিলাসবশতঃ শোভা পাইতেছে; জ্যোৎস্নার ন্যায় দন্তসমূহের অভ্যন্তর হইতে নির্গত হাস্যের কিরণে ওষ্ঠযুগল ব্যাপ্ত হইয়াছে; পক্ক বদরীফলের ন্যায় পাটলবর্ণ ওষ্ঠদ্বয় সুন্দর দেখা যাইতেছে; বিলাসবশতঃ বিশেষ শোভা পাইতেছে এবং ঘর্ম্মবিন্দু নির্গত হওয়ায় কান্তি যেন ঝরিয়া পড়িতেছে; প্রিয়তমার এহেন সেই মুখখানি, চিত্রে থাকিয়াও যেন আলাপ করিতেছে ॥১৪॥

(থ) বিদূষক। (দেখিয়া) ভাল, সখে! ভাল; যেহেতু তুমি

(১) বিদূষকঃ। সাহু বঅস্স! মহুরাবত্থাণদংসণিজ্জো ভাবাণুপ্পবেসো। খলই বিঅ মে দিট্ঠী ণিণ্ণুণ্ণপ্পদেসেসু।

मिश्र। अम्मो! एसा राएसिणो वत्तिआलेहाणिउणदा। जाणे पिअसही मे अग्गदो वट्टदि त्ति (१)। (द)

राजा। यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं लेखया किञ्चिदन्वितम् ॥१५॥

(द) अहो! राजर्षेर्वर्त्तिकालेखानिपुणता। जाने प्रियसखी मे अग्रतो वर्त्तत इति।

(द) मिश्रेति। राजर्षेर्दुष्मन्तस्य, वर्त्तिकया तूलिकया या लेखा चित्रणं तस्यां निपुणता दक्षता, अहो आश्चर्य्यरूपा, अविकलतादर्शनादिति भावः। जाने मन्ये, प्रियसखी शकुन्तला।

एतद्दर्शनात् मालतीमाधवे माधवकर्त्तृकमालतीचित्रदर्शनाच्च प्रतीयते तदानीं प्रायेण सर्व्वेषामेव चित्रविद्यानैपुण्यमासीदिति।

यदिति। यद्यदङ्गम्, चित्रे साधु अविकलचित्रणेन सुन्दरं न स्यात्, प्रकृततत्तदङ्गस्यैव असुन्दरत्वादिति भावः; तत्तदङ्गम्, अन्यथा प्रकृतमूर्त्तितो विकलम्, क्रियते सुन्दरमेव विधाय चित्र्यते, साकल्येन सौन्दर्य्यसम्पादनार्थमित्याशयः, सर्व्वैरेव चित्रकरैरिति शेषः। तथापि ईदृश्यां चित्रकरीत्यां सत्यामपि, तस्याः शकुन्तलायाः, लावण्यं सर्व्वाङ्गस्यापि सौन्दर्य्यम्, लेखया मच्चित्रणेन, किञ्चिदन्वितं प्रकृतमूर्त्त्या सह एतत्प्रतिमूर्त्तेः किञ्चित् संवादितं प्रायेणाविकलं जातमित्यर्थः। किञ्चिदित्यनेन

রাণী শকুন্তলার অবস্থাটী চিত্রে বড়ই সুন্দর দেখাইয়াছ; ইঁহার গুপ্তস্থানে দৃষ্টি যেন ধারাবাহিরূপে চলিতে থাকে। বেশী বলিয়া কি হইবে; প্রাণ আছে ভাবিয়া, আলাপের কৌতুক জন্মাইতেছে।

(দ) মিশ্রকেশী। তুলি দিয়া রাজর্ষির এই চিত্র করিবার নিপুণতা আশ্চর্য্য বটে। সুতরাং আমি মনে করিতেছি যে, প্রিয়সখী শকুন্তলা আমার সম্মুখে রহিয়াছে।

(१) सानुमती। अम्मो! एसा राएसिणो णिउणदा। जाणे सही।

तथाहि—

अस्यास्तुङ्गमिव स्तनद्वयमिदं, निम्नेव नाभिः स्थिता,
दृश्यन्ते विषमोन्नताश्च वलयो भित्तौ समायामपि।
अङ्गे च प्रतिभाति मार्दवमिदं स्निग्धप्रभावाच्चिरं
प्रेम्णा मन्मुखमीषदीक्षत इव स्मेरा च वक्तीव माम् (१) ॥१६॥

कश्चिंचिदशे प्रकृताङ्गात् सुन्दरमङ्गं चित्रितमिति द्योतितम्। एतेन प्रकृतमूर्तेः सौन्दर्य्यातिशयो व्यज्यते ॥१५॥

अस्या इति। समायामपि समतलायामपि, भित्तौ चित्रफलके, अस्याः शकुन्तलायाः, इदं स्तनद्वयं तुङ्गम् उन्नतमिव वर्त्तते इति शेषः। अतएवैतच्चित्रणे महदेव नैपुण्यं जातमिति भावः। एवमुत्तरवाक्येष्वपि भावः समुन्नेयः। नाभिः निम्ना गभीरेव स्थिता। वलयश्च उदरगतमांसतरङ्गाश्च, विषमोन्नता अवनतोन्नताः, दृश्यन्ते। स्निग्धप्रभावात् तैलाक्तवर्णसामर्थ्यात्, अङ्गे गात्रे, इदं मार्दवञ्च कोमलता च, चिरं प्रतिभाति; तैलस्य महता शोषणाभावादित्याशयः। प्रेम्णा अनुरागेण, मन्मुखं मम वदनम्, ईषत् ईक्षत इव कुटिलदृष्टिपातेन किञ्चित् पश्यतीव, तथा स्मेरा मृदुहासा च, मां वक्तीव किञ्चिदालपतीव; उभयथापि चित्रणनैपुण्यादित्यभिप्रायः।

अत्र प्रथमे पादे द्वे गुणोत्प्रेक्षे, चतुर्थेऽपि च द्वे क्रियोत्प्रेक्षे; इत्येतासां परस्परनिरपेक्षतया संसृष्टिः। उन्नते वैषम्यमवनतेष्वेव पूर्णं स्यात्, तेन विषमपदेनैवार्थादवनतेर्बोधनात् न अवाचकत्वदोष इति दिक्।

शार्दूलविक्रीडितं वृत्तम् ॥१६॥

রাজা। অবিকল চিত্র করিলে যে যে অঙ্গ সুন্দর হয় না, চিত্রকারগণ সেই সেই অঙ্গকে চিত্রে অন্যরূপ করিয়া থাকে। তথাপি এই চিত্র-দ্বারা শকুন্তলার সৌন্দর্য্য, কিছু খাটিয়াছে ॥১৫॥

দেখ, চিত্রপট সমান হইলেও, শকুন্তলার এই স্তনদ্বয় যেন উচ্চ,

(१) क्वचिदेष श्लोको नास्ति।

মিশ্র। সরিসং এব্বং পচ্চাদাবগুরুণো সিণেহস্স (১)। (ধ)

রাজা। নিশ্বস্য।

সাক্ষাৎ প্রিয়ামুপগতামপহায় পূর্ব্বং
চিত্রার্পিতামহমিমাং বহুমন্যমানঃ।
স্রোতোবহাং পথি নিকামজলামতীত্য
জাতঃ সখে! প্রণয়বান্ মৃগতৃষ্ণিকায়াম্ (২) ॥১৭॥

(ধ) সদৃশমেবং পশ্চাত্তাপগুরোঃ স্নেহস্য।

(ধ) মিশ্রেতি। এবং চিত্রিতায়া অপি শকুন্তলায়া আদরণম্, পশ্চাত্তাপেন অনুতাপেন গুরোর্বৃদ্ধিং গতস্য, স্নেহস্য অনুরাগস্য সদৃশমুপযুক্তম্; সর্ব্বত্রৈব তথা দর্শনাদিত্যাশয়ঃ।

সাক্ষাদিতি। হে সখে! অহং পূর্ব্বম্, সাক্ষাৎ প্রত্যক্ষতঃ, উপগতাং প্রকৃতমূর্ত্ত্যৈব উপস্থিতাম্, প্রিয়াং শকুন্তলাম্, অপহায় পরিত্যজ্য, ইমাং চিত্রার্পিতাম্ আলেখ্যমাত্রতয়া বিন্যস্তাং প্রাণাদিহীনামিত্যাশয়ঃ, প্রিয়াম্, বহুমন্যমান আদ্রিয়মাণঃ সন্, পথি গমনমার্গে, নিকামজলাং প্রচুরতোয়াম্, স্রোতোবহাং নদীম্ অতীত্য অতিক্রম্য, মৃগতৃষ্ণিকায়াং নদীবৎ প্রতীয়মানায়াং মরীচিকায়াম্, প্রণয়বান্ জলপ্রার্থনাবান্ জাতঃ। তথা চ যথা নদীমতীত্য মরীচিকায়াং জলং প্রার্থয়ন্, পিপাসুঃ জলন্তু ন লভত এব, প্রত্যুত পিপাসাতিরেকেণ নিতরাং পীড্যতে; তথা অহমপি প্রকৃতাং শকুন্তলাং প্রত্যাখ্যায় চিত্রার্পিতায়াং

নাভি যেন গভীর এবং থরগুলি যেন উচু-নীচু দেখা যাইতেছে। আর স্নিগ্ধতার প্রভাবে সর্ব্বদাই অঙ্গে এই কোমলতা প্রকাশ পাইতেছে; অনুরাগবশতঃ আমার মুখ যেন অল্প অল্প দেখিতেছে এবং ঈষৎ হাস্যযুক্ত হইয়া আমাকে যেন কিছু বলিতেছে ॥১৬॥

(ধ) মিশ্রকেশী। অনুরাগ অনুতাপে বর্দ্ধিত হয়, সেই অনুরাগের ইহাই উপযুক্ত।

(১) সিণেহস্স অণুবন্ধস্স অ। (২) ক্বচিৎ পুস্তকেঽয়ং শ্লোকঃ পরস্তাদ্বিন্যস্তঃ।

বিদূ। ভো! তিণ্ণিআ আইদিও দীসন্তি, সব্বাও জ্জেব দংসণীআও; তা কদমা এত্থ তত্থভোদী সউন্তলা ? (১)। (ন)

মিশ্র। অণহিণ্ণো ক্খু এসো সহীএ রূবস্স মোহচক্খু, ইঅং ক্খু ণ সে গদা পচ্চক্খদং ? (২)। (প)

(ন) ভো! তিস্র আকৃতয়ো দৃশ্যন্তে, সর্ব্বা এব দর্শনীয়াঃ, তৎ কতমাত্র তত্রভবতী শকুন্তলা।

(প) অনভিজ্ঞঃ খল্বেষ সখীরূপস্য মোঘচক্ষুঃ, ইয়ং খলু নাস্য গতা প্রত্যক্ষতাম্।

মনঃশান্তিমিচ্ছন্ তান্তু ন লভে এব, প্রত্যুত কামাতিরেকেণ নিতরাং পীড়ামেবানুভবামীতি ভাবঃ।

অতএবাত্র অসম্ভবদ্বস্তুসম্বন্ধা নিদর্শনালঙ্কারঃ।

"প্রণয়ঃ প্রেম্ণি বিস্রম্ভে যাচ্ঞাপ্রসরয়োরপি" ইতি মেদিনী।

বসন্ততিলকা বৃত্তম্ ॥১৭॥

(ন) বিদূ ইতি। দর্শনীয়াঃ পরমসৌন্দর্য্যাদবশ্যদ্রষ্টব্যাঃ। অত্র আসু মধ্যে, কতমা কা।

রাজা। (নিশ্বাস ত্যাগ করিয়া) প্রিয়া শকুন্তলা পূর্ব্বে সাক্ষাৎ উপস্থিত হইয়াছিলেন, তখন তাঁহাকে পরিত্যাগ করিয়া, এখন এই চিত্রিত শকুন্তলাকে অত্যন্ত আদর করিতেছি। অতএব হে সখে! পথে প্রচুরজলসম্পন্ন নদী পরিত্যাগ করিয়া, মরীচিকায় জল প্রার্থনা করিতেছি ॥১৭॥

(ন) বিদূষক। বয়স্য! তিনটী মূর্ত্তি দেখিতেছি, সকল কয়টীই সুদৃশ্য; ইহার মধ্যে কোন্‌টী শকুন্তলা ?।

---

(১) বিদূষকঃ। ভো! দাণিং তিণ্ণি তত্ত ভোইদীও দীসন্তি …।

(২) সানুমতী। অণহিণ্ণো ক্খু এরিসস্স রূবস্স সোহদিট্ঠী অঅং জণো।

राजा । त्वं तावत् कतमां तर्कयसि । (फ)

विदू । निर्वर्ण्य । तक्केमि जा एसा सिढिलवन्धणुव्वन्त-कुसुमेण केसहत्थेण वद्धसेअविन्दुणा वअणेण विसेसदो णमिदंसआहिं वाहुलदाहिं उच्चलिदणीविणा वसणेण अ ईसीपरिस्सन्ता विअ अहिसेअसिणिद्धदरपल्लवस्स वालचूअ-रुक्खस्स पास्से आलिहिदा एसा तत्थभोदी सउन्तला, इदराओ सहीओ त्ति (१) । (ब)

(ब) तर्कयामि यैषा शिथिलबन्धनोद्वान्तकुसुमेन केशहस्तेन बद्धस्वेदबिन्दुना वदनेन नमितांसकाभ्यां बाहुलताभ्याम् उच्चलितनीविना वसनेन च ईषत् परिश्रान्तेव अभिषेक-स्निग्धतरपल्लवस्य बालचूतवृक्षस्य पार्श्वे आलिखिता, एषा तत्रभवती शकुन्तला, इतरे सख्यौ इति ।

(प) मिश्रेति । एष राजवयस्यः, सखीरूपस्य शकुन्तलासौन्दर्य्यस्य, अनभिज्ञः अज्ञाता, अतएव मोघं शकुन्तलाया अदर्शनात् व्यर्थं चक्षुर्यस्य सः । इयं शकुन्तला, अस्य राजवयस्यस्य, प्रत्यक्षतां न गता, अतएव अनभिज्ञ इत्याशयः ।

(फ) राजेति । कतमाम् आसां मध्ये काम्, शकुन्तलामिति शेषः तर्कयसि सम्भावयसि ।

(ब) विदू इति । शिथिलबन्धनेन हेतुना उद्वान्तानि परित्यक्तानि कुसुमानि न्यस्तपूर्वाणि पुष्पाणि येन तेन तथोक्तेन, केशहस्तेन केशकलापेन विशिष्टा, बद्धा धृताः स्वेदस्य घर्म्मजलस्य बिन्दवो येन तादृशेन, वदनेन मुखेन विशिष्टा, नमितौ घटोत्तोलन-

(প) মিশ্রকেশী। যে হেতু ইনি সখীর রূপ দেখেন নাই ; সুতরাং ইঁহার চক্ষু নিষ্ফল। শকুন্তলা ইঁহার প্রত্যক্ষগত হয় নাই।

(ফ) রাজা। তুমি কোন্‌টীকে শকুন্তলা মনে কর।

(१)···सिढिलकेसबन्धुव्वन्तकुसुमेण केसन्तेण, उब्भिण्णसेअविन्दुणा वअणेण विसेसदो ओसरिआहिं वाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स चूअपादवस्स···।

राजा । निपुणो भवान् । अस्त्यत्र ममापि भावचिह्नम् (१) । (भ)

वेलायाम् अवनतीकृतौ अंसौ स्कन्धौ ययोस्ताभ्यां बाहुलताभ्यां विशिष्टा, तथा उच्छ्वसिता जलदानकाले सञ्चलिता नीविः कटिबन्धनं यस्य तादृशेन वसनेन च विशिष्टा । सर्वत्र विशेषणे तृतीया । ईषत् परिश्रान्तेव आश्रमपादपेषु जलसेकादिति भावः । अभिषेकेण जलसेचनेन स्निग्धानि अतिशयेन चिक्कणानि पल्लवानि यस्य तस्य तरोरस्य, बालचूतवृक्षस्य क्षुद्राम्रवृक्षस्य, पार्श्वे आलिखिता चित्रिता, एषा तत्रभवती शकुन्तला, सौन्दर्यातिरेकदर्शनात् भाग्यवदपदर्शनाच्चेत्याशय. । इति तर्कयामीति पूर्वेणान्वयः ।

"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इति "स्त्रीकटीवस्त्रबन्धेऽपि नीविः परिपणेऽपि च" इति चामरः ।

(भ) राजेति । निपुणो वस्तुनिर्णयदक्ष, पूर्वमनवलोक्यापि शकुन्तलाया निर्णयादित्यभिप्रायः । अत्र चित्रे । भावयोः सात्त्विकभावयोः स्वेदाश्रुणोः, चिह्नमस्ति । सात्त्विकभावानाह साहित्यदर्पणः—

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥"

(ব) বিদূষক। (দেখিয়া) আমি মনে করি, যাঁহার কেশকলাপ শিথিলভাবে বদ্ধ হওয়ায় তাহার ফুলগুলি পড়িয়া যাইতেছে, মুখের উপরে ঘর্ম্মবিন্দু আবির্ভূত হইয়াছে, বাহুর উপরিভাগ অবনত দেখা যাইতেছে এবং বস্ত্রের বন্ধন সরিয়া গিয়াছে, আর যাঁহাকে ঈষৎ পরিশ্রান্ত বলিয়া বোধ হইতেছে; এই অবস্থায় জলসেকে স্নিগ্ধপল্লব ক্ষুদ্র আম্রবৃক্ষের পার্শ্বে যিনি এই চিত্রিত আছেন, ইনিই শকুন্তলা; অন্য দুইটী সখী।

(ভ) রাজা। তুমি অভিজ্ঞ বটে। এই চিত্রে আমারও ভাবের চিহ্ন আছে।

---

(१)···अस्त्यत्र मे भावचिह्नम् ।

स्विन्नाङ्गुलिविनिवेशात् रेखा प्रान्तेषु दृश्यते मलिना ।
अश्रु च कपोलपतितं लक्ष्यमिदं वर्णकोच्छ्वासात् (१) ॥१८॥

चेटीं प्रति । चतुरिके ! अर्द्धलिखितमेतद्विनोदस्थानमस्माभिः, तद्गच्छ वर्त्तिकास्तावदानय (२) । (म)

किं तच्चिह्नमित्याह स्विन्नेति । स्विन्नायाः चित्रमात्रेणैव कामविकाराविर्भावात् स्रुतघर्म्मजलायाः, अङ्गुलेः चित्रणकाले कालरङ्गाक्तायाः ममाङ्गुलेः, विनिवेशात् चित्रफलके स्थापनात्, प्रान्तेषु शकुन्तलायाः एव पार्श्वेषु, मलिना विनिवेशिताङ्गुलितः कालरङ्गलगनात् किञ्चित्कालवर्णा, रेखा, दृश्यते । तथा, वर्णकस्य एतच्चित्रस्थरङ्गस्य उच्छ्वासात् स्फीतीभावात् सर्व्वतः किञ्चित्प्रसरणादित्यर्थः, कपोलात् ममैव गण्डदेशात् पतितं विकाराविर्भावेन गलितम्, इदम्, अश्रु च नयनजलञ्च, लक्ष्यमनुमानेनावगन्तव्यम्, अन्यथा मलिनरेखाया वर्णकोच्छ्वसस्य चासम्भव इति भावः ।

वर्णयति रञ्जयतीति वर्णकं चित्रसाधनीभूतलेपनम् । तथा च विश्वः—"वर्णकश्चारणे स्मृतः । विलेपने चन्दने च वर्णकं स्यात्—।" आर्य्या जातिः ॥१८॥

(म) चेटीमिति । चेटीं चित्रानयनकारिणीं दासीम् । चतुरिकेति तन्नाम । एतस्य चित्रस्य विनोदस्थानम् आमोदकरविषयसमूहः, अर्द्धलिखितं तदानीमवसरासत्त्वादर्द्धचित्रितम् । वर्त्तिका नानाविधास्तूलिकाः । वर्त्तिकापदेनात्र वर्णकादिकमपि लक्ष्यते ।

---

ঘর্ম্মাক্ত অঙ্গুলি সংস্থাপন করায় এই চিত্রের প্রান্তে মলিন রেখা দেখা যাইতেছে এবং রং ফুলিয়া উঠায় গাল হইতে পতিত এই চোখের জলও লক্ষ্য হইতেছে ॥১৮॥

(ম) (দাসীর প্রতি) চতুরিকে! আমি এই আমোদকর স্থানগুলি অর্দ্ধচিত্রিত করিয়াছিলাম; অতএব তুলিগুলি নিয়া আয়।

---

(१) स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः ।···दृश्यमिदं···।

(२) क्वचित् चेटीं प्रति इति नास्ति ।···गच्छ वर्त्तिकां···।

চেটী। অজ্জ! মাহব্ব! অবলম্ব চিত্তফলঅং, জাব আঅচ্ছামি (১)। (য)

রাজা। অহমেবাবলম্বে। ইতি যথোক্তং করোতি। (২)। (র)

চেটী। নিষ্ক্রান্তা।

বিদূ। ভো! কিং এত্থ অবরং আলিহিদব্বং? (৩)। (ল)

মিশ্র। জো জো পিঅসহীএ অহিমদো পদেসো, তং তং আলিহিদুকামোত্তি তক্কেমি (৪)। (ব)

---

(য) আর্য্যে! মাধব্য! অবলম্বস্ব চিত্রফলকম্, যাবদাগচ্ছামি।

(ল) ভো! কিমত্রাপরমালিখিতব্যম্।

(ব) যো যঃ প্রিয়সখ্যাঃ অভিমতঃ প্রদেশঃ, তং তমালিখিতুকাম ইতি তর্কয়ামি।

---

(য) চেটীতি। মাধব্যেতি বিদূষকনাম্না সম্বোধনম্। অবলম্বস্ব ধারয়।

(র) রাজেতি। এতেন চিত্রেঽপ্যাদরাতিশয়ো ব্যজ্যতে।

(ল) বিদূ ইতি। আলিখিতব্যং চিত্রয়িতব্যম্।

---

(য) দাসী। আর্য্য! মাধব্য! যাবৎ আমি আইসি, তাবৎ আপনি চিত্রফলকখানা ধরুন।

(র) রাজা। আমিই ধরি। ( এই বলিয়া ধরিলেন। )

দাসী। ( চলিয়া গেল। )

(ল) বিদূষক। সখে! ইহাতে আর কি চিত্র করিবে?।

---

(১)···আঅচ্ছম্ম। (২)···এতদবলম্বে।

(৩) বিদূষকঃ। আত্মগতম্। এসো অত্তভবং এদং অদিক্কমিঅ মঅতিক্কআএ সংকন্তো। প্রকাশম্। ভো! অবরং কিং এত্থ লিহিদব্বং?।

(৪) সানুমতী। জো জো পদেসো সহীএ মে অহিরুদো তং তং আলিহিদুকামো হোদু।

রাজা। সখে! শ্রূয়তাম্—(১)

কার্য্যা সৈকতলীনহংসমিথুনা স্রোতোবহা মালিনী,
পাদাস্তামভিতো নিষণ্ণচমরা গৌরীগুরোঃ পাবনাঃ (২)।
শাখালম্বিতবল্কলস্য চ তরোর্নির্ম্মাতুমিচ্ছাম্যধঃ
শৃঙ্গে কৃষ্ণমৃগস্য বামনয়নং কণ্ডূয়মানাং মৃগীম্ ॥১৮॥

(ব) মিশ্রেতি। প্রিয়সখ্যাঃ শকুন্তলায়াঃ, প্রদেশঃ অবয়বঃ অভিমতঃ সুন্দরত্বেন সম্মতঃ। আলিখিতুকামঃ চিত্রয়িতুমিচ্ছুঃ।

কার্য্যেতি। সৈকতেষু বালুকাময়পুলিনেষু লীনানি অবস্থিতানি হংসানাং মিথুনানি যুগ্মানি যস্যাঃ সা তাদৃশী, মালিনী তদাখ্যা, স্রোতসা বহতীতি স্রোতোবহা নদী, কার্য্যা কর্ত্তব্যা চিত্রয়িতব্যেত্যর্থঃ, তাং মালিনীম্, অভিতঃ সমীপে তস্যা মালিনীনদ্যাঃ সমীপ ইতি তাৎপর্য্যম্, নিষণ্ণা উপবিষ্টাঃ চমরা মৃগবিশেষা যেষু তে, পাবয়ন্তি মুনীনামাশ্রমশালিত্বাৎ পবিত্রীকুর্ব্বন্তীতি পাবনাঃ, গৌরীগুরোঃ পার্ব্বতীপিতুর্হিমালয়স্য, পাদাঃ প্রত্যন্তপর্ব্বতাঃ, কার্য্যা ইতি বচনব্যত্যয়েনান্বয়ঃ। তথা শাখাসু লম্বিতানি বল্কলানি যস্য তাদৃশস্য তরোর্বৃক্ষস্য, অধো নিম্নে, কৃষ্ণমৃগস্য কৃষ্ণসারাখ্যহরিণস্য শৃঙ্গে, বামনয়নং নিজং বামং চক্ষুঃ কণ্ডূয়মানাং বিলিখন্তীম্, মৃগীং কাঞ্চিৎ হরিণীম্, নির্ম্মাতুং চিত্রয়িতুমিচ্ছামি। এতৎ সর্ব্বমেব বিনোদস্থানমিতি ভাবঃ।

অত্র কার্য্যেত্যেকয়া ক্রিয়য়া অপ্রস্তুতয়োরেব স্রোতোবহা-পাদপদার্থয়োঃ কর্ম্মতয়াভিসম্বন্ধাত্তুল্যযোগিতালঙ্কারঃ।

(ব) মিশ্রকেশী। প্রিয়সখীর যে যে অঙ্গ, সুন্দর বলিয়া মনে করিয়াছেন সেই সেই অঙ্গ চিত্র করিতে ইচ্ছা করিতেছেন ইহা আমি মনে করি।

রাজা। সখে! শোন—

---

(১) সখে ইতি ক্বচিন্নাস্তি।

(২) নিষণ্ণহরিণাঃ···।

বিদূ। স্বগতম্। জধা মন্তেদি তধা তক্কেমি পূরিদব্বং অণেণ চিত্তফলঅং আকিদিহিং লম্বকুচ্চাণং বক্কলপরিহাণাণং তাবসাণং ত্তি (১)। (স)

(স) যথা মন্ত্রয়তি তথা তর্কয়ামি পূরয়িতব্যমনেন চিত্রফলকমাকৃতিভিঃ লম্বকূর্চানাং বল্কলপরিধানানাং তাপসানামিতি।

"তোয়োত্থিতং তৎ পুলিনং সৈকতং সিকতাময়ম্" "পাদাঃ প্রত্যন্তপর্বতাঃ" "সমীপে-ময়তঃ শ্রীপ্রয়াকল্যাভিমুখেঽভিতঃ" ইতি অমরঃ।

অভিত ইত্যস্য যোগে তামিতি "অভিতঃপরিতঃসমযানিকষাহাপ্রতিযোগেঽপি" ইতি দ্বিতীয়া।

শার্দূলবিক্রীড়িতং বৃত্তম্ ॥১৯॥

(স) বিদূ ইতি। যথা মন্ত্রয়তি যৎপ্রকারং ব্রবীতি, তথা তেন প্রকারেণ তর্কয়ামি সম্ভাবয়ামি। অনেন রাজ্ঞা। লম্বকূর্চানাং দীর্ঘশ্মশ্রূণাম্, বল্কলমেব পরিধানং যেষাং তেষাম্। ইতি তর্কয়ামীত্যন্বয়ঃ। লম্বেত্যাদিবিশেষণদ্বয়েন তাপসানাং বিশেষকত্বং তচ্চিত্রস্যানাবশ্যকত্বঞ্চ সূচিতম্।

"কূর্চমস্ত্রী ভ্রুবোর্মধ্যে কঠিনশ্মশ্রুকৈতবে" ইতি মেদিনী।

যাহার পুলিনে হংসদম্পতিগণ বসিয়াছিল, সেই মালিনী নদী চিত্র করিব; তাহার নিকটে যেখানে চমর-হরিণগণ বসিয়াছিল, হিমালয়ের সেই পবিত্র পাদদেশগুলি অঙ্কিত করিব; আর যাহার শাখায় পরিধেয় বল্কল ঝুলান ছিল, সেই বৃক্ষের নীচে কৃষ্ণসারের শৃঙ্গে নিজের বামনয়ন কণ্ডূয়ন করিতেছিল এইরূপ একটী হরিণী চিত্রিত করিব ॥১৯॥

(শ) বিদূষক। (স্বগত) যেরূপ বলিতেছেন, তাহাতে আমি মনে করি ইনি, দীর্ঘশ্মশ্রু ও বল্কলপরিধায়ী তপস্বীদিগের আকৃতিদ্বারা চিত্র-ফলকখানা পূর্ণ করিবেন।

(১) বিদূষকঃ। আত্মগতম্। জহ অহং দেক্খামি, পূরিদব্বং এণ চিত্তফলঅং লম্বকুচ্চাণং তাবসাণং কদম্বেহিং।

राजा। वयस्य! अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतं लेखितुं विस्मृतमस्माभिः (१)। (ष)

विदू। किं विअ?। (स)

मिश्र। वणवासस्स कस्सआभावस्स अ जं सरिसं भविस्सदि (२)। (ह)

राजा। कृतं न कर्णार्पितबन्धनं सखे!

शिरीषमागण्डविलम्बिकेशरम्।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे ॥२०॥

(स) किमिव?।

(ह) वनवासस्य कन्यकाभावस्य च यत् सदृशं भविष्यति।

(ष) राजेति। शकुन्तलाया अन्यच्च, प्रसाधनं वेशनिर्माणम्, अभिप्रेतं प्रकृतत्वाच्चित्रयितुमिष्टम्, लेखितुं चित्रयितुम्।

(स) विदू इति। किमिव तत् प्रसाधनमित्यर्थः।

(ह) मिश्रेति। वनवासस्य सदृशं पुष्पमयाभरणधारणादि, कन्यकाभावस्य कौमार्य्यस्य सदृशम् असीमन्तसिन्दूरादि।

(ষ) রাজা। সখে! শকুন্তলার আরও বেশবিন্যাস চিত্র করিবার ইচ্ছা করিয়াছিলাম, কিন্তু বিস্মৃত হইয়াছি।

(স) বিদূষক। কি রকম?।

(হ) মিশ্রকেশী। বনে থাকার এবং কন্যা অবস্থার যাহা উপযুক্ত হইবে।

(१) अभिप्रेतम्, अत्र विस्मृतम्।

(२) सानुमती। वणवासस्स सोउमारस्स अ·· सरिसं होदि।

বিদূ। কিন্নু, ক্খু, তত্থভোদী রত্তকুবলঅসোহিণা অগ্গ-হত্থেণ মুহং আবারিঅ চকিদচকিদা বিঅ ট্ঠিদা। সাবধানং দৃষ্ট্বা। আ হীহী ভো! এসো দাসীএ পুত্তো কুসুম-রস-পাড়চ্চরো দুট্টমহুঅরো তত্থভোদীএ বঅণকমলং অহিলসদি (১)। (ঘ)

(ঘ) কিন্নু খলু তত্রভবতী রক্তকুবলয়শোভিনা অগ্রহস্তেন মুখমাবার্য্য চকিত-চকিতেব স্থিতা। আ হীহী ভোঃ! এষ দাস্যাঃ পুত্রঃ কুসুমরসপাটচ্চরো দুষ্টমধুকর-স্তত্রভবত্যা বদনকমলমভিলষতি।

কৃতমিতি। হে সখে! কর্ণয়োঃ অর্পিতং নিবেশিতং বন্ধনং বৃন্তং যস্য তত্ তাদৃশম্, আগণ্ডং কপোলপর্য্যন্তং বিলম্বিনঃ পতিতাঃ কেশরাঃ কিঞ্জল্কা যস্য তত্ তথোক্তম্, শিরীষং তদাখ্যকুসুমম্, ন কৃতং বিস্মরণাত্ ন চিত্রিতম্; তথা শরচ্চন্দ্রস্য মরীচিবত্ কোমলং মৃণালসূত্রং মৃণালময়ো হারঃ, স্তনয়োরন্তরে মধ্যে, ন বা রচিতং ন বা চিত্রিতম্। এতদুভয়ং চিত্রয়িতুমিচ্ছামীতি ভাবঃ।

অত্র শরচ্চন্দ্রমরীচিকোমলমিতি লুপ্তোপমালঙ্কারঃ।

বংশস্থবিলং বৃত্তম্ ॥২০॥

(ঘ) বিদূ ইতি। রক্তকুবলয়বত্ রক্তপদ্মবত্ শোভত ইতি তেন, অগ্রহস্তেন হস্তাগ্রেণ, মুখম্, আবার্য্য আচ্ছাদ্য, কিন্নু খলু স্থিতেত্যন্বয়ঃ। আ ইতি কোপে, হীহীতি বিস্ময়ে, ভো ইতি চ সম্বোধনে। দাস্যাঃ পুত্রো হীনঃ, কুসুমরসস্য পাটচ্চরশ্চৌরঃ, তত্রভবত্যাঃ শকুন্তলায়াঃ।

রাজা। সখে! কাণে বোঁটাটী ছিল, আর কেশরগুলি গালপর্য্যন্ত ঝুলিয়া পড়িয়াছিল, এইরূপ শিরীষফুল চিত্র করি নাই এবং শরচ্চন্দ্রের কিরণের ন্যায় কোমল একটী মৃণালের হার, স্তনযুগলের মধ্যে অঙ্কিত করি নাই ॥২০॥

(১)···ভো! কিন্নু···রত্তকুমলঅপম্মসোহিণা। আ এসো···বঅণং অহি-লঙ্ঘই মহুঅরো।

राजा। ननु वार्य्यतामेष धृष्टः। (क)

विदू। भो! तुमं ज्जेव अविणीदाणं सासिदा इमस्स वारणे पहवसि (१)। (ख)

राजा। युज्यते। अयि भोः! कुसुमलताप्रियातिथे! किमत्र परिपतनखेदमनुभवसि। (ग)

(ख) भोः! त्वमेव अविनीतानां शासिता अस्य वारणे प्रभवसि।

(क) राजेति। नन्विति सम्बोधने। धृष्टः प्रगल्भः, एष मधुकरः।

(ख) विदू इति। अविनीतानां दुराचाराणां जनानाम्, शासिता शासनकर्त्ता, अतएव अस्य मधुकरस्य। प्रभवसि समर्थो भवसि; न पुनरहं शक्तिहीनत्वादिति भावः।

(ग) राजेति। युज्यते भवदुक्तिरिति शेषः। अयीत्यनुनये। कुसुमयुक्ता लता कुसुमलता तस्याः प्रियातिथे! प्रीतिकरातिथिस्वरूप! अत्र शकुन्तलाया मुखे, किं परिपतनखेदं परिपतनपरिश्रमम्। न खल्वियं कुसुमलता, तेन तस्मिन् पतने निष्फल एव तव परिश्रम इति भावः।

(ক্ষ) বিদূষক। শকুন্তলা, রক্তপদ্মের ন্যায় শোভিত হস্তাগ্রদ্বারা মুখমণ্ডল আবৃত করিয়া, যেন ভীতভীত হইয়া অবস্থান করিতেছিলেন কি? (মনোযোগের সহিত দেখিয়া) ও! কি আশ্চর্য্য! বাঁদীর পো, ফুলের মধুচোর এই দুষ্ট ভ্রমরটা, তাঁহার মুখকমল পান করিতে ইচ্ছা করিতেছে।

(ক) রাজা। ওহে! এই ধৃষ্ট ভ্রমরটাকে বারণ কর।

(খ) বিদূষক। সখে! তুমিই ত দুষ্টলোকের শাসনকর্ত্তা; সুতরাং তুমিই ইহাকে বারণ করিতে সমর্থ হইবে।

(গ) রাজা। সঙ্গত কথা। ওহে পুষ্পিতলতার প্রিয় অতিথি! এই শকুন্তলার মুখে পড়িবার পরিশ্রমকষ্ট অনুভব করিতেছ কেন?।

(१)…पहविस्सदि।

এষা কুসুমনিষণ্ণা তৃষিতাপি সতী ভবন্তমনুরক্তা ।
প্রতিপালয়তি মধুকরী ন খলু মধু ত্বাং বিনা পিবতি ॥২১॥
মিস্স । অদিঅত্থং ক্খু বারিদো (১) । (ঘ)
বিদূ । ভো ! পড়িসিদ্ধবামা ক্খু এষা জাদী (২) । (ঙ)

(ঘ) অত্যর্থং খলু বারিতঃ ।

(ঙ) ভোঃ ! প্রতিষিদ্ধবামা খলু এষা জাতিঃ ।

---

যত্র পরিপতনখেদস্য সাফল্যং তদ্দর্শয়িতুমাহ এষেতি । কুসুমনিষণ্ণা পুষ্পোপবিষ্টা, ভবন্তং প্রতি অনুরক্তা, এষা মধুকরী ভ্রমরী, তৃষিতাপি তৃষ্ণান্বিতাপি সতী, প্রতিপালয়তি ভবন্তং প্রতীক্ষতে । ননু মাং প্রতিপালয়তীতি কথমবগম্যত ইত্যাহ নেতি । খলু যস্মাৎ, ত্বাং বিনা মধু ন পিবতি । অতস্ত্বমেব পরিদনেতি ভাবঃ ।

আর্য্যা জাতিঃ ॥২১॥

(ঘ) মিস্সেতি । খলুর্নিশ্চয়ে । অত্যর্থং খলু সাতিশয়মেব যথা স্যাত্তথা বারিতো নিবর্ত্তিতো ভ্রমর ইতি শ্লেষঃ । সোল্লুণ্ঠনোক্তিরিয়ম্ । তেন ন কিঞ্চিদ্বারিত ইতি ভাবঃ ।

(ঙ) বিদূ ইতি । ভো ইতি রাজসম্বোধনম্ । এষা জাতির্ভ্রমরজাতিঃ, প্রতিষিদ্ধাপি বামা প্রতিকূলা নিষিদ্ধবিষয়ানুষ্ঠায়িনীতি প্রতিষিদ্ধবামা ; তত্র বারণে সত্যপি পুনস্তৎ-করণাদিত্যাশয়ঃ ।

---

পুষ্পের উপরে উপবিষ্ট এবং তোমার অনুরক্ত এই ভ্রমরী, তৃষ্ণাতুর হইয়াও তোমার প্রতীক্ষা করিতেছে; তোমাকে ছাড়া মধু পান করিতেছে না ॥২১॥

(ঘ) মিশ্রকেশী। খুব বারণ করিলেন ত ! ।

(ঙ) বিদূষক। সখে ! নিষেধ করিলেও এই জাতিটা তাহাই করে ।

---

(১) সানুমতী । অজ্জ ! অভিজাদং ক্খু এসো বারিদো ।

(২) বিদূষকঃ । পড়িসিদ্ধাবি বামা···।

राजा। सक्रोधम्। भोः! न मे शासने तिष्ठसि, श्रूयतां तर्हि सम्प्रति हि—(१) (च)

अक्लिष्टबालतरुपल्लवलोभनीयं
पीतं मया सदयमेव रतोत्सवेषु।
बिम्बाधरं दशसि चेद्भ्रमर! प्रियायाः (२)
त्वां कारयामि कमलोदरबन्धनस्थम् ॥२२॥

(च) राजेति। भो इति भ्रमरसम्बोधनम्। न मे शासने तिष्ठसि मम शासनाधीनो न भवसीत्यर्थः।

अक्लिष्टेति। हे भ्रमर! अक्लिष्टं भङ्गादिना अम्लानीभूतं बालं नूतनोत्पन्नं यत् तरुपल्लवं तद्वत् लोभनीयं लोभजनकम्, मया रतोत्सवेषु सुरतामोदेषु, बहुत्वाद्बहुवचनम्; सदयमेव नितान्तकोमलतया दयोत्पत्तेरदृढमेवेत्यर्थः, पीतम् आदरेण चुम्बितम्, प्रियायाः शकुन्तलायाः, बिम्बाधरं पक्वबिम्बफलवत् ओष्ठम्, चेत् यदि, दशसि दष्टं करोषि, तदा त्वाम्, बध्यते अस्मिन्निति बन्धनं कारागृहम्, तेन कमलोदरं पद्माभ्यन्तरमेव बन्धनं कारागृहं तत्र तिष्ठतीति तं तादृशम्, कारयामि केनचिदनुचरेणेति शेषः; परस्त्रीलम्पटपुरुषमिवेति भावः।

अत्र प्रथमपादे बिम्बाधरमित्यत्र च समासगतलुप्तोपमाद्वयम्, कमलोदरबन्धनेत्यत्र निरङ्गं केवलरूपकम्, तथा कार्य्यद्वारा भ्रमरे परस्त्रीलम्पटपुरुषव्यवहारसमारोपात् समासोक्तिश्च, इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। तथा ईदृशकर्त्तव्यनिर्द्देशात् तत्कारणसत्त्वाच्च व्यवसायी नाम विमर्शसन्ध्यङ्गम्—"व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः" इति दर्पणलक्षणात्।

(চ) রাজা। (ক্রোধের সহিত) ওরে! আমার শাসনাধীন থাকিতেছ না? শোন তবে এখন—

অম্লান এবং নূতনোৎপন্ন, বৃক্ষপল্লবের ন্যায় লোভনীয়, বিশেষতঃ আমি

(१) राजा। एवं भोः!…सम्प्रति। (२) बिम्बाधरं स्पृशसि चेत्…।

বিদূ। ভো! এব্বং তিক্খদণ্ডস্স দে কধং ণ ভাইস্সদি।

বিহস্যাত্মগতম্‌। এসো দাব উম্মত্তো, অহম্পি এদস্স সঙ্গেণ ঈদিসো জ্জেব সংবুত্তো (১)। (ছ)

রাজা। নিবার্য্যমাণোঽপি কথং স্থিত এব (২)। (জ)

মিশ্র। অহ্মো! ধীরম্পি জণং রসো বিআরেদি (৩)। (ঝ)

(ছ) ভোঃ! এবং তীক্ষ্ণদণ্ডস্য তে কথং ন ভেষ্যতি। এষ তাবদুন্মত্তঃ, অহমপি এতস্য সঙ্গেন ঈদৃশ এব সংবৃত্তঃ।

(ঝ) অহো! ধীরমপি জনং রসো বিকারয়তি।

লোভয়তীতি লোভনীয়ং "কৃত্যল্যুটোঽন্যত্রাপি" ইতি কর্ত্তরি অনীয়প্রত্যয়ঃ।

বসন্ততিলকা বৃত্তম্‌ ॥২২॥

(ছ) বিদূ ইতি। এবম্‌ উক্তপ্রকারঃ তীক্ষ্ণো দণ্ডো যস্মাৎ তস্য, তে তব সকাশাৎ, কথং ন ভেষ্যতি ভয়ং করিষ্যতি ভ্রমর ইতি শেষঃ, অবশ্যমেব ভেষ্যতীত্যর্থঃ। বাল-প্রলপিতস্যেব রাজ্ঞীক্তস্যাতীবাসারত্বাৎ বিহস্যেতি বোধ্যম্‌। এষ রাজা। সঙ্গেন সহচারেণ, ঈদৃশ এব উন্মত্ত এব।

(জ) রাজেতি। স্থিত এব ভ্রমর ইতি শেষঃ।

রমণামোদের সময় দয়ার সহিতই যাহা পান করিয়াছিলাম, হে ভ্রমর! তুমি যদি প্রিয়তমার সেই বিম্বতুল্য অধর দংশন কর, তবে তোমাকে, পদ্মের অভ্যন্তররূপ কারাগারে অবস্থান করাইব ॥২২॥

(ছ) বিদূষক। সখে! তুমি এইরূপ তীক্ষ্ণদণ্ড; সুতরাং তোমার ভয় করিবে না কেন? (হাস্য করিয়া স্বগত) এত উন্মত্ত হইয়াছে; ইহার সঙ্গে আমিও এইরূপই হইয়াছি।

(জ) রাজা। বারণ করিতেছি, তথাপি থাকিলই!।

(১)···এরিসবত্থা বিঅ সংবুত্তো। প্রকাশম্‌। ভো! চিন্তং কখু এদং।

(২) অয়ং পাঠঃ কচিন্নাস্তি। (৩) এষোঽপি কচিন্ন দৃশ্যতে।

विदू। प्रकाशम्। भो! चित्तं क्खु एदं। (ञ)

राजा। कथं चित्रम्!। (ट)

मिश्र। अहम्मि दाणिं अवगदत्था, किं उण जधाचिन्तिदाणुसारी एसो (१)। (ठ)

---

(ञ) भोः! चित्रं खल्वेतत्।

(ठ) अहमपि इदानीमवगतार्था, किं पुनर्यथाचिन्तितानुसारी एषः।

---

(झ) मिश्रेति। रसः सातिशयोऽनुरागः, धीरमपि स्वभावतो धैर्यशालिनमपि जनम्, विकारयति अन्यथा करोति। अतएव सातिशयः शकुन्तलानुरागो राजानमुन्मत्तं चकारेति भावः।

अत्र रसशब्दप्रयोगेऽपि न रसस्य स्वशब्दोक्तिदोषः, रसतया अनुभूयमानस्यैव स्वशब्दोक्तौ तद्दोषाङ्गीकारात् अन्यथा "शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः" इत्यमरोक्त्यादावपि तद्दोषप्रसङ्गात् अत्र तु मिश्रकेश्या तस्य रसतया अननुभूयमानत्वादिति सुधीभिर्भाव्यम्।

"शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" इत्यमरः।

(ञ) विदू इति। पूर्वात्मगतोक्तैरेव अवशिष्टमंशं वदतीत्याशङ्कानिरासार्थं प्रकाशमित्युक्तम्। चित्रं चैतन्यहीनमालेख्यम्। अतः कथं तव वारणेन गच्छेदिति भावः।

(ट) राजेति। सम्भ्रमे कथशब्दः। चित्रमालेख्यम्। मया तु इयन्तं कालं यावत् तात्त्विकत्वेनैवावगतमिति भावः।

---

(ঝ) মিশ্রকেশী। কি আশ্চর্য্য! গুরুতর অনুরাগ, ধীর ব্যক্তিকেও বিকৃত করিয়া ফেলে।

(ঞ) বিদূষক। (প্রকাশ্যে) সখে! এ যে চিত্র।

(ট) রাজা। হায়! চিত্র!।

(१) किं उण जहचिन्तिदाणुभावी एसो।

राजा। किमिदमनुष्ठितं पौरोभाग्यम् (१)। (ड)
दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥२३॥

इति वाष्पं विसृजति (२)।

(ढ) मिश्रेति। इदानीमहमप्येवं समये, अवगतार्था चित्रत्वेनैव ज्ञातविषया। इतः पूर्वन्तु अहमपि तात्त्विकमेवेदमवगतवतीति भावः। चिन्तितं शकुन्तलायाः प्रकृतं रूपमनतिक्रम्य अनुसरति आचरतीति स तथोक्तः, एष राजा। तथा च शकुन्तलामुत्कटं चिन्तयन् राजा तन्मयतया चित्रे तात्त्विकभावनां कर्त्तुमर्हत्येव, येन शकुन्तलायाश्चाहमप्यस्मि चित्रविहीनाप्यहमितः पूर्वं चित्रे तात्त्विकभ्रममवत्येव स्थितेत्याशयः।

(ड) राजेति। पौरोभाग्यं दोषैकदर्शित्वं केवलदूषणमित्यर्थः। चित्रं खल्वेतदित्युक्त्वा त्वया केवलं मम दुःखमेवोत्पादितं न पुनरन्यत् किञ्चित् फलमित्याशयः।

"दोषैकदृक् पुरोभागी" इत्यमरः।

केवलदोषदर्शित्वं प्रतिपादयितुमाह दर्शनेति। तन्मयेन केवलशकुन्तलाविषयकेण हृदयेन साक्षात् प्रत्यक्षत इव, दर्शनसुखं शकुन्तलाया अवलोकनानन्दम्, अनुभवतो मे मम, स्मृतिकारिणा अस्या मूर्त्तेः चित्रतया स्मरणजनकेन त्वया, कान्ता शकुन्तला, पुनरपि चित्रीकृता आलेख्यतया ज्ञानविषयीकृता। तथा च इतः पूर्वं चित्रमेव प्रकृत-शकुन्तलां विभाव्य दर्शनानन्दमनुभूतवान्, इदानीन्तु त्वत्कृतस्मरणेन भ्रमापगमात् चित्रमेवेदमिति तत्त्वमवधार्य्य महाविषादमापन्न इति पौरोभाग्यमेव त्वया अनुष्ठित-मिति भावः।

अत्र साम्यवशेन चित्रे राज्ञः प्रकृतशकुन्तलाभ्रमात् भ्रान्तिमानलङ्कारः, तथा प्रथमार्द्धे

(ঢ) মিশ্রকেশী। আমিও এখন চিত্র বলিয়া বুঝিতে পারিলাম; তাহাতে ইনি চিন্তানুসারে ধারণা করিতেছেন; সুতরাং ইহার কথা কি বলিব।

(ড) রাজা। সখে! এই একমাত্র দোষের কার্য্য কেন করিলে?।

(१) राजा। वयस्य! किमिदम्…। (२) वाष्पं विसृजति।

मिश्र। पुव्वावरविरुद्धो अपुव्वो एसो विरहिमग्गो (१)। (ढ)

राजा। वयस्य! कथमेवमविश्रामं दुःखमनुभवामि (२)। (ण)

प्रजागरात् खिलीभूतस्तस्याः स्वप्नसमागमः (३)।
वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥२४॥

(ढ) पूर्वापरविरुद्धः अपूर्वः एष विरहिमार्गः।

हर्षः द्वितीयार्द्धे च विषाद इत्युभयोर्भावयोः सन्धिर्विप्रलम्भशृङ्गारस्याङ्गमिति भावसन्धिनामालङ्कारश्च, इत्यनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः।

आर्य्या जातिः ॥२३॥

(ढ) मिश्रेति। पूर्वापरयोरतीतवर्त्तमानयोः कालयोः विरुद्धः परस्परविपरीतः, एष दृश्यमानः, विरहिणो राज्ञो मार्गः पन्थाः, अपूर्वो नूतनः आश्चर्य्यो वा। तथा च पूर्वं व्यभिचारिणीसम्भावनया प्रत्याख्यानात् शकुन्तलायां विद्वेषः, अधुना तु पतिव्रताज्ञानात् सन्तोष इति परस्परविपरीतमेवावस्थाद्वयमित्याशयः।

(ण) राजेति। अविश्राममविरतम्।

प्रजागरादिति। प्रजागरात् रात्र्यादौ प्रकर्षेण जागरणात् हेतोः, तस्याः शकुन्तलायाः,

আমি তন্ময় চিত্তে সাক্ষাৎ রূপেই যেন দর্শনসুখ অনুভব করিতেছিলাম তুমি স্মরণ করাইয়া দিয়া, আবারও প্রিয়তমাকে চিত্র করিয়া দিয়াছ ॥২৩।

( এই বলিয়া অশ্রুজল ফেলিতে লাগিলেন। )

(ঢ) মিশ্রকেশী। পূর্বাপরবিরুদ্ধ বিরহীর এই পদ্ধতি অপূর্ব্ব বটে।

(ণ) রাজা। বয়স্য! অবিরত এইরূপ দুঃখ অনুভব করিতেছি কেন।

(१) चानुमती। पुव्वावरविरोहो···विरहमग्गो।

(२)···अविश्रान्तम्···। (३) स्वप्ने समागमः···।

मिश्र। सव्वधा पमज्जिदं तुए पच्चादेसदुक्खं पिअसहीए पच्चक्खं ज्जेव सहिजणस्स (१)। (त)

चतुरिका। प्रविश्य। जेदु जेदु भट्टा। वत्तिआकरण्डअं गेण्हिअ इदो अहं पत्थिदह्मि (२)। (थ)

(त) सर्व्वथा प्रमार्जितं त्वया प्रत्यादेशदुःखं प्रियसख्याः प्रत्यक्षमेव सखीजनस्य।

(थ) जयतु जयतु भर्त्ता। वर्त्तिकाकरण्डकं गृहीत्वा इतोऽहं प्रस्थिताऽस्मि।

---

स्वप्ने समागमः स्वप्नसमागमः स्वप्नावस्थायां सङ्गमः, खिलीभूतो निरुद्धः; तु किन्तु बाष्पो नयनजलम्, चित्रगतामपि आलेख्यस्थितामपि, एनां शकुन्तलाम्, द्रष्टुं न ददाति इदानीं नयनावरणादित्यभिप्रायः।

इदं सम्मुखमित्यारभ्य एतदन्तसन्दर्भे राजवाक्ये सुखानुभवकार्य्यं प्रति विघ्नप्राप्तेः विरोधनं नाम विमर्शसन्ध्यङ्गम्। यथा दर्पणे—

"कार्य्यात्ययोपगमनं विरोधनमिति स्मृतम्" ॥२४॥

(त) मिश्रेति। सखीजनस्य मम प्रत्यक्षमेव, त्वया राज्ञा, प्रियसख्याः शकुन्तलायाः, प्रत्यादेशदुःखं प्रत्याख्याननिबन्धनं दुःखम्, सर्व्वथा प्रमार्जितं तदर्थं अनुरागनिबन्धन-नानाभावप्रदर्शनादित्याशयः।

(थ) चतुरिकेति। सा च वर्त्तिकानयनार्थं प्रेरितपूर्व्वा दासी। वर्त्तिका करण्डकं तूलिकाधारणोपयोगिवंशादिकृतपेटकम्। इतः अस्यां दिशि।

"करण्डी वंशादिकृतपेटके मधुकोषके" इति शब्दार्णवः।

---

রাত্রিতে জাগরণ করায়, স্বপ্নেও শকুন্তলার সম্মেলন হইতেছে না, তার পর অশ্রুজল, চিত্রিত শকুন্তলাকেও দেখিতে দিতেছে না ॥২৪॥

(ত) মিশ্রকেশী। সখীজনের সমক্ষে আপনি এইরূপ ভাব প্রকাশ করিয়া, শকুন্তলার প্রত্যাখ্যানদুঃখ দূর করিলেন।

---

(१) सानुमती।…दुक्खं सउन्तलाए।

(२) प्रविश्य चतुरिका। जेदु भट्टा।…इदोमुहं…।

राजा । ततः किम् ? (१) । (द)

चेटी । तं मे हत्थादो पिङ्गलिआविदिआए देवीए वसुमदीए अहं ज्जेव अज्जउत्तस्स उवणइस्सं त्ति भणिअ सबलक्कारं गहीदं (२) । (ध)

विदू । तुमं कधं विमुक्का (३) । (न)

(ध) तन्मे हस्तात् पिङ्गलिकाविदितया देव्या वसुमत्या अहमेवार्य्यपुत्रस्य उपनेष्यामीति भणित्वा सबलात्कारं गृहीतम् ।

(न) त्वं कथं विमुक्ता ।

(द) राजेति । ततः किं सञ्जातमिति शेषः ।

(ध) चेटीति । सा च प्रकरणाच्चतुरिकेति बोध्यम् । पिङ्गलिका नाम अन्या दासी तया आवेदिता 'अन्यां रमणीं चित्रयितुं राज्ञ आदेशात् चतुरिका वर्त्तिकाकरण्डं तदन्तिकं नयति' इति विज्ञापिता तया, देव्या कृताभिषेकया, वसुमत्या तदाख्यया राजपत्न्या, अहमित्यादिको वसुमतीवाक्यानुवादः । तेन अहं वसुमत्येव, आर्य्यपुत्रस्य राज्ञो दुष्मन्तस्य, उप समीपे, नेष्यामि, इति भणित्वा उक्त्वा, सबलात्कारं बलपूर्वकमित्यर्थः, न पुनर्मैवेच्छयेति भावः, मे मम चतुरिकाया हस्तात्, तत् वर्त्तिकाकरण्डम् ।

(थ) চতুরিকা। (প্রবেশ করিয়া) মহারাজের জয় হউক, জয় হউক। তূলীর পেটরা নিয়া আমি এই দিকে আসিতেছি।

(দ) রাজা। তার পর কি ?।

(ধ) চতুরিকা। দাসী পিঙ্গলিকা, এই খবর রাণী বসুমতীকে জানাইয়াছিল ; তাই তিনি "আমিই আর্য্যপুত্রের নিকট নিয়া যাইতেছি" এই কথা বলিয়া আমার হাত হইতে বলপূর্ব্বক সেই তূলীর পেটরাটী নিয়া গিয়াছেন।

(१) राजा । किञ्च । (२) चतुरिका । सो मे हत्थादो अन्तरा तरलिआदुदिआए देईए वसुमदीए... गहीओ । (३) विदूषकः । दिट्ठिआ तुमं मुक्का ।

चेटी। जाव देवीए लदाविड़वलग्गं उत्तरीअञ्चलं पिङ्गलिआ मोआवेदि, दाव णिक्कविदो मए अप्पा (१)। (प)

राजा। वयस्य! उपस्थिता देवी बहुमानगर्विता च; तत् भवानिमां प्रतिकृतिं रक्षतु। (फ)

विदू। अत्ताणम्मि किं त्ति ण भणासि। चित्रफलकमादायोत्थाय च। जइ भवं अन्तेउर-कूड़-वागुरादो मुच्चिस्सदि, तदो मं

(प) यावद्देव्या लताविटपलग्नम् उत्तरीयाञ्चलं पिङ्गलिका मोचयति, तावत् निष्क्रान्तो मया आत्मा।

(न) विदू इति। विमुक्ता देवीदृष्यादिति शेषः।

(प) चेटीति। पिङ्गलिका तदाख्या दासी, लताविटपलग्नं पथिपार्श्वगतायाः लतायाः शाखायां संलग्नम्, देव्या वसुमत्याः। आत्मा स्वदेहः, निष्क्रान्तः ततोऽपसरणेन गोपायितः, पिङ्गलिकाया अपि मोचनव्यापृतत्वेन दृष्टेरैवावसराभावादिति भावः।

(फ) राजेति। बहुमानेन ममात्यादरेण गर्विता। प्रतिकृतिं शकुन्तलायाः प्रतिमूर्त्तिम्, रक्षतु यत्र कुत्रचित् गोपायतु; अन्यथा एनां दृष्ट्वा देवी महानर्थं घटयिष्यतीति भावः। एतेनावशिष्टचित्रव्यापारोपसंहारो दर्शितः।

अतएवात्र प्ररोचना नाम विमर्शसन्धेरङ्गम्। यथा दर्पणे—

"प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी।"

---

(न) বিদূষক। তুই মুক্তি পাইলি কি করিয়া?।

(প) চতুরিকা। যাবৎ পিঙ্গলিকা, লতার শাখায় সংলগ্ন রাণীর উত্তরীয়বস্ত্রাঞ্চল ছাড়াইয়া দেয়, আমি তাহার মধ্যে আত্মগোপন করিয়াছি।

(ফ) রাজা। বয়স্য! অত্যাদরগর্ব্বিতা রাজ্ঞী উপস্থিত হইতেছেন; অতএব এই প্রতিমূর্ত্তিখানা তুমি রক্ষা কর।

---

(১) चतुरिका।...विड़वलग्गं उत्तरीअं तरलिआ...मए णिव्वाहिदो अप्पा।

মেহচ্ছন্নপ্পাসাদে সদ্দাবিস্সদি ; এদঞ্চ তহিং গোবাএমি, জহিং পারাবদং উজ্ঝিঅ অস্সো কোবি ণ পেক্খিস্সদি। ইতি দ্রুতপদং নিষ্ক্রান্তঃ (১)। (ব)

মিশ্র। অহ্মো! অস্সসংকন্তহিঅওবি পঢ়মসম্ভাবণং রক্খদি, থিরসোহিদো দাব এসো (২)। (ভ)

(ব) আত্মানমপি কিমিতি ন ভণসি। যদি ভবানন্তঃপুর-কূট-বাগুরাতো মোক্ষ্যতে, তদা মেঘচ্ছন্নপ্রাসাদে শব্দায়িষ্যতে। ইদঞ্চ তত্র গোপায়ামি, যত্র পারাবতমুজ্ঝিত্বা অন্যঃ কোঽপি ন প্রেক্ষিষ্যতে।

(ভ) অহো! অন্যসংক্রান্তহৃদয়োঽপি প্রথমসম্ভাবনং রক্ষতি ; স্থিরসৌহৃদস্তাবদেষঃ।

(ব) বিদূ ইতি। ন কেবলং প্রতিকৃতিম্ আত্মানং মামপি, রক্ষতু ইতি কিং ন ভণসি ব্রবীষি ; নিগ্রহকর্ত্তরি উপস্থিতে আত্মরক্ষায়া আবশ্যকত্বাৎ দেবী চ তে নিগ্রহকর্ত্রীতি ভাবঃ। সোল্লুণ্ঠনোক্তিরিয়ম্। অন্তঃপুরস্য অন্তঃপুরস্থায়া দেব্যাঃ কূটং মায়া তদ্রূপা যা বাগুরা জালং ততঃ, মোক্ষ্যতে মুক্তো ভবিষ্যসি, মেঘচ্ছন্নো নাম প্রাসাদঃ মেঘচ্ছন্নপ্রাসাদস্তত্র, শব্দায়িষ্যতে আহ্বাস্যসি। তত্রৈবাহং গচ্ছামীত্যাশয়ঃ। তত্র তাদৃশে স্থানে। পারাবতং কপোতম্, উজ্ঝিত্বা বিহায়। কেবলং পারাবতগণ এব দ্রষ্টুং শক্ষ্যতীতি ভাবঃ। দ্রুতং শীঘ্রং পদং পদক্ষেপো যস্মিন্ কর্ম্মণি তদ্যথা তথা।

"বাগুরা মৃগবন্ধনী" ইত্যমরোক্তৌ সত্যামপি অত্র জালমাত্রং লক্ষ্যতে।

---

(ব) বিদূষক। 'আমাকে রক্ষা কর' এই কথা কেন বলিলে না। (চিত্রফলক লইয়া উঠিয়া) যদি তুমি অন্তঃপুরের কূটজাল হইতে মুক্ত হইতে পার, তবে মেঘচ্ছন্নপ্রাসাদে আমাকে ডাকিবে। আমি এই প্রতিমূর্ত্তি সেইরূপ স্থানে গুপ্ত রাখিব, যে স্থানে কপোতভিন্ন অন্য কেহ দেখিতে পাইবে না। (এই বলিয়া দ্রুতপদে চলিয়া গেল।)

---

(১)…অত্তাণং ত্তি ভণাহি।…অন্তেউরকালকূড়াদো…মেহপ্পড়িচ্ছন্দে…সদ্দা-বেহি…। (২) সানুমতী। অম্ম অন্নেক্কত্ত। ঢিঢ়িলসোহ্ণো দাণিং এসো।

প্রবিশ্য পত্রহস্তা প্রতীহারী । জেদু জেদু দেবো (১) । (ম)

রাজা । বেত্রবতি ! ন খল্বন্তরে ত্বয়া দৃষ্টা দেবী ? (২) । (য)

প্রতী । দেব ! দিট্ঠা, পত্তহত্থং মং পেক্খিঅ পড়িণিউত্তা (৩) । (র)

রাজা । কার্য্যজ্ঞা দেবী, কার্য্যোপরোধং মে পরিহরতি (৪) । (ল)

---

(ম) জয়তু জয়তু দেবঃ ।

(য) দেব ! দৃষ্টা, পত্রহস্তাং মাং প্রেক্ষ্য প্রতিনিবৃত্তা ।

---

(ভ) মিশ্রেতি । অন্যস্যাং নায়িকায়াং শকুন্তলায়াং সংক্রান্তং সংসক্তং হৃদয়ং যস্য স তাদৃশঃ সন্নপি, প্রথমসম্ভাবনং প্রথমকৃতমাদরম্, রক্ষতি ; অতএব স্থিরমচলং সৌহৃদং স্নেহো যস্য সঃ । সর্ব্বথা প্রশংসনীয় এবায়ং রাজেতি ভাবঃ ।

(য) রাজেতি । অন্তরে পথিমধ্যে । অত্র কাকুবশেন প্রশ্নো ব্যজ্যতে ।

(র) প্রতীতি । দৃষ্টা পথিমধ্যে দেবীতি শেষঃ ।

(ভ) মিশ্রকেশী । কি আশ্চর্য্য ! রাজার হৃদয়, অন্য নায়িকাতে আসক্ত হইলেও, ইনি প্রথমকৃত আদর রক্ষা করিতেছেন ; সুতরাং ইঁহার ভালবাসা চিরস্থায়ী ।

(ম) প্রতিহারী । (পত্রহস্তে প্রবেশ করিয়া) মহারাজের জয় হউক, জয় হউক ।

(য) রাজা । বেত্রবতি ! পথিমধ্যে তুমি রাণীকে দেখ নাই ত ? ।

(র) প্রতীহারী । মহারাজ ! দেখিয়াছিলাম ; কিন্তু আমাকে পত্রহস্তে দেখিয়া তিনি ফিরিয়া গিয়াছেন ।

(১)…জেদু দেবী । (২)…ন খল্বন্তরা…।

(৩) প্রতীহারী । অহহং পত্তহত্থং…।

(৪) কার্য্যজ্ঞা কার্য্যোপরোধম্…।

प्रती। देव! अमच्चो विण्णवेदि अज्ज रज्जकज्जस्स बहुलदाए एक्कं ज्जेव मए पोरकज्जं पच्चवेक्खिदं, तं देवो पत्तारोविदं पच्चक्खीकरेदु त्ति (१)। (व)

राजा। इतः पत्रं दर्शय (२)। (श)

(व) देव! अमात्यो विज्ञापयति अद्य राज्यकार्य्यस्य बहुलतया एकमेव मया पौरकार्य्यं प्रत्यवेक्षितम्, तत् देवः पत्रारोपितं प्रत्यक्षीकरोतु इति।

(ल) राज्ञेति। कार्य्यं जानातीति कार्य्यज्ञा देवी, अतएव मे मम, कार्य्योपरोधं कार्य्यव्याघातम्, परिहरति परित्यजति। तथा च पत्रहस्तां प्रतीहारीमवलोक्य राजान्तिके राजकार्य्यमिवेदानीं भवेत् समीपस्थितौ तु तस्य व्याघातसम्भावना स्यादिति विभाव्य देवी प्रतिनिवृत्तेति सरलार्थो भावार्थश्च।

(व) प्रतीति। राज्ञा पौरकार्य्यं मन्त्रिणा च तद्भिन्नं राज्यकार्य्यं प्रत्यवेक्षणीयमिति विभज्य राजमन्त्रिभ्यां कार्य्यभारसामान्यं गृहीतम्, तत्र च "वेत्रवति! मद्वचनादमात्यपिशुनं ब्रूहि, अद्य चिरप्रबोधान्न सम्भावितमस्माभिर्धर्म्मासनमध्यासितुम्, यत् प्रत्यवेक्षितमार्य्येण पौरकार्य्यं तत् पत्रमारोप्य प्रस्थाप्यताम्"इति पूर्व्वोक्त्या पौरकार्य्यप्रत्यवेक्षणभारोऽपि तद्दिने मन्त्र्युपरि न्यस्त इत्यवधेयम्। तत्राह अद्येति। राजकार्य्यस्य नियमेन मम प्रत्यवेक्षणीयस्येत्यर्थः। एकमेव तदधिकप्रत्यवेक्षणानवसरादिति भावः। पौरकार्य्यं भवत्प्रत्यवेक्षणीयम्। पत्रारोपितम् एतत्पत्रलिखितम्।

(ল) রাজা। রাণী কার্য্য বোঝেন কি না, তাই আমার কার্য্যের ব্যাঘাত ত্যাগ করিলেন।

(ব) প্রতীহারী। মহারাজ! মন্ত্রী জানাইতেছেন আজ রাজ্যের কার্য্য বহুতর ছিল বলিয়া, একটীমাত্র পৌরকার্য্য দেখিতে পারিয়াছি, তাহা পত্রে লিখিলাম, আপনি প্রত্যক্ষ করুন।

(१)···विण्णवेइ अत्थजादस्स गणणाबहुलदाए एक्कं···अवेक्खिदं···पत्ताऊढं।

(२)···पत्रिकाम्···।

प्रती। उपनयति। (ष)

राजा। वाचयति। विदितमस्तु देवपादानाम्—धनवृद्धिर्नाम वणिक्  वारिपथोपजीवी नौव्यसनेन विपन्नः,. स चानपत्यः, तस्य चानेककोटिसंख्यं वसु, तदिदानीं राजस्वतामापद्यते इति श्रुत्वा देवः प्रमाणम् इति। सविषादम्। कष्टं खल्वन-

(श) राजेति। इतः अस्यां दिशि मदन्तिक इत्यर्थः।

(ष) प्रतीति। उपनयति राजहस्ते पत्रमुपस्थापयति।

(स) राजेति। वाचं व्यक्तवाक्यं करोतीति वाचयति तत् पत्रं पठतीत्यर्थः। पादशब्देन देवस्य भक्त्यतिशयविषयत्वं बहुवचनेन च तद्गौरवाधिक्यं व्यज्यते। वारिपथः सागरनदनदीप्रभृतिः तेन उपजीवतीति वारिपथोपजीवी नौकापरिचालनेन जीविका-निर्वाहीत्यर्थः, नावो नौकाया व्यसनेन विपदा निमज्जनेनेति यावत् विपन्नो मृतः। "न पतति वंशो येन जातेन तदपत्यम्" इति कलापटीकायां दुर्गः। अनपत्यः पुत्रपौत्रादि-हीनः। अनेका कोटिः संख्या यस्य तत् तादृशम्, वसु धनम्, विद्यत इति शेषः, तत् वसु, इदानीं धनवृद्धेर्मरणात् परम्, राजस्वतां राजस्वत्वसत्त्वं भवदीयत्वमित्यर्थः, आपद्यते शास्त्रानुसारेण प्राप्नोति। देवो राजा भवान्, प्रमाणं कर्त्तव्यनिर्द्धारयिता तद्धनं किं भवदीयत्वेन भवत्कोषागारमेवानयामः, अथवा अन्यथा किञ्चित् कुर्म्म इति भवानेव निर्द्धारयत्वित्यर्थः। इति विदितमस्त्वित्यन्वयः। कष्टं कष्टकारणम्। वेत्रवतीति

---

(শ) রাজা। এই দিকে পত্রখানা দেখাও।

(ষ) প্রতীহারী। ( পত্র দিল। )

(স) রাজা। ( পড়িতে লাগিলেন ) মহারাজের অবগতি হউক, "জলপথোপজীবী ধনবৃদ্ধিনামে কোন বণিক্, নৌকা মগ্ন হওয়ায় মৃত্যুমুখে পতিত হইয়াছেন ; তাঁহার কোন সন্তান নাই, তাঁহার বহুকোটি সংখ্যক ধন আছে ; তাহা এখন রাজসম্পত্তির মধ্যে গণ্য হইতেছে ; ইহা শুনিয়া

पत्यता । वेत्रवति ! महाधनतया बहुपत्नीकेनानेन भवितव्यम्, तदन्विष्यतां यदि काचिदापन्नसत्त्वास्य भार्य्या स्यात् (१) । (स)

प्रतीहार्य्याः सम्बोधनम् । महान्ति सातिशयानि अतिविपुलानि धनानि यस्य तस्य भावस्तया, अनेन धनवृद्धिनाम्ना वणिजा, बह्व्यः पत्न्यो भार्य्या यस्य तेन । तत् तस्मात् । अस्य धनवृद्धेः काचिद् भार्य्या, आपन्नम् उदरे प्राप्तं सत्त्वं जन्तुर्यया सा आपन्नसत्त्वा गर्भवती स्यात्, तदा तद्धनं राजस्वतया भवद्भिरापाततो न ग्राह्यम्, तस्याः पुत्रप्रसवस्यापि सम्भवेन तद्धनस्य तत्पुत्रेणैव प्राप्यत्वात्, मत्पक्षेण ग्रहणे तु वृत्तिलोपेन गुरुतरपाप-सम्भवात्—

"ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः ।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः ॥"

इति मनुवचनात् ; तादृशभार्य्याया असत्त्वे तु मत्पक्षेणैव तद्धनं ग्राह्यमिति भावः ।

"प्रमाणं हेतुमर्य्यादाशास्त्रेयत्ताप्रमातृषु" इति "आपन्नसत्त्वा स्यात् गुर्विण्यन्तर्वत्नी च गर्भिणी" इति चामरः ।

ननु धनस्वामिनः पुत्रपौत्रप्रपौत्राभावेऽपि पत्नीसत्त्वे तस्या एव धनाधिकारः राज्ञस्तु सर्वाभावे—

"अपुत्रधनं पत्न्यभिगामि" इति विष्णुवचनात्—

"अपुत्रस्य प्रमीतस्य पत्नी तद्भागहारिणी" इति वृहस्पतिवचनात्—

"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा" इत्यादियाज्ञवल्क्यवचनाच्च । तत् कथम् "तदिदानीं राजस्वतामापद्यते" "यदि काचिदापन्नसत्त्वास्य भार्य्या स्यात्" इति अनपत्यता-मात्रेण पत्नीसत्त्वेऽपि राजस्वतापत्तिः । सत्यम्, "परिणयनकनिष्ठापि सवर्णा ज्येष्ठैव, तस्या एव यज्ञादिषु व्यापाराधिकारात् पत्नीत्वम्" इति दायभागोक्तपत्न्या अभावे राजपूर्व-

---

(१) राजा । अनुवाच्य । कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः । अनपत्यश्च किल तपस्वी । राजगामी तस्यार्थसञ्चय इत्येतदमात्येन लिखितम् । कष्टं खल्वनपत्यता । वेत्रवति ! बहुधनत्वात् बहुपत्नीकेन तत्रभवता भवितव्यम् । विचार्य्यतां यदि काचिदापन्नसत्त्वा तस्य भार्य्यासु स्यात् ।

प्रती। दाणिं ज्जेव साकेदउरस्स सेट्ठिणो दुहिदा णिव्वुत्त-पुंसवणा तस्स जाआ सुणीअदि। (ह)

(ह) इदानीमेव साकेतपुरस्य श्रेष्ठिनो दुहिता निर्वृत्तपुंसवना तस्य जाया श्रूयते।

---

पर्य्यन्ताधिकारिशृङ्खलाया अभावे च उक्तोक्तिद्वयमवधेयम्। एवञ्च बहुपत्नीकेनेत्यत्रापि पत्नीपदं भार्य्यापरम्, अतएव परत्र "आपन्नसत्त्वास्य भार्य्या स्यात्" इति भार्य्यापदमुपात्तम्। तेन च वैश्यजातीयस्य धनवृद्धेर्वैश्यजातीयपरिणीतस्त्रिया अभावे परिणीतशूद्रजातीय-स्त्रीसत्त्वे अपरिणीतवैश्यजातीयस्त्रीसत्त्वे वा राजोक्तेः पर्य्यवसितत्वान्नोक्तदोष इति सुधीभिर्भाव्यम्। तथा च दायभागे वृहस्पतिः—

"येऽपुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्जिताः।
तेषां धनं हरेद्राजा सर्व्वस्याधिपतिर्हि सः॥"

"पत्न्यभावे राज्ञो धनसम्बन्धं दर्शयति" "अतएव पत्न्यधिकारवचनेषु पत्नीपदानुवृत्तिः, वर्त्तनवचनेषु च स्त्रीनार्य्यादिशब्दप्रयोगः" इति दायभागे जीमूतवाहनः।

(ह) प्रतीति। साकेतपुरस्य अयोध्यान्तर्गतसाकेताख्यस्थानवासिन इत्यर्थः, श्रेष्ठिनो वणिजः। निर्वृत्तं निष्पन्नं पुंसवनं गर्भोत्पत्त्यवधि तृतीयमासकर्त्तव्यपुंसवनाख्य-सम्पादकसंस्कारविशेषो यस्याः सा। तस्य धनवृद्धेः। श्रूयते लोकपरम्परयेति शेषः। एतद्वृत्तान्तस्तु अमात्यस्य श्रुतिपथं न गत इति बोध्यम्, अन्यथा तस्य अज्ञात्वमापद्येत।

पुमान् सूयते अनेनेति पुंसवनम्। तच्च तृतीयमासे विहितम्—

"गर्भाधानवतो पुंसः सवनं स्पन्दनात् पुरा" इति "चतुर्थे स्पन्दते ततः" इति च मलमासतत्त्वधृतस्मृतेः।

---

আপনিই কর্ত্তব্য নির্দ্ধারণ করিবেন" ইতি। ( বিষাদের সহিত ) সন্তান না থাকা বড়ই কষ্টের। বেত্রবতি! মহাধনী বলিয়া ধনবৃদ্ধির বহুতর স্ত্রী থাকিতে পারে; অতএব অন্বেষণ কর, যদি ইহার কোন স্ত্রী গর্ভবতী থাকে।

राजा। सं खलु गर्भः पित्र्यमृक्‌थमर्हति। गत्वैव-ममात्यं ब्रूहि (१)। (च)

प्रती। जं देवो आणवेदि। इति प्रस्थिता। (क)

राजा। एहि तावत्। (ख)

प्रती। प्रतिनिवृत्य। एसह्मि (२)। (ग)

(क) यत् देव आज्ञापयति।

(ग) एषास्मि।

(च) राजेति। गर्भो गर्भस्थः सन्तानः, पित्र्यं पैतृकम्, ऋक्‌थं धनम्, अर्हति प्राप्तुं योग्यो भवति ; न तु राजा इत्याशयः। यथा मनुः—

"ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः ;
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः॥"

गौतमश्च—"उत्पत्त्यैवार्थं स्वामित्वाल्लभेत इत्याचार्य्या मन्यन्ते।"

"ऋक्‌थमिक्‌थं धनं वसु" इत्यमरः।

(क) प्रतीति। प्रस्थिता प्रस्थातुमारभत इत्यर्थः।

(ख) राजेति। एहीति प्रतीहार्य्या एव पुनराह्वानं प्रकरणात्।

(ग) प्रतीति। एषास्मि पुनरागतेति शेषः।

---

(ङ) প্রতীহারী। এখনই শুনিতে পাইলাম—সাকেতপুরের বণিকের কন্যা—ধনবৃদ্ধের স্ত্রী ; তাহার পুংসবনসংস্কার হইয়া গিয়াছে।

(চ) রাজা। সেই গর্ভস্থ সন্তানই পিতার ধন পাইবে। যাইয়া, মন্ত্রীমহাশয়কে এইরূপ বল।

(ক) প্রতীহারী। মহারাজ যাহা আদেশ করেন। (এই বলিয়া চলিল।)

(খ) রাজা। আইস।

---

(१) राजा। ननु गर्भः…। गच्छ, एवम्…। (२) इयमस्मि।

রাজা। কিমনেন সন্ততিরস্তি নাস্তীতি। (ঘ)

যেন যেন বিযুজ্যন্তে প্রজাঃ স্নিগ্ধেন বন্ধুনা।
স স পাপাদৃতে তাসাং দুষ্মন্ত ইতি ঘুষ্যতাম্ ॥২৫॥

প্রতী। এদং ণাম ঘোসইদব্বং। ইতি নিষ্ক্রম্য পুনঃ প্রবিশ্য। দেব! কালে পবিট্ঠং বিঅ অহিণন্দিদং দেবস্স সাসণং মহাজণেণ (১)। (ঙ)

(ঙ) এতৎ নাম ঘোষয়িতব্যম্। দেব! কালে প্রবৃষ্টমিব অভিনন্দিতং দেবস্য শাসনং মহাজনেন।

(ঘ) রাজেতি। সন্ততিঃ ধনবৃদ্ধেরপত্যম্, অস্তি নাস্তি বা ইত্যনেন অনুসন্ধানেন, কিং প্রয়োজনম্, অপি তু কিমপি নেত্যর্থঃ।

তর্হি কিং কর্ত্তব্যমিত্যাহ যেনেতি। প্রজা রাজ্যস্থা জনাঃ, যেন যেন স্নিগ্ধেন স্নেহবতা, বন্ধুনা পুত্রাদিনা বান্ধবেন, বিযুজ্যন্তে নিয়তিবশাৎ বিরহ্যন্তে; পাপাদৃতে পাপিনং বিনা, তাসাং প্রজানাম্, স স বন্ধুঃ দুষ্মন্তঃ, ইতি ঘুষ্যতাং রাজ্যমধ্যে প্রচার্য্যতাম্। তথা চ পতিপুত্রাদিবন্ধুবিয়োগাৎ যো যো জনঃ নিরাশ্রয়ো ভবতি, দুষ্মন্তস্তস্য তস্য জনস্য তত্তৎপতিপুত্রাদিবন্ধুস্থানপাতী ভূত্বা নিতরামাশ্রয়স্বরূপো ভবিষ্যতি; কিন্তু স বন্ধুজনো যদি পাপী স্যাৎ, তদা তৎস্থানপাতী দুষ্মন্তো ন ভবিষ্যতি ইতি ঘোষয়িত্বা ধনবৃদ্ধেভার্য্যাগণং সান্ত্বয়েতি সরলার্থো ভাবার্থশ্চ।

অত্র সাহায্যং নাম নাট্যালঙ্কারঃ। যথা দর্পণে—

"সাহায্যং সঙ্কটে যৎ স্যাদানুকূল্যং পরস্য চ" ॥২৫॥

(গ) প্রতীহারী। (ফিরিয়া আসিয়া) এই যে আসিয়াছি।

(ঘ) রাজা। সন্তান আছে বা নাই—এই অনুসন্ধানে প্রয়োজন কি।

প্রজাদের যে যে প্রণয়ী বন্ধুলোকের বিয়োগ ঘটিবে, পাপিষ্ঠ ভিন্ন তাহাদের সেই সেই বন্ধুই দুষ্মন্ত, ইহা ঘোষণা কর ॥২৫॥

(১) এবং ণাম…। দেবস্য শাসনং।

राजा। दीर्घमुष्णञ्च निश्वस्य। एवं भोः! सन्ततिविच्छेद-निरवलम्बना मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ते; ममाप्यन्ते पुरुवंशश्रिय एष वृत्तान्तः (१)। (च)

(ङ) प्रतीति। अभ्युपगमे नामशब्दः। एतत् घोषयितव्यम् इत्यङ्गीकरोमीत्यर्थः। महाजनेन प्रशस्तजनसामान्येन, देवस्य भवतः, शासनम् उक्तनियमनिर्द्देशकं वाक्यम्, काले यथासमये, प्रहृष्टं प्रकृष्टं वर्षणमिव, अभिनन्दितं प्रशस्य गृहीतम्, अत्यन्तोपकारित्वादित्युभयत्रापि भावः।

"नाम प्राकाश्यसम्भाव्यक्रोधोपगमकुत्सने" इत्यमरः।

(च) राजेति। भो इति विषादसूचकमव्ययम्। यथा "भोस्तु सम्बोधनविषादयोः" इति मेदिनी। सम्पदो धनसम्पत्तयः, मूलपुरुषस्य प्रकृतधनस्वामिनः अवसाने सन्ततिविच्छेदेन तत्सन्तानलोपेन निरवलम्बना निराश्रयाः सत्यः, एवमित्थं धनवृद्धिवदित्यर्थः, परम् अन्यं जनम्, उपतिष्ठन्ते उपगच्छन्ति। अतएव ममापि अन्ते अवसाने, पुरुवंशश्रियः पुरुवंशीयराज्यसम्पदः एष वृत्तान्त ईदृगेव प्रकारो भविष्यतीति शेषः, सन्ततिविच्छेदादिति भावः।

"वृत्तान्तः स्यात् प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः" इत्यमरः।

---

(ঙ) প্রতীহারী। হাঁ, ইহা ঘোষিত হইবে। (এই বলিয়া, চলিয়া গিয়া, আবার প্রবেশ করিয়া) মহারাজ! যথাকালে বৃষ্টির ন্যায়, সকল প্রধান লোক, আপনার ঘোষণাবাণীকে প্রশংসাপূর্ব্বক গ্রহণ করিয়াছেন।

(চ) রাজা। (দীর্ঘ ও উষ্ণ নিশ্বাস ত্যাগ করিয়া) হায়! সন্তানলোপবশতঃ নিরাশ্রয় সম্পত্তি, এইরূপই মূলপুরুষের পরে, অন্যের নিকট উপস্থিত হয়; আমার পরেও পুরুবংশীয় সম্পত্তির এইরূপ অবস্থাই হইবে।

(१)···एवं भोः सन्ततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ति। ममाप्यन्ते पुरुवंशश्रीरकाले इवोप्तबीजा भूरिवं वृत्ता।

प्रती। पडिहदं अमङ्गलं। (छ)

राजा। धिङ्मामुपनतश्रेयोऽमानिनम् (१)। (ज)

मिश्र। असंसअं पिअसहीं ज्जेव हिअए कदुअ णिन्दिदो अणेण अप्पा (२)। (झ)

राजा। संरोपितेऽप्यात्मनि धर्म्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तवीजा ॥२६॥

(छ) प्रतिहतममङ्गलम्।

(झ) असंशयं प्रियसखीमेव हृदये कृत्वा निन्दितः अनेनात्मा।

---

(छ) प्रतीति। अमङ्गलं भवदाशङ्कितं निजसन्ततिविच्छेदरूपमशुभम्, प्रतिहतं निवृत्तम्, भवत्विति शेषः, देवताप्रसादादिति भावः।

(ज) राजेति। उपनतं स्वयमेवोपस्थितं श्रेयः सगर्भशकुन्तलारूपं मङ्गलम् अवमन्यते अवमानेन प्रत्याचष्ट इति तं तादृशं मां धिक्, बुद्धिभाग्ययोरभावादित्याशयः।

(झ) मिश्रेति। प्रियसखीं शकुन्तलाम्। संशयस्याभाव इत्यसंशयम् उक्तार्थे संशयो नास्तीत्यर्थः, अभावार्थेऽव्ययीभावः।

ननु कथमुपनतश्रेयोऽवमानित्वमित्याह संरोपित इति। काले यथासमये, उप्तं रोपितं वीजं यस्यां सा तादृशी, अतएव महते फलाय विपुलाय शस्याय, कल्पिष्यमाणा

---

(ছ) প্রতীহারী। অমঙ্গল নিবারিত হউক।

(জ) রাজা। মঙ্গল, স্বয়ং উপস্থিত হইয়াছিল, আমি অবজ্ঞা করিয়া তাহা প্রত্যাখ্যান করিয়াছি; সুতরাং আমাকে ধিক্।

(ঝ) মিশ্রকেশী। নিশ্চয়ই, ইনি প্রিয়সখী শকুন্তলাকে মনে করিয়া আত্মনিন্দা করিতেছেন।

(१)···उपस्थितश्रेयः···। (२)···वहि।

मिश्र। अपरिच्चत्ता दाणिं दे भविस्सदि (१)। (ञ)

चेटी। जनान्तिकम्। अज्ज ! एदं पत्तं पेसअन्तेण किं विआरिदं अमच्चेण। पेक्ख दाव भट्टिणो वाहजलप्पवाहो संवुत्तो। अधवा ण एसो सोअं बुद्धिपुव्वअं पड़िवज्जिस्सदि ता मेहच्छन्दागारट्ठिदं णिव्वाणसमत्थं अज्जमाहव्वं गेण्हिअ आअच्छ (२)। (ट)

(ञ) अपरित्यक्ता इदानीं ते भविष्यति।

(ट) आर्य्ये ! एतत् पत्रं प्रेषयता किं विचारितममात्येन। प्रेक्षस्व तावत् भर्त्तुर्वाष्पजलप्रवाहः संवृत्तः। अथवा नैष शोकं बुद्धिपूर्वकं परिवर्जयिष्यति, तस्मेघच्छन्दागारस्थितं निर्वाणसमर्थम् आर्य्यमाधव्यं गृहीत्वा आगच्छ।

---

प्रभविष्यन्ती विपुलं शस्यं जनयितुं शक्यन्तीत्यर्थः, वसुन्धरा भूमिरिव, मया, कुलस्य सन्तानस्य प्रतिष्ठा तद्वंशकसन्तानधारणादाश्रयस्वरूपा, धर्म्मपत्नी धर्म्मानुसारेण परिणीता स्त्री शकुन्तला, आत्मनि स्वस्मिन्. संरोपिते "आत्मा वै जायते पुत्रः" इति श्रुतेः पुत्र-रूपेण तदुदरे आहितेऽपि, त्यक्ता। कुलसायां नामशब्दः। अतएव मां धिगित्यभिप्रायः।

अत्र श्रौतोपमालङ्कारः। उपजातिर्वृत्तम् ॥२६॥

(ञ) मिश्रेति। इदानीं मया साक्षात् तवावस्थादर्शनात् परकाले, अपरित्यक्ता

---

রাজা। যথাসময়ে বীজ রোপণ করা হইয়াছে, সুতরাং ভবিষ্যতে প্রচুর ফল জন্মাইতে সমর্থ হইবে, এইরূপ ভূমিকে যেমন পরিত্যাগ করে, সেইরূপ পুত্ররূপে নিজেই রোপিত হইলেও, বংশের আশ্রয়স্বরূপা ধর্ম্মপত্নীকে আমি পরিত্যাগ করিয়াছি ॥২৬॥

(ঞ) মিশ্রকেশী। এখন আপনার অপরিত্যক্ত হইবে।

---

(१) सानुमती। अपरिच्छिण्णा दाणिं दे सन्तई होदि।

(२) चतुरिका। जनान्तिकम्। अय्ये इमिणा सव्ववाहजुत्तन्तेण दिठ्ठावि णो भट्टा। णं अध्माविअ मेहपड़िच्छन्दादो अज्जं माठव्वं गेण्हिअ आअच्छेहि।

প্রতী। সুট্ঠু দে ভণিদং। ইতি নিষ্ক্রান্তা (১)। (ঠ)

রাজা। অহো! দুষ্মন্তস্য সংশয়মারূঢ়াঃ পিণ্ডভাজঃ।

কুতঃ—(ড)

(ঠ) সুষ্ঠু ত্বয়া ভণিতম্।

---

পুনঃ প্রাপ্নোত্যর্থঃ, শকুন্তলেতি শেষঃ। তথা চ ইতঃপরং মমান্তিকে ভবদীয়গাঢ়ানুরাগমাকর্ণ্য অবশ্যমেব শকুন্তলা আগমিষ্যতীতি ভাবঃ।

(ট) চেটীতি। স্বাপেক্ষয়া প্রতীহার্য্যা উচ্চপদস্থতয়া গৌরবিতত্বাৎ আর্য্যে ইতি তস্যা এব সম্বোধনম্। কিং বিচারিতং কুৎসিতং বিবেচনং কৃতমিত্যর্থঃ। তৎকারণমাহ প্রেক্ষস্বেত্যাদি। ভর্ত্তুঃ রাজ্ঞঃ। অথশব্দ আনন্তর্য্যে, বাশব্দশ্চার্থে, তেন চ অথবা অনন্তরঞ্চেত্যর্থঃ। এষ রাজা, বুদ্ধিপূর্ব্বকম্ আত্মবুদ্ধ্যেতি তাৎপর্য্যম্, শোকং ন পরিবর্জয়িষ্যতি ন পরিত্যক্ষ্যতি; তত্তস্মাৎ, মেঘচ্ছন্নং নাম অগারং প্রাসাদস্তত্র স্থিতম্, নির্ব্বাপণসমর্থম্ এতচ্ছোকানলশান্তিকরণযোগ্যম্, আর্য্যমাধব্যং মাননীয়ং মাধব্যনামানং বিদূষকম্।

(ড) রাজেতি। অহো ইতি শোকে। পিণ্ডং ভজন্ত ইতি পিণ্ডভাজঃ পিতরঃ, সংশয়মারূঢ়াঃ পিণ্ডং প্রাপ্স্যন্তি ন বেতি সন্দেহাপন্নাঃ।

(ট) চতুরিকা। (প্রতীহারীর প্রতি চুপি চুপি) আর্য্যে! এই পত্র পাঠাইয়া মন্ত্রীমহাশয় কি বিবেচনা করিলেন। দেখুন—মহারাজের একেবারে অশ্রুপ্রবাহ উপস্থিত হইয়াছে। অথবা ইনি, নিজে বুঝিয়া শোক পরিত্যাগ করিবেন না; অতএব মেঘচ্ছন্নপ্রাসাদগত এই শোকানল নির্ব্বাণ করিতে সমর্থ আর্য্য মাধব্যকে নিয়া আসুন।

(ঠ) প্রতীহারী। তুমি ভাল বলিয়াছ। (এই বলিয়া চলিয়া গেল।)

(ড) রাজা। হায়! দুষ্মন্তের পিণ্ডভাগী পিতৃপুরুষগণ সংশয়াপন্ন হইয়াছেন। কারণ—

---

(১) প্রতীহারী। সুষ্ঠু ভণাসি। নিষ্ক্রান্তা।

अस्मात् परं बत यथाश्रुति सम्भृतानि
को नः कुले निवपनानि करिष्यतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुसेकमुदकं पितरः पिबन्ति (१) ॥२७॥

अस्मादिति। अस्मात् दुष्मन्तात्, परम् अनन्तरं दुष्मन्तावसाने इत्यर्थः, नः अस्माकं कुले, को जनः, श्रुतिं वेदम् अनतिक्रम्येति यथाश्रुति वेदविधानानुसारेणेत्यर्थः, सम्भृतानि आयोजितानि, निवपनानि पिण्ड-श्राद्ध-तर्पणादीनि पितृदानानि, करिष्यति इति चिन्तयित्वेति शेषः, पितरः मत्पूर्वपुरुषाः प्रसूतिविकलेन तनयहीनेन मया, प्रसिक्तं प्रदत्तम्, धौतः प्रक्षालितः अश्रुसेको येन तत् तादृशम्, उदकं तर्पणजलम्, नूनं निश्चितमेव, पिबन्ति। बत खेदे। तथा च तर्पणजलग्रहणकाले उपविष्टा पितरः स्वस्वक्रोडोपरि उत्तानभावेन पाणियुगलं स्थापयन्ति, तदा च तेषां नयनयुगलात् सरलाधोदेशस्थिते तस्मिन् पाणियुगले अश्रुजलानि पतन्ति, तदुपरि च तर्पणजलपतने तदश्रुजलानां प्रक्षालनमेव जायत इति भावः।

अत्र नूनमित्युपादानात् वाच्या भावाभिमानिनी क्रियोत्प्रेक्षालङ्कारः। इतिशब्दात् परं चिन्तयित्वा इत्यनभिधानेऽपि न न्यूनपदतादोषः, वक्तुर्विषादमयत्वात् "उन्मादानन्द-मग्नादेः स्यान्न्यूनपदता गुणः" इति साहित्यदर्पणात्।

"पितृदानं निवापः स्यात्" इत्यमरः। "प्रसूतिस्तनयोत्पत्त्योस्तथा दुहितरि स्मृता" इति विश्वः। वसन्ततिलका वृत्तम् ॥२७॥

হায়! এই দুষ্মন্তের পর আমাদের বংশে কোন্ ব্যক্তি, শাস্ত্রানুসারে সংগৃহীত শ্রাদ্ধ-পিণ্ডদানাদি করিবে, এইরূপ চিন্তা করিয়া আমার পিতৃপুরুষগণ, সন্তানবিহীন আমার প্রদত্ত তর্পণজল পান করিয়া থাকেন; তৎকালে আমার সেই তর্পণের জলে নিশ্চয়ই তাঁহাদের অশ্রুসিক্ত হস্ত প্রক্ষালিত করিয়া থাকে ॥২৭॥

(१)…यथाश्रुतिविरहितानि…निवपनानि नियच्छतीति।… धौताश्रुशेषम्…। मोहमुपागतः।

मिश्र। हद्धी हद्धी! सदि क्खु दीवे ववधाणदोसेण अन्धआरं अणुहोदि राएसी (१)। (ढ)

चेटी। भट्टा! अलं सन्दाविदेण, वअत्थो ज्जेव पहु अवरासु देवीसु अणुरूवपुत्तजम्मेण पुव्वपुरुसाणं अरिणो भविस्सदि। आत्मगतम्। ण मे वअणं पड़िच्छदि। अणुरूवं वि ओसधं आदङ्कं णिअत्तेदि (२)। (ण)

(ढ) हा धिक् हा धिक्! सति खलु दीपे व्यवधानदोषेण अन्धकारमनुभवति राजर्षिः।

(ण) भर्त्तः! अलं सन्तापितेन, वयस्थः एव प्रभुः अपरासु देवीषु अनुरूपपुत्रजन्मना पूर्वपुरुषाणामनृणी भविष्यति। न मे वचनं प्रतीच्छति। अनुरूपमपि औषधम् आतङ्कं निवर्त्तयति।

(ढ) मिश्रेति। व्यवधानदोषेण भित्त्यादिनेति शेषः। तथा च यथा दीपे विद्यमानेऽपि भित्त्यादिव्यवधानदोषेण लोकः अन्धकारमनुभवति, तथा राजर्षिर्दुष्मन्तोऽपि विद्यमाने शकुन्तलागर्भसन्ताने व्यवधानदोषेण अनपत्यतादुःखमनुभवतीति भावः।

अतएवात्र असम्बन्धवस्तुसम्बन्धा निदर्शनालङ्कारः।

(ण) चेटीति। सन्तापितेन शोकसन्तप्तीकृतेन आत्मनेति शेषः। वयस्थ एव तरुण एव, न पुनर्वृद्ध इत्येवशब्दार्थः, येन पुत्रोत्पादनशक्तिराहित्यमाशङ्कनीयमिति भावः, प्रभुः स्वामी भवान्, अपरासु शकुन्तलाभिन्नासु, तस्याः पुनःप्राप्त्यसम्भवादित्याशयः। अनुरूपपुत्रजन्मना स्वसदृशपुत्रोत्पत्त्या। प्रतीच्छति गृह्णाति राजा मद्वचनेन नाश्वस्तो भवतीत्यर्थः। अपिशब्दः सम्भावनायाम्। तथा च अनुरूपं योग्यमेव औषधं कर्त्तृ, आतङ्कं रोगम्, निवर्त्तयति विनाशयति, इति सम्भावयामीति तात्पर्य्यम्। तेन

(ঢ) মিশ্রকেশী। হায়! হায়! দীপ থাকিতে, ব্যবধানের দোষে রাজর্ষি অন্ধকার ভোগ করিতেছেন।

*(१) क्वचित् परीक्ष्या सह एतदुक्तिर्निबद्धा। (२) अयं पाठः क्वचिन्नास्ति।

রাজা। শোকনাটিতকেন (১)। (ত)

আমূলশুদ্ধসন্ততি কুলমেতৎ পৌরবং প্রজাবন্ধ্যে।
ময্যস্তমিতমনার্য্যে দেশ ইব সরস্বতীস্রোতঃ (২) ॥২৮॥

ইতি মোহমুপাগতঃ।

অনুরূপমৌষধং যথা রোগং নাশয়তি, তথা অনুরূপোপদেশ এব অস্য শোকং নাশয়িষ্যতি। এবঞ্চ মদীয়বচনং নানুরূপমিতি তন্ন প্রতীচ্ছতি, কিন্তু মাধব্যবচনমবশ্যমেব প্রতীচ্ছে-দনুরূপত্বাদিত্যাশয়ঃ।

"রুক্ তাপশঙ্কাস্বাতঙ্কঃ" ইত্যমরঃ।

পুত্রোৎপাদনেন পিতৃণামানৃণ্যমাহুঃ শঙ্খলিখিত-পৈঠীনসি-যমাঃ—

"যত্র ক্বচন জাতেন পিতা পুত্রেণ নন্দতি।
তেন চানৃণতাং যাতি পিতৃণাং পিণ্ডদেন বৈ ॥"

(ত) রাজেতি। শোকস্য নাটিতমেব নাটিতকং তেন শোকাভিনয়েনেত্যর্থঃ।

আমূলেতি। আ মূলাৎ আদিপুরুষাৎ তদুৎপত্তিদেশাচ্চ আরভ্য শুদ্ধা নির্দ্দোষা পবিত্রা চ সন্ততিঃ পুত্রপৌত্রাদিসন্তানপরম্পরা ধারা চ যস্য তৎ, এতৎ পৌরবং কুলং পুরুবংশঃ, প্রজাবন্ধ্যে নিঃসন্তানে, অনার্য্যে অভদ্রে ময়ি, প্রজাবন্ধ্যে জনরহিতে, অনার্য্যে আর্য্যজাতি-শূন্যে দেশে, সরস্বত্যাস্তদাখ্যায়া নদ্যাঃ স্রোতঃ প্রবাহ ইব, অস্তমিতং বিলুপ্তম্; ইতোঽধিকং কিং নাম দুঃখমস্তীতি ভাবঃ।

(ণ) চতুরিকা। মহারাজ! মনকে সন্তপ্ত করিবেন না; কারণ, মহারাজ ত যুবকই; সুতরাং অন্যান্য রাণীর গর্ভে অনুরূপ পুত্র জন্মাইয়া পিতৃপুরুষগণের নিকট অনৃণী হইতে পারিবেন। (স্বগত) আমার কথা গ্রাহ্য করিতেছেন না, কারণ, অনুরূপ ঔষধেই রোগ নাশ করিয়া থাকে।

(ত) রাজা। (শোক অভিনয় করিয়া)

(১—২) শিখরিণী পাঠো ক্বচিৎ পুস্তকে ন দৃশ্যেতে।

चेटी। ससम्भ्रमम्। समस्ससदु समस्ससदु भट्टा। (थ)

मिश्र। किं दाणिं ज्जेव णिव्वुदं करेमि। अथवा सुदं मए सउन्तलं समस्सासन्तीए देवजणणीए मुहादो जण्णभाअसमुस्सुआओ देवाओ ज्जेव तह अणुचिट्ठिस्सन्ति, जह सो भट्टा

(थ) समाश्वसितु समाश्वसितु भर्त्ता।

(द) किमिदानीमेव निर्वृतं करोमि, अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या देवजनन्या मुखात् यज्ञभागसमुत्सुका देवा एव तथा अनुष्ठास्यन्ति; यथा स भर्त्ता

---

अत्र श्रौती पूर्णोपमालङ्कारः। तथा शोभा नाम नाट्यलक्षणञ्च। यथा दर्पणे—

"सिद्धैरर्थैः समं यत्राप्रसिद्धोऽर्थः प्रकाशते।
श्लिष्टलक्षणचित्रार्था सा शोभेत्यभिधीयते॥"

अत्र सरस्वतीस्रोतःपक्षः प्रसिद्धः, पौरवकुलपक्षश्च लोपे अप्रसिद्धः।

"सन्ततिः स्यात् पङ्क्तौ गोत्रे पारम्पर्य्ये पुत्रपौत्राणाम्" इति मेदिनी। "प्रजा स्यात् सन्ततौ जने" इत्यमरः।

आर्य्या जातिः॥२८॥

(थ) चेटीति। ससम्भ्रमं सत्वरं व्यस्ततासहितं वा।

(द) मिश्रेति। निर्वृतं शकुन्तलावृत्तान्तविज्ञापनेन सुस्थम्, एनं राजानमिति शेषः। समाश्वासयन्त्याः सम्यगाश्वस्तीकुर्वन्त्याः, देवजनन्या अदित्याः। यज्ञभागाय

---

যে দেশে প্রজা বা আর্য্যজাতি নাই, সেই দেশে যেমন নির্ম্মল সরস্বতী নদীর স্রোত লোপ পাইয়াছে; সেইরূপ এই পুরুবংশ আদিপুরুষ হইতে শুদ্ধ-সন্তান-সম্পন্ন; কিন্তু সন্তানবিহীন ও অভদ্র আমাতেই, লোপ-পাইল॥২৮॥

( এই বলিয়া মূর্চ্ছাপন্ন হইলেন। )

(থ) চতুরিকা। ( ব্যস্ততার সহিত ) মহারাজ আশ্বস্ত হউন, আশ্বস্ত হউন।

अइरेण धम्मपदिणीं तुमं अहिणन्दिस्सदित्ति। ता ण जुत्तं मे एत्थ विलम्बिदुं, जाव इमिणा वुत्तन्तेण पिअसहीं सउन्तलं समस्सासेमि। इत्युद्भ्रान्तकेन निष्क्रान्ता (१)। (द)

नेपथ्ये। भो! अव्वह्मस्सं अव्वह्मस्सं (२)। (ध)

---

अचिरेण धर्म्मपत्नीं त्वामभिनन्दिष्यतीति। तन्न युक्तं मे अत्र विलम्बितुम्, यावदेतेन वृत्तान्तेन प्रियसखीं शकुन्तलां समाश्वासयामि।

(ध) भोः! अब्रह्मण्यम् अब्रह्मण्यम्।

---

यज्ञभागग्रहणाय समुत्सुका उत्कण्ठिताः। स भर्त्ता राजा दुष्मन्तः। त्वां शकुन्तलाम्, अभिनन्दिष्यति अभिनन्दनपूर्वकं ग्रहीष्यति, इति श्रुतमित्यन्वयः। तथा च राज्ञो दुष्मन्तस्य शकुन्तलार्थमाकुलत्वे यज्ञानुष्ठानासम्भवात् स्वार्थसम्पादनार्थमेवं देवा आग्रहीष्यन्तीति भावः। उद्भ्रान्तकेन गतिविशेषेण। तदाह सङ्गीतसुधानिधौ—

"पूर्वं दक्षिणमुत्थाप्य पश्चादाकुञ्चयन् पदम्।
वामं शीघ्रं भ्रमेद्वामावर्त्तमुद्भ्रान्तकं विदुः॥"

---

(द) মিশ্রকেশী। এখনই কি সুস্থ করিব? অথবা শকুন্তলাকে আশ্বস্ত করিবার সময়ে অদিতির মুখে শুনিয়াছি যে "যজ্ঞের অংশ পাইবার জন্য উৎকণ্ঠিত দেবগণই সেইরূপ কার্য্য করিবেন, যাহাতে সেই রাজা ধর্ম্মপত্নী বলিয়া তোমাকে আদরপূর্ব্বক গ্রহণ করেন।" অতএব এখানে আমার বিলম্ব করা উচিৎ নহে; এই বৃত্তান্তদ্বারা প্রিয়সখী শকুন্তলাকে আশ্বস্ত করি। (এই বলিয়া উদ্‌ভ্রান্ত গতিতে চলিয়া গেল।) (টীকা দ্রষ্টব্য।)

(ধ) নেপথ্যে। ওরে! আমি অবধ্য, আমি অবধ্য।

(१) सानुमती। हद्धी हद्धी! सन्ति क्खु दीवे अन्धआरदोसं। अहं दाणिं महेन्दजणणीए।...ता ण जुत्तं कालं पडिपालिदुं।

(२) नेपथ्ये। अब्बम्हणं।

राजा। प्रत्यागतचेतनः कर्णं दत्त्वा। अये! माधव्यस्येवार्त्तनादः (१)। (न)

चेटी। सो णाम माधव्वो तवस्सी पिङ्गलिआमिस्सिआहिं चेड़िआहिं चित्तफलअहत्थो पाविदो भवे। (प)

राजा। चतुरिके! गच्छ, मद्वचनादनिषिद्धपरिजनां देवीमुपालभस्व। (फ)

(प) स नाम माधव्यस्तपस्वी पिङ्गलिकामिश्रिताभिश्चेटिकाभिश्चित्रफलकहस्तः प्राप्तो भवेत्।

(ध) नेपथ्य इति। ब्रह्मणे हितं ब्रह्मण्यं न ब्रह्मण्यमब्रह्मण्यम् अवध्योऽहमित्यर्थः, पापजनकत्वादित्याशयः।

"अब्रह्मण्यमवध्योक्तौ" इत्यमरः।

(न) राजेति। प्रत्यागतचेतनो लब्धसंज्ञ इति तात्पर्य्यम्। सम्भ्रमे अयेशब्दः।

(प) चेटीति। तपस्वी दीनः, पिङ्गलिका तदाख्या काचित् दासी तया मिश्रिताभिः सहिताभिः चेटिकाभिरन्याभिर्दासीभिः।

(न) রাজা। ( চৈতন্য লাভ করিয়া, কাণ দিয়া ) ওহে! মাধব্যের ন্যায়ই যেন আর্ত্তনাদ শুনিতেছি।

(প) চতুরিকা। আমি মনে করি, পিঙ্গলিকাপ্রভৃতি দাসীরা চিত্রফলকহস্তে দুর্ব্বল মাধব্যকে আক্রমণ করিয়াছে।

(१) राजा। प्रत्यागतः कर्णं दत्त्वा। अये माढव्यस्येवार्त्तस्वरः। कः कोऽत्र भोः! अतः परम् अहन्यहन्यात्मन एव तावत्, इत्यादिश्लोकात् पूर्वमीदृशाः पाठाः पुस्तकान्तरे दृश्यन्ते। यथा प्रविश्य ससम्भ्रमं प्रतीहारी। परित्तायदु देवो संसअगदं वअस्सं। राजा। केन आत्तगन्धो माणवकः। प्रतीहारी। अदिट्ठरूवेण केणवि सत्तेण अदिक्कमिअ मेहप्पडिच्छन्दस्स पासादस्स अग्गभूमिं आरोविदो। राजा। उत्थाय। मा तावत्। ममापि सत्त्वैरभिभूयन्ते गृहाः। अथवा—

चेटी । निष्क्रान्ता ।

नेपथ्ये । भूयः स एव शब्दः । (ब)

राजा । परमार्थतो भीतिभिन्नस्वरो ब्राह्मणः । कः कोऽत्र भोः ! । (भ)

प्रविश्य कञ्चुकी । आज्ञापयतु देवः ।

राजा । निरूप्यतां किमेवं माधव्यब्राह्मणः क्रन्दतीति । (म)

कञ्चुकी । यावदवलोकयामि । इति निष्क्रम्य ससम्भ्रमं पुनः प्रविष्टः । (य)

(फ) राजेति । न निषिद्धो न दुर्व्यवहारान्निवर्त्तितः परिजनो यया ताम् । उपालभस्व तिरस्कुरु, तमेव हेतुं प्रदर्श्येति भावः ।

(ब) नेपथ्य इति । भूयः पुनरपि, स एव अब्रह्मण्यमब्रह्मण्यमित्येवं रूप एव ।

(भ) राजेति । परमार्थतो यथार्थतः, भीत्या भयेन भिन्नः स्वाभाविकादन्यरूपः स्वरः कण्ठध्वनिर्यस्य सः, ब्राह्मणो माधव्यः । अत एतन्निरूपणमावश्यकमिति भावः । अत्र स्थाने, कः को विद्यत इति शेषः ।

(म) राजेति । इति निरूप्यतां निश्चीयताम् ।

(य) कञ्चुकीति । यावत् यत् जातमिति शेषः, तदवलोकयामीत्यर्थः । ससम्भ्रमं सत्वरम् ।

---

(ফ) রাজা । চতুরিকা ! তুই যা, আমার কথা অনুসারে রাণীকে তিরস্কার কর্ ; কারণ, তিনি নিজের পরিজনদিগকে নিষেধ করেন না কেন।

চতুরিকা । ( চলিয়া গেল । )

(ব) নেপথ্যে । ( আবারও সেই শব্দ হইল । )

(ভ) রাজা । বাস্তবিকই ব্রাহ্মণের স্বর, ভয়ে বিকৃত হইয়াছে। এখানে কে কে আছ হে ! ।

কঞ্চুকী । ( প্রবেশ করিয়া ) মহারাজ আদেশ করুন ।

(ম) রাজা । নিরূপণ কর দেখি, এ মাধব্য ব্রাহ্মণ কাঁদে কি না ।

রাজা। পার্বতায়ন! ন খলু কিঞ্চিদত্যাহিতম্?। (র)

কঞ্চুকী। নৈবম্। (ল)

রাজা। ততঃ কুতোঽয়ং বেপথুঃ। তথাহি—(ব)

প্রাগেব জরসা কম্পঃ সবিশেষস্তু সম্প্রতি।
আবিষ্করোতি সর্বাঙ্গমশ্বত্থমিব মারুতঃ ॥২৯॥

---

(র) রাজেতি। পার্বতায়নেতি কঞ্চুকিনো নাম্না সম্বোধনম্। অত্যাহিতং মহাভয়ং জাতং কিমিত্যর্থঃ। অত্র কাক্বা প্রশ্নো ব্যজ্যতে।

"অত্যাহিতং মহাভীতিঃ কর্ম্ম জীবানপেক্ষি চ" ইত্যমরঃ।

(ল) কঞ্চুকীতি। এবং ভবৎপৃষ্টম্ অত্যাহিতম্, মা ন জাতম্। অত্রায়মাশয়ঃ— শত্রুকর্তৃকনগরাক্রমণাদিকমেব অত্যাহিতং ভূরিপ্রাণিবিষয়ত্বাৎ, একস্য মাধব্যস্যাক্রমণং তু তন্নেতি।

(ব) রাজেতি। ততস্তদা অত্যাহিতাভাবে ইত্যর্থঃ, বেপথুস্তব দেহকম্পঃ।

প্রাগিতি। জরসা বার্দ্ধক্যেন, প্রাগেব ইতঃ পূর্বমপি, তব কম্প আসীদিতি শেষঃ, সম্প্রতি তু সবিশেষঃ স কম্পঃ সাতিশয়ঃ সন্ মারুতো বায়ুঃ, অশ্বত্থং বৃক্ষমিব, সর্বাঙ্গং তব সর্বাবয়বম্, প্রাপ্যেতি শেষঃ, আবিষ্করোতি আত্মানং প্রকাশয়তি, অত্যাহিতাভাবে ইহস্যাগন্তুককম্পাসম্ভব ইতি ভাবঃ।

অত্র শ্রৌতোপমালঙ্কারঃ। তথা 'আসীৎ' 'প্রাপ্য' 'আত্মানম্' ইতি ত্রয়াণামপি পদানামনুক্তত্বেঽপি ন ন্যূনপদতাদোষঃ প্রত্যুত গুণ এব বস্তুবহির্গমপত্বাৎ "উক্তাবানন্দমগ্নাদেঃ স্যান্ন্যূনপদতা গুণঃ" ইতি সাহিত্যদর্পণাৎ ॥২৯॥

---

(য) কঞ্চুকী। দেখিতেছি। (এই বলিয়া চলিয়া গিয়া, ব্যস্ততার সহিত পুনরায় প্রবেশ করিলেন।)

(র) রাজা। পার্বতায়ন! কোন অত্যাহিত ঘটে নাই ত?।

(ল) কঞ্চুকী। না।

(ব) রাজা। তবে তোমার এ কম্প কেন? যথা—

कञ्चुकी। परित्रायतां सुहृदं महाराजः। (श)

राजा। कस्मात् परित्रातव्यः?। (ष)

कञ्चुकी। महतः कृच्छ्रात्। (स)

राजा। अये! भिन्नार्थमभिधीयताम्। (ह)

कञ्चुकी। योऽसौ दिगवलोकनप्रासादो मेघच्छन्नो नाम। (क्ष)

(श) कञ्चुकीति। सुहृदं माधव्यम्।

(ष) राजेति। कस्मात् पदार्थात्।

(स) कञ्चुकीति। कृच्छ्रात् कष्टात्।

(ह) राजेति। अये इति विरक्तिसूचकं सम्बोधनम्; विरक्तिश्च किञ्चित् किञ्चिद्-अस्पष्टार्थकथनादिति बोध्यम्। भिन्नः प्रकाशितः अर्थः अभिधेयं यस्मिन् कर्म्मणि तद्यथा तथा।

(क्ष) कञ्चुकीति। दिग्भागमवलोकनाय कस्याञ्चिद्दिशि आक्रमणार्थं शत्रुरागच्छति न वा इत्यादिपर्य्यवेक्षणार्थं निर्म्मितः प्रासादो दिगवलोकनप्रासादः, मेघेन छन्नः सान्निध्येन आवृत इति मेघच्छन्नः अत्युच्च इत्यर्थः, वर्त्तत इति शेषः।

एतेन इदानीं कलिकातादौ मनुमेण्टादिनिर्म्माणवत् तदानीमपि राजधान्यादौ दिगवलोकनार्थम् अत्युच्चमन्दिरादिनिर्म्माणरीतिरासीदिति प्रतीयते।

---

পূর্ব্বেই বার্দ্ধক্যবশতঃ কম্প ছিল, এখন তাহা আরও বেশী হইয়াছে, তাহাতে বায়ু যেমন অশ্বত্থবৃক্ষের সমস্ত অঙ্গব্যাপ্ত করিয়া আত্মপ্রকাশ করে, সেইরূপ তোমারও সেই সবিশেষ কম্প, সর্ব্বাঙ্গ ব্যাপ্ত করিয়া আত্মপ্রকাশ করিতেছে॥২৯॥

(শ) কঞ্চুকী। মহারাজ সখাকে রক্ষা করুন।

(ষ) রাজা। কাহা হইতে রক্ষা করিতে হইবে?।

(স) কঞ্চুকী। গুরুতর কষ্ট হইতে।

(হ) রাজা। ওহে! স্পষ্ট করিয়া বল।

রাজা। কিং তত্র?। (ক)

কঞ্চুকী। তস্যাগ্রভাগাদ্গৃহনীলকণ্ঠৈ-
রনেকবিশ্রামবিলঙ্ঘ্যশৃঙ্গাৎ।
সখা প্রকাশেতরমূর্ত্তিনা তে
কেনাপি সত্ত্বেন নিগৃহ্য নীতঃ ॥৩০॥

(ক) রাজেতি। তত্র মেঘচ্ছন্নপ্রাসাদে, কিং জাতমিতি শেষঃ।

তস্যেতি। গৃহনীলকণ্ঠৈঃ গৃহপালিতময়ূরৈঃ, অনেকবিশ্রামৈঃ একবারেণারোহণ-সামর্থ্যাভাবাৎ ক্রমিকোপরিতনে কোষ্ঠে কোষ্ঠে বহুবারবিশ্রামকরণৈঃ বিলঙ্ঘ্যানি আরোহণীয়ানি শৃঙ্গাণি উপরিভাগা যস্য তস্মাৎ, এতেনাতিশয়োচ্চত্বং ব্যজ্যতে, তস্য মেঘচ্ছন্নপ্রাসাদস্য, অগ্রভাগাৎ সর্বোপরিতনগৃহাৎ, প্রকাশেতরা অপ্রকাশা অদৃশ্যা মূর্ত্তির্যস্য তেন তাদৃশেন, কেনাপি অনির্দ্দিষ্টেন, সত্ত্বেন রাক্ষসাদিজন্তুনা, তে তব সখা মাধব্যঃ নিগৃহ্য ধৃত্বা পরাভূয়, নীতঃ স্থানান্তরং প্রাপিতঃ, তাদৃশকষ্টাচ্চ তং পরিত্রায়তামিত্যাশয়ঃ।

অত্র দ্বিতীয়চরণোক্তিভঙ্গ্যা মেঘচ্ছন্নপ্রাসাদস্য অত্যুচ্চতায়াঃ স্পষ্টসূচনাৎ পর্য্যায়োক্ত-মলঙ্কারঃ। তথা চ দর্পণে—

"পর্য্যায়োক্তং যদা ভঙ্গ্যা গম্যমেবাভিধীয়তে।"

"দ্রব্যাসু ব্যবসায়েষু সত্ত্বমস্ত্রী তু জন্তুষু" ইত্যমরঃ।

ইন্দ্রবজ্রোপেন্দ্রবজ্রয়োর্মেলনাদুপজাতির্বৃত্তম্ ॥৩০॥

---

(খ) কঞ্চুকী। সকল দিক্ দেখিবার জন্য, সেই যে মেঘচ্ছন্ননামে প্রাসাদ আছে।

(ক) রাজা। সেখানে কি?।

কঞ্চুকী। গৃহপালিত ময়ূরগণ, বহুবার বিশ্রাম করিয়া, যাহার উপরি ভাগ অতিক্রম করিতে পারে, সেইরূপ সেই মেঘচ্ছন্নপ্রাসাদের উপরিতন গৃহ হইতে, অদৃশ্যমূর্ত্তি কোন জন্তু, আপনার সখাকে ধরিয়া নিয়া গিয়াছে ॥৩০॥

राजा। (सहसोत्थाय।) आः, ममापि सत्त्वैरभिभूयन्ते गृहाः ?
अथवा बहुप्रत्यवायं नृपत्वम्। (ख)

अहन्यहन्यात्मन एव तावत्
ज्ञातुं प्रमादस्खलितं न शक्यम्।
प्रजासु कः केन पथा प्रयाती-
त्यशेषतः कस्य पुनः प्रभुत्वम् (१) ॥३१॥

(ख) राजेति। आःशब्दः कोपे। ममापि जगत्यद्वितीयवीरस्यापीति भावः, गृहा भवनानि, सत्त्वै राक्षसादिजन्तुभिः, अभिभूयन्ते आक्रमणेनात्याचारविषयीक्रियन्ते। अहो! साहसं सत्त्वानामित्यभिप्रायः। बहवः प्रत्यवायाः पापानि यस्मिन् तत् तादृशम्।

"गृहाः पुंसि च भूम्न्येव" इत्यमरः।

ननु कथं बहुप्रत्यवायं नृपत्वमित्याह—अहनीति। अहन्यहनि प्रतिदिनम्, आत्मन एव अन्यस्य का कथा स्वस्यैव, तावत् सकलम्, प्रमादेन अनवधानतया स्खलितम् अन्याय्यमाचरणम्, ज्ञातुम् अवधारयितुम्, न शक्यं नृपैरिति शेषः। पुनः किन्तु, प्रजासु स्वराज्यवासिजनेषु मध्ये, को जनः, केन सता असता वा पथा, प्रयाति गच्छति साधु असाधु वा आचरतीत्यर्थः, इत्येतत् अशेषतः साकल्येन, ज्ञातुमिति सम्बन्धः, कस्य नृपस्य, प्रभुत्वं शक्तिरस्ति, अपि तु कस्यापि नेत्यर्थः। तथा चात्मनः प्रमादस्खलनात् प्रजाभिरन्याय्याचरणाद्वा समुत्पन्नेन मम प्रत्यवायेनायं सत्त्वाभिभव इति भावः।

प्रजापापस्य राजनि संक्रममाह मनुः—

"सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः॥"

(খ) রাজা। (হঠাৎ উঠিয়া) আঃ! আমার বাড়ীও জন্তুতে আক্রমণ করে!। অথবা রাজকার্য্যে বহুতর পাপ ঘটিয়া থাকে।

(१)···अशेषतो वेदितुमस्ति शक्तिः।

नेपथ्ये । अविधावेहि भो ! अविधावेहि (१) । (ग)

राजा । आकर्ण्य गतिभेदं रूपयन् । सखे ! न भेतव्यं न भेतव्यम् (२) । (घ)

नेपथ्ये । भो ! कधं ण भाइस्सं । एसो मं कोवि पच्चामोडिअ सिरोधरं इक्खुं विअ भग्गत्थिं करिदुं-मिच्छदि (३) । (ङ)

---

(ग) अभिधाव भोः ! अभिधाव ।

अत्रैवात्र अप्राकरणिकार्थात् प्राकरणिकार्थापतनेन अर्थापत्तिः, तदुत्थापिता च सामान्याद्विशेषप्रतीतिरूपा अप्रस्तुतप्रशंसालङ्कार इत्यनयोरङ्गाङ्गिभावेन सङ्करः ।

"यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः ।

पूर्ववत् वृत्तम् ॥३१॥

(ग) नेपथ्य इति । अभि मां लक्ष्यीकृत्य, धाव द्रुतमागच्छ । भयात् द्विरुक्तिः ।

(घ) राजेति । गतिभेदं गमनविशेषं द्रुतगमनमित्यर्थः, रूपयन् अभिनयन् । न भेतव्यं भयं न कर्त्तव्यम् ।

---

অনবধানতাবশতঃ প্রত্যহ নিজেরই যত ত্রুটি ঘটে, সেই ত্রুটিই সমুদয় জানিতে পারা যায় না ; তাহাতে প্রজাদের মধ্যে কোন্ ব্যক্তি কোন্ পথে চলিতেছে, তাহা সমস্ত জানিতে কোন্ রাজার শক্তি আছে ? ॥৩১॥

(গ) নেপথ্যে । ওহে ! আমার দিকে ধাবিত হও, আমার দিকে ধাবিত হও ।

(ঘ) রাজা । ( শুনিয়া, দ্রুতগমন অভিনয় করিয়া ) সখে ! ভয় করিও না, ভয় করিও না ।

---

(१) नेपथ्ये । भो वअस्स अविदा अविदा । (२)···गतिभेदेन परिक्रामन्···।

(३) नेपथ्ये पुनस्तदेव पठित्वा ।···पच्चवणमिदसिरोहरं उच्छुं विअ तिभङ्गं करेइ ।

राजा । सदृष्टिक्षेपम् । धनुर्धनुः (१) । (च)

प्रविश्य धनुर्हस्ता प्रतीहारी । जअदु जअदु भट्टा । एदं सघरं सरासणं हत्थावारओ अ (२) । (छ)

राजा । सशरं धनुरादत्ते (३) । (ज)

(ङ) भोः! कथं न भेष्यामि । एष मां कोऽपि प्रत्यामोट्य शिरोधराम् इक्षुमिव भग्नास्थिं कर्तुमिच्छति ।

(छ) जयतु जयतु भर्त्ता । एतत् सशरं शरासनं हस्तावारकश्च ।

---

(ङ) नेपथ्य इति । न भेष्यामि भयं न करिष्यामि । कोऽपि अपरिचितः पुरुषः, शिरोधरां ग्रीवाम्, प्रत्यामोट्य पश्चादामर्द्य, माम्, इक्षुम् इक्षुदण्डमिव ।

(च) राजेति । दृष्टिक्षेपेण माधव्यदिशि दृष्टिपातेन सह सदृष्टिक्षेपम् । धनु-रानयेति शेषः, क्रोधे द्विरुक्तिः ।

(छ) प्रविश्येति । शरान् अस्यत्यनेनेति शरासनं धनुः । हस्तम् आवृणोति ज्याघातनिवारणाय आच्छादयतीति हस्तावारको लौहनिर्म्मितहस्तावरणम् ।

(ज) राजेति । आदत्ते गृह्णाति ।

(ঙ) নেপথ্যে । ওহে! কেন ভয় করিব না। এই কোন লোক, আমার গ্রীবা পিছনের দিকে মোড়াইয়া নিয়া, ইক্ষুদণ্ডের মত হাড় ভাঙ্গিয়া দিতে ইচ্ছা করিতেছে।

(চ) রাজা। ( সেই দিকে দৃষ্টিপাতের সহিত ) ধনু, ধনু।

(ছ) প্রতীহারী। ( ধনুর্হস্তে প্রবেশ করিয়া ) মহারাজের জয় হউক, জয় হউক। বাণের সহিত এই ধনু এবং হস্তাবরণ।

(জ) রাজা। ( বাণের সহিত ধনু গ্রহণ করিলেন। )

---

(१)…धनुस्तावत् ।

(२) प्रविश्य शार्ङ्गहस्ता यवनिका । भट्टा एदं हत्थावारसहिदं सरासणं ।

(३)…आधत्ते ।

Uttarpara
Jaikrishna Public Li

नेपथ्ये । एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।
आर्त्तानां भयमपनेतुमात्तधन्वा
दुष्मन्तस्तव शरणं भवत्विदानीम् ॥३२॥

राजा । सरोषम् । कथं मामेवोद्दिशति । आः, तिष्ठ तिष्ठ, कौणपापसद ! त्वमिदानीं न भवसि ? । चापमारोप्य । पार्वतायन ! सोपानमार्गमादेशय (१) । (भ्ह)

एष इति । अभिनवं सद्योनिर्गमात् नूतनं कण्ठशोणितम् गलरक्तम् अर्थयतीति स तादृशः, एषः अहम्, शार्दूलो व्याघ्रः, पशुं हरिणादिजन्तुमिव, चेष्टमानम् आत्मरक्षणाय यतमानम्, हन्मि मारयामि । आर्त्तानां पीड़ितानाम्, भयम् अपनेतुं दूरीकर्त्तुम्, आत्तं गृहीतं धन्व येन स तादृशो दुष्मन्तः, इदानीं तव शरणं रक्षको भवतु भवितुं शक्नोतु रक्षितुं चेत् शक्नोति तर्हि रक्षतु इत्यर्थः ।

अत्र श्रौतोपमालङ्कारः । तथा अहं हन्मि शार्दूलस्तु हन्ति इति पुरुषभेदात् "लतेव राजसे तन्वि !" इति दर्पणोदाहरणवत् भग्नप्रक्रमतादोषः, स च 'हन्तव्यः पशुरिव कण्ठरक्तमत्तुं व्याघ्रेण त्वमिह मया विचेष्टमानः' इति पूर्वार्द्धपाठेन समाधेयः ।

"धनुश्चापौ धन्वशरासनकोदण्डकार्म्मुकम्" इति "शरणं गृहरक्षित्रोः" इति चामरः ।

प्रहर्षिणी वृत्तम्—"त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्" इति लक्षणात् ॥३२॥

(भ्ह) राजेति । मामेव जगत्यद्वितीयवीरमेवेत्याशयः, उद्दिशति लक्ष्यीकृत्य

---

নেপথ্যে। এই আমি ব্যাঘ্রের ন্যায় নূতন-কণ্ঠ-রুধির পিপাসু হইয়া পশুর ন্যায় তোমাকে আত্মরক্ষায় যত্নবান্ অবস্থায় হত্যা করিতেছি। পীড়িতদিগের ভয় দূর করিবার জন্য ধনুর্দ্ধারী দুষ্মন্ত, (যদি পারেন, তবে) তোমার এখন রক্ষক হউন ॥৩২॥

(१) मामुद्दिशति । तिष्ठ कुणपाशद !…न भविष्यसि । शार्ङ्गमारोप्य । वेत्रवति ! सोपानमार्गम्…।

कञ्चुकी। इत इतो देवः (१)। (ञ)

सर्वे सत्वरमुपसर्पन्ति। (ट)

राजा। समन्तादवलोक्य। अये! शून्यं खल्विदम्। (ठ)

नेपथ्ये। भो! परित्ताअहि परित्ताअहि। अहं तुमं पेक्खामि, तुमं मं ण पेक्खसि। मज्जारगहिदो उन्दुरु विअ णिरासोह्मि जीविदे (२)। (ड)

ब्रवीति। कौणपापसद! हे राक्षसाधम! न भवसि मम हन्तव्य इति शेषः काकुवशात् प्रश्नो गम्यते; तेन हन्तव्यो भवस्येवेति भावः। सोपानमार्गं मेघच्छन्न-प्रासादस्येत्यर्थः। आदेशय प्रदर्शय।

"राक्षसः कौणपः क्रव्यात्" इत्यमरः।

(ञ) कञ्चुकीति। इत इतः अनेनानेन पथा, देव आगच्छत्विति शेषः।

(ट) सर्व इति। उपसर्पन्ति मेघच्छन्नागारस्य उपरितलं यान्ति।

(ठ) राजेति। अयि इत्याश्चर्ये। इदं स्थानम्, शून्यम्, अतः क एवमाचरति को वा हन्तव्य इति भावः।

(ड) नेपथ्य इति। मार्जारगृहीतो बिड़ालाक्रान्तः। जीविते जीवने।

(ঝ) রাজা। (ক্রোধের সহিত) আমাকে লক্ষ্য করিয়াই বলিতেছে! আঃ রাক্ষসাধম! থাক্ থাক্; তুই আমার বধ্য নহিস্ কি? (ধনুতে গুণ আরোপণ করিয়া) পার্ব্বতায়ন! সিঁড়ির পথ দেখা[illegible]।

(ঞ) কঞ্চুকী। মহারাজ এই এই পথে আসুন।

(ট) (সকলে তাড়াতাড়ি মেঘচ্ছন্নপ্রাসাদের উপরের তলায় গেল।)

(ঠ) রাজা। (সকল দিক্ দেখিয়া) ওহে! এস্থান যে শূন্য।

(१) क्वचित् अयि इति नास्ति। (२) नेपथ्ये। अविहा अविहा। अहं अत्तभवन्तं पेक्खामि। तुमं···। बिड़ालग्गहिदो मूसओ विअ णिरासोह्मि जीए संवुत्तो।

রাজা। ভোস্তিরস্করিণীগর্বিত! মদীয়মস্ত্রমপি ত্বাং ন পশ্যতি ?। স্থিরো ভব, মা চ তে বয়স্যসম্পর্কাদ্বিশ্বাসোঽভূত্। এষ তমিষুং সন্দধে (১)। (ঢ)

যো হনিষ্যতি বধ্যং ত্বাং রক্ষ্যং রক্ষিষ্যতি দ্বিজম্।
হংসো হি ক্ষীরমাদত্তে তন্মিশ্রা বর্জয়ত্যপঃ ॥২২॥

ইতি শস্ত্রং সন্ধত্তে। (ণ)

(ড) ভোঃ! পরিত্রায়স্ব পরিত্রায়স্ব। অহং ত্বা প্রেক্ষে, ত্বং মাং ন প্রেক্ষসে। মার্জারগৃহীত ইন্দুর ইব নিরাশোঽস্মি জীবিতে।

---

(ঢ) রাজেতি। তিরস্করিণ্যা দেহস্য অদৃশ্যত্বসম্পাদিকয়া বিদ্যয়া গর্বিত! অজ্ঞানগর্ব!। তব তিরস্করিণীবশাদহং ন পশ্যাম্যেবেতি অপিশব্দস্যার্থঃ। ন পশ্যতীতি কাকুবশাৎ পশ্যত্যেবেত্যর্থঃ। বয়স্যসম্পর্কাৎ মাধব্যদেহসংযোগাৎ হেতোঃ, তে তব বিশ্বাসো মা ভূৎ বয়স্যশরীরে পতনশঙ্কয়া দুষ্মন্তো বাণং নিক্ষেপ্তুং ন শক্ষ্যতীতি প্রত্যয়ো ন ভবতু। তৎকারণমাহ এষ ইতি। ইষুং বাণম্।

য ইতি। য ইষুঃ, বধ্য বিনা কারণং ব্রহ্মহত্যাপ্রবৃত্তত্বাৎ বধযোগ্যং ত্বাম্ হনিষ্যতি; রক্ষ্যম্ অপরাধাভাবাৎ অবশ্যরক্ষণীয়ম্, দ্বিজং ব্রাহ্মণং মাধব্যম্, রক্ষিষ্যতি।

---

(ড) নেপথ্যে। সখে! রক্ষা কর, রক্ষা কর। আমি তোমাকে দেখিতেছি, কিন্তু তুমি আমাকে দেখিতেছ না। বিড়ালধৃত মূষিকের ন্যায় আমি জীবনে নিরাশ হইয়াছি।

(ঢ) রাজা। ওহে লুক্কায়িত করার বিদ্যায় দাম্ভিক! আমার অস্ত্রও কি তোমায় দেখে না ? স্থির হও সখার দেহসম্পর্কবশতঃ তুমি রক্ষা পাইবে এ বিশ্বাস যেন তোমার না হয়। এই আমি সেই বাণ সন্ধান করিতেছি।

---

(১) রাজা। ভোস্তীরস্করিণীগর্বিত! মদীয়ং শস্ত্রং ত্বাং দ্রক্ষ্যতি। এষ তমিষুং সন্দধে। ইতি ক্বচিৎ পাঠঃ, ক্বচিৎ ...বয়স্যসম্পর্কাদ্বিশ্বাসোঽভূৎ ইতি পাঠঃ।

ततः प्रविशति मातलिर्विदूषकश्च (१) ।

मातलिः । आयुष्मन् ! (२) । (त)

कृताः शरव्यं हरिणा तवासुराः,
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणाः शराः ॥३४॥

ननु संयुक्तयोर्द्वयोरेकस्य ग्रहणम् अन्यस्य च वर्जनम् एकेनाशक्यमेव कर्त्तुमित्याह हंस इति । हि तथाहि, हंसः स्वनामप्रसिद्धः पक्षिविशेषः, क्षीरं दुग्धम्, आदत्ते जलमध्यादुद्गृह्णाति, किन्तु तन्मिश्राः क्षीरयुक्तपूर्वाः, अपो जलानि, वर्जयति त्यजति । तद्वदिति भावः ।

अत्र श्रौतोपमालङ्कारः ।

अहो ! कविना ईदृशत्वरासमये दुष्मन्तेन कवित्वं प्रकटयता आत्मकवित्वं व्याहतीकृतमिव प्रतिभाति ॥३३॥

(ण) इतीति । अस्यते हिंस्यते अनेनेति अस्त्रं बाणमेव, सन्धत्ते धनुषि योजयति ।

(त) मातलिरिति । आयुष्मन् ! हे प्रशस्तायुःशालिन् ! । तदानीं दुष्मन्तस्य रथित्वाभावेऽपि तद्योग्यत्वात् आत्मनः सारथित्वाच्च आयुष्मन्निति सम्बोधनं सङ्गतमेव "आयुष्मन् रथिनं सूतः" इति साहित्यदर्पणात् ।

যে বাণ, বধ্য বলিয়া তোমাকে বধ করিবে, রক্ষ্য বলিয়া ব্রাহ্মণকে রক্ষা করিবে। দেখ—হংস দুগ্ধ গ্রহণ করে, কিন্তু তৎসংযুক্ত জল পরিত্যাগ করে ॥৩৩॥

(ণ) ( এই বলিয়া অস্ত্র সন্ধান করিলেন। )

তদনন্তর মাতলি ও বিদূষকের প্রবেশ।

(ত) মাতলি। আয়ুষ্মন্ !

---

(१) ततः प्रविशति विदूषकमनुसृत्य मातलिः । (२) कुत्रचिदयं पाठो नास्ति ।

**राजा ।** शरश्च नमस्त्रमुपसंहरन् । **अये मातलिः ! स्वागतं देवराजसारथेः ? (१) । (थ)**

कृता इति । हरिणा इन्द्रेण, असुराः, तव शरव्यं कृताः बाणक्षेपलक्ष्यं विहिताः ; अतएव तेषु असुरेषु विषये, इदं शरासनं धनुः, विकृष्यतां बाणक्षेपाय आकृष्यताम् । तथा च सुहृज्जने बन्धुजनं प्रति, सतां सज्जनानाम्, प्रसादेन चित्तनैर्मल्येन सौम्यानि आरक्ततादभावात् सुन्दराणि, चक्षूंषि नयनान्येव पतन्ति ; किन्तु दारुणाः शरा न पतन्ति ।. अतः संहितमपि शरमुपसंहृत्य मयि प्रसादसौम्यं चक्षुरेव पातयेत्याशयः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, नशब्देनैव दारुणशरपातव्यपोहनात् शाब्दी परिसंख्या च अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः । तथा चक्षूंषीति नपुंसक-लिङ्गेन प्रक्रम्य शरा इति पुंलिङ्गप्रयोगात् भग्नप्रक्रमतादोषः, एवं चक्षूंषीत्यनन्तरं भेदबोधकस्तुशब्दो वक्तव्यः, किन्तु नोक्त इति वाच्यानभिधानदोषश्च । अनयोः समाधानाय परार्द्धमेवं पठनीयम्—'पतन्ति हर्षेण सतां सुहृज्जने सुदृष्टयो दारुणहेतयस्तु न ।' इत्यलमितिविस्तरेण ।

असुराः शरव्यं कृता इत्यत्र "उद्देश्यविधेययोरुद्देश्यसमानत्वमाख्यातस्य" इति काशिकोक्तिप्रामाण्यात् असुरा इत्युद्देश्यानुसारेण कृता इति बहुवचनं पुंस्त्वञ्च । आख्यात-स्येति प्रधानक्रियाया इत्यर्थः । तथा "वेदाः प्रमाणम्" इत्यादिवदेव "असुराः शरव्यम्" इत्युभयोरप्यजहल्लिङ्गत्वात् व्यक्तिजातिरूपेण निवक्षितत्वाच्च पुंस्त्वनपुंसकत्वे बहुत्वैकत्वे चेति सर्वं समञ्जसम् ।

"लक्ष्यं लक्षं शरव्यञ्च" इति "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपि-भेकेषु हरिर्ना कपिले त्रिषु ॥" इति चामरः । वंशस्थविलं वृत्तम् ॥३४॥

---

দেবরাজ অসুরদিগকে আপনার বাণের লক্ষ্য নির্দ্দিষ্ট করিয়াছেন ; সুতরাং সেই অসুরগণের প্রতিই এই ধনু আকর্ষণ করুন । বন্ধুজনের প্রতি সজ্জনের প্রসাদ-সুন্দর চক্ষুই পতিত হইয়া থাকে ; কিন্তু ভয়ঙ্কর বাণ নহে ॥৩৪॥

---

(१) राजा । शस्त्रमुपसंहरन् ।···स्वागतं महेन्द्रसारथे ! ।

विदू। भो मणस्सिं! इमिणा अहं पसुमारणं मारिदुं पाविदो, भवं उण इमं साअदेण अहिणन्ददि (१)। (द)

मातलिः। सस्मितम्। आयुष्मन्! श्रूयतां यदर्थमस्मि हरिणा भवत्सकाशं प्रेषितः। (ध)

राजा। अवहितोऽस्मि। (न)

(द) भो मनस्विन्! अनेनाहं पशुमारणं मारयितुं प्राप्तः, भवान् पुनरिमं स्वागतेनाभिनन्दति।

(थ) राजेति। ससम्भ्रमं व्यस्ततया सहितम्। अये इति विस्मये। स्वागतं सुखेनागतं किमिति काकुः।

(द) विदू इति। मनस्विन्! प्रशस्तमनाः!। सोल्लुण्ठनमिदं सम्बोधनम्। तत्कारणमाह अनेनेत्यादि। पशोरिव मारणं यस्मिन् कर्म्मणि तद्यथा तथा। प्राप्तो गृहीतः। अभिनन्दति आद्रियते। इदन्तु महदन्याय्यमिति भावः।

(ध) मातलिरिति। विदूषकोक्त्या कौतुकोदयात् स्मितम्। हरिणा इन्द्रेण।

(न) राजेति। अवहितो भवद्वाक्यं श्रोतुं कृतमनोयोगः।

(থ) রাজা। (ব্যস্ততার সহিত অস্ত্র উপসংহার করতঃ) ও, মাতলি! দেবরাজসারথির শুভাগমন ত?।

(দ) বিদূষক। ও উদারহৃদয়! বলি—এই ব্যক্তি, আমাকে পশুর ন্যায় মারিবার জন্য আক্রমণ করিয়াছিল, আর তুমি ইহাকে স্বাগতপ্রশ্ন করিয়া আদর করিতেছ!।

(ধ) মাতলি। (ঈষৎ হাস্যের সহিত) আয়ুষ্মন্! শুনুন, দেবরাজ যে জন্য আমাকে আপনার নিকট পাঠাইয়াছেন।

(ন) রাজা। মনোযোগী হইলাম।

(१) प्रविश्य विदूषकः। अहं जेण इट्ठिपसुमारं मारिदो, सो इमिणा साअदेण अहिणन्दीअदि।

मातलिः। अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः। (प)

राजा। अस्ति, श्रुतपूर्वो मया नारदात् (१)। (फ)

मातलिः। सख्युस्ते स किल शतक्रतोरवध्यः, (२)
तस्य त्वं रणशिरसि स्मृतो निहन्ता।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिः,
तन्नैशं तिमिरमपाकरोति चन्द्रः ॥३५॥

---

(प) मातलिरिति। कालनेमिस्तदाख्यासुरस्य प्रसूतिः सन्ततिः।

(फ) राजेति। श्रुतपूर्वः स दानवगण इत्यन्वयः।

सख्युरिति। स किल दानवगणः, ते तव सख्युः शतक्रतोरिन्द्रस्य, अवध्यः कुतोऽपि कारणादविनाशनीयः; रणशिरसि समराङ्गने, त्वम्, तस्य दानवगणस्य, निहन्ता स्मृतः शतक्रतुनावधारितः। हन्त! कीयं कथा यत्, इन्द्रेणावध्यमहं हन्तुमर्हामीत्याह उच्छेत्तुमिति। सप्त सप्तयो घोटका यस्य स सप्तसप्तिः सूर्यः, निशाया इदं नैशम्, यत् तिमिरमन्धकारम्, उच्छेत्तुं नाशयितुम्, न प्रभवति न शक्नोति; चन्द्रः तत् तिमिरम्, अपाकरोति नाशयति। तथा च सूर्यापेक्षया न्यूनतेजा अपि चन्द्रो यथा सूर्याविनाश्यं नैशं तिमिरं नाशयति, तथा इन्द्रापेक्षया न्यूनबलोऽपि भवान् इन्द्रावध्यं दुर्जयदानवगणमवश्यमेव निहन्तुं शक्ष्यसि विधिनियमादित्याशयः।

अतएवात्र दृष्टान्तोऽलङ्कारः, प्रहर्षिणी च वृत्तम् ॥३५॥

---

(প) মাতলি। কালনেমির সন্তান কতকগুলি দুর্জ্জয় দানব আছে।

(ফ) রাজা। আছে, আমি পূর্ব্বে নারদের মুখে শুনিয়াছি।

মাতলি। সেই দানবগণ, তোমার সখা ইন্দ্রের অবধ্য; কিন্তু যুদ্ধে তুমিই তাহাদিগের নিহন্তা বলিয়া তিনি মনে করেন। কারণ, সূর্য্য যে অন্ধকার নাশ করিতে সমর্থ হন না, চন্দ্র, রাত্রিতে সেই অন্ধকারকে নাশ করিয়া থাকেন ॥৩৫॥

---

(१) श्रुतपूर्वम्। (२)…शतक्रतोरजय्यः…।

স ভবানাত্তশস্ত্র এবেদানীং দেবরথমারুহ্য বিজয়ায় প্রতিষ্ঠতাম্ (১)। (ব)

রাজা। অনুগৃহীতোঽস্মি অনয়া মঘবতঃ সম্ভাবনয়া। অথ মাধব্যং প্রতি ভবতা কিমেবং প্রযুক্তম্?। (ভ)

মাতলিঃ। সস্মিতম্। তদপি কথ্যতে। কিঞ্চিন্নিমিত্তাদপি মনঃসন্তাপাদায়ুষ্মান্ ময়া বিক্লবো দৃষ্টঃ, পশ্চাৎ কোপয়িতুমায়ুষ্মন্তং তথা কৃতবানস্মি। কুতঃ—(২) (ম)

(ব) স ইতি। আত্তশস্ত্র এব গৃহীতায়ুধ এব। দেবরথম্ ইদং বিমানম্। প্রতিষ্ঠতাং গচ্ছতু, "সমবপ্রবিভ্যঃ" ইত্যাত্মনেপদম্।

(ভ) রাজেতি। মঘবত ইন্দ্রস্য, সম্ভাবনয়া সম্মাননয়া। প্রশ্নে অথশব্দঃ। এবং গ্রীবাপীড়নম্।

"ইন্দ্রো মরুত্বান্ মঘবা" ইত্যমরঃ।

(ম) মাতলিরিতি। মাধব্যপীড়নঘটনায়া অকিঞ্চিৎকরত্বসূচনায় স্মিতমিতি বোধ্যম্। কিঞ্চিদস্মাভিরজ্ঞাতং নিমিত্তং কারণং যস্য তস্মাৎ। আয়ুষ্মান্ প্রশস্তায়ুঃশালী ভবান্, বিক্লবঃ স্বভাবাদন্যরূপঃ শোকাকুল ইত্যর্থঃ, পশ্চাৎ দর্শনানন্তরম্, আয়ুষ্মন্তং ভবন্তম্, তথা মাধব্যস্য গ্রীবাপীড়নম্।

(ব) সেই আপনি, এখন সমস্ত অস্ত্র গ্রহণপূর্ব্বক দেবরথে আরোহণ করিয়া, অসুরজয়ের জন্য চলুন।

(ভ) রাজা। ইন্দ্রের এই সম্মানে অনুগৃহীত হইলাম। আপনি মাধব্যের প্রতি এরূপ করিলেন কেন?।

(ম) মাতলি। (ঈষৎ হাস্যের সহিত) তাহাও বলিতেছি। কোনও কারণে মনের সন্তাপে আপনাকে আমি শোকাকুল দেখিয়াছিলাম, পরে আপনাকে ক্রুদ্ধ করিবার জন্য, সেইরূপ করিয়াছি। কারণ,

(১)···ইদানীং তমৈন্দ্রং রথম্···। (২) মাতলিঃ। তদপি কথ্যতে।···বিক্লবো দৃষ্টঃ।

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः (१) ॥२६॥

राजा । युक्तमनुष्ठितं भवद्भिः । विदूषकं प्रति । वयस्य ! अनतिक्रमणीया दिवस्पतेराज्ञा, तद्गच्छ, परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि—(य)

ज्वलतीति । अग्निः दाह्याभावात् निर्वाणप्रायो वह्निः, चलितं चुल्ल्यादौ पुनर्दानात् सञ्चरितम् इन्धनं काष्ठं यस्मिन् स तादृशः सन्, काष्ठेन ताड़ितः सन्नित्यर्थः, ज्वलति पुनर्दीप्यते ; तथा पन्नगः सुस्थितोऽपि सर्पः, विप्रकृतः केनापि ताड़ितः सन् फणां कुरुते स्वपराक्रममाविष्करोतीति तात्पर्य्यम् । तेजस्वी सत्यपि तेजसि कुतोऽपि कारणात् लीनप्रायतेजस्को जनः, संक्षोभात् उद्वेलनात् कुतोऽपि उत्तेजनां प्राप्येत्यर्थः, प्रायो बाहुल्येन, तेजः स्वपराक्रमम्, प्रतिपद्यते प्राप्नोति आविष्करोतीति तात्पर्य्यम् । तथा च अस्य ते वयस्यस्य समुत्पीड़नेनोत्तेजनावशात् त्वमपि पुनस्तेजः प्राप्त एवेत्याशयः ।

अत्र अग्नेर्ज्वलनं दीप्तिः, तेजस्विनस्तेजःप्राप्तिस्तु पराक्रमप्रकाश इति धर्म्मभेदे बिम्बप्रतिबिम्बभावबोधनात् दृष्टान्तः ; पन्नगस्य फणाकरणं पराक्रमप्रकाशः, तेजस्विनस्तेजःप्राप्तिरपि पराक्रमप्रकाश एवेति पराक्रमप्रकाशरूपैकधर्म्मस्य वाक्यभेदेन पृथङ्-निर्देशात् प्रतिवस्तूपमा ; तथा अप्रस्तुततेजस्विसामान्यात् प्रस्तुततेजस्विदुष्मन्तरूपविशेष-प्रतीतेरप्रस्तुतप्रशंसा च, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः । प्रायःपदेन क्वाचित्कम्-आदीनां व्यावृत्तिः ।

"तेजो दीप्तौ प्रभावे च स्यात् पराक्रमरेतसोः" इति मेदिनी ।

संक्षोभादिति ल्यब्लोपे पञ्चमी । आर्य्या जातिः ॥२६॥

অগ্নি, কাষ্ঠসন্তাড়িত হইলে জ্বলিতে থাকে এবং সর্প প্রহৃত হইলে ফণা ধরিয়া থাকে। এইরূপ তেজস্বী লোক, উত্তেজনা পাইলে, প্রায়ই আপনার তেজ প্রকাশ করে ॥৩৬॥

(१)…क्षत्रं…। प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः ।

त्वन्मतिः केवला तावत् प्रतिपालयतु प्रजाः (१) ।
अधिज्यमिदमन्यस्मिन् कर्म्मणि व्यापृतं धनुः ॥३७॥

(य) राजेति । युक्तमुचितम् । अन्यथा मम तेजःप्राप्तिर्न स्यादिति भावः ।

"अथ माधव्यं प्रति" इत्यारभ्य एतदन्तसन्दर्भे शक्तिर्नाम विमर्शसन्धेरङ्गम्—"शक्तिः पुनर्भवेत् । विरोधस्य प्रशमनम्" इति दर्पणलक्षणात् ।

दिवस्पतेः स्वर्गाधिपतेरिन्द्रस्य । परिगतः अवगतः अर्थः एतद्वृत्तान्तो येन तं तादृशं कृत्वा एतद्वृत्तान्तमभिधायेत्यर्थः । अमात्यपिशुनं पिशुननामानं मन्त्रिणम् ।

किं ब्रवीमीत्याह त्वन्मतिरिति । केवला तावत् एकैव मद्धनुर्निरपेक्षेत्यर्थः । त्वन्मतिस्तव बुद्धिः, प्रजा मम राज्यवासिनः सर्वान् जनान्, प्रतिपालयतु रक्षतु । ननु त्वद्धनुरिदानीं किं कर्त्तव्यमित्याह अधिज्यमिति । अध्यारूढा ज्या यत्र तदधिज्यम् आरोपितगुणम्, इदं मदीयं धनुः, अन्यस्मिन् कर्म्मणि दुर्ज्जयदानवगणविजयकार्य्ये, व्यापृतमासक्तम् ।

मन्त्रिणो बुद्धिर्मम च धनुः एतदुभयं मिलित्वैव राज्यं परिपालयति ; अत्र च मदीयधनुषो देवकार्य्यासक्ततया केवला मन्त्रिणो बुद्धिरेव राज्यं परिपालयन्ती युद्धावश्यकत्वेऽपि कौशलावलम्बनेनैव शत्रुपक्षं विजयतामिति सरलार्थो भावार्थश्च ।

"यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इति "एके मुख्यान्यकेवलाः" इति चामरः ॥३७॥

(য) রাজা। আপনি উপযুক্ত কার্য্যই করিয়াছেন। ( বিদূষকের প্রতি ) বয়স্য! দেবরাজের আদেশ অলঙ্ঘনীয়; অতএব যাও, আমার এই বৃত্তান্ত জানাইয়া, আমার বাক্যানুসারে মন্ত্রী পিশুনকে বল—

একমাত্র আপনার বুদ্ধিই, সমস্ত প্রজা পালন করুক; আর গুণযুক্ত এই ধনু অন্য কার্য্যে ব্যাপৃত হইল ॥৩৭॥

(१)···परिपालयतु···।

विदू। जं भवं आणवेदि। इति निष्क्रान्तः। (र)

मातलिः। आयुष्मान् रथमारोहतु। (ल)

राजा। तथा करोति (१)। (व)

इति निष्क्रान्ताः सर्वे। (श)

## षष्ठोऽङ्कः ॥०॥

(र) यद्भवानाज्ञापयति।

(ल) मातलिरिति। रथम् इमं देवराजविमानम्।

(व) राजेति। तथा रथारोहणम्।

अहो! षष्ठाङ्कस्य कलेवरबह्निमकस्मात् पश्यता अतीवत्वरमाणेन कविना देवीभिः सह विरहारम्भकालीनप्रेमालापं गुरुजनचरणवन्दनं देवतानमस्कारादिकञ्च दुष्मन्तमकारयता उद्यानादेव च तं सहसा स्वर्गं प्रस्थापयता विजययात्राकालीनशिष्टरीतिः परिहृतेव प्रतिभाति।

हन्त! यत्र स्वर्गलोके मर्त्यवासिनामीदृशी गतागतिः प्रतिपत्तिश्च पूर्वमासीत्, तमिदानीं स्वर्गलोकमनुनातुमपि प्रकृष्टं साधनं नासादयन्ति तत्त्वानुसन्धित्सवः।

(श) इतीति। दुष्मन्त-मातलि-कञ्चुकिनां बहुत्वात् बहुवचनं सर्वशब्दश्च सङ्गच्छत इति ध्येयम्।

इति महामहोपाध्याय-भारताचार्य्य-श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायाम् अभिज्ञानशकुन्तलटीकायामभिज्ञानकौमुद्यां षष्ठाङ्कविवरणं समाप्तम् ॥०॥

---

(র) বিদূষক। তুমি যাহা আদেশ কর। ( এই বলিয়া চলিয়া গেল। )

(ল) মাতলি। আপনি রথে আরোহণ করুন।

(ব) রাজা। তাহাই করিলেন।

(শ) ( ইহার পর সকলে চলিয়া গেলেন। )

## ষষ্ঠ অঙ্ক ॥০॥

(१) राजा। रथारोहणं नाटयति।

# সপ্তমোঽঙ্কঃ।

—০:*:০—

ততঃ প্রবিশত্যাকাশবর্ত্মনা রথারূঢ়ৌ রাজা মাতলিশ্চ (১)। (ক)

**রাজা। মাতলে! অনুষ্ঠিতনির্দেশোঽপি মঘবতঃ সৎক্রিয়াবিশেষাদনুপযুক্তমিবাত্মানং সমর্থয়ে। (খ)**

(ক) তত ইতি। রথারূঢ়ৌ রথাকারবিমানারূঢ়ঃ, ঘোটকচালনীয়স্য রথস্য আকাশবর্ত্মনা গমনাসম্ভবাৎ।

এতেন ইদানীন্তনং পাশ্চাত্যদেশনির্ম্মিতং বিমানম্ অদ্যাপি তাদৃশোন্নতদেশমারোঢ়ুমশক্ততয়া তদানীন্তনবিমানসদৃশীমুন্নতিং নালভতেতি প্রতীয়তে।

(খ) রাজেতি। অনুষ্ঠিতনির্দেশোঽপি দুর্জয়দানবগণবিজয়াৎ প্রতিপালিতাদেশোঽপি, আত্মানং স্বম্, মঘবত ইন্দ্রস্য, সৎকারবিশেষাৎ সম্মানাতিরেকমপেক্ষ্য, অনুপযুক্তমিব অযোগ্যমিব, সমর্থয়ে মন্যে, সামান্যমানবত্বাত্তাদৃশসম্মানযোগ্যো নাহমিতি ভাবঃ।

সৎক্রিয়াবিশেষাদিতি ল্যব্লোপে পঞ্চমী।

ইতঃ প্রভৃতি গ্রন্থসমাপ্তিপর্য্যন্তো নির্বহণসন্ধিঃ। তথা চাত্র শকুন্তলা প্রাপ্তিরূপং কার্য্যং নামার্থপ্রকৃতিঃ। যথা দর্পণে—

"অপেক্ষিতন্তু যৎ সাধ্যমারম্ভো যন্নিবন্ধনঃ।
সমাপনন্তু যৎসিদ্ধ্যৈ তৎ কার্য্যমিতি সম্মতম্॥"

দুষ্মন্তস্য পুত্রেণাপি সহ স্ত্রিয়া লাভাৎ ফলাগমো নাম কার্য্যাবস্থা নিবদ্ধা। যথা তত্রৈব—

"সাবস্থা ফলযোগঃ স্যাদ্যঃ সমগ্রফলোদয়ঃ।"

(ক) তদনন্তর আকাশপথে রথারূঢ় অবস্থায় রাজা ও মাতলির প্রবেশ।

---

(১) আকাশযানেন রথাধিরূঢ়ঃ…।

मातलिः। स्मितम्। आयुष्मन्! उभयत्राप्यसन्तोषमवगच्छ। कुतः—(१) (ग)

उपकृत्य हरेस्तथा भवान्
लघु सत्कारमवेक्ष्य मन्यते।
गणयत्यवदानसम्मितां
भवतः सोऽपि न सत्क्रियामिमाम् (२) ॥१॥

तथा यथास्थाननिविष्टाना मुखसन्धिप्रभृतिविषयाणामेव शकुन्तलाप्राप्त्युपायत्वेन प्रदर्शनमुन्नेयम्। यथा तत्रैव—

"बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ॥"

अस्य च सन्धिप्रभृतीनि चतुर्दशाङ्गानि यथास्थानं वक्ष्यन्ते।

(ग) मातलिरिति। उभयोरप्यसन्तोषदर्शनेन कौतुकात् स्मितम्। उभयत्रापि त्वयि मघवति च, असन्तोषम् अतिरिक्तेनापि स्वस्वकार्य्येण सन्तोषानुदयम्।

उपेति। भवान्, हरेरिन्द्रस्य, तथा तादृशम् उपकृत्य अवध्यासुरवधरूपं महान्तमुपकारं विधाय, सत्कारं तदुपकारसन्तोषितेन इन्द्रेण कृतं सम्मानञ्च, अवेक्ष्य दृष्ट्वा, लघु मन्यते इन्द्रकृतसम्मानापेक्षया आत्मकृतमुपकारं स्वल्पं सम्भावयति। अतएव भवतः असन्तोष इति भावः। तथा स इन्द्रोऽपि, इमाम् आत्मकृताम्, सत्क्रियां भवतः

(খ) রাজা। মাতলি! আদেশ পালন করিয়া থাকিলেও, দেবরাজ যে বিশেষ সম্মান করিয়াছেন, তাহার নিকট আত্মাকে অযোগ্য বলিয়া মনে করিতেছি।

(গ) মাতলি। (ঈষৎ হাস্য করিয়া) আয়ুষ্মন্! উভয়েরই অসন্তোষ জানিবেন। কারণ—

(१)…उभयमप्यपरितोषं समर्थये। (२) प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान्। गणयत्यवदानविस्मितो भवतः सोऽपि न सत्क्रियागुणान्।

राजा। मातले! मा मैवम्। स खलु मनोरथानामपि दूरवर्त्ती, यो विसर्जनावसरे सत्कारः। मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य (१) (घ)

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा ॥२॥

सम्मानम्, भवतः अवदानेन असुरवधात्मकातीतकर्म्मणा सम्मितां तुल्यां तदुदयुक्तामित्यर्थः न गणयति न मन्यते। अतस्तस्यापि असन्तोष एवेत्याशयः।

"अवदानं कर्म्म वृत्तम्" इत्यमरः। सुन्दरी वृत्तम् ॥१॥

(घ) राजेति। मा मैवं ब्रूहीति शेषः। विसर्जनावसरे स्वराजधानीं प्रति मम प्रस्थानकाले, यः सत्कारः सम्माननम् आसीदिति शेषः, स खलु सत्कारः, मनोरथानामपि दूरवर्त्ती ममाभिलाषाणामपि अविषयः। हि यस्मात्, दिवौकसाम् अन्येषां देवाना समक्षम् अक्ष्णोः समीपे, अर्द्धासने उपवेशितस्य मम, मन्दारमाला पिनद्धेति श्लोकस्थेनान्वयः।

अन्तरिति। अन्तिकस्थं निकटवर्त्तिनम्, अन्तर्गता चित्तस्थिता न पुनर्वाचापि

আপনি দেবরাজের সেইরূপ উপকার করিয়া এবং তৎকৃত সম্মান দেখিয়া, তাহার নিকট সেই উপকারকে লঘু বলিয়া মনে করিতেছেন; আবার দেবরাজও, নিজকৃত এই সম্মানকে, আপনার কৃত উপকারের তুল্য হইয়াছে বলিয়া মনে করেন নাই ॥১॥

(ঘ) রাজা। মাতলি! না না, এরূপ বলিবেন না। বিদায় করিবার সময়ে যে সম্মান করিয়াছেন, তাহা আমার আশারও অগোচর। কারণ, দেবগণের সমক্ষে আমাকে অর্দ্ধাসনে বসাইলেন—

(१) मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः।

মাতলিঃ। কিমিব নায়ুষ্মানমরেশ্বরাদর্হতি। পশ্য—(১) (ঙ)

সুখপরস্য হরেরুভয়ৈঃ কৃতং
ত্রিদিবমুদ্ধৃতদানবকণ্টকম্।
তব শরৈরধুনা নতপর্বভিঃ
পুরুষকেশরিণশ্চ পুরা নখৈঃ ॥৩॥

প্রকটিতেত্যর্থঃ প্রার্থনা তস্যা মালায়া এব যাচ্ঞা যস্য তম্, জয়ন্তং জয়ন্তনামানং নিজপুত্রম্, উদীক্ষ্য দৃষ্ট্বা, কৃতস্মিতেন তৎপ্রার্থনায়া অপি জ্ঞানেন কৌতুকোদয়াৎ কৃত-মৃদুহাস্যেন, হরিণা ইন্দ্রেণ, আমৃষ্টস্য সংস্পৃষ্টস্য বক্ষোহরিচন্দনস্য বক্ষোলিপ্তচন্দন-বিশেষস্য অঙ্কচিহ্নং যস্যাঃ সা, এতেন সৌরভাধিক্যং ব্যজ্যতে, মন্দারমালা মন্দার-কুসুমস্রক্, পিনদ্ধা মম কণ্ঠে বদ্ধা। অতএব সর্বেষাং দেবানাং কিং বহুনা স্বপুত্রস্য চ সমীপে ঈদৃশসম্মানকারণং মমাশাতীতমেবাসীদিতি ভাবঃ।

ইন্দ্রবজ্রোপেন্দ্রবজ্রয়োর্মেলনাদুপজাতির্বৃত্তম্ ॥২॥

(ঙ) মাতলিরিতি। আয়ুষ্মান্ প্রশস্তায়ুঃশালী ভবান্, অমরেশ্বরাৎ দেবরাজাৎ, কিমিব নার্হতি কিং বস্তু প্রাপ্তুং ন যোগ্যো ভবতি, অপি তু সর্বমেবেত্যর্থঃ। কথমিত্যাহ পশ্যেতি।

নিকটে নিজের পুত্র জয়ন্ত উপস্থিত ছিলেন, তাঁহার মনেও ঐ মন্দারমালাটী প্রার্থনা করিবার ইচ্ছা ছিল; এই অবস্থায় জয়ন্তের প্রতি দৃষ্টিপাত করিয়া, দেবরাজ ঈষৎ হাস্য করিলেন, পরে, নিজের বুকে যে হরিচন্দন লিপ্ত ছিল, তাহাতে সংলগ্ন হওয়ায় তাহার চিহ্ন লাগিয়াছিল, এইরূপ সেই মন্দারকুসুমের মালা, নিজের কণ্ঠ হইতে আনিয়া, দেবরাজ আমার কণ্ঠে পরাইয়াছিলেন ॥২॥

(ঙ) মাতলি। আপনি দেবরাজের নিকট হইতে কি না পাইতে পারেন? দেখুন—

(১) কিমিব নাম···।

राजा । तव खलु शतक्रतोरेव महिमा । पश्य—(१) (च)

सुखेति । अधुना, नतपर्वभिः किञ्चिदाकुञ्चितग्रन्थिदेशैः, तव शरैर्बाणैः, पुरा पूर्वकाले च, नतानि किञ्चित्कुटिलानि पर्वाणि अङ्गुलिपर्वभागा येषां तैः, पुरुषश्चासौ केशरी चेति तस्य पुरुषकेशरिणो नरसिंहरूपिणो नारायणस्य, नखैर्नखरैः, एभिरुभयैः, सुखपरस्य केवलसुखभोगासक्तस्य न तु युद्धादौ कठिनकार्य्येऽपि प्रवर्त्तितुमिच्छत इत्याशयः, हरेरिन्द्रस्य, त्रिदिवं स्वर्गधाम, उद्धृतं विनाशेनापसारितं दानव एव कण्टकं यस्य तत् तादृशं कृतम्, एकत्र कालनेमिप्रभृतिदुर्जयदानवगणहननात् अन्यत्र हिरण्यकशिपु-विनाशनाच्चेति भावः ।

अत्र दुष्मन्तस्य प्रस्तुततया तच्छराणामपि प्रस्तुतानाम् अप्रस्तुतानाञ्च पुरुषकेशरि-नखानां कृतमित्येकक्रियया अभिसम्बन्धाद्दीपकमलङ्कारः । तथा प्रधानस्य दानवकण्टको-द्धरणस्य समासे गुणीभावात् विधेयाविमर्शदोषः ; स च 'सुखपरस्य हरेरुभयैः किल त्रिदिवदानवकण्टकमुद्धृतम्' इति पाठेन समाधेयः ।

"राश्यपेक्षया उभयशब्दो व्यक्त्यपेक्षया बहुवचनम्" इति कातन्त्रवृत्तौ दुर्गसिंहः । ननु "स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः" इत्यमरवाक्ये साहचर्य्येण त्रिदिवशब्दस्य पुंस्त्वनिश्चयात् कथमत्र नपुंसकनिर्द्देश इति चेन्न त्रयाणां ब्रह्मविष्णुमहेश्वराणां दिवं स्वर्ग इति त्रिदिवम्, तथा च मेदिनी—"द्यौः स्त्री स्वर्गे च गगने दिवं क्लीवं तयोः स्मृतम् ।"

द्रुतविलम्बितं वृत्तम् ॥३॥

(च) राजेति । तव मत्कर्त्तृकदानवहननेऽपि, शतक्रतोरेव इन्द्रस्यैव, महिमा प्रभावः, प्रयोजक इति शेषः ।

---

বর্ত্তমানে আপনার আনতপর্ব শরসমূহ ; আর পূর্বে নরসিংহরূপী নারায়ণের নখ ;—এই দুই দলে, ভোগবিলাসাসক্ত দেবরাজের স্বর্গরাজ্য হইতে দানব-কণ্টক উদ্ধার করিয়াছে ॥৩॥

(চ) রাজা । সে বিষয়েও দেবরাজের মাহাত্ম্যই কারণ । দেখুন—

---

(१) अत्र खलु…महिमा स्तुत्यः ।

सिध्यन्ति कर्म्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम्।
किं प्राभविष्यदरुणस्तमसां वधाय (१)
तञ्चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥४॥

मातलिः। सदृशं तवैतत्। श्लोकमन्तरमतीत्य। आयुष्मन्! इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः (२)। (छ)

सिध्यन्तीति। नियोक्तुं शक्या नियोज्या आयत्ता जनाः, महत्स्वपि गुरुतरेष्वपि कर्म्मसु, यत् सिध्यन्ति सिद्धा भवन्ति तानि कर्म्माणि साधयितुमर्हन्तीत्यर्थः, तम्, ईश्वराणां प्रभूणाम्, सम्भावनायाः तान् नियोज्यान् प्रति बहुमानकरणस्य गुणं फलम्, अवेहि जानीहि। "अरुणस्तमसां हन्ता" इति प्रवादात्मकार्थान्तरन्यासेनोक्तमर्थं समर्थयति किमिति। अरुणः सूर्य्यसारथिः, तमसामन्धकाराणाम्, वधाय नाशाय, किं प्राभविष्यत् किं प्रभुः समर्थः अभविष्यत्, चेत् यदि, सहस्रकिरणः सूर्य्यः, तमरुणम्, धुरि अग्रे, न अकरिष्यत्, कथमपि नेत्यर्थः। तथा च सूर्य्यस्यानुग्रहादरुणेन तमोराशिरिव मयापि इन्द्रस्यानुग्रहादेव दानवगणो विनाशित इति भावः।

अतएवात्र अप्रस्तुतात् नियोज्यसामान्यात् प्रस्तुतस्य दुष्मन्तरूपनियोज्यविशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासश्च, अनयोः परस्पर-निरपेक्षतया संसृष्टिः।

मनोहरोऽयं श्लोकः। वसन्ततिलका वृत्तम् ॥४॥

(छ) मातलिरिति। एतत् वाक्यम्, तव महात्मन इत्याशयः, सदृशमनुरूपम्,

অধীনস্থ ব্যক্তিরা যে গুরুতর কার্য্যেও সিদ্ধিলাভ করে, সেটা, প্রভুদেরই সংবর্দ্ধনার গুণ বলিয়া জানিবেন। কারণ, অরুণ কি অন্ধকার নাশ করিতে সমর্থ হইতেন, যদি সূর্য্য তাঁহাকে সম্মুখে না রাখিতেন ॥৪॥

---

(१)··किं वाभविष्यदरुणस्तमसां विभेत्ता। (२)···सदृशमेवैतत्··।

विच्छित्तिशेषैः सुरसुन्दरीणां
वर्णैरमी कल्पलतांशुकेषु।
सञ्चिन्त्य गीतिक्षममर्थबन्धं (१)
दिवौकसस्त्वच्चरितं लिखन्ति ॥५॥

राजा। मातले! असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता न लक्षितोऽयं प्रदेशो मया : तत् कतमस्मिन् पथि वर्त्तामहे मरुताम् (२)। (ज)

विनयनम्रता महात्मन एव सम्भवादिति भावः। स्तोकमन्तरं किञ्चिद्दूरम्। इतः निर्द्दिश्यमानायामस्यां दिशि, नाकपृष्ठप्रतिष्ठितस्य स्वर्गोपरिस्थितस्य, सौभाग्यं महाभाग्यवत्त्वम् ; अन्यथा स्वर्गोपर्य्येव महादरलाभासम्भव इत्याशयः।

उद्दिष्टं सौभाग्यं दर्शयति विच्छित्तीति। अमी दूरे दृश्यमानाः, दिवौकसो देवाः, गीतिक्षमं गानयोग्यम्, अर्थं बध्नाति आत्मना सह सम्बध्नातीति अर्थबन्धः पदसमूहस्तम्, सञ्चिन्त्य चिन्तापूर्वकं रचयित्वा, सुरसुन्दरीणां देवाङ्गनानाम्, विच्छित्तिशेषैः अङ्गरागावशिष्टैः, वर्णैः रङ्गैः, कल्पलतांशुकेषु कल्पलताभ्य उत्पन्नेषु वस्त्रेषु, अतएव परमादरणीयेष्वपीत्याशयः, त्वच्चरितं परोपकारादिकं तव चरित्रम्, लिखन्ति ; आत्मयशसः सौभाग्यं विना देवतानामन्तिके ईदृशो आदरप्राप्तिर्न स्यादिति भावः। उपजातिर्वृत्तम् ॥५॥

(छ) মাতলি। আপনার পক্ষে এই উত্তর উপযুক্ত বটে। (একটু দূরে যাইয়া) আয়ুষ্মন্! এই দিকে দেখুন স্বর্গের উপরে প্রতিষ্ঠিত স্বকীয় যশের কি সৌভাগ্য।

ঐ দেবতারা, গান করিবার যোগ্য পদাবলী রচনা করিয়া, দেবরমণীগণের অঙ্গরাগাবশিষ্ট বর্ণদ্বারা, কল্পলতার বস্ত্রে আপনার চরিত্র লিখিতেছেন ॥৫॥

(१)···विचिन्त्य गीतक्षममर्थजातम्···।

(२)···अधिरोहता न लक्षितः स्वर्गमार्गः कतमस्मिन्···।

मातलिः । त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्त्तयति चक्रविभक्तरश्मिः ।
तस्य व्यपेतरजसः प्रवहस्य वायो-
र्मार्गो द्वितीयहरिविक्रमपूत एषः (१) ॥६॥

(ज) राजेति । असुरसम्प्रहाराय दानवयुद्धाय उत्सुकेन उत्कण्ठितेन, दिवमधिरोहता तव विमानेनैव स्वर्गमारोहता मया, अयं प्रदेशः, पूर्वेद्युः पूर्वदिवसे, न लक्षितो न दृष्टः । मरुतां वायूनाम् । वायूनां सप्तत्वात् तत्पथानामपि सप्तत्वेनायं प्रश्नः ।

त्रिस्रोतसमिति । यः प्रवहो नाम वायुः, गगने आकाशे प्रतिष्ठा स्थितिर्यस्यास्ताम्, त्रिस्रोतसं गङ्गां मन्दाकिनीमिति यावत्, वहति धारयति ; तथा चक्रेण स्वस्थितज्योतिषां मण्डलेन विभक्ता विभज्य विन्यस्ता रश्मयः किरणा यत्र स तथोक्तो यः प्रवहो वायुः, ज्योतींषि नक्षत्राणि, वर्त्तयति धारयति ; व्यपेतानि भूवाय्वोरुपरि स्थितत्वात् दूरीभूतानि रजांसि यस्मात् तस्य, तस्य प्रवहस्य प्रवहनामकस्य वायोः, एष दृश्यमानः, द्वितीयेन हरेर्वामनरूपिणो नारायणस्य विक्रमेण पादक्षेपेण पूतः पवित्रीकृतः, मार्गः पन्था विद्यत इति शेषः ।

अत्र व्यपेतरजस इत्यनेन तद्वायोर्निर्म्मलत्वं सूचितम्, तेन न अपुष्टार्थत्वदोषः । अतएव राजा अनुपदमेवाह अन्तरात्मा प्रसीदतीति ।

"दीप्तौ दृष्टौ च तारासु ज्योतिःशब्दो निगद्यते" इत्यनेकार्थः ।

---

(জ) রাজা । মাতলি ! পূর্বদিন অসুরগণের সহিত যুদ্ধের জন্য উৎকণ্ঠিত অবস্থায় স্বর্গে উঠিতেছিলাম বলিয়া, এই সমস্ত স্থান আমি লক্ষ্য করি নাই ; অতএব বায়ুর কোন্ পথে আমরা এখন অবস্থান করিতেছি ? ।

মাতলি । যে বায়ু, আকাশগঙ্গাকে ধারণ করিতেছে এবং যে

---

(१) "ज्योतींषि वर्त्तयति च प्रविभक्तरश्मिः । तस्य द्वितीयहरिविक्रमनिस्तमस्कं वायोरिमं परिवहस्य वदन्ति मार्गम् ॥

राजा । अतः खलु मे सबाह्यान्तःकरणोऽन्तरात्मा प्रसीदति ।

रथाङ्गमवलोक्य । मन्ये मेघपदवीमवतीर्णाः स्मः (१) । (ऋ)

सप्तविधान् वायूनाह सिद्धान्तशिरोमणिः—

"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च ।
अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्मात् बाह्यः परावह इमे पवनाः प्रसिद्धाः ॥"

"भूमेर्बहिर्द्वादश योजनानि भूवायुरत्राम्बुदविद्युदाद्यम् ।
तदूर्द्ध्वगो यः प्रवहः स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था ॥
नक्षत्रकक्षा खचरैः समेता यस्मादतस्तेन समाहतोऽयम् ।
भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन ॥"

सूर्य्यसिद्धान्तश्च—"भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः ।
पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥"

वसन्ततिलका वृत्तम् ॥६॥

(ऋ) राजेति । अतः मन्दाकिनीवाहिनो वायोः सम्बन्धात्, बाह्यैश्चक्षुरादिभिः अन्तःकरणैर्मनःप्रभृतिभिश्च सहेति सबाह्यान्तःकरणः, अन्तरात्मा जीवात्मा, प्रसीदति निर्म्मलीभवति । रथाङ्गं चक्रम् । मन्ये मन्ये, मेघानां पदवीं गमनागमनपथम्, अवतीर्णा उपस्थिताः ।

करणान्याह सांख्यकारिका—

"अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥"

বায়ু নক্ষত্রমণ্ডল ধারণ করে, তখন সেই নক্ষত্রমণ্ডল পৃথক্ পৃথক্ ভাবে যে বায়ুর উপরে কিরণ বিন্যস্ত করিয়া থাকে, পার্থিবধূলিশূন্য প্রবহনামক সেই বায়ুর এই পথ, ইহা বামনরূপী নারায়ণের দ্বিতীয় পাদক্ষেপে পবিত্র হইয়াছিল ॥৬॥

---

(१)···मेघपदवीमवतीर्णौ स्वः ।

मातलिः । आयुष्मन् ! कथमवगम्यते ? (१) । (ञ)

राजा । अयमगविवरेभ्यश्चातकैर्निष्पतद्भि-
र्हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः ॥७॥

"अन्तःकरणं त्रिविधं बुद्धिरहङ्कारो मन इति शरीराभ्यन्तरवर्त्तित्वादन्तःकरणम् । दशधा बाह्यमिन्द्रियम्" इति तत्त्वकौमुदी ।

(ञ) मातलिरिति । अवगम्यते मेघपदव्यामवतरणमिति शेषः ।

तदवगतिकारणमाह अयमिति । शीकरैर्मेघस्थैर्जलविन्दुभिः क्लिन्ना आर्द्रीकृता नेमिश्चक्रप्रान्तभागो यस्य स तादृशः, अयं ते तव रथो रथाकारं विमानम्, अगविवरेभ्यः पर्व्वतगावस्थरन्ध्रेभ्यः निष्पतद्भिः मेघजलविन्दुपानाय निर्गच्छद्भिः, चातकैस्तदाख्य-पक्षिविशेषैः, अचिरम् अचिरस्थायिन्यो भासो दीप्तयो यासां तासां विद्युताम्, तेजसा अनुलिप्तैरनुरञ्जितैः, हरिभिश्च घोटकैर्घोटकाकारयन्त्रैश्चेत्यर्थः, वारीणि जलानि गर्भे अभ्यन्तरे येषां तानि वारिगर्भाणि उदराणि अभ्यन्तरावकाशा येषां तेषां तथोक्ता-नाम्, घनानां मेघानाम्, उपरि सन्निहितोर्द्ध्वदेशे, गतं गमनम्, पिशुनयति सूचयति, अन्यथा नेमेः क्लिन्नत्वं हरीणां विद्युदालोकेनानुलिप्तत्वं जलपानाय चातकनिर्गमनञ्च न स्यादिति भावः ।

अत्र घनोपरिगमनसूचनं प्रति प्रथमार्द्धगतकारणद्वयोपन्यासात् समुच्चयोऽलङ्कारः, तथा तत्सूचनं प्रति शीकरक्लिन्ननेमिपदस्यार्थोऽपि हेतुरिति पदार्थहेतुकं काव्यलिङ्गञ्च,

(ঝ) রাজা। এই জন্যই আমার বহিরিন্দ্রিয় ও অন্তরিন্দ্রিয়ের সহিত অন্তরাত্মা প্রসন্ন হইয়াছে। ( রথচক্রের প্রতি দৃষ্টিপাত করিয়া ) আমি মনে করি—আমরা মেঘপথে অবতরণ করিয়াছি।

(ঞ) মাতলি। আয়ুষ্মন্! কি প্রকারে জানিলেন ?।

(१) मातलिः । कथमवगम्यते ।

मातलिः। अथकिम्। क्षणादायुष्मान् स्वाधिकारभूमौ वर्त्तिष्यते (१)। (ट)

राजा। अधोऽवलोक्य। मातले! वेगादवतरणादाश्चर्य्यदर्शनः संलक्ष्यते मनुष्यलोकः। तथाहि—(ठ)

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी,
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः।

तदुभयक्रतविच्छित्त्या च प्रथमाङ्गगतहेतुद्वयेन घनपरिगमनरूपसाध्यस्य ज्ञानादनुमानालङ्कारः।

रथो रथाकारं विमानं हरिभिश्च तदाकारचालकयन्त्रैरित्येव वक्तव्यम्; अन्यथा सामान्यरथस्य वास्तविकघोटकानाञ्च आकाशे गमनासम्भवः; दैवताप्रभावादिति चेत् निष्प्रयोजनं रथाद्युल्लेखनं दैवताप्रभावेण स्वतोऽपि तत्सिद्धेः।

मालिनी वृत्तम् ॥७॥

(ट) मातलिरिति। अथकिमित्येकमेवाङ्गीकारार्थमव्ययम् "अङ्गीकारेऽपि चाथकिम्" इति हारावलीप्रामाण्यात्। स्वाधिकारभूमौ स्वस्वत्वास्पदीभूतमर्त्त्यलोके।

(ठ) राजेति। आश्चर्य्यं दर्शनं यस्य स तादृशः।

রাজা। আপনার এই রথের চক্রগুলির প্রান্তভাগ সকল, জলবিন্দুতে আর্দ্র হইয়া গিয়াছে; এই অবস্থায় এই রথই, পর্বতগাত্রস্থ কোটর হইতে নির্গত চাতকপক্ষী এবং বিদ্যুতের তেজে রঞ্জিত ঘোটকগণদ্বারা জলপূর্ণ মেঘের উপরে গমন সূচনা করিতেছে॥৭॥

(ট) মাতলি। হাঁ। ক্ষণকালের মধ্যেই আপনি, নিজের অধিকৃত মর্ত্ত্যভূমিতে উপস্থিত হইবেন।

(ঠ) রাজা। (নীচের দিকে চাহিয়া) মাতলি! বেগে অবতরণ করিতে থাকায় মনুষ্যলোকটী আশ্চর্য্যই দেখা যাইতেছে।

(१) मातलिः। क्षणादायुष्मन्…।

सन्धानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः, (१)
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ॥८॥

शैलानामिति। मेदिनी पृथिवी, उन्मज्जताम् उद्गच्छताम्, शैलानां पर्वतानाम्, शिखरात् शृङ्गात्, अवरोहतीव अवतरतीव। प्रथममतिदूरतया पर्वतानां पृथगदर्शनात् पृथिवी समतलेवादृश्यत; परन्तु क्रमिकावतरणेनेदानीं पर्वतानां पृथग्दर्शनारम्भात् सा पृथिवी पर्वतशृङ्गादवतरतीवेति प्रतीयत इति सरलार्थो भावार्थश्च। पादपा वृक्षाः, स्कन्धानां शाखोत्पत्तिदेशानाम् उदयात् प्रकाशात्, पर्णाभ्यन्तरेषु लीनतां लुक्कायितत्वम्, विजहति परित्यजन्तीव। पूर्वमतिदूरत्वात् वृक्षाः पर्णाभ्यन्तरेषु लुक्कायिता इवाज्ञायन्त; इदानीन्तु क्रमशः नैकट्येन तेषां स्कन्धदेशा दृश्यन्ते, तेन च ते तल्लुक्कायितभावं त्यजन्तीवेति मन्यते इति स्पष्टार्थो भावार्थश्च। आपगा नद्यः, तनुभागेषु स्वल्पप्रसारदेशेषु, नष्टानामतिदूरत्वाददर्शनं गतानां सलिलानां जलानां व्यक्त्या क्रमशः सान्निध्यात् प्रकाशेन, सन्धानं संयोगमैक्यमिति यावत्, व्रजन्ति प्राप्नुवन्तीव। प्रागतिदूरतया स्वल्पप्रसरदेशेषु जलानामदर्शनात् तत्र नद्यो विच्छिन्ना इव दृष्टाः; इदानीन्तु सान्निध्येन तत्तत्स्वल्पप्रसारदेशेष्वपि जलदर्शनात् ते नद्युभयभागाः संयुक्ता एव प्रतीयन्त इति सरलार्थो भावार्थश्च। तथा उत्क्षिपता भुवनमेवोर्ध्वं निक्षिपता केनापि जनेन, भुवनं जगत्, मत्पार्श्वम्, आनीयत इवेति त्वं पश्य। पूर्वमतिदूरतया भुवनमचलमेवालक्ष्यत, इदानीन्तु वेगेनावतरणात् सान्निध्येन भुवनमुत्क्षिप्तमिव मन्यत इति सरलार्थो भावार्थश्च।

अत्र प्रथमे चतुर्थे च पादे इवशब्दसत्त्वात् वाच्या भावाभिमानिनी क्रियोत्प्रेक्षा, द्वितीये तृतीये च पादे इवशब्दासत्त्वात् प्रतीयमाना तथैव क्रियोत्प्रेक्षा, इत्येतासां परस्परनिरपेक्षतया संसृष्टिः। तथा पश्येति वाक्यान्तरपदस्य केनापीत्यादिवाक्यान्तरे प्रवेशात् सङ्कीर्णतादोषः; स च 'उत्क्षिप्येव ममान्तमानयति कोऽप्येतज्जगद्दृश्यताम्' इति पाठेन समाधेयः।

"अस्त्री प्रकाण्डः स्कन्धः स्यात् मूलाच्छाखावधेस्तरोः" इत्यमरः।

(१) सन्धानं तनुभावनष्टसलिला व्यक्तं भजन्त्यापगाः।

মাতলিঃ । আয়ুষ্মন্ ! সাধু দৃষ্টম্ । সবহুমানমালোক্য । অহো ! উদাররমণীয়া পৃথিবী (১) । (ড)

রাজা । মাতলে ! কতমোঽয়ং পূর্ব্বাপরসমুদ্রাবগাঢ়ঃ কনক-রসনিষ্যন্দী সান্ধ্য ইব মেঘঃ সানুমানালোক্যতে (২) । (ঢ)

কল্পনামাত্রেণ ঈদৃগ্বর্ণনায়া অসম্ভবাৎ কালিদাসেন স্বয়মেব বিমানাবতরণ-মনুভূয়েদং বর্ণিতমিতি তৎকালেঽপি ভারতবর্ষে বিমানবিহাররীতিরাসীদিতি বদন্তি ।

শার্দ্দূলবিক্রীড়িতং বৃত্তম্ ॥৮॥

(ড) মাতলিরিতি । সাধু সম্যক্ । উদাররমণীয়া মহামনোহরা ।

(ঢ) রাজেতি । পূর্ব্বাপরয়োঃ পূর্ব্বপশ্চিময়োঃ সমুদ্রয়োর্মধ্যে অবগাঢ়ঃ প্রবিষ্টঃ, কনকরসং স্বর্ণদ্রবং নিষ্যন্দয়িতুং স্রাবয়িতুং শীলমস্যেতি কনকরসনিষ্যন্দী, সন্ধ্যায়া অয়মিতি সান্ধ্যঃ সন্ধ্যাকালীনঃ মেঘ ইব, সানুমান্ পর্ব্বতঃ ।

---

পর্ব্বতগুলি জাগিয়া উঠিতেছে, আর তাহার শৃঙ্গ হইতে পৃথিবী যেন নামিতেছে ; গুঁড়িগুলি প্রকাশ পাইতেছে বলিয়া, গাছগুলি যেন পাতার ভিতরে লুকানভাব ত্যাগ করিতেছে ; সরু জায়গার জল পূর্ব্বে দেখা যাইত না এখন তাহা প্রকাশ পাইতে থাকায়, নদীগুলি ( দুই অংশে ) সংযুক্ত হইতেছে এবং কোন লোক যেন উর্দ্ধে নিক্ষেপ করিয়া, মর্ত্ত্যমণ্ডলটীকে আমার পার্শ্বে আনিতেছে—দেখুন ॥৮॥

(ড) মাতলি। আয়ুষ্মন্! আপনি ঠিক্ দেখিয়াছেন। ( বিশেষ আদরের সহিত দেখিয়া ) কি আশ্চর্য্য! পৃথিবী বড়ই সুন্দর দেখা যাইতেছে।

(ঢ) রাজা। মাতলি! পূর্ব্ব এবং পশ্চিম সমুদ্রে প্রবিষ্ট, তরল সুবর্ণস্রাবী এবং সন্ধ্যাকালীন মেঘের ন্যায় বিচিত্র এই কোন্ পর্ব্বত দেখা যাইতেছে ?।

---

(১) ক্বচিৎ আয়ুষ্মন্ ইতি নাস্তি । (২) সান্ধ্য ইব মেঘপরিঘঃ…।

মাতলিঃ। আয়ুষ্মন্! এষ খলু হেমকূটো নাম কিংপুরুষ-পর্ব্বতঃ পরং তপস্বিনাং ক্ষেত্রম্ (১)। (ণ)

স্বায়ম্ভুবান্মরীচের্যঃ প্রবভূব প্রজাপতিঃ।
সুরাসুরগুরুঃ সোঽস্মিন্ সপত্নীকস্তপস্যতি (২) ॥৮॥

রাজা। সাদরম্। তেন হ্যনতিক্রমণীয়ানি শ্রেয়াংসি। প্রদক্ষিণীকৃত্য ভগবন্তং গন্তুমিচ্ছামি। (ত)

(ণ) মাতলিরিতি। হেম্নঃ কূটানি স্বর্ণময়ানি শৃঙ্গাণি যস্য সঃ, কিংপুরুষাণাং কিন্নরাণাং পর্ব্বতঃ, তপস্বিনাং পরং ক্ষেত্রম্ উৎকৃষ্টং স্থানম্।

"দূরানাত্মোত্তমাঃ পরাঃ" ইত্যমরঃ।

পরং তপস্বিনাং ক্ষেত্রমিত্যর্থে প্রমাণমাহ স্বায়ম্ভুবাদিতি। স্বয়ম্ভুবো ব্রহ্মণোঽপত্যমিতি স্বায়ম্ভুবো ব্রহ্মণঃ পুত্রস্তস্মাৎ, মরীচেস্তদাখ্যাৎ দেবর্ষেঃ, যঃ প্রজাপতিঃ প্রবভূব, সুরাসুরাণাং দেবাসুরাণাং গুরুঃ পিতা, পত্ন্যা দেবজনন্যা অদিত্যা সহেতি সপত্নীকঃ, স কশ্যপঃ, অস্মিন্ হেমকূটপর্ব্বতে, তপস্যতি তপস্যাং করোতি। অতএব পর্ব্বতোঽয়ং তপস্বিনাং পরং ক্ষেত্রমেবেত্যাশয়ঃ।

"গুরুর্গীষ্পতিপিত্রাদ্যঃ" ইত্যমরঃ ॥৮॥

(ত) রাজেতি। শ্রেয়াংসি মঙ্গলানি। ভগবন্তং মাহাত্ম্যশালিনং কশ্যপ-প্রজাপতিম্। তথা চ বৌদ্ধাগমে—

---

(ণ) মাতলি। আয়ুষ্মন্! তপস্বীদিগের উৎকৃষ্ট স্থানে হেমকূট-নামে এই কিন্নরপর্ব্বত দেখা যাইতেছে।

ব্রহ্মার পুত্র মরীচি হইতে যিনি জন্মগ্রহণ করিয়াছিলেন, দেব ও অসুরগণের পিতা সেই কশ্যপপ্রজাপতি পত্নীর সহিত এই পর্ব্বতে তপস্যা করিতেছেন ॥৮॥

---

(১)...তপসাং সিদ্ধিক্ষেত্রম্। (২)...ভীঽত্র...।

मातलिः। आयुष्मन्! प्रथमः कल्पः। अवतरणं नाटयन्। एतावयतीर्णौ स्वः (१)। (थ)

राजा। सविस्मयम्। मातले! (२)

उपोढशब्दा न रथाङ्गनेमयः,
प्रवर्त्तमानं न च दृश्यते रजः।
अभूतलस्पर्शतया निरुद्धतिः
तवावतीर्णोऽपि न लक्ष्यते रथः (३) ॥१०॥

"गुणैरतुल्यैर्निखिलैः समागमादशेषदोषापगमाच्च नौ गुरुः।
समग्रमाहात्म्यविभूषितो यतः प्रतीक्ष्यतेऽस्माद्भगवानसाविति ॥"

(थ) मातलिरिति। प्रथमः कल्पः मुख्यमनुष्ठानम्, कश्यपस्य प्रदक्षिणीकरणानन्तर-गमनमिति शेषः; श्रेयःसाधनत्वादिति भावः। नाटयन् अभिनयन्। स्वः आवामिति शेषः। स्व इति अस्धातोः वर्त्तमानाया उत्तमपुरुषद्विवचने रूपम्।

उपोढेति। अभूतलस्पर्शतया भूतलस्पर्शाभावेनेत्यर्थः, रथाङ्गानां चक्राणां नेमयः प्रान्तभागाः, उपोढा धृताः शब्दा याभिस्तास्तादृश्यो न असञ्जातशब्दा इति तात्पर्य्यम्, वर्त्तमानम् उत्पद्यमानम्, रजो धूलिश्च, न दृश्यते; तथा निर्न विद्यते उद्धतिः हठादेव भूसंयोगादुद्घट्टनं यस्य स निरुद्धतिः; अतएव तव रथो विमानम्, अवतीर्णोऽपि

(ত) রাজা। (আদরের সহিত) তাহা হইলে, মঙ্গল অতিক্রম করা উচিত নহে। আমি ভগবান্‌কে প্রদক্ষিণ করিয়া যাইতে ইচ্ছা করি।

(থ) মাতলি। আয়ুষ্মন্! ইহা উত্তম কল্প। (অবতরণ অভিনয় করিয়া) এই আমরা অবতীর্ণ হইয়াছি।

রাজা। (বিস্ময়ের সহিত) মাতলি!

(१) मातलिः। प्रथमः कल्पः। नाट्येनावतीर्णौ।

(२) क्वचिदिदं सम्भ्रमं न दृश्यते। (३)…अभूतलस्पर्शतया निरुद्धतः…।

मातलिः। एतावानेव शतमन्योरायुष्मतश्च रथस्य विशेषः (१)। (द)

राजा। मातले! कतमस्मिन् प्रदेशे मारीचाश्रमः ?। (ध)

मातलिः। हस्तेन दर्शयन्। पश्य—(२)

भूपतितोऽपि, न लक्ष्यते अवतीर्णं तया न बुध्यते ; नेमीनां शब्दाभावात् रजसामदर्शनात् उद्वृत्यभावाच्चेति भावः। अतएव सविस्मयमित्युक्तम्।

अत्र अवतीर्णताबोधाभावं प्रति पूर्ववाक्यार्थानां हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। तथा "चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्" इत्यमरोक्त्यादिना नेमिशब्देनैव चक्रप्रान्तप्राप्तावपि पुनः रथाङ्गपदप्रयोगात् पुनरुक्ततादोषप्रसक्तोऽपि उत्कृष्टनेमिबोधनाय स दोषः सम्पन्नः 'पुष्पमाला' इत्यादिदर्पणोदाहरणवत्। तथा च—

"धनुर्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः। आरूढत्वादिबोधाय" इति साहित्यदर्पणः।

वंशस्थविलं वृत्तम् ॥१०॥

(द) मातलिरिति। शतमन्योरिन्द्रस्य आयुष्मतो भवतश्च। विशेषो रथान्तरेभ्यो भेदः। एतेन तदानीं मर्त्यवासिनामपि विमानव्यवहार आसीदिति प्रतीयते।

(ध) राजेति। मरीचेरपत्यमिति मारीचः कश्यपस्तस्याश्रमो मारीचाश्रमः।

---

আপনার রথ ভূতল স্পর্শ করে নাই বলিয়া, চক্রের প্রান্তভাগে শব্দ হয় নাই, ধূলি উঠিতেও দেখা যাইতেছে না এবং ধাক্কা লাগিয়া রথ লাফাইয়াও উঠে নাই। অতএব আপনার রথ অবতরণ করিয়া থাকিলেও তাহা লক্ষ্য করিতে পারা যায় নাই ॥১০॥

(দ) মাতলি। দেবরাজের এবং আপনার রথের এই টুকুই বিশেষ।

(ধ) রাজা। মাতলি! কশ্যপের আশ্রম কোন্ জায়গায়?।

---

(१) क्वापि रथस्येति नास्ति। (२) क्वचित् पश्येति नास्ति।

वल्मीकार्द्धनिमग्नमूर्त्तिरुरगत्वग्ब्रह्मसूत्रान्तरः (१)
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीड़ितः ।
अंसव्यापि शकुन्तनीड़निचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ॥११॥

वल्मीकेति । वल्मीके उपचिकाकृतमृत्तिकास्तूपमध्ये अर्द्धनिमग्ना मूर्त्तिः शरीरं यस्य सः, अतिदीर्घकालमेकभावेनावस्थानात् उपचिकाभिर्मृत्तिकामुत्तोल्य देहस्यार्द्धं यावदावृत इति भावः; उरगत्वक् सर्पनिर्म्मोकः ब्रह्मसूत्रान्तरम् अन्यद्यज्ञोपवीतं यस्य स तादृशः, अतीवनिश्चलभावेनावस्थानात् स्थाणुभ्रमेण कश्चित् सर्पः यज्ञोपवीतधारणस्थाने स्वकीय-निर्म्मोकं मुक्तवानित्याशयः, जीर्णानां शुष्काणां लतानां प्रतानो विस्तार एव वलयं वलयवद्गोलाकारवेष्टनं तेन, कण्ठे गलदेशे, अत्यर्थं सम्पीड़ितः दृढ़बन्धनात् अतिशयेन यातनां प्रापितः; लतासमूहः समुत्पद्य दीर्घकालेन जीर्णतां प्राप्य कण्ठदेशे ईदृशं दृढ़लग्नः, येन महापीड़ानुभवः स्यादित्यभिप्रायः । इदन्तु योग्यतामात्रमुक्तं तादृश-तपस्विनां कष्टाननुभवात् । तथा अंसव्यापि स्कन्धदेशव्यापकम्, शकुन्तनीड़ैः पक्षिणां कुलायैर्निचितं व्याप्तम्, जटानां मण्डलं समूहम्, बिभ्रत् धारयन्, अत्यन्तनिश्चलतया क्षुद्रक्षुद्रपक्षिणो जटासु नीड़ानि निर्म्माय स्थिता इति भावः । असौ दृश्यमानो मुनिः कश्चित्तपस्वी, यत्र यस्मिन् प्रदेशे, अचलो निश्चलः, स्थाणुः शाखादिविहीनो वृक्षकाण्ड इव, अर्कबिम्बं सूर्य्यमण्डलम्, अभि लक्ष्यीकृत्य, स्थितः अवतिष्ठते तस्मिन् प्रदेशे मारीचाश्रम इति भावः ।

अत्र उरगत्वग्ब्रह्मसूत्रान्तर इति निरङ्गं केवलरूपकम्, स्थाणुरिवेति श्रौतोपमा च, अनयोः परस्परनिरपेक्षतया संसृष्टिः ।

शार्दूलविक्रीड़ितं वृत्तम् ॥११॥

---

মাতলি । ( হাত দিয়া দেখাইয়া ) দেখুন—

যাঁহার দেহ, উয়ীর মাটীর ভিতরে অর্দ্ধনিমগ্ন রহিয়াছে ; সাপের খোলস, আর একটী যজ্ঞোপবীত হইয়াছে ; জীর্ণ লতা-পাতা কণ্ঠদেশ

---

(१) वल्मीकार्द्धनिमग्नमूर्त्तिरुरसा सन्दष्टसर्पत्वचा…।

राजा। विलोक्य। नमोऽस्मै कष्टतपसे (१)। (न)

मातलिः। संयतप्रग्रहं रथं कृत्वा। एतावदितिपरिवर्द्धित-मन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः (२)। (प)

राजा। अहो! स्वर्गादिदमधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि (३)। (फ)

(न) राजेति। कष्टम् अतीवकष्टकरं तपो यस्य तस्मै।

(प) मातलिरिति। संयतप्रग्रहं बद्धरज्जुकम्। अदित्या तदाख्यया कश्यपपत्न्या परिवर्द्धितौ मन्दारवृक्षौ यस्मिन् तम्, प्रजापतेः कश्यपस्य। एतौ आवामिति शेषः।

(फ) राजेति। निर्वृतिस्थानं सुखभूमिः। अवगाढः अन्तरे प्रविष्टः, तथैव निरतिशयशान्तिलाभादिति भावः।

"निर्वृतिः सुस्थतायां स्यादस्तंगमनमोक्षयोः" इति विश्वः।

---

বেষ্টন করিয়া গুরুতর যাতনা দিতেছে এবং যিনি, পক্ষীর বাসায় ব্যাপ্ত ও স্কন্ধপর্য্যন্ত পতিত জটাসমূহ ধারণ করিতেছেন; ঐ মুনি, মুড়ো গাছের মত নিশ্চল অবস্থায়, সূর্য্যমণ্ডলের দিকে চাহিয়া, যেখানে রহিয়াছেন (ঐখানে কশ্যপের আশ্রম) ॥১১॥

(ন) রাজা। (দেখিয়া) ঐ কষ্টকর-তপস্যাকারীকে নমস্কার করি।

(প) মাতলি। (রথের রজ্জু সংযত করিয়া) এই আমরা কশ্যপ-প্রজাপতির আশ্রমে প্রবেশ করিলাম; অদিতিদেবী স্বয়ং এইখানের মন্দারবৃক্ষটীকে পরিবর্দ্ধিত করিয়াছেন।

(ফ) রাজা। কি আশ্চর্য্য! এই স্থানটী, স্বর্গ অপেক্ষাও অধিকতর সুখের স্থান; আমি যেন অমৃতের হ্রদে অবগাহন করিতেছি।

(१) राजा। नमस्ते कष्टतपसे। (२) महाराज! एतौ…।
(३) क्वचित् अयं इति नास्ति।

मातलिः। रथं स्थापयित्वा। अवतरत्वायुष्मान्।

राजा। अवतीर्य्य। भवान् किमिदानीम् (१)। (ब)

मातलिः। समययन्त्रित एवायमास्ते रथः ; तद्वयमप्यव-तरामः। तथा कृत्वा। इत इत आयुष्मन्! दृश्यन्तामत्रभवता-मृषीणां तपोवनभूमयः (२)। (भ)

राजा। ननु विस्मयादुभयमप्यवलोकयामि (३)। (म)

(ब) राजेति। अवतरेदिति शेषः ; अनवतरणे तु अपरिचिततया मम एतत्तपो-वनादिदर्शनमसम्भवमेवेति भावः। देवराजसारथेः सम्मानरक्षणार्थं 'भवानवतरतु' इत्यनभिधाय 'अवतरेत्' इत्यपि नाभिहितमिति बोध्यम्।

(भ) मातलिरिति। समयेन सङ्केतेन यन्त्रित एव स्थापित एव, तत्स्मात् रथस्य अन्यत्र गमनासम्भवादित्यर्थः, वयमपि अवतरामीति तात्पर्य्यम्। तथा अवतरणम्। इत इतः अस्यामस्यां दिशि। अत्रभवतां पूज्यानाम्।

"समयः शपथे भाषासम्पदोः कालसंविदोः। सिद्धान्ताचारसङ्केतनियमावसरेषु च॥ क्रियाकारे निर्द्देशे च" इति हेमचन्द्रः।

মাতলি। ( রথ থামাইয়া ) আয়ুষ্মান্ অবতরণ করুন।

(ব) রাজা ( অবতরণ করিয়া ) আপনি কি এখন অবতরণ করিবেন ?।

(ভ) মাতলি। এই রথ সঙ্কেতমাত্রেই রক্ষিত আছে ; সুতরাং আমিও অবতরণ করিব। ( অবতরণ করিয়া ) আয়ুষ্মন্! এই এই পথে আসুন ; মাননীয় মুনিগণের তপোবনভূমিগুলি দেখুন।

(ম) রাজা। বিস্ময়বশতঃ দুইই দেখিতেছি।

(१)···मातले! भवान् कथमिदानीम्।

(२) संयन्त्रितो मया रथः। वयमप्यवतरामः।···इत आयुष्मन्! परिक्रम्य।

(३) ननु विस्मयादवलोकयामि।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने,
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो
यद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी (१) ॥१२॥

(म) राजेति । मातलिं सम्बोधने । उभयमपि तपः तपोवनभूमिश्च एतत् द्वयमपि । विस्मयादिति ल्यब्लोपे पञ्चमी, विस्मयमाश्रित्येत्यर्थः ।

ननु कथं विस्मयादवलोकयसीत्याह प्राणानामिति । सन्तो विद्यमानाः कल्पवृक्षा अभीष्टसम्पादनसमर्था देववृक्षविशेषा यस्मिन् तत्र तादृशे वने, अनिलेन वायुना केवल-वायुभक्षणेनेत्यर्थः, प्राणानां वृत्तिः स्थितिः, उचिता अभ्यस्ता ; प्रार्थनामात्रेणैव येभ्यश्चर्व्य-चोष्य-लेह्य पेयानां चतुर्विधद्रव्याणां प्राप्तिसम्भवः, तादृशकल्पवृक्षसम्पन्नवनेऽपि केवल-वायुभक्षणेन जीवनधारणं विस्मयकरमेवेति भावः । काञ्चनपद्मानां स्वर्णपद्मानां रेणुभिः परागैः कपिशे पिङ्गलवर्णे, तोये जले, पुण्या पुण्यजनिका, अभिषेकक्रिया स्नानकार्य्य-सम्पादनम् ; तथा च ईदृशजले सुन्दरीभिः सह केलिमकृत्वा धर्म्मार्थं स्नानं विस्मयजनक-मेवेत्याशयः । रत्नशिला रत्नभूताः प्रस्तरास्तासां गृहेषु तन्निर्म्मितभवनेषु, ध्यानम् ईश्वरं प्रति प्रत्ययैकतानता अविच्छिन्नचिन्ताप्रवाह इति यावत् ; तादृशगृहेषु विलासशय्या-शयनादिकमन्तरेण ध्यानकरणं विस्मयकारणमेवेत्यभिप्रायः । तथा विबुधस्त्रीणां देवभोग्य-रमणीनामप्सरसामित्यर्थः सन्निधौ समीपे, संयम इन्द्रियदमनम्, अप्सरसां सम्भोगमकृत्वा प्रत्युत इन्द्रियदमनं विस्मयकरमेवेति भावः । अतएव अन्यमुनयः तपोभिः यत् स्थानं वाञ्छन्ति गन्तुमभिलषन्ति, अमी दृश्यमाना मुनयः, तस्मिन् स्थाने, तपस्यन्ति तपस्यां कुर्वन्ति ; एतत् सर्वं एवाश्चर्य्यमित्याशयः ।

अत्र कारणीभूतकल्पवृक्षादिसत्त्वेऽपि तत्कार्य्यभूतभोगाभावात् विशेषोक्तिरलङ्कारः, चतुर्थचरणार्थं प्रति पूर्वचरणत्रयगतवाक्यार्थानां हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गम्, अन्यमुन्यपेक्षया तत्रत्यमुनीनामाधिक्यप्रतिपादनात् व्यतिरेकश्च ; इत्येतेषां परस्पर-निरपेक्षतया संसृष्टिः ।

---

(१) कपिशे धर्माभिषेकक्रिया ।···यत् काङ्क्षन्ति ।

मातलिः । उत्सर्पिणी खलु महतां प्रार्थना । परिक्रम्य आकाशे । वृद्धशाकल्य ! किंव्यापारः सम्प्रति भगवान् मारीचः ? । आकर्ण्य । किं ब्रवीषि दाक्षायण्या पतिव्रतापुण्यमधिकृत्य पृष्टस्तदस्यै महर्षिपत्नीगणसहितायै कथयतीति । ननु प्रतिपाल्यावसरः खलु प्रस्तावः । राजानमवलोक्य । अस्यामशोकच्छायायां तावदास्तामायुष्मान्, यावत्त्वामहमिन्द्रगुरवे निवेदयामि (१) । (य)

"अभ्यस्तेऽप्युचितं न्याय्यम्" इति यादवः । "तत्र प्रत्ययैकतानताध्यानम्" इति पातञ्जलसूत्रम् ।

शार्दूलविक्रीडितं वृत्तम् ॥१२॥

(य) मातलिरिति । उत्सर्पिणी क्रमिकोर्द्ध्वगामिनी । तथा च अन्यमुनयस्तपोभिरेतत् स्थानं वाञ्छन्ति ; अमी अत्रैव तपस्यन्तो ब्रह्मलोकादिकं कामयन्त इत्याशयः । परिक्रम्य कश्यपसन्निधानं गन्तुं पादक्षेपं कृत्वा, आकाशे शून्ये वृद्धशाकल्यस्य तत्राभावेऽपीत्यर्थः । वृद्धशाकल्येति कस्यचित् कश्यपशिष्यस्य नाम्ना सम्बोधनम् । को व्यापारो

যে বনে কল্পবৃক্ষ রহিয়াছে, সেই বনেও বায়ুভক্ষণে প্রাণ ধারণ করা অভ্যাস, স্বর্ণপদ্মের রেণুতে যে জল পিঙ্গলবর্ণ করিয়া রাখিয়াছে সেই জলে ধর্ম্মার্থ স্নান করা ; মণিময় প্রস্তরনির্ম্মিত গৃহে ভগবানের ধ্যান করা এবং অপ্সরাদের নিকটে সংযত থাকা, অতএব অন্যমুনিরা তপস্যাদ্বারা যে স্থান লাভ করিতে ইচ্ছা করেন, সেই স্থানে থাকিয়াই ইঁহারা তপস্যা করেন ॥১২॥

(१) अयि वृद्धशाकल्य ! किमनुतिष्ठति भगवान्···। पतिव्रताधर्म्मं पृष्टस्तस्यै महर्षिपत्नीसहितायै । राजा । कथं दत्ता । अयि ! प्रतिपाल्यावसरः प्रस्तावः । मातलिः । राजानमवलोक्य । अस्मिन्नशोकवृक्षमूले यावत् त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि ।

রাজা। যথা ভবান্ মন্যতে। ইতি স্থিতঃ। (র)

মাতলির্নিষ্ক্রান্তঃ (১)।

---

যস্য স কিংব্যাপারঃ কিং করোতীত্যর্থঃ। মারীচঃ কশ্যপঃ। আকর্ণ্য আকর্ণনমভিনীয়। দক্ষস্যাপত্যং স্ত্রী দাক্ষায়ণী অদিতিস্তয়া, পতিব্রতায়াঃ স্ত্রিয়াঃ কিং পুণ্যম্, ইত্যধিকৃত্য আশ্রিত্য, অস্যৈ দাক্ষায়ণ্যৈ, তৎ পতিব্রতাপুণ্যং কথয়তি, ভগবান্ মারীচ ইতি শেষঃ, ইতি কিং ব্রবীষীত্যন্বয়ঃ। তৎকস্মাৎ কার্য্যান্তরব্যাসক্তত্বাদিত্যর্থঃ, প্রতিপাল্যঃ প্রতীক্ষণীয়ঃ অবসরো যস্য স তথোক্তঃ, প্রস্তাবঃ বিষয়বিশেষোত্থাপনম্, পতিব্রতা-পুণ্যকথনসমাপ্তেঃ পরমেব অন্যঃ প্রস্তাবঃ করণীয় ইত্যর্থঃ। আস্তাম্ উপবিশতু। ইন্দ্রস্য গুরুঃ পিতা তস্মৈ কশ্যপায়েতি তাৎপর্য্যম্।

অশোকচ্ছায়ায়ামিতি একস্য অশোকস্য ছায়াবগমাৎ "ষষ্ঠ্যাশ্চ্ছায়া বহূনাঞ্চেৎ" ইতি নপুংসকত্বং ন ভবতি।

(র) রাজেতি। যথা ভবান্ মন্যতে ভবতো যথা মতং ভবতি, তথা করোমীত্যর্থঃ।

(য) মাতলি। মহাত্মাদিগের প্রার্থনা ক্রমিক ঊর্দ্ধগামিনী। (পাদক্ষেপ করিয়া শূন্যে) বৃদ্ধসাকল্য! ভগবান্ কশ্যপ এখন কি করিতেছেন? (শুনিয়া) কি বলিলেন?—"অদিতিদেবী, পতিব্রতার ধর্ম্মবিষয়ে জিজ্ঞাসা করিয়াছেন, তাহাতে অন্যান্য মহর্ষিপত্নীগণের সহিত উঁহার নিকট, তিনি সেই পতিব্রতার ধর্ম্ম বলিতেছেন।" অতএব অন্য কোন প্রস্তাব উত্থাপন করিতে হইলে অবসর প্রতীক্ষা করিতে হইবে। সুতরাং যাবৎ আমি দেবরাজের পিতার নিকটে আপনার সংবাদ জানাই, তাবৎ আপনি এই অশোকবৃক্ষের ছায়ায় বসিয়া থাকুন।

(র) রাজা। আপনার যে মত। (এই বলিয়া সেইখানেই থাকিলেন।)

(১) আয়ুষ্মন্! বাধয়াম্যহম্। নিষ্ক্রান্তঃ।

राजा । निमित्तं सूचयित्वा । (ल)

मनोरथाय नाशंसे किं बाहो ! स्पन्दसे मुधा (१) ।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते ॥१३॥

नेपथ्ये । मा क्खु चवलदं करेहि, जहिं तहिं ज्जेव अत्तणो पइदिं दंसेसि (२) । (व)

---

(ल) राजेति । निमित्तं दक्षिणबाहुस्पन्दनरूपं शुभलक्षणम्, सूचयित्वा अभिनीय । तथा च गर्गः—

"दक्षिणभुजस्पन्दनमर्थलाभं बन्धुदर्शनं वा ।" सूचयतीति पूर्वक्रिययान्वयः ।

मनोरथायेति । हे बाहो ! दक्षिणभुज ! मनोरथाय मनोरथविषयीभूताय शकुन्तलालाभायेत्यर्थः, न आशंसे आशां न करोमि ; अत्यन्तासम्भवादिति भावः । तथापि किं कथम्, मुधा वृथा, स्पन्दसे स्फुरसि । तथा च सर्वथैवासम्भवात् शकुन्तलायाः पुनः प्राप्त्याशां कथमपि न करोमि, अतएव तत्प्राप्तिसूचकं तवेदं स्पन्दनं निरर्थकमेवेति सरलार्थः । हि तथाहि, पूर्वावधीरितं प्रागेवावज्ञातम्, श्रेयो मङ्गलम्, दुःखं सत्, परिवर्त्तते प्रत्यागच्छति । पूर्वकृतं शकुन्तलाप्रत्याख्यानमिदानीं भावनावशात् दुःखरूपेणैव चित्ते उदेतीति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।

इदं पद्यं पश्यता भवभूतिना उत्तररामचरिते "मनोरथस्य यद्बीजम्" इत्यादि पद्यं लिखितमिव प्रतिभाति ॥१३॥

---

( মাতলি চলিয়া গেল । )

(ল) রাজা । ( শুভলক্ষণ সূচনা করিয়া ) অভীষ্ট বস্তু লাভের আশা করি না ; তবে হে বাহু ! তুমি অনর্থক স্পন্দিত হইতেছ কেন ? । অবজ্ঞা করিয়া পূর্বে কোন মঙ্গলকে পরিত্যাগ করিলে, তাহা দুঃখরূপেই পুনরায় উপস্থিত হইয়া থাকে ॥১৩॥

---

(१) स्पन्दसे वृथा···। (२) मा क्खु चावलं कुरुष्व । कहं गदो एव्व अत्तणो पइदिं ।

राजा। कर्णं दत्त्वा। अभूमिरियमविनयस्य, तत् को नु खल्वेवं निषिध्यते। शब्दानुसारेणावलोक्य सविस्मयम्। अये! को नु खल्वयमवरुध्यमानस्तापसीभ्यामबालसत्त्वो बालः (१)। (श)

अर्द्धपीतस्तनं मातुरामर्द्दक्लिष्टकेशरम्।
प्रक्रीड़ितुं सिंहशिशुं करेणैवावकर्षति (२) ॥१४॥

(व) मा खलु चपलतां कुरु, यस्मिन् तस्मिन्नेव आत्मनः प्रकृतिं दर्शयसि।

---

(व) नेपथ्य इति। चपलतां चाञ्चल्यम्। प्रकृतिं स्वभावम्।

(श) राजेति। अविनयस्य अशिष्टव्यवहारस्य, इयमभूमिः इदमस्थानम्, महर्षीणां तपःक्षेत्रत्वादित्याशयः। शब्दानुसारेण यस्या दिशः "मा खलु" इत्यादिशब्द आगतः, तस्यां दिशि दृष्टिपातेनेत्यर्थः। तापसीभ्यां तपस्विनीद्वयेन, अवरुध्यमानो ध्रियमाणः, अबालम् अक्षुद्रं सत्त्वं बलं यस्य सः, बालः शिशुः।

"सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति विश्वः।

अर्द्धेति। मातुः सिंहशिशोरेव जनन्याः केशरिण्याः, अर्द्धं यथा स्यात्तथा, पीतः स्तनः स्तनदुग्धं येन तम्, आमर्द्देन अमुना बालकेनैव मर्द्दनेन क्लिष्टाः सवेदनं विशृङ्खलीकृताः केशरा जटा यस्य तम्, सिंहशिशुम्, प्रक्रीड़ितुं खेलां कर्त्तुम्, करेणैव हस्तेनैव, न पुनः रज्ज्वादिनेति एवशब्दस्यार्थः अवकर्षति आकर्षति। अतएव अबालसत्त्व एवायं बाल इति भावः॥१४॥

---

(व) নেপথ্যে। চপলতা করিও না; তুমি যেখানে সেখানেই নিজের স্বভাব দেখাও।

(শ) রাজা। (কাণ দিয়া) ইহা, অশিষ্টাচরণ করিবার স্থান নহে; তবে কাহাকে এইরূপ নিষেধ করা হইতেছে? (সেই শব্দ অনুসারে দেখিয়া, বিস্ময়ের সহিত) ওহে! এই বালকটী কে? দুই জন তপস্বিনী ইহাকে ধরিয়া রাখিয়াছে; ইহার শক্তি ত কম নহে।

---

(१) बालो य…अनुबध्यमानस्तपस्विनीभ्याम्। (२) बलात्कारेण कर्षति।

ततः प्रविशति यथानिर्द्दिष्टकर्म्मा तापसीभ्यां सह बालः (१)। (घ)

बालः। जिम्भ ले सिंहसावआ! जिम्भ, दन्ताइं दे गणइस्सं (२)। (ङ)

प्रथमा। अविणीद! किं णो अवच्चणिव्विसेसाइं सत्ताइं विप्पअरेसि। हन्त! वड्ढइ विअ दे संरम्भो। ट्ठाणे क्खु इसिजणेण सव्वदमणोत्ति किदणामहेओसि (३)। (च)

(४) जृम्भस्व रे सिंहशावक! जृम्भस्व, दन्तान् ते गणयिष्यामि।

(घ) तत इति। यथानिर्द्दिष्टकर्म्मा सिंहशिशोराकर्षणप्रवृत्तः।

(ङ) बाल इति। जृम्भस्व मुखव्यादानं कुरु। कुत इत्याह दन्तानिति। गणयिष्यामि संख्यास्यामि। मुखव्यादानाभावे दन्तानामनाविर्भावात् तद्गणनासम्भव इति भावः।

इदानीमपि शिक्षाया अभावेन कृतात्मत्वाभावादयं बालकः संस्कृतमपठित्वा शौरसेनी-मेव पठति। यथा साहित्यदर्पणे—

"बालानां षण्ढकानाञ्च नीचग्रहविचारिणाम्।
उन्मत्तानामातुराणां सैव स्यात्॥" सैव शौरसेन्येव।

খেলা করিবার জন্য, হাত দিয়াই একটী সিংহশাবককে আকর্ষণ করিতেছে; এই সিংহশাবকটী, অর্দ্ধমাত্র মাতার স্তন পান করিয়াছিল এবং মর্দ্দন করায় ইহার কেশরগুলি বিশৃঙ্খল হইয়া গিয়াছে ॥১৪॥

(ঘ) তদনন্তর দুই জন তপস্বিনীর সহিত, যথোক্তকার্য্যে ব্যাপৃত অবস্থায় একটী বালকের প্রবেশ।

(ঙ) বালক। হাঁ কর, রে সিংহশাবক! হাঁ কর, তোর দাঁতগুলি গণিব।

(१) तपस्विनीभ्यां बालः। (२) जिम्भ सिंह! दन्ताइं दे गणइस्सं।

(३) वड्ढउ दे संरम्भो।

राजा। किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे हृदयम्। विचिन्त्य। नूनमनपत्यता मां वत्सलयति (१)। (ख)

द्वितीया। एसा तुमं केसरिणी लंघइस्सदि, जइ से पुत्तअं ण मुञ्चिस्सदि (२)। (क)

(ह) अविनीत! किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि। हन्त! वर्द्धत इव ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

(ह) प्रथमेति। तापसीति सम्बध्यते। अविनीत! अशिष्ट! इति बाल-सम्बोधनम्। नः अस्माकम्, अपत्यनिर्विशेषाणि सन्तानतुल्यानि, सत्त्वानि जन्तून्, विप्रकरोषि उत्पीडयसि। संरम्भो दर्पः। स्थाने खलु युक्त एव। सर्वान् दमयति अभिभवतीति सर्वदमन इत्यन्वर्थवशादित्याशयः।

"द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः। "आवेशाटोपसंरम्भाः" इति त्रिकाण्डशेषः।

उच्चवंशजत्वात् शिक्षितत्वाच्च इमे तापस्यावपि शौरसेनीं पठतः—"शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्" इति साहित्यदर्पणात्।

(च) राजेति। औरसे परिणीतायां सवर्णायां भार्य्यायां स्वयमुत्पादिते. स्निह्यति स्नेहं करोति। नूनं निश्चितम्, अनपत्यता सन्तानराहित्यम्, वत्सलं स्नेहवन्तं करोतीति वत्सलयति; सन्तानशून्यस्य बालसामान्ये तथैव दर्शनादिति भावः।

(হ) প্রথম তপস্বিনী। অশিষ্ট! আমাদের সন্তানের মত জন্তুগুলিকে কেন যন্ত্রণা দিতেছ। হায়! তোমার দর্প যেন বাড়িতেছে। ঋষিরা যে তোমার নাম সর্বদমন করিয়াছেন, তাহা সঙ্গতই হইয়াছে।

(ক্ষ) রাজা। আমার মন, ঔরসপুত্রের ন্যায় এই বালকটীর প্রতি স্নেহ করিতেছে কেন! (চিন্তা করিয়া) নিশ্চয়ই নিঃসন্তানতা আমার স্নেহ জন্মাইতেছে।

(१)…स्निह्यति मे मनः। न नम्…। (२)…लङ्घइ,…मुञ्चदि।

बालः । सस्मितम् । अम्महे ! बलिअं क्खु भीदम्हि ।
इत्यधरं दर्शयति । (ख)

राजा । सविस्मयम् (१) । (ग)

महतस्तेजसो वीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधोऽपेक्ष इव स्थितः (२) ॥१५॥

(क) एषा त्वां केशरिणी लङ्घयिष्यति, यद्यस्या पुत्रकं न मोक्ष्यसि ।

(ख) अहो ! बलीयः खलु भीतोऽस्मि ।

(क) द्वितीयेति । अत्रापि तापसीति सम्बध्यते । केशरिणी अस्य सिंहशिशोः माता सिंही, लङ्घयिष्यति अतिक्रमिष्यति आक्रम्य अभिभविष्यतीत्यर्थः, अस्याः केशरिण्याः ।

(ख) बाल इति । उपहासात् स्मितम् । अहो इति सम्बोधने । बलीयः खलु अत्यधिकमेव, भीतोऽस्मि, सोल्लुण्ठनोक्तिरियम् । तेन "उपकृतं बहु तत्र किमुच्यते" इत्यादिदर्पणोदाहरणवत् विपरीतलक्षणया किञ्चिदपि न भीतोऽस्मीत्यर्थः । अधरं निजनीचोष्ठं दर्शयति वर्द्धयित्वेति शेषः । अत्यन्तालीकताप्रतिपादने अधरप्रदर्शनं बालकानां स्वभावः ।

(ग) राजेति । सविस्मयं बालकस्य साहसिकतादर्शनेन साश्चर्य्यम् ।

महत इति । एधः काष्ठम् अपेक्षत इति एधोऽपेक्षः, स्फुलिङ्गावस्थया बिन्दुमात्ररूपेण स्थितः, वह्निरिव, अयं बालः शिशुः, मे मम सम्बन्धे, महतः तेजसः प्रभावस्य दीप्तेश्च, वीजं कारणम्, प्रतिभाति ज्ञानविषयो भवति । तथा च काष्ठमपेक्षमाणो वह्निकणो यथा भाविमहादीप्तेः कारणम्, तथा शिक्षामपेक्षमाणः अयं बालकोऽपि भाविमहाप्रभावस्य कारणमिति सरलार्थः ।

(ক) দ্বিতীয় তপস্বিনী। এই সিংহী আসিয়া তোমাকে আক্রমণ করিবে, যদি উহার পুত্রকে ছাড়িয়া না দাও।

(খ) বালক। ( ঈষৎ হাস্যের সহিত ) ওমা ! আমি বড়ই ভীত হইলাম। ( এই বলিয়া নীচের ওষ্ঠ দেখাইল। )

(१) क्वचित् सविस्मयमिति नास्ति । (२)…एधापेक्ष इव…।

প্রথমা । বচ্ছ ! এদং মুঞ্চ বালমইন্দঅং, অবরং দে কীলণঅং দাইস্সং (১) । (ঘ)

বালঃ । কহিং দেহি ণং । ইতি হস্তং প্রসারয়তি । (ঙ)

রাজা । বালস্য হস্তং দৃষ্ট্বা । কথং চক্রবর্ত্তিলক্ষণমপ্যনেন ধার্য্যতে (২) । (চ)

(ঘ) বৎস ! এতং মুঞ্চ বালমৃগেন্দ্রকম্, অপরং তে ক্রীড়নকং দাস্যামি ।

(ঙ) কস্মিন্ দেহি এনম্ ।

---

অত্র শ্রৌতোপমালঙ্কারঃ । তথা উপমেয়ে পূর্ব্বার্দ্ধে "স্থিতাং প্রতীক্ষমাণঃ" ইত্যনভিধানাৎ উপমানে পরার্দ্ধে চ এধোঽপেক্ষ ইত্যভিধানাৎ অধিকপদতাদোষঃ "নয়নজ্যোতিষা ভাতি" ইত্যাদিদর্পণোদাহরণবৎ "স্থিতাং প্রাপ্যান্বয়ং বালঃ মহাতেজা ভবিষ্যতি" ইতি পূর্ব্বার্দ্ধপাঠেন স দোষঃ পরিহরণীয়ঃ ।

"কাষ্ঠং দার্ব্বিন্ধনং ত্বেধঃ" ইত্যমরঃ ॥১৫॥

(ঘ) প্রথমেতি । বালমৃগেন্দ্রকং সিংহশিশুম্, অনুকম্পায়াং কপ্রত্যয়ঃ, মুঞ্চ পরিত্যজ । ক্রীড্যতে অনেনেতি ক্রীড়নকম্, স্বার্থে কপ্রত্যয়ঃ, খেলোপকরণমিত্যর্থঃ ।

(ঙ) বাল ইতি । কস্মিন্ স্থানে তৎ ক্রীড়নকমিতি শেষঃ, এনং ক্রীড়নকম্ ।

(চ) রাজেতি । কথমিতি হর্ষে । অনেন বালেন, চক্রবর্ত্তিনঃ সার্ব্বভৌমস্য রাজ্ঞঃ, লক্ষণমপি ন কেবলং বলাতিশয়ং চিহ্নমপি ।

"কথং হর্ষে চ গর্হায়াং প্রকারার্থে চ সম্ভ্রমে । প্রশ্নে সম্ভাবনায়াঞ্চ" ইতি মেদিনী ।

---

(গ) রাজা । ( বিস্ময়ের সহিত ) কাষ্ঠের অপেক্ষাকারী অগ্নিস্ফুলিঙ্গের ন্যায় এই বালকটী, ভাবী মহাতেজের কারণ বলিয়া আমার বোধ হইতেছে ॥১৫॥

(ঘ) প্রথম তপস্বিনী । বৎস ! এই ছোট সিংহটীকে ছাড়, তোমাকে অন্য একটী খেলার জিনিষ দিতেছি ।

(ঙ) বালক । কোথায় ? দাও উহা । ( এই বলিয়া হাত বাড়াইল । )

---

(১)···মুঞ্চ···। (২)···ধার্য্যতে । তথা হস্ত ।

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरमिद्धरागया
नवोषसा भिन्नमिवैकपङ्कजम् (१) ॥१६॥

किं तच्चक्रवर्त्तिलक्षणमित्याह प्रलोभ्येति । प्रलोभ्यवस्तुनो लोभविषयीभूतपदार्थस्य क्रीड़नकस्य प्रणयेन प्रार्थनया प्रसारितो विस्तृतः, जालवत् गवाक्षवत् गवाक्षगतसरलदारुवदित्यर्थः ग्रथिताः परस्परं संश्लिष्टाः अङ्गुलयो यस्मिन् स तथोक्तः, करः अस्य बालकस्य पाणिः, इद्धः प्रकाशितः रागो रक्तिमा यस्यास्तया, नवोषसा अचिरप्रवृत्तेन प्रभातकालेन, भिन्नं प्रकाशितं प्रस्फुटितीकर्त्तुमारब्धमिति तात्पर्य्यम्, अलक्ष्याणि तदानीमपि अन्धकारसत्त्वात् अदृश्यानि पत्राणां दलानामन्तराणि परस्परावकाशदेशा यस्य तत् तादृशम्, एकं द्वितीयरहितम्, पङ्कजं पद्ममिव, विभाति शोभते । इदं जालग्रथिताङ्गुलिकरत्वमेव चक्रवर्त्तिलक्षणमिति भावः ।

अत्र श्रौतोपमालङ्कारः । तेन च करस्यातीवरक्तत्वं व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः । नवपदेन अन्धकारसत्तां सूचयित्वा अलक्ष्यपत्रान्तरत्वसम्भवः प्रदर्शितः । इद्धरागया इत्यनेन उषःप्रवृत्तिसूचनात् पङ्कजप्रकाशयोग्यत्वं सूचितम् । जालग्रथिताङ्गुलितासाम्यसूचनार्थम् अलक्ष्यपत्रान्तरमिति विशेषणम् । प्रसारितस्य एकस्यैव करस्य पूर्णसाम्यप्रदर्शनाय एकपदम् । अतः क्वापि न अपुष्टार्थत्वदोषः ।

चक्रवर्त्तिलक्षणमाह सामुद्रकम्—

"अतिरक्तः करौ यस्य ग्रथिताङ्गुलिकौ मृदुः ।
चापाङ्कुशाङ्कितः सोऽयं चक्रवर्त्ती भवेद्ध्रुवम् ॥"

"जालं गवाक्षे" इत्यादि "उषः सन्ध्याप्रभातयोः" इति च हेमचन्द्रः ।

वंशस्थविलं वृत्तम् ॥१६॥

---

(च) রাজা । ( বালকের হাত দেখিয়া ) ভাল, এ যে সম্রাটের লক্ষণও ধারণ করিতেছে ।

---

(१)…नवोषया…।

দ্বিতীয়া। সুব্বদে! মুঞ্চ ণং। ণ এসো সক্কো বাআমেত্তেণ সমট্টদুং। তা গচ্ছ মম কেরএ উড়এ সঙ্কোচণস্স ইসিকুমারস্স বণ্ণচিত্তিদো মট্টিআমোরও চিট্ঠদি, তং সে উবহর (১)। (ছ)

প্রথমা। তহ। ইতি নিষ্ক্রান্তা। (জ)

(ছ) সুব্রতে! মুঞ্চৈনম্। নৈষ শক্যো বাঙ্মাত্রেণ শময়িতুম্। তদ্গচ্ছ, মদীয়ে উটজে সঙ্কোচনস্য ঋষিকুমারস্য বর্ণচিত্রিতো মৃত্তিকাময়ূরস্তিষ্ঠতি, তমস্যোপহর।

(জ) তথা।

(ছ) দ্বিতীয়েতি। সুব্রতে ইতি নাম্না প্রথমতাপস্যাঃ সম্বোধনম্। এনং বালকম্। বাঙ্মাত্রেণ কেবলবাক্যেন, শময়িতুম্ অস্মাৎ সংরম্ভাৎ নিবর্ত্তয়িতুম্। সঙ্কোচনস্য তদাখ্যস্য। বর্ণচিত্রিতো নানারঙ্গচিত্রীকৃতঃ। অস্য বালকস্য সমীপে, উপহর আনয়। তং দৃষ্ট্বা কিংশ্চাবর্জ্জেত্ মুঞ্চতীত্যাশয়ঃ।

(জ) প্রথমেতি। তথা তদৈব করোমীত্যর্থঃ।

তখনও অন্ধকার থাকে বলিয়া, যাহার দলের ফাঁক্ দেখা যায় না এবং দীপ্ত রক্তিমশালী প্রভাতকাল যাহাকে প্রস্ফুটিত করে, এ হেন একটী পদ্ম যেমন শোভা পায়, সেইরূপ গবাক্ষের ন্যায় পরস্পরসংযুক্ত অঙ্গুলীযুক্ত এবং লোভজনক বস্তুর প্রার্থনার জন্য প্রসারিত এই হাতখানি শোভা পাইতেছে ॥১৬॥

(ছ) দ্বিতীয় তপস্বিনী। সুব্রতা! ইহাকে ছাড়, কেবল বাক্যদ্বারা ইহাকে শান্ত করিতে পারিবে না। অতএব যাও, আমার পর্ণশালায় ঋষিকুমার সঙ্কোচনের বর্ণদ্বারা চিত্রিত একটী মৃত্তিকাময়ূর আছে; ইহার জন্য তাহা আনয়ন কর।

(জ) প্রথম তপস্বিনী। তাহাই করি। (এই বলিয়া চলিয়া গেলেন।)

(১) সুব্বদে! ণ সক্কো…বিরমাবিদুং। উড়এ সঙ্কন্তং অত্থি।

বালঃ। দাব ইমিণা জ্জেব কীলিস্সং (১)। (ঝ)

তাপসী। বিলোক্য হসন্তী। ণং মুঞ্চ ণং (২)। (ঞ)

রাজা। স্পৃহয়ামি খলু দুর্ললিতায়াস্মৈ। নিশ্বস্য (৩) (ট)

আলক্ষ্যদন্তমুকুলাননিমিত্তহাসৈ-
রব্যক্তবর্ণরমণীয়বচঃপ্রবৃত্তীন্।
অঙ্কাশ্রয়প্রণয়িনস্তনয়ান্ বহন্তো
ধন্যাস্তদঙ্গরজসা কলুষীভবন্তি (৪) ॥১৩॥

(ঝ) তাবদনেনৈব ক্রীড়িষ্যামি।

(ঞ) ননু মুঞ্চৈনম্।

---

(ঝ) বাল ইতি। তাবৎ তস্মাৎ সিংহশিশুনৈব।... তাবৎ সিকাময়ূরানয়নপর্য্যন্তম্, অনেন সিংহশিশুনৈব।

(ঞ) তাপসীতি। প্রথমতাপস্যা নিষ্ক্রান্তত্বাৎ তাপসীত্যনেনৈব দ্বিতীয়া তাপসী প্রতীয়তে। অনুনয়ে ননুশব্দঃ। এনং সিংহশিশুম্।

(ট) রাজেতি। দুঃখেন লল্যতে পাল্যতে যঃ স দুর্ললিতঃ (আবদারে ইতি যস্য প্রসিদ্ধিঃ) তস্মৈ, অস্মৈ বালকায়, স্পৃহয়ামি অতীববাৎসল্যোদয়াৎ প্রাপ্তুমিচ্ছামি।

দুর্ললিতায়েতি "স্পৃহেরীপ্সিতম্" ইতি সম্প্রদানত্বাচ্চতুর্থী।

আলক্ষ্যেতি। ধন্যাঃ পুণ্যবন্তো জনাঃ, অনিমিত্তহাসৈঃ কারণং বিনা হাস্যকরণৈঃ তৎকরণবেলায়ামোষ্ঠযুগলবিবরণৈরিত্যর্থঃ, আলক্ষ্যাণি ঈষদ্দর্শনযোগ্যানি দন্তমুকুলানি যেষাং তান্, অব্যক্তৈঃ বিকলীকৃত্যোচ্চারণাৎ অস্পষ্টৈঃ বর্ণৈঃ রমণীয়া তথৈব শ্রুতিসুখাবহ-

---

(ঝ) বালক। তাবৎ ইহাকে দিয়া খেলা করিব।

(ঞ) তপস্বিনী। (দেখিয়া হাসিতে হাসিতে) ওরে ইহাকে ছাড়।

(ট) রাজা। এই আব্দারে ছেলেটীর প্রতি আমার বড়ই স্পৃহা জন্মে। (নিশ্বাস ত্যাগ করিয়া)

(১) ক্বচিৎ দাব ইতি নাস্তি। (২) তাপসীং বিলোক্য হসতি।

(৩) কুত্রচিৎ নিশ্বস্যেতি ন দৃশ্যতে। (৪) মলিনীভবন্তি, মলিনীভবন্তি।

तापसी । साङ्गुलीतर्जनम् । भो ! ण मं गणेसि । पार्श्व-मवलोक्य । को एत्थ इसिकुमाराणं । राजानं दृष्ट्वा । भद्दमुह ! एहि दाव मोआवेहि इमिणा दुम्मोक्खहत्थग्गहेण डिम्भएण बाधीअमाणं बालमइन्दअं (१) । (ठ)

(ठ) भोः ! न मां गणयसि । कोऽत्र ऋषिकुमाराणाम् ? । भद्रमुख ! एहि तावत्, मोचय अनेन दुर्मोचहस्तग्रहेण डिम्भकेन बाध्यमानं बालमृगेन्द्रकम् ।

---

त्वात् मनोहरा वचःप्रवृत्तवाक्याविर्भावो येषां तान्, तथा अङ्काश्रये क्रोडारोहणे प्रणयिनः प्रार्थिनः, तनयान् पुत्रान्, वहन्तस्तथैव क्रोडे धारयन्तः सन्तः, तेषां तनयानाम् अङ्गरजसा गात्रच्युतधूल्या, कलुषीभवन्ति आविलाङ्गा भवन्ति ; तादृशा एव धन्याः, न पुनर्मादृशा निःसन्ताना इति भावः ।

अत्र बालवदने मुकुलासम्भवात् दन्ता मुकुलानीवेत्युपमितसमासस्यैवाश्रयणात् लुप्तोपमा, बालस्य यथावद्व्यापारवर्णनात् स्वभावोक्तिः, तथा तादृशा एव धन्याः, न पुनर्मादृशा इत्यन्यव्यपोहनादार्थी परिसंख्या च, इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः ।

वसन्ततिलका वृत्तम् ॥१७॥

(ठ) तापसीति । साङ्गुलीतर्जनम् अङ्गुल्या तर्जयित्वेत्यर्थः । न गणयसि आज्ञावाक्यत्वेन न मन्यसे । ऋषिकुमाराणां मध्ये कः अत्र विद्यत इति शेषः । भद्राणां जनानां मुख्यः प्रधानस्तत्सम्बोधनम् । दुर्मोचो दुःखेन मोचनीयः हस्तग्रहो हस्तेन

---

বিনা কারণে হাস্য করায় যাহাদের দন্তমুকুল একটু দেখা যায়, অস্পষ্ট বর্ণ উচ্চারণ করায় যাহাদের বাক্য বড়ই মধুর হয় এবং ক্রোড়ে উঠিবার জন্য যাহারা প্রার্থনা করে, এইরূপ পুত্রদিগকে ধারণ করিয়া, পুণ্যবান্ লোকেরাই তাহাদের অঙ্গের ধূলিতে কলুষিত হইয়া থাকে ॥১৭॥

(१) तापसी । हीम्ब । ण मं अप्पं गणेइ । पार्श्वमवलोकयति । दुम्मोअ-हत्थग्गहेण डिम्भएणाए ।

राजा । तथा । इत्युपगम्य सस्मितम् । अयि भो महर्षि-पुत्रक ! (१) (ड)

एवमाश्रमविरुद्धवृत्तिना
संयमी किमिति जन्मतस्त्वया ।
सत्त्वसंश्रयसुखोऽपि दूष्यते
कृष्णसर्पशिशुनेव चन्दनः (२) ॥१८॥

धारणं यस्य तेन, डिम्भकेन बालकेन, बाध्यमानम् आकर्षणादिना पीड्यमानम्, बाल-मृगेन्द्रकं सिंहशिशुम्, मोचय अस्यैव हस्तादिति शेषः ।

"पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः ।

उभयत्रापि अल्पार्थे कप्रत्ययः ।

(ड) राजेति । तथा तदेव करोमि मोचयाम्येवेत्यर्थः । उपगम्य बालकस्य समीपं गत्वा । अयीत्यनुनये । पुत्रकेत्यनुकम्पायां कः ।

एवमिति । एवम् इत्थम्भूता आश्रमविरुद्धा हिंसारूपत्वात् तपोवनविरोधिनी वृत्तिर्व्यवहारो यस्य तेन तादृशेन त्वया सत्त्वे आत्मनि संश्रयः अवलम्बनमेव गुणो

(ঠ) তপস্বিনী। ( অঙ্গুলীদ্বারা তর্জ্জনের সহিত ) ওহে! আমাকে গ্রাহ্য করিলে না? ( পার্শ্বের দিকে দৃষ্টিপাত করিয়া ) ঋষিকুমারদের মধ্যে এখানে কে আছ? ( রাজাকে দেখিয়া ) হে ভদ্রশ্রেষ্ঠ! আসুন দেখি, এই বালক এই সিংহশিশুটীকে বড়ই যন্ত্রণা দিতেছে, ইহার হাত হইতে মুক্ত করা ভারি দুষ্কর; সুতরাং আপনি এই সিংহশিশুটীকে মুক্ত করুন দেখি।

(ড) রাজা। তাহাই করি। ( এই বলিয়া, নিকটে যাইয়া, ঈষৎ হাস্যের সহিত ) ওহে! মহর্ষিপুত্র!

(१)···उपगम्य सस्मितम् ।···महर्षिपुत्र ! ।

(२) संयमः किमिति । सत्त्वसंश्रयसुखोऽपि ।

তাপসী। ভদ্দমুহ! ণ ক্খু এসো ইসিকুমারও (১)। (ঢ)

রাজা। আকারসদৃশং চেষ্টিতমেবাস্য কথয়তি; স্থান-প্রত্যয়াত্তু বয়মেবংতর্কিণঃ। যথাভ্যর্থিতমনুতিষ্ঠন্ বালকস্য স্পর্শমুপলভ্য স্বগতম্ (২)। (ণ)

(ঢ) ভদ্রমুখ! ন খল্বেষ ঋষিকুমারকঃ।

যস্য সঃ পরমাত্মধ্যাননিষ্ঠ ইত্যর্থঃ, অন্যত্র সত্ত্বেন রজস্তমোব্যতিরিক্তগুণেন সংশ্রয়ী ললাটাদৌ তিলকরূপেণ ধারণমেব গুণো যস্য স তাদৃশোঽপি, অস্মদঃ সংযমী তদুৎপাদয়িতা মুনিঃ, কিমিতি কিমর্থম্, কৃষ্ণসর্পস্য বিজাতীয়পন্নগস্য শিশুনা, চন্দনস্তদাখ্যো বৃক্ষ ইব, দূষ্যতে নিষ্ঠুরীজনপ্রাণিপীড়নেন কলুষীক্রিয়তে। কৃষ্ণসর্পশিশুনাপি বিষোদ্গারেণ চন্দনতরুর্দূষ্যতে। মহদনুচিতমিতদিতি ভাবঃ।

অত্র শ্রৌতী পূর্ণোপমালঙ্কারঃ।

"সত্ত্বং দ্রব্যে গুণে চিত্তে ব্যবসায়স্বভাবয়োঃ। পিশাচাদাবাত্মভাবে বলে প্রাণেষু জন্তুষু॥" ইতি হেমচন্দ্রঃ।

রথোদ্ধতা বৃত্তম্—"রান্নরৌ নরলগৌ রথোদ্ধতা" ইতি লক্ষণাৎ ॥১৮॥

(ণ) রাজেতি। আকারসদৃশম্ আকৃত্যনুরূপম্, অস্য বালকস্য, চেষ্টিতমেব দুষ্টাচরণমেব, কথয়তি 'নায়ম্' ঋষিকুমারঃ, ইতি স্পষ্টং সূচয়তি। তর্হি কথং 'সংযমী অস্মদঃ' ইত্যুচ্যত ইত্যাহ স্থানেতি। তু কিন্তু, স্থানপ্রত্যয়াৎ তপস্বিনামিদং স্থানমিতি বিশ্বাসাৎ, বয়ম্ এবংতর্কিণঃ ঋষিকুমার এবায়মিতি সম্ভাবনাকারিণঃ। অতএব অত্র দোষো নাস্তীতি ভাবঃ। যথাভ্যর্থিতং তাপস্যাঃ প্রার্থনানুরূপং দুর্মোচহস্ত-গ্রহাদ্বালমৃগেন্দ্রমোচনম্, অনুতিষ্ঠন্ কুর্বন্।

---

কৃষ্ণসর্পের শিশু যেমন চন্দনবৃক্ষকে দূষিত করে, তুমিও তেমন এইরূপ আশ্রমের বিরুদ্ধ ব্যবহার করিয়া, সত্ত্বগুণাবলম্বী ও জিতেন্দ্রিয় জন্মদাতাকে কেন দূষিত করিতেছ? ॥১৮॥

(ঢ) তপস্বিনী। ভদ্রশ্রেষ্ঠ! এ বালক ঋষিকুমার নহে।

---

(১)···খলু এষ···। (২)···বালস্পর্শমুপলভ্য আত্মগতম্।

অনেন কস্যাপি কুলাঙ্কুরেণ
স্পৃষ্টস্য গাত্রে সুখিতা মমৈবম্।
কাং নির্বৃতিং চেতসি তস্য কুর্য্যাৎ
যস্যায়মঙ্গাৎ কৃতিনঃ প্রসূতঃ (১) ॥১৮॥

তাপসী। উভৌ বিলোক্য। অচ্ছরীঅং অচ্ছরীঅং (২)। (ত)

রাজা। আর্য্যে! কিমিব?। (থ)

(ত) আশ্চর্য্যমাশ্চর্য্যম্।

অনেনেতি। কস্যাপি অনির্দ্দিষ্টজনস্য, কুলাঙ্কুরেণ বংশাঙ্কুরেণ, অনেন বালকেন কর্ত্রা, গাত্রে স্পৃষ্টস্য মম, এবমিত্থম্ অনির্ব্বচনীয়েত্যর্থঃ, সুখিতা সুখশালিত্বম্; কিন্তু অয়ং বালকঃ, যস্য কৃতিনো মহাপুরুষস্য, অঙ্গাৎ প্রসূত উৎপন্নঃ, তস্য কৃতিনঃ, চেতসি কাং নির্বৃতিং কীদৃশং সুখম্, কুর্য্যাৎ, তন্ন জানে ইতি ভাবঃ।

অত্র অর্থাপত্তিরলঙ্কারঃ।

"নির্বৃতিস্তু সুখে জীর্ণে" ইতি ধরণিঃ।

উপেন্দ্রবজ্রেন্দ্রবজ্রয়োর্মেলনাদুপজাতির্বৃত্তম্ ॥১৯॥

(ত) তাপসীতি। উভৌ দুষ্মন্তবালকৌ।

(ণ) রাজা। ইহার আকৃতির অনুরূপ ব্যবহারই বলিতেছে যে, এ ঋষিকুমার নহে; তবে এই জায়গার বিশ্বাসে আমি এরূপ মনে করিয়াছিলাম। (তপস্বিনীর প্রার্থনা অনুসারে সিংহশিশুটীকে মুক্ত করিয়া দিয়া, বালকের স্পর্শ অনুভব করিয়া স্বগত)

কাহারও বংশাঙ্কুর এই বালকটী আমার গাত্র স্পর্শ করিয়াছে, তাহাতে আমারই এইরূপ সুখ জন্মিতেছে; কিন্তু যে পুণ্যাত্মার অঙ্গ হইতে এ জন্মিয়াছে, তাহার চিত্তে কিরূপ আনন্দ জন্মাইয়া থাকে ॥১৯॥

(ত) তপস্বিনী। (দুই জনকে দেখিয়া) আশ্চর্য্য! আশ্চর্য্য!।

(১)…সুখং মনৈবম্। কৃতিনঃ প্রকৃঃ। (২)…উভৌ নির্বর্ণ্য।

तापसी । इमस्स बालअस्स असम्बद्धे वि भद्दमुहे संवादिणी आकिदित्ति विम्हिदम्हि । अवि अ वामसीलो वि भविअ अवरिचिदस्स वि दे वअणेण पइदित्थो संवुत्तो (१) । (द)

राजा । बालमुपलालयन् । आर्य्ये ! न चेयम् मुनिकुमारो-ऽयम्, तत् कोऽस्य व्यपदेशः (२) । (ध)

---

(द) अस्य बालकस्य असम्बद्धेऽपि भद्रमुखि संवादिनी आकृतिरिति विस्मितास्मि । अपि च वामशीलोऽपि भूत्वा अपरिचितस्यापि ते वचनेन प्रकृतस्थः संवृत्तः ।

---

(थ) राजेति । किमिव आश्चर्य्यमिति शेषः ।

(द) तापसीति । असम्बद्धेऽपि सर्वप्रकारसम्पर्करहितेऽपि भद्रमुखि सज्जनप्रधाने त्वयि, अस्य बालकस्य आकृतिः संवादिनी त्वदाकृतेः सुसदृशी, इति हेतोः । तथा च पितापुत्रत्वादिसम्बन्धशालिनयोर्द्वयोः सर्वत्रैव आकृतिगतवैसादृश्यमेव दृश्यते, अत्र तु युवयोस्तथात्वेऽपि यदाकृतिगतसौसादृश्यं तदेवैकमाश्चर्य्यमिति भावः । वामशीलोऽपि शिष्टप्रतिकूलस्वभावोऽपि भूत्वा एष बालक इति शेषः । प्रकृतिस्थः स्वभावस्थः । इदं द्वितीयमाश्चर्य्यमित्याशयः ।

(ध) राजेति । उपलालयन् पाणिना परामृशन् । तत् तदा, अस्य बालकस्य व्यपदिश्यते निर्द्दिश्यते अनेनेति व्यपदेशः कौलिकं नाम ।

---

(থ) রাজা। আর্য্যে! কি রকম?।

(দ) তপস্বিনী। আপনি ইহার সহিত সম্পর্কবিহীন হইলেও, আপনাদের উভয়ের আকৃতি এক রকম দেখিতেছি বলিয়া, আশ্চর্য্যান্বিত হইয়াছি। আরও, এ বালক চঞ্চলস্বভাব হইলেও এবং আপনি অপরিচিত হইলেও, আপনার বাক্যে এ প্রকৃতিস্থ হইয়াছে।

(१)···बालअस्स रूवसंवादिणी दे आइदि त्ति विम्हाविदम्हि । अवरिइदस्स वि दे अप्पडिलोमो संवुत्तो । (२)···अथ कोऽस्य···।

तापसी। पौरवोत्ति (१)। (न)

राजा। स्वगतम्। कथमेकान्ववायोऽयमस्माकम्। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। प्रकाशम्। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम् (२)। (प)

भवनेषु सुधासितेषु पूर्वं (३)
क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चात्
तरुमूलानि गृहीभवन्ति तेषाम् ॥२०॥

---

(ध) पौरव इति।

(न) तापसीति। पुरोरपत्यं पुमानिति पौरव इति व्यपदेश इति शेषः।

(प) राजेति। हर्षे कथं शब्दः। एकान्ववायः अभिन्नवंशः अतः खलु एकान्ववायत्वादेव कदाचिदेकवंशोत्पन्नयोरप्याकृतिसौसादृश्यदर्शनादिति भावः। अत्रभवती माननीया तापसी, मदनुकारिणं मदाकृतिसमानाकृतिकम्। पौरवाणां पुरुवंशीयानाम्, अन्त्यं चरमवयसि धारणीयम्, कुलव्रतं कौलिको नियमः।

किन्तत् कुलव्रतमित्याह भवनेष्विति। ये पौरवाः, पूर्वं यौवने वयसि, क्षितिरक्षार्थं पृथिवीपरिपालनार्थं राजकार्य्यनिर्वाहार्थमिति यावत्, सुधया चूर्णलेपेन सितेषु शुभ्रवर्णेषु,

(ধ) রাজা। (বালকটীর গায়ে হাত বুলাইয়া) আর্য্যে! এ যদি মুনিকুমার না হয়, তবে ইহার কৌলিক নাম কি?।

(ন) তপস্বিনী। পৌরব এই নাম।

(প) রাজা। (স্বগত) ভাল! এ যে আমাদের এক বংশ। এই জন্যই, ইনি ইহাকে আমার অনুকরণকারী মনে করিতেছেন। (প্রকাশ্যে) পুরুবংশীয়দিগের ইহা শেষ কৌলিক নিয়ম আছে বটে।

(१)···पुरुवंशी। (२)···आत्मगतम्। कथमेकान्वयी मम···। (३)···रत्नाधिकेषु···।

कथं पुनरात्मगत्या मानुषाणामेष विषयः (१)। (फ)

तापसी। जधा भद्दमुही भणादि। किन्तु अच्छरा-

भवनेषु अट्टालिकासु, निवासमवस्थितिम्, इच्छन्ति कामयन्ते, तेषामेव पौरवाणां पश्चात् वार्द्धके वयसि, नियतमवश्यम्विहितम् एकं केवलं यतिव्रतं तपस्विनियमो येषु तानि तरोमूलानि, तरुमूलानि तपोवनवृक्षमूलानि, गृहीभवन्ति अगृहाण्यपि निवासाश्रयत्वात् गृहाणि सम्पद्यन्ते। "पुत्रेषु दारान् निक्षिप्य वनं गच्छेत् सहैव वा" इति याज्ञवल्क्य-वचनात् दारैः सह वनगमनपक्षे तत्र रागोदयेन तत्रापि पुत्रोत्पत्तिसम्भवः। एवञ्च कश्चित् पुरुवंशीयः चरमे वयसि दारैः सहागतः, रागोदयाच्च तस्यैवायं पुत्रो जात इति भावः।

अत्र तरुमूलेषु गृहत्वारोपस्य प्रकृतयतिव्रताचरणोपयोगितया परिणामालङ्कारः। सुधासितेष्वित्यनेन भवनानामट्टालिकाश्रुपत्वम्, तेन च तद्वासिनां राजत्वप्रतीतिरिति नापुष्टार्थत्वदोषः।

"सुधाश्रुते च धीमूर्वालेपनस्नुहिकासु च" इति विश्वः।

औपच्छन्दसिकं वृत्तम् ॥२०॥

(फ) पुनराश्चर्ये कथमिति। मानुषाणां मर्त्यलोकवासिनाम्, एष स्वर्गीयदेशः, कथं पुनः, आत्मगत्या विमानादिकं विना केवलस्वभावगमनेन, विषयः निवासयोग्यः स्यात्, कथमपि नैत्यर्थः। तेन च कथं पौरवः कश्चित् वानप्रस्थतपश्चरणाय सदार एवात्रागच्छेत् कथं वा तत्पुत्रसम्भव इत्याशयः।

"आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः।

---

যাঁহারা প্রথম বয়সে পৃথিবী পরিপালনের জন্য, চূর্ণলেপে শুভ্রবর্ণ ভবনে বাস করিতে ইচ্ছা করেন, শেষ বয়সে তাঁহাদেরই বৃক্ষমূল গৃহ হইয়া থাকে এবং সেখানে একমাত্র তপস্বীর নিয়মই চলিয়া থাকে ॥২০॥

(ফ) কিন্তু এই স্থান, মনুষ্যদিগের স্বাভাবিক গতির বিষয় হয় কি প্রকারে ?।

---

(१) सत्यासम्। न पुनः···।

सम्बन्धेण, उणाइमस्स बालअस्स जणणी इध ज्जेव देवगुरुणो तवोवणे पसूदा (१)। (व)

राजा। स्वगतम्। हन्त! द्वितीयमिदमाशाजननम्। प्रकाशम्। अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी? (२)। (भ)

तापसी। को तस्स धम्मदारपरिच्चाइणो णामं कीत्तइ-स्सदि (३)। (म)

---

(व) यथा भद्रमुखो भणति। किन्तु अप्सरःसम्बन्धेन, पुनरस्य बालकस्य जननी इहैव देवगुरोस्तपोवने प्रसूता।

---

(व) समाधत्ते तापसीति। भद्रमुखो भवान्, यथा यथार्थमेव, भणति, आत्मगत्या मानुषाणामेषः अविषय एवेत्यर्थः; अप्सरसः सम्बन्धेन यत्किञ्चित्सम्पर्क-सत्त्वेन हेतुना। देवानां गुरुः पिता कश्यपस्तस्य। कयाचिदप्सरसा आनीता जननी अत्र प्रसूतेत्यर्थः।

(भ) राजेति। हर्षे हन्तशब्दः। इदम् अप्सरःसम्बन्धेनात्र प्रसवनम्, द्वितीयम् आशाजननम् एतद्बालकगतपुरुत्वविषयकाशंसाकरम्। एकमाशाजननन्तु आवयोराकृति-गतसौसादृश्यमित्याशयः। तत्रभवती तपोवनस्थितत्वेनैव मान्या, सा अस्य बालकस्य जननी, का आख्या यस्य तस्य। पुरुवंशीयत्वेनैव राजर्षित्वावधारणात् राजर्षे-रित्युक्तम्।

---

(ব) তপস্বিনী। ভদ্রশ্রেষ্ঠ যথার্থই বলিতেছেন; কিন্তু এই বালকের মাতা, অপ্সরার সহিত সম্পর্কবশতঃ, দেবপিতা কশ্যপের এই আশ্রমেই প্রসব করিয়াছিলেন।

(ভ) রাজা। (স্বগত) ভাল! ইহা দ্বিতীয় আশাজনক। (প্রকাশ্যে) তিনি কিনামক রাজর্ষির স্ত্রী?।

---

(१)…इमस्स जणणी एत्थ देवगुरुणो…। (२) राजा। अपवार्य। हन्त!…। प्रकाशम्। सा…। (३)…णाम संकित्तिदुं चिन्तइस्सदि।

রাজা। স্বগতম্। কথমিয়ং কথা মামেব লক্ষ্যীকরোতি। যাবদস্য শিশোর্মাতরং নামতঃ পৃচ্ছেয়ম্। বিচিন্ত্য। অথবা অনার্য্যঃ খলু পরদারপৃচ্ছাব্যাপারঃ (১)। (য)

প্রবিশ্য মৃন্ময়ূরহস্তা তাপসী। সব্বদমণ! পেক্খ সউন্তলাবণ্ণং। (র)

(ম) কস্তস্য। ধর্ম্মদারপরিত্যাগিনো নাম কীর্ত্তয়িষ্যতি।

(র) সর্ব্বদমন! প্রেক্ষস্ব শকুন্তলাবণ্যম্ (শকুন্তলাবর্ণম্)।

---

(ম) তাপসীতি। কো জনঃ, কীর্ত্তয়িষ্যতি অপি তু কোঽপি নেত্যর্থঃ; ধর্ম্মদার-পরিত্যাগেন পাতিত্যোদয়াৎ পতিতস্য চ নামকীর্ত্তনে পাপোৎপত্তেরিতি ভাবঃ। তথা চ গৌতমঃ—

"পতিতাঽত্যাগ্যপতিতত্যাগিনশ্চ পতিতাঃ।"

গারুড়ে—"স্পর্শনাদ্ভাষণাচ্চাপি পরস্য শ্রবণাদপি।

দশাংশং পুণ্যপাপানাং নিত্যং প্রাপ্নোতি মানবঃ॥"

অত্র পরিভাষণং নাম নির্ব্বহণসন্ধ্যঙ্গম্। যথা দর্পণে—

"বদন্তি পরিভাষণম্। পরিবাদকৃতং বাক্যম্।"

(য) রাজেতি। ইয়ং কথা তাপস্যুক্তমিদং বাক্যম্, মামেব লক্ষ্যীকরোতি বিষয়ীকরোতি, শকুন্তলাপরিত্যাগেন মমৈব ধর্ম্মদারপরিত্যাগাদিত্যাশয়ঃ। যাবচ্ছব্দো বাক্যালঙ্কারে। নামতো নাম্না। অস্য শিশোর্মাতুর্নাম কিং জিজ্ঞাসেয় ইত্যর্থঃ। স্বয়মেব স্বসন্দেহং সমাধত্তে অথবেতি। পরদারপৃচ্ছাব্যাপারঃ পরস্ত্রীবিষয়কপ্রশ্নকরণম্, অনার্য্যঃ খলু অসাধুরেব, তৎসম্পৃক্তত্বপ্রতীতিসম্ভবাদিত্যভিপ্রায়ঃ।

---

(ম) তপস্বিনী। কে সেই ধর্ম্মপত্নী-পরিত্যাগীর নাম কীর্ত্তন করিবে।

(য) রাজা। (স্বগত) এ কথা আমাকেই লক্ষ্য করিতেছে কেন? তবে কি এই বালকের মাতার নামই জিজ্ঞাসা করিব? (চিন্তা করিয়া) অথবা পরস্ত্রীর বিষয় জিজ্ঞাসা করা ভাল না।

---

(১) রাজা। ইয়ং খলু কথা···। যদি তাবদস্য শিশোর্নামতো মাতরং পৃচ্ছামি অথবা অনার্য্যঃ পরদারব্যবহারঃ।

बालः। सदृष्टिक्षेपम्। कहिं सा मे अम्बा (१)। (ल)

उभे। प्रहसतः (२)। (व)

प्रथमा। णामसारिस्सेण उवच्छन्दिदो मादिवच्छलो (३)। (श)

---

(ल) कस्मिन् सा मे अम्बा।

---

(र) प्रविश्येति। सर्वान् प्रतिपक्षवीरान् दमयति स्वशक्त्या खर्वीकरोतीति सर्व-दमनः, तत्सम्बोधनम्। शकुन्तस्य त्वदर्थमेवानीतस्य मृन्मयमयूरपक्षिणः लावण्यं सौन्दर्य्यम्, प्रेक्षस्व पश्य, एतत्प्रेक्षणेन च एनं गृहीत्वा शिंहशिशुं मुञ्चेत्याशयः।

अन्यत्र तु शकुन्तलायास्तदाख्याया निजमातुः वर्णं रूपं प्रेक्षस्वेत्यर्थः।

अतएवेदं शकुन्तलारूपप्रधानार्थान्तराक्षेपात् साहित्यदर्पणोक्तं चतुर्थं पताका-स्थानम्। यथा तत्रैव—

"द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्॥"

"वर्णो गुणाक्षरयशः शुक्लादिब्राह्मणादिषु च। वर्णः स्तुतौ कथायाञ्च वर्णः स्यात् रूपभेदयोः॥" इति शाश्वतः।

(ल) बाल इति। दृष्टिक्षेपः शकुन्तला आगता नवेति परीक्षार्थः। सा शकुन्तलाख्या, अम्बा माता।

(व) उभे इति। तापस्यावित्यर्थः। प्रहसतः नामश्रवणमात्रेणैव मातुरन्वेषण-कौतुकादित्याशयः।

(র) তপস্বিনী। ( মৃন্ময়ূরহস্তে প্রবেশ করিয়া ) সর্ব্বদমন! শকুন্তলাবণ্য দেখ।

(ল) বালক। ( দৃষ্টিক্ষেপের সহিত ) আমার সে মাতা কোথায়?।

(ব) তপস্বিনীরা দুই জনই। ( হাস্য করিলেন। )

---

(१)···मे अज्जु। (२) क्वचिदयं पाठो नास्ति।

(३) उभे। वञ्चिदो माउवच्छलो।

द्वितीया । इमस्स मोरस्स रमणीअदं पेक्खत्ति भणि-दोसि (१) । (ष)

राजा । स्वगतम् । किं शकुन्तलेत्यस्य मातुराख्या । अथवा सन्ति पुनर्नामधेयसादृश्यानि । अपि नाम मृगतृष्णिकेव नाम-मात्रप्रस्तावो मे विषादाय कल्पते (२) । (स)

(श) नामसादृश्येन उपच्छन्दितो मातृवत्सलः ।

(ष) अस्य मयूरस्य रमणीयतां प्रेक्षस्वेति भणितोऽसि ।

(श) प्रथमेति । नामसादृश्येन शकुन्तलेति नामाक्षराणामेकानुपूर्वीकत्वेन कर्त्रा, मातरि वत्सलः स्नेहवान् मातृवत्सलः, अयं बालक इति शेषः, उपच्छन्दितः मातृनिमित्तं प्रलोभितः ।

(ष) द्वितीयेति । भणितोऽसि 'प्रेक्षस्व शकुन्तलावण्यम्' इति पूर्ववाक्येनेत्यर्थः ।

(स) राजेति । नामधेयसादृश्यानि एकानुपूर्वीकनामधेयानि सन्ति । अतएव न तत् आग्रहादाख्यमिति भावः । मृगतृष्णिकेव जलपिपासोर्मरीचिकेव, नाममात्रप्रस्तावः केवलशकुन्तलेतिनामोल्लेखः, मे मम, विषादाय कल्पते केवलं विषादमेव जनयितुं प्रवर्त्तते, न पुनस्तत्प्राप्तिसम्भावनया आनन्दविन्दुमपीति भावः ।

अत्र शकुन्तलानुरागरूपस्य मुखसन्धिनिवेशितस्य बीजस्य पुनरुपस्थितेः सन्धिर्नाम निर्वहणसन्धेरङ्गम् । यथा दर्पणे—

"बीजोपगमनं सन्धिः ।"

(শ) প্রথম তপস্বিনী। নামের সাদৃশ্যই এই মাতৃবৎসলকে লুব্ধ করিয়াছে।

(ষ) দ্বিতীয়া তপস্বিনী। এই ময়ূরের সৌন্দর্য্য দেখ—এই কথাই তোমাকে বলিয়াছি।

(१) वत्स ! इमस्स सिरिङ्गामारस्स रूअलावण्णं···।

(२) राजा । आत्मगतम् । किं वा···।

बालः। अन्तिए! रोअदि मे चडुलके एसे मोले। इति क्रीड़नकमादत्ते (१)। (छ)

प्रथमा। विलोक्य सावेगम्। अम्मो! रक्खाकाण्डओ मे मणि-वन्धे ण दीसदि (२)। (घ)

राजा। आर्य्ये! अलमावेगेन। नन्वयमस्य सिंहशावकस्य विमर्द्दात् परिभ्रष्टः। इत्यादातुमिच्छति (३)। (क)

(छ) अन्तिके! रोचते मे चटुलक एष मयूरः।

(घ) अहो! रक्षाकाण्डकः अस्य मणिबन्धे न दृश्यते।

(छ) बाल इति। अन्तिके! ज्येष्ठभगिनि!। चटुलकश्चञ्चलः। क्रीड़नकं खेलोपकरणीभूतं मृन्मयूरम्, आदत्ते गृह्णाति।

"चटुलश्चञ्चले प्रोक्तः" इति शब्दार्णवः। "अन्तिका भगिनी ज्येष्ठा" इत्यमरः।

(घ) प्रथमेति। अस्य बालकस्य, मणिबन्धे हस्तस्य वलयधारणस्थाने, रक्षाकाण्डः रक्षणार्थमाबद्धः सभूललताविशेषः।

"काण्डो मूलं तरोरपि" इत्यनेकार्थध्वनिमञ्जरी।

(স) রাজা। (স্বগত) ইহার মার নাম কি শকুন্তলা? অথবা নামের সাদৃশ্য আছে (দেখিতে পাওয়া যায়)। মরীচিকার ন্যায় কেবল 'শকুন্তলা' এই নামমাত্রের উল্লেখ আমার বিষাদ জন্মাইতেছে।

(ছ) বালক। ভগিনি! এই চঞ্চল ময়ূরটীতে আমার রুচি আছে। (এই বলিয়া, সেই ময়ূরটী গ্রহণ করিল।)

(ক্ষ) প্রথম তপস্বিনী। (দেখিয়া উদ্বেগের সহিত) ওমা! ইহার হাতে রক্ষাসূত্র দেখিতেছি না।

(१) बालः। अज्जुए! रोअइ मे एसो भद्दमोरओ।

(२)…सोद्वेगम्।…रक्खाकरण्डअं…।

(३) राजा। अलमावेगेन। नन्विदमस्य सिंहशावविमर्द्दात् परिभ्रष्टम्।

উভে। মা ক্খু মা ক্খু এদং। বিলোক্য। কধং গহিদো জ্জেব। বিস্ময়াদুরোনিহিতহস্তে পরস্পরমবলোকয়তঃ (১)। (খ)

রাজা। কিমর্থং ভবতীভ্যাং প্রতিষিদ্ধোঽস্মি (২)। (গ)

প্রথমা। সুণাদু মহাভাও। এসা মহাপ্পহাবা অবরাজিদা ণাম সুরমহোসহী, ইমস্স দারঅস্স জাদকম্মসমএ ভঅবদা মারীএণ দিণ্ণা। এদং কিল মাদাপিদরো অপ্পাণং চ বজ্জিঅ অবরো ভূমিপদিদং ণ গেহ্নাদি (৩)। (ঘ)

(খ) মা খলু মা খলু এতম্। কথং গৃহীত এব।

---

(ক) রাজেতি। আবেগেন রক্ষাকাণ্ডাদর্শনাদুদ্বেগেন। বিমর্দ্দাৎ এতদ্বালক-কর্ত্তৃকসংঘর্ষাৎ অয়ং ভূতলে দৃশ্যমানঃ, পরিভ্রষ্টঃ হস্তাৎ বিচ্যুতঃ, রক্ষাকাণ্ড ইতি শেষঃ। আদাতুং ভূতলাৎ রক্ষাকাণ্ডং গৃহীতুম্।

(খ) উভে ইতি। এতং রক্ষাকাণ্ডম্, গৃহাণেতি শেষঃ। উরসি বক্ষসি নিহিতৌ স্থাপিতৌ হস্তৌ যাভ্যা তে। অয়ন্তু বিস্ময়স্বভাবঃ।

(গ) রাজেতি। প্রতিষিদ্ধোঽস্মি রক্ষাকাণ্ডগ্রহণে ইতি শেষঃ।

---

(ক) রাজা। আর্য্যে! উদ্বেগ করিবেন না। সিংহশিশুর সংঘর্ষের সময় ইহার হাত হইতে তাহা এই পড়িয়া গিয়াছে। (এই বলিয়া গ্রহণ করিতে ইচ্ছা করিলেন।)

(খ) তপস্বিনীরা দুই জনই। রক্ষাসূত্র ধরিবেন না, ধরিবেন না। (দেখিয়া) হায়! ধরিলেনই। (বিস্ময়বশতঃ বুকে হাত দিয়া, পরস্পর পরস্পরের প্রতি দৃষ্টিপাত করিতে লাগিলেন।)

(গ) রাজা। আপনারা কি জন্য আমাকে নিষেধ করিলেন?।

---

(১) উভে। মা খু এদং অবলম্বিঅ। কহং গহীদং জ্জেব।

(২) রাজা। কিমর্থং প্রতিষিদ্ধাঃ স্থঃ।

(৩) প্রথমা।...এসা অবরাইআ ণাম ওসহী ইমস্স জাদকম্মসমএ।

राजा। अथ गृह्णाति। (ङ)

प्रथमा। तदो सप्पो भविअ तं दंसइ। (च)

राजा। अत्रभवतीभ्यां कदाचिदन्यत्र प्रत्यक्षीकृत-मिदम्? (१)। (छ)

(घ) शृणोतु महाभागः। एषा महाप्रभावा। अपराजिता नाम सुरमहौषधिः, अस्य दारकस्य जातकर्म्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरौ आत्मानञ्च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति।

(च) ततः सर्पो भूत्वा तं दशति।

(घ) प्रथमेति। सुरमहौषधिः देवलोकजातलताविशेषः, दारकस्य बालकस्य जातकर्म्मसमये जातकर्म्माख्यसंस्कारकरणकाले, मारीचेन कश्यपेन। एताम् अपरा-जिताम्।

प्रसवात् परं नाडीच्छेदनात् पूर्वं जातकर्म्मसंस्कारः कर्त्तव्यः। यथा मनुः—

"प्राङ् नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते।"

(ङ) राजेति। अथेति प्रश्ने, गृह्णाति चेदित्यर्थः।

(च) प्रथमेति। ततस्तदा, सर्पो भूत्वा इयमेवापराजितेति शेषः।

(छ) राजेति। अत्रभवतीभ्यां तापसत्वेन माननीयाभ्यां युवाभ्याम्, अन्यत्र सन्निधाने, इदम् अपराजितायाः सर्पभवनानन्तरदंशनम्।

(ঘ) প্রথম তপস্বিনী। মহাশয় শুনুন—ইহা অপরাজিতানামে মহাপ্রভাবসম্পন্ন দেবমহৌষধি, এই বালকের জাতকর্ম্মের সময় ভগবান্ কশ্যপ দিয়াছেন। ইহা ভূতলে পতিত হইলে, মাতা, পিতা এবং নিজে ছাড়া, অন্যে গ্রহণ করে না।

(ঙ) রাজা। যদি গ্রহণ করে?।

(চ) প্রথম তপস্বিনী। তাহা হইলে সর্প হইয়া তাহাকে দংশন করে।

(१) राजा। भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?।

উভে। অণেঅসো। (জ)

রাজা। সহর্ষমাত্মগতম্। তৎ কিং খল্বিদানীং পূর্ণমাত্মনো মনোরথং নাভিনন্দামি। ইতি বালকং পরিষ্বজতে (১)। (ঝ)

দ্বিতীয়া। সুব্বদে! এহি ইমং বুত্তন্তং ণিঅমবাবড়াএ সউন্তলাএ ণিবেদেম্হ। ইতি নিষ্ক্রান্তে। (ঞ)

(জ) অনেকশঃ।

(ঞ) সুব্রতে! এহি ইমং বৃত্তান্তং নিয়মব্যাপৃতায়াঃ শকুন্তলায়া নিবেদয়াবঃ।

---

(জ) উভে ইতি। অনেকশঃ প্রত্যক্ষীকৃতমিত্যন্বয়ঃ।

(ঝ) রাজেতি। তৎ তস্মাৎ আকৃতিগতসাদৃশ্যেন, অপ্সরঃসম্বন্ধমানীতায়াঃ প্রসবেন, একান্বয়ত্বেন, মাতুঃ শকুন্তলানামকত্বেন, ময়া গৃহীতায়া অপি অপরাজিতায়া অস্পর্শনেন চ 'অয়ং মৎপুত্র এব' ইতি নিশ্চয়াদিত্যর্থঃ, পূর্ণং পুত্রলাভেন সফলম্, মনোরথং পুত্রাভিলাষম্, নাভিনন্দামি এতদালিঙ্গনাদিনা নাদ্রিয়ে, অবশ্যমেবাভিনন্দামীত্যর্থঃ: পরিষ্বজতে আলিঙ্গতি।

অত্র আনন্দো নাম নির্বহণসন্ধ্যঙ্গম্। যথা দর্পণে—

"আনন্দো বাঞ্ছিতাগমঃ।"

(ঞ) দ্বিতীয়েতি। নিয়মব্যাপৃতায়াঃ পতিপ্রাপ্তয়ে ব্রতনিয়তায়াঃ, শকুন্তলায়াঃ সমীপে ইতি শেষঃ।

---

(ছ) রাজা। আপনারা কখনও ইহা অন্যের পরে প্রত্যক্ষ করিয়াছেন?।

(জ) তপস্বিনীরা দুই জনই। অনেক বার।

(ঝ) রাজা। (আনন্দের সহিত স্বগত) তাহা হইলে, এখন আমার অভিলাষ পূর্ণ হইয়াছে; তবে কেন আদর করিব না। (এই বলিয়া বালকটীকে আলিঙ্গন করিলেন।)

---

(১)...কথমিব সম্পূর্ণমপি মে মনোরথং নাভিনন্দামি।

बालः । मुञ्च मं मुञ्च मं, अज्जाए सआसं गमिस्सं (१) । (ट)

राजा । पुत्र ! मयैव सह मातरमभिनन्दिष्यसि (२) । (ठ)

बालः । दुस्सन्तो मम तादो, ण क्खु तुमं । (ड)

राजा । एष विवाद एव मां प्रत्याययति (३) । (ढ)

ततः प्रविशत्येकवेणीधरा शकुन्तला । (ण)

शकु । सवितर्कम् । विआरकाले वि पइदित्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसंसो अत्तणो भाअधेएसुं । अधवा

(ट) मुञ्च मां मुञ्च माम्, अम्बायाः सकाशं गमिष्यामि ।

(ड) दुष्मन्तो मम तातः, न खलु त्वम् ।

(ढ) राजेति । एष विवाद एव 'पुत्र !' इति सम्बोधनवाक्यस्य 'दुष्मन्त' इत्यादि-विरुद्धवाक्यमेव, मां प्रत्याययति त्वत्पितृत्वेन विश्वासयति, ममैव दुष्मन्तत्वादिति भावः ।

(ण) तत इति । एकवेणीधरा विरहनियमादिति भावः ।

(ঞ) দ্বিতীয় তপস্বিনী। সুব্রতা! আয়, এই বৃত্তান্ত ব্রতনিরত শকুন্তলাকে গিয়া জানাই। ( এই বলিয়া চলিয়া গেলেন। )

(ট) বালক। আমাকে ছাড়, আমাকে ছাড়; আমি মায়ের কাছে যাইব।

(ঠ) রাজা। পুত্র! আমার সহিতই, মাতার আদর করিবে।

(ড) বালক। দুষ্মন্ত আমার পিতা; তুমি নও।

(ঢ) রাজা। এই বিবাদই ত আমার বিশ্বাস জন্মাইতেছে।

(ণ) তদনন্তর মস্তকে একটীমাত্র বেণী ধারণ করিয়া শকুন্তলা প্রবেশ করিল।

(१) मुञ्चसु मं जाव अज्जूए सआसं गमिस्सं ।

(२) पुत्रक ! मया सहैव… । (३) राजा । सस्मितम् ।…एव प्रत्याययति ।

জধা মিস্সকেসীএ মে আচক্খিদং তধা সম্ভাবীঅদি এদং ।
ইতি পরিক্রামতি (১) । (ত)

রাজা । শকুন্তলাং বিলোক্য সহর্ষখেদম্ । অয়ে ! সেয়মত্রভবতী শকুন্তলা—(২) (থ)

---

(ত) বিকারকালেঽপি প্রকৃতিস্থাং সর্বদমনস্য ঔষধিং শ্রুত্বা ন মে আশংসা আত্মনো ভাগধেয়েষু । অথবা যথা মিশ্রকেশ্যা মে আখ্যাতং তথা সম্ভাব্যতে এতত্ ।

---

(ত) শকু ইতি । বিতর্কেণ বিতর্কভাবেন ভ্রূসমুন্নমনাদিনা সহেতি সবিতর্কম্ । বিকারকালেঽপি অপরিচিতপুরুষেণ গ্রহণাত্ সর্পত্বপ্রাপ্ত্যা স্বরূপান্যথাভাবপ্রাপ্তিসময়েঽপি, প্রকৃতিস্থাং স্বভাবস্থাম্ অপরাজিতারূপেণৈব স্থিতামিতি যাবত্, সর্বদমনস্য ঔষধিং মারীচদত্তাম্, শ্রুত্বা বিদ্যমানায়া ইতি শেষঃ । অতো নৈককর্তৃকত্বহানিঃ । ভাগধেয়েষু ভাগ্যেষু ভাগ্যজন্যপতিপ্রাপ্তাবিত্যর্থঃ, ন আশংসা ন আশা জায়তে আত্মনো দুর্দশা-দর্শনেন তথাবিধভাগ্যাভাবস্যৈব নির্ণয়াদিতি ভাবঃ । মে মম সমীপে আখ্যাতং রাজ্ঞঃ পুনঃ স্মরণমিত্যর্থঃ । তথা তেনৈব পুনঃ স্মরণেন, এতত্ অত্রাগমনম্, সম্ভাব্যতে ময়া মন্যতে । পরিক্রামতি রাজ্ঞঃ সমীপং গন্তুং পদক্ষেপং করোতি ।

অত্র মিশ্রকেশ্যুক্তার্থপ্রদর্শনাত্ পূর্ববাক্যং নাম উপসংহারসন্ধ্যঙ্গম্ । তথা চ দর্পণে—

"পূর্ববাক্যন্তু বিজ্ঞেয়ং যথোক্তার্থোপদর্শনম্ ।"

---

(ত) শকুন্তলা । ( বিতর্কের সহিত ) সর্বদমনের ওষধি, বিকৃত হইবার সময়েও, স্বাভাবিক অবস্থাতেই আছে ইহা শুনিয়াও, নিজের ভাগ্যের প্রতি আমার আশা হইতেছে না । অথবা মিশ্রকেশী আমার নিকট যেরূপ বলিয়াছে, তাহাতেই ইহা ঘটিয়াছে, ইহা আমি মনে করি । (এই বলিয়া পদক্ষেপ করিতে লাগিল । )

---

(১) শকুন্তলা । বিআর···ণ মে আসা আসি অপ্পণো । অহবা জহ সাণু-মদীএ আঅক্খিদং তহ সংভাবিঅই এদং ।

(২) রাজা । শকুন্তলাং বিলোক্য । অয়ে···শকুন্তলা । যৈষা ।

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्त्ति ॥२१॥

(थ) राजेति। दुर्लभप्राणप्रियतमादर्शनात् हर्षः तस्या विकृतवेषदर्शनेन दुरवस्थावधारणाच्च खेदः, ताभ्यां सहेति तत्। अयि इति सम्भ्रमे। या निरतिशया-दरेण गृहीता परं मोहेन प्रत्याख्याता च सेयमित्यर्थः।

वसने इति। परिधूसरे संस्काराभावात् धूलिभिः सर्वतोभावेन धूसरवर्णे, वसने परिधानोत्तरीयरूपाभ्यां वस्त्रयुगलम्, वसाना परिदधाना, नियमेन उपवासादिव्रतेन क्षामं क्षीणं मुखं यस्याः सा, धृता एका वेणिः कुन्तलरज्जुर्यया सा, तथा शुद्धं पवित्रं शीलं स्वभावो यस्याः सा, अतिनिष्करुणस्य गर्भावस्थायामेव परित्यागात् अत्यन्तनिर्दयस्य मम, दीर्घं चिरकालीनम्, विरहव्रतं वियोगनियमम्, बिभर्त्ति धारयति। महादुःख-करमेतदिति भावः।

वियोगनियममाह हारीतो विष्णुधर्म्मोत्तरञ्च—

"आर्त्तार्त्ते मुदिते हृष्टा वियोगे मलिना कृशा।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥"
"मण्डनं वर्जयेन्नारी तथा प्रोषितभर्त्तृका।
देवताराधनपरा तिष्ठेद्भर्त्तृहिते रता॥"

दर्पणे च—"प्रवासो भिन्नदेशित्वं कार्य्याच्छापाच्च सम्भ्रमात्।
तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः॥"

औपच्छन्दसिकं वृत्तम् ॥२१॥

---

(থ) রাজা। ( শকুন্তলাকে দেখিয়া, হর্ষ ও বিষাদের সহিত ) ওরে! এই সেই শকুন্তলা—

ধূলি-ধূসর দুই খানি বস্ত্র পরিধান করিয়াছেন, ব্রতের নিয়ম পালন করায় মুখখানি শুকাইয়া গিয়াছে এবং একটীমাত্র বেণী ধারণ করিতে-

शकु। पश्चात्तापविवर्णं राजानं दृष्ट्वा सवितर्कम्। ण हु अज्ज-
उत्तो अअं, ता को एसो किदरक्खामङ्गलं दारअं मे गत्तसंस-
ग्गेण दूसेदि (१)। (द)

बालः। मातरमुपगम्य। अम्ब! को एसो मं पुत्तकेत्ति
ससिणेहं आलिङ्गदि (२)। (ध)

राजा। प्रिये! क्रौर्य्यमपि मे त्वयि प्रयुक्तमनुकूल-

(द) न खलु आर्य्यपुत्रोऽयम्, तत् क एष कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति।

(ध) अम्ब! क एष मां पुत्रकेति सस्नेहमालिङ्गति।

(द) शकु इति। पश्चात्तापेन स्वप्रत्याख्यानजनितेन अनुतापेन विवर्णं मलिनाकृतिम्। अतएव च वितर्क इति बोध्यम्। न खलु आर्य्यपुत्रोऽयम्, आकृतिवैषम्यादिति भावः। कृतं रक्षार्थं मङ्गलं यस्य तम्, दारकं शिशुपुत्रम्। दूषयति, पुत्रस्पर्शादित्याशयः।

(न) राजेति। त्वयि प्रयुक्तं मयैव प्रवर्त्तितम्, क्रौर्य्यं गर्भावस्थायामेव प्रत्या-

ছেন; অতএব এই পবিত্রস্বভাবা শকুন্তলা, অতিনির্দ্দয়স্বভাব আমার দীর্ঘকালীন বিরহব্রত ধারণ করিতেছেন ॥২১॥

(দ) শকুন্তলা। (অনুতাপে মলিনাকৃতি রাজাকে দেখিয়া বিতর্কের সহিত) ইনি ত আর্য্যপুত্র নহেন; তবে কে এ, মাঙ্গলিক রক্ষাসূত্রধারী আমার বালকটীকে গাত্রস্পর্শে দূষিত করিতেছে?।

(ধ) বালক। (মাতার নিকট যাইয়া) মা! কে এ, পুত্র বলিয়া আমাকে সস্নেহে আলিঙ্গন করিতেছে?।

(१)···अज्जउत्तो विअ···। एसो दाणिं···।

(२)···अज्जुए! एसो को वि पुरिसो मं पुत्तत्ति आलिङ्गइ।

পরিণামং সংবৃত্তম্। তদহমিদানীং ত্বয়া প্রত্যভিজ্ঞাতমাত্মান-মিচ্ছামি (১)। (ন)

শকুং। (স্বগতম্) হিঅঅ! সমস্সস সমস্সস। পহরিঅ পরিচ্চত্তমচ্ছরেণ অণুকম্পিদম্হি দেব্বেণ। অজ্জউত্তো এব্ব এসো (২)। (প)

(প) হৃদয! সমাশ্বসিহি সমাশ্বসিহি। প্রহৃত্য পরিত্যক্তমৎসরেণ অনু-কম্পিতাস্মি দৈবেন। আর্য্যপুত্র এব এষঃ।

ষ্যানাৎ নিষ্ঠুরত্বমপি, মে মম অনুকূলঃ শুভকরঃ পরিণামঃ শেষো যস্য তৎ তাদৃশম্, সম্বৃত্তং জাতম্, দেবলোক এব প্রসবেন পুত্রস্য দেববৎ প্রভাবসম্ভবাৎ দেবগুরুণা চ কৃতরক্ষামঙ্গলতয়া দীর্ঘজীবিত্বাদিনানাশুভফলসম্ভবাৎ মর্ত্ত্যলোকে প্রসবে তু তদসম্ভবা-দিতি ভাবঃ। প্রত্যভিজ্ঞাতং 'স এবায়মার্য্যপুত্রঃ' ইতি পরিচিতম্। সানুনয়প্রার্থনেয়ম্।

(প) শকু ইতি। প্রহৃত্য প্রহারং কৃত্বা, পরিত্যক্তঃ প্রহারজনিতদুঃখভোগেনৈব অপরাধাপগমাৎ পরিহৃতো মৎসরো রোষো যেন তেন তাদৃশেন, দৈবেন বিধিনা, অনুকম্পি-তাস্মি দয়াবিষয়ীকৃতাস্মি। কথমেতদিত্যাহ আর্য্যপুত্র এব এষ ইতি। তথা চ বিধিনা পতিকর্ত্তৃকপ্রত্যাখ্যানদ্বারা আদৌ দুঃখং দত্ত্বা, পরঞ্চ তস্যৈব প্রত্যুপানয়নেন দয়াপাত্রীকৃতেত্যাশয়ঃ।

"কৃচিৎ ক্রোধোঽপি মৎসরঃ" ইতি রত্নকোষঃ।

(ন) রাজা। প্রিয়ে! আমি তোমার উপরে নিষ্ঠুর আচরণ করিয়া থাকিলেও, তাহা পরিণামে আজ আমার অনুকূল হইয়া দাঁড়াইয়াছে। অতএব এখন তুমি আমাকে 'এই সেই' এই ভাবে চেন, ইহা আমি ইচ্ছা করি।

(প) শকুন্তলা। (স্বগত) মন! আশ্বস্ত হও, আশ্বস্ত হও।

(১) যদহং···আত্মানং পশ্যামি। (২) শকুন্তলা। আত্মগতম্। হিঅঅ! সমস্সসু। পরিচ্চত্তমচ্ছরেণ। অজ্জউত্তো ক্খু এসো।

राजा। प्रिये!

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि!।
उपरागान्ते शशिनः समुपगता रोहिणी योगम् (१) ॥२२॥

शकु। सहर्षम्। जअदु जअदु अज्जउत्तो। इत्यर्द्धोक्ते बाष्पसन्नकण्ठी विरमति (२)। (क)

(क) जयतु जयतु आर्य्यपुत्रः।

स्मृतीति। हे सुमुखि! दिष्ट्या भाग्येन, स्मृत्या पूर्ववर्त्तिसकलवृत्तान्तस्मरणेन भिन्नं दूरीकृतं मोह एव तमोऽन्धकारं यस्य तस्य तादृशस्य, मे मम, प्रमुखे सम्मुखे, स्थितासि। तथा च रोहिणी दक्षतनया नक्षत्ररूपा चन्द्रस्य स्त्री, उपरागान्ते राहुग्रासात् परम्, शशिनश्चन्द्रस्य, योगं सम्मेलनम्, उपगता प्राप्ता। तथा च उपरागानन्तरं शशिना सह रोहिण्या मिलनमिव, विस्मरणानन्तरं मया सह तव मिलनमतीवमधुरं जातमिति भावः।

अतएवात्र दृष्टान्तोऽलङ्कारः 'मोहतम' इति निरङ्गकेवलरूपकालङ्कारेण सङ्कीर्य्यते। तथा दुष्मन्तशकुन्तलारूपेण परस्परलब्धार्थेन परस्परदुःखशमनात् कृतिर्नाम निर्वहण-सन्ध्यङ्गम्। यथा दर्पणे—

"लब्धार्थशमनं कृतिः।"

आर्य्या जातिः ॥२२॥

বিধাতা আঘাত করিয়া, পরে বিদ্বেষ ত্যাগ করিয়া, দয়া করিয়াছেন। ইনি আর্য্যপুত্রই।

রাজা। হে প্রিয়ে! হে সুমুখি! ভাগ্যবশতঃ পূর্ব্বের সমস্ত বৃত্তান্ত স্মরণ হওয়ায় মোহান্ধকার ঘুচিয়া গিয়াছে, এখন তুমি আমার সম্মুখে রহিয়াছ। অতএব গ্রহণের পর, রোহিণী চন্দ্রের সঙ্গে সম্মেলন লাভ করিয়াছেন ॥২২॥

(१)…शशिना…। (२)…जेदु अज्जउत्तो…।

राजा । प्रिये !

बाष्पेण प्रतिरुद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कार-पाटलोष्ठपुटं मुखम् ॥२३॥

बालः । अम्ब ! को एसो ? (१) । (ब)

शकु । भाअधेआइं पुच्छ (२) । (भ)

(ब) अम्ब ! क एषः ? ।

(भ) भागधेयानि पृच्छ ।

(फ) शकु इति । वक्तव्यवाक्यान्तरेण सह एतद्वाक्यस्य समुदायत्वात् उक्तवाक्यस्य अर्द्धत्वमेव भवतीति अर्द्धोक्ते इत्युक्तमिति बोध्यम् । बाष्पेण अश्रुभारेण सन्नो रुद्धः कण्ठो यस्याः सा तादृशी सती, विरमति वाक्यान्तरोच्चारणात् निवर्त्तते ।

बाष्पेणेति । जयशब्दे, बाष्पेण अश्रुभारेण, प्रतिरुद्धेऽपि निवर्त्तितेऽपि, मया जितं मम जय उत्कर्षोऽभूदित्यर्थः । यद्यस्मात्, असंस्कारेण नियमस्थत्वात् अलक्तकदानादिसंस्कारवर्जनेन पाटलः श्वेतरक्तः ओष्ठपुटो यस्य तत् तादृशम्, ते तव मुखम्, दृष्टम् । तव मुखदर्शनमुत्कर्षजनकमेवेत्याशयः ॥२३॥

(भ) शकु इति । भागधेयानि आत्मनो भाग्यानि । तथा च अस्य राजचक्रवर्त्तिन औरसरूपेण जातत्वात् तव सौभाग्यम्, पुनर्गर्भस्थावस्थायामेव मत्प्रत्याख्यानात् तव दुर्भाग्यम्, पुनश्चेदानीं विना चेष्टया अकस्मादेव समागमात् अपरविधं तव सौभाग्यमास्ते

(ফ) শকুন্তলা। (আনন্দের সহিত) আর্য্যপুত্রের জয় হউক, জয় হউক (এই অর্দ্ধোক্তির পর বাষ্প-রুদ্ধ-স্বর হইয়া বিরত হইল।)

রাজা। প্রিয়ে! বাষ্পে তোমার জয়শব্দকে রুদ্ধ করিয়া থাকিলেও, আমি জয় লাভ করিয়াছি। যেহেতু, সংস্কার না করায় পাটলবর্ণ-ওষ্ঠযুক্ত তোমার মুখখানি আমি দেখিয়াছি ॥২৩॥

(ব) বালক। মা! এ, কে?।

(१)···अज्ज ए ?···। (२) शकुन्तला । वच्छ ! दे भाअधेआइं पुच्छसु ।

राजा । सुतनु ! हृदयात् प्रत्यादेशव्यलीकमपैतु ते,
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवंप्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया ॥२४॥

तानि सर्वाण्येवात्मनो भाग्यानि पृच्छ ; तानि च एष कः कीदृशश्चेति निवेदयितुं शक्नुयुः, किन्तु अस्य स्वरूपापरिज्ञानादहं न निवेदयितुं शक्नोमीति भावः । अतएव हि भाग्यानां विविधत्वात् भागधेयानीति बहुवचनम् ।

सुतन्विति । शोभना तनुर्यस्याः सा सुतनुः । हे सुतनु ! ते तव हृदयात्, प्रत्यादेशेन मत्कृतप्रत्याख्यानेन व्यलीकं पीडा, अपैतु अपसरतु ; इत्येव प्रार्थनेत्याशयः । ननु कथं त्वया प्रत्याख्यानेन पीड़ा दत्ता इत्याह किमपीति । तदा तस्मिन् प्रत्यादेश-समये, मे मम मनसः, किमपि अनिर्वचनीयः, बलवान् सातिशयः, सम्मोहो वैचित्त्यं विस्मृतिरिति यावत्, अभूत् । तत एव च प्रत्यादेशेन पीड़ा दत्ता न पुनः कामत इत्यभिप्रायः । हि तथाहि, प्रबलानि सातिशयानि तमांसि तमोगुणजनितमोहा अन्धकाराश्च येषां तेषां तादृशानां जनानाम्, शुभेषु मङ्गलेषु विषयेषु, एवंप्राया बाहुल्येन इत्यम्भूताः प्रत्यादेशादिरूपा इत्यर्थः, वृत्तयो व्यवहारा जायन्ते इति शेषः । ननु कुत्र तत् दृष्टमित्याह स्रजमिति । अन्धो जनः, शिरसि मस्तके, क्षिप्तां केनाप्यर्पिताम्, स्रजमपि पुष्पमालामपि, अहिशङ्कया तद्रूपादर्शनात् सर्पभ्रमेण, धुनोति कम्पयति मस्तककम्पनेन कम्पयित्वा पातयतीत्यर्थः । अतएव अन्धस्येव प्रबलतमसो जनस्य शुभेषु विपरीतवृत्तयो भवन्तीति भावः ।

अत्र प्रथमचरणार्थं प्रति द्वितीयचरणगतवाक्यार्थो हेतुरिति काव्यलिङ्गम्, तृतीय-चरणगतसामान्येन पूर्वार्द्धगतविशेषसमर्थनात् अर्थान्तरन्यासो दृष्टान्तश्च इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः ।

"स्त्रियां मूर्त्तिस्तनुस्तनूः" "पीड़ार्थेऽपि व्यलीकं स्यात्" इति चामरः ।

हरिणी वृत्तम् ॥२४॥

(ঙ) শকুন্তলা। নিজের ভাগ্যকে জিজ্ঞাসা কর

इति पादयोः पतति (१)। (म)

शकु। उत्थेदु अज्जउत्तो। णूणं मे सुहप्पडिबन्धअं पुराकिदं तेसुं दिअसेसुं परिणामसुहं आसि ; जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो (२)। (य)

(य) उत्तिष्ठतु आर्य्यपुत्रः। नूनं मे सुखप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामसुखमासीत् ; येन सानुक्रोशोऽपि आर्य्यपुत्रो मयि विरसः संवृत्तः।

(म) इतीति। पादयोः शकुन्तला इति शेषः।

(य) शकु इति। नूनं निश्चितमेव, सुखस्य प्रतिबन्धकं प्रतिकूलं दुःखजनकमित्यर्थः, पुराकृतं पूर्वजन्मकृतं पापमिति तात्पर्य्यम्, तेषु दिवसेषु प्रत्याख्यानावधिदिनेषु, परिणामसुखं परिपाकोन्मुखं दुःखजननप्रवृत्तमित्यर्थः। तेन हेतुना, सानुक्रोशोऽपि मां प्रति सदयोऽपि, विगतो रसोऽनुरागो यस्य स विरसः। दुरदृष्टवशादेव मे तादृशं दुःखमासीदिति न तवापराध इति भावः।

"कृपा दयानुकम्पा स्यादनुक्रोशः" इति "शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः" इति अमरः।

রাজা। হে সুন্দরি! তোমার মন হইতে প্রত্যাখ্যানের অসন্তোষ দূর হউক। কারণ, তখন আমার মনের অনির্বচনীয় প্রবল মোহ জন্মিয়াছিল। অত্যন্ত অজ্ঞানীদের শুভ বিষয়ে এইরূপই ব্যবহার হইয়া থাকে ; দেখ অন্ধলোক, মাথার উপরে ফুলের মালা ছুড়িয়া দিলেও, সর্পভ্রমে তাহা ফেলিয়া দেয় ॥২৪॥

(ম) (এই বলিয়া, শকুন্তলার চরণযুগলে পতিত হইলেন।)

(য) শকুন্তলা। আর্য্যপুত্র উঠুন। আমার সুখের প্রতিবন্ধক পূর্ব্বজন্মকৃত কোন পাপ, সেই সমস্ত দিনে নিশ্চয়ই ফল জন্মাইতে

(१) अयं पाठः क्वचिन्नास्ति।

(२)…सुअरिअप्पडिबन्धअं…।

राजा । उत्तिष्ठति ।

शकु । अथ कथं अज्जउत्तेण सुमरिदो दुक्खभाई अअं जणो । (र)

राजा । उद्धृतविषादशल्यः कथयिष्यामि । (ल)

मोहान्मया सुतनु ! पूर्वमुपेक्षितस्ते
यो बाष्पविन्दुरधरं परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
कान्ते ! प्रमृज्य विगतानुशयो भवामि (१) ॥२५॥

(र) अथ कथमार्य्यपुत्रेण स्मृतो दुःखभागी अयं जनः ।

(र) शकु इति । अयं मत्स्वरूपो जनः ।

(ल) राजेति । उद्धृतं हृदयादुत्पाटितं विषादशल्यं येन स तादृशः सन्, कथयिष्यामि तव स्मरणप्रकारमिति शेषः । विषादशल्येनोत्पीडनात् सहसा तत्कथं न शक्नोमीत्याशयः ।

किं कृत्वा उद्धृतविषादशल्यो भविष्यसीत्याह मोहादिति । हे सुतनु ! मया, अधरं तवौष्ठम्, परिबाधमानः पतने निपीडयन्, यस्ते तव बाष्पविन्दुः अश्रुकणः, पूर्वं प्रत्याख्यानकाले, मोहात् उपेक्षितः अगणितः, हे कान्ते ! अद्य आकुटिलेषु ईषद्वक्रेषु

প্রবৃত্ত হইয়াছিল ; যে হেতু, আর্য্যপুত্র সদয় হইয়াও আমার প্রতি নির্দ্দয় হইয়াছিলেন ।

রাজা । ( উঠিলেন । )

(র) শকুন্তলা । আর্য্যপুত্র কি প্রকারে এই দুঃখী লোককে স্মরণ করিলেন ? ।

(ল) রাজা । বিষাদশল্য দূর করিয়া পরে বলিব ।

(१) यो अस्रविन्दुः ।···विगतानुशयो भवेयम् ।

इति यथोक्तं करोति (१)। (व)

शकु। प्रमृष्टवाष्पा अङ्गुरीयकं विलोक्य। अज्जउत्त! तं एदं अङ्गुलीअअं?। (श)

राजा। अथकिम्। अस्याङ्गुतोपलम्भान्मया स्मृतिरुपलब्धा (२)। (ष)

---

(श) आर्य्यपुत्र। तदेतत् अङ्गुरीयकम्?।

पक्ष्मसु नेत्रलोमसु विलग्नं संसक्तम्, तं वाष्पविन्दुम्, प्रमृज्य तावत् प्रोञ्छ्यैव, विगतानुशयो विनष्टानुतापो भवामि। तथैव चोद्धृतविषादशल्यः सन् कथयिष्यामीति भावः।

अत्र अश्रुमोचनकार्य्यस्यान्वेषणात् विरोधो नाम निर्वहणसन्ध्यङ्गम्—"विरोधः कार्य्यमार्गणम्" इति दर्पणलक्षणात्।

"भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः" इति मेदिनी।

वसन्ततिलका वृत्तम् ॥२५॥

(व) इतीति। यथोक्तं कराभ्यां शकुन्तलानेत्रगतवाष्पमार्जनम्।

अत्र प्रसादो नाम निर्वहणसन्ध्यङ्गम्। तथा च दर्पणे—

"शुश्रूषादिः प्रसादः स्यात्।"

(श) शकु इति। प्रमृष्टवाष्पा दुष्मन्तेन प्रोञ्छितनेत्रजला। तदेतदङ्गुरीयकम्, येनाहं पूर्वं प्रतारितेति वाक्यशेषः।

---

হে সুন্দরি! আমি মোহবশতঃ, তোমার ওষ্ঠের যন্ত্রণাকারক যে অশ্রুবিন্দু পূর্বে উপেক্ষা করিয়াছিলাম; হে কান্তে! আজ বক্রনয়ন-লোম-সংলগ্ন সেই অশ্রুবিন্দু মার্জনা করিয়া অনুতাপবিহীন হইব ॥২৫॥

(ব) (এই বলিয়া উক্ত কার্য্য করিলেন।)

(শ) শকুন্তলা। (অশ্রু মার্জিত হইলে অঙ্গুরীয়কটী দেখিয়া) আর্য্যপুত্র! এই কি সেই অঙ্গুরী?।

---

(१) यथोक्तमनुतिष्ठति। (२) अस्याङ्गुलीयकस्योपलम्भात् खलु स्मृतिः…।

शकु । विसमं किदं क्खु इमिणा, जं तदा अज्जउत्तस्स पच्चाअणकाले दुल्लहं आसि । (स)

राजा । तेन हि ऋतुसमागमचिह्नं प्रतिपद्यतां लता-कुसुमम् (१) । (ह)

शकु । ण से विस्ससेमि, अज्जउत्तो ज्जेव णं धारेदु । (क्ष)

(स) विषमं कृतं खल्वनेन, यत् तदा आर्य्यपुत्रस्य प्रत्यायनकाले दुर्लभमासीत् ।

---

(ष) राजेति । अथकिमित्येकमेवाव्ययमङ्गीकारार्थे इत्युक्तमेव । अस्य अङ्गु-रीयकस्य, अङ्गुलीपलम्भात् मत्स्योदरात् लाभेन आश्चर्य्यरूपेण लाभात्, स्मृतिः परिणीता-रूपेण तव स्मरणम् ।

(स) शकु इति । अनेन अङ्गुरीयकेण, विषमं दारुणं कार्य्यम् । प्रत्यायनकाले विश्वासोत्पादनसमये ।

(ह) राजेति । लता, ऋतोः समागमस्य सम्मेलनस्य चिह्नं चिह्नस्वरूपं कुसुमं स्वपुष्पम्, प्रतिपद्यतां लभताम् । तथा च लता यथा वसन्तादिऋतुसमागमचिह्नभूतं स्वकुसुमं धारयति, तथा त्वमपि मत्समागमचिह्नभूतमिदमङ्गुरीयकं पुनर्धारयेत्याशयः ।

अतएवात्र अप्रस्तुतवर्णनात् प्रस्तुतवस्तुप्रतीतिरूपा अप्रस्तुतप्रशंसालङ्कारः । तथा भाषणं नाम निर्वहणसन्ध्यङ्गम—"सामदानादि भाषणम्" इति दर्पणलक्षणात् ।

---

(ষ) রাজা। হাঁ। অদ্ভুত রকমে ইহা পাওয়ায়, আমি স্মৃতিলাভ করিয়াছিলাম।

(স) শকুন্তলা। এই অঙ্গুরী, বড় ভয়ঙ্কর কার্য্য করিয়াছে, যে হেতু আর্য্যপুত্রের সেই বিশ্বাসোৎপাদনের সময়ে ইহাকে পাওয়া যায় নাই।

(হ) রাজা। তাহা হইলে, লতা ঋতুর সহিত সম্মিলিত হওয়ার চিহ্নস্বরূপ পুষ্প ধারণ করুক।

---

(१) ऋतुसमवायचिह्नम् ।

ततः प्रविशति मातलिः ।

मातलिः । दिष्ट्या धर्म्मपत्नीसमागमेन पुत्रमुखदर्शनेन च आयुष्मान् वर्द्धते । (क)

राजा । सुहृत्सम्पादितत्वात् साधुतरफलो मे मनोरथः । मातले ! न खलु विदितोऽयमाखण्डलस्यार्थः ? (१) । (ख)

(च) नास्य विश्वसिमि. आर्य्यपुत्र एव एनं धारयतु ।

(च) शकु इति । अस्य अङ्गुरीयकस्य, सम्बन्धे अहं न विश्वसिमि न विश्वासं दधामि, पूर्व्वं प्रतारणानुभवेन परमपि प्रतारणाशङ्कत्वादिति भावः । अतएव आर्य्यपुत्रो भवानेव, एतमङ्गुरीयकम् । "तस्य चानुकरोति हि" इत्यादिवत् अस्येति शेषे षष्ठी ।

(क) मातलिरिति । आयुष्मान् भवान् दुष्मन्तः, दिष्ट्या भाग्येन धर्म्मपत्न्याः शकुन्तलायाः समागमेन सम्मेलनेन । वर्द्धते अभ्युदयवान् भवति ।

(ख) राजेति । सुहृदा सख्या त्वया सम्पादितत्वात् फलस्य संघटितत्वात्, मे मम मनोरथः अभिलाषः, साधुतरम् अतीवोत्कृष्टं फलं यस्य स तादृशो जात इति शेषः, साक्षादेव स्त्रीपुत्रलाभादित्याशयः । अयम् अर्थः शकुन्तलाप्रत्याख्यानरूपो विषयः अथवा प्रत्याख्याता शकुन्तला प्रसूतपुत्रा सती अत्रास्ते इत्येवं विषयः, आखण्डलस्य इन्द्रस्य, न खलु विदितः न खल्विन्द्रेणावगतः ? इति काकुः । आखण्डलस्येति "वर्त्तमानाधिकरणयोः शेषे" इति षष्ठी ।

(চ) শকুন্তলা। আমি ইহাকে বিশ্বাস করি না; আর্য্যপুত্রই ইহাকে ধারণ করুক।

তাহার পরে মাতলি প্রবেশ করিল।

(ক) মাতলি। ভাগ্যবশতঃ ধর্ম্মপত্নীর সহিত সম্মিলিত হওয়ায় এবং পুত্রের মুখ দেখায় আপনি অভ্যুদয় লাভ করিয়াছেন ত?।

(१) राजा । अभूत् सम्पादितस्वादुफलो मे मनोरथः । मातले ! न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात् ? ।

মাতলিঃ। সস্মিতম্। কিমীশ্বরাণাং পরোক্ষম্। এহি ভগবান্ মারীচস্তে দর্শনমিচ্ছতি (১)। (গ)

রাজা। প্রিয়ে! অবলম্ব্যতাং পুত্রঃ, ত্বাং পুরস্কৃত্য ভগবন্তং দ্রষ্টুমিচ্ছামি (২)। (ঘ)

শকু। লজ্জেমি ক্খু, অজ্জউত্তেণ সহ গুরুঅণসমীবং গন্তুং (৩)। (ঙ)

---

(ঙ) লজ্জে খলু আর্য্যপুত্রেণ সার্দ্ধং গুরুজনসমীপং গন্তুম্।

(গ) মাতলিরিতি। সর্ব্বথৈবাযগমার্থেন ইন্দ্রেণৈবাস্মনঃ প্রেরিতত্বাৎ কৌতুকেন স্মিতম্। ঈশ্বরাণাম্ অণিমাদ্যৈশ্বর্য্যশালিনাম্, কিং বস্তু, পরোক্ষম্ অতীন্দ্রিয়ম্ অনবগতং তিষ্ঠতীতি তাৎপর্য্যম্, অপি তু কিমপি নেত্যর্থঃ, অন্তর্যামিতয়া সর্ব্ব এবায়মর্থ আত্মবৃত্তান্তস্য বিদিত এবেতি ভাবঃ। মারীচঃ কশ্যপঃ, দর্শনং সাক্ষাৎকারম্।

(ঘ) রাজেতি। অবলম্ব্যতাং ক্রোড়ে গৃহ্যতাম্। পুরস্কৃত্য অগ্রেসরীকৃত্য, ভগবন্তং কশ্যপম্।

---

(খ) রাজা। বন্ধুজনের সম্পাদিত বলিয়া, আমার অভিলাষের ফল ভালই হইয়াছে। মাতলি! দেবরাজ এই বৃত্তান্ত জানেন নাই ত?

(গ) মাতলি। (ঈষৎ হাস্যের সহিত) অণিমাদি ঐশ্বর্য্যশালীদের কোন্ বিষয় অজ্ঞাত থাকে? আসুন, ভগবান্ কশ্যপ আপনার সাক্ষাৎকার ইচ্ছা করেন।

(ঘ) রাজা। প্রিয়ে! পুত্রটীকে কোলে লও, তোমাকে সম্মুখে করিয়া ভগবান্ কশ্যপকে দেখিতে ইচ্ছা করি।

(ঙ) শকুন্তলা। আর্য্যপুত্রের সঙ্গে গুরুজনের নিকট যাইতে আমার লজ্জা করে।

---

(১)···এত্বায়ুষ্মন্!·· দর্শনং বিতরতি। (২) রাজা। শকুন্তলে! অবলম্ব্যতাং।

(৩) শকুন্তলা। হ্রিয়ামি অজ্জউত্তেণ সহ গুরুসমীবং গন্তুং।

রাজা । আচরিতব্যমেতদভ্যুদয়কালেষু ; তদেহি তাবৎ (১) । (চ)

ইতি সর্ব্বে পরিক্রামন্তি । (ছ)

ততঃ প্রবিশত্যদিত্যা সহাসনোপবিষ্টো মারীচঃ (২) । (জ)

মারীচঃ । রাজানমবলোক্য । দাক্ষায়ণি ! (ঝ)

পুত্রস্য তে রণশিরস্যয়মগ্রযায়ী
দুষ্মন্ত ইত্যভিহিতো ভুবনস্য ভর্ত্তা ।
চাপেন যস্য বিনিবর্ত্তিতকর্ম্ম জাতং
তৎ কোটিমৎ কুলিশমাভরণং মঘোনঃ ॥২৬॥

(চ) রাজেতি । অভ্যুদয়কালেষু উন্নতিসময়েষু, এতৎ পতিপত্নীপুত্রাণাং মিলিত্বা গুরুজনবন্দনাদিকম্, আচরিতব্যং কর্ত্তব্যম্ ; অতো ন লজ্জিতব্যমিত্যাশয়ঃ ।

(ছ) ইতীতি । পরিক্রামন্তি কশ্যপসমীপং গন্তুং পাদক্ষেপং কুর্ব্বন্তি ।

(জ) তত ইতি । মারীচঃ মরীচিপুত্রঃ কশ্যপঃ । ননু প্রবেশো নাম অভ্যন্তর-গমনম্, উপবিষ্টস্য নিবৃত্তগমন ইত্যুপবিষ্টস্য স্বয়ং প্রবেশোঽনুপপন্ন এবেতি চেন্ন ইহস্থলে জহৎস্বার্থলক্ষণয়া যবনিকাপসারণাদিনা সভ্যদৃষ্টিগোচরত্বমেব বিশধাতোরর্থং ইতি প্রবিশতি সভ্যানাং দৃষ্টিগোচরীভবতীত্যর্থান্নানুপপত্তিরিতি ধ্যেয়ম্ ।

(ঝ) মারীচ ইতি । দক্ষস্যাপত্যং স্ত্রীতি দাক্ষায়ণী দক্ষতনয়া, তৎ সম্বোধনম্ ।

পুত্রস্যেতি । অয়ম্ উপস্থিতঃ পুরুষঃ, তে তব পুত্রস্য ইন্দ্রস্য, রণশিরসি সমরাঙ্গনে, অগ্রযায়ী সর্ব্বেষাং সৈন্যানামগ্রগামী, অতএব মহাবীর ইতি ভাবঃ ; দুষ্মন্ত ইতি

(চ) রাজা । অভ্যুদয়ের সময়ে এইরূপ করা উচিত ; অতএব আইস ।

(ছ) ( ইহার পরে সকলে পাদক্ষেপ করিতে লাগিল । )

(জ) তদনন্তর অদিতির সহিত আসনোপবিষ্ট কশ্যপের প্রবেশ ।

(ঝ) কশ্যপ । ( রাজাকে দেখিয়া ) দক্ষতনয়ে !

---

(১) রাজা । অয়ি ! আচরিতব্যমভ্যুদয়কালেষু । এহি এহি ।

(২)·· অদিত্যা সার্দ্ধমাসনস্থঃ····।

অদিতিঃ। সম্ভাবণীঅপ্পহাবা সে আকিদী (১)। (অ)

মাতলিঃ। আয়ুষ্মন্! এতৌ পুত্রপ্রীতিপিশুনেন চক্ষুষা দিবৌকসাং পিতরাবায়ুষ্মন্তমবলোকয়তঃ, তদুপসর্প (২)। (ট)

(অ) সম্ভাবনীয়প্রভাবা অস্যাকৃতিঃ।

নাম্না অভিহিতো লোকৈরাখ্যাতঃ, ভুবনস্য মর্ত্ত্যলোকস্য, ভর্ত্তা রক্ষিতা রাজেত্যর্থঃ। যস্য দুষ্মন্তস্য, চাপেন ধনুষা, বিনিবর্ত্তিতং সম্পাদিতং কর্ম্ম শত্রুবিজয়রূপং কার্য্যং যস্য তৎ তাদৃশম্, তৎ প্রসিদ্ধম্, কোটিমৎ তীক্ষ্ণাগ্রম্, কুলিশং বজ্রম্, মঘোন ইন্দ্রস্য, আভরণম্ অলঙ্কারস্বরূপং জাতম্, যুদ্ধাত্মকপ্রয়োজনাভাবাৎ বীরশরীরশোভাজনকত্বা-দিত্যাশয়ঃ।

অত্র আভরণত্বং প্রতি বিনিবর্ত্তিতকর্ম্মপদস্যার্থো হেতুরিতি পদার্থহেতুকং কাব্যলিঙ্গম্, আভরণম্ আভরণরূপমিতি নিরঙ্গং কেবলরূপকঞ্চ অনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ।

বসন্ততিলকা বৃত্তম্ ॥২৬॥

(অ) অদিতিরিতি। সম্ভাবনীয়ঃ অবধারণীয়ঃ প্রভাবঃ শক্তির্যস্যাঃ সা। তথা চ অস্যাকৃতিদর্শনেনৈব মহাশক্তিরস্তীতি সম্ভাবয়িতুং শক্যত ইত্যাশয়ঃ।

“প্রভাবঃ শক্তিতেজসোঃ” ইতি বিশ্বঃ।

(ট) মাতলিরিতি। পুত্রে পুত্রস্য ইন্দ্রস্য সখিত্বেন পুত্রস্বরূপে ত্বয়ি প্রীতিপিশুনেন স্নেহসূচকেন। দিবৌকসাং দেবানাম্, পিতরৌ মাতাপিতরৌ, এতৌ অদিতিকশ্যপৌ, আয়ুষ্মন্তং ভবন্তম্। তৎ তস্মাৎ, উপসর্প এতয়োঃ সমীপং গচ্ছ।

তোমার পুত্র দেবরাজের যুদ্ধে ইনি অগ্রগামী হইয়া থাকেন, ইনি দুষ্মন্তনামে অভিহিত এবং মর্ত্ত্যলোকের রাজা; যাঁহার ধনুতে বজ্রের কার্য্য সম্পাদন করে বলিয়া সেই তীক্ষ্ণ বজ্র, ইন্দ্রের অলঙ্কারমাত্র হইয়া থাকে ॥২৬॥

(অ) অদিতি। ইঁহার আকৃতি দেখিয়া, প্রভাবের অনুমান করা যায়।

(১)…সম্ভাবনীয়ানুভাবা। (২)…তাবদুপসর্প।

राजा । मातले !

प्राहुर्द्वादशधा स्थितस्य मुनयो यत्तेजसः कारणं,
भर्त्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम् ।
यस्मिन्नात्मभुवः परोऽपि पुरुषश्चक्रे भवायास्पदं (१)
द्वन्द्वं दक्षमरीचिसम्भवमिदं तत् स्रष्टुरेकान्तरम् ॥२७॥

प्राहुरिति । मुनयः, यत् द्वन्द्वम्, द्वादशधा द्वादशभिः प्रकारैर्मूर्त्तिभिरित्यर्थः, स्थितस्य, तेजसः तेजोमयस्य सूर्य्यस्य, कारणमुत्पादकम्, प्राहुर्वदन्ति ; यत् द्वन्द्वं कर्त्तृ, भुवनत्रयस्य स्वर्गमर्त्यपातालात्मकत्रिजगतः, भर्त्तारं परिपालयितारम्, तथा यज्ञे भागो येषां ते यज्ञभागा देवास्तेषामीश्वरम् अधिपतिम् इन्द्रमिति तात्पर्य्यम्, सुषुवे उत्पादयामास ; तथा आत्मना भवतीति आत्मभूर्ब्रह्मा तस्मादपि परः उत्कृष्टः पुरुषो नारायणः, भवाय वामनरूपेणोत्पत्तये, यस्मिन् द्वन्द्वे, आस्पदम् आधेयतासम्बन्धेन जन्यतासम्बन्धेन च स्थितिम्, चक्रे कृतवान् ; दक्षो ब्रह्मणो दक्षाङ्गुष्ठतो जातः प्रजापतिः मरीचिश्च तस्यैव ज्येष्ठो मानसपुत्रः ताभ्यां सकाशात् सम्भवतीति दक्षमरीचिसम्भवम्, स्रष्टुर्ब्रह्मणः सकाशात्, एकेन पुरुषेण दक्षेण मरीचिना च अन्तरं व्यवधानं यस्य तत् तादृशम्, इदं दृश्यमानम्, तत् द्वन्द्वं दम्पतियुगलं किमिति काकुवशेन प्रश्नो व्यज्यते । ब्रह्मणः पौत्री दक्षस्य च पुत्री सेयमदितिः किम्, ब्रह्मणः पौत्रो मरीचेश्च पुत्रः सोऽयं कश्यपश्च किमिति सरलार्थः ।

अत्र अदितिकश्यपयोर्निरतिशयप्राधान्यप्रतिपादनकार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः ।

---

(ট) মাতলি। আয়ুষ্মন্! এই দেবগণের পিতা ও মাতা, পুত্রের প্রতি স্নেহসূচক দৃষ্টিতে আপনাকে দেখিতেছেন; অতএব ইঁহাদের নিকটে যান।

(१) यस्मिन्नात्मभवः··· ।

मातलिः । अथकिम् । (ठ)

राजा । प्रणिपत्य । उभाभ्यामपि वां वासवनियोज्यो दुष्मन्तः प्रणमति (१) । (ड)

---

"दूरानात्मोत्तमाः पराः" "जम्पती भर्तौ" "विष्टौने मिथुनं द्वन्द्वं युग्मन्तु युगलं युगम्" इत्यमरः ।

द्वादशादित्या मिताक्षरायां दिव्यविधिप्रकरणे परिगणिताः । यथा—

"धाताऽर्य्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः ॥"

विष्णुपुराणे—"अदितेः कश्यपाज्जाताः देवाश्चेन्द्रादयोऽनघ ! ।"
"मन्वन्तरे च सम्प्राप्ते तथा वैवस्वते द्विज ! ।
वामनः कश्यपाद्विष्णुरदित्यां सम्बभूव ह ॥"

प्रमाणान्तराण्यनुसन्धेयानि । शार्दूलविक्रीड़ितं वृत्तम् ॥२७॥

(ठ) मातलिरिति । अथकिमित्यङ्गीकारे ।

---

রাজা । মাতলি !

মুনিগণ যাঁহাদিগকে দ্বাদশরূপে অবস্থিত তেজের (সূর্য্যের) উৎপাদক বলিয়া থাকেন ; যাঁহারা, ত্রিভুবনের রাজা এবং যজ্ঞের অংশভাগী ইন্দ্রকে উৎপাদন করিয়াছেন এবং ব্রহ্মা হইতেও প্রধান পুরুষ স্বয়ং নারায়ণ, বামনরূপে জন্ম গ্রহণ করিবার জন্য, যাঁহাদের উপরে আশ্রয় লইয়াছিলেন ; দক্ষ ও মরীচি হইতে উৎপন্ন এবং ব্রহ্মা হইতে একটী পুরুষমাত্রে ব্যবহিত এই কি সেই দম্পতিযুগল ? ॥২৭॥

(ঠ) মাতলি । হাঁ ।

(১) राजा । उपसृत्य । उभाभ्यामपि वासवानुयोज्यः···।

मारीचः। वत्स! चिरं जीवन् पृथिवीं पालय (१)। (ढ)

अदितिः। अप्रतिरथो भव (२)। (ण)

शकुन्तला पुत्रसहिता पादयोः पतति (३)। (त)

मारीचः। वत्से!

आखण्डलसमो भर्त्ता जयन्तप्रतिमः सुतः।

आशीरन्या न ते योज्या पौलोमीमङ्गला भव (४) ॥२८॥

(ण) अप्रतिरथो भव।

(ड) राजेति। वासवस्य इन्द्रस्य नियोज्यो दासः। एतेनात्मनो नितान्तापकर्षो व्यज्यते। वां युवाभ्याम्।

"नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः" इत्यमरः।

(ढ) मारीच इति। चिरमित्यस्योभयत्राप्यन्वयः। तेन चिरं जीवन् चिरमेव पृथिवीं पालयेत्यर्थः।

(ण) अदितिरिति। अप्रतिरथः प्रतिपक्षरहित इत्यर्थः।

(त) शकु इति। पादयोः अदितिकश्यपयोः प्रत्येकं चरणयोरिति तात्पर्य्यम्। पादादीनां द्वित्वविशिष्टा जातिरिति चतुर्षु पादेष्वप्यपि द्विवचनम्।

आखण्डलेति। भर्त्ता तव पतिर्दुष्मन्तः, आखण्डलसमः प्रभावे सम्पत्तौ च इन्द्रतुल्यः,

(ড) রাজা। (প্রণিপাত করিয়া) ইন্দ্রের দাস দুষ্মন্ত, আপনাদের দুই জনকেই প্রণাম করিতেছে।

(ঢ) কশ্যপ। বৎস! চিরজীবী হইয়া পৃথিবী পালন কর।

(ণ) অদিতি। বিপক্ষবিহীন হও।

(ত) শকুন্তলা। (পুত্রের সহিত উঁহাদের চরণে পতিত হইল।)

(१)…चिरं जीव…। (२)…वच्छ! अप्पडिरहो होहि।

(३) सकुन्तला। दारअसहिदा वो पादवन्दणं करेमि।

(४)…न ते योज्या पौलोमीसदृशी…।

অদিতিঃ। জাদে! ভত্তুণো বহুমদা হোহি, অঅম্প দীহাউ উহঅপক্খং অলঙ্করেদু। এধ উপবিসধ (১)। (খ)

(খ) জাতে! ভর্ত্তুর্বহুমতা ভব। অয়ঞ্চ দীর্ঘায়ুঃ উভয়পক্ষমলঙ্করোতু। এতম্ উপবিশতম্।

তথা সুতঃ অয়ং পুত্রঃ, জয়ন্তো জয়ন্তনামা ইন্দ্রাত্মজঃ প্রতিমা উপমা যস্য সঃ। অতএব তে তব সম্বন্ধে, অন্যা ক্রিয়মাণেতরা, আশীঃ আশংসা, ন যোজ্যা অস্মাভির্ন প্রবর্ত্তনীয়া, ভর্ত্তৃ-পুত্র বিষয়াণাং প্রাগেবাস্মাভিরিষ্টতয়া জাতত্বাদিত্যাশয়ঃ। কেবলং পৌলোম্যাঃ শচীদেব্যা মঙ্গলমিব মঙ্গলম্ অবৈধব্যভর্ত্তৃপ্রিয়ত্বাদিরূপং যস্যাঃ সা তাদৃশী ভব।

অত্র তৃতীয়চরণার্থং প্রতি পূর্ব্বার্দ্ধগতবাক্যার্থদ্বয়ং হেতুরিতি বাক্যার্থহেতুকং কাব্য-লিঙ্গম্, তথা পূর্ব্বার্দ্ধে দ্বে আর্থ্যৌপমে চতুর্থচরণে চ লুপ্তোপমা, ইত্যেতেষাং গুণপ্রধানভাবে-নাঙ্গাঙ্গিভাবাৎ সঙ্করঃ। আশংসা নাম নাট্যালঙ্কারশ্চ। যথা দর্পণে—

"আশংসনং স্যাদাশংসা" ॥২৮॥

(খ) অদিতিরিতি। বহুমতা অত্যাদৃতা। অয়ঞ্চ দীর্ঘায়ুস্তে পুত্র ইত্যর্থঃ, উভয়পক্ষং মাতৃপক্ষং পিতৃপক্ষঞ্চ, অলঙ্করোতু সদাচারাদিনেত্যাশয়ঃ। এতম্ আগচ্ছতম্, উপবিশতং মাতাপুত্রৌ যুবামিতি শেষঃ।

কশ্যপ। বৎসে! ইন্দ্রের তুল্য তোমার স্বামী এবং জয়ন্তের তুল্য তোমার পুত্র; অতএব তোমাকে অন্য আশীর্ব্বাদ করিবার নাই; কেবল ইন্দ্রাণীর ন্যায় মঙ্গলবতী হও ॥২৮॥

(খ) অদিতি। বৎসে! ভর্ত্তার বিশেষ আদরের পাত্র হও; আর এই দীর্ঘায়ু বালকটী, মাতৃ-পিতৃ-উভয় পক্ষকে অলকৃত করুক। আইস উপবেশন কর।

(১) ভত্তুণো বহুমদা হোহু। অঅং দীহাঊ বচ্ছও উহঅকুলণন্দণো হোদু। উববিসহ।

सर्वे प्रजापतिमभित उपविशन्ति । (द)

**मारीचः ।** एकैकं निर्दिशन् । (ध)

**दिष्ट्या शकुन्तला साध्वी, सदपत्यमिदं, भवान् ।**
**श्रद्धा, वित्तं, विधिश्चेति त्रितयं तत् समागतम् ॥२८॥**

(द) सर्वं इति । प्रजापतिं कश्यपम्, अभित उभयपार्श्वयोः दक्षिणे दुष्मन्तो मातलिश्च, वामे च पुत्रसहिता शकुन्तलेत्यर्थः ।

प्रजापतिमिति "तथोभयाभिपरिसर्वैः" इति द्वितीया ।

(ध) मारीच इति । निर्दिशन् अङ्गुल्येति शेषः ।

दिष्ट्येति । दिष्ट्या भाग्येन, साध्वी सच्चरित्रा शकुन्तला, इदं सत्पुत्रत्वादुत्तमम्, अपत्यं सन्तानः, भवान् त्वमेव, एकत्र विद्यत इति शेषः । तत् तस्मात् हेतोः, श्रद्धा शास्त्रार्थे दृढविश्वासः, वित्तं यज्ञादिकार्य्यसम्पादनोपयोगि धनम्, विधिश्च तादृशकार्य्यस्य परिपाटीविधायकं शास्त्रञ्च, इति त्रितयम् एतत् त्रयम्, समागतं सम्मिलितम् ।

अत्र वस्तुत एव श्रद्धावित्तविधीनां तत्र तदानीं समागमो नासीदिति वस्तुसम्बन्धोऽसम्भवन् श्रद्धावित्तविधीनां समागमे यज्ञादिकार्य्यमिव स्त्रीपुत्रपतीनां युष्माकं समागमे गृहस्थकार्य्यमतीव सुसम्पन्नमाह्लादकरञ्च भविष्यतीति बिम्बानुबिम्बभावं बोधयतीति असम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारः, शकुन्तलां प्रति श्रद्धायाः, अपत्यं प्रति वित्तस्य, दुष्मन्तं प्रति च विधेयः उद्देशक्रमेणानुद्देशात् यथासंख्यमलङ्कारश्च, अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः । वामनादिभिरालङ्कारिकैरस्तिभवतिविद्यत इत्यादिक्रियाणामनुपादानेऽपि सामर्थ्यादवगत्या न्यूनपदत्वदोषानङ्गीकारान्न न्यूनपदत्वदोषः ।

"श्रद्धया धर्म्मकार्य्येषु तथा श्रद्धेत्युदाहृता" इति प्रायश्चित्ततत्त्वे देवलः ॥२९॥

(দ) ( সকলে কশ্যপের দুই পার্শ্বে উপবেশন করিলেন । )

(ধ) কশ্যপ । ( অঙ্গুলীদ্বারা এক একটীকে নির্দ্দেশ করতঃ )

সাধ্বী শকুন্তলা, এই উত্তম সন্তান এবং তুমি, এই তিন জনই আজ

রাজা। ভগবন্! প্রাগভিপ্রেতসিদ্ধিঃ, পশ্চাদ্দর্শনম্; ইত্যপূর্ব্বঃ খলু বোঽনুগ্রহঃ। কুতঃ—(১) (ন)

উদেতি পূর্ব্বং কুসুমং, ততঃ ফলং;
ঘনোদয়ঃ প্রাক্, তদনন্তরং পয়ঃ।
নিমিত্তনৈমিত্তিকয়োরয়ং ক্রমঃ,
তব প্রসাদস্য পুরস্তু সম্পদঃ ॥৩০॥

(ন) রাজেতি। অভিপ্রেতসিদ্ধিঃ দর্শনার্থিনো মহ্যং জাতা ইতি শেষঃ, পশ্চাৎ দর্শনং ভবাদৃশানাং সাক্ষাৎকারঃ, ইতি হেতোঃ বো যুষ্মাকম্, অনুগ্রহঃ অপূর্ব্বঃ খলু ন তৎপ্রকার এব, আশ্চর্য্যভূত এব বা। কথমেতদিত্যাহ কুত ইতি।

অত্র অভিপ্রেতসিদ্ধিরিত্যনেনাত্মনঃ শকুন্তলাবিরহদুঃখাপগমসূচনাৎ সময়ো নাম নির্ব্বহণসন্ধ্যঙ্গম্। তথা চ দর্পণে—

"সময়ো দুঃখনির্য্যাণম্।"

"অভিপ্রেতার্থসিদ্ধির্মঙ্গলম্" ইতি লিখন্তস্তে ভ্রান্তাঃ।

উদেতীতি। পূর্ব্বং ফলোৎপত্তেঃ প্রাক্, কুসুমং ফলকারণীভূতং পুষ্পম্, উদেতি তরুলতয়োরুৎপদ্যতে, ততস্তদনন্তরম্, ফলং কুসুমকার্য্যভূতং চূতাদিফলম্, উদেতি; তথা প্রাক্ পয়সঃ পূর্ব্বম্, ঘনোদয়ঃ পয়ঃকারণীভূতমেঘাবির্ভাবঃ, ভবতীতি শেষঃ, তদনন্তরং পয়ো ঘনোদয়কার্য্যভূতং বৃষ্টিজলম্, ভবতি। অতএব নিমিত্তং কারণঞ্চ নৈমিত্তিকং

ভাগ্যবশতঃ একত্র মিলিত হইয়াছে; অতএব শ্রদ্ধা, ধন এবং শাস্ত্র এই তিনই মিলিত হইয়াছে ॥২৯॥

(ন) রাজা। ভগবন্! পূর্ব্বে অভীষ্টসিদ্ধি, পরে সাক্ষাৎকার; অতএব আপনাদের অনুগ্রহ নূতন রকমের। কেন না—

---

(১)···অপূর্ব্বঃ···।

मातलिः । आयुष्मन् ! एवं प्रसीदन्ति विश्वगुरवः (१) । (प)

राजा । भगवन् ! इमामाज्ञाकरीं वो गान्धर्वेण विवाह-विधिनोपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि अत्रभवतो युष्मत्सगोत्रस्य कण्वस्य,

---

कार्य्ययोस्तयोः, अयं पूर्व्वोक्तरूपः, क्रमः पौर्व्वापर्य्यम्, नियत इति शेषः । तु किन्तु, तव प्रसादस्य सम्पत्कारणीभूतस्य अनुग्रहस्य, पुरः पूर्व्वमेव सम्पदः कार्य्यभूता मङ्गलादि-सम्पत्तयः, उत्पद्यन्ते तत्तद्दर्शिन इति शेषः । अतएव सर्व्वविलक्षणत्वादपूर्व्व एव युष्माक-मनुग्रहो मय्यवाप्तौ प्रत्यक्षेति भावः ।

अत्र तृतीयचरणार्थं प्रति पूर्व्वार्द्धगतवाक्यार्थानां हेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गम्, चतुर्थचरणे कार्य्यकारणयोः पौर्व्वापर्य्यविपर्य्ययरूपा अतिशयोक्तिश्च, अनयोः परस्पर-निरपेक्षतया संसृष्टिः ।

अत्र प्रियोक्तिर्नाम नाट्यलक्षणञ्च । तथा च दर्पणे—

"स्यात् प्रसादयितुं पूज्यं प्रियोक्तिर्हर्षभाषणम् ॥"

वंशस्थविलं वृत्तम् ॥३०॥

(प) मातलिरिति । विश्वगुरवो जगच्छ्रेष्ठाः, एवम् इत्थम्प्रकारमेव, प्रसीदन्ति सानुग्रहा भवन्ति ; अतएव नात्र किञ्चिदपूर्व्वत्वमिति भाव: ।

---

আগে ফুল ফুটে, পরে ফল জন্মে এবং আগে মেঘ দেখা দেয়, তা'র পর জল হয়। সুতরাং কারণ ও কার্য্যের এই ক্রম; কিন্তু আপনার অনুগ্রহের আগেই সম্পদ জন্মে! ॥৩০॥

(প) মাতলি। আয়ুষ্মন্! যাঁহারা জগতের গুরু, তাঁহারা এই ভাবেই প্রসন্ন হইয়া থাকেন।

---

(१) मातलिः । एवं विधातारः प्रसीदन्ति ।

पश्चादेनामङ्गुरीयकदर्शनारूढस्मृतिः ऊढपूर्वामवगतोऽहम्, तच्चित्रमिव मे प्रतिभाति (१)। (फ)

(फ) राजेति। वो युष्माकम्, आज्ञाकरीं किङ्करीम्, इमां शकुन्तलाम्, उपयम्य परिणीय, कस्यचित् कालस्य अतिक्रमानन्तरमित्यर्थः, बन्धुभिर्बान्धवस्थानीयैः शार्ङ्गरवादिभिः, आनीतामिमां शकुन्तलामिति सम्बन्धः, स्मृतिशैथिल्यात् स्मृतिभ्रंशाद्धेतोः, प्रत्यादिशन् निराकुर्वन्, अत्रभवतो मुनित्वेन पूजनीयस्य, यूयमेव गौणानि गौरवेण बहुवचनात् त्वमेव आदिपुरुषो यस्य तस्य, कण्वस्य समीपे, अपराद्धः कृतापराधः अस्मि, तत्कन्याया एव प्रत्यादेशादित्याशयः, अङ्गुरीयकदर्शनेन आरूढा मनस्युपस्थिता स्मृतिर्यस्य स तादृशोऽहम्, ऊढपूर्वां पूर्वपरिणीताम् इमां शकुन्तलामिति सम्बन्धः, तत् स्मृतिशैथिल्यं विस्मरणमिति यावत् चित्रमिव मे प्रतिभाति आश्चर्यमिव मे ज्ञानविषयीभवति, तत्कारणाभावादिति भावः।

अतएवात्र उपगूहनं नाम निर्वहणसन्ध्यङ्गम्। यथा दर्पणे—

"तद्भवेदुपगूहनम्। यत् स्यादद्भुतसम्प्राप्तिः।"

"वंशपरम्पराप्रसिद्धमादिपुरुषत्वासाधारणं गौरवम्" इत्युद्वाहतत्त्वे आर्त्तः।

(फ) রাজা। ভগবন্! আমি আপনাদের আজ্ঞাকারিণী এই শকুন্তলাকে গান্ধর্ববিধানে বিবাহ করিয়াছিলাম; তাহার পর কিছুকাল অতীত হইলে, ইঁহার বন্ধুগণ ইঁহাকে নিয়া গিয়াছিলেন, তখন আমি বিস্মৃতিবশতঃ ইঁহাকে প্রত্যাখ্যান করিয়া, আপনার বংশসম্ভূত পূজনীয় কণ্বের নিকট অপরাধী হইয়াছি; তাহার পর অঙ্গুরীদর্শনে আমার স্মরণ হইয়াছিল যে, আমি ইঁহাকে পূর্বে বিবাহ করিয়াছিলাম; সুতরাং আমার সেই বিস্মরণ বিচিত্র বলিয়া বোধ হইতেছে।

(१)···पश्चादङ्गुरीयकदर्शनात् ऊढपूर्वां तद्दुहितरमवगतोऽहम्।···युष्मत्-[illegible]···।

यथा गजो साधु समक्षरूपे (१)
कस्मिन्नपि क्रामति संशयः स्यात् ।
पदानि दृष्ट्वाथ भवेत् प्रतीतिः (२)
तथाविधो मे मनसो विकारः ॥३१॥

मारीचः । वत्स ! अलमात्मापराधशङ्कया, सम्मोहोऽपि त्वय्युपपन्न एव । श्रूयताम्—(३) (ब)

उपमाविन्यासेन तत् स्मृतिभ्रंशित्वस्य चित्रत्वं प्रतिपादयति यथेति । साधु सम्यक् समक्षं प्रत्यक्षीभूतं रूपमाकृतिर्यस्य तस्मिन् तथोक्ते, कस्मिन्नपि गजे हस्तिनि, क्रामति अतिक्रम्य गच्छति सति, यथा संशयः स्यात् 'अत्र गज आगतो न वा' इति सन्देहो भवेत्, अथ अनन्तरम्, पदानि तस्य गजस्य पदचिह्नानि दृष्ट्वा, प्रतीतिः 'इतो गज एव गत.' इति निर्णयो भवेत् ; तथाविधः तत्प्रकारः, मे मम मनसो विकारः मनोवृत्तेरन्यथा-त्वम्, आसीदिति शेषः । तथा च सम्यक् प्रत्यक्षभूतायां शकुन्तलायाम् 'इयं किं परिणीतपूर्वा' इति सन्देह आसीत्, परन्तु अङ्गुरीयात्मकचिह्नदर्शनेन 'परिणीतैव सा' इति निर्णयो जात इति भावः ।

अत्र श्रौतोपमालङ्कारः । इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥३१॥

(ब) मारीच इति । आत्मापराधस्य शङ्कया सम्भावनया, सम्मोहः स्मृतिभ्रंशः, उपपन्न एव सम्भवपर एव ।

---

কোনও হাতী ঠিক্ প্রত্যক্ষভাবে অতিক্রম করিয়া চলিয়া গেলে যেমন সংশয় হয় যে, 'হাতী গিয়াছে কি না' তাহার পর সেই হাতীর পায়ের চিহ্ন দেখিয়া অনুমানদ্বারা ঠিক্ হয় যে, 'নিশ্চয়ই হাতী গিয়াছে' আমার মনের বিকারও, সেইরূপই হইয়াছে ॥৩১॥

---

(१) यथा गजो नेति समक्षरूपे । (२) दृष्ट्वा तु ।
(३)···त्वय्युपपन्नः । श्रूयताम् ।

राजा। अवहितोऽस्मि। (भ)

मारीचः। यदैवाप्सरस्तीर्थावतरणात् प्रत्याख्यानविक्लवां शकुन्तलामादाय दाक्षायणीमुपगता मेनका, तदैव ध्यानादवगतवृत्तान्तोऽस्मि, दुर्वाससः शापादियं तपस्विनी सहधर्म्मचारिणी त्वया प्रत्यादिष्टा; स चाङ्गुरीयदर्शनावसानः शाप इति (१)। (म)

(भ) राजेति। अवहितोऽस्मि भवद्वाक्यमाकर्णयितुं कृतमनोयोगोऽस्मि।

(म) मारीच इति। अवतरत्यनेनेति अवतरणं घट्टः, अप्सरस्तीर्थस्य तदाख्यस्यापि शचीतीर्थस्य अवतरणात् घट्टात्। उपगतेति क्रियापेक्षयैव इदमपादानत्वम्, न पुनरादायेति क्रियापेक्षया तथात्वे "देव! पराङ्मुखेषु कल्मषिषेषु, सा निन्दन्ती स्वानि भाग्यानि बाला" इत्यादिपञ्चमाङ्कोक्तेन सह विरोधः स्यात्, तेन च राजधानीत एव शकुन्तलायहरणस्य प्रत्यायितत्वात्। ततश्च मेनका राजधानीतः शकुन्तलामादाय तदङ्गुरीयकान्वेषणाय अप्सरस्तीर्थे अवतीर्य्य, तत्र च तदप्राप्य पुनस्ततो दाक्षायणीमुपगतेति मन्तव्यम्। प्रत्याख्यानेन विक्लवां शोकाकुलाम्। दाक्षायणीमदितिम्, उपगता शकुन्तलाया रक्षणार्थमिति भावः। इयं तपस्विनी शोच्या शकुन्तला, सहधर्म्मचारिणी पत्नी। अङ्गुरीयकदर्शन एवावसानं समाप्तिर्यस्य स तथोक्तः। इति श्रूयतामिति पूर्व्वेणान्वयः। अतएव मुनिशापादेव जातत्वात् त्वयि दोषोऽनुपपन्न एवेति भावः।

(ব) কশ্যপ। বৎস! নিজের অপরাধ আশঙ্কা করিও না। তোমার বিস্মৃতি সঙ্গতই হইয়াছে। শোন—

(ভ) রাজা। মনোযোগী হইলাম।

(ম) কশ্যপ। যখনই মেনকা, শচীতীর্থ হইতে প্রত্যাখ্যানবিহ্বলা শকুন্তলাকে নিয়া অদিতির নিকট আসিয়াছিল, তখনই আমি ধ্যান

(१) प्रत्यर्थमुच्यम्…। ध्यानादवगतोऽस्मि…सहधर्म्मचारिणी…प्रत्यादिष्टा नान्यथेति। स चाभिज्ञानाङ्गुरीयकदर्शनावसानः।

রাজা। (সোচ্ছ্বাসমাত্মগতম্।) এষ বচনীয়ান্মুক্তোঽস্মি (১)। (ঘ)

শকু। (স্বগতম্।) দিট্ঠিআ অকারণপচ্চাদেসী ণ অজ্জউত্তো। ণ উণ সত্তং অত্তাণং সুমরেমি। অথবা ণ সুদো সুণ্ণহিঅ-আএ মএ অঅং সাবো, জদো সহীহিং অচ্চাঅরেণ সন্দিট্ঠম্হি 'সো রাআ জই তুমং ণ সুমরেদি, তদা এদং অঙ্গুলীঅঅং দংসেসি' ত্তি (২)। (ঙ)

(ঙ) দিষ্ট্যা অকারণপ্রত্যাদেশী নার্য্যপুত্রঃ। ন পুনঃ শপ্তমাত্মানং স্মরামি। অথবা ন শ্রুতঃ শূন্যহৃদয়য়া ময়ায়ং শাপঃ, যতঃ সখীভ্যামত্যাদরেণ সন্দিষ্টাস্মি, 'স রাজা যদি ত্বাং ন স্মরতি, তদা ইদমঙ্গুরীয়কং দর্শয়সি' ইতি।

(ঘ) রাজেতি। সোচ্ছ্বাসম্ অপরাধজনিতাত্মগ্লানিনিবৃত্তিসূচকেন উদ্গতশ্বাসেন সহিতম্। বচনীয়াৎ 'অকারণং শকুন্তলা প্রত্যাখ্যাতা' ইতি লোকাপবাদাৎ, মুক্তোঽস্মি তচ্ছাপবৃত্তান্তস্যাপি লোকে প্রচারসম্ভবাদিত্যাশয়ঃ।

(ঙ) শকু ইতি। দিষ্ট্যা ভাগ্যেন, অকারণপ্রত্যাদেশী বিনা হেতুং মম প্রত্যাখ্যান-কারী ন জাতঃ, দুর্ব্বাসসঃ শাপস্যৈব কারণস্য সত্ত্বাদিত্যাশয়ঃ। শপ্তং তচ্ছাপবিষয়ী-ভূতম্। শূন্যহৃদয়া চিন্তান্তরেণ অন্যমনস্কয়া। সখীভ্যাম্ অনসূয়াপ্রিয়ংবদাভ্যাম্, সন্দিষ্টাস্মি ভর্ত্তৃগৃহে গমনবেলায়ামিত্যর্থঃ।

করিয়া সমস্ত বৃত্তান্ত জানিতে পারিয়াছি যে, দুর্ব্বাসার শাপে তুমি স্বামী হইয়াও এই দুঃখিনী শকুন্তলাকে প্রত্যাখ্যান করিয়াছ; অঙ্গুরীদর্শনই সেই শাপের অন্ত।

(ঘ) রাজা। (উচ্ছ্বাসের সহিত স্বগত) এই লোকাপবাদ হইতে মুক্ত হইলাম।

(১) সোচ্ছ্বাসম্। (২)···অত্ত ণত···। অহবা পত্তা মএ হত্থি সাবো বিরহ-সুণ্ণহিঅআএ ণ বিদিদো, জদো সহীহিং সন্দিট্ঠাম্হি ভট্টুণো অঙ্গুলীঅঅং দংসইদব্বং ত্তি।

মারীচঃ। শকুন্তলাং বিলোক্য। বৎসে! বিদিতার্থাসি। তদিদানীং সহধর্ম্মচারিণং প্রতি ন ত্বয়া মন্যুঃ করণীয়ঃ। পশ্য—(১) (ল)

শাপাদসি প্রতিহতা স্মৃতিলোপরুক্ষে (২)
ভর্ত্তর্য্যপেততমসি প্রভুতা তবৈব।
ছায়া ন মূর্চ্ছতি মলোপহতপ্রসাদে
শুদ্ধে তু দর্পণতলে সুলভাবকাশা ॥৩২॥

অত্র নির্ণয়ো নাম নির্ব্বহণসন্ধ্যঙ্গম্‌—"নির্ণয়ঃ পুনঃ। অনুভূতার্থকথনম্‌" ইতি দর্পণলক্ষণাৎ।

(ল) মারীচ ইতি। বিদিতার্থাসি অবগতসর্ব্ববৃত্তান্তাসি। তদস্মাৎ, সহধর্ম্মচারিণং পতিম্‌, মন্যুঃ আত্মপ্রত্যাখ্যাননিবন্ধনঃ ক্রোধঃ, ন করণীয়ঃ, তস্যাস্তি সহধর্ম্মচরণস্যৈব ব্যাঘাত ইত্যাশয়ঃ।

"মন্যুর্দৈন্যে ক্রতৌ ক্রুধি" ইত্যমরঃ।

(র) শকুন্তলা। (স্বগত) ভাগ্যবশতঃ আর্য্যপুত্র বিনা কারণে প্রত্যাখ্যান করেন নাই। আমি কিন্তু নিজেকে অভিশপ্ত বলিয়া স্মরণ করিতে পারিতেছি না। অথবা আমি শূন্যহৃদয়া ছিলাম বলিয়া এই শাপ শুনিতে পাই নাই; যে হেতু সখীরা বিশেষ আদর করিয়া বলিয়াছিল যে, "যদি সেই রাজা তোমাকে স্মরণ না করেন, তবে এই আংটী দেখাইবে"।

(ল) কশ্যপ। (শকুন্তলার প্রতি দৃষ্টিপাত করিয়া) বৎসে! সমস্ত বৃত্তান্তই জানিতে পারিলে; সুতরাং এখন স্বামীর প্রতি তুমি ক্রোধ করিও না। দেখ—

(১) মন্যুঃ কার্য্যঃ…। (২)…স্মৃতিরোধরুক্ষে…।

রাজা। যথাহ ভগবান্। (ব)

মারীচঃ। বৎস! কচ্চিদভিনন্দিতস্ত্বয়া অস্মাভি-
র্বিধিবদনুষ্ঠিতজাতকর্ম্মাদিক্রিয়ঃ পুত্র এষ শাকুন্তলেয়ঃ (১)। (শ)

শাপাদিতি। ভর্ত্তরি পত্যৌ দুষ্মন্তে, শাপাৎ দুর্ব্বাসসোঽভিসম্পাতাৎ স্মৃতিলোপেন বিস্মরণেন হেতুনা নিষ্ঠুরে সতি, প্রতিহতা প্রত্যাখ্যাতা অসি, অপেততমসি ইদানীং বিগতবিস্মরণে, ভর্ত্তরি তস্মিন্নেব পত্যৌ দুষ্মন্তে, তবৈব প্রভুতা পত্নীলভ্যমাধিপত্যম্, বর্ত্তত ইতি শেষঃ। তথা চ ছায়া প্রতিবিম্বম্, মলেন ধূল্যাদিনা উপহতো নাশিতঃ প্রসাদো নির্ম্মলতা যস্য তস্মিন্ তাদৃশে, দর্পণতলে মুকুরোপরি ন মূর্চ্ছতি ন পততি; তু কিন্তু, শুদ্ধে নির্ম্মলে, দর্পণতলে তত্রৈব মুকুরোপরি, সুলভঃ অবকাশঃ প্রবেশো যস্যাঃ সা তথাবিধা, ভবত্যেবেতি শেষঃ।

অত্র ছায়াশকুন্তলয়োঃ সাম্যস্য প্রণিধানেন গম্যত্বাৎ দৃষ্টান্তোঽলঙ্কারঃ।

বসন্ততিলকা বৃত্তম্ ॥২২॥

(ব) রাজেতি। ভগবান্ মাহাত্ম্যবান্ মারীচঃ, যথাহ সত্যং ব্রবীতি। অতএব এতদুক্ত্যনুরূপমেবাচরণীয়মিতি ভাবঃ।

(শ) মারীচ ইতি। অস্মাভিঃ বিধিবৎ যথাশাস্ত্রম্ অনুষ্ঠিতাঃ জাতকর্ম্মাদয়ঃ ক্রিয়া যস্য সঃ, শকুন্তলায়া অপত্যমিতি শাকুন্তলেয়ঃ, এষ পুত্রঃ, ত্বয়া অভিনন্দিতঃ বিশেষেণাদৃতঃ কচ্চিৎ ইতি বেদিতুমিচ্ছামীত্যর্থঃ।

---

• স্বামী, দুর্ব্বাসার শাপে বিস্মৃতিবশতঃ নিষ্ঠুর হইলে তুমি প্রত্যাখ্যাত হইয়াছিলে; এখন সে বিস্মৃতি গিয়াছে; সুতরাং সে স্বামীতে তোমারই প্রভুত্ব হইয়াছে। ধূলিপ্রভৃতি পড়িয়া নির্ম্মলতা নষ্ট করিলে সে দর্পণে প্রতিবিম্ব পড়ে না; কিন্তু নির্ম্মল দর্পণে অনায়াসেই প্রতিবিম্ব পড়িয়া থাকে ॥৩২॥

(ব) রাজা। ভগবান্ যথার্থই বলিয়াছেন।

(১)···বিধিবদস্মাভিরনুষ্ঠিতজাতকর্ম্মা পুত্রঃ···।

রাজা। ভগবন্! অত্র খলু মে বংশপ্রতিষ্ঠা। ইতি বালকং হস্তেন গৃহ্লাতি (১)। (ষ)

মারীচঃ। ভাবিনং চক্রবর্ত্তিনমেনমবগচ্ছতু ভবান্। পশ্যতু—(২) (স)

রথেনানুদ্ঘাতস্তিমিতগতিনা তীর্ণজলধিঃ
পুরা সপ্তদ্বীপাং জয়তি বসুধামপ্রতিরথঃ।
ইহায়ং সত্ত্বানাং প্রসভদমনাৎ সর্ব্বদমনঃ
পুনর্যাস্যত্যাখ্যাং ভরত ইতি লোকস্য ভরণাৎ ॥৩৩॥

"কচ্চিত্ কামপ্রবেদনে" ইত্যমরঃ। জাতকর্ম্ম সংস্কারবিশেষঃ "প্রসবে জাতকর্ম্ম চ" ইতি যাজ্ঞবল্ক্যবচনাৎ।

(ষ) রাজেতি। অত্র খলু পুত্রান্তরাভাবাৎ অস্মিন্নেব পুত্রে, বংশস্য প্রতিষ্ঠা স্থিতিঃ। অতএব অবশ্যমেবাভিনন্দিত ইত্যাশয়ঃ।

(স) মারীচ ইতি। এনং পুত্রম্, ভাবিনং ভবিষ্যন্তম্, চক্রবর্ত্তিনং সার্ব্বভৌমং সমগ্রপৃথিবীশ্বরমিত্যর্থঃ। কথং চক্রবর্ত্তী ভাবীত্যাহ পশ্যত্বিতি।

"চক্রবর্ত্তী সার্ব্বভৌমঃ" ইত্যমরঃ।

(শ) কশ্যপ। বৎস! আমি যথাবিধানে এই বালকের জাত-কর্ম্মাদি কার্য্য করিয়াছি, সুতরাং তুমি এই শকুন্তলার পুত্রটীকে বিশেষ-রূপে আদর করিয়াছ ত?।

(ষ) রাজা। ভগবন্! এই বালকের উপরেই আমার বংশরক্ষার ভার রহিয়াছে। (এই বলিয়া হস্তদ্বারা বালকটীকে ধরিলেন।)

(স) কশ্যপ। তুমি ইহাকে ভাবী সম্রাট্ বলিয়া জানিবে। দেখ—

(১)·· বালকমিত্যাদি পুস্তকান্তরে নাস্তি।
(২)···ভূত্বা ভাবিনম্···। পদ্য।

রাজা। ভগবৎকৃতসংস্কারেঽস্মিন্ সর্ব্বমাশংসে (১)। (ছ)

রথেনেতি। অয়ং তব পুত্রঃ, অপ্রতিরথঃ প্রতিদ্বন্দ্বিরহিতঃ সন্, অনুদ্ঘাতেন আকাশে চলনাৎ প্রতিঘাতাভাবেন স্তিমিতা স্থিরা উদ্ঘাতরহিতেতি যাবৎ গতির্গমনং যস্য তেন তাদৃশেন, রথেন রথাকারেণ বিমানেন, ঘোটকচালিতেন সামান্যরথেন জলধিতরণাসম্ভবাৎ, তীর্ণা অতিক্রান্তা জলধয়ঃ সমুদ্রা যেন স তাদৃশঃ সন্, পুরা আগামিকালে, সপ্ত দ্বীপা যস্যাং তাং সপ্তদ্বীপাং সমগ্রামেবেতি তাৎপর্য্যম, বসুধাং পৃথিবীম, জয়তি জেষ্যতীত্যর্থঃ। ইহ আশ্রমে, সত্ত্বানাং সিংহাদিজন্তূনাম্, প্রসভং বলেন দমনাৎ খর্ব্বকরণাৎ হেতোঃ, সর্ব্বদমন ইত্যুচ্যতে ইতি শেষঃ, পুনঃ লোকস্য ভরণাৎ রাজ্যং প্রাপ্য জগতো রক্ষণাৎ হেতোঃ, ভরত ইতি আখ্যাং নাম, যাস্যতি প্রাপ্স্যতি। অতএব অয়মসাধারণো বালকঃ অবশ্যমেবাভিনন্দনীয় ইত্যভিপ্রায়ঃ।

"নিকটাগামিকে পুরা" ইতি "দ্রব্যাসুব্যবসায়েষু সত্ত্বমস্ত্রী তু জন্তুষু" ইতি চামরঃ।

পুরাশব্দযোগে জয়তীত্যত্র "প্রযোগতশ্চ" ইতি ভবিষ্যৎকালে বর্ত্তমানা। সর্ব্বান্ দময়তীতি সর্ব্বদমনঃ নন্দ্যাদিত্বাৎ কর্ত্তরি যুপ্রত্যয়ঃ। ভরতীতি ভরতঃ পৃষোদরাদিত্বাৎ নিপাতঃ।

রথেন তীর্ণজলধিরিতি লিখতা মহাকবিনা কালিদাসেনাপি তৎকালে ভারতে বিমানব্যবহার আসীদিতি বাঢ়মঙ্গীকৃতমিতি প্রতীয়তে।

শিখরিণী বৃত্তম্ ॥৩৩॥

(ছ) রাজেতি। ভগবতা মারীচেন কৃতাঃ সংস্কারা জাতকর্ম্মাদিসংস্কারকর্ম্মাণি যস্য তস্মিন্, অস্মিন্ মম পুত্রে, সর্ব্বং জলধিতরণাদিকম্, আশংসে সম্ভাবয়ামি; ভবৎকৃতসংস্কারতয়ৈব মহাতেজস্বিত্বসম্ভবাদিতি ভাবঃ। তথা আঙ্গিরাঃ—

---

তোমার এই পুত্র বিপক্ষবিহীন হইয়া, প্রতিঘাত না লাগায় স্থিরগতি রথে সমুদ্র পার হইয়া, সপ্তদ্বীপা পৃথিবীকে জয় করিবে; এই আশ্রমে বলপূর্ব্বক সকল জন্তুকে দমন করায় ইহাকে 'সর্ব্বদমন' বলা হয়, ভবিষ্যতে জগতের ভরণ করায় পুনরায় 'ভরত' এই নাম ধারণ করিবে ॥৩৩॥

---

(১) রাজা। ভগবতা কৃতসংস্কারে সর্ব্বমস্মিন্ বয়মাশাস্মহে।

अदितिः । इमाए दुहिदिमणोरहसम्पत्तीए कण्णो दाव सुदवित्थारो करीअदु, दुहिदिवच्छला मेणआ उण इध मं परिअरन्ती सण्णिहिदा ज्जेव (१) । (ख)

शकु । आत्मगतम् । मणोगदं मे वाहरिदं भअवदीए (२) । (क)

(ख) अनया दुहितृमनोरथसम्पत्त्या कण्वस्तावत् श्रुतविस्तारः क्रियताम्, दुहितृवत्सला मेनका पुनरिह मां परिचरन्ती सन्निहितैव ।

(क) मनोगतं मे व्याहृतं भगवत्या ।

"चित्रं कर्म्म यथानेकै रङ्गैरुन्मील्यते शनैः ।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्व्वकैः ॥"

(ख) अदितिरिति । दुहितुः सुतायाः शकुन्तलायाः मनोरथसम्पत्त्या पतिपुत्र-समागमात् अभिलाषपूर्णतया, श्रुतो विस्तारो विस्तृतवृत्तान्तो येन स तादृशः । परिचरन्ती शुश्रूषमाणा । अतो मेनकान्तिके वार्त्ताप्रेषणस्य नास्ति प्रयोजनमिति भावः ।

(क) शकु इति । भगवत्या अदित्या, व्याहृतमुक्तम् । तथा च तातकण्वान्तिके वार्त्ताप्रेषणं ममाभिप्रेतमासीदिति भावः ।

(হ) রাজা। আপনি জাতকর্ম্মাদি সংস্কার করিয়াছেন বলিয়া এ বালকের উপরে সমস্তেরই আশা করি।

(খ) অদিতি। কন্যার এই অভিলাষ পূর্ণ হওয়ায়, ইহার বিস্তৃত সংবাদ কণ্বকে দেওয়া হউক; কন্যাবৎসলা মেনকা ত আমার পরিচর্য্যা করতঃ এইখানেই উপস্থিত আছে।

(ক) শকুন্তলা। (স্বগত) ভগবতী অদিতিদেবী আমার মনোগত কথাই বলিয়াছেন।

(१)···कण्वोवि···इह एव्व उवचरन्ती चिट्ठइ ।

(२)···अविहदं भअवदीए ।

मारीचः। तपःप्रभावात् सर्वमिदं प्रत्यक्षं तत्रभवतः काश्यपस्य (१)। (ख)

राजा। अतः खलु ममानतिक्रुद्धो मुनिः। (ग)

मारीचः। तथाप्यसौ दुहितुः सपुत्रायाः पत्या परिग्रह-प्रियमस्माभिः श्रावयितव्यः। कः कोऽत्र भोः! (२)। (घ)

प्रविश्य शिष्यः। भगवन्! अयमस्मि। (ङ)

---

(ख) मारीच इति। तत्रभवतः अपत्यत्वेऽपि महातपस्वितया माननीयस्य।

(ग) राजेति। अतः खलु आद्यन्तवर्त्तान्तस्य प्रत्यक्षत्वादेव, मुनिः कण्वः, मम सम्बन्धे, अनतिक्रुद्धः, अभिशम्पाताकरणात् फलादर्शनेन च तदनुमानादिति भावः। अतिमन्दस्वरत्वेन च कन्याकष्टदर्शनेन किञ्चित् क्रुद्ध इत्यपि भावः।

(घ) मारीच इति। असौ कण्वः। परिग्रहो ग्रहणमेव प्रियः प्रीतिकरो विषय-स्तम्, "ण्यन्ते कर्त्तृ कर्म्मैव" इत्यप्रधाने कर्म्मणि प्रत्ययः।

(ङ) प्रविश्येति। अयमस्मि आगत इति शेषः।

(খ) কশ্যপ। তপস্যার প্রভাবে সে কণ্বের এ সমস্তই প্রত্যক্ষ হইতেছে।

(গ) রাজা। এই জন্যই, মহর্ষি কণ্ব আমার উপরে বিশেষ ক্রুদ্ধ হন নাই।

(ঘ) কশ্যপ। তথাপি, পুত্রের সহিত কন্যাকে তাহার পতি যে গ্রহণ করিয়াছেন, এই প্রীতিকর সংবাদ উঁহাকে আমাদের শুনান উচিত। কে, এখানে কে আছ হে?।

(ঙ) শিষ্য। (প্রবেশ করিয়া) ভগবন্! এই আমি আছি।

---

(१) क्वचित् कण्वस्येति नास्ति।

(२) असौ प्रियमस्माभिरावेदयितव्यः···।

मारीचः। वत्स! गालव! मद्वचनादिदानीमेव वैहायसा गत्वा तत्रभवते कण्वाय प्रियमावेदय यथा पुत्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्मन्तेन परिगृहीतेति। (च)

शिष्यः। यथाज्ञापयन्ति गुरवः। इति निष्क्रान्तः (१)। (छ)

मारीचः। राजानं प्रति। वत्स! त्वमपि सापत्यदारः सख्युराखण्डलस्य रथमारुह्य स्वां राजधानीं प्रतिष्ठस्व (२)। (ज)

(च) मारीच इति। विहायस इयमिति वैहायसी तया आकाशवर्त्मना इत्यर्थः। किन्तत् प्रियमित्याह यथेति। तस्याः शकुन्तलाया एव शापनिवृत्तौ, स्मृतिमता शकुन्तलापरिचयस्मरणवता।

(छ) शिष्य इति। गुरव इति गौरवाद्बहुवचनम्।

(ज) मारीच इति। अपत्यदारैः पुत्रस्त्रीभ्यां सहेति सापत्यदारः, आखण्डलस्य इन्द्रस्य। स्वां स्वकीयाम्, प्रतिष्ठस्व गच्छ।

"वत्से! विदितार्थासि" इत्यारभ्य एतदन्ते सन्दर्भे कर्त्तव्यविषयाणामुपन्यासात् ग्रथनं नाम निर्वहणसन्ध्यङ्गम्। यथा दर्पणे—

"उपन्यासस्तु कार्य्याणां ग्रथनम्।"

(চ) কশ্যপ। বৎস! গালব! আমার বাক্যানুসারে, এখনই আকাশগতিতে যাইয়া, কণ্বকে প্রীতিকর সংবাদ জানাও যে, শকুন্তলার শাপনিবৃত্তি হইলে, রাজা দুষ্মন্তের স্মরণ হইয়াছে, তাই তিনি পুত্রবতী শকুন্তলাকে গ্রহণ করিয়াছেন।

(ছ) শিষ্য। গুরুদেব যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল।)

---

(१) शिष्यः। यदाज्ञापयति भगवान्।

(२) मारीचः। वत्स! त्वमपि सापत्यदारसहितः...आरुह्य राजधानीं...।

राजा। सप्रणामम्। यदाज्ञापयति भगवान्।

मारीचः। सम्प्रति हि—

तव भवतु बिड़ौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयालम्।
युगशतपरिवृत्तैरेवमन्योन्यकृत्यैः
जयतमुभयलोकानुग्रहश्लाघनीयैः (१) ॥३४॥

तवेति। वेवेष्टीति विट्, व्यापकम् ओजस्तेजो यस्य स बिड़ौजा इन्द्रः, तव प्रजासु मध्ये, प्राज्या प्रचुरा वृष्टिर्यथाकालवर्षणं यस्मात् स तादृशो भवतु, त्वमपि वितता विस्तृतभावेनानुष्ठिता यज्ञा येन स तथोक्तः सन्, वज्रिणं वज्रधारिणमिन्द्रम्, अलमत्यर्थम्, प्रीणय प्रीतं कुरु। युगशतं सत्यादिक्रमेण शतयुगं यावत् परिवृत्तैः सर्वतोभावेन वर्त्तमानैः, उभयलोकस्य स्वर्गमर्त्त्यात्मकभुवनद्वयस्य अनुग्रहेण यज्ञद्वारा वृष्टिद्वारा च उपकारेण श्लाघनीयैः प्रशंसनीयैः, एवमित्थम् अन्योन्यकृत्यैः परस्पर-कार्य्यैः, जयतं त्वमिन्द्रश्च युवाम् उत्कर्षेण वर्त्तताम्। युवयोः कदापि प्रीतिभङ्गो मा भवत्विति भावः।

अत्र न केवलं बिड़ौजाः त्वमपीति अर्थान्तरापतनादर्थापत्तिरलङ्कारः।

"इन्द्रो मरुत्वान् मघवाः स्यादयमपि कथितो स्त्रैविंड़ौजा बिड़ौजः" इति दीपालितः।
"प्रभूतं प्रचुरं प्राज्यम्" इत्यमरः।

मालिनी वृत्तम् ॥३४॥

(ञ) কশ্যপ। (রাজার প্রতি) বৎস! তুমিও, সখা ইন্দ্রের রথে আরোহণ করিয়া, স্ত্রী ও পুত্রের সহিত নিজের রাজধানীতে প্রস্থান কর।

রাজা। (প্রণামপূর্ব্বক) ভগবান্ যাহা আদেশ করেন।

কশ্যপ। এখন, ইন্দ্র তোমার প্রজাদের মধ্যে প্রচুর বর্ষাকারী হউন, তুমিও বিস্তৃতভাবে যজ্ঞ করিয়া ইন্দ্রকে অত্যন্ত সন্তুষ্ট কর; স্বর্গ ও মর্ত্ত্য

(१) त्वमपि च प्रीणयस्व…। युगशतपरिवर्त्तान्…नयतमुभय…।

राजा। भगवन्! यथाशक्ति श्रेयसे यतिष्ये। (ञ)

मारीचः। वत्स! किन्ते भूयः प्रियमुपहरामि? (१)। (ञ)

राजा। अतः परमपि प्रियमस्ति?। तथाप्येतदस्तु—(२) (ट)

---

(ञ) राजेति। श्रेयसे मङ्गलाय भवदुपदिष्टयज्ञादिमङ्गलविधानायेत्यर्थः, यथाशक्ति यतिष्ये यत्नं करिष्यामि।

(ञ) मारीच इति। भूयः इतोऽधिकम्, प्रियं प्रीतिकरं विषयम्, उपहरामि उपहारवत् प्रयच्छामि। तद्ब्रूहीति भावः।

"तव भवतु बिडौजाः" इत्यारभ्य एतदन्ते सन्दर्भे काव्यसंहारो नाम निर्वहणसन्ध्यङ्गम्। तथा च दर्पणे—

"वरप्रदानसम्प्राप्तिः काव्यसंहार इष्यते।"

(ट) राजेति। अतः परमपि त्वया यत् कृतं ततोऽधिकमपि प्रत्याख्यानान्मदकार्येव गौतमेन अतीवदुर्लभया पत्न्या सह यत् सम्मेलनं यच्च अपुत्रकस्य औरसपुत्रेणैव सम्मेलनं त्वया कृतम्, तदधिकमपीत्यर्थः, प्रियं प्रीतिकरं वस्तु, अस्ति वाकुत्राहन्ते किम्? कथमपि नेत्यर्थः। एतदनुपदमुच्यमानम्।

---

এই উভয় লোকের উপকার করায় প্রশংসনীয় এবং শতযুগপর্য্যন্তস্থায়ী এইরূপ পরস্পরের কার্য্যে, তোমরা দুই জনেই উৎকর্ষ লাভ কর ॥৩৪॥

(ঝ) রাজা। ভগবন্! শক্তি অনুসারে মঙ্গলের জন্য চেষ্টা করিব।

(ঞ) কশ্যপ। বৎস! তোমার আর কি প্রিয়কার্য্য করিব?।

---

(१) कथित् वत्स इति नास्ति।

(२) राजा। अतः परमपि प्रियमस्ति। यदि भगवान् प्रसन्नः प्रियं कर्त्तुमिच्छति। तर्हीदमस्तु।

भरतवाक्यम्। (ठ)

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती न हीयताम् (१)।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः ॥३५॥

(ठ) भरतेति। भरतानां नटानां नटरूपेणाविर्भूतानां तेषामित्यर्थः, वाक्यं "प्रवर्त्तताम्" इत्याद्युक्तिः। अत्रेदमवधेयम्—प्रस्तावनातः परं नटानामेव दुष्मन्तादि-तत्तत्पात्ररूपेण रङ्गालये आविर्भावेऽपि नटरूपेण आविर्भावासम्भवात् आदौ नटरूपेणैव नान्दीरूपमङ्गलाचरणस्य कृतत्वात् अन्ते च तद्रूपेणैव मङ्गलाचरणस्य कर्त्तव्यत्वात् भरतवाक्यमित्युक्तम्।

"भरता इत्यपि नटाश्चारणाश्च कुशीलवाः" इत्यमरः।

प्रवर्त्ततामिति। पार्थिवः सर्वो राजा, प्रकृतीनां प्रजानां हिताय हितसाधनाय प्रवर्त्ततां प्रवृत्तो भवतु, श्रुतिभिर्वेदैः "देवीं वाचं स्तवीमहे" इत्यादिवेदवाक्यैः, महती प्रकाशितमाहात्म्या सरस्वती भारती, न हीयतां लोकैर्न परित्यज्यताम्। परिगता सर्वत्र गता सर्वव्यापिनीत्यर्थः शक्तिः सामर्थ्यं यस्य स तथोक्तः, आत्मना भवतीति आत्मभूः स्वयम्भूः, नीलश्चासौ लोहितश्चेति नीललोहितो महादेवः, ममापि च दुष्मन्तस्य, कालिदासस्य भरतस्य चेति व्यज्यते, पुनर्भवं पुनर्जन्म, क्षपयतु तत्त्वज्ञानजननेन मुक्तिसम्पादनात् नाशयतु।

अत्र यतः श्रुतिमहती अतो न हीयतामिति हानाभावं प्रति श्रुतिमहतीपदस्यार्थो

(ট) রাজা। ইহার পরেও কি প্রিয়কার্য্য আছে। তথাপি ইহা হউক।

(ঠ) (নটদিগের উক্তি)

---

(१) स्तुतिमहता महीयताम्।

इति निष्क्रान्ताः सर्वे ।

## सप्तमोऽङ्कः (१) ।

## समाप्तमिदं महाकविश्रीकालिदासविरचितमभिज्ञान-शकुन्तलनामकं नाटकम् ॥०॥

—०:*:०—

हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः प्रथमार्द्धे एकस्य तकारस्य सकृत् साम्यात् वृत्त्यनुप्रासश्च, अनयोर्मिथो निरपेक्षतया संसृष्टिः। परिगतशक्तिरित्यनेन च सर्वशक्तिमत्ता-सूचनेन तत्त्वज्ञानजननशक्तिरस्तीति सूचितम्, आत्मभूरित्यनेन च अजत्वसूचनेन नील-लोहितस्य ब्रह्मत्वं सूचितमिति न अपुष्टार्थत्वदोषः।

अत्र प्रशस्तिर्नाम निर्वहणसन्धेरङ्गम्। यथा दर्पणे—

"नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते ;"

"प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः" इत्यादि मेदिनी।

पुरा जुह्वतो ब्रह्मणो ललाटस्वेदे यत् तेजोऽधिष्ठितं तदग्नौ निपत्य नीलं भूत्वा लोहितमभूत्ततो जात इति। तदुक्तं स्कान्दे—

"नीलं येन समाक्रान्तु रजाभं लोहितं त्विषा।

नीललोहित इत्येवं तेनासावभवत् प्रभुः ॥"

"जन्महरौ भवौ" इत्यमरः।

हन्त! भारतसुदिनजन्मना महाकविना श्रुतिमहत्तया यस्या एव सरस्वत्या अन्ताक-मुपदिष्टम्, साम्प्रतं श्रुतिनिन्दितसरस्वतीसेवनेन सा नाम दीना सरस्वती प्रायेणैव परिहीना। तस्मात् श्रुतिमहत्त्वीवर्जनेनैव अर्जितेयमश्रुतदशा भारतवासिभिरिति।

रुचिरा नाम वृत्तम्—"जभौ सजौ गिति रुचिरा चतुर्ग्रहैः" इति लक्षणात् ॥३५॥

রাজা, প্রজাবর্গের হিতসাধনের জন্ত প্রবৃত্ত হউন ; বেদ যাঁহার

(१) इति सप्तमोऽङ्कः।

জানকীবিক্রমং নাম নাটকং বীররৌদ্রবৎ।
নাটিকামুজ্জ্বলরসাং শ্রীবিরাজসরোজিনীম্ ॥১॥
বিয়োগবৈভবাখ্যানং খণ্ডকাব্যমনন্তরম্।
নানাবন্ধং মহাকাব্যং রুক্মিণীহরণাভিধম্ ॥২॥
স্মৃতিচিন্তামণিং নাম সংক্ষিপ্তস্মৃতিসংগ্রহম্।
উত্তররামচরিত-টীকাং সর্বার্থবোধিনীম্ ॥৩॥
মালবিকাগ্নিমিত্রস্য মালতীমাধবস্য চ।
টীকাং দশকুমারস্য তথা কাদম্বরীগতাম্ ॥৪॥
শ্রীবঙ্গীয়প্রতাপাখ্যং নাটকং বঙ্গগৌরবম্।
সাহিত্যদর্পণে টীকাং মেঘদূতে চ তাং ততঃ ॥৫॥
বসন্তসুষমাখ্যানং ব্যাখ্যানং পূর্ণনূতনম্।
নির্মলঞ্চ বিনির্মায় মৃচ্ছকটিকরূপকে ॥৬॥
বয়োবয়ীনাগসুধাংশুমানে শকাব্দকে শ্রাবণপূর্ণিমায়াম্।
টীকামভিজ্ঞানশকুন্তলস্য শিবপ্রসাদাদনয়ৎ সমাপ্তিম্ ॥৭॥
কোটালিপাড়োনশিয়ানিবাসী নকীপুরীশস্য সভাপ্রবাসী।
সত্কাব্যপীঠেঽধ্যাপনমুখ্যকর্মা গাঙ্গাধরিঃ শ্রীহরিদাসশর্মা ॥৮॥

ইতি গঙ্গাধরবিদ্যালঙ্কারভট্টাচার্য্যাত্মজ-মহামহোপাধ্যায-ভারতাচার্য্য-শ্রীহরিদাস-
সিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াম্ অভিজ্ঞানশকুন্তলটীকায়া-
মভিজ্ঞানকৌমুদ্যাং সপ্তমাঙ্কবিবরণং সমাপ্তম্ ॥০॥

---

মাহাত্ম্য প্রকাশ করিতেছেন, সেই ভাষাকে যেন লোক পরিত্যাগ করে না এবং সর্বশক্তিমান্ স্বয়ম্ভূ মহাদেব, আমারও পুনর্জন্ম নিবৃত্ত করুন ॥৩৫॥

( ইহার পর সকলে চলিয়া গেল। )

সপ্তম অঙ্ক সমাপ্ত ॥০॥

---

Publi. Li